सम्पूर्ण

बृहत् कर्मकाण्ड पद्धति

सबै षोडशसंस्कार समेटिएको

pdf.upayogibooks.com

ज्योतिर्विदाचार्य, वास्तुशास्त्री पं. कैलाश दाहाल

खोटाङ, ऐसेलुखर्क–८, दिम्मापातेल

हाल : कामनपा–६, बौद्ध, कुमारीगाल

काठमाडौं

फोन : ०१–४११४१४९

कृति	:	सम्पूर्ण बृहत् कर्मकाण्ड पद्धतिः
लेखक	:	ज्योतिर्विदाचार्य, वास्तुशास्त्री पं. कैलाश दाहाल
प्रकाशक	:	सीता दाहाल, दृशान दाहाल, प्रतीका दाहाल
प्रथम संस्करण	:	वि.सं. २०७० घटस्थापना नवरात्रारम्भ
पुनः प्रकाशन	:	वि.सं. २०७५ हरिबोधनी एकादशी
		वि.सं. २०७८ घटस्थापना नवरात्रारम्भ
		वि.सं. २०७९ फागुपूर्णिमा
सर्वाधिकार	:	लेखकमा छ साथै यस पुस्तकका मूल मन्त्रहरू बाहेक कोष्ठका शब्दहरू कुनै पुस्तकमा प्रयोग गरेको पाईएमा प्रतिलिपि कानुनबमोजिम कारबाही हुनेछ ।
प्रकाशन प्रति	:	११०० प्रति
मूल्य	:	रु. १,६००।– (बाक्लो गाता)
		रु. १,४००।– (सामान्य गाता)
कभर डिजाईन/ले-आउट	:	खड्गप्रसाद खनाल
मुद्रण	:	एलायन्स प्रिन्टर्स एण्ड मिडिया हाउस प्रा.लि.
		सरस्वतीनगर, चावहिल, काठमाडौं
ISBN	:	978-9937-2-6906-3
website	:	https://upayogibooks.com

राष्ट्रिय धर्मसभा, नेपाल

Rashtriya Dharmasabha, Nepal

केन्द्रीय कार्यालय का.म.पा. ३२, अनामनगर, काठमाडौं, नेपाल

Central Office Kathmandu-32, Anamnagar, Nepal

जिल्ला/शाखा.....

द.नं. २५६

मितिः २०७०।३।१४

सम्मति

दुर्गम जिल्ला खोटाङको दूरवर्ती गाउँ ऐसेलुखर्क-८, दिम्मापातेलमा जन्मेर अध्ययन र परिश्रमको बलमा काठमाडौंमा आई कर्मकाण्ड, पौरोहित्य र ज्योतिष एवं धर्मसंस्कृतिको विशाल फाँटमा क्रियाशील रहनुभएका युवा व्यक्तित्व ज्यो. पं. श्री कैलाश दाहालले तयार पार्नुभएको सम्पूर्ण "बृहत् कर्मकाण्ड पद्धति" पुस्तक प्रकाशनमा आउन लागेकोमा मलाई अत्यन्त हर्ष लागेको छ। यस्तो उपयोगी पुस्तक नेपाली धार्मिक समाजलाई दिन लाग्नुभएकोमा म श्री दाहाललाई हार्दिक साधुवाद दिन चाहन्छु।

नेपाली समाज धर्मप्राण छ। धर्म र संस्कृतिको प्रचार र प्रयोगद्वारा नै नेपालीहरू संसारमा सुयश फैलाउन सक्तछन्। त्यसमा पनि पौरोहित्य वा कर्मकाण्डको क्षेत्र यहाँ धेरै उर्वर छ। त्यसैले कैलाशजीले यसै क्षेत्रमा रहेर आफ्नो अनुभवसमेतलाई आधार बनाई तयार पार्नुभएको यो पुस्तक सबैका लागि उपयोगी र ग्राह्य हुनेछ भन्ने म ठान्दछु।

हाम्रो कर्मकाण्डपद्धति अति वैज्ञानिक छ। व्यवहार जगत्देखि परमार्थसम्म सपार्ने हाम्रो विधिविधान र कर्मपद्धति हाम्रो जीवनकै अङ्ग हो। यसलाई हामीले छाड्नु हुँदैन। "धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः" हाम्रो मूल मान्यता हो। **स्वधर्मे निधनं श्रेयः** हाम्रो मन्त्र हो। **सर्वे भवन्तु सुखिनः** हाम्रो आदर्श हो। हामी यिनै चिन्तनमा रमाउँछौं। यस पुस्तकले कर्मकाण्ड गर्ने र गराउने दुवै थरीलाई मद्दत पुऱ्याउँदछ। कैलाशजीको प्रयास सफल होस्। पाठकले यो पुस्तक खोजी खोजी पढुन्। यिनै शब्दका साथ कृतिकारलाई धन्यवाद दिँदै पुस्तकको सफलताको कामना व्यक्त गर्दछु।

(प्रा.डा. माधव भट्टराई)
अध्यक्ष
राष्ट्रिय धर्मसभा, नेपाल

सम्मति

हाम्रो पूर्वी नेपालको दूरवर्ती दुर्गम जिल्ला खोटाङ ऐसेलुखर्कमा जन्मनुभएर अध्ययनशीलता र परि श्रमशीलताको निरन्तरताले जन्मदेखि मृत्युसम्मका हाम्रा संस्कार, ज्योतिष र पौरोहित्य आदि विद्यामा निपुणता प्राप्त गर्नु भई आफ्नो परिश्रमको फल सम्पूर्ण "बृहत् कर्मकाण्ड पद्धति" बनाई प्रकाशन गर्न लाग्नुभएको देख्दा ज्योतिर्विदाचार्य पं. कैलाश दाहालज्यू यस धर्मका अनुयायीहरू सबैका स्नेहभाजक र खुसियालीका पात्र बन्नुभएको छ।

हाम्रो यो धर्म वैदिक सनातन धर्म हो, अन्य धर्महरूभन्दा माथिल्लो तहको उच्च एवं ठूलो धर्म हो। संसारमा अन्य धर्महरू समाजको आफ्नो परम्परा र सामाजिक व्यवहारबाट बनिएका हुन् भन्ने कुरा उनीहरूको इतिहासले नै पुष्टि गरेको छ। वस्तुतः हाम्रो यो वैदिक सनातन धर्म मानवरचित धर्म होइन। परब्रह्म परमात्माले मानवकल्याणका लागि मानवसमाजलाई दिनुभएको वेदविहित धर्म हो।

ज्ञानको भण्डार वेदलाई कुन युगमा कसले बनाएको हो भनेर कसैले पनि भन्न सकेका छैनन्। विश्वमै सबैभन्दा ठूला विद्वान् व्यास जस्ता महर्षिले पनि "अनादिनिधना नित्यं वागुत्सृष्टा स्वयम्भुवा" भनेर परमात्मा परमेश्वरबाटै प्राप्त भएको हो भनी प्रमाणित गरेका छन्। कालिदासजस्ता अद्वितीय विद्वान् महाकविले पनि –

अदूधातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम् ।
कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो विभुः ॥

भनेर वेदवाणी परमेश्वरबाटै प्राप्त भएको हो भनेका हुन्। यस पद्धतिमा ज्योतिर्विदाचार्य पं. कैलाशजीले समेट्नुभएका हाम्रा यी धार्मिक संस्कारहरूलाई प्रथम सम्राट मनुमहाराजले पनि आफ्नो मनुस्मृतिमा "वेदोऽखिलो धर्ममूलम्" भनी उल्लेख गर्नुभएको छ र वेदविहित धर्म हो भन्नुभएको हुनाले पनि हाम्रो यो वैदिक सनातन धर्म सबैभन्दा उच्च धर्म हो भन्नमा कति पनि पछि पर्नु पर्दैन।

वैदिक वाङ्मय वचनमा आधारित हाम्रा संस्कारपद्धतिहरूलाई हाम्रो जीवनका अभिन्न अङ्ग बनाई लोकमा सुख, शान्ति र समृद्धि दिने परलोकमा मोक्ष गति दिलाउने सक्षम साधन बनाएर परमात्माले हामीलाई नै समर्पित गर्नुभएको धर्म हो।

पौरोहित्यको फराकिलो फाँटमा फैलिएर छरिवरी भइरहेका पवित्र यी हाम्रा संस्कार पद्धतिहरूलाई कैलाशजीले एउटै ठाउँमा सँगालेर सम्पूर्ण "बृहत् कर्मकाण्ड पद्धति" पुस्तक बनाई प्रकाशन गरेर हामीलाई नै दिन लाग्नुभएकोमा म उहाँप्रति हार्दिक कृतज्ञता प्रकट गर्दै धन्यवाद पनि दिन चाहन्छु।

हाम्रा जति पनि संस्कार पद्धतिहरू छन् र जति पनि पूजाविधिहरू छन्, ती सबै पद्धतिहरू वैदिक मन्त्रहरूबाटै सुसज्जित छन्। देववाणी संस्कृत वाणीबाटै विभूषित भएका छन्।

वेदवाणी परं ब्रह्म परमात्माबाटै प्राप्त भएको हो र संस्कार पद्धतिहरू वेदमन्त्रबाटै निर्मित एवं प्रचलित भएकाले "वेदोऽखिलो धर्ममूलम्" भन्ने मान्यता अनुसार हाम्रा संस्कार पद्धतिहरूको सँगालो पनि वैदिक सनातन धर्म नै हो र सर्वोच्च धर्म हो भनेर सिद्ध गर्न सकिन्छ।

यो धर्म हामीले परम्परागत पालना गरी आएको धर्म हो। यसलाई हामीले पालना गरी सुरक्षित राख्नु पर्दछ। सुरक्षित राखिएको धर्मले इहलोकमा सुख, शान्ति, समृद्धिलाई दिएर संसारबाट मुक्त गराई मोक्षगति दिने भएको हुनाले 'धर्मो रक्षति रक्षितः' भनिएको हो र 'स्वधर्मे निधनं श्रेयः' भनी आफ्नो धर्ममा रहेर मर्नु नै उत्तम गति (मोक्षगति) प्राप्त गर्नु हो भनिएको हो।

'परधर्मो भयावहः' अर्थात् आफ्नो धर्म छोडेर अर्काको धर्म लिनु अधोगति (नरक) मा पर्नु पर्दछ भनिएको हो। तसर्थ यी हाम्रा पवित्र धर्मपद्धतिहरूलाई कहिल्यै छोड्नु हुँदैन। पालना गरी सुरक्षित राख्नु पर्दछ।

तसर्थ यो हाम्रो धर्मको चहकिलो उज्यालो प्रकाशलाई एउटै पुस्तकमा समेटेर हाम्रो समाजलाई दिन लाग्नुभएकोमा हाम्रा नवोदित प्रतिभा कैलाशजीलाई पुनः धन्यवाद दिनुपर्दछ। दिन्छु पनि।

वस्तुतः यस सम्पूर्ण "बृहत् कर्मकाण्ड पद्धति" ले हाम्रो समाजको हृदयको कणकणमा वैदिक सनातन धर्मको उज्यालो पुऱ्याओस्। यस पद्धतिले कर्मकाण्ड गर्ने र गराउने दुवै थरीलाई ठूलो श्रद्धा र हौसला मिलोस्। यसैगरी यस पद्धतिले हाम्रो समाजलाई कर्मकाण्डको क्षेत्रमा ठूलो सफलता मिलोस्। यही मेरो हार्दिक शुभकामना छ।

टेकनाथ भट्टराई
एम.ए. साहित्याचार्य
बालुवाटार, काठमाडौं

ॐ

शुभाशंसा

अज्ञानवश उदय भएका बुद्धिवृत्तिमा विद्यमान अविद्यात्मक आवरणलाई हटाएर स्वतः सिद्ध आफ्नो परमानन्द स्वरूपको स्पष्ट अनुभूति सहजरूपले होस् भन्ने उद्देश्यले कर्मनिष्ठ महर्षिहरूले कर्मकाण्डको मुख्य प्रयोजन चित्त शुद्धि नै हो भनेका छन्[1] भने अवान्तर प्रयोजन पितृलोक वा सत्यलोकप्राप्ति बताएका छन्।[2] कर्मकाण्डमा सफलता प्राप्त गर्ने अनिवार्य माध्यम हो सदाचार। श्रुतिस्मृतिप्रतिपादित सदाचार नै सत्कर्म हो र सत्कर्म नै मानवलाई मनुष्यत्वदेखि लिएर देवत्व वा ब्रह्मतत्व साक्षात्कार गराउनमा परम सहायक हुन्छ।

परन्तु सत्कर्मकारक समग्र कर्मकाण्ड पद्धति प्रायः संस्कृत वाङ्मयमा सुरक्षित रहेको र समय तथा परिस्थितिले गर्दा संस्कृत विद्याको अध्ययन अध्यापन परम्परा प्रायः शिथिल भएको वर्तमान परिप्रेक्ष्यमा ज्योतिर्विद् पण्डित कैलाश दाहालद्वारा यो सम्पूर्ण "बृहत कर्मकाण्ड पद्धतिः" प्रस्तुत हुनु स्वयंमा महत्त्वपूर्ण कार्य हो। यस पद्धतिमा मूल संस्कृत शब्दावलीलाई यथा स्थानमा राख्दै दुर्बोध शैलीलाई सुबोध बनाउन ग्रन्थकारद्वारा प्रसंशनीय प्रयास भएको छ। तसर्थ यो ग्रन्थ सामान्य नेपाली भाषाभाषीदेखि लिएर प्रबुद्ध पङ्क्तिमा आबद्ध धार्मिक समाजका लागि अवश्य सहायक सिद्ध हुनेछ भन्ने कुरामा म विश्वस्त छु। अन्त्यमा यस्तो उपयोगी पद्धति तयार पारी कर्मकाण्डको फाँटमा फैलिएको असजिलोपनलाई पन्छाएर सजिलो बनाउने प्रयासको प्रशंसा गर्दै हार्दिक शुभाशंसा व्यक्त गर्दछु। ॐ तत्सत्।

प्रा. भवानीप्रसाद खतिवडा

---

१. एतेषां नित्यादीनां बुद्धिशुद्धिः परमप्रयोजनम् – वेदान्तसारः
चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये। वस्तुसिद्धिर्विचारेण न किञ्चित् कर्मकोटिभिः – वि.चू.

२. नित्यनैमित्तिकप्रायश्चित्तोपासनानां त्ववान्तरफलं पितृलोकसत्यलोकप्राप्तिः – वेदान्तसार
"कर्मणा पितृलोको विद्यया देवलोकः" – बृहदारण्यकोपनिषद्

भूमिका

ग्रन्थकार कैलाश दाहालजीले विभिन्न ग्रन्थहरूको अनुशीलनका साथै आफ्ना अनुभवलाई समेत समेटी तयार गर्नुभएको सम्पूर्ण "बृहत् कर्मकाण्ड पद्धति" नामक पुस्तक आद्योपान्त सरसरती अवलोकन गरी यसको भूमिका लेख्ने अवसर पाएकोमा मलाई एकदमै खुसी लागेको छ ।

ग्रन्थकर्ताले यस ग्रन्थमा कर्मकाण्डका प्रायः विधाहरूलाई समेटेको देखिन्छ । यस ग्रन्थमा दुई खण्ड छन् । खण्ड (क) मा कर्मकाण्डपद्धति र खण्ड (ख) मा श्राद्धपद्धति । साथै यसभित्र लेखकले षोडशसंस्कार, मुख्यमुख्य निर्णय, श्राद्धपद्धतिहरू, षोडशव्रतोद्यापन विधिः, कर्मकाण्डका साथमा सबै पूजाका सामग्रीहरू सबैले बुझ्ने गरी लेख्नुभएको छ । हिजोआजका केही व्यक्तिहरूले धार्मिक कुरीति, नैतिक अवनति, रीस, राग, द्वेषजस्ता अवगुणहरू समेतलाई पछि लगाएर ल्याएका छन् । तर यस किसिमका पुस्तकले त्यस्ता दुर्विचारलाई परास्त गर्दै हाम्रो धर्ममाथिको आस्थालाई बढाउने छन् भन्ने मलाई लाग्छ ।

भाग्यको कुरो हो, मेरो उपर्युक्त विचारसँग मिल्दोजुल्दो किसिमबाट लेखकले सबै कर्मकाण्ड समेटी यस किसिमको पुस्तक लेख्नुभयो । यस पुस्तकले मानिसका तीनै किसिमको तापलाई मेट्ने छ भन्नेमा म ढुक्क छु ।

पहिलो कर्मकाण्डपद्धति अन्तर्गत पञ्चगव्यनिर्माण एवं पञ्चगव्यप्राशनविधिदेखि आरम्भ गरी अग्निस्थापनाका सम्पूर्ण विधिहरू मूल संस्कृत पनि उल्लेख गर्दै नेपाली भाषामा पनि राम्ररी बुझ्ने गरी प्रस्तुत गरिएको छ । त्यस्तै रुद्राभिषेकविधि एवं रुद्रपाठ पनि उल्लेख गरिएको छ । एवं क्रमले निर्देशन गर्दै मातृकापूजाविधिः, आभ्युदयिकश्राद्धविधिः, ग्रहमण्डलसहित नवग्रहपूजाविधिः, ग्रहका रङका साथै ग्रहका समिधा पनि उल्लेख गरिएको छ । संक्षिप्त मण्डपपूजाविधिः, व्रतबन्धविधिः, सचित्रहवनकुण्डनिर्माणविधिः विवाहविधिः, चतुरशीतिपूजा/सहस्रचन्द्रदर्शनोद्यापनविधिः, सत्यनारायण-पूजाविधिः, जन्मोत्सवविधिः, स्वस्थानीव्रतपूजाविधिः, हरितालिकाव्रतपूजाविधिः, ऋषिपञ्चमीपूजाविधिः, तुलसीपूजाविधिः, लक्ष्मीपूजाविधिः, एकादशीव्रतपूजाविधिः, पूर्णिमाव्रतपूजाविधिः, दुर्गापूजाविधिः, शिव-रात्रीपूजाविधिः, रामनवमीपूजाविधिः, अनन्तपूजाविधिः र पौषरविवारव्रतपूजाविधिः लगायत वर्षभरि गरिने प्रायः व्रतका पूजाविधि, तत् तत् व्रतका उद्यापनविधिः, गोदानविधिः, लक्षवर्तिका प्रज्वलनविधिः, पुरुषोत्तमपूजाविधिः, गृहप्रवेशविधिः, वास्तुचक्रसहित वास्तुपूजाविधिः, विश्वकर्मापूजाविधिः, षोडश-संस्कारका साथै विभिन्न देवदेवीका आरती एवं पुष्पाञ्जली पनि पहिलो खण्डमा एकदम मिहिनेतका साथ ग्रन्थकर्ताले सङ्कलन गरी समावेश गरेको देखिन्छ ।

यसैगरी खण्ड (ख) मा दशदानविधिसहित अन्त्यकर्म अन्तर्गतका मृत्युदेखि बाह्र दिनसम्म गरिने सम्पूर्ण विधिहरू क्रमानुसार उल्लेख गर्नुका साथै तर्पणविधिः, एकोदिष्ट, पार्वण, तीर्थ, एकपार्वण

श्राद्धविधिः र अन्त्यमा जुठो-सूतक-निर्णयका साथै हामीलाई चाहिने योग, ध्यान र मुद्राहरूसहितको यो खण्ड अझ महत्त्वपूर्ण रहेको छ।

यी माथिका समग्र शीर्षक एवं उपशीर्षक हेर्दा के लाग्छ भने यो एउटै पुस्तक घरमा छ भने वर्षभरि गरिने प्रायः महत्त्वपूर्ण व्रत एवं पूजाविधिका लागि अन्य पुस्तकको आवश्यकता नपर्ला। साथै अन्त्येष्टिकर्म पनि यसै पुस्तकमा समावेश गरिँदा त झन् सुनमा सुगन्ध मिसिएको जस्तो लाग्छ। अन्त्यमा, यो पुस्तक अध्ययनकर्ताका लागि, कर्मकाण्ड गराउनेका लागि, गुरुवर्गका लागि र कर्मकाण्डका जिज्ञासुका लागि महत्त्वपूर्ण रत्न हो। यो सबैका लागि सजिलो, पठनीय एवं सङ्ग्राह्य पनि छ।

यस्तो महत्त्वपूर्ण कार्य गरी कर्मकाण्डीय विधालाई दरिलो बनाउने सत्प्रेरणा भगवान् पशुपतिनाथले ग्रन्थकर्तालाई प्रदान गर्नुहुने छ भन्ने प्रार्थना गर्दै लेखनीको गति यहीँ विराम गर्दछु।

आचार्य श्यामराज घिमिरे
उपप्राध्यापक
वाल्मीकि विद्यापीठ
काठमाडौं

लेखकको भनाइ


यज्ञ कर्मलाई समग्रमा कर्मकाण्ड भनिन्छ । नित्य 'नैमित्तिक' काम्य संस्कार आदि क्रियाकलापले कर्मकाण्डलाई बुझाउँछ । हिन्दू जीवनपद्धतिमा जुनजुन कर्म गरिन्छ ती सबै वैदिक कर्मकाण्ड हुन् र ती सबै सुख शान्तिका लागि हुन् । त्यसैले मैले यहाँ अहिलेको अस्तव्यस्त समाजमा मानिसले भुल्न लागेको कर्मकाण्डको विधिलाई निश्चित दिशा दिनका निमित्त आवश्यक ठानी संस्कृत एवं परम्परागत विधिविधानलाई साक्षात्कार गर्दै मूल संस्कृतलाई यथास्थान दिई कर्मकाण्डको क्षेत्रमा फैलिरहेको अशुद्धतालाई शुद्ध गराउने प्रयासका साथ कलम चलाएको छु ।

मन लगाएर शुद्धसँग गर्ने हो भने वैदिक कर्मकाण्डहरूले सुख शान्ति दिन सक्छन् । भनिन्छ –

सुखाभ्युदयिकं चैव नैः श्रेयसिकमेव च ।
प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म वैदिकम् ॥

यसको सार पनि यही हो । यस लोकमा सुखशान्तिसहित उन्नति गर्न सकिन्छ र परलोक पनि सप्रन्छ । तर पुरानो आधारलाई लिएर समयानुकूल परिमार्जित गर्न चाहिँ जरुरी हुन्छ ।

हामीले जीवनमा धेरै कुरा गरेका हुन्छौं तर कुनै काम गरेर देखाउनु भनेको कुरा मात्र होइन । वचनलाई व्यवहारमा उतारिन्छ भने त्यसबाट ठूलो सुख प्राप्त हुन्छ । संस्कृत वाङ्मय भनेको कानुनको स्रोत हो । कुनै नयाँ कुरा सिर्जना गर्दा पुरानै आधार लिइन्छ त्यसैले हाम्रो पूर्वीय संस्कृति विश्वकै कानुनको आधार हो भन्न सकिन्छ । यसै वाङ्मय स्रोतका आधारमा समयानुकूल उपयोग र परिमार्जन गर्दै विश्वले धेरै लाभ लिइसकेको छ । हामी आफू चाहिँ यसको महत्वलाई ठम्याउन नसकेका कारण भुल्न पनि बेर नलाग्ने अवस्था आइसकेको जस्तो लाग्दछ । आफ्नो संस्कृति मेटिनु भनेको आफैं मेटिनु हो । यसलाई संरक्षण र प्रवर्द्धन गर्नुपर्छ भन्ने आकाङ्क्षाले हिजोआजका मानिसहरूले –



यस किसिमका अक्षरहरूलाई बुझ्न नसक्ने हुनाले स्पष्ट बुझिने गरी सरल तरिकाबाट प्रस्तुत गरेको छु ।

हुन त भगवान्को कृपाविना जस्तै सुरश्रेष्ठलाई पनि यस प्रकारका गहन विषयहरुको वास्तविक स्वरूप बुझ्न असम्भव छ भने यस कार्यमा मैले आफूलाई सानो डुँगा लिएर समुद्र तर्न खोजे जस्तो अथवा होचो मानिसले अग्लो रुखमा फलेको फल टिपेर खान खोज्नु जस्तो मात्र ठानेको छु। संस्कृत वाङ्मय यति महान्, विशाल र गहन छ कि त्यसको यथार्थ पहिल्याउनु कल्पनाभन्दा टाढाको विषय हुँदोरहेछ। गहिराइमा पुग्न सक्नेहरूका लागि त्यस्ता अमूल्य रत्न उपलब्ध हुन सक्छन् जसको मूल्य अनमोल रहेको छ।

कर्मकाण्डअन्तर्गत यज्ञ, पूजा पाठ, दान, व्रत, विवाह, व्रतबन्ध आदि पर्दछन्। प्रत्येक कर्मसँग कर्मफल जोडिएको हुन्छ। कर्म गरेपछि केही न केही कर्मफल अवश्य मिल्दछ। कर्म राम्रो र शुद्ध भयो भने कर्मफल पनि राम्रो हुन्छ। सुखद् मान्नुपर्दछ, आजभोलि धेरै जनमानसहरु अध्यात्म, व्रत, पूजा, पाठ तथा कर्मकाण्ड गर्न, गराउन आकर्षित हुँदै गएको देखिन्छ। तर केही मानिसहरूमा मूल संस्कृत श्लोकको थप ज्ञान भएमा अझ उत्तम हुने देखिन्छ जसले मन्त्रको यथार्थ ज्ञान मार्फत कर्म पूरा हुन सहयोग पुग्छ। यस कुरालाई दृष्टिगत गरी मैले यहाँ मूल संस्कृत श्लोक तथा मन्त्रलाई जस्ताको तस्तै रूप दिई संस्कृत ज्ञान भण्डारको संरक्षण, कर्मकाण्डमा शुद्धता र नेपाली भाषामा सो ज्ञानको बोध गरी यस प्रकारका लक्ष्य समेटियून् भन्ने लक्ष्य राखेको छु।

हिन्दू कर्मकाण्ड अन्तर्गत षोडशसंस्कारका गर्भाधान, पुंसवन, सीमन्तोन्नयन, जातकर्म, नामकरण, निष्क्रमण, अन्नप्राशन, कर्णवेध, विद्यारम्भ, चूडाकर्म, उपनयन, वेदारम्भ, केशान्त, समावर्तन, विवाह, अन्त्येष्टि कर्मलगायत सबै किसिमका श्राद्ध पद्धतिहरू यस पुस्तकमा समेट्ने प्रयास गरेको छु। साथै, पूर्वीय जीवनपद्धतिको एक विशिष्ट पक्ष पतञ्जलीद्वारा प्रतिपादित योग दर्शन, प्रक्रिया र यसले मानव जीवनलाई सुख, शान्ति र सहज बनाउन महत्वपूर्ण सहयोग पुऱ्याउँने यथार्थलाई दृष्टिगत गरी केही योगासन र प्राणायामका बारेमा पनि केही सामग्री समावेश गरेको छु।

यो पुस्तक तयार गर्ने क्रममा मैले मूल स्रोतलाई यथाशक्य जस्ताको तस्तै उपयोग गरेको छु। यस क्रममा संस्कृत ग्रन्थका मूल श्लोक एवम् वैदिक मन्त्रहरूलाई कुन कर्मपछि कुन कर्म गर्ने भन्ने समेत मार्गनिर्देशन सहित प्रस्तुत गरेको छु। त्यसैले यस पुस्तकको सहायताबाट पुरोहित वर्गले राम्रोसँग कर्म सम्पन्न गर्न गराउन सक्नु हुनेछ भन्ने आशा गर्न सकिन्छ। कतिपय सन्दर्भमा कर्मकाण्ड पद्धति एकातिर र गराइ अर्कातिर हुन गएको हुनाले मैले प्रचलित पद्धति र परम्परालाई यथार्थमा जे चलेको छ त्यसलाई प्रस्तुत गरेको छु। पहिले पनि यस किसिमका सानासाना पुस्तकहरू तयार गरेको र सो पढेपछि प्रतिक्रिया स्वरुप विज्ञ जनले मेरो यस कामप्रति रुचि र चासो बढाइदिनुका साथै अझ अघि बढ्न दिनुभएको प्रेरणाले म यस कार्यमा लागेको हुँ। साथै, यस किसिमको बृहत् पुस्तक प्रकाशनको काम सरकारी निकायबाट गर्नका लागि प्रयास गर्ने आश्वासन पनि मैले पाएको हुँ। उपर्युक्त सुझाव कार्यान्वयन भए हाम्रो वाङ्मयको संरक्षण र प्रवर्द्धनमा सहयोग पुग्ने थियो भन्ने आशा रहेकै छ।

यस्ता विषयमा लाग्नु भनेको हामी कामकाजीहरुका लागि कछुवाको गतिसरह हुँदो रहेछ। तर कछुवाको चालमा भए पनि निरन्तर लगावले जस्तो कार्य पनि पूरा हुन्छ र प्राप्त फल अत्यन्त मिठो पनि हुन्छ। संस्कृत भाषा

संसारका अधिकांश भाषाको जननी हो । यस भाषाभण्डारमा अवस्थित हाम्रो कर्मकाण्ड र संस्कृत वाङ्मय बचाउन म लागि रहेको छु र लागि रहने पनि छु । अरु महानुभावहरुलाई पनि यस कार्यमा लाग्न अनुरोध गर्दछु । यस कार्यका लागि सबैबाट हौसला मिलेको हुनाले मैले सम्पूर्ण "बृहत् कर्मकाण्ड पद्धति" नामक यो पुस्तक तयार गरेको हुँ ।

यसपछि मेरा प्रकाशोन्मुख कृतिहरूमा सम्पूर्ण जन्मकुण्डली ज्ञान, सम्पूर्ण वास्तुशास्त्र ज्ञान, योगविज्ञान ज्ञानमाला, सम्पूर्ण षोडशसंस्कारपद्धति ज्ञानमाला, आफ्नो कर्तव्य र त्यसको ज्ञान, हस्तरेखा ज्ञानमाला, सम्पूर्ण भृगुसंहिता (नेपाली श्लोकमा), सम्पूर्ण अध्यात्म ज्ञानमाला (नेपाली श्लोकमा), सम्पूर्ण ज्योतिषशास्त्र एवं कर्मकाण्ड, सम्पूर्ण निर्णयसिन्धुः (नेपाली टीका) सजिलो परिमार्जित अन्त्यपद्धति र सगरमाथा, खोटाङ, हलेसी र मेरो सम्बन्ध नामक छन् ।

प्रस्तुत पुस्तकको तयारीको क्रममा विद्वान् गुरुहरू प्रा.डा. दीर्घराज घिमिरे, प्रा.डा. माधव भट्टराई, प्रा. भवानी खतिवडा, प्रा. ध्रुव भट्टराई, डा. स्वामी प्रपन्नाचार्य, प्रा. टेकनाथ भट्टराई, कवि एवम् साहित्यकार भागवत आचार्य, हृषिकेश घिमिरे, उप-प्रा. ख्यामराज घिमिरेज्यूहरूबाट अमूल्य सल्लाह एवम् सझाव प्राप्त भएको हो । जसको विद्वत्तापूर्ण मार्गदर्शनबाट यस ग्रन्थले यो रुप पाएको अनुभव मलाई भएको छ । उहाँहरूले आफ्नो व्यस्त समयका बाबजुद पनि अमूल्य समय दिएर मेरो अनुरोधलाई स्वीकार गरी पुस्तक पढी उपयुक्त सल्लाह दिनु भयो । यसका लागि म उहाँहरूप्रति आभार प्रकट गर्दै कृतज्ञता ज्ञापन गर्दछु । वरु मैले डराउनु पर्दछ, पुस्तक उहाँहरूले भने जस्तै तयार हन सक्यो कि सकेन । किनकि कम्प्युटर, छपाइ तथा पुस्तक तयारी गर्ने क्रममा समेत कहिलेकाहीं बिग्रने सम्भावना हुँदोरहेछ ।

मैले धेरै वर्षदेखिको एउटा अनुष्ठान सम्पन्न गरेको अनुभूति गरेको छु । यस पुनित कार्य सम्पन्न हनुमा भगवान्को कृपा तथा मेरा माता, पिता लगायत गुरुहरूको आशीर्वाद मिल्न गएको पनि मलाई लाग्दछ । उहाँहरूको आशीर्वाद पाएर नै नबोल्ने पनि बोल्दो रहेछ, हिँड्न नसक्ने पनि हिँड्दो रहेछ, आँखा नदेख्नेले पनि देख्दो रहेछ, कान नसुन्नेले पनि सुन्दो रहेछ, राम्रो सोचेको पुग्दो रहेछ जस्तो लागेको छ । मलाई माता, पिता, गुरुहरू र भगवान् सबैले राम्रो सोच्न सक्ने क्षमता दिई सोचेको पुऱ्याउने मार्गकृपा आगामी दिनमा पनि प्राप्त भइरहने कामना गर्दछु । साथै, सम्पूर्ण मानवमा असल सोच, सद्विचार र सत्कर्मको प्रेरणा प्राप्त होस् र यस प्रकारका सोचविचार यथार्थमा परिणत होऊन् भनी भगवान्सँग प्रार्थना गर्दछु ।

वयं राष्ट्रय जागृयाम पुरोहितः भन्ने मूलमन्त्र मानेर सो मन्त्रलाई आत्मसात् गर्नुपर्दछ । सृष्टिमा पूर्णता भनेको केही पनि हुँदैन । कुनै पनि चिज पूर्ण छँदै छैन । पूर्ण त केवल एउटा परब्रह्म परमेश्वर नै हुनुहुन्छ । त्यस पूर्णबाट जति झिक्न सकिन्छ त्यो पूर्ण नै रहन्छ भन्ने वेदको यो सार छ –

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

यसै श्लोकलाई सम्झेर मैले यहाँ 'सम्पूर्ण' शब्दको प्रयोग गरेको छु । तर यो आफैंमा सम्पूर्ण छैन भन्ने पनि लाग्दछ । तैपनि नेपाली हिन्दु कर्मकाण्डका संस्कार एवम् संस्कृतिका शास्त्रसम्मत पद्धतिहरूलाई समेट्ने

प्रयत्न गरेकोले 'सम्पूर्ण' शब्दको प्रयोग गरेको हुँ। त्यसैले जे लेखेको छु, सो पद्धति पूर्ण छ भन्ने विद्वत्वर्गले मानिदिनुहुने विश्वास मैले लिएको छु।

सबै मानिसमा पवित्रता, सच्चरित्रता, धीरता र सहिष्णुता रहनुपर्छ। जन्मना जायते शूद्रः कर्मणा द्विज उच्येते भनेर यस प्रकारका गुण भएका मानिस ब्राह्मण हुन् भनेर शास्त्रले भनेको छ। यो लोक र परलोक सबैको सप्रियोस् तथा सबैको सद्गति प्राप्त होस्।

अन्त्यमा, यो पुस्तक यस रूपमा आउनुमा मेरा पिता ज्यो.पं. मायानाथ दाहाल, माता टीकामाया दाहाल लगायत समस्त आफन्तजनको आशीर्वादको स्मरण गर्न चाहन्छु। साथै, प्रकाशनका लागि प्रेरणा, प्रोत्साहन तथा अनवरत सहयोग गर्ने मेरी श्रीमती सीता दाहाल, छोरा दृशान, छोरी प्रतीका र भाइहरू प्रकाश दाहाल, विकास दाहाल र भीमशंकर भट्टराईलगायत अन्य क्षेत्रबाट सहयोग पुऱ्याउनुहुने मेरा सबै आत्मीय जनहरूलाई विशेष धन्यवाद दिन चाहान्छु। यसैगरी समयमै पुस्तक छपाइको प्रबन्ध मिलाइदिनुहुने एलायन्स प्रिन्टर्स एन्ड मिडिया हाउस प्रा.लि. का मित्रसेन दाहाल, हरिप्रसाद दाहालप्रति म आभारी छु। पुस्तक तयारी गर्ने क्रममा कम्प्युटर टाइप गरी साजसज्जामा ठूलो मिहिनेत गर्नुहुने खड्गप्रसाद खनाल र मेरो अनुपस्थितिमा उहाँसँग बसी सहयोग गर्ने भाइ खेमराज नेपाल तथा नेत्र तिमल्सिनाको विशेष परिश्रम यस पुस्तकमा परेको छ। यस पुस्तकमा रहन गएका त्रुटिलाई आगामी संस्करणमा सच्याउने प्रयास गर्ने नै छु। यसका लागि सल्लाह र सुझाव दिनुहुन म देश विदेशमा रहनुभएका सम्पूर्ण आदरणीय सचेत विद्वत् आत्मीय पाठकहरू समक्ष सविनय अनुरोध गर्दछु।

ज्योतिर्विदाचार्य, वास्तुशास्त्री पं. कैलाश दाहाल
खोटाङ ऐसेलुखर्क - ८ दिम्मापातेल
हाल - का.म.न.पा.-६ बौद्ध कुमारीगाल
काठमाडौं, नेपाल
फो. ०१-४४७७३३८

॥ श्री गणेशाय नमः ॥



वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ !
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

लामो, वाङ्गो सुँड हुनुभएका ठुलो शरीर हुनुभएका, करोडौं सूर्यका समान तेज हुनुभएका हे प्रभु ! सधैं मेरो कार्य सफल पारिदिनुहवस् ।

॥ श्री सरस्वत्यै नमः ॥



वीणाधरे विपुलमङ्गलदान शीले भक्तार्तिनाशिनि विरञ्चिहरीश वन्द्ये ।
कीर्तिप्रदेऽखिलमनोरथदेमहार्हे विद्याप्रदायिनीं सरस्वती नौमिं नित्यम् ॥

वीणा धारण गर्नुहुने, अपार मङ्गल दिनुहुने, भक्तहरूको दुःख नाश गर्नुहुने, ब्रह्मा, विष्णु, शिवले पनि वन्दना गर्ने । कीर्ति एवं मनोरथ पूरा गर्ने, विद्या दिनुहुने हे सरस्वती हजुरलाई म सधैं प्रणाम गर्दछु ।

विषयसूची

पृष्ठ

खण्ड (क)

१. अथ अग्निस्थापनाविधिः ---------- ३

२. अथ रुद्राभिषेकविधिः ---------- ४९

३. षोडशसंस्कार पद्धति (गर्भाधान जातकर्मादि) ---------- ८१

४. नामकरणसंस्कारः ---------- ८१

५. कर्णवेध संस्कार ---------- ८२

६. मातृकापूजा ---------- ८३

७. आभ्युदयिकश्राद्धम् ---------- ८७

८. नवग्रहपूजा ---------- ९३

९. अथ मण्डप पूजाविधि ---------- १०३

१०. एकाहामा भन्ने संक्षिप्त कथा ---------- १०७

११. वटसावित्री पूजाविधिः ---------- १०८

१२. श्रीकृष्णजन्माष्टमी पूजाविधिः ---------- ११८

१३. अथ व्रतबन्ध विधिः ---------- १२५

१४. अथ विवाहपद्धतिः ---------- १६३

१५. अथ चतुर्थीकर्मपद्धतिः ---------- १९७

१६. अथ विष्णु प्रतिमा विवाह विधिः ---------- २०४

१७. अथ कुम्भविवाह विधिः ---------- २०४

१८. अथार्कीविवाहविधिः ---------- २०५

१९. अथ चतुरशीतिपूजा ---------- २०६

२०. सत्यनारायणपूजा ---------- २१९

२१. नागपूजाविधिः ---------- २२९

२२. जन्मोत्सवविधिः ---------- २३०

pdf.upayogibooks.com

२३. श्रीस्वस्थानी व्रतपूजाविधिः ---------- २३३
२४. हरितालिकापूजाविधिः ---------- २३९
२५. ऋषिपञ्चमीपूजा ---------- २४६
२६. तुलसीपूजाविधिः ---------- २५०
२७. लक्ष्मीपूजा ---------- २५४
२८. एकादशीव्रतपूजाविधिः ---------- २५७
२९. पूर्णिमाव्रतम् ---------- २६४
३०. दुर्गापूजाविधि ---------- २७१
३१. शिवरात्रिपूजा ---------- २९३
३२. रामनवमीपूजा ---------- २९८
३३. आदौ श्रीरामनवमीव्रतोद्यापनविधिः ---------- ३०३
३४. हरितालिकाव्रतोद्यापनविधिः ---------- ३०४
३५. ऋषिपञ्चमीव्रतोद्यापनविधिः ---------- ३०५
३६. अथ अनन्तपूजाविधिः ---------- ३०६
३७. अथ अनन्तचतुर्दशीव्रतोद्यापनविधिः ---------- ३१८
३८. पौषरविवार व्रतपूजाविधिः ---------- ३१९
३९. पौषार्क-व्रतप्रतिष्ठा ---------- ३२२
४०. कृष्णाष्टमीव्रतोद्यापनविधिः ---------- ३२३
४१. स्वस्थानी-व्रतप्रतिष्ठा ---------- ३२४
४२. शिवरात्रिव्रतप्रतिष्ठा ---------- ३२५
४३. सोद्यापनं सोमवत्यमावास्याव्रतम् ---------- ३२६
४४. सोद्यापनं प्रदोषव्रतम् (तत्र शनिप्रदोषव्रतपूजाविधिः) ---------- ३३०
४५. अथ एकादशीव्रतोद्यापनविधिः ---------- ३३४
४६. गोदानाङ्ग गोपूजा ---------- ३३९
४७. लक्षवर्तिकादीपदानविधिः ---------- ३४१
४८. अथ पुरुषोत्तम पूजा-अपूपदानविधिः ---------- ३४३

४९. अथ शिलान्यासविधिः ---------- ३४४
५०. गृहप्रवेशविधिः ---------- ३४८
५१. अथ वास्तु पूजा ---------- ३४९
५२. विश्वकर्म पूजा ---------- ३५८
५३. अदुःख नवमीपूजाविधि ---------- ३६२
५४. आरती ---------- ३७०
५५. निर्गुण भजन ---------- ३७२
५६. पुष्पाञ्जलि ---------- ३७३
५७. दानका देवता ---------- ३७६
५८. केही थर गोत्र र प्रवरहरू ---------- ३७६
५९. सबै पूजाका लागि समग्र सामग्रीहरूः ---------- ३७८

खण्ड (ख)

६०. अन्त्यकर्म ---------- ३८३
६१. अष्टमहादानानि ---------- ३८९
६२. पञ्चधेनुदानविधिः ---------- ३९०
६३. दाहसंस्कारः ---------- ३९३
६४. दशगात्रविधिः ---------- ३९६
६५. सायंकालविधिः ---------- ३९८
६६. अस्थिसञ्चयनश्राद्धविधिः ---------- ३९९
६७. पाथेयश्राद्धविधिः ---------- ४०२
६८. अथ नारायणवलि प्रयोग ---------- ४०५
६९. अथ नारायणवलि श्राद्ध ---------- ४२०
७०. अथ मध्यमषोडशी श्राद्ध ---------- ४२९
७१. एकादशाहे क्रियाक्रमः ---------- ४३७
७२. एकादशाहे आद्यमासिकश्राद्धप्रयोगः ---------- ४४४

७३. आद्याब्दिकश्राद्धम् ---------- ४५१
७४. अथ उदककुम्भदानम् ---------- ४५४
७५. ऊनमासिकादिपञ्चदशश्राद्धानि ---------- ४५५
७६. अथ तन्त्रेणोनादिपञ्चदशमासिकश्राद्धप्रयोगः ---------- ४५९
७७. अथ सपिण्डीकरण श्राद्धप्रयोगः ---------- ४६३
७८. सपिण्डोत्तरपाथेयश्राद्धम् ---------- ४७८
७९. पददान विधिः ---------- ४८३
८०. गरुड पुराणपूजा ---------- ४८४
८१. मासिकश्राद्धविधिः ---------- ४८४
८२. अस्थिक्षेपविधिः ---------- ४८८
८३. तर्पणविधिः ---------- ४८९
८४. एकोद्दिष्टश्राद्धः ---------- ४९५
८५. अथ पार्वणश्राद्धविधिः ---------- ५०६
८६. अथ तीर्थश्राद्धविधिः ---------- ५२३
८७. अथ एकपार्वणश्राद्धविधिः ---------- ५२७
८८. पितृसूक्तम् ---------- ५४०
८९. रामगीता ---------- ५४४
९०. आशौचमा पहिलो दिनदेखि चाहिने सामग्रीहरू ---------- ५४७
९१. मुख्य मुख्य केही जूठो सूतक निर्णयहरू ---------- ५४८
९२. केही मुख्य मुख्य निर्णयहरू ---------- ५४९
९३. सुलभ तरिकाबाट बाँच्न सक्ने केही मुख्य मुख्य ध्यान, प्राणायाम मुद्रा र नियमहरू -- ५५१
९४. पुस्तक प्राप्तिस्थान ---------- ५५२


खण्ड (क)

कर्मकाण्ड पद्धति

शुक्लपक्ष								अग्निवाससारिणी				कृष्णपक्षे				
ति	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	ति.
आ.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	सो.
सो.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पां	भू.	भू.	स्व.	पां	मं.
मं.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	बु.
बु	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	बृ.
बृ	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	शु.
शु.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	श.
श	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	०
०	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	स्व.	पा.	भू.	भू.	आ.

अग्निवास जुराउँदा शुक्लपक्षमा (शु.) र कृष्ण पक्षमा (कृ.) लेखेको मुनिका बार र तिथि संख्या मिलेको कोठामा हेर्नुपर्छ। स्व. र पा. लेखेकोमा अग्नि जुर्दैन। भू. लेखेकोमा जुर्छ।

रङ्गवल्लीनिर्माण नमुना (रेखी)



॥ श्रीगणेशाय नमः ॥

अथ अग्निस्थापनाविधिः

पञ्चगव्यप्राशनविधिः

(पञ्चगव्य बनाउने)

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
पञ्चगव्यमिति प्रोक्तं सर्वपातकनाशनम् ॥
गोमूत्रं द्विगुणं क्षीरात् क्षीरार्धं दधि कथ्यते ।
तदर्धं गोमयं ज्ञेयं गोमयार्ध घृतं भवेत् ॥
गोमुत्रं ताम्रवर्णायाः श्वेतायाश्चापि गोमयम् ।
पयः काञ्चनवर्णायाः नीलायाश्च तथा दधि ॥
घृतं च कृष्णवर्णायाः सर्वं कपिलमेव च ।
गोमूत्रं माषकास्त्वष्टौ गोमयस्य तु षोडश ।
क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्तिताः ।
गोमूत्रवद् घृतस्येष्टस्तदर्धन्तु कुशोदकम् ॥

दुधभन्दा दुई गुना कम गहुँत, आधा कम दही, दहीको आधा गोबर, गोबरको आधा घ्यू मिलाइन्छ ।
राती गाईको गहुँत, सेती गाईको गोबर, पहेँली गाईको दुध, निली गाईको दही, काली गाईको घ्यू नपाए दुध, दही, घ्यू, गहुँत, गोबर, कुश र जल राखेर पनि बनाउन सकिन्छ ।

पञ्चगव्यसम्मेलन मन्त्राः

(सबैथोक मिलाउने)

तत्सवितुर्वरेण्यं भर्ग्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ इत्यनेन गोमूत्रम् क्षिपेत् (गहुँत राख्ने)
ॐ गन्धद्वारान्दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ इत्यनेन गोमयम् क्षिपेत् (गोबर राख्ने)
ॐ आप्यायस्व समेतु ते व्विश्शवतः सोम व्वृष्ण्णयम् ।
भवा व्वाजस्य सङ्गथे ॥ इत्यनेन क्षीरम् क्षिपेत् (दुध राख्ने)
ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करन्प्रणऽआयूꣳषि तारिषत् ॥ इत्यनेन दधि क्षिपेत् (दही राख्ने)
ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥ इत्यनेन आज्य क्षिपेत् (घ्यू राख्ने)
ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अग्नयेजुष्टं गृह्याम्यग्निषोमाभ्याञ्जुष्टं गृह्णामि ॥ इत्यनेन कुशोदकम् क्षिपेत् (कुश, जल राख्ने)
ॐ भूर्भुवꣳस्व÷तत्सवितुर्वरेण्यं भर्ग्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥
इतिमन्त्रेण दशवारं सम्मन्त्र्य (१० पटक मन्त्रने)

पञ्चगव्य प्राशनम्

(खाने)

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ।
प्राशनात् पञ्चगव्यस्य दहत्वग्निरिवेन्धनम् ॥ इति मन्त्रेण प्राशनं

आशन शुद्धि

(आसन शुद्ध गर्ने)

ॐ आसन मित्यस्य मेरुपृष्ट ऋषिः कूर्मो देवता सुतलं छन्दः आसनो पवेशने विनियोगः ।
ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ॥

आचमनम्

(आचमन गर्ने र हात धोई आँखा पुछ्ने)

ॐ अच्युताय नमः स्वाहा । ॐ केशवाय नमः स्वाहा ॥ ॐ माधवाय नमः स्वाहा ॥॥ ॐ गोविन्दाय नमः ।
इति कर प्रक्षाल्य, विष्णवे नमः इति नेत्रयोरूदकस्पर्शनम् ।

कर्मपात्रनिर्माणविधिः देवानावाह्य

(कर्मपात्र बनाउने)

ॐ यद्देवा देवहेडनन्देवासश्चकृमा व्वयम् ।
अग्निर्मा तस्मादेनसो व्विश्श्वान्मुञ्चत्व ँहसः ॥
ॐ यदि दिवा यदिनक्तमेना ँसिचकृमा व्वयम् ।
वायुर्मा तस्मादेनसो व्विश्श्वान्मुञ्चत्व ँहसः ॥
यदि जाग्रद्यदि स्वप्नऽएना ँसिचकृमा व्वयम् ।
सूर्यो मा तस्मादेनसो व्विश्श्वान्मुञ्चत्व ँहसः ॥

ततः पवित्रं क्षिपेत् –

(पवित्र राख्ने)

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥

जलम् –

(जल राख्ने)

ॐ शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये । शं योरभिस्स्रवन्तु नः ॥

चन्दनम् –

(चन्दन राख्ने)

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

अक्षतान् –

(अक्षता राख्ने)

ॐ अक्षन्नमीमदन्त ह्यवप्रियाऽअधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्टया मती योजान्विद्र ते हरी ॥

यवान् – (जौ राख्ने)

ॐ यवो सि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा ।
शुन्धन्ताँल्लोकाः पितृषदनः पितृषदनमसि ॥

तिलान् – (तिल राख्ने)

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः । प्रत्क्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् पृणाहि नः ॥

पुष्पाणि – (फूल राख्ने)

ॐ श्रीश्च तेलक्ष्मीश्चपत्क्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाण-सर्व्वलोकम्मऽइषाण ॥

ततः कुशत्रयसहितं कर्मपात्रोदकमादाय (जल सेचन गर्ने)

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा । यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
ॐ पुण्डरीकाक्षः पुनातु । इति पूजाद्रव्याणि आत्मानं च सिञ्चेत ।

शङ्ख घण्टा पूजनम् आदौ शङ्ख पूजनम् (शङ्ख पूजा गर्ने)

ॐ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे । निर्मितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते ॥ ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि । तन्नः शङ्खः प्रचोदयात् ॥ ॐ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥ ॐ भूर्भुवः स्वः शङ्खस्थदेवाय नमः ॥

घण्टा पूजनम् (घण्टा पूजा गर्ने)

ॐ सुपर्णोऽसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रञ्चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोम आत्माच्छन्दा ꣳस्यङ्गानि यजू ꣳषि नाम साम ते तनूर्व्वामदेव्यम् ॥ यज्ञायज्ञियंपुच्छन्धिष्ण्याः शफाः सुपर्ण्णोऽसि गरुत्मान्दिवङ्गच्छ स्वः पत ॥ ॐ भूर्भुवः स्वः घण्टास्थाय गरुडाय नमः पूजां समर्पयामि । (यहाँ कुलपितृहरूलाई सम्झने चलन छ)

सर्षाप देवयजन भूमौ विकिरेत् (सर्स्यूं छर्ने)

ॐ अपसर्पन्तु ते भूता ये भूता भूमिमाश्रिताः । ये भूताः विघ्नकर्तारस्ते नश्यन्तु ममाज्ञया (शिवाज्ञया) ॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम् । सर्वेषामविरोधेन पूजाकर्म समारभे ॥

पवित्र धारणम् (कर्मपात्रमा रहेको पवित्र साहिँली औंलामा धारण गर्ने)

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥

पञ्चभूसंस्कारः

भूरसीति भूमिशोधनम् (वेदी बनाउन भूमि शोधन गर्ने)

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवीं यच्छ पृथिवीन्दृ ꣳहपृथिवीं मा हि ꣳसीः ॥

अश्मा च म इति मृत्तिकास्थापनम् (वेदीमा माटो राख्ने)

ॐ अश्मा च मे मृत्तिका च मे गिरयश्चमे पर्वताश्च मे सिकताश्च मे व्वनस्पतयश्च मे हिरण्यञ्च मेऽयश्च मे श्यामञ्च मे लोहञ्च मे सीसञ्च मे त्रपु च मे यज्ञेन कल्पन्ताम् ॥

एष वस्तोमेति दर्भं गृह्णाति (वेदी वनाउने)

ॐ एष वस्तोमो मरुतऽइयङ्गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषायासीष्ट तन्वे व्वयां विद्यामेषं वृजनं जीरदानुम् ॥

यद्देवेति दर्भैः परिसमूहनम् (कुशले वेदीलाई सम्याउने)

ॐ यद्देवा देवहेडनं देवासश्चकृमा व्वयम् ।
अग्निर्मा तस्मादेनसो व्विश्श्वान् मुञ्चत्व ँहसः ॥

मा नस्तोक इति उपलेपनं गोमयेन (गोवर र पानीले लिप्ने)

ॐ मानस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
मा नो वीरान्नुद्रु भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥

त्वामिद्धीत्युल्लेखनं स्रुवेण (सुरोले वेदी उत्खनन् गर्ने)

ॐ त्वामिद्धि हवामहे सातौ वाजस्य कारवः । त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥

प्रथमाद्वितीयैरित्यादिभिः प्रागग्रमुदक्संस्थं रेखात्रयं खादिरेण हस्तमात्रेण खड्गाकृतिना स्फयेन स्रुवमूलेन वा कुर्यात् (दक्षिणदेखि उत्तरसम्म तीनओटा रेखा कोर्ने)

ॐ प्रथमा द्वितीयैर्द्वियीयास्तृतीयैस्तृयीयाः सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिर्यजू ँषि सामभिः सामान्यृग्भिर्ऋचः । पुरोनुवाक्याभिः पुरोऽनुवाक्या याज्याभिर्याज्या वषट्कारैर्वषट्काराऽआहुती भिराहुतयो मे कामान्त्समर्धयन्तु भूः स्वाहा ॥

ॐ दक्षिणामारोह त्रिष्टुप्त्वावतु वृहत्साम पञ्चदशस्तोमो ग्रीष्मऽऋतुः क्षत्रं द्रविणम् ॥

ॐ प्रतीचीमारोह जगती त्वावतु वैरूप ँसाम सप्तदशस्तोमो वर्षाऽऋतुर्विड् द्रविणम् ॥

ॐ उदीचीमारोहानुष्टुप्त्वावतु वैराज ँसामैकवि ँशस्तोमः शरदृतुः फलं द्रविणम् ॥

सदसस्पतिमित्यनामिकाङ्गुष्ठाभ्यां यथोल्लिखिताभ्यो रेखाभ्यस्त्रिरुद्धरणम् (माटोलाई साहिँली र बूढी औंलाले लिने)

ॐ सदसस्पतिमद्भूतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिष ँस्वाहा ॥

व्रतङ्कृणुतेति वेद्यां स्रुवेणोद्धृतयांसूननामिकाङ्गुष्ठाभ्यामुद्धृत्य तानैशान्यां क्षिपेत् (उत्तरतिर अर्पण गर्ने)

ॐ व्रतं कृणुत व्रतं कृणुताग्निब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः । दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहस ँसुतीर्था नोऽअसद्वशे । ये देवा मनो जाता मनो युजो दक्षक्रतवस्ते नोऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ॥

शन्नो देवीरित्यभ्युक्ष्ययेत् (जलले सेचन गर्ने)

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥

अथ स्वस्तिवाचनम् (रेखी हाल्ने)

ॐ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषाऽअसुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥
स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ।
वृहस्पतिꣳसर्वगणꣳस्वस्तये स्वस्तयऽआदित्यासो भवन्तु नः ॥
विश्वेदेवा नोऽअद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवाऽअभवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वꣳहसः ॥
स्वस्ति मित्रावरुणा स्वस्ति पथ्येन रेवति ।
स्वस्ति नऽइन्द्रश्चाग्निश्चं स्वस्ति नोऽअदिते कृधि ॥
स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव ।
पुनर्ददताघ्नता जानता सङ्गमेमहि ॥
स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानाम् ।
असुरघ्नमिन्द्रसखं समत्सु वृहद्यशो नावमिवारुहेम ॥
अꣳहोमुचमाङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम् ।
प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्वभयं नोऽअस्तु ॥

"ततः आशुः शिशानः" इति समग्रं पठेत् ।

प्रतिज्ञा सङ्कल्प (जल, कुश लिने)

तिथि र्विष्णुस्तथा वारोनक्षत्रं विष्णुरेव च । योगश्च करणं विष्णुः सर्वं विष्णुमयं जगत् ॥
ॐ तत्सत् ३, ॐ विष्णुः ३, अद्येह श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत् सृष्टिकारिणो ब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे प्रल्हादाधिपत्ये मनौ सप्तमे वैवस्वतमन्वन्तरे सत्यत्रेताद्वापरान्ते बौद्धावतारे अष्टाविंशतितमे कलियुगे तस्य प्रथमचरणे भूर्लोके जम्बूदीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गते विन्ध्याचल गङ्गादेव्या उत्तरदिग्भागे हिमाचलस्य दक्षिणपार्श्वे नेपालदेशे गुह्येश्वरीराजराजेश्वर्यादि देव्यधिष्ठिते पाशुपतक्षेत्रे पशुपतेः गुह्यकाल्याश्च (अमुक) दिग्भागे (अमुक) ग्रामे वा नगरे इह पुण्यभूमौ षष्ठि संवत्सराणां मध्ये (अमुक) नाम्नि संवत्सरे श्रीसूर्ये (अमुकअयने) (अमुक) ऋतौ (अमुक) मासे (अमुक) पक्षे (अमुक) तिथौ (अमुक) वासरे अमुक नक्षत्रे अमुक योगे अमुक करणे (अमुक) राशिस्थिते श्रीसूर्ये (अमुक) राशिस्थिते चन्द्रमसि (अमुक) राशिस्थिते देवगुरौ अन्येषु शेषेषु ग्रहेषु यथायथा

राशिस्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्टान्वितायां शुभपुण्यतिथौ (अमुक) गोत्रस्य (अमुक) प्रवरस्य (अमुक) शर्मणो मम (अमुकनाम्नो मम)सभार्यस्य सपुत्रपौत्रस्य सकुटुम्बस्यायुरारोग्यैश्वर्योत्तरोत्तर हर्षविजयोदयपूर्वकदारिद्रचदुःख दुर्भिक्ष्यदौर्मनस्यदौर्भाग्योपसर्गमहामारीत्रासोल्कापातनिर्घातभूकम्पादिसूचि तसकलदोषोपशान्त्यर्थं दुःस्वप्नसुस्वप्नतावाप्तिपूर्वकबालग्रहदशान्तर्दशागोचरदशा सकलदोषोपशमनार्थं बाह्याभ्यन्तरज्वरातिसारापस्मारश्वासकासादिसमस्तरोगाणां झटितिनिवृत्तिपूर्वकमारोग्यतावाप्तये विशेषतः आध्यात्मिकाधिदैविकाधिभौतिकातापत्रयोपशमनपूर्वकधर्मार्थकाममोक्षाचतुर्विध फलप्राप्तये (श्रीपरमेश्वर-साम्बसदाशिवप्रीतये) कलश दीप गणेश पूजन पूर्वकं शिवपूजां विधाय [श्रीसाम्बसदाशिवोपरि अविच्छिन्नजलधारया (दुग्धादि धारया वा) (अमुक) सङ्ख्याकब्राह्मणद्वारा (अमुक) रुद्राभिषेकं कर्म तथा सकलारिष्टशान्तिपूर्वक श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीतये मार्कण्येयपुराणान्तर्गत "सप्तशती" स्तोत्रस्य साङ्गोपाङ्ग (संपुटित) (जप पाठादि ग्रहशान्ति, हवन, चुडोपनयन वेदारम्भ समावर्तन, विवाह] कर्म अहं करिष्ये, (आवां करिष्यावहे, वयं करिष्यामहे)।

तत्रादौ गोपूजनम्

(गाईको पूजा गर्ने, अभावमा दुनामा पैसा राखेर पूजा गर्ने)

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयिभ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः। ॐ इरावती धेनुमतीहि भूत ६ सुयवसिनी मनवे दशस्या। व्यस्कभ्ना रोदसी विष्णवे ते दाधर्य पृथिवीमभितो मयूखैः स्वाहा ॥ ॐ गवे नमः गौरुपद्रव्येभ्यो नमः गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥

ब्राह्मणं संपूजयेत्

(ब्राह्मणलाई टीका लगाइदिने)

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥
ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च। जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
ॐ ब्राह्मणाय नमः।

तर्पणम्

(तर्पण गर्ने)

ॐ मनो मे तर्पयत, वाचं मे तर्पयत, प्राणं मे तर्पयत, चक्षुर्म्मे तर्पयत, श्रोत्रं मे तपर्यतात्मानं मे तर्पयत, प्रजां मे तर्पयत पशून्मे तर्पयेत, गणान्मे तर्पयत गणा मे मा व्वितृषन् ॥

मार्जनम्

(जल सेचन गर्ने)

ॐ आपो हिष्ठामयोभुव। ॐ स्तानऽउर्जे दधातन ॥ ॐ महेरणाय चक्षसे। ॐ यो वः शिवतमो रसः ॥
ॐ स्तस्य भाजयतेह नः। ॐ उशतीरिव मातरः ॥ ॐ तस्माऽअरं गमाम वो यस्यक्षयाय जिन्वथ।
ॐ आपो जनयथा च नः ॥

ततः कुशादिसहित गोपुच्छमादाय । (पुच्छरमा या दुनामा कुश र जल लिएर छुने)

ॐ तत्सत् ३ ॐ विष्णुः इत्यादि देशकालौ स्मृत्वा (अमुक) गोत्रः, (अमुक) प्रवरः (अमुक) शाखान्तर्गत (अमुक वेदाध्यायी) (अमुक) शर्मा (वर्मा/गुप्तो) अहं मम इह जन्मनि कायिक, वाचिक, मानसिक, सांसर्गिक ज्ञाताज्ञात स्पर्शास्पर्श आसन शयन भोज्याभोज्य गम्यागम्य चोष्याचोष्य लेह्यलेह्यादि निःशेष दोष परिहार पूर्वक करिष्यमाणकर्माधिकार प्राप्तये इमां गां रुद्रदैवतां तत्प्रत्याम्नायीभूतं द्रव्यं रजतं चन्द्रदैवतं, ताम्रं सूर्यदैवतम् यथा नामगोत्राय (अमुक) शर्मणे ब्राह्मणाय इदं प्रायश्चित्त गोदानत्वेन तुभ्यं अहं सम्प्रददे (आवां सम्प्रदावहे, वयं सम्प्रदामहे) ॥

प्रार्थना (नमस्कार गर्ने)

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणी । तीर्थदेवमयी यस्मात् तस्मात् शान्तिं प्रयच्छ मे ॥ ॐ गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः । गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥
या लक्ष्मीः सर्वभूतानां या च देवे प्रतिष्ठिता । धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥

दानप्रतिष्ठा (भुइँमा पैसा राखी पूजा गर्ने)

ॐ स्वर्ण घर्मः स्वाहा स्वर्णार्किः स्वाहा स्वर्ण शुक्रः स्वाहा स्वर्ण ज्योतिः स्वाहा स्वर्ण सूर्य स्वाहा ॥

सङ्कल्प (भुइँको पैसा कुश र जलसँग हातमा लिने)

ॐ अद्यकृतैतत् गोप्रत्याम्नायी भूत द्रव्यदानप्रतिष्ठार्थं द्रव्यं रजतखण्डं चन्द्रदैवतम् (अमुक) शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

प्रदक्षिणा (गाईको प्रदक्षिणा गर्ने)

ॐ यानि कानि च पापानि जन्मान्तर कृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणः पदेपदे ॥

नमस्कार (दुना या गाईलाई अलि पर सारेर नमस्कार गर्ने)


ॐ नमस्ते कपिले देवि संसारार्णवतारिणि । द्विजेन्द्राय ददामि त्वाम् प्रसन्नो भव सर्वदा ।

ॐ स्वस्तित्युक्त्वा (गाई लिने)

ॐ कोदात्कस्माऽअदात्कामोऽदात्कामायादात् । कामो दाता कामः प्रतिग्रहीता कामैतत्ते ।

अभिषेकः (अभिषेक गर्ने)

ॐ द्यौः शान्ति रन्तरिक्ष ँ शान्तिः पृथ्वीशान्तिरापःशान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि । यतो यत ँ समीहसे ततो नोऽअभयं कुरु । शन्न÷ कुरु प्रजाभ्यो भयन्नः पशुभ्यः ॥ सुशान्तिर्भवतु ॥ ॐ सर्वारिष्टशान्तिरस्तु । उत्तरोत्तरवृद्धिरस्तु ।



अथ स्वस्तिवाचनम् (ब्राह्मणले स्वस्तिवाचन पढ्ने र यजमानले दुवो, चन्दन, अक्षता, फूल, फल लिएर नमस्कार गर्ने)

श्रीगणेशाय नमः । श्रीमङ्गलमूर्तये नमः । (गणेशस्तुतिः)

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः ॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
अभीप्सितार्थसिद्धचर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥
ॐ श्रीमन्महागणाधिपतये नमः । ॐ उमामहेश्वराभ्यां नमः । ॐ लक्ष्मीनारायणाभ्यां नमः । ॐ वाणीहिरण्यगर्भाभ्यां नमः । ॐ शचीपुरन्दराभ्यां नमः । ॐ मातृपितृगुरु-चरणकमलेभ्यो नमः । ॐ इष्टदेवताभ्यो नमः । ॐ कुलदेवताभ्यो नमः । ॐ स्थानदेवताभ्यो नमः । ॐ ग्रामदेवताभ्यो नमः । ॐ वास्तुदेवताभ्यो नमः । ॐ सर्वेभ्यो देवेभ्यो नमः । एतत्कर्म प्रधानदेवताभ्यो नमः ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ।

हरिः॑ ॐ आनो॑भद्द्रा॒क्क॑तवो॒यन्तु॒व्वि॒श्व॑तो॒द॑ब्धासो॒ऽअप॑रीतासऽ
उद्भिद॑॑ ॥
दे॒वानो॒यथा॒सद॒मिद्वृधे॒ऽअस॒न्नप्रा॑युवोरक्षि॒तारो॑दि॒वेदि॑वे ॥१॥
दे॒वाना॑म्भद्रा॒सु॒म॒ति॒र्ऋ॒जूय॒तान्दे॒वाना॑ꣳरा॒तिर॒भिनो॒नि व॑र्त्तताम् ॥
दे॒वाना॑ꣳसु॒क्ष्य॒मुप॑सेदि॒माव्व॒यन्दे॒वान॒ऽआयु॒ꣳप्रति॑रन्तु॒जी॒वसे॑ ॥२॥
तान्न्पू॒र्व्वया॒निवि॑दा॒हूम॒हेव्व॒यंभगं॑मित्र॒मदि॑ति॒न्दक्ष॑मस्रिधं॑म् ॥
अ॒र्य्य॒मण॒ंव्वरु॑ण॒ꣳसोम॑म॒श्विना॒सर॑स्वतीन॒ꣳसु॒भगा॒मय॑स्स्करत् ॥३॥
तन्नो॒व्वातो॑मयो॒भु॒व्वा॑तु॒भेष॒जन्तन्न्मा॒तापृ॑थि॒वीत॒त्पिताद्यौ॒ ॥
तद्ग्रावा॑णꣳसोमसु॒तो॑मयो॒भु॒वस्त॒दश्वि॑ना॒शृणुतन्धिष्ण्यासुवम् ॥४॥
तमीशा॑न॒ञ्जग॑तस्त॒स्थुष॒स्पति॑न्धिय॒ञ्जि॒न्व॒म॒व॑से॒हूम॒हेव्व॒यम् ॥
पूषा॑नो॒यथा॒व्वेद॑सा॒मस॑द्द्वृ॒धेर॑क्षि॒तापा॒युर॑द॑ब्धꣳस्व॒स्तये॑ ॥५॥
स्व॒स्ति॒न॒ऽइन्द्रो॑व्वृद्ध॒श्रवा॑ꣳस्व॒स्ति॒न॑॑ पूषाव्वि॒श्व॑व॒वे॑दा॑ꣳ ॥
स्व॒स्ति॒न॒स्ता॒क्ष्यो॑ऽअरि॑ष्टनेमिꣳस्व॒स्ति॒नो॒बृ॒ह॒स्पति॑र्दधातु ॥६॥
पृष॑द॒श्वा॒म॒रु॒त॒ꣳपृ॒श्नि॒मा॒त॒र॒ꣳशु॒भं॒य॒ावा॑नो॒व्विद॑थेषु॒जग्म॑यꣳ ॥
अ॒ग्नि॒न॒जि॒ह्व्वा॒म॒न॒व॒ꣳसू॒र॑॑चक्षसो॒व्वि॒श्व॒वे॑नो॒दे॒वाऽअव॒सा॒ग॑म॒न्नि॒ह ॥७॥
भ॒द्र॒व॒र्णो॑भि॒ꣳश्रृ॒णु॒या॒म॒दे॒वा॒भ॒द्र॒म्प॑॑श्ये॒मा॒क्ष॒भि॑॑र्यजत्रा॑ꣳ ॥
स्थि॒रैर॑ङ्गै॑स्तुष्टु॒वा॑ꣳस॑॑स्त॒नू॒भि॒र्व्व्य॒शे॒म॒हि॒दे॒व॒हि॑॑त॑ꣳय॑दायु॑॑ ॥८॥
श॒त॒मि॒न्नु॒श॒र॒दो॒ऽअ॒न्ति॒दे॒वा॒य॒त्रा॒न॒श्ध्व॒क्रा॒ज॒र॒स॒न्त॒नू॒नाम् ॥
पु॒त्रासो॒यत्रा॑पितरो॒भव॑न्ति॒मानो॑म॒द्धचारी॑रिषु॒तायु॒र्ग्गन्तो॑ꣳ ॥९॥
अदि॑तिद्द्यौ॒रदि॑तिर॒न्तरि॑क्ष॒मदि॑ति॒र्म्मा॒तास॒पि॒तास॒पु॒त्र॒ ॥
व्वि॒श्व॒वे॑दे॒वाऽअदि॑ति॒ꣳप॒ञ्च॒ज॒ना॒ऽअदि॑ति॒र्ज्जा॒त॒मदि॑ति॒र्ज्जनि
त्त्वम् ॥१०॥
द्यौ॒ शान्ति॑र॒न्तरि॑क्ष॒ꣳ शान्ति॑॑ पृथिवीशान्ति॒रापꣳ॒
शान्ति॒रोष॑धयꣳ॒शान्ति॑॑ ॥
व्वन॒स्पत॑यꣳ॒शान्ति॒र्व्वि॒श्व॒वे॒दे॒वा॒ शान्ति॒र्ब्ब्र॒ह्म॒शान्ति॒ꣳ
सर्व्व॒ꣳ॒ शान्ति॒ꣳशान्ति॑रे॒वशान्ति॒ꣳसामा॒शान्ति॑रेधि ॥११॥
षतो॑षतꣳस॒मीह॑से॒ततो॑नो॒ऽअभ॑यङ्कुरु ॥
शन्न॑॑ कुरुप्प्र॒जाभ्यो॑भ॒यन्नꣳप॒शुभ्य॑॑ ॥१२॥

हरि÷ ॐ गणानान्त्वागणपति ꣓ हवामहेप्रियाणान्त्वा प्रियपति ꣓ हवामहेनिधीनान्त्वानिधिपति ꣓ हवामहेव्वसोमम । आहमजानिगर्ब्भधमात्वमजासिगर्ब्भधम् ॥ ॐ अम्बेऽअम्बिकेम्बालिके न मानयति कश्चन । ससस्त्यश्श्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥

गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलचारुभक्षणम् ॥ उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम्॥ ॐ विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय। नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥ ॐ सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः ॥

अष्टदिक्षु पूर्वादिक्रमेण मध्यभागे च पूजनम्

पृथिव्याः सधस्थादिति पूर्वे (रेखीको पूर्वमा पूजा गर्ने)

ॐ पृथिव्याः सधस्थादग्नि पुरीष्यमङ्गिरस्वदाभराग्नि पुरीष्यमङ्गिरस्वदच्छेमोग्नि पुरीष्यमङ्गिरस्वद् भरिष्यामः ॥

अग्निश्चेति दक्षिणे (दक्षिणमा पूजा गर्ने)

ॐ अग्निश्च पृथिवी च सन्नते ते मे सन्नमतामदो वायुश्चान्तरिक्षञ्च सन्नते ते मे सन्नमतामद꣓ आदित्यश्च द्यौश्च सन्नते ते मे सन्नमतामद꣓आपश्च वरुणश्च सन्नते ते मे सन्नमतामदः सप्तसदः ꣓सदोऽअष्टमी भूतसाधनी सकामाँ २꣓अध्वनस्कुरु संज्ञानमस्तु मेऽमुना ॥

वायो ये त इति पश्चिमे (पश्चिममा पूजा गर्ने)

ॐ वायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये ॥

सोमो धेनुमित्युत्तरे (उत्तरमा पूजा गर्ने)

ॐ सोमो धेनु꣓सोमोऽअर्वन्तमाशु꣓सोमो वीरं कर्मण्यं ददाति । सादन्यं विदथ्य꣓सभेयं पितृश्रवण यो ददाशदस्मै ॥

अग्निन्दूतमित्याग्नेये (आग्नेयमा पूजा गर्ने)

ॐ अग्निन्दूतं पुरोदधे हव्यवाहमुपब्रुवे । देवाँऽआसादयादिह ।

कया नश्चित्र इति नैर्ऋत्याम् (नैर्ऋत्यमा पूजा गर्ने)

ॐ कया नश्चित्रऽआभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥

वायुरनिलमिति वायव्ये (वायव्यमा पूजा गर्ने)

ॐ वायुरनिलममृतमथेदं भस्मान्त꣓शरीरम् । ॐ क्रतो स्मर क्लीबेस्मर कृत꣓स्मर ॥

ईशावास्यमित्यैशान्याम् (ईशानमा पूजा गर्ने)

ॐ ईशावास्यमिद ँ सर्वं यत्किञ्च जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥

ततस्तिसृभिर्मध्ये पूजनं कुर्यात् (बीचमा पूजा गर्ने)

ॐ सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ२ऽअजस्रम्।
तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन् विश्वा भुवनानि गोपाः॥
ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नोऽअस्तु वय ँ स्याम पतयोरयीणाम्॥
ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिष ँ स्वाहा॥

इन्धनशोधनं स्थापनं च

कस्त्वा सत्य इतीन्धनं शोधयेत् (समिधा शुद्ध गर्ने)

ॐ कस्त्वा सत्यो मदानां म ँहिष्ठो मत्सदन्धसः। दृढाचि दारुजे वसु॥

त्वामिद्धीति दारुकं स्थापयेत् (समिधा राख्ने)

पञ्च त्रीणि तथा त्रीणि पुनः पञ्च विधानतः। दारूकं स्थापयित्वा च योनिमुपरि कारयेत्॥
ॐ त्वामिद्धि हवामहे सातौ वाजस्य कारवः। त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः॥

अग्निसंस्कारः, स्थापनं च

कांस्य पात्रे निहित तेनैव पिहितं अग्निं स्थण्डिलादाग्नेय भागे निधाय क्रव्यादांशं ॐ क्रव्यादाय नमः, इति नैर्ऋत्यदिशि क्षिपेत्। स्थण्डिले अग्निं पश्चादानीय।

तत्र अग्नावग्निरित्यग्निं शोधयेत् (अग्नि बाली अलिकति नैर्ऋत्यमा अर्पण गर्ने)

ॐ अग्नावग्निश्चरति प्रविष्टऽऋषीणां पुत्रोऽअभि शस्तिपावा।
स नः स्योनः सुयजा यजेह देवेभ्यो हव्य ँ सदमप्रयुच्छन्त्स्वाहा॥

मयि गृह्णामीति मन्त्रेण कांस्यपात्रे निहितं कांस्यपात्रेण पिहितमग्निं गृह्णाति (अग्नि लिने)

ॐ मयि गृह्णाम्यग्नेऽअग्नि ँ रायस्योषाय सुप्रजास्त्वाय सुवीर्याय। मामु देवताः सचन्ताम्॥

गर्भोऽअस्योषधीनामिति गर्भाधानम् (गर्भधान गर्दा फूल चढाउने र छोप्ने)

ॐ गर्भोऽअस्योषधीनां गर्भो वनस्पतीनाम्। गर्भो विश्वस्य भूतस्याग्ने गर्भोऽअपामसि॥

इत्यस्याग्नेर्गर्भाधानं करोमि।

विवस्वन्नादित्य इति पुंसवनम् (फूल चढाउने)

ॐ विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन्मत्स्व । श्रदस्मै नरो वचसे दधातन यदाशीर्दा दम्पती वाममश्नुतः । पुमान् पुत्रो जायते विन्दते वस्वधा विश्वाहारपऽएधते गृहे ॥

इत्यस्याग्नेः पुंसवनं करोमि ।

अजीजनोहीति सीमन्तोन्नयनम् (फूल अक्षता चढाउने)

ॐ अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः । गोजीरयारꣳहमाणः पुरन्ध्या ॥

इत्यस्याग्नेः सीमन्तोन्नयनं करोमि ।

एजतु दशमास्य इति जातकर्म (फूल अक्षता चढाउने र छोपेको उघारिदिने)

ॐ एजतु दशमास्यो गर्भो जरायुणा सह । यथायं वायुरेजति यथा समुद्रऽएजति । एवायं दशमास्योऽअस्रज्जरायुणा सह ॥ इत्यस्याग्नेर्जातकर्म करोमि । अत्र पिहितकांस्यपात्रस्योद्घाटनम् ।

यदा पिपेषेति नामकरणम् (फूल अक्षता चढाउने)

ॐ यदा पिपेष मातरं पुत्रः प्रमुदितो धयन् । उतत्तदग्नेऽअनृणो भवाम्यहतौ पितरौ मया । सम्पृचस्य संमा भद्रेण पृङ्क्त विपृच स्थ वि मा पाप्मना पृङ्क्त ॥ इत्यस्याग्नेर्नामकरणं करोमि ।

पूषा पञ्चाक्षरेणेति निष्क्रमणम् (फूल अक्षता चढाउने)

ॐ पूषापञ्चाक्षरेण पञ्चदिशऽउदजयत्ताऽउज्जेषꣳसविता षडक्षरेण षड्ऋतूनुदजयत्तानुज्जेषं मरुतः सप्ताक्षरेण सप्तग्राम्यान्पशूनुदजयँस्तानुज्जेषं बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम् ।

इत्यस्याग्नेर्निष्क्रमणं करोमि ।

अन्नपतेन्नस्येति अन्नप्राशनम् (फूल अक्षता चढाउने)

ॐ अन्नपतेन्नस्य नो देहचनमीवस्य शुष्मिणः । प्रप्रदातारं तारिषऽऊर्जं नो धेहि द्विपदे चतुष्पदे ॥

इत्यस्याग्नेरन्नप्राशनं करोमि ।

अग्न आयाहीति चूडाकरणम् (फूल अक्षता चढाउने)

ॐ अग्नऽआयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥ इत्यस्याग्नेश्चूडाकरणं करोमि ।

भद्रं कर्णेभिरिति कर्णवेधः (कुशले चलाउने)

ॐ भद्रङ् कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ इत्यस्याग्नेः कर्णवेधं करोमि ।

अग्निरेकाक्षरेणेति उपनयनम् (फूल अक्षता चढाउने)

ॐ अग्निरेकाक्षरेण प्राणमुदजयत्तामुज्जेषमश्विनौ द्वयक्षरेण द्विपदो मनुष्यानुदजयतां तानुज्जेषं विष्णुस्त्र्यक्षरेण त्रीँ ल्लोकानुदजयत्तानुज्जेषꣳसोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत्तानुज्जेषम् ॥

इत्यस्याग्नेरुपनयनं करोमि ।

ततोव्याहृतिसहितां गायत्रीं श्रावयेत् (अग्निलाई गायत्री सुनाउने)

ॐ भूर्भुवः स्वः वैश्वानराय विद्महे सप्तजिह्वाय धीमहि । तन्नो अग्निः प्रचोदयात् ॥

इत्यग्निं गायत्रीं श्रावयामि ।

व्रतं कृणुतेति समावर्तनम् (फूल अक्षता चढाउने)

ॐ व्रतं कृणुत व्रतं कृणुताग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः । दैवीन्धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहस ꣳसुतीर्थानोऽअसद्वशे । ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः पन्तु तेभ्यः स्वाहा ॥ इत्यस्याग्नेः समावर्तनं करोमि ।

गावऽउपावतेति गोदान कर्म (फूल अक्षता चढाउने)

ॐ गावऽउपावतावतं मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥ इत्यस्याग्नेर्गोदानकर्म करोमि ।

भगऽएवेति विवाहः (फूल अक्षता चढाउने)

ॐ भगऽएव भगवाँऽअस्तु देवास्तेन वयं भगवन्तः स्याम ।
तन्त्वा भग सर्वऽइज्जोहवीति स नो भगपुरऽएता भवेह ॥ इत्यस्याग्नेर्विवाहं करोमि ।

तत ऋतावानमित्यादि कण्डिकात्रयं पठेत् (अग्निको प्रार्थना गर्ने)

ॐ ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रघर्ममीमहे । उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥ ॐ वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्री इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण । उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥ ॐ वैश्वानरो नऽऊतयऽआप्रयातु परावतः । अग्निरुक्थेन वाहसा । उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥

इति पठित्वा अग्निर्मूर्धेति मन्त्रेण कुण्डे स्वाभिमुखं वन्हिं प्रवेशयेत् । (अग्निलाई कुण्डमा राख्ने)

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम् । अपाꣳ रेताꣳ सि जिन्वति ॥
इति कुण्डे स्थण्डिले वा अग्निं स्थापयेत् ।

स्थिरो भवेति प्रज्वालयेत् (अग्नि बाल्ने र दियो पनि यतिबेलै बाल्ने चलन छ)

ॐ स्थिरो भव वीड्वङ्गऽआशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥

ततोऽग्नि प्रार्थयेदनेन मन्त्रेण (अग्निलाई नमस्कार गर्ने)

ॐ आवाहये त्वां पुरुषं महान्तं सुरासुरैर्वन्दितपादपद्मम् ।
ब्रह्मादयो यस्य मुखे वसन्ति प्रविश्य कुण्डे (वेद्यां) सुरलोकनाथ ॥

ततोग्नेर्दक्षिणतस्त्रिभिर्दर्भैर्ब्रह्मासनमास्तीर्य हिरण्यगर्भ इतिपञ्चाशद्भिः

कुशैर्ब्रह्मपवित्रकरणम् (ब्रह्मा वनाउने)

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

आब्रह्मन्निति ब्रह्माणमग्निप्रदक्षिणं कारयित्वा "अस्मिन् कर्मणि त्वं मे ब्रह्मा भव"

इत्युक्त्वा उद्ङ्मुखमुपवेशयेत् (उत्तर फर्काई राख्ने)

ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥

यस्य कूर्म इति होतुरासनम् (होतालाई आसनमा राख्ने)

ॐ यस्य कूर्मो गृहे हविस्तमग्ने वर्धया त्वम् । तस्मै देवाऽअधिब्रुवन्नयञ्च ब्रह्मणस्पतिः ॥

अग्ने प्रेहीति अग्नेरुत्तरतो यजमानासनम् (उत्तरतर्फ फर्काई यजमानको आसन राख्ने)

ॐ अग्ने प्रेहि प्रथमो देवयताञ्चक्षुर्देवानामुत मर्त्यानाम् ।
इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति ॥

परीत्य भूतानीति अग्नेरुत्तरतो वायव्ये च प्रणीतार्थे आसनद्वयं कल्पयित्वा प्रणीताग्न्योर्मध्ये प्रोक्षण्यासनं च निदध्यात् (प्रणीता र प्रोक्षणीमा आसन राख्ने)

ॐ परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनात्मान मभिसंविवेश ॥

तत इन्द्रऽआसामिति वारणं तच्च दण्डेनसह द्वादशाङ्गुलदीर्घं चतुरङ्गुलविस्तारंचतुरङ्गुलखातं प्रणीतापात्रं दक्षिणहस्तेन उत्थाप्य वामहस्तेनादाय (प्रणीता हातमा राख्ने)

ॐ इन्द्रऽआसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ।

उदुत्तममिति दक्षिणहस्तेनोदकं संपूर्य वायव्यासने निधाय दक्षिणानामिकयाऽऽलभ्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य प्रणीतापात्रं प्रणीतासने निदध्यात् । (प्रणीता राखिदिने र ब्रह्माजीलाई अवलोकन गर्ने)

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳश्रथाय ।
अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम ॥

ततो ये ते शतमिति बर्हिर्मुष्टिमादाय ईशानादिप्रागग्रैर्बर्हिर्भिरुदक्संस्थमग्नेः
परिस्तरणं कुर्यात् – (यज्ञको वरिपरि कुश ओछ्याउने)

ॐ ये ते शतं वरूणं ये सहस्रं यज्ञियाः पाशा विततता महान्तः ।
तेभिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥

अथ पात्रासादनम्

तत्वा यामीति मन्त्रं पठित्वा यावद्भिः पदार्थैः प्रयोजनं भवति तावतः पदार्थान् द्वन्द्वशः प्राक्संस्थानुदगग्रानग्नेरुत्तरतः
पश्चाद्वाऽऽसादयेत् । (पात्रहरू राख्ने या यज्ञमा पैसा राख्ने)

ॐ तत्त्वा यामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्यरुश ँस मा नऽआयुः प्रमोषीः ॥

त्र्यम्बकमिति पवित्रच्छेदनार्थानि प्रादेशपरिमितानि त्रीणि कुशतरुणानि दृढानि स्थापयेत् (कुश लिने)

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

ततः पवित्रे कृत्वा
पवित्रे स्थ इति पवित्रकरणार्थं साग्रेऽनन्तर्गर्भे द्वे कुशतरुणे (पवित्र वनाउने)

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
देवीरापोऽअग्रेगुवोऽअग्रेपुवोग्रऽइममद्य यज्ञं नयताग्रे यज्ञपति ँसुधातुं यज्ञपतिं देवयुवम् ॥

इमं मे वरुण इति वारणं द्वादशाङ्गुलदीर्घं करतलसम्मितखातं पद्मपत्राकृति कमलमुकुलाकृति
वा प्रोक्षणीपात्रम् (न्युब्जम्) (प्रोक्षणी वनाउने)

ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥

घृतवतीति तैजसी मृन्मयी वा द्वादशाङ्गुलविस्तृता प्रादेशोच्चा आज्यस्थाली न्युब्जम् (घ्यूको थाली राख्ने)

ॐ घृतवती भुव नानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभितेऽअजरे भूरिरेतसा ॥

अन्नपतेन्नस्येति तादृश्येव चरुस्थाली न्युब्जम् (चरु थालीमा राख्ने)

ॐ अन्नपतेऽन्नस्य नो देहचनमीवस्य शुष्मिणः । प्रप्रदातारं तारिषऽऊर्जं नो धेहि द्विपदे चतुष्पदे ॥

ततः शादन्दद्भिरिति सम्मार्जनकुशास्त्रिप्रभृतयः (कुश लिने)

ॐ शादन्ददिभरवकान्दन्तमूलैर्मृदं व्वर्स्वैस्तेगान्द ँष्ट्राभ्या ँसरस्वत्याऽअग्रजिव्हं जिव्हायाऽउत्सादम-
वक्रन्देन तालु वाज ँहनुभ्यामपऽआस्येन व्वृषणमाण्डाभ्यामादित्वाँर ॥ श्मश्रुभिः पन्थानं भ्रूभ्यां
द्यावापृथिवी व्वर्तोभ्यां विद्युतङ्कनीनकाभ्या ँशुक्लाय स्वाहा कृष्णाय स्वाहा पार्याणि पक्ष्माण्यवार्याऽ
इक्षवोऽवार्याणि पक्ष्माणि पार्याऽइक्षवः ।

उपयामगृहितोऽसीति उपयमनकुशाँस्त्रयोदश (१३ ओटा कुशको उपयमन बनाउने)

ॐ उपयामगृहीतोऽस्यन्तर्यच्छ मघवन् पाही सोमम्। उरूष्य रायऽएषो यजस्व ॥

समिधाग्निमिति समिधस्तिस्रः पलाश्यः प्रादेशमात्र्यः पृथक् स्थापयेत् (तीनवटा पलाँसका समिधा भिन्नै राख्ने)

ॐ समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम्। आस्मिन्हव्या जुहोतन ॥ (सुरो राख्ने)

स्रुवः खादिरो हस्तेमात्रोऽङ्गुष्ठपर्वमात्रखातः परिणाहवर्तुलपुष्करः (न्युब्जः) गव्यम् आज्यम्। चरुश्चेत् त्रिप्रक्षालिप्ताः ब्रीहितण्डुलाः। पूर्णपात्रम् – (षट्पञ्चाशदधिकशतद्वयमुष्टि परिमितं (२५६) परार्ध्यम्, बहु भोक्तृपुरुषाहारपर्यन्तमपरार्ध्यं तण्डुलाद्यन्नम्।) (२५६ मुठी अथवा १ जना अघाउने जति पूर्णपात्र ठिक्क पार्ने)

अन्यानि चोपयुक्तानि वस्तुन्यासाद्य (पूर्णपात्र ठीक पारिराख्ने)

तत आसादिते द्वे कुशतरुणि गृहीत्वा अग्रतः प्रादेशमात्रं परिमाय तयोरुपरि आसादितानि त्रीणि कुशतरुणानि तिर्यङ् निधाय पवित्रमूलेन पवित्रे प्रदक्षिणक्रमेणवेष्ट्य त्रयाणां मूलाग्राणि द्वयोर्मूलं च दक्षिणहस्तेन, पवित्रे च वाम हस्तेन गृहीत्वा "पवित्रे स्थः" इति मन्त्रेण प्रच्छिद्य द्वयोर्मूलं त्रीणि चोत्तरतः क्षिपेत्। देवस्य त्वेति द्वे पवित्रे प्रणीतापात्रे निधाय। (प्रोक्षणीमा पवित्र राख्ने)

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। अग्नये जुष्टं गृण्हाम्यग्नीषोमाभ्यां जुष्टं गृण्हामि ॥ (प्रणीतामा चोवेर सवैतिर जल शेचन गर्ने)

ततः प्रोक्षणीपात्रं प्रणीतासन्निधौ निधाय तत्र पात्रान्तरेण हस्तेन वा प्रणीतोदकमा सिच्य पवित्राभ्यामुत्पूय पवित्रे प्रोक्षणीषु निधाय दक्षिणहस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये कृत्वा तदुदकं दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां त्रिरूर्ध्वं क्षिप्त्वा प्रणीतोदकेन प्रोक्ष्य आसादितानि न्युब्जानि उत्तानानि कृत्वा आज्यस्थाल्यादीनि पूर्णपात्रपर्यन्तानि प्रोक्षणीभिरद्भिरासादनक्रमेणैकैकशः प्रोक्ष्य असञ्चरे प्रणीताग्न्योरन्तराले प्रोक्षणीपात्रं निदध्यात्।

ततो घृताच्यसीति आज्यस्थाल्यामासादितमाज्यं चरूंश्च प्रणीतोदकमासिच्य चरुस्थाल्यां निदध्यात्।

(थालीमा घ्यू राख्ने)

ॐ घृताच्यसि जुहूर्नाम्ना सेदं प्रियेण धाम्ना प्रिय&सदऽ आसीद घृताच्यस्युपभृन्नाम्ना सेदं प्रियेण धाम्ना प्रिय&सदऽआसीद घृताच्यसि ध्रुवानाम्ना सेदं प्रियेण धाम्ना प्रिय&सदऽआसीद प्रियेण धाम्ना प्रिय& सदाऽआसीद। ध्रुवाऽ असदन्नृतस्य योनौ ता व्विष्णो पाहि यज्ञं पाहि मां यज्ञन्यम् ॥

ततो ब्रह्मा आज्यं चरुं च युगपदग्नावारोप्य ब्रह्माभावे स्वयं यजमानो वा ज्वलदुल्मुकमादाय (ध्रुष्टिरसीति) मन्त्रेणाऽऽज्यचर्वोः समन्ताद्भ्रामयित्वा अग्नौ क्षिपेत् (कुश बालेर घ्यू र चरुमा घुमाएर अग्निमा लगाउने)

ॐ ध्रुष्टिरस्यपाग्नेऽ अग्निमामादं जहि निष्कव्याद& सेधादेवयजं वह। ध्रु वमसि पृथिवीन्द्ृ& ह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय ॥

अथ स्रुवसंस्कारः

स्रुचश्च म इति स्रुवग्रहणम् (सुरो लिने)

ॐ स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मे धिषवणे च मे पूतभृच्च म आधवनीयश्च मे वेदिश्च मे बर्हिश्च मे वभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥

इति दक्षिणहस्तेन ऋजुं स्रुवमादाय पुनन्तु मेति, पूर्वाग्रमधोबिलमग्नौ तापयेत् (सुरो तताउने)

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥

ततो वामे पाणावुत्तानबिलं निधाय 'प्रत्युष्ट ँ रक्ष' इति दक्षिणहस्तेन संमार्जनकुशैः प्रणीतोदकेन स्रुवप्रोक्षणं कुर्यात् (प्रणीताको जलले सुरोलाई सेचन गर्ने)

ॐ प्रत्युष्ट ँ रक्षः प्रत्युष्टाऽअरातयो निष्टप्त ँ रक्षो निष्टप्ताऽअरातयः । उर्वन्तरिक्षमन्वेमि ॥

तत अनिशितोसीति दक्षिणहस्तधृतमध्यसम्मार्जनकुशानामग्रैर्मूलतोऽग्रपर्यन्तं मूलैरग्रमारभ्य अधस्तान्मूलपर्यन्तं, समृज्य (सुरोलाई मार्जन (मसार्ने) गर्ने)

ॐ अनिशितोसि समत्नक्षिद्वाजिनं त्वा वाजेध्यायै सम्मार्ज्मि ॥

पुनन्तु मेति पुनः स्रुवं प्रतप्य (फेरि तताउने)

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥

शन्नो देवीरिति प्रणीतोदकेनाभिषिच्य (प्रणीताको जलले सेचन गर्ने)

ॐ शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये । शंयोरभि स्रवन्तु नः ॥

तत्त्वा यामिति पुनः स्रुवं प्रतप्य (फेरि तताउने)

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुश ँस मा नऽ आयुः प्रमोषीः ॥

तमुत्वेति स्रूवमुदङ्मुखमात्मनो दक्षिणतो कुशोपरि निदध्यात् (उत्तर फर्काई राख्ने)

ॐ तमु त्वा दध्यङ् ऋषिः पुत्रऽ ईधेऽ अथर्वणः । वृत्रहणं पुरन्दरम् ॥

तेजोसीति आज्यमुत्थाप्य चरोः पूर्वेण नीत्वा अग्नेरुत्तरतः स्थापयित्वा चरुमुत्थाप्य आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतः स्थापयित्वा आज्यमग्नेः पश्चादानीय स्थापयेत् (घ्यू ततउने)

ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि । प्रियं देवानामनाधृष्टन्देवयजनमसि ।

तथैव चरुं चानीय पशुभिरित्याग्नेः प्रदक्षिणं कारयित्वा आज्यस्योत्तरतः स्थापयेत् (चरुलाई घ्यूको पश्चिमतर्फ राख्ने)

ॐ पशुभिः पशूनाप्नोति पुरोडाशैर्हवी ँष्या । छन्दोभिः सामिधेनीर्याज्याभिर्वषट्कारान् ॥

आपवस्वेत्याज्यावेक्षणम् (घ्यू सफा गर्ने)

ॐ आपवस्व हिरन्यवदश्ववत्सोम वीरवत् । व्वा जङ्गो गोमन्तमा भर स्वाहा ॥

प्रत्यष्ट ँरक्ष इति पूर्वपवित्राभ्यामाज्यं त्रिरुत्पवनम् (पवित्रले घ्यूलाई तीनपटक छर्कने)

ॐ प्रत्युष्ट ँ रक्षः प्रत्युष्टा अरातयो निष्टप्त ँ रक्षो निष्टप्ताऽअरातयः । उर्वन्तरिक्षमन्वेमि ॥

आ त्वा हार्षमिति द्रव्यनिरीक्षणम् (घ्यूमा पैसा राख्ने)

ॐ आ त्वाऽहार्षमन्तरभू र्ध्रु वतिष्ठाविचाचलिः । विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रसत् ।

विष्णो ररांटमिति द्वे पवित्रे आज्ये चरौ च निधाय (घ्यू र चरुमा पवित्र राख्ने)

ॐ विष्णो ररांटमसि विष्णोःश्नप्त्रे स्थो विष्णोःस्यूरसि विष्णोध्रु वोसि । वैष्णवमसि विष्णवे त्वा ॥

देवस्य त्वेति प्रोक्षणीपात्रस्थपवित्राभ्यां पूर्ववत् प्रोक्षणीमुत्पूय तेनासादित वस्तुसेचनम्

(प्रोक्षणी र प्रणीताको जलले सेचन गर्ने)

ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अग्नीषोमाभ्याँ त्वा जुष्टं नियुनज्मि । अद्भ्यस्त्वौषधीभ्योऽनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्यः । अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥

धृष्टिरसीति ज्वलदुल्मुकमाज्यचर्वोरूपरि समन्तात् प्रदक्षिणक्रमेण भ्रामयित्वा अग्नौ क्षिपेत्

(कुश वाली घ्यूचरुमा घुमाई अग्निमा होम्ने)

ॐ धृष्टिरस्यपाग्नेऽ अग्निमामादञ्जहि निष्क्रव्याद ꣳ सेधादेवयजं वह । ध्रुवमसि पृथिवीन्द्ृ ꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातमन्युपदधामि भ्रातृव्यस्य व्वधाय ॥

अर्घ्यस्थापनम्

अर्घ्यपात्रं संस्थाप्य गन्धादिभिः पूजयेत् । (अर्घको पूजा गर्ने)

आपः क्षीरं कुशाग्राणि दध्याज्यतिलतण्डुलान् ।

दूर्वा सिद्धार्थकं ग्राह्यमष्टाङ्गोऽर्घ्य उच्यते ॥ (पानी, दुध, कुशका टुक्रा, दही, सर्स्यू, दुबो, तिल, अक्षता आदि राख्ने)

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धोकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

इति मन्त्रेणाङ्कुशमुद्रया सूर्यमण्डलाद् गङ्गादिनदीरावाह्य धेनुमुद्रयाऽमृतीकृत्य मत्स्यमुद्रयाच्छाद्य प्रणवेन अष्टधा अभिमन्त्रयेत् । (धेनुमुद्रा, अङ्कुश मुद्रा, मत्स्य, सङ्घमुद्रा बनाई देखाउने)

ततः सूर्याय अर्घ्यं दद्यात् । (सूर्यलाई अर्घ्य दिने)

एहि सूर्य सहस्रांशो तेजोराशे जगत्पते । अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ॥ ॐ भूर्भुवः स्वः जगतसाक्षिणे श्रीसूर्यनारायणाय नमः ।

ब्रह्माविष्णुप्रजापतिनां पूजनम्

आब्रह्मन् इति ब्रह्मार्चनं कुर्यात् (पञ्चोपचारले ब्रह्माको पूजा गर्ने र नमस्कार गर्ने)

ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥

इदं विष्णुरिति विष्ण्वर्चनम् (विष्णुको पनि पूजा गर्ने र ध्यान गर्ने)

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपा ꣳसुरे स्वाहा ॥

प्रजापतेनेति प्रजापतिपूजनम् (प्रजापतिको पूजा गर्ने र ध्यान गर्ने)

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नोऽअस्तु वय ꣳस्याम पतयोरयीणाम् ॥

हिरण्यगर्भ इति हिरण्यं निधाय (सबै स्थानमा भेटी चढाउने)

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

अग्निपूजनम्

तदेवाग्निरित्यग्निमर्चयेत् (पञ्चोपचारले अग्निको पूजा गर्ने)

ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः। तदेव शुक्रं तद्ब्रह्म ताऽआपः स प्रजापतिः ॥

ततः पूर्वस्थापितसमिधस्तिस्रो विहाय अपरसमिधादानम् (अन्य तीन समिधा अग्निमा थप्ने)

ॐ समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम्। आस्मिन्हव्या जुहोतन ॥

ततः अग्नावेव पूर्वादिप्रदक्षिणक्रमेण ऋग्वेदादींश्च पूजयेत् पूर्वे (पूर्वमा ऋग्वेदको पूजा गर्ने)

ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम् ॥ ॐ ऋग्वेदाय नमः।

दक्षिणे (दक्षिणमा यजुर्वेदको पूजा गर्ने)

ॐ इषे त्वोर्जे त्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽआप्यायध्वमघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मा मा वस्तेनऽईशत माघश ꣳसो ध्रुवाऽअस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ ॐ यजुर्वेदाय नमः।

पश्चिमे (पश्चिममा सामवेदको पूजा गर्ने)

ॐ अग्नऽआयाहि वीतये गृणानो हव्यदातये। निहोता सत्सि बर्हिषि ॥ ॐ सामवेदाय नमः।

उत्तरे (उत्तरमा अथर्ववेदको पूजा गर्ने)

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शं योरभिस्रवन्तु नः ॥ ॐ अथर्ववेदाय नमः।

आप्यायस्वेति चरुं ब्रह्मणे समर्पयेत् (ब्रह्मालाई चरु समर्पण गर्ने)

ॐ आप्यायस्व समेतु ते व्विश्वतः सोम व्वृष्ण्णयम्। भवा व्वाजस्य सङ्गथे ॥

ततोऽग्नि प्रार्थना

(अग्निको प्रार्थना गर्ने)

ॐ नमो यज्ञपुरुष वैश्वानर परमात्मादेवता ब्रह्मा ऋषिः कपिलवर्ण उष्णिक् छन्दो रुद्रो देवता होमे विनियोगः।

नारद उवाच

ॐ प्राङ्मुखस्तु स्थितो वन्हिः प्राङ्मुखा एव ऋत्विजः। प्राङ्मुखा देवताः सर्वाः कथं प्रत्यङ्मुखो भवेत्॥

ब्रह्मोवाच

आवाहयेत्ततो वन्हिं मन्त्रपूतेन वारिणा। अनलश्च जलं दृष्ट्वा भीतः प्रत्यङ्मुखो भवेत्॥

नारद उवाच

पावकस्य तु किं रूपं को वर्णः किञ्च लक्षणम्। शिरोबाहूदराङ्घ्रीणां चक्षुः श्रोत्रमुखस्य च॥

ब्रह्मोवाच

पावकं द्विजरूपं च त्रिनेत्रं च चतुर्भुजम्। त्रिशिखं सप्तजिह्वं च पञ्चलक्षणसंयुतम्॥
त्रिभागं तु मुखं तस्य अधिकं वक्त्रमुच्यते। उत्तरास्ये स्थितो विष्णुर्दक्षिणास्ये प्रजापतिः॥
मध्यवक्त्रे तु ईशान एवं ब्रह्मप्रभासितम्। मूर्ध्नि चैव त्वहं ब्रह्मा मुखे चैव तु शङ्करः॥
जिव्हायां संस्थितो विष्णुर्दंष्ट्रायां च ग्रहाः स्मृताः। नासायां देवताः सर्वाश्चक्षुषीन्दुदिवाकरौ॥
ऋग्वेदो हृदयस्थाने बाह्वङ्गुल्योर्यजुस्तथा। उदरे कटिगुह्ये च सामवेदः प्रकीर्तितः॥
अथर्वा जङ्घपादौ च ग्रीवौङ्कारस्तथैव च। पृष्ठे चैव तु गायत्री एवं स्यात्तु षडङ्गकम्॥

हरकमल पिङ्गललोचन लोहिताक्षः सर्वपापप्रणाशन। इति वैश्वानरलक्षणम्। कस्य पुत्रः, कस्य कुलोत्पन्नः, किं गोत्रः, कः पिता, का माता इति कात्यायनवचनात्, शृङ्गीगोत्रम्, शण्डिल्यः पिता, अरणिर्माता, उदानकुक्षिमूर्ध्वमुखललाटम्। काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वधरा च चण्डी लोलायमाना इति सप्तजिह्वा॥ त्रिशिखं च चक्रधरं साक्षसूत्रकमण्डलुम्। व्याघ्रहस्तं दिव्यपुष्पगन्धाभरणभूषितम्। अजास्कन्धसमारूढं कृष्णाजिनोत्तरीयकम्। ऋग्यजुः सामाथर्वाख्यवेदानां ध्वनिभूषितम्। होमार्थं प्रार्थयेऽहं त्वां चर्वाज्याभ्यां हुताशन। (अमुककर्मणि) अमुकनामन् दिव्यरूप वैश्वानर आवाहितो भव। तावत्तिष्ठात्र मे ब्रह्मन् यावत्कर्म समाप्यते॥
ॐ चत्वारीति वैश्वानरमन्त्रस्य वामदेवऋषिस्त्रिष्टुप्छन्दो वैश्वानरो देवता अग्निप्रार्थने विनियोगः।

ॐ चत्वारी शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्तहस्तासोऽअस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां २॥ आविवेश। इति अग्निप्रार्थनम् (चन्दन, अक्षता, फूलले कोण कोण र बीचमा पूजा गर्ने)

ततो गन्धपुष्पादिभिरग्निं पूजयेत्–आग्नेये–ॐ ब्रह्मणे नमः। नैऋत्ये–ॐ पौष्टिकाय नमः। वायव्ये – ॐ बलवर्धनाय नमः। ऐशान्ये – ॐ प्रजापतये नमः। मध्ये – ॐ विष्णवे नमः।

कर्मविशेष अग्नेर्नामानि

(अग्निका नाम)

अग्निश्च भरतो नाम गर्भाधाने विधीयते ।
तथा पुंसवने चैव सीमन्ते जातकर्मणि ॥
नाम्नि वै पार्थिवो वन्हिः प्राशने तु शुचिः स्मृतः ।
चूडायां मङ्गलो नाम व्रतदाने समुद्भवः ॥
गोदाने सूर्यनामा च विवाहे योजकस्तथा ।
शान्ति के दारुणो नाम पौष्टिके बलवर्धनः ॥
आवसभ्ये भवेदग्निरग्निष्टोमे प्रदायकः ।
वनदाहे दूतकाख्यः प्रकोष्ठे जठरः स्मृतः ॥
वायव्ये वरुणो नाम स्थावरे पावको भवेत् ।
क्रव्यादो मृतभक्षी च समुद्र वडवानलः ॥
युगान्ते चाक्षयो नाम वत्सरे प्रलयं गतः । इति ।

गर्भधान, पुंसवन, सीमन्त, जातकर्ममा **भरत,** न्वारानमा **पार्थिव,** अन्नप्राशनमा **शुचि,** चूडामा **मंगल,** व्रतदानमा **समुद्भव,** समावर्तनमा **सूर्य,** विवाहमा **योजक,** शान्तिकमा **दारुण, पौष्टिकमा बलवर्द्धन,** आवस्थ्य (घरभित्र) अग्निष्टोमा (अग्निहोत्रीले वसन्त ऋतुमा गर्ने पाँच दिनको यज्ञ) **प्रदायक,** डढेलोमा **दुतक,** प्रकोष्ठमा (वाहिरी वैठक) **जठर,** वायव्ययज्ञमा (वायुयज्ञ) **वरुण,** स्थावरयज्ञमा (वृक्षादिको प्रतिष्ठा) **पावक,** मरेकामा **क्रव्याद,** समुद्रमा **वडवानल,** युगान्तमा **अक्षय,** प्रलयमा **संवर्तक** अग्निका नाम हुन्छन् ।

अथ ब्राह्मणवरणम्

तत्रादौ कुशतिलजलयुतगन्धपुष्पाक्षतताम्बूलपूगीफलवस्त्रद्रव्याभरणादीन्यादाय (वरण सामग्री तयार गरी सङ्कल्प गर्ने)

ॐ तत्सत् विष्णुः ३ इत्यादिदेशकालादीन् सङ्कीर्त्य (अमुक) गोत्रः (अमुक) प्रवरः (अमुक) शर्माहं (अमुक) कर्मणि कृताकृतावेक्षणारूपब्रह्मकर्मकर्तुं (अमुक) कर्मणि प्रतिदेवतानां साज्यभागान्तमाहवनीयद्रव्ययुतहोमकर्मकर्तुं च (अमुक) कर्मणि तत्तत्कर्मविहितोपयोग्याचारकर्मकर्तुं (अमुक) कर्मणि चतुर्वेदोक्तमन्त्रजपपाठकर्मकर्तुं (पुन्यावाचनार्थं च) नानानामगोत्रान् नानानामशर्मणो ब्राह्मणानेभिश्चन्दनपुष्पाक्षतताम्बूलपूगीफलवासोद्रव्याभरणादिभिर्गणपतिब्रह्माहोत्राचार्यत्वेन जापकपाठकत्वेन ऋत्विक्त्वेन च युष्मानहं वृणे । ॐ वृताः स्म यथा विहितं कर्म कुरु, यथा ज्ञानेन करवामः । इति ब्राह्मणाः ब्रूयुः ।

नमोस्त्वनन्ताय ...। आकृष्णे ... । नमो ब्रह्मण्य ... । (टीका लगाई वरण सामग्री दिने)

आकाशात् पतितंतोयं यथागच्छतिसागरम् । सर्व देव नमस्कारः केशवं प्रति गच्छति ॥

अथ ब्रह्मादि ऋत्विक प्रार्थना । ब्रह्मप्रार्थना (ब्रह्माको प्रार्थना गर्ने)

ॐ यथा चतुर्मुखो ब्रह्मा सर्ववेदविशारदः । तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥

होतृप्रार्थना (होताको प्रार्थना)

ॐ भगवन् सर्वधर्मज्ञ सर्वधर्मविदांवर । विततते मम यज्ञेऽस्मिन् होतृत्वं मे मखे कुरू (भव) ॥

आचार्यप्रार्थना (आचार्यको प्रार्थना)

ॐ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ।

वेदपाठकानां प्रार्थना (अन्य ब्राह्मणहरूलाई प्रार्थना)

पूर्वदिशि ऋग्वेदपारायणार्थम्

ॐ ऋग्वेदः पद्म पत्राक्षो गायत्रः सोमदैवतः । अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

दक्षिणदिशि यजुर्वेदपरायणार्थम्

ॐ कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः । काश्यपेयस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

पश्चिमदिशि सामवेदपरायणार्थम्

ॐ सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः । भारद्वाजस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

उत्तरदिशि अथर्ववेदपरायणार्थम्

ॐ बृहन्नेत्रोऽथर्ववेदोऽनुष्टुभो रुद्रदैवतः । वैशंपायन विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

(अमुक) कर्मणि (अमुक) देवताया अमुकमन्त्रजपकर्मकर्तुं त्वामहं वृणे इति जापकांश्च वृणुयात् ।

ततो ब्राह्मणान् मधुपर्कादिना संपूज्य प्रार्थयेत् (ब्राह्मणलाई वरणको टीका लगाउने)

ॐ ब्राह्मणाः सन्तु मे शस्ताः पापात्पान्तु समाहिताः । वेदानां चैव दातारः पातारः सर्वदेहिनाम् ॥
जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः । देवानां च पितृणां च तृप्त्यर्थं पाठकाः कृताः ॥
येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम् । रक्षन्तु सततं तेऽस्मान् जपयज्ञे व्यवस्थिताः ॥
ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम् । येषां वाक्यामृतेनैव शुद्धयन्ति मलिनो जनाः ॥
पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः । सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ॥
श्रोत्रियाः सत्यवाचश्च वेदध्यानरताः सदा । यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः ॥
अङ्गीकुर्वन्तु कर्मैतत् कल्पद्रुमसमाशिषः । यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः ॥
यत्कृपालोचनात्सर्वा ऋद्धयो बृद्धिमाप्नुयुः । मम यज्ञे सदा पूज्याः सन्तु वै नियमान्विताः ॥
अक्रोधनाः शौचपराः सततं ब्रह्मवादिनः । जपध्यानरता नित्यं प्रसन्नमनसः सदा ॥
अदुष्टभाषिणः सन्तु मा सन्तु परनिन्दकाः । ममापि नियमा हचेते भवन्तु भवतामपि ॥
इति ब्राह्मणप्रार्थनायां विशेषवाक्यानि ।

अथ पुण्याहवाचनम्

(पुण्यवाचनको सङ्ल्पैपिच्छे तिल, जौ, कुश लिएर छोड्ने चलन पनि छ)

गन्धपुष्पाक्षतताम्बूलपूगीफलद्रव्यवस्त्रादिभिस्त्रींश्चतुरः पञ्च वा ब्राह्मणान् सम्पूज्य हस्ते फलादिकं गृहीत्वा

(फल, फूल, दुबो, अक्षता लिई नमस्कार गर्ने)

ॐ तत्सत् विष्णुरित्यादि देशकालौ स्मृत्वा अद्येहामुकगोत्रस्यामुकशर्मणो मम गृहे अस्मिन् कर्मणि (वा अस्मै कर्मणे) भो ब्राह्मणाः । ॐ पुण्याहं भवन्तो ब्रुवन्तु इति त्रिः ।
श्रावयेत् । ते च ॐ पुण्याहम् । इति त्रिः प्रतिवचनं ब्रूयुः । (यजमानले तीनपटक भन्ने)

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥

(ब्राह्मणले भन्ने – राम्रो होस्, असल होस्, पवित्र होस्)

पुनः पूर्ववत् ॐ अद्येहेत्याद्युच्चार्य अस्मिन् कर्मणि (वा अस्मै कर्मणे) भो ब्राह्मणाः ॐ स्वस्ति भवन्तो ब्रुवन्तु इति त्रिः श्रावयेत् । ॐ स्वस्तिः । इति त्रिः प्रतिवचनम् । (यजमानले तीन पटक भन्ने)

ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

(ब्राह्मणले भन्ने – भलो होस्)

पुनः पूर्ववत् ॐ अद्येहेत्यादि उच्चार्य अस्मिन् कर्मणि (वा अस्मै कर्मणे) भो ब्राह्मणाः । ॐ ऋद्धिं भवन्तो ब्रुवन्तु इति त्रिः ॐ ऋद्धिः इति त्रिः प्रतिवचनम् ।

(यजमानले भन्ने)

ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम । दिवं पृथिव्याऽअध्यारुहामाविदाम देवान्त्स्वर्ज्योतिः ॥

(ब्राह्मणले भन्ने – सफलता, अलौकिक शक्ति र पूर्णता मिलोस्)

पुनः पूर्ववत् ॐ अद्येहेत्याद्युच्चार्य अस्मिन् कर्मणि (वा अस्मै कर्मणे) भो ब्राह्मणाः । ॐ वृद्धिं भवन्तो ब्रुवन्तु इति त्रिः । ॐ वृद्धिः । इति त्रिः प्रतिवचनम् ।

(यजमानले तीन पटक भन्ने)

ॐ ज्यैष्ठचञ्च मऽआधिपत्यञ्च मे मन्युश्च मे भामश्च मेमश्च मेम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ।

(ब्राह्मणहरूले भन्ने – उन्नति, नाफा होस्)

पुनः पूर्ववत् ॐ अद्येहेत्याद्युच्चार्य अस्मिन् कर्मणि (वा अस्मै कर्मणे) भो ब्राह्मणाः । ॐ कल्याणं भवन्तो ब्रुवन्तु । इति त्रिः । ॐ कल्याणम् । इति त्रिः प्रतिवचनम् ।

(यजमानले तीन पटक भन्ने)

ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराज न्याभ्याꣳशूद्राय चार्याय च स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्धिचतामुपमादो नमतु ॥

(ब्राह्मणहरूले भन्ने – कल्याण, भलाइ, सौभाग्य, स्वर्ण होस्)

पुनः पूर्ववत् ॐ अद्येहेत्याद्युच्चार्य अस्मिन् कर्मणि (वा अस्मै कर्मणे) भो ब्राह्मणाः । ॐ शान्तिं भवन्तो ब्रुवन्तु । इति त्रिः ॐ शान्तिः । इति त्रिः प्रतिवचनम् ।

(यजमानले तीन पटक भन्ने)

ॐ द्यौः शान्ति रन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥

(ब्राह्मणहरूले भन्ने – दुःख, चिन्ता, रिस नरहोस्)

पुनः पूर्ववत् अद्येहेत्याद्युच्चार्य अस्मिन् कर्मणि (वा अस्मै कर्मणे) भो ब्राह्मणाः । ॐ श्रियं भवन्तो ब्रुवन्तु । इति त्रिः श्रीः । इति त्रिः प्रतिवचनम् ।

(यजमानले तीन पटक भन्ने)

ॐ मनसः काममाकूतिं वाचः सत्यमशीय । पशूनाꣳरूपमन्नस्य रसो यशः श्रीः श्रयताम् ।

(ब्राह्मणहरूले भन्ने– सम्पत्ति, सम्पन्न होस्)

गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलचारुभक्षणम् ॥ उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम् ॥ ॐ विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय । नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥

इति मन्त्रान् पठित्वा (यजमानलाई टीका लगाई फूल या सुपारी दिने)

श्रीर्वर्चस्वमायुष्यमारोग्यमाभिधात् पवमानं महीयते । धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमाऽऽयुः ॥ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयोऽस्तु वः ॥ अव्याधिना शरीरेण मनसा च निराधिना । पूरयन्नर्थिनामाशास्त्वं जीव शरदां शतम् ॥

भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु । रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ॥

इति पुण्याहवाचनम् ।

अथ दीपपूजा

तत्र स्थिरो भवेति दीपं प्रज्वालयेत् (दियो बाल्ने)

ॐ स्थिरो भव वीड्वङ्गऽआशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।

सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥ (पञ्चोपचारले पूजा गर्ने)

पृष्टो दिवीति पूजनम् (दियोको पूजा गर्ने)

ॐ पृष्टो दिवि पृष्ट्होऽग्निः पृथिव्यां पृष्ट्हो विश्वाऽओषधीराविवेश ।

वैश्वानरः सहसा पृष्ट्होऽग्निः स नो दिवा सरिषस्पातु नक्तम् ॥

इति पाद्यादिभिरुपचारैः सम्पूज्य प्रार्थयेत् (फूल अक्षता लिई नमस्कार गर्ने)

ॐ नमः कमलनाभाय नमस्ते जलशायिने । नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते ॥

वासनाद्वासुदेवस्य वासितं भुवनत्रयम् । सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥

ॐ शुभं भवतु कल्याणमारोग्यं सुखसम्पदः । सर्वशत्रुविनाशाय दीपज्योतिर्नमोऽस्तु ते ॥

अथ कलशपूजा

अथ भूरसीतिभूमिशोधनम् – (फूल अक्षता लिएर कलश नजिकै भूमिमा छुने)

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।

पृथिवीं यच्छ पृथिवीन्दृ ँहपृथिवीं मा हि ँसीः ॥

धान्यमसीति धान्यं स्थापयेत्– (धानमा छुने)

ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोऽसि ॥

आ जिघ्रकलशमिति धान्योपरि अब्रणं कलशं स्थापयेत् (कलशलाई छुने)

ॐ आ जिघ्र कलशं महचा त्वा विशन्त्विन्दवः ।
पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः ॥

वरुणस्योत्तम्भनमसीति कलशे तीर्थादिजलं प्रक्षिपेत् (तीर्थको जल राख्ने)

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥

या ओषधीरिति सर्वौषधीः प्रक्षिपेत् (सर्वौषधि राख्ने)

ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा । मनैनु बभ्रूणामह ꣳ शतं धामानि सप्त च ॥

हिरण्यगर्भ इति पञ्चरत्नानि (पञ्चरत्न राख्ने)

ॐ हिरण्यगर्भ्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् । स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥

या फलिनीरिति फलादीनि (फलफूल राख्ने)

ॐ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः । वृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व ꣳ हसः ॥

ओषधय इति यवान् (कलशमा जौ राख्ने)

ॐ ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्त ꣳ राजन्पारयामसि ॥

गन्धद्वारामिति चन्दनम् (चन्दनले सिँगार्ने)

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

काण्डात्काण्डादिति दूर्वा (दुबो राख्ने)

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥

स्योना पृथिवीति सप्तमृत्तिकाः (सप्तमृत्तिका राख्ने)

ॐ स्योना पृथ्वी नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥

अश्वत्थेव इति पञ्चपल्लवैस्तन्मुखमाच्छाद्य (आँप, वर, पीपल, डुम्री, पाखरीका पातहरू राख्ने)

ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता । गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् ॥

बृहस्पतेऽअतीति वस्त्रयुग्मेन कलशं वेष्टयेत् (कपडा वेरिदिने)

ॐ बृहस्पतेऽअति यदर्योऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋत प्रजात तदस्मासु द्रविणं धेहिचित्रम् ॥ उपयामगृहीतोसि बृहस्पतये त्वैषते योनिर्बृहस्पते त्वा ॥

अम्बेऽअम्बिके इति आम्रपल्लवैस्तन्मुखमाच्छाद्य (आँपको पात राख्ने)

ॐ अम्बेऽअम्बिकेऽ म्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥

तत्त्वा यामीति कलशे वरुणमावाह्य पूजयेत् (वरुणको आवाहन गरी पूजा गर्ने)

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तादाशास्ते यजमानो हविर्भिः ॥
अहेडमानो वरुणेह बोध्युरूश&स मा नऽ आयुः प्रमोषीः ॥ (पञ्चोपचारले पूजा गर्ने)

ततः कलशे गङ्गादितीर्थान्यावाहयेत् (तीर्थहरूलाई आवाहन गर्ने)

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

कलशं स्पृष्ट्वाभिमन्त्रयेत् (कलशलाई छुने)

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः । अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ।

ततः कलशप्रार्थना (फूल, अक्षता लिई नमस्कार गर्ने)

ॐ देवदानवसंवादे मथ्यमाने महोदधौ । उत्पनोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा । नमो नमस्ते स्फट्टिकाप्रभाय सुश्वेत हाराय सुमङ्गलाय । सुपास हस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥ पासपाणे नमस्तुभ्यं पद्मिनी जिवनायक । यावत् कर्म समाप्तिस्यात् तावत् त्वं सुस्थिरो भव (चतुः कुम्भेषु चतुः सागर पूजनम्) ॥ इति ॥

अथ गणेशपूजा

हस्ते कुशयवजलान्यादाय – ॐ अद्येहेत्यादि (अमुक) कर्म निर्विघ्नपरिसमाप्त्यर्थममुकर्माङ्गत्त्वेन गणेशपूजनमहं करिष्ये । इति सङ्कल्प्य, "गणानान्त्वा" "हे हेरम्ब" इत्यादिमन्त्रैरावाहयेत् । (गणेशलाई आवाहन गर्ने)

ॐ गणानान्त्वा गणपति&हवामहे प्रियाणान्त्वा प्रियपति&हवामहेनिधीनान्त्वा निधिपति&हवामहे व्वसोमम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ।

ॐ हे हेरम्ब त्वमेहचेहि अम्बिकात्र्यम्बकात्मज ॥ सिद्धिबुद्धिपते त्र्यक्ष लक्ष्यलाभयितः पितः ॥ नागस्य नागहार त्वं गणराज चतुर्भुज । भूषितैः स्वायुधैर्दिव्यैः पाशाङ्कुशपरस्वधैः ॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः । इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष माम् ॥

इत्यावाह्य – (गणेशलाई पूजा गर्ने)

ॐ भूर्भुवः स्वः गणपतये सिद्धिबुद्धिसहिताय साङ्गाय सायुधाय सवाहनाय सपरिवाराय इदमासनं समर्पयामि । ततः सहस्रशीर्षेत्यादिषोडशमन्त्रैः षोडशोपचारैः पूजयेत् ।

तद्यथा – (षोडशोपचारले पूजा गर्ने)

आसनम् पाद्यम्, अर्घ्यं, आचमनीयम्, पञ्चामृतम्, शुद्धोदकम्, यज्ञोपवीतम्, वस्त्रम्, चन्दनम्, दूर्वा, अक्षताः, धूपः, दीपः, नैवेद्यम्, आचमनीयम्, ताम्बूलम्, वस्त्रालङ्कारादियल्लब्धम्, दक्षिणाद्रव्यम्, पादवन्दनम्। एभिः सम्पूज्य नारिकेलादिफलं सवस्त्रं पुरतः पात्रे निधाय स्तुतिं कुर्यात् । (धूप, बत्ती, नैवेद्य चढाई नरिवल या फल लिई नमस्कार गर्ने)

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक । भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥
द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो । वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥
इदं फलं प्रियं तुभ्यं अर्पयामि गणाधिप ! अनेन फलदानेन फलदोऽस्तु सदा मम ॥
वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ ! अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

अथ रक्षाबन्धनपूजा (रक्षाबन्धनमा जौ, दुवो, सर्स्यूं, चन्दन, गोवर, दही राख्ने)

यवकुशदूर्वासर्षपचन्दनगोमयहरिद्रादधिसहितां रक्षां ताम्रपात्रे निधाय पात्रं स्पृशन् नारायण कवचं पठेत्
(फूल अक्षता लिई छुने)

ॐ पूर्वे रक्षतु गोविन्द आग्नेय्यां धरणीधरः । याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते ॥
वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः । उत्तरे श्रीधरो रक्षेदधस्तात्तु महीधरः ॥
एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः । यज्ञाग्रे रक्षताच्छङ्खः पृष्ठे वै पद्ममुत्तमम् ॥
वामपार्श्वे गदा रक्षेद्दक्षिणे तु सुदर्शनः । उपेन्द्रः पातु ब्रह्माणमाचार्यं पातु वामनः ॥
ऋग्वेदमच्युतो रक्षेद्यजुर्वेदमधोक्षजः । कृष्णो रक्षतु सामानमथर्वाणञ्च माधवः ॥
उपविष्टाँश्च विप्राँस्तानानिरुद्धोऽभिरक्षतु । यजमानं सपत्नीकं पुण्डरीकाक्ष एव तु ॥
रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षताद्धरिः । वेदमन्त्रैश्च कर्तव्या रक्षा शुभ्रैस्तु सर्षपैः ॥
कृत्वा पोटलिकां पूर्वं बध्नीयाद्दक्षिणे करे ॥ इति ॥

ततो वक्षमाणमन्त्रैः पूजयेत् (रक्षावन्धनमा पूजा गर्ने)

ॐ रक्षोहणं वलगहनं वैष्णवीमिदमहन्तं वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखानेदमहन्तं वलगमुत्किरामि यं मे समानो यमसमानो निचखानेदमहन्तं वलगमुत्किरामि यं मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं वगलगमुत्किरामि यं मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥
ॐ स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्य मित्रहा ॥
ॐ रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान्रक्षोहणो वो वलगहनोऽवनयामि वैष्णवान्रक्षोहणो वो

व्वलगहनोऽवस्तृणामि वैष्णवान्रक्षोहणौ वां व्वलगहनाऽउपदधामि वैष्णवी रक्षोहणौ वां व्वलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवास्थ ॥

ॐ सप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतोलोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ । इति रक्षाबन्धन पूजा ॥ (पञ्चोपचारले पूजा गर्ने)

ततः कलशस्कन्धप्रदेशे

(इशान कलशमा चन्दन, अक्षता, फूलले पूजा गरिरहने)

ॐ गणपतिसूर्यदेवीशिवविष्णून्, विनायकदुर्गावाय्वाकाशाश्विनिकुमारान्, सूर्यसोमभौमबुधबृहस्पति - शुक्रशनिराहुकेतून्, ईश्वरोमास्कन्दहरिब्रह्मेन्द्रयमकालचित्रगुप्तान्, अग्नि-अप्भूमिविष्णु - इन्द्र-इन्द्राणीप्रजापति-सर्पब्रह्माणः इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानन्तान्, ध्रुवाद्यष्टवसून्, धात्रादिद्वादशादित्यान्, वीरभद्राद्येकादशरुद्रान्, गौर्यादिषोडशमातृः, आवहादिसप्तमरुतः, विनायक-ब्रह्म विष्णुरुद्रार्कवनस्पतीनात्मन इष्टदेवता-कुलदेवताः स्थानग्रामदेवताश्चावाह्य यथामिलितोपचारैः (पञ्चोपचारैः षोडशोपचारैर्वा) पूजयेत् ।

स्तुतिं कुर्यात्

(पञ्चोपचारले पूजा गरी फूल अक्षता लिई नमस्कार गर्ने)

सूर्यः सौर्यमथेन्दुरिन्द्रपदवीं सन्मंगलं मङ्गलः । सद्बुद्धिंच बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ॥
राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं । नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूलाः ग्रहाः ॥
ब्रह्मामुरारिस्त्रिपुरान्तकारी, भानु शशि भूमिसूतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

पुस्तकं पूजनम् वा पुस्तक प्रार्थना

(पुस्तक पूजा गरी फूल लिएर नमस्कार गर्ने)

या कुन्देन्दु-तुषारहार-धवला या शुभ्रवस्त्रावृता या वीणा-वरदण्ड-मण्डितकरा या श्वेतपद्मासना ।
या ब्रह्मा-ऽच्युत-शङ्कर-प्रभृतिभिर्देवैः सदा वन्दिता सा मां पातु सरस्वती भगवतीनिःशेषजाडचापाहा ॥
शुक्लां ब्रह्मविचार-सार-परमामाद्यां जगद्व्यापिनं वीणा-पुस्तकधारिणीमभयदां जाडचान्धकारापहाम् ।
हस्ते स्फाटिक-मालिकां च दधती पद्मासने संस्थितां वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥

अथ होमसङ्कल्पः

कुशादिकमादाय

(तिल, जौ, कुश लिई पानी समाउने)

ॐ तत्सत् ॐ विष्णुः३ इत्यादिदेशकालादीन् सङ्कीर्त्य (अमुक) गोत्रस्य (अमुक) प्रवरस्य (अमुक) शाखान्तर्गत (अमुक) वेदाध्यायिनो (अमुक) शर्मणो (वर्मणो) (गुप्तस्य) दासस्य अहं मम (अमुक) कर्मणि आधाराज्यभागपञ्चवारुणिहोमपूर्वकप्रधानभूतेभ्यो देवेभ्यो गणपत्यादिपञ्चायतनेभ्यो विनायकादिपञ्चलोकपालेभ्यः सूर्यादिनवग्रहेभ्य ईश्वराद्यधिदेवेभ्योऽग्न्यादि-प्रत्यधिदेवेभ्य इन्द्रादिदशदिक्पालेभ्यो ध्रुवाद्यष्टवसुभ्यो धात्रादिद्वादशादित्येभ्यो वीरभद्राद्येकादशरुद्रभ्यो गौर्यादिषोडशमातृभ्य आवहादिसप्तमरुद्भ्यो विनायकब्रह्मविष्णुरुद्रार्कवनस्पतिभ्यः (प्रधानदेवेभ्यः) तथा चतुः स्वस्तिभ्यः पयः पञ्चभ्यः षड्विष्णुभ्यो द्वादशदेवताभ्योः द्वादशशान्तिभ्यः षड्प्रातर्भ्यः षड्वातेभ्य स्व्यनडुद्भ्यः पञ्चभगेभ्यः पञ्चेन्द्रियेभ्यो पञ्चवरुणेभ्यो गायत्र्यै सावित्र्यै सरस्वत्यै गृहमात्रेऽन्नपूर्णायै महालक्ष्म्यै महारिष्टविनाशिन्यै चण्डयै घोराल्यै वास्तुदेवाय

भूमिदेवाय गैडुदेवाय क्षेत्रपालाय ग्रामदेवाय स्वर्गेन्द्राय पातालवासुकिभ्यो मित्रलोकपालाय मान्धात्रे तीर्थराजाय व्रतराजाय पुनर्दिक्पालेभ्यस्तिथिभ्यो नक्षत्रेभ्यो वारेभ्यः करणेभ्यो वातेभ्यो मेघेभ्यः समुद्रेभ्यो नदीभ्य इष्टदेवेभ्यः कुलदेवेभ्यः स्थापितदेवेभ्यो भैरवाय भैरव्यै विन्ध्यवासिन्यै स्थानविशेषाधिपतिदेवताभ्यः सर्वदेवेभ्यः सर्वहोमपूरणार्थेभ्यः पञ्चपाण्डवेभ्यो भीमसेनाय पितृभ्यो वैश्वानराय तथोत्तराङ्गत्वेन भूर्भुवः स्वः अग्निवरुणसवितृविष्णुर्विश्वेदेवमरुत स्वर्कप्रजापतिस्विष्टकृद्देवेभ्यश्च इदमाज्यादिद्रव्यहोमं करिष्ये । ॥ इति होमसङ्कल्पः ॥

ततः उपयमनकुशान् वामहस्ते कृत्वोत्तिष्ठन् प्रजापतिं मनसा ध्यायन समिद्धतमेऽग्नौ समिधाग्निमितिमन्त्रेण-

ॐ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन ॥

(उपनयन कुश लिने र पहिले राखेका तीनओटा समिधा घ्यूमा चोवेर होम्ने)

पृष्टो दिवीति मन्त्रेण दक्षिणचुलुकेन सपवित्रप्रोक्षण्युदकमादाय –

ॐ पृष्टो दिवि पृष्टोऽअग्निः पृथिव्यां पृष्टो विश्वाऽओषधीराविवेश ।
वैश्वानरः सहसा पृष्टोऽअग्निः स नो दिवा सरिषस्पातु नक्तम् ॥

सुसमिद्धायेतिमन्त्रेण तज्जलेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य –

ॐ सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन । अग्नये जातवेदसे ॥

पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहोति तत्राघारादारभ्य द्वादशाहुतिषु तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः कुर्यात् । (धारो नटुटाई हवन गर्ने)

अथ प्रजापत्यादिवनस्पत्यन्तहोमः

(घ्यू हवन गर्ने र सुरोको घ्यू प्रोक्षणीमा छर्ने)

ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । (इति मनसा) प्रोक्षणीपात्रेऽपि ।

ॐ इन्द्रायेति प्रजापति ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः । ॐ इन्द्राय स्वाहा । इदमिन्द्राय न मम । (इति आघारौ) प्रोक्षणीपात्रेऽपि ।

ॐ अग्नय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः । ॐ अग्नये स्वाहा । इदमग्नये न मम । प्रोक्षणीपात्रेऽपि ।

ॐ सोमायेति प्रजापतिऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः । ॐ सोमाय स्वाहा । इदं सोमाय न मम । (इति आज्यभागौ) प्रोक्षणीपात्रेऽपि ।

ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिऋषिरग्निवायुसूर्यो देवता गायत्र्युष्णिगनष्टुभश्छंदासि अग्न्याधाने विनियोगः । ॐ भूः स्वाहा । इदमग्नये न मम । प्रोक्षणीपात्रेऽपि ।

ॐ भुवः स्वाहा । इदं वायवे न मम । प्रोक्षणीपात्रेऽपि । ॐ स्वः स्वाहा । इदं सूर्याय न मम । प्रोक्षणीपात्रेऽपि । एता महाव्याहृतयः ।

पञ्चवारूणीहोमः (घ्यू हवन गर्ने)

ॐ त्वन्नो अग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः प्रायश्चित्तआज्यहोमे विनियोगः ।

ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः । यजिष्ठो वन्हितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत्स्वाहा । इदमग्निवरुणाभ्यां न मम । प्रोक्षणीपात्रेऽपि ।

ॐ स त्वन्न इति वामदेवऋषिस्त्रिष्टुप्छन्दः अग्निवरुणौ देवते आज्यहोमे विनियोगः ।

ॐ स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ ।
अवयक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳसुहवो नऽएधि स्वाहा ॥

इदमग्निवरुणाभ्यां न मम । प्रोक्षणीपात्रेऽपि ।

ॐ अयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता सर्व प्रायश्चित्तआज्यहोमे विनियोगः ।

ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमयाऽअसि ।
अया नो यज्ञं वहास्यया नो धेहि भेषजꣳस्वाहा ॥ इदमग्नये न मम । प्रोक्षणीपात्रेऽपि ।

ॐ ये ते शतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणः सवित विष्णुर्विश्वेदेवा मरुतः स्वर्का देवताः प्रायश्चित्तआज्यहोमे विनियोगः ।

ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः ।
ते भिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम प्रोक्षणीपात्रेऽपि ।

ॐ उदुत्तममिति शुनः शेफऋषिस्त्रिष्टुप्छन्दो वरुणो देवता पाशान्मोचने विनियोगः ।

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳश्रथाय ।
अथा वयमादित्यव्रते तवानागसोऽअदितये स्याम स्वाहा ॥

इदं वरुणाय न मम । प्रोक्षणीपात्रेऽपि । एताः प्रायश्चित्तसंज्ञकाः ।

इति पञ्चवारुणिहोमः ।

अथ प्रधानदेवताहोमसूत्राणि (कर्तालि थोरै चरु हातमा लिएर प्रार्थना गर्ने र हवन गर्ने चलन छ)

गणेशो भास्करो देवी शिवो विष्णुश्च पञ्चमः । पञ्चायतननामानि कथिताः पञ्चदेवताः ॥१॥
विनायकस्तथा दुर्गा वायुराकाश एव च । नासत्यौ चेति पञ्चैते लोकपाला प्रकीर्तिताः ॥२॥
सूर्यः सोमश्च भौमश्च बुधो जीवश्च भार्गवः । शनि राहुश्च केतुश्च कथिताश्च नवग्रहाः ॥३॥
ईश्वरश्च उमा स्कन्दो विष्णुर्ब्रह्मा शचीपतिः । यमः कालश्चित्रगुप्त इत्येता अधिदेवताः ॥४॥
अग्निरापो धरा विष्णुरिन्द्र ऐन्द्री प्रजापतिः । सर्पा ब्रह्मा क्रमात्प्रोक्ता नव प्रत्यधिदेवताः ॥५॥
इन्द्राग्नी यमनिर्ऋती वरुणो मरुतो विधुः । ईशो ब्रह्मा तथानन्तो दिक्पालाः दश कीर्तिताः ॥६॥
ध्रुवाद्यष्टवसुर्ज्ञेयो धात्रादित्यास्तु द्वादश । वीरभद्राद्येकादश गौर्यादिमातृषोडश ॥७॥
आवहादिमरुत्सप्त विनायकविधी हरिः । रुद्रश्चार्कस्तथा प्रोक्तो वनस्पतिः क्रमेण हि ॥८॥

चतुः स्वस्तिः पयःपञ्च षड्विष्णुर्देव द्वादश । शान्तिर्द्वादश षट्प्रातः षड्वातास्तु क्रमेण हि ॥९॥
अनडुत्संज्ञको ज्ञेयो होमकर्मणि वै ध्रुवम् । पञ्चभगेन्द्रियाः पञ्च वरुणाः पञ्च एव च ॥१०॥
गायत्री चैव सावित्री वाग्देवी गृहमातृकाः । अन्नपूर्णा महालक्ष्मी महारिष्टविनाशिनी ॥११॥
चण्डी द्यौराली विज्ञेया वास्तुभूम्यस्तथैव च । गैडुश्च क्षेत्रपालश्च ग्रामदेवास्ततः परम् ॥१२॥
स्वर्गेन्द्रो वासुकिश्चैव मित्रलोकस्तथैव च । मान्धाता तीर्थराजश्च व्रतराजस्ततः परम् ॥१३॥
पुनर्दिक्पालका ज्ञेयास्तिथिनक्षत्रयोगकाः । वारश्च करणश्चैव वायुमेघसमुद्रकाः ॥१४॥
नदीष्टकुलदेवाश्च स्थापिता देवताः क्रमात् । भैरवो भैरवी विन्ध्यवासिनी स्थानदेवताः ॥१५॥
एषोह सर्वदेवाश्च शुक्रज्योतिस्तथैव च । पाण्डवाः पितरश्चैव वैश्वानरः क्रमेण च ॥१६॥
पूर्णपात्रं ततो दद्याद्बहिर्होमस्ततः परम् । गोभूरत्नहिरण्यादि रौप्यवस्त्राणि चैव हि ॥१७॥
देयानी द्विजमुख्येभ्यो यजमानै र्विशेषतः । इति होमसूत्राणि । (चरु अग्निमा लगाउने)

अथ प्रधानदेवताहोमः (अब घ्यूसहित चरु पनि हवन गर्ने)

ॐ गणानान्त्वा गणपति ँ हवामहे प्रियाणान्त्वा प्रियपति ँ हवामहे निधीनान्त्वा निधिपति ँ हवामहे व्वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् स्वाहा ॥ इदं गणपतये न मम ।
ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । (न ममको ठाउँमा सूर्याय स्वाहा इदं सूर्याय भन्ने चलन पनि छ ॥)
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा ॥ इदं सूर्याय न मम ।
ॐ देवीर्द्वारऽइन्द्र ँ सङ्घाते वीड्वीर्यामन्नवर्धयन् । आवत्सेन तरुणेन कुमारेण च मीवता पार्वाण ँ रेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज स्वाहा ।
इदं देव्यै न मम ।
ॐ नमः शम्भवाय च मयो भवाय च नमः शङ्कराय च मयस्कराय च नमः । शिवाय च शिवतराय च स्वाहा । इदं शिवाय न मम । अत्र प्रणीतोदकस्पर्शः । (शिवलाई आहुति दिएर सुरोको टुप्पो प्रणीतामा चोब्ने)
ॐ विष्णो रराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा स्वाहा ।
इदं विष्णवे न मम । इति पाञ्चायनाः ।

अथ पञ्चलोकपालाः (हवन गर्ने)

ॐ गणानान्त्वा गणपति ँ हवामहे प्रियाणान्त्वा प्रियपति ँ हवामहे निधीनान्त्वा निधिपति ँ हवामहे व्वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् स्वाहा ॥ इदं विनायकाय न मम ।
ॐ अम्बेऽअम्बिकेम्बालिके न मानयति कश्चन । ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् स्वाहा ॥
इदं दुर्गायै न मम ।
ॐ वायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये स्वाहा ॥ इदं वायवे न मम ।
ॐ ऊर्ध्वाऽअस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोची ँ ष्यग्नेः । द्युमत्तमा सुप्रतीकस्य सूनोः स्वाहा ।
इदमाकाशाय न मम ।

ॐ अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चा-
मीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेभिषिञ्चामि स्वाहा ॥

इदमश्विनीकुमाराभ्यां न मम । इति पञ्चलोकपालाः ।

अथ नवग्रहाः

(हवन गर्ने)

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा ॥

इदं सूर्याय न मम ।

ॐ इमन्देवाऽअसपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय ।
इदममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा स्वाहा ॥

इदं सोमाय न मम ।

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम् । अपाꣳ रेताꣳसि जिन्वति स्वाहा ॥

इदं भौमाय न मम ।

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳ सृजेथामयञ्च अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्
विश्वेदेवा यजमानश्च सीदत स्वाहा ॥ इदं बुधाय न मम ॥

ॐ बृहस्पतेऽअति यदर्योऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋत प्रजात तदस्मासु
द्रविणं धेहिचित्रम् ॥ उपयामगृहीतोसि बृहस्पतये त्वैषते योनिर्बृहस्पते त्वा स्वाहा ॥

इदं बृहस्पतये न मम ॥

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिवत्क्षत्रं पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोमृतं मधु स्वाहा ॥

इदं शुक्राय न मम ॥

ॐ शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः स्वाहा ॥

इदं शनैश्चराय न मम ॥

ॐ कया नश्चित्रऽआभुवदूती सदावृधः सखा । कया शचिष्ठया वृता स्वाहा ॥ इदं राहवे न मम ।

ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्याऽअपेशसे । समुषद्भि रजायथाः स्वाहा ।

इदं केतवे न मम (केतुभ्यो न मम) ॥ इति नवग्रहाः ॥

अथाधिदेवता

(हवन गर्ने)

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारूकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् स्वाहा ।

इदमीश्वराय न मम । अत्र प्रणीतोदकस्पर्शः ।

ॐ श्रीश्च ते लक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण स्वाहा ॥ इदमुमायै न मम ॥
ॐ यदक्रन्दः प्रथमं जायमानऽउद्यन्त्समुद्रादुतवा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यं महि जातं तेऽअर्वन् स्वाहा ॥ इदं स्कन्दाय न मम ।
ॐ विष्णो रराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा स्वाहा ।
इदं विष्णवे न मम ॥
ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरूचो वेनऽआवः ।
स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा ॥ इदं ब्रह्मणे न मम ॥
ॐ त्रातारमिन्द्रमवितारमिन्द्र ँ हवे हवे सुहव ँ शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्र ँ स्वस्ति नो मघवा धात्विन्द्रः स्वाहा ॥ इदमिन्द्राय न मम ।
ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे ।
देवस्त्वा सविता मध्वा नक्तु पृथिव्याः स ँ स्पृशस्पाहि । अर्चिरसि शोचिरसि तपोऽसि स्वाहा ॥
इदं यमाय न मम । अत्र प्रणीतोदकस्पर्शः । (सुरोको टुप्पो प्रणीतामा चोब्ने)
ॐ कार्षिरसि समुद्रस्य त्वा क्षित्याऽउन्नयामि । समापोऽअद्भिरग्मत समोषधीभिरोषधीः स्वाहा ॥
इदं कालाय न मम । अत्र प्रणीतोदकस्पर्शः । (सुरोको टुप्पो प्रणीतामा चोब्ने)
ॐ इन्धानास्त्वा शत ँ हिमा द्युमन्त ँ समिधीमहि । वयस्वन्तो वयस्कृत ँ सहस्वन्तः सहस्कृतम् ।
अग्ने सपत्क्नदम्भनमदब्धासोऽ अदाभ्यम् । चित्रावसो स्वस्ति ते पारमशीय स्वाहा ॥
इदं चित्रगुप्ता न मम । अत्र प्रणीतोदकस्पर्शः । इत्यधिदेवताः । (सुरोको टुप्पो प्रणीतामा चोब्ने)

अथ प्रत्यधिदेवताः

(हवन गर्ने)

ॐ अग्निन्दूतं पुरो दधे हव्यवाहमुपब्रुवे । देवाँऽआसादयादिह स्वाहा ॥ इदमग्नये न मम ।
ॐ अप्स्वग्ने सधिष्टव सौषधीरनुरुध्यसे । गर्भे सञ्जायसे पुनः स्वाहा ॥ इदमद्भ्यो न मम ।
ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्मसप्रथाः स्वाहा ॥ इदं भूम्यै न मम ।
ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपा ँ सुरे स्वाहा ॥ इदं विष्णवे न मम ।
ॐ इन्द्रऽआसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् स्वाहा ॥ इदमिन्द्राय न मम ।
ॐ अदित्यै रास्नासीन्द्राण्याऽउष्णीषः । पूषासि घर्माय दीष्व स्वाहा ॥ इदमिन्द्राण्यै न मम ।
ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव ।
यत्कामास्ते जुहुमस्तन्नोऽअस्तु वय ँ स्याम पतयोरयीणाम् स्वाहा ॥ इदं प्रजापतये न मम ।

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवी मनु । येऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा ॥
इदं सर्पेभ्यो न मम ।
ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरूचो वेनऽआवः ।
स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा ॥
इदं ब्रह्मणे न मम । इति प्रत्यधिदेवताः ।

अथ दशदिक्पालाः

(हवन गर्ने)

ॐ त्रातारमिन्द्रमवितारमिन्द्र ँ हवे हवे सुहव ँ शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्र ँ स्वस्ति नो मघवा धात्विन्द्रः स्वाहा ॥ इदं मिन्द्राय न मम ।
ॐ अग्निन्दूतं पुरो दधे हव्यवाहमुपब्रुवे । देवाँऽआसादयादिह स्वाहा ॥ इदमग्नये न मम ।
ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे ।
देवस्त्वा सविता मध्वा नक्तु पृथिव्याः स ँ स्पृशस्पाहि । अर्चिरसि शोचिरसि तपोसि स्वाहा ॥
इदं यमाय न मम । अत्र प्रणीतोदकस्पर्शः । (सुरोको टुप्पो प्रणीतामा चोब्ने)
ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा तऽइत्यानमो देवि निर्ऋते तुभ्यमस्तु स्वाहा ॥
इदं निर्ऋतये न मम । अत्र प्रणीतोदकस्पर्शः । (सुरोको टुप्पो प्रणीतामा चोब्ने)
ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद स्वाहा ॥ इदं वरुणाय न मम ।
ॐ वायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये स्वाहा ॥ इदं वायवे न मम ।
ॐ सोमो धेनु ँ सोमोऽअर्वन्तमाशु ँ सोमो वीरं कर्मण्यं ददाति । सादन्यं विदथ्य ँ सभेयं पितृश्रवण यो ददाशदस्मै स्वाहा ॥ इदं सोमाय न मम ।
ॐ तमीशानञ्जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्ध स्वस्तये स्वाहा ॥ इदमीशानाय न मम । अत्र प्रणीतोदकस्पर्शः । (सुरोको टुप्पो प्रणीतामा चोब्ने)
ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेनऽआवः ।
स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा ॥ इदं ब्रह्मणे न मम ।
ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमि ँ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् स्वाहा ।
इदमनन्ताय न मम । इति दशदिक्पालाः ।

अथाष्टवसवः

(हवन गर्ने)

ॐ सुगा वो देवाः सदना ऽअकर्म य आजग्मेद ँ सवनञ्जुषाणाः । भरमाणा वहमाना हवी ँ ष्यस्मे धत्त वसवो वसूनि स्वाहा । इदं धुवाद्यष्टवसुभ्यो न मम ।

अथ द्वादशादित्याः (हवन गर्ने)

ॐ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः आवोर्वाची सुमतिर्ववृत्यादꣳ होशिचद्या वरिवोवित्तरासत् स्वाहा । इदं धात्रादिद्वादशादित्येभ्यो न मम ।

अथैकादशरुद्राः (हवन गर्ने)

ॐ यऽएतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे ।
तेषाꣳसहस्रयोजने वधन्वानि तन्मसि स्वाहा ॥
इदं वीरभद्राद्येकादशरुद्रेभ्यो न मम । अत्र प्रणीतोदकस्पर्शः । (सुरोको टुप्पो प्रणीतामा चोब्ने)

अथ षोडशमातरः (हवन गर्ने)

ॐ गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी त्रिपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषि सहस्राक्षरा परमे व्योमन् स्वाहा ॥
इदं गौर्यादिषोडशमातृभ्यो न मम ।

अथावहादिसप्तमरुतः (हवन गर्ने)

ॐ मरुतो यस्य हि क्षये पाथा दिवो विमहसः । ससुगोपातमो जनः स्वाहा ॥
इदमावहादि सप्तमरुद्भ्यो न मम ।

अथ विनायकादिषट् (हवन गर्ने)

ॐ गणानान्त्वा गणपतिꣳहवामहे प्रियाणान्त्वा प्प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳ हवामहे व्वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् स्वाहा ॥ इदं विनाकाय न मम ।
ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेनऽआवः ।
स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा ॥ इदं ब्रह्मणे न मम ।
ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपाꣳसुरे स्वाहा ॥ इदं विष्णवे न मम ।
ॐ मानस्तोके तनये मा नऽआयुषि मानोगोषु मानोऽअश्वेषु रीरिषः ।
मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे स्वाहा ॥
इदं रुद्राय न मम । अत्र प्रणीतोदकस्पर्शः । (आहुति दिएर सुरोको टुप्पो प्रणीतामा चोब्ने)
ॐ अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म ऽआसन ।
अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम स्वाहा ॥ इदमर्काय न मम ।
ॐ वनस्पते वीड्वङ्गो हि भूया ऽअस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धोऽसि वीडयस्वास्थाता ते जयतु जेत्वानि स्वाहा । इदं वनस्पतये न मम ।

अथ विशेषकर्म (जुन उद्देश्यले हवन गरेको हो त्यो कर्म गर्ने, जस्तै :– न्वारन, व्रतवन्ध, विवाह आदि विशेष हवन गर्ने)

अत्र विशेषोद्देश्याभिमतं कर्मकृत्वा तत्पश्चादेवोत्तरं कर्म कुर्वन्ति ॥

अथ चतुः स्वस्त्यादि होमः (मूल देवताहरूलाई हवन गरिसकेपछि यहाँको हवन गर्ने)

ॐ स्वस्ति न ऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु स्वाहा ॥ इदं चतुःस्वस्तिभ्यो न मम ।

ॐ पयः पृथिव्यां पय ऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम् स्वाहा ॥ इदं पयःपञ्चेभ्यो न मम ।

ॐ विष्णो रराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा स्वाहा ।

इदं षड्विष्णुभ्यो न मम ।

ॐ अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवता दित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता स्वाहा । इदं द्वादशदेवेभ्यो न मम ।

ॐ द्यौः शान्ति रन्तरिक्ष ँ शान्तिः पृथिवीशान्तिरापःशान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि स्वाहा ।

इदं द्वादशशान्तिभ्यो न मम ।

ॐ प्रातरग्निं प्रारिन्द्र ँ हवामहे प्रातर्मित्रावरुणा प्रात रश्विना । प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्र ँ हुवेम स्वाहा । इदं षट्प्रातर्भ्यो न मम ।

ॐ समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा अनाधृष्यायत्वा वाताय स्वाहा प्रतिधृष्याय त्वा वाताय स्वाहा अवस्यवे त्वा वाताय स्वाहा शिमिदाय त्वा वाताय स्वाहा ॥

इदं षट्वातेभ्यो न मम । (प्रत्येक स्वाहामा आहुति दिने पनि चलन छ)

ॐ अनड्वान्वयः पङ्क्तिश्छन्दो धेनुर्वयो जगती छन्दस्व्य विर्वयस्त्रिष्टुप्छन्दो दित्यावाड्वयो विराट्छन्दः पञ्चाविर्वयो गायत्रीछन्दस्त्रिवत्सोवय ऽउष्णिक्छन्दस्तुर्यवाड्वयोऽनुष्टुप्छन्दो लोकन्ताऽइन्द्रम् स्वाहा ।

इदं त्र्यनडुद्भ्यो न मम ।

ॐ भगऽएव भगवाँऽअस्तु देवास्तेन वयं भगवन्तः स्याम ।

तन्त्वा भगः सर्वऽइज्जोहवीति स नो भगःपुरऽएता भवेह स्वाहा ॥ इदं पञ्चभगेभ्यो न मम

ॐ प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥

इदं पञ्चेन्द्रियेभ्यो न मम ।

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद स्वाहा ॥ इदं पञ्चवरुणेभ्यो न मम ।

ॐ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह । बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा स्वाहा ॥

इदं गायत्र्यै न मम ।

ॐ उपयामगृहीतोऽसि सवित्रोऽसि चनोधाश्चनोधाऽअसि चनो मयि धेहि । जिन्व यज्ञं जिन्व यज्ञपतिंभगाय देवायत्वा सवित्रे स्वाहा ॥ इदं सावित्र्यै न मम ।

ॐ सरस्वती योन्याङ्गर्भ मन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति ।

अपा ँरसेन वरुणो न साम्नेन्द्रꣳश्रियै जनयन्नप्सु राजा स्वाहा ॥ इदं सरस्वत्यै न मम ।

ॐ गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रतऽएमसि ।

ऊर्जं बिभ्रद्धः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः स्वाहा । इदं गृहमात्रे न मम ।

ॐ अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्मिणः ।

प्रप्रदातारं तारिषऽऊर्जं नो धेहि द्विपदे चतुष्पदे स्वाहा ॥ इदमन्नपूर्णायै न मम ।

ॐ श्रीश्च तेलक्ष्मीश्चपत्क्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।

इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण स्वाहा ॥ इदं महालक्ष्म्यै न मम ।

ॐ देवीर्द्वारऽइन्द्रꣳसङ्घाते वीड्वीर्यामन्नवर्धयन् । आवत्सेन तरुणेन कुमारेण च मीवता पार्वाणꣳ रेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज स्वाहा । इदं महारिष्टविनाशिन्यै न मम ।

ॐ अम्बेऽअम्बिकेम्बालिके न मानयति कश्चन । ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् स्वाहा ॥ इदं चण्डयै न मम ।

ॐ द्यौरासीत्पूर्वीचित्तिरश्वऽआसीद्बृहद्वयः । अविरासीत् पिलिप्पिला रात्रिरासीत् पिशङ्गिला स्वाहा ॥ इदं द्यौराल्यै न मम ।

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ।

देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः स्वाहा ॥ इदं वास्तुदेवाय न मम ।

ॐ भूम्याऽआखूनालभतेन्तरिक्षाय पाङ्त्रान् दिवे कशान्दिग्भ्यो नकुलान्वभ्रुकानवान्तरदिशाभ्यः स्वाहा ॥ इदं भूमिदेवाय न मम ।

ॐ नमः शम्भवाय च मयो भवाय च नमः शङ्कराय च मयस्कराय च नमः ।

शिवाय च शिवतराय च स्वाहा । इदं गैडुदेवाय न मम ।

ॐ क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि । मा त्वा हिꣳ सीन्मा मा हिꣳ सीः स्वाहा ॥ इदं क्षेत्रपालाय न मम ।

ॐ यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये । यदेनश्चकृमा वयमिदन्तदवयजामहे स्वाहा ॥ इदं ग्रामदेवाय न मम ।

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ।

ह्वयामि शुक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः स्वाहा ॥ इदं स्वर्गेन्द्राय न मम ।

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवी मनु । येऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा ॥ इदं पातालवासुकिभ्यो न मम ।

ॐ मित्रोनऽएहि सुमित्रधऽइन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्त ँस्योनः स्योनम्। स्वान भ्राजाङ्घारे वम्भारे हस्त सुहस्त कृशानवे ते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन् स्वाहा ॥

इदं मित्रलोकपालाय न मम।

ॐ राजन्तमध्वराणाङ्गोपामृतस्य दीदिविम्। वर्धमान ँस्वे दमे स्वाहा ॥ इदं मान्धात्रे न मम।

ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः।
तेषा ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥ इदं तीर्थराजाय न मम।

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्।
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते स्वाहा ॥

इदं व्रतराजाय न मम।

(प्रत्येक स्वाहामा आहुति दिने पनि चलन छ)

ॐ प्राच्यै दिशे वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहा स्वाहार्वाच्यै दिशे स्वाहा। इदं पुनर्दिकपालेभ्यो न मम।

ॐ अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुता ँ सप्तमी वृहस्पतेरष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी स्वाहा ॥

इदं तिथिभ्यो न मम।

(प्रत्येक स्वाहामा आहुति दिने पनि चलन छ)

ॐ नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहा र्धमासेभ्यः स्वाहा मासेभ्यः स्वाहा ऋतुभ्यः स्वाहार्त्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्या ँस्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहादित्येभ्य स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥

इदं नक्षत्रेभ्यो न मम।

ॐ योगे योगे तवस्तरं वाजे वाजे हवामहे ॥ सखायऽइन्द्रमूतये स्वाहा ॥ इदं योगेभ्यो न मम।

ॐ आदित्यङ् गर्भं पयसा समङ्धि सहस्रस्य प्रतिमां विश्वरूपम्। परिवृङ्धि हरसा माभिम ँ स्थाः शतायुषं कृणुहि चीयमानः स्वाहा ॥ इदं वारेभ्यो न मम।

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवा ँसस्तनूभिर्व्यशेमहि देवहितं यदायुः स्वाहा ॥ इदं करणेभ्यो न मम।

ॐ वायो ये ते सहस्रिणो रथासस्तेभिरागहि। नियुत्वान्त्सोमपीतये स्वाहा ॥ इदं वातेभ्यो न मम।

ॐ वाताय स्वाहा धूमाय स्वाहाब्भ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहावस्फूर्जते स्वाहा वर्षते स्वाहावर्षते स्वाहोग्रं वर्षते स्वाहा शीघ्रं वर्षते स्वहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा ह्वदिनीभ्यः स्वाहा नीहाराय स्वाहा ॥ इदं मेघेभ्यो न मम।

(प्रत्येक स्वाहामा आहुति दिने पनि चलन छ)

ॐ समुद्रं गच्छ स्वाहान्तरिक्षं गच्छ स्वाहा देव ६ सवितारं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा छन्दा ꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमं गच्छ स्वाहा दिव्यं नभो गच्छ स्वाहाऽग्निं वैश्वानरङ्गच्छ स्वाहा मनोमे हार्दि यच्छ दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथवीं भस्मनाऽऽपृण स्वाहा ॥ इदं समुद्रेभ्यो न मम ।

ॐ नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो व्रात्यं प्रयुग्भ्यऽउन्मत्त ६ सर्पदेवजनेभ्योप्रतिपदमयेभ्यः कितवमीर्यतायाऽअकितवं पिशाचेभ्यो विदलकारीं यातुधानेभ्यः कण्टकीकारीम् स्वाहा ॥ इदं नदीभ्यो न मम ।

ॐ इष्टो यज्ञो भृगुभिराशीर्दा वसुभिः । तस्य नऽइष्टस्य प्रीतस्य द्रविणेहागमेः स्वाहा ॥

इदमिष्टदेवाय न मम ।

ॐ कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः । अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाऽध्वर्यू सादयतामिह त्वा स्वाहा ॥

इदं कुलदेवाय न मम । (यजमानले कुलदेवताको हवन गर्ने)

यत्र स्थापितो यो देव स्तंत्तन्मनत्रेण होमयेत्

ॐ नमः शम्भवाय च मयो भवाय च नमः शङ्कराय च मयस्कराय च नमः ।

शिवाय च शिवतराय च स्वाहा । इदं भैरवाय न मम ।

ॐ देवीर्द्वारऽइन्द्र ६ सङ्घाते वीड्वीर्यामन्नवर्धयन् । आवत्सेन तरुणेन कुमारेण च मीवता पार्वाण ६रेणुककाटन्नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज स्वाहा । इदं भैरव्यै न मम ।

ॐ अम्बेऽअम्बिकेम्बालिके न मानयति कश्चन । ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् स्वाहा ॥

इदं विन्ध्यवासिन्यै न मम । (त्यस ठाउँमा विशेष देवताहरूलाई हवन गर्ने ।

जस्तै :– पशुपतिनाथाय स्वाहा, गुह्येश्वरी देव्यै स्वाहा आदि)

यत्र स्थानविशेषाधिष्ठितो यो देवो देवी वा तत्तन्मन्त्रेण होमयेत् ।

ॐ एषोह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः सऽउ गर्भेऽ अन्तः । सऽएव जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतो मुखः स्वाहा ॥ इदं सर्वभ्यो देवेभ्यो न मम ।

ॐ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च ।

शुक्रश्चऽऋतपाश्चात्य ६ हाः स्वाहा ॥ इदं सर्वहोमपूरणार्थेभ्यो न मम ।

ॐ राजन्तमध्वराणाङ्गोपामृतस्य दीदिविम् । वर्धमान ६ स्वे दमे स्वाहा ॥

इदं पञ्चपाण्डवेभ्यो न मम ।

ॐ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च । सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा ॥

इदं भीमसेनाय न मम ।

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् स्वाहा ॥

इदं पितृभ्यो न मम । अत्र प्रणीतोदक स्पर्शः । (सुरोको टुप्पो प्रणीतामा चोब्ने)

ॐ ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रघर्ममीमहे । उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा स्वाहा ॥ इदं वैश्वानराय न मम ।

ॐ वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्री इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण । उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा स्वाहा ॥

इदं वैश्वानराय न मम ।

ॐ वैश्वानरो नऽऊतयऽआप्रयातु परावतः । अग्निरुक्थेन वाहसा ।
उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैशवानराय त्वा स्वाहा ॥ इदं वैश्वानराय न मम ।

ॐ आकाशे यानि तीर्थानि यानि तीर्थानि भूतले । पाताले यानि तीर्थानि सर्व तीर्थ नमोऽस्तुते स्वाहा ॥

ॐ आकाशे सन्ति ये देवा ये देवाः सन्ति भूतले । पाताले सन्ति ये देवाः सर्वदेव नमोऽस्तु ते स्वाहा ॥

ॐ आकाशे यानि लिङ्गानि यानि लिङ्गानि भूतले । पाताले यानि लिङ्गानि सर्वलिङ्ग नमोऽस्तु ते स्वाहा ॥

ततो हुतशेषहविर्द्रव्यं गृहीत्वा ब्रह्मणान्वारब्धः ।

ततो महाव्याहृत्यादि उत्तराङ्गहोम । तद्यथा

ॐ महाव्याहृतीनां प्रजापतिऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनष्टुभश्छदांसि अग्न्याधाने विनियोगः ।

ॐ भूः स्वाहा । इदमग्नये न मम । प्रोक्षणीपात्रेऽपि । (सुरोको टुप्पो प्रोक्षणीमा चोब्ने)

ॐ भुवः स्वाहा । इदं वायवे न मम । प्रोक्षणीपात्रेऽपि ।

ॐ स्वः स्वाहा । इदं सूर्याय न मम । प्रोक्षणीपात्रेऽपि । एता महाव्याहृतयः ।

ॐ त्वन्नोऽअग्न इति वामदेवऋषिरग्नीवरुणौ देवते स्त्रिष्टुप्छन्दः आज्यहोमे विनियोगः ।

ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान् देवस्य हेडोऽअवयासिषीष्ठाः ।
यजिष्ठो वन्हितमः शोशुचानो विश्वा द्वेषा ꣳसि प्रमुमुग्ध्यस्मत्स्वाहा ।

इदमग्नीवरुणाभ्यां न मम । प्रोक्षणीपात्रेऽपि ।

ॐ स त्वन्नोऽअग्न इति वामदेवऋषिरग्निवरूणौ देवते स्त्रिष्टुप्छन्द आज्यहोमे विनियोगः ।

ॐ स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ । अवयक्ष्व नो वरुण ꣳ रराणो वीहि मृडीक ꣳ सुहवो नऽएधि स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम । प्रोक्षणीपात्रेऽपि ।

ॐ अयाश्चाग्नं इति वामदेवऋषिऽग्निर्देवता स्त्रिष्टुप्छन्दः प्रायश्चित्तहोमे विनियोगः ।

ॐ अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्त्वमयाऽअसि । अया नो यज्ञं वहास्यया नो धेहि भेषज ꣳ स्वाहा ॥ इदमग्नये न मम । प्रोक्षणीपात्रेऽपि ।

ॐ ये ते शतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवताः प्रायश्चित्तहोमे विनियोगः ।

ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा विततता महान्तः ।
ते भिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम प्रोक्षणीपात्रेऽपि ।

ॐ उदुत्तममिति शुनः शेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता पाशान्मोचने विनियोगः ।

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳश्रथाय ।
अथा वयमादित्यव्रते तवानागसोऽअदितये स्याम स्वाहा ॥

इदं वरुणाय न मम । प्रोक्षणीपात्रेऽपि ।

ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ।

ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । (इति मनसा)

स्विष्टकृद्धोमं कुर्यात् ।

ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम । ततः संस्रवप्राशनम् ।

(सुरोको घ्यू पातमा लगाई यजमानले जिभ्रोमा लगाउनु र आचमन गर्नु)

एवं होमं समाप्याग्नेः स्थापितदेवतानां चोत्तराङ्गपूजनं कार्यम् । ॐ अद्येत्यादि पूर्वसङ्कल्पसिद्धिरस्तु मम कृतस्यामुककर्मणः साङ्गतासिद्धयर्थं स्थापितदेवतानां मृडाग्नेश्चोत्तराङ्गपूजनं करिष्ये । इति सङ्कल्प्य ।

ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव व्वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम ॥ (सबै देवतालाई पुनः (उत्तराङ्ग) पूजा गर्ने)

ॐ मृडाग्नये नमः । इति गन्धाद्युपचारैः सम्पूज्य "स्थापितदेवताश्च गन्धाद्युपचारैः । सम्पूजयेत् ।"

अनया पूजया मृडाग्निः स्थापितदेवताश्च प्रीयन्तां न मम इति । (होताले जल, कुश लिने)

ततो होता – ॐ अद्येत्यादि कृतस्यामुककर्मणः परिपूर्णतासिद्धयर्थं पूर्णाहुतिं होमयिष्ये ।

इति सङ्कल्प्य । (सुरोमा सुपारी, घ्यू राखी पूर्णाहुति दिने)

ॐ मूर्धानन्दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम् ।
कविꣳ सम्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त देवाः स्वाहा ॥ इति पूर्णाहुतिं होमयेत् ।

स्रुवश्च मऽइति स्रुवपूजनम् । (सुरोको पूजा गर्ने)

ॐ स्रुवश्च (स्रुचश्च) मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मे धिषवणे च मे पूतभृच्च म ऽआधवनीयश्च मे वेदिश्च मे बर्हिश्च मे वभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥

(आरती, पुष्पाञ्जली षोडशोपचारमै पर्ने हुनाले यहाँ आरती पुष्पाञ्जली गर्ने चलन छ)

अथ पूर्णपात्रदानम्

(चन्दन, अक्षता, फूलले पूर्णपात्रलाई पूजा गर्ने)

रौप्यं ताम्रं मृण्मयं वा यत्संभवं पात्रं फलवस्त्रद्रव्यसहितं षट्पञ्चाशदधिकद्विशतमुष्टिपरिमितं (२५६) बहुभोक्तृपुरुषाहारपरिमितं वा तण्डुलयुतं पूर्णपात्रमादाय पूर्णादर्वीति पूर्णपात्रं ब्राह्मणं च त्रिः सम्पूज्य।

ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहाऽइषमूर्जꣳ शतक्रतो।

(जल, कुश, तिल, जौसहित पूर्णपात्र हातमा लिने)

ॐ अद्येहेत्यादि अस्मिन् अमुककर्माङ्गभूतहोमकर्मणि कृताकृतावेक्षणरूप ब्रह्मकर्मप्रतिष्ठार्थं इदं पूर्णपात्रं प्रजापतिदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। इति सङ्कल्प्य पूर्णपात्रं ब्राह्मणाय दद्यात्। ॐ स्वस्तीति प्रतिवचनम्। ततः प्रणीताविमोकः। (प्रणीताको जलले यजमानलाई सेचन गर्ने)

ॐ सुमित्रिया नऽआपऽओषधयः सन्तु।

इतिमन्त्रेण पवित्राभ्यां प्रणीतोदकेन कर्तुः शिरः सम्मृज्य। (प्रणीतालाई इशानमा घोप्ट्याउने)

ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान् द्वेष्टि यञ्च वयं दिष्मः।

इति मन्त्रेणैशान्यां प्रणीतापात्रं न्युब्जीकुर्यात्।

ततस्तरणक्रमेणैव बर्हिरुत्थाप्य आज्येनाभिघार्य 'देवा गातुविद' इति पठित्वा हस्तेनैव होमयेत्।

ॐ देवागात्वित्यस्य मनसस्पतिर्ऋषिर्विराटछन्दो वातो देवता वर्हिहोमे विनियोगः ॥(अग्निको वरिपरिको कुश अग्निमा होम्ने)

ॐ देवा गातुविदो गातुं वित्त्वा गातुमित। मनसस्पतऽइमन्देव यज्ञꣳ स्वाहा वाते धाः स्वाहा॥

इति वर्हिर्होमः।

अथ महाबलिः

(मास, चामल, रातो फूल, दक्षिणा, वस्त्र, जल, फलसमेत राखी वत्ती वाल्ने र चन्दन, अक्षता, फूलले पूजा गर्ने)

ततो आचार्य (ब्राह्मणोवा) माषतण्डुलाद्यन्नकुङ्कुमादिगन्धरक्तपुष्पादियुतं सदीपं सवस्त्रं सदक्षिणं सजलं बलिं क्षेत्रपालाय दद्यात्। तत्र मन्त्रः (कुश, जलसहित बलि लिने)

ॐ क्षेत्रपालाय भूतप्रेतपिशाचराक्षसशाकिनीडाकिनीवेतालादिपरिवारयुताय इमं बलिं समर्पयामि, भो भो क्षेत्रपाल! इमं बलिं गृहाण, मम यजमानस्य आयुः कर्ता, क्षेमकर्ता, वरदस्तुष्टिदो भव।

इति पठित्वा बलिं शूद्रेण ब्राह्मणेन वा चतुष्पथे विसर्जयेत्। तत आचार्यः प्रक्षालितपाणिपाद आचामेत्

(दोबाटो या चौबाटोमा राखेर आचमन गर्ने)

यज्ञान्तगोदानम्

(यज्ञान्त गोदान गर्ने पृ. ८ मा)

कृतस्य हवनकर्मणः न्यूनातिरिक्त परिपूर्णार्थं इमां गां रुद्रदैवतां तत्प्रत्याम्नायिभूतं द्रव्यं (अमुक) दैवतं (अमुक) गोत्राय (अमुक) शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।

अथ मेधाकरणम्

(कर्ताले ब्राह्मणको पाउ छुने र ब्राह्मणले नरिवल, सुपारी, घ्यू अग्निमा हवन गर्ने)

घृतपूर्णस्रुवे नारिकेलपूगीफलादिकं चन्दनपुष्पाणि च निधाय घृतधारां पातयन् होमयेदेभिर्मन्त्रैः

ॐ सदसस्पतिमद्भूतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामया सिषꣳ स्वाहा ॥
ॐ यां मेधां देवगणाः पितरश्चोपासते। तया मामद्य मेधयाग्ने मेधाविनं कुरू स्वाहा ॥
ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥
ॐ आकूतिमग्निं प्रयुजꣳ स्वाहा वाचो विधृतिमग्निं प्रयुजꣳ स्वाहा।
प्रजापतये मनवे स्वाहाग्नये वैश्वानराय स्वाहा ॥
ॐ सप्त तेऽअग्ने समिधः सप्तजिव्हाः सप्त ऽऋषयः सप्तधाम प्रियाणि।
सप्तहोत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥
ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहाऽइषमूर्जꣳ शतक्रतो ॥
ॐ इदं मे ब्रह्म च क्षत्रञ्चोभे श्रियमश्नुताम्। मयि देवा दधतु श्रियमुत्तमां तस्यैते स्वाहा ॥

शेषचरुहोमः

तत्रादौ एधोऽसीति वस्त्रहोमः, अभ्यादधामीति शेषचरुहोमः यजमानः सपरिवारो बन्धुवर्गैः सह घृताक्तवस्त्र-चन्दनपुष्पफलचर्वादिभिरग्निं सम्पूजयेदनेन मन्त्रेण। (उपयमनकुश वस्त्रसहित यजमानले हवन गर्ने)

ॐ एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि। समाववर्ति पृथिवी समुषाः समुसूर्यः समुविश्वमिदं जगत्। वैश्वानरञ्ज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा ॥

इति वस्त्रहोमः।

ततः शेषचरुहोमः। (सबैले चरु हवन गर्ने)

ॐ अब्भ्यादधामि समिधमग्ने व्रतपते त्वयि। व्रतञ्च श्रद्धाञ्चोपैमीन्धे त्वा दीक्षितोऽअहम् ॥
ॐ यत्र ब्रह्म च क्षतञ्च सम्यञ्चौ चरतः सह। तँल्लोकं पूण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥
ॐ यत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतः सह। तँल्लोकं पुण्यं प्रज्ञेषं यत्र सेदिर्न विद्यते स्वाहा ॥

इति शेषचरुहोमः।

ततः स्रुवेण भस्म किञ्चिद् गृहीत्वा अवशिष्टाज्येन पिष्ट्वा तत्तिलकं हस्तेन स्पृष्ट्वाभिमन्त्रयेदनेन मन्त्रेण (सुरोले तिलक बनाउने)

ॐ अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपालऽइन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हतायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशायशाक्वराय चरुः सवित्रऽऔष्णिहाय त्रयस्त्रिꣳ शाय रैवताय द्वादशकपालः प्राजापत्यश्चरूरदित्यै बिष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोनुमत्याऽअष्टा कपालः ॥

ततो यजमानस्य तिलकं कुर्यात्। (यजमानलाई तिलक लगाइदिने)

ॐ त्र्यायुषञ्जमदग्नेः। इति ललाटे। ॐ कश्यपस्य त्र्यायुषम्। इति ग्रीवायाम्।

ॐ यद्देवेषु त्र्यायुषम्। इति दक्षिणबाहुमूले। ॐ तन्नोऽअस्तु त्र्यायुषम्। इति हृदि।

घृतच्छाया

(पात्रमा घृत छाया बनाउने)

ततो यजमानो घृते छायां निरीक्ष्य तं ब्राह्मणाय दद्यात्। तत्र क्रमः – (रौप्यपात्रे, ताम्रपात्रे, कांस्यपात्रे) वा घृतं सुवर्णं च निधाय तेजोऽसि, धुवासि इति मन्त्रद्वयं पठन छायां निरीक्षेत।

तेजोऽसीति परमेष्ठीऋषिर्गायत्री छन्दः आज्यं देवता आज्यावेक्षणे विनियोगः।

ॐ तेजोऽसि शुक्रममृतमायुष्पाऽ आयुर्मे पाहि।

देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे॥

ॐ धुवासि धुवोयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात्।

घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य च्छदिरसि विश्वजनस्य च्छाया। (छायाँ हेर्ने)

तत आज्यं स्पृष्ट्वा पठेत् (पात्र छुने)

ॐ अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम्। तत्सर्वं शमयाज्य त्वं लक्ष्मी पुष्टिं च वर्धय॥

ॐ आज्यं तेजः समुद्दिष्टमाज्यं पापहरं शुभम्। आज्यं सुराणामाहारमाज्य लोकाः प्रतिष्ठिताः॥

ॐ नभोऽन्तरिक्षं दिव्यं वा यन्मे किल्विषमागतम्। सर्वं तदाज्यसंस्पर्शात् प्रणाशमुपगच्छतु॥

ततो दुर्वां स्पृष्ट्वा पठेत् (दुबोले चलाउने)

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवा नो दुर्वे प्रतनु सहस्रेण शतेन च॥

ॐ या क्षीरसागरोत्पन्ना दूर्वा पीयूषसम्भवा। तत्संस्पर्शनमात्रेण हचायुर्वृद्धिर्यशोबलम्॥

ततस्तदाज्यपात्रं कुशतिलजलसहितमादाय (कुश, तिल, जलसहित घृतछाया लिने)

ॐ अद्येहेत्यादि मम दुःस्वप्नदुर्निमित्तादिसर्वारिष्टोपशमनपूर्वकमसमानतेजः प्रज्ञाशौर्य यशोबलायुर्लक्ष्मीपुष्टिवर्ध नार्थमिदमाज्यं मृत्युञ्जयदैवतं (रौप्यं ताम्रं वा) कांस्यपात्रं चन्द्रदैवतं सुवर्णमग्निदैवतं (अमुक) गोत्राय (अमुक) शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे। (ब्राह्मणलाई दिने र नमस्कार गर्ने)

ॐ तत्सन्न मम। प्रार्थना – कामधेनो समुद्भूतं देवानामुत्तमं हविः। आयुर्वृद्धिकरं दातू राज्यं पातु सदैव माम्। ततो महामृत्युञ्जयः प्रीयतामिति संप्रार्थ्य दानप्रतिष्ठां दद्यात्। (दानप्रतिष्ठा गर्ने)

दक्षिणा सङ्कल्प

(वरण गरेका ब्राह्मणहरूलाई दक्षिणा दिने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

इतिं देयम् ब्राह्मणं च त्रिः सम्पूज्य कुशादिसहितं दक्षिणाद्रव्यमादाय (कुश, जलसहित दक्षिणा लिने)

ॐ तत्सद्विष्णुरित्यादि पूर्वसङ्कल्पमुच्चार्य (अमुक) गोत्रः (अमुक) शर्माहं कृतस्यामुक (अमुकदेवताप्रीतये कृतस्य पूजनहवनादिकमी) यज्ञ प्रतिष्ठा सिध्यर्थं दक्षिणा द्रव्यममुक दैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो शर्मेभ्यो अहं दास्ये।

भूयसी दक्षिणा सङ्कल्प

(दिनुपर्ने सबैलाई दक्षिणा दिने)

ॐ तत्सद्विष्णुरित्यादि पूर्वसङ्कल्पमुच्चार्य (अमुक) गोत्रः (अमुक) शर्माहं कृतस्यामुक (अमुकदेवताप्रीतये कृतस्य पूजनहवनादिकमी) यज्ञ प्रतिष्ठा सिध्यर्थं दक्षिणा द्रव्यममुक दैवतं नानानामगोत्रेभ्यो नानानामशर्मेभ्यो ब्राह्मणेभ्यो कन्याकुमारेभ्यश्च दीनानाथेभ्यश्च यथायोग्यभागं विभज्य यथाकाले दातुमहमुत्सृजेत्। इति जले उत्सृजेत्।

भोजन आमान्न सङ्कल्प (सिद्धान्न)

(सिदा सङ्कल्प गर्ने)

ॐ अद्येहामुकगोत्रोऽमुकशर्माहं कृतस्यामुककर्मणो यथावत्फलप्राप्तये नानानामगोत्रान्नानामशर्मणो ब्राह्मणान् यथोपपन्नेनान्नेन भोजयिष्ये (आमान्नपक्षे–सन्तोषयिष्ये)।

ततो विसर्जनम् (दक्षिणा सिदा सङ्कल्पपछि कायेनवाचा भनेर कुश, जल लिने चलन छ।)

अथ अर्घ्य निवेद्य

ततः कर्ता देवायार्घ्यं निवेद्य (अर्घ्य निवेदन गर्ने)

अर्घ्यं गृहाण देवेश गन्ध पुष्पाक्षतैर्युतम्। करुणाकर देवेश प्रसन्नो भव सर्वदा॥

ॐ जातो दैत्यवधार्थाय देवानां पालनाय च। तस्मै देवाय सत्याय सगुणाय महात्मने॥

व्यक्ताव्यक्तस्वरूपाय हृषीकपतये नमः। गृहाणार्घ्यं मया दत्तं रमया सहित प्रभो॥

(घोप्ट्याएर पूजा गरी उठाएर जल राख्ने चलन छ)

स्वबन्धुवर्गैब्रह्मणैश्च सह यज्ञे देवेषु च पुष्पाक्षतैः पूजनं कृत्वा यानि कानीति मन्त्रेण यज्ञप्रदक्षिणं कुर्यात्

(यज्ञ घुमी नमस्कार गर्ने)

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च। तानि तानि प्रणश्यन्तु प्रदक्षिणपदे पदे॥

इति प्रदक्षिणीकृत्य नमस्कुर्यात्।

ततः पुष्पाक्षतैः ब्रह्माणं संपूज्य 'उत्तिष्ठ ब्रह्मणस्पते' इति विसृज्य उत्थापयेत् (कुशको ब्राह्मण उठाउने)

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे। उपप्रयन्तु मरुतः सुदानवऽइन्द्रप्राशुर्भवा सचा॥

ततो यान्तु देवेति पुष्पाक्षतैरभ्यर्च्य देवान् विसर्जयेत् (वरिपरि पूजा गर्ने र विसर्जन गर्ने)

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम्। इष्टकामप्रसिद्धयर्थं पुनरागमनाय च॥

ॐ गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर। यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन॥

ॐ आवाहनं न जानामि न जानामि विसर्जनम्। पूजां चैव न जानामि क्षमस्व परमेश्वर॥

कर्मेश्वरार्पणम् (विसर्जनम्)

(कुशको औंठी र अन्य कुश लिएर जल लिने)

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्धयात्मना वा नुसृत (प्रकृती) स्वभावात्।

करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयेतत्॥ ततो यस्य स्मृत्येति अच्युतं नमस्कुर्यात्।

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥

ॐ विष्णवे नमः ३। ॐ अच्युताय नमः ३। (नमस्कार गर्ने)

एतत्कर्म श्रीकृष्णार्पणमस्तु । इतीश्वरं ध्यात्वोत्सृजेत् । तताऽञ्जलिं बध्वा (नमस्कार गर्ने)

ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स मेविष्णुः प्रसीदतु ॥

ॐ विष्णवे नमः ३ । तत्सद्ब्रह्मार्पणमस्त्विति कर्मेश्वरार्पणं कुर्यात् ।

कुल, पितृ, इष्टदेवता पूजनम् (कुलदेवता, पितृदेवता, इष्टदेवता र स्थानीय देवताहरूलाई प्रसाद चढाई धूपवत्ती गर्ने)

ॐ कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः । अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाध्वर्यू सादयतामिह त्वा ॥ ॐ कुलदेवाय नमः ।

कुल, इष्ट, पितर, ग्राहश्च ग्रामादि स्थापित देव देव ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॐ शान्तिः ३

प्रयागमाघे प्रतिकाशिवाशः त्रिकालपूजा हरिशम्भु भक्तिः । (नमस्कार गर्ने)

सहस्रधेनू सतकन्यिका च फलम् लभेतत् कलशोऽभिषेकम् ॥

अथाभिषेकः

तत्राभिषेकः (अभिषेक गर्ने)

ॐ सुरास्त्वा .... । ॐ द्यौः शान्ति .... । तच्चक्षुर्देवहितम् .... । ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवा .... । इत्यादि मन्त्रैरभिषेकं कुर्यात् ।

प्रसादवितरणम् (प्रसाद लिई भन्ने)

यजमान अपूपपुष्पादि हस्तेनादाय मन्त्रं पठेत्

बलिर्विभीषणो भीष्मः प्रह्लादो नारदो ध्रुवः । कपिलश्चान्तरिक्षश्च वसुर्वायुसुतस्तथा ॥

विश्वक्सेनोद्धवाक्रूरसनकाद्या महर्षयः । वासुदेवप्रसादोऽयं सर्वे गृह्णन्तु वैष्णवाः ॥

इति मन्त्रोच्चारणपूर्वकं विष्णुभक्तेभ्यः प्रसादादिक समर्पयेत् ।

यजमानाय प्रसाद वितरणम्

आशीर्मन्त्रपठनपूर्वकं प्रसादवितरणं कुर्यात् (प्रसाद लगाइदिने र वितरण गर्ने)

ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ।

धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

आचार्यपूजन मन्त्राः (आचार्यलाई पूजा गर्ने)

नमोस्त्वनन्ताय ...। आकृष्णे ... । नमो ब्रह्मण्य ... ।

आकाशात् पतितंतोयं यथागच्छतिसागरम् । सर्व देव नमस्कारम् केशवं प्रति गच्छति ॥ इति

अथ रुद्राभिषेकविधिः

पञ्चगव्यप्राशनविधिः (पेज नं. ३) (पञ्जगव्य खाने)
आशन शुद्धी (पेज नं. ४) (आशन शुद्धि गर्ने)
आचमनम्ः (पेज नं. ४) (आचमन गर्ने)
कर्मपात्रनिर्माणविधिः (पेज नं. ४) (कर्मपात्र बनाउने)
सर्षाप देवयजन भूमौ विकिरेत् (पेज नं. ५) (सर्स्यूं छर्ने)
स्वस्तिवाचनम्ः (पेज नं. ७) (रेखी हाल्ने)
प्रतिज्ञा सङ्कल्प (पेज नं. ७) (प्रतिज्ञासङ्कल्प गर्ने)
गोदानम् (पेज नं. ८) (गोदान गर्ने)
अथ स्वस्तिवाचनम् (पेज नं. १०) (स्वस्तिवाचन गर्ने)
अर्घस्थापनम् (पेज नं. २०) (अर्घ बनाउने)
अथ ब्राह्मणवरणम् (पेज नं. २३) (वरण गर्ने)
अथ पुण्याहवाचनम् (पेज नं. २४) (पुण्याहवाचन गर्ने)
अथ दीपकलशगणेश पूजा (पेज नं. २६–२९) (दियो, कलश, गणेश पूजा गर्ने)
अथ रक्षाबन्धनपूजा (पेज नं. २९) (रक्षावन्धन पूजा गर्ने)
ततः कलशस्कन्धप्रदेशे (पेज नं. ३०) (नवग्रह पूजा गर्ने)
पुस्तक प्रार्थना (पेज नं. ३०) (पुस्तकपूजा र प्रार्थना गर्ने)

अथ प्रधानदेवतापूजा आदौ ध्यानम् – (वेलपत्र फूल लिएर शिवको ध्यान गर्ने)

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं ।
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ॥
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं ।
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

(अत्र तत्तन्मन्त्रैः गणपत्यादि पाञ्चायतनदेवानां ध्यानं कुर्यात्)

आवाहनम् (आवाहन गर्ने)

ॐ नमस्ते रुद्रमन्यवऽउतोत इषवे नमः । बाहुभ्यामुत ते नमः ॥
एह्येहि गौरीश पिनाकपाणे शशाङ्कमौले वृषभाधिरूढ ।
देवाधिदेवेश महेश नित्यं गृहाण पूजां भगवन्नमस्ते ॥
ॐ भूर्भुवःस्वः श्रीसाम्बसदाशिवाय नमः, आवाहनं समर्पयामि ।

आसनम्

(कुश राख्ने)

ॐ या ते रुद्र शिवा तनूरघोरा पापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥
रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् । आसनं च मया दत्तं गृहाण परमेश्वर ॥
ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, आसनं समर्पयामि ।

पाद्यम्

(जल चढाउने)

ॐ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे । शिवाङ्गिरित्रताङ्कुरुमा हि ꣳसीः पुरुषञ्जगत् ॥
उष्णोदकं निर्मलञ्च सर्वसौगन्ध्यसंयुतम् । पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥
ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, पादयोः पाद्यं समर्पयामि ॥

अर्घ्यम्

(अर्घ चढाउने)

ॐ शिवेनव्वचसात्त्वागिरिशाच्छाव्वदामसि । यथानः सर्व्वमिज्जगदयक्ष्मꣳ सुमनाऽअसत् ॥
अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैर्युतम् । करुणाकर मे देव प्रसन्नो भव शङ्कर ॥
ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, अर्घ्यं समर्पयामि ॥

आचमनीयम्

(जल चढाउने)

ॐ अद्धचवोचदधिवक्ताप्प्रथमोदैव्व्योभिषक् ।
अहींश्शचसर्व्वाञ्जम्भयन्त्सर्व्वांश्चयातुधान्न्योधराचीः परासुव ॥
सर्वतीर्थसमायुक्तं सुगन्धि विमलं जलम् । आचम्यतां मया दत्तं चन्द्रशेखर शङ्कर ॥
ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, मुखे आचमनीयं जलं समर्पयामि ॥

स्नानीयम्

(जल चढाउने)

ॐ असौयस्ताम्म्रोऽअरुणऽउतबभ्रुः सुमङ्गल÷ ॥
येचैनꣳ रुद्राऽअभितोदिक्षुश्श्रिताः सहस्रशोवैषाꣳहेडऽईमहे ॥
गङ्गा-सरस्वती-रेवा-पयोष्णी-नर्मदाजलैः । स्नापितोऽसि मया देव ततः शान्तिं कुरुष्व मे ॥
ॐ भूर्भुवःस्वः श्रीसाम्बसदाशिवाय नमः, स्नानीयं जलं समर्पयामि ।

पञ्चामृतस्नानम्
उर्ध्ववक्त्रध्यानम्

(पाँच मुखमा पञ्चामृतमा पहिले दुध चढाउन बेलपत्र र फूल लिएर माथिको मुखको ध्यान गर्ने)

व्यक्ताव्यक्तगुणोत्तरं सुवदनं षड्विंशतत्त्वाधिकं, तस्मादुत्तरतत्त्वमक्षयमिति ध्येयं सदा योगिभिः ।
वन्दे तामसवर्जितेन मनसा सूक्ष्मातिसूक्ष्मं परं, शान्तं पञ्चममीश्वरस्य वदनं खंव्यापि तेजोमयम् ॥

क्षीरस्नानम्

(पानी समाएर दुध चढाउने)

ॐ आप्यायस्वेति गौतम ऋषिः पयोदेवता गायत्री छन्दः ऊर्ध्ववक्त्रे ईशानाय क्षीरस्नाने विनियोगः ।

ॐ आप्यायस्व समेतु ते व्विश्वतः सोम वृष्ण्यम् । भवा बाजस्य सङ्गथे ।
गोक्षीरधाम देवेश गोक्षीरेण मया कृतम् । स्नपनं देवदेवेश गृहाण परमेश्वर ॥

ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, पयः स्नानं समर्पयामि ॥

शुद्धोदकस्नानम्

(शुद्ध जल चढाउने)

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वꣳहिरिप्रं प्रवहन्ति देवीरुदिदाभ्यः
शुचिरापूतऽएमि । दीक्षातपसोस्तनूरसि तां त्वा शिवाꣳशग्मां परिदधे भद्रं वर्ण पुष्यन् ॥

ॐ भुर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, शुद्धोदकस्नानं समर्पयामि ॥

ॐ ईशानाय नमः । इति मन्त्रेण गन्धपुष्पादिभिः पूजयेत् । (एवं सर्वत्र) (चन्दन, अक्षता, फूल चढाउने)

पूर्ववक्त्रध्यानम्

(बेलपत्र र फूल लिएर पूर्व मुखको ध्यान गर्ने)

संवर्ताग्निनतडित्प्रतप्तकनकप्रस्पर्द्धितेजोऽरुणं, गम्भीरस्मृतिनिः सृतोग्रदशनप्रोद्भासिताम्राधरम् ।
बालेन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोरगं, वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः ॥

दधिस्नानम्

(पानी समाएर दही चढाउने)

ॐ दधिक्राव्ण इति वामदेवऋषिर्दधिर्देवता अनुष्टुप्छन्दः पूर्ववक्त्रे तत्पुरुषाय दधिस्नाने विनियोगः ।

ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखाकरत्प्रणऽआयूꣳषि तारिषत् ॥
दध्ना चैव महादेव स्नपनं क्रियते मया । गृहाणैव मया दत्तं सुप्रसन्नो भवाद्य वै ॥

ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, दधिस्नानं समर्पयामि ॥ (शुद्ध जल, फूल, चन्दन, अक्षता चढाउने)

ॐ आपोऽअस्मान्० इति शुद्धोदकेन स्नापयित्वा ॐ तत्पुरुषाय नमः, इति गन्धादिभिः संपूज्य ।

पश्चिमवक्त्रध्यानम्

(बेलपत्र फूल लिएर पश्चिम मुखको ध्यान गर्ने)

प्रालेयामलविन्दुकुन्दधवलं गोक्षीरफेनप्रभं भस्माभ्यङ्गनमङ्गदेहदहनं ज्वालावलीलोचनम् ।
ब्रह्मेन्द्रादिमरुद्गणैः स्तुतिपरैरभ्यर्चितं योगिभिर्वन्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥

घृतस्नानम् –

(पानी समाएर घ्यू चढाउने)

ॐ घृतं मिमिक्ष इति गृत्समद ऋषिः घृतो देवता त्रिष्टुप्छन्दः । पश्चिमवक्त्रे सद्योजाताय घृतस्नाने विनियोगः ।

ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृतेश्रितो घृतम्वस्य धाम ।
अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥
सर्पिषा च महादेव स्नपनं क्रियते मया । गृहाण श्रद्धया दत्तं तव प्रीत्यर्थमेव च ॥

ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, घृतस्नानं समर्पयामि ॥ (शुद्ध जल, फूल, चन्दन, अक्षता चढाउने)
ॐ आपोऽअस्मान्० इति शुद्धोदकेन स्नापयित्वा ॐ सद्योजाताय नमः इति गन्धादिभिः पूजयेत् ।

दक्षिणवक्त्रध्यानम्

(बेलपत्र फूल लिएर दक्षिण मुखको ध्यान गर्ने)

कालाभ्रभ्रमराञ्जनाचलनिभं व्यावृत्तपिङ्गेक्षणं खण्डेन्दुद्वयमिश्रितांशुदशनप्रोद्भिन्नदंष्ट्राङ्कुरम् ।
सर्पप्रोतकपालशुक्तिसकलव्याकीर्णसच्छेखरं वन्दे दक्षिणमीश्वरस्य कुटिलं भ्रूभङ्गरौद्रं मुखम् ॥

मधुस्नानम्

(विनियोग गर्ने र मह चढाउने)

ॐ मधुवता इति विश्वामित्र ऋषिरनुष्टुप्छन्दः सदाशिवो देवता दक्षिणवक्त्रे अघोराय मधुस्नाने विनियोगः ।
ॐ मधुवाताऽऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥
मधु नक्तमुतोषसो मधुमत्पार्थिवꣳरजः । मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥
तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु । तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥
ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, मधुस्नानं समर्पयामि ॥ (शुद्ध जल र फूल, अक्षता, चन्दन चढाउने)
ॐ आपोऽअस्मान्० इति शुद्धोदकेन स्नापयित्वा ॐ अघोराय नमः, इति गन्धादिभिः पूजयेत् ।

उत्तरवक्त्रध्यानम्

(बेलपत्र, फूल लिएर उत्तर मुखको ध्यान गर्ने)

गौरं कुङ्कुमपिङ्गलं सुतिलकं व्यापाण्डुगण्डस्थलं, भ्रूविक्षेपकटाक्षवीक्षणलसत्संशक्तकर्णोत्पलम् ।
स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालङ्कृतं, वन्दे पूर्णशशाङ्कमण्डलनिभं वक्त्रं हरस्योत्तरम् ।

शर्करास्नानम्

(पानी समाई सख्खर चढाउने)

ॐ आपा ꣳरसमित्यस्य इन्द्रबृहस्पतिर्ऋषिरनुष्टुप्छन्दः सदाशिवो देवता उत्तरवक्त्रे वामदेवाय शर्करास्नाने विनियोगः ।
ॐ अपा ꣳरसमुद्वयसꣳसूर्ये सन्तꣳसमाहितम् । अपा ꣳरसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयाम गृहीतोसीन्द्राय त्वा जुष्टङ्गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥
इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका । मालापहारिणी दिव्या स्नानाय प्रतिगृह्यताम् ॥
ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, शर्करास्नानं समर्पयामि ॥ (शुद्ध जल, चन्दन, अक्षता फूल चढाउने)
ॐ आपोऽअस्मान्० इति शुद्धोदकेन स्नापयित्वा ॐ वामदेवाय नमः, इति गन्धादिभिः पूजयेत् ।

पञ्चामृतस्नानम्

(पञ्चामृत चढाउने)

ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः । सरस्वती तु पञ्चधासो देशेभवत्सरित् ॥
ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, पञ्चामृतस्नानं समर्पयामि ॥

ॐ आपोऽअस्मान्० इति शुद्धोदकेन स्नापयित्वा गन्धोदकस्नानम् (शुद्ध जल र चन्दन चढाउने)

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥

मलयाचलसम्भूतं चन्दनागरुवासितम्। सलिलं देवदेवेश स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, गन्धोदकस्नानं समर्पयामि॥

ॐ आपोऽअस्मान्० इति शुद्धोदकेन स्नापयित्वा सुगन्धिततैलस्नानम् (शुद्ध जल चढाई चन्दन चढाउने)

ॐ त्र्यम्बकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम्। उर्व्वारुकमिवबन्धनान्न्मृत्त्योर्म्मुक्षीयमामृतात्॥

ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, सुगन्धिततैलस्नानं समर्पयामि॥

उद्वर्तनस्नानम्

(कपुर मिसाएको जल चढाउने)

ॐ अꣳशुनाते अꣳशुः पृच्यताम्परुषा परुः। गन्धस्ते सोममवतु मदाय रसोऽअच्युतः॥

नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम्। उद्वर्तनं मया दत्तं गृहाण शशिशेखर॥

ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, उद्वर्तनस्नानं समर्पयामि॥

महाभिषेकस्नानम्

(अभिषेक गर्ने)

ॐ नमस्ते रुद्रमन्यवऽउतोत० इति षोडशमन्त्रैः महाभिषेकस्नानं कुर्यात्।

ॐ ह्रौं जूं सः ॐ भूर्भुवः स्वः

ॐ त्र्यम्बकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम्। उर्व्वारुकमिवबन्धनान्न्मृत्त्योर्म्मुक्षीयमामृतात्॥

ॐ स्वः भुवः भूः ॐ सः जूं ह्रौं॥ ॐ महामृत्युञ्जयाय नमः।

ॐ नम÷शम्भवाय च मयो भवाय च नम÷शङ्कराय च मयस्कराय च नम÷। शिवाय च शिवतराय च।

ॐ भूर्भुवः स्वः श्रीसाम्बसदाशिवाय नमः, महाभिषेकस्नानं समर्पयामि।

ॐ आपोऽअस्मान्० इति पुनः शुद्धोदकस्नानम् (जल, चन्दन, अक्षता, फूल, बेलपत्र चढाई धूपबत्ती बाल्ने र नैवेद्य अर्पण गर्ने)

ततो ॐ साम्बसदाशिवाय नमः इति नाममन्त्रेण गन्धाक्षतपुष्पबिल्वपत्र धूपदीपनैवेद्यादिपूजोपचाराणि समर्प्य सङ्कल्पितावृत्तिभिः रूद्राध्यायं पठन् साम्बसदाशिवोपरि जलधारया (दुग्धादिधारया वा) अभिषेकं कुर्यात्।

(जल, दुध धारा दिने)

तत्रादौ षडङ्गन्यासः

(न्यास गर्ने, हृदयमा छुने)

हरि÷ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्प्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳसमिमन्दधातु।

व्विश्श्वेदेवासऽइहमादयन्तामोँ ३॥ प्रतिष्ठ॥ ॐ हृदयाय नमः॥ (शिरमा छुने)

ॐ अबोद्धचग्निꣳसमिधाजनानाम्प्रतिधेनुमिवायतीमुषासम्।

यह्वाऽइवप्प्रवयामुज्जिहानाꣳप्रभानव÷ सिस्रतेनाकमच्छ॥

ॐ शिरसे स्वाहा॥ (टुप्पीमा छुने)

ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्याव्यैश्श्वानरमृतऽआजातमग्निम् ॥
कविꣳ सम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवा ऽ ॥ ॐ शिखायै वषट् ॥ (टुप्पीमा छुने)
ॐ मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥
उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्त्वानुदेवामदन्तु ॥ (देब्रे हातले दाहिने र दाहिनेले देब्रे कुम छुने)
ॐ कवचाय हुम् ॥ (आँखामा छुने)
ॐ व्विश्श्वतश्च्चक्षुरुतव्विश्श्वतोमुखोव्विश्श्वतोबाहुरुतव्विश्श्वतस्पात् ॥
सम्बाहुब्भ्यान्धमतिसम्पतत्रैद्द्यावाभूमीजनयन्देवऽएकऽ ॥
ॐ नेत्रत्रयाय वौषट् ॥ (दाहिने हात उठाएर माझी र चोरी औंलाले वायाँ हत्केलो छुने)
ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिष ऽ ॥
मानोव्वीरान्त्रुद्द्रभामिनोव्वधीर्हविष्मन्तꣳ सदमित्त्वाहवामहे ॥ ॐ अस्त्राय फट् ।

ध्यानम्

(फूल, अक्षता, वेलपत्र लिई नमस्कार गर्ने)

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं । रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ॥
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृतिं वसानम् । विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥
ॐ अम्बेऽअम्बिकेऽ म्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥

शु..	शिववासः	फलम्	कृ.
१	श्मशाने	मृत्यु	७
२	गौरीसन्निधौ	शुभम्	१
३	सभायां	तापम्	२
४	क्रीडाया	सन्तानहानिः	३
५	कैलाशे	सुखम्	४
६	वृषे	श्रीप्राप्तिः	५
७	भोजने	भोजनप्राप्तिः	६
८	श्मशाने	मृत्युः	०
९	गौरीसन्निधौ	शुभम्	८,३०
१०	सभायां	तापम्	९
११	क्रीडायां	सन्तानहानिः	१०
१२	कैलाशे	सुखम्	११
१३	वृषे	श्रीप्राप्तिः	१२
१४	भोजने	भोजनप्राप्तिः	१३
१५	श्मशाने	मृत्युः	१४

रुद्री जुराउने तरिका

शुक्लै पक्ष छ सात, तेह्र चौध, नौ, बाह्र, दुई, पाँच तिथि ।
कुष्णै तेह्र, एघार, बाह्र, तीस, आठ, छ , पाँच, चार, एक यति ॥
रुद्री गर्न अवश्य जुर्छ शिववास हेरुन् नहेरुन् कुनै ।
जुर्दैनन् यी तिथि बिना अरु तिथि गर्नु किता दिन्दिनै ॥



शतरूद्रीय मन्त्रपाठः

(रुद्रीपाठको पहिलो अध्याय)

अथ रूद्रे प्रथमोऽध्यायः –

श्रीगणेशाय नमः । यजमानले फूल, सेतो अक्षता, बेलपत्र लिई नमस्कार गरेर वस्ने चलन छ ।)

हरिः ॐ गुणानान्त्वागुणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳ
हवामहे निधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम ॥
आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥१॥
गायत्रीत्रिष्ट्टुब्ब्जगत्त्यनुष्ट्टुप्पङ्क्त्यासह ॥
बृहत्त्युष्णिहाककुप्प्सूचीभिः शम्म्यन्तुत्त्वा ॥२॥
द्विपदायाश्च्चतुष्प्पदास्त्रिपदायाश्च्चषट्पदाꣳ ॥
व्विच्छन्दायाश्च्चसच्छन्दाꣳ सूचीभिः शम्म्यन्तुत्त्वा ॥३॥
सहस्तोमाꣳसहच्छन्दसऽआवृतः सहप्रमाऽऋषयꣳसप्तदैव्व्याः ॥
पूर्व्वेषाम्पन्थामनुदृश्श्यधीराऽअन्व्वालेभिरेरत्य्योनरꣳम्मीन् ॥४॥
यज्जाग्ग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति ॥
दूरङ्गमज्ज्योतिषाज्ज्योतिरेकन्तन्म्मेमनः शिवसङ्कल्प्पमस्तु ॥५॥
येनकर्म्मीण्यपसोमनीषिणोयज्ञेकृण्वन्तिव्विदथेषुधीराꣳ ॥
यदपूर्व्वꣳयक्षमन्तःप्प्रजानान्तन्म्मेमनः शिवसङ्कल्प्पमस्तु ॥६॥
यत्त्प्रज्ञानमुतचेतोधृतिश्च्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥
यस्म्मान्नऽऋतेकिञ्च्चनकर्म्मक्रियतेतन्म्मेमनः
शिवसङ्कल्प्पमस्तु ॥७॥
येनेदम्भूतम्भुवनम्भविष्य्यत्त्परिगृहीतममृतेनसर्व्वम् ॥
येनयज्ञस्तायतेसप्तहोतातन्म्मेमनः शिवसङ्कल्प्पमस्तु ॥८॥
यस्म्मिन्नृचꣳ सामयजूꣳषियस्म्मिन्प्रतिष्ठितारथनाभाविवाराः ॥

यस्मिँम्मिच्चित्तꣳसर्व्वमोतम्प्रजानान्तन्न्मे मन÷
शिवसङ्कल्पमस्तु ॥९॥
सुषारथिरश्वानिवयन्न्मनुष्यान्नेनीयतेभीशुभिर्व्वाजिनऽइव ॥
हृत्प्रतिष्ठन्न्यदजिरञ्जविष्ठन्तन्न्मे मन÷ शिवसङ्कल्पमस्तु ॥१०॥

॥ इति रुद्रे प्रथमोऽध्यायः ॥

अथ रूद्रे द्वितीयोऽध्यायः –

(रुद्रीपाठको दोस्रो अध्याय)

हरिः ॐ सहस्रशीर्षापुरुषꣳसहस्राक्ष÷सहस्रपात् ॥
सभूमिꣳसर्व्वतस्पृत्त्वात्त्यतिष्ठद्दशाङ्गुलम् ॥१॥
पुरुषऽएवेदꣳसर्व्वꣳयद्द्भूतꣳयच्च्यभाव्यम् ॥
उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥२॥
एतावानस्यमहिमातोज्ज्यायाँश्च्चपूरुषः ॥
पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥३॥
त्रिपादूर्द्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुन÷ ॥
ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥४॥
ततोविराड्जायतविराजोऽअधिपूरुषः ॥
सजातोऽअत्यरिच्च्यतपश्च्चाद्द्भूमिमथोपुर÷ ॥५॥
तस्म्माद्यज्ञात्सर्व्वहुतःसम्भृतम्पृषदाज्ज्यम् ॥
पशूँस्ताँश्च्चक्केव्वायव्यानारण्याग्ग्राम्म्याश्च्चये ॥६॥
तस्म्माद्यज्ञात्सर्व्वहुतऽऋचःसामानिजज्ञिरे ॥
छन्दाꣳसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥७॥
तस्म्मादश्वाऽअजायन्तयेकेचोभयादतः ॥
गावोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः÷ ॥८॥

तꣳय॒ज्ञम्ब॒र्हिषि॒ प्रौक्ष॒न्न्पुरु॑ष॒ञ्जात॑मग्र॒त॒ः ॥
तेन॑ दे॒वाऽअ॑यजन्त सा॒द्ध्याऽऋष॑यश्च्च॒ये ॥९॥
यत्पुरु॑षं॒व्यद॑धु॒ः कति॒धाव्य॑कल्पयन् ॥
मुख॒ङ्किम॑स्यासी॒त्किम्बा॒हूकिमू॒रूपादा॑ऽउच्च्येते ॥१०॥
ब्रा॒ह्म्म॒णो॒स्य॒मुख॑मासीद्द्बा॒हूरा॑ज॒न्न्य॒ः॑ कृत॒ः ॥
ऊ॒रूत॑द॑स्य॒यद्वैश्य॑ः॑ प॒द्भ्या ꣳशू॒द्रो॑ऽअजायत ॥११॥
च॒न्द्रमा॒मन॑सोजा॒त॑श्च्चक्षो॒ꣳसूर्य्यो॑ऽअजायत ॥
श्रोत्रा॑द्वा॒यु॑श्च्च॑प्रा॒ण॑श्च्च॒मुखा॑दग्निर॑जायत ॥१२॥
नाभ्या॑ऽआसीदन्तरि॑क्ष ꣳशी॒र्ष्णो॑द्द्यौ॒ः॑ सम॑वर्त्तत ॥
प॒द्द्भ्याम्भूमि॒र्द्दिश॒ꣳश्रोत्रा॒त्तथा॑लो॒काँ २॥ऽअ॑कल्पयन् ॥१३॥
यत्पुरु॑षेण॒ह॒विषा॑दे॒वाय॒ज्ञम॑त॑न्व॒त ॥
व॒स॒न्तो॑ऽस्यासी॒दाज्ज्य॑ङ्ग्री॒ष्म्म॑ऽइ॒द्ध्म॒ः॑ श॒रद्ध॒वि॒ः॑ ॥१४॥
स॒प्तास्या॑स॒न्न्प॒रि॒धय॒स्त्रि॒ः॑ स॒प्त स॒मि॒ध॑ः॑ कृता॒ः॑ ॥
दे॒वाय॒द्य॒ज्ञन्त॑न्वा॒नाऽअब॑द्ध्नन्न्पुरु॑ष॒म्प॒शुम् ॥१५॥
य॒ज्ञेन॑य॒ज्ञम॑यजन्त दे॒वास्तानि॒धर्म्मा॑णि॒प्र॒थ॒मान्न्या॑सन् ॥
ते॒ह॒नाक॑म्म॒हि॒मान॑ः॑ सचन्त॒ य॒त्र॒पूर्व्वे॑सा॒द्ध्या॒ः॑ सन्ति॑दे॒वा॒ः॑ ॥१६॥
अ॒द्द्भ्य॒ः॑ सम्भृ॑त॒ꣳपृ॑थि॒व्यै॒र॒सा॑च्च॒वि॒श्व॒क॑र्म्म॑ण॒ꣳ
सम॑वर्त्त॒ता॒ग्ग्रे॑ ॥
तस्य॒त्त्वष्टा॑वि॒द॒ध॑द्द्रू॒प॒मे॑ति॒त॒न्न्म॒र्त्य॑स्य॒दे॒व॒त्त्व॒मा॒जा॒न॒मग्ग्रे॑ ॥१७॥
व्वे॒दा॒ह॒मे॒त॒म्पु॒रु॒ष॒म्म॒हा॒न्त॑मा॒दि॒त्य॒व॑र्ण्ण॒न्त॒म॑स॒ꣳप॒र॒स्ता॑त् ॥
तमे॒व॒वि॑दि॒त्वा॒ति॑मृ॒त्यु॒मे॑ति॒ना॒न्न्य॒ः॑ प॒न्था॑वि॒द्य॒ते॒य॒ना॒य ॥१८॥

प्रजापतिश्च्चरतिगर्भेऽअन्तरजायमानोबहुधाव्विजायते ॥
तस्यधोनिम्परिपश्श्यन्तिधीरास्तस्मिन्ह्तस्थुर्भुवनानि-
व्विश्श्वा ॥१९॥
योदेवेब्भ्यऽआतपतियोदेवानाम्पुरोहितः ॥
पूर्व्वोयोदेवेब्भ्योजातोनमोरुचायब्ब्राह्म्मये ॥२०॥
रुचम्ब्राह्म्मञ्जनयन्तोदेवाऽअग्रेतदब्ब्रुवन् ॥
यस्त्वैवम्ब्राह्म्मणोव्विद्द्यात्तस्यदेवाऽअसन्व्वशे ॥२१॥
श्रीश्च्चतेलक्ष्मीश्च्चपत्क्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूप-
मश्विनौव्व्यात्तम् ॥
इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ॥२२॥

॥ इति श्रीरुद्रे द्वितीयोऽध्यायः ॥



अथ रूद्रे तृतीयोऽध्यायः –

(रुद्रीपाठको तेस्रो अध्याय)

हरिः ॐ आ॒शु꣡꣯शिशा॑नोव्वृष॒भोन भी॒मोघ॑नाघ॒न꣡꣯
क्षोभ॑णश्च्चर्षणी॒नाम् ॥
स॒ङ्क्र꣡न्द॑नोनिमि॒षऽए॑कवी॒र꣡꣯श॒त ꣳसेनाऽअजयत्त्सा॒कमिन्द्र॑÷ ॥१॥
स॒ङ्क्र꣡न्द॑नेनानिमि॒षेण॑जि॒ष्णुना॑युत्का॒रेण॑दु꣡श्च्च्यव॒नेन॑धृ॒ष्णुना॑ ॥
तदिन्द्रे॑णजय॒ततत्स॑हद्ध्वँ॒युधो॑नर॒ऽइषु॑हस्तेन॒व्वृष्ण्या॑ ॥२॥
सऽइषु॑हस्तै꣡ꣳसनिषङ्गि॑भि॒र्व्व॒शीस꣡ꣳ स्र॑ष्टा॒सयु॒धऽइन्द्रो॑ग॒णेन॑ ॥
स꣡ꣳसृ॒ष्टजित्त्सो॑मपाबा॑हुश॒द्धर्यु॒ग्रध॑न्न्वा॒प्रति॑हिताभि॒रस्ता॑ ॥३॥
बृह॑स्प्पते॒परि॑दीया॒रथे॑नरक्षो॒हामित्रा॑ँ २॥ऽअप॒बाध॑मान꣡ꣳ ॥
प्र॒भ॒ञ्ज꣡न्त्सेना॑ꣳप्रमृ॒णोयु॒धाजय॑न्न॒स्म्माक॑मेद्ध॒यवि॒तारथा॑नाम् ॥४॥
ब॒ल॒वि॒ज्ञा॒यस्थवि॑र꣡ꣳप्रवी॑र꣡ꣳसह॑स्वान्न्वा॒जीसह॑मानऽउ॒ग्र꣡꣯ ॥
अ॒भि॒वी॑रोऽअ॒भिस॑त्त्वासहो॒जाजै॒त्रमि॑न्द्ररथ॒मातिष्ठ॑गो॒वित् ॥५॥
गो॒त्र॒भिद्ग॑ो॒विद॑ꣳव॒ज्र꣡ब॑ाहु꣡ञ्ज॑य॑न्त॒मज्ज्म॑प्रमृ॒ण꣡न्त॒मोज॑सा ॥
इ꣡म꣢ꣳस॒जाता॒ऽअनु॑वीरयद्ध्व॒मिन्द्र꣡ꣳसखायोऽअनु꣡स꣢ꣳरभद्ध्वम् ॥६॥
अ॒भि॒गो॒त्राणि॒सह॑सा॒गाह॑मानोद॒योव्वी꣡र꣯श॒तम॑न्न्यु॒रिन्द्र॑÷ ॥
दु꣡श्च्च्यव॒न꣯पृ॑तना॒षाड॑यु॒द्ध्यो॒स्म्माक꣡ꣳसेना॑ऽअवतु॒प्रयु॑त्सु ॥७॥
इन्द्र॑ऽआसान्ने॒ताबृ॒ह॒स्प्प॒ति॒र्द्दक्षि॑णायज्ञ꣡पु꣯रऽए॒तुसोम॑÷॥
दे॒व॒से॒ना॒नाम॑भिभ॒ञ्ज॒ती॒ना॒ञ्ज॒य॒न्ती॒ना॒म्म॒रुतो॑य॒न्त्वग्र꣡म् ॥८॥
इन्द्र॑स्यव्वृष्ण्णोव्वरु꣡ण꣯स्यराज्ञ॑ऽआदि॒त्या॒ना॒म्म॒रु॒ता॒ꣳशर्द्धऽउ॒ग्र꣡म् ॥
म॒हाम॑नसाम्भुवन꣡च्च्यु॑वाना॒ऽघोषोदि॒वा॒ना॒ञ्ज॒य॒ता॒मु॒द॑स्त्थात् ॥९॥
उद्ध॑र्षयमघव॒न्ना॑यु॒धा॒न्न्यु॒त्सत्त्व॑ना॒म्मा॒म॒का॒ना॒म्मनाꣳसि ॥
उद्द्धृ॑त्रहन्न्वा॒जिना॑ं॒वा॒जि॑ना॒न्न्यु॒द्र॒था॑ना॒ञ्ज॒य॒ता॑ँऽय॒न्तु-
घोषा꣡ꣳ ॥१०॥

अस्म्माकमिन्द्रꣳसमृतेषुध्वजेष्ववस्म्माकꣳया ऽइक्षवस्ताजयन्तु ॥
अस्म्माकंव्वीरा ऽउत्तरेभवन्त्वस्माँ २॥ ऽउदेवा ऽअवताहवेषु ॥११॥
अमीषाञ्चित्तम्प्रतिलोभयन्तीगृहाणाङ्गान्न्यप्वेपरेहि ॥
अभिप्रेहिनिदहर्हृत्त्सुशोकैरन्धेनामित्रास्तमसासचन्ताम् ॥१२॥
अवसृष्टापरापतशरव्येब्रह्म्मसꣳशिते ॥
गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषꣳ ॥१३॥
प्रेताजयतानर ऽइन्द्रोवꣳशर्म्मयच्छतु ॥
उग्रावः सन्तुबाहवोनाधृष्ट्यायथास थ ॥१४॥
असौयासेनामरुतꣳपरेषामभ्येतिनऽओजसास्पर्द्धमाना ॥
ताङ्गूहततमसापव्व्रतेनयथामीऽअन्न्योऽअन्न्यन्नजानन् ॥१५॥
यत्रबाणाःसम्पतन्तिकुमाराव्विशिखाऽइव ॥
तन्न ऽइन्द्रोबृहस्पतिरदितिꣳशर्म्मयच्छतुव्विश्व्वाहा-
शर्म्मयच्छतु ॥१६॥
मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥
उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥१७॥

॥ इति श्रीरुद्रे तृतीयोऽध्यायः ॥



अथ रूद्रे चतुर्थोऽध्यायः –

हरिः ॐ व्विब्भ्राड्बृहत्पिबतुसोम्म्यम्मद्ध्वा-
युर्द्दधद्द्यज्ञपतावविहुतम् ॥
व्वातजूतोयोऽअभिरक्षतित्मनाप्प्रजा?
पुपोषपुरुधाव्विराजति ॥१॥
उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः÷ ॥
दृशेव्विश्व्वायसूर्य्यम् ॥२॥
येनापावकचक्षसाभुरण्यन्तञ्जनाँ२॥ऽअनु ॥
त्वंव्वरुणपश्श्यसि ॥३॥
दैव्यावद्ध्वर्य्यूऽआगतुꣳरथेनसूर्य्यत्त्वचा ॥
मद्ध्वायज्ञꣳसमञ्जाथे ॥
तम्प्रत्क्नथायंव्वेनश्चित्रन्देवानाम् ॥४॥
तम्प्रत्क्नथापूर्व्वथाव्विश्व्वथेमथाज्ज्येष्ठतातिम्बर्हिषदꣳ
स्वर्व्विदम् ॥
प्रतीचीनंव्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुव्वर्द्धसे ॥५॥
अयंव्वेनश्चोदयत्पृश्निन्नगब्भाज्ज्योतिर्ज्जरायूरजसोव्विमाने ॥
इममपाꣳसङ्गमेसूर्य्यस्यशिशुन्नव्विप्रामतिभीरिहन्ति ॥६॥
चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्ग्नेः ॥
आप्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्त्माजगत-
स्तस्थुषश्च ॥७॥
आनऽइडाभिर्व्विदथेसुशस्तिव्विश्वानरꣳसवितादेवऽएतु ॥
अपियथायुवानोमत्त्सथानोव्विश्वञ्जगदभिपित्त्वेमनीषा ॥८॥

यद॒द्य क॑च्च॒ वृत्र॑हन्नु॒दगा॑ऽअ॒भि सू॑र्य्य ॥
सर्व्वन्तदि॑न्द्र ते॒ वशे॑ ॥९॥
त॒रणि॑र्व्वि॒श्व॒दर्श॑तो ज्यो॒ति॒ष्कृ॒दसि॑ सूर्य्य ॥
व्वि॒श्व॒मा भा॑सि रोचनम् ॥१०॥
तत्त्सू॑र्य्य॒ स्य॑ देव॒त्त्वन्त॑न्म॒हित्व॒म्म॒ध्या कर्त्तो॑र्व्वि॒त॑त॒ꣳ स॒ञ्ज॒भार ॥
यदे॑द॒यु॒क्त॒ हरि॑त॒ऽ॑ स॒धस्त्या॒दाद्रात्री॒ व्वास॑स्तनु॒ते सि॒म॒स्मै॒ ॥११॥
तन्मि॒त्र॒स्य॒ व्वरु॑णस्या॒भि॒चक्षे॒ सूर्य्यो॑ रूप॒ङ्कृ॑णु॒ते द्यौरु॑पस्थे ॥
अ॒न॒न्त॒म॒न्यद्रु॒श॒दस्य॒ पाज॒ऽ॑ कृष्ण॑म॒न्यद्ध॒रि॒त॒ꣳ स॒म्भ॒र॒न्ति ॥१२॥
ब॒ण्ण॒म॒हाँ२॥ऽ अ॑सि सू॒र्य्य॒ ब॒डादि॑त्य म॒हाँ २॥ऽ अ॑सि ॥
म॒ह॒स्ते॑ स॒तो म॑हि॒मा प॑नस्य॒ते॒द्धा दे॑व म॒हाँ २॥ अ॑सि ॥१३॥
बट्टसू॑र्य्य॒श्र॒व॒सा म॒हाँ २॥ऽ अ॑सि सत्रा दे॑व म॒हाँ २॥ऽ अ॑सि ॥
म॒ह्ना दे॒वाना॑मसु॒र्य्य॒ः॒ पु॒रोहि॑तो॒ व्वि॒भु॒ज्ज्यो॒ति॒र॒दा॒ब्भ्यम् ॥१४॥
श्राय॑न्त॒ऽइ॑व॒ सूर्य्यं॒ व्वि॒श्वे॒दिन्द्र॑स्य॒ भक्ष॑त ॥
व्वसू॑नि जा॒ते॒ज॒न॒मा॒नु॒ऽओ॒ज॒सा॒प्प्र॒ति॒भा॒ग॒न्न॒दी॒धि॒म ॥१५॥
अ॒द्या दे॑वा॒ऽउदि॑ता॒ सूर्य्य॑स्य॒ नि॒र॒ꣳह॒स॒ꣳ पि॒पृ॒ता॒ नि॒र॒व॒द्या॒त् ॥
तन्नो॑ मि॒त्रो व्वरु॑णो मामहन्ता॒मदि॑ति॒ꣳ सिन्धु॑ः॒
पृथि॒वी॒ऽउ॒त द्यौः॒ ॥१६॥
आकृ॑ष्णे॒न॒ रज॑सा॒ व्व॒र्त्त॒मा॒नो॒ नि॒वे॒श॒य॒न्न॒मृ॒त॒म्म॒र्त्य॑ञ्च ॥
हि॒र॒ण्ययेन॑ स॒वि॒ता॒ र॒थे॒ना दे॒वो या॑ति॒ भु॒व॑ना॒नि॒ प॒श्य॒न् ॥१७॥

॥ इति रुद्रे चतुर्थोऽध्यायः ॥

(रुद्रीपाठको पाचौँ अध्याय)

अथ रूद्रे पञ्चमोऽध्यायः –

(यहाँबाट दोहोऱ्याउने)

हरिः ॐ नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनमः॥
बाहुब्भ्यामुततेनमः ॥१॥
यातेरुद्रशिवातनूरघोरापापकाशिनी ॥
तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥२॥
यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे ॥
शिवाङ्गिरित्रताङ्कुरुमाहिꣳसीःपुरुषञ्जगत् ॥३॥
शिवेनव्वचसात्त्वागिरिशाच्छाव्वदामसि ॥
यथानःसर्व्वमिज्जगदयक्ष्मꣳसुमनाऽअसत् ॥४॥
अद्धयवोचदधिवक्ताप्प्रथमोदैव्व्योभिषक् ॥
अहींश्च्वसर्व्वाञ्जम्भयन्त्सर्व्वांश्च्वयातुधान्न्योधुराचीःꣳ
परासुव ॥५॥
असौयस्ताम्म्रोऽअरुणऽउतबब्भ्रुःसुमङ्गलः ॥
येचैनꣳरुद्राऽअभितोदिक्षुश्रिताःसहस्रशोवैषाꣳहेडऽईमहे ॥६॥
असौयोवसर्प्पतिनीलग्ग्रीवोव्विलोहितः ॥
उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यः सदृष्टोमृडयातिनः ॥७॥
नमोऽस्तुनीलग्ग्रीवायसहस्राक्षायमीढुषे ॥
अथोयेऽअस्यसत्त्वानोहन्तेब्भ्योकरन्नमः ॥८॥
प्रमुञ्चधन्न्वनस्त्वमुभयोरात्कन्र्योज्ज्यार्याम् ॥
याश्च्वतेहस्तऽइषवःपरातोभगवोव्वप ॥९॥
विज्ज्यन्धनुः कपर्द्दिनोव्विशल्ल्योबाणवाँ २॥ऽउत ॥
अनेशन्नस्यषाऽइषवऽआभुरस्यनिषङ्गधिः ॥१०॥

यातेहितिर्म्मीढुष्टमहस्तेबभूवतेधनु ÷ ॥
तयास्म्मान्व्विश्वतस्त्वमयक्ष्मयापरिभुज ॥११॥
परितेधन्वनोहेतिरस्म्मान्वृणक्तुव्विश्वत÷ ॥
अथोषऽइषुधिस्तवारेऽअस्म्मन्निधेहितम् ॥१२॥
अवतत्त्यधनुष्ट्ट्वꣳसहस्राक्षशतेषुधे ॥
निशीर्य्यशल्यानाम्मुखाशिवोन÷सुमनाभव ॥१३॥
नमस्तुऽआयुधायानाततायधृष्णवे ॥
उभाब्भ्यामुततेनमोबाहुब्भ्यान्तवधन्वने ॥१४॥
मानोमहान्तमुतमानोऽअर्ब्भकम्मानऽउक्षन्तमुत-
मानऽउक्षितम् ॥
मानोव्वधीꣳपितरम्मोतमातरम्मान÷
प्प्रियास्तन्वोरुद्द्ररीरिषꣳ ॥१५॥
मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषꣳ ॥
मानोव्वीरान्नुद्द्रभामिनोव्वधीर्हविष्मन्तꣳसदमित्त्वाहवामहे ॥१६॥
नमोहिरण्ण्यबाहवेसेनान्न्येदिशाञ्चपतयेनमोनमो- (नमस्तेदेखि १६ मन्त्र
व्वृक्षेब्भ्योहरिकेशेभ्यꣳ पशुनाम्पतयेनमोनम÷ दोहोऱ्याउने भन्दा यहाँ १६
शष्प्पञ्जरायत्त्विषीमतेपथीनाम्पतयेनमोनमो- मन्त्रसम्म दोहोऱ्याउने)
हरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबब्भ्लुशाय ॥१७॥
नमोबब्भ्लुशायव्व्याधिनेन्नानाम्पतयेनमोनमोभवस्यहेत्त्यै-
जगताम्पतयेनमोनमोरुद्द्रायाततायिनेक्षेत्राणाम्पतयेनमोनम÷
सूतायाहन्त्यैव्वनानाम्पतयेनमोनमोरोहिताय ॥ १८ ॥
नमोरोहितायस्त्थपतयेव्वृक्षाणाम्पतयेनमोनमोभुवन्तये-
व्वारिवस्कृतायौषधीनाम्पतयेनमोनमोमन्त्रिणेव्वाणिजाय-

कक्षाणाम्पतयेनमोनमऽउच्चैर्घो
षायाक्रुन्दयतेपत्तीनाम्पतयेनमोनम÷कृत्स्नायुतया ॥ १९ ॥
नमः÷कृत्स्नायुतयाधावतेसत्त्वनाम्पतयेनमोनमꣳ
सहमानायनिव्व्याधिनऽआव्याधिनीनाम्पतयेनमोनमोनिषङ्गिणे-
ककुभायस्तेनानाम्पतयेनमोनमोनिचेरवेपरिचरायाऽ-
रण्यानाम्पतयेनमोनमोव्वञ्चते ॥ २० ॥
नमोव्वञ्चतेपरिवञ्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणऽइषु-
धिमतेतस्करांणाम्पतयेनमोनम÷सूकायिब्भ्योजिघाꣳ
सद्द्भचोमुष्णुताम्पतयेनमोनमोसिमद्द्भ्योनक्तुञ्चर-
द्द्भचोव्विकृन्तानाम्पतयेनम ÷ ॥२१ ॥
नमऽउष्णीषिणेगिरिचरायकुलुञ्चानाम्पतयेनमोनमऽ
इषुमद्भचोधन्वायिब्भ्यश्चवोनमोनमऽआतन्वानेब्भ्य÷
प्प्रतिदधानेब्भ्यश्चवोनमोनमऽआयच्छद्द्भचोस्यद्द्भचश्च-
वोनमोनमोव्विसृजद्द्भच÷ ॥ २२ ॥
नमोव्विसृजद्द्भचोव्विद्धचद्द्भचश्चवोनमोनम÷
स्वपद्द्भचोजाग्रद्द्भचश्चवोनमोनमꣳशयानेब्भ्यऽआ-
सीनेब्भ्यश्चवोनमोनमस्तिष्ठद्द्भचोधावद्द्भचश्चवोनमो-
नम÷सभाब्भ्य÷ ॥ २३ ॥
नम÷सभाब्भ्य÷सभापतिब्भ्यश्चवोनमोनमोवेब्भ्यो-
वपतिब्भ्यश्चवोनमोनमऽआव्व्याधिनीब्भ्योव्विविद्धचन्ती-
ब्भ्यश्चवोनमोनमऽउगणाब्भ्यस्तृꣳ
हती ब्भ्यश्चवोनमोनमोगुणेब्भ्य÷ ॥ २४ ॥

नमो॑गु॒णेब्भ्यो॑गु॒णप॑तिब्भ्य॒श्च्चवो॒नमो॒नमो॒व्व्रा॒ते॑ब्भ्यो॒व्व्रा॒तप॑ति-
ब्भ्य॒श्च्चवो॒नमो॒नमो॒गृत्से॑ब्भ्यो॒गृत्स॑पतिब्भ्य॒श्च्चवो॒नमो॒नमो॒-
व्विरू॑पेब्भ्योव्वि॒॒वरू॑पेब्भ्य॒श्च्चवो॒नमो॒नम॒ꣳसे॒नाब्भ्य॒ꣳ ॥२५॥
नम॒ꣳसे॒नाब्भ्य॒ꣳसे॒नानि॑ब्भ्य॒श्च्चवो॒नमो॒नमो॑र॒थिब्भ्यो॑ऽअर॒थे-
ब्भ्येब्भ्य॒श्च्चवो॒नमो॒नम॑÷क्ष॒तृब्भ्य॑÷सङ्ग्रही॒तृब्भ्य॒श्च्चवो॒नमो-
नमो॑मु॒हद्भ्यो॑ऽअर्ब्भु॒केब्भ्य॒श्च्चवो॒नम॑÷ ॥ २६ ॥
नम॒स्त॒क्षेब्भ्योर॑थका॒रेब्भ्य॒श्च्चवो॒नमो॒नम॒ꣳकु॒ला॑लेब्भ्य॒ꣳ
क॒म्मरि॑ब्भ्य॒श्च्चवो॒नमो॒नमो॑निषा॒देब्भ्य॑÷पुञ्जिष्ठे॑ब्भ्य॒श्च्चवो॒नमो
नम॑÷॒॒वनि॑ब्भ्यो॑मृग॒युब्भ्य॒॒श्च्चवो॒नमो॒नम॒ꣳ॒॒वब्भ्य॑÷ ॥२७॥
नम॒ꣳ॒॒वब्भ्य॑÷॒॒वप॑तिब्भ्य॒श्च्चवो॒नमो॒नमो॑भ॒वाय॑च-
रु॒द्राय॑चु॒नम॑÷श॒र्व्वाय॑चपशु॒पत॑येचु॒नमो॒नील॑ग्रीवायचशिति॒-
क॒ण्ठा॑यचु॒नम॑÷कप॒र्द्दि॑ने॑ ॥२८॥
नम॑÷कप॒र्द्दि॑ने॑चु॒व्व्यु॒प्त॒केशायचु॒नम॑÷सह॒स्रा॒क्षाय॑चश॒त-
ध॑न्न्वनेचु॒नमो॑गिरिश॒यायचशिपिवि॒ष्टा॑यचु॒नमो॑मी॒ढु॒ष्ट॑माय॒चे-
ष॒मतेचु॒नमो॑ह्र॒स्वाय॑ ॥ २९ ॥
नमो॑ह्र॒स्वाय॑चव्वामु॒नाय॑चु॒नमो॑बृह॒तेचु॒व्वर्षी॑यसेचु॒नमो॑व्वृद्धा॒य॑-
चस॒॒वृधे॑चु॒न मो॑ग्र॒चाय॑चप्प्रथ॒माय॑चु॒नम॑ऽआ॒शवे॑ ॥ ३० ॥
नम॑ऽआ॒शवे॑चाजि॒राय॑चु॒नम॒ꣳशीग्र॒चाय॑चु॒शीब्भ्या॑यचु॒नमु॑ऽ
ऊम्म्या॑यचाव स्व॒न्न्या॒यचु॒नमो॑नादे॒याय॑चद्वी॒प्प्या॑यच ॥ ३१ ॥
नमो॑ज्ज्ये॒ष्ठाय॑चकनि॒ष्ठाय॑चु॒नम॑÷पूर्व्व॒जाय॑चापर॒जाय॑चु॒नमो॑-
मद्ध्य॒माय॑चापग॒ल्भाय॑चु॒नमो॑जघ॒न्न्या॒यचबु॒द्ध्न्या॒यचु॒नम॒ꣳ
सो॑ब्भ्या॑य ॥ ३२ ॥

नमꣳसोभ्यायचप्प्रतिसुऽर्य्यायचुनमोषाम्म्यायचुक्षेम्म्यायचु-
नमꣳश्लोक्क्यायचावसान्न्यायचुनमऽउर्व्वऽर्य्यायचुखल्ल्यायचु-
नमोव्वन्न्याय ॥ ३३ ॥
नमोव्वन्न्यायचुकक्ष्यायचुनम÷श्श्रुवायचप्प्रति श्श्रुवायचु-
नमऽआशुषेणायचाशुरथायचुनमꣳशूरायचावभेदिनेचु-
नमोबिल्म्मनेॅ ॥ ३४ ॥
नमोबिल्म्मनेॅचकवुचिनेॅचुनमोव्वर्म्मिणेॅचव्वरूथिनेॅचुनम÷
श्श्रुतायचश्श्रुतसेनायचुनमोदुन्दुभ्यायचाहनन्न्यायचु-
नमोधृष्णवेॅ ॥ ३५ ॥
नमोधृष्णवेॅचप्प्रमृशायचुनमोनिषङ्गिणेॅचेषुधिमतेॅचुनमस्तीक्ष्णे-
षवेचायुधिनेॅचुनम÷स्वायुधायचसुधन्व्वनेच ॥ ३६ ॥
नमꣳसुत्त्यायचुपत्थ्यायचुनमꣳकाट्ट्यायचुनीप्प्यायचुनमꣳ
कुल्यायचसर स्यायचुनमोनादेयायचव्वैशन्तायचुनमꣳ
कूप्प्याय ॥ ३७ ॥
नमꣳकूप्प्यायचावट्टयायचुनमोव्वीद्ध्र्यायचातुप्प्यायचुनमो-
मेघ्यायचव्विद्युत्यायचुनमोव्वर्ष्य्यायचाव्वर्ष्यायेचु-
नमोव्वात्त्याय ॥ ३८ ॥
नमोव्वात्त्यायचुरेष्म्म्यायचुनमोव्वास्तुव्व्यायचव्वास्तुपायेचुनमꣳ
सोमायच-रुद्द्रायचुनमस्ताम्म्रायचारुणायचुनम÷शङ्गवेॅ ॥३९॥
नम÷शङ्गवेॅचपशुपतयेचुनमऽउग्ग्रायचभीमायचुनमोग्ग्रेवधायेॅ-
चदूरेवधायचुनमोहन्त्रेचुहनीयसेचुनमोव्वृक्षेब्भ्योहरिकेशेब्भ्यो-
नमस्ताराय ॥ ४० ॥

नम॑ः शम्भ॒वाय॑ च मयो॒भ॒वाय॑ च॒ नम॑ः शङ्क॒राय॑ च मयस्क॒राय॑ च॒-
नम॑ः शि॒वाय॑ च शि॒वत॑राय च ॥ ४१ ॥
नम॒ः पार्ण्या॑य चावार्ण्या॒य॑ च॒ नम॑ः प्रप्तर॑णाय चोत्तर॑णाय च॒ नम॒-
स्तीर्त्या॑य च॒ कूल्या॑य च॒ नम॒ः शष्प्या॑य च॒ फेन्न्या॑य च॒ नम॑ः
सिक॒त्या॒य ॥४२॥
नम॑ः सिक॒त्या॒य च प्रवाह्ण्या॒य च॒ नम॑ः किꣳशि॒लाय॑ च क्षय॒णाय॑-
च॒ नम॑ः कप॒र्दि॑ने च पुल॒स्तये॑ च॒ नम॑ऽइरि॒ण्या॒य च प्रप॒त्या॒य च॒-
नमो॒ व्रज्या॑य ॥४३॥
नमो॒ व्रज्या॑य च॒ गोष्ठ्या॑य च॒ नम॒स्तल्प्या॑य च॒ गेह्या॑य च॒ नमो॑-
ह्रद॒ या॒य च निवे॒ष्प्या॒य च॒ नम॒ः काट्या॑य च गह्व॒रेष्ठा॑य च॒ नम॒ः
शुष्क्या॑य ॥४४॥
नम॒ः शुष्क्या॑य च हरित्या॒य च॒ नम॑ः पाꣳसु॒व्या॒य च रज॒स्या॒य च॒-
नमो॑ लोप्या॑य चोल॒प्या॒य च॒ नम॑ऽऊर्व्या॑य च॒ सूर्व्या॑य च॒-
नम॑ः प॒र्ण्या॑य ॥४५॥
नम॑ः प॒र्ण्या॑य च पर्ण्श॒दाय॑ च॒ नम॑ऽउद्गु॒रमा॑णाय चाभिघ्न॒ते च॒-
नम॑ऽआखिद॒ते च॑ प्रखिद॒ते च॒ नम॑ऽइषुकृद्भ्यो॑ धनुष्कृद्भ्य॑-
श्च॑ वो॒ नमो॒ नमो॑ वः किरि॒केभ्यो॑ दि॒वाना॑ꣳ हृद॒यभ्यो॒ नमो॑ विचि-
न्व॒त्केभ्यो॒ नमो॑ विक्षिण॒त्केभ्यो॒ नम॑ऽ आनिर्ह॒तेभ्य॑ः ॥४६॥
द्रापे॑ऽअन्ध॑सस्पते॒ दरि॑द्र॒न्नील॑लोहित ॥
आ॒सा॒म्प्र॒जाना॑मे॒षाम्प॑शू॒नाम्मा भे॒र्म्मारो॒ङ्मो च॑न॒ः
किञ्च॒नाम॑मत् ॥ ४७ ॥

इमारुद्द्रायतवसेकपर्द्दिनेक्षयद्द्वीरायप्रभरामहेमती? ॥
षथाशमसद्दिद्वपदेचतुष्पदेव्विꣳवम्पुष्टद्ङ्ग्रामेऽ-
अस्म्मन्ना नातुरम् ॥ ४८ ॥
षातेरुद्द्रशिवातनू?शिवाव्विꣳवाहाभेषजी ॥
शिवारुतस्यभेषजीतयानोमृडजीवसे ॥ ४९ ॥
परिनोरुद्द्रस्यहेतिर्व्वृणक्तुपरित्त्वेषस्यदुर्म्मतिरघायो? ॥
अवस्त्युरामुघवद्भ्यस्तनुष्वमीड्ढ्वस्तोकायतनयायमृड ॥५०॥
मीढुष्टमशिवतमशिवोनःसुमनाभव ॥
परमेव्वृक्षऽआयुधन्निधायकृत्तिंव्वसानऽआचरपिना-
कम्बिब्भ्रदागहि ॥ ५१ ॥
व्विकिरिद्द्रव्विलोहितनमस्तेऽअस्तुभगवः ॥
यास्तेसहस्रꣳहेतयोन्यमस्म्मन्निवपन्तुता? ॥ ५२ ॥
सहस्राणिसहस्रशोबाहवोस्तवहेतयः ॥
तासामीशानोभगवःपराचीनामुखाकृधि ॥ ५३ ॥
असङ्ख्यातासहस्राणियेरुद्द्राऽअधिभूम्म्याम् ॥
तेषाꣳसहस्रयोजनेऽवधन्न्वानितन्म्मसि ॥ ५४ ॥
अस्म्मन्न्महत्त्यर्ण्णवेन्तरिक्षेभवाऽअधि ॥
तेषाꣳसहस्रयोजनेऽवधन्न्वानितन्म्मसि ॥ ५५ ॥
नीलग्ग्रीवाःशितिकण्ठादिवꣳरुद्द्राऽउपश्रिताः ॥
तेषाꣳसहस्रयोजनेऽवधन्न्वानितन्म्मसि ॥ ५६ ॥
नीलग्ग्रीवाःशितिकण्ठाःशर्व्वाऽअध?क्षमाचरा? ॥
तेषाꣳसहस्रयोजनेऽवधन्न्वानितन्म्मसि ॥ ५७ ॥

षेव्वृक्षेषुशृष्प्पञ्जरानीलग्ग्रीवाव्विलोहिताꣳ ॥
तेषाꣳसहस्रयोजनेऽवधन्व्वानितन्म्मसि ॥ ५८ ॥
षेभूतानामधिपतयोव्विशिखास÷कपर्द्दिन÷ ॥
तेषाꣳसहस्रयोजनेऽवधन्व्वानितन्म्मसि ॥ ५९ ॥
षेपथाम्पथिरक्षयऽऐलबृदाऽआयुर्य्युध÷ ॥
तेषाꣳसहस्रयोजनेऽवधन्व्वानितन्म्मसि ॥ ६० ॥
षेतीर्त्थानिप्प्राचरन्तिसृकाहस्तानिषङ्गिण÷ ॥
तेषाꣳसहस्रयोजनेऽवधन्व्वानितन्म्मसि ॥ ६१ ॥
षेन्नेषुव्विविद्धयन्तिपात्रेषुपिबतोजनान् ॥
तेषाꣳसहस्रयोजनेऽवधन्व्वानितन्म्मसि ॥ ६२ ॥
षऽएतावन्तश्च्चभूयाꣳसश्च्चदिशोरुद्राव्वितस्थिरे ॥
तेषाꣳसहस्रयोजनेऽवधन्व्वानितन्म्मसि ॥ ६३ ॥
नमोस्तुरुद्रेब्भ्योषेदिविषेषांव्वर्षमिषवꣳ ॥
तेब्भ्योदशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोद्ध्वा? ॥
तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेषन्द्विष्म्मोषश्च्चनो-
द्द्वेष्टितमे षाज्जम्भेदद्ध्मꣳ ॥ ६४ ॥
नमोस्तुरुद्रेब्भ्योषेन्तरिक्षेषेषांव्वातऽइषवꣳ ॥
तेब्भ्योदशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोद्ध्वा? ॥
तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेषन्द्विष्म्मोषश्च्चनो-
द्द्वेष्टितमे षाज्जम्भेदद्ध्मꣳ ॥ ६५ ॥

नमोस्त्तुरुद्रेब्भ्योषेपृथिव्यांऽषेषान्नमिषवꣳ ॥
तेब्भ्योदशाप्प्राचीर्द्दशादक्षिणादशाप्प्रतीचीर्द्दशोदीचीर्द्दशोद्ध्वार्? ॥
तेब्भ्योनमोऽअस्त्तुतेनोवन्त्तुतेनोमृडयन्त्तुतेषन्द्विष्म्मोषꣳच्चनो-
द्द्वेष्टितमें षाञ्जम्भेदद्ध्मꣳ ॥ ६६ ॥

॥ इति रुद्रे पञ्चमोऽध्यायः ॥

अथ रुद्रे षष्ठोऽध्यायः –

(पुनर्नमस्ते षोडशकं पठित्वा ।)

(रुद्रीपाठको छैटौँ अध्याय)
(यहाँबाट फेरि नमस्तेदेखि हवामहेसम्म
१६ मन्त्र दोहोऱ्याउने)

एषतेरुद्द्रभाग्?सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषते-
रुद्द्रभागऽआखुस्त्ते पशु? ॥ १ ॥
अवरुद्द्रमदीमह्यवदिवन्त्र्यम्बकम् ॥
यथानोव्वस्यसस्स्करद्द्यथानुꣳश्रेयसस्स्करद्द्यथानो-
व्व्यवसायय्यात् ॥ २ ॥
नमस्तेरुद्द्रमन्न्यवऽउतोतऽइषवेनमः ॥
बाहुब्भ्यामुततेनमः ॥ ३ ॥
यातेरुद्द्रशिवातनूरघोरापापकाशिनी ॥
तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ ४ ॥
नतंव्विदायुषऽइमाजुजानान्न्यद्द्युष्म्माकमन्तरम्बभूव ॥
नीहारेणप्प्रावृताजल्प्प्याचासुतृपऽउक्क्थशासश्च्चरन्ति ॥ ५ ॥
व्विश्श्वकर्म्माहय्यजानिष्टदेवऽआददद्द्गन्ध्रव्वोऽअभवद्द्वितीयः ॥
तृतीयः पिताजनितौषधीनामुपाञ्जन्भंव्व्यदधात्त्पुरुत्रा ॥ ६ ॥

मीढुष्टमुशिवतमशिवोन÷सुमनाभव ॥
परमेव्वृक्षऽआयुधन्निधायकृत्तिंव्वसानऽआचरपिनाकम्बिब्भ्रदागहि ॥ ७ ॥
व्विकिरिद्रुव्विलोहितनमस्तेऽअस्तुभगवः ॥
षास्तेसहस्रꣳहेतयोन्न्यमस्म न्निवपन्तुताः ॥ ८ ॥
सहस्राणिसहस्रशोबाह्वोस्तवहेतयः÷ ॥
तासामीशानोभगवःपराचीनामुखाकृधि ॥ ९ ॥
असङ्ख्यातासहस्राणिषेरुद्राऽअधिभूम्म्यांम् ॥
तेषाꣳसहस्रयोजनेऽवधन्वानितन्मसि ॥ १० ॥
व्वयꣳसोमव्व्रतेतवमनस्तनूषुबिब्भ्रतः ॥
प्रजावन्तःसचेमहि ॥ ११ ॥
एषतेरुद्रभागःसहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ १२ ॥
अवरुद्रमदीमहऽषवदेवन्त्र्यम्बकम् ॥
षथानोव्वस्यसस्स्करद्द्वथानꣳश्रेयसस्स्करद्द्वथानोव्व्यवसायर्यात् ॥ १३ ॥
भेषजमसिभेषजङ्गवेऽश्वायपुरुषायभेषजम् ॥
सुखम्मेषायमेष्यै ॥ १४ ॥
त्र्यम्बकꣳयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥
उर्व्वारुकमिवबन्धनान्न्मृत्योर्म्मुक्षीयमामृतात् ॥
त्र्यम्बकꣳयजामहेसुगन्धिम्पतिवेदनम् ॥
उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुत÷ ॥ १५ ॥

एतत्तेरुद्द्रावसन्तेनपुरोमूजवतोतीहि ॥
अवततधन्वापिनाकावसꣳकृत्तिवासाऽअहिꣳसन्नꣳ
शिवोतीहि ॥ १६ ॥
त्र्यायुषञ्जमदग्नेꣳकश्यपस्यत्र्यायुषम् ॥
षद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ १७ ॥
शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिꣳसीꣳ ॥
निवर्त्तयाम्म्यायुषेन्नाद्द्यायप्रजननायरायस्पोषाय-
सुप्रजास्त्वायसुवीर्य्यीय ॥ १८ ॥

॥ इति रुद्रे षष्ठोऽध्यायः ॥

ईस्वरो वरदो नित्यं वृषगामी त्रिशूलधृक्। त्रिनेत्रो दक्षमथनो रुद्रः शान्तिर्ददातु मे ॥
शुभं रुद्रः सुप्रसन्नः सुप्रीतो वरदो भव।
महादेव महादेव महादेव महेश्वर। भवानेव भवानेव भवानेव गतिर्मम।

(यहाँसम्म पढेर टीका लगाई सङ्ख्या राख्ने चलन छ।)

अथ रूद्रे सप्तमोऽध्यायः - (रुद्रीपाठको सातौं अध्याय)

हरिः ॐ उग्रꣳच्चभीमꣳच्चध्वान्तꣳच्चधुनिꣳच्च ॥
सासह्वांꣳच्चाभियुग्ग्वाचंव्विक्षपꣳस्वाहा ॥ १ ॥
अग्निन ꣳ हृदयेनाशनि ꣳ
हृदयाग्ग्रेणपशुपतिꣳरुत्स्नुहृदयेनभवꣳशक्वना ॥
शर्व्वम्मतस्नाभ्यामीशानम्मन्न्युनामहादेवमन्तꣳपर्शव्व्येनो-
ग्ग्रन्देवंव्वनिष्ठु नोव्वसिष्ठुहनुꣳशङ्गीनिकोश्श्याभ्यांम् ॥ २ ॥
उग्ग्रंल्लोहितेनमित्रꣳसौव्व्रत्त्येनरुद्द्रन्दौव्व्रत्त्येनेन्द्रम्प्रक्रीडेन-
मरुतोबलेनसाद्ध्यान्न्प्रमुदा ॥
भवस्यकण्ठयꣳरुद्द्रस्यान्तꣳपार्श्व्यम्महादेवस्य-
यकृच्छुर्व्वस्यव्वनिष्ठ्ठुःपशुपतेꣳपुरीतत् ॥ ३ ॥

व्वाज॑श्च॒मेप्प्र॒सु॒व॑श्च॑मे॒प्प्र॒यति॑श्च॒मे॒प्प्र॒सिति॑श्च॒मेधी॒ति-
श्च॑मे॒क्क्र॒तु॑श्च॒मे॒स्व॑र॑श्च॒मे॑ लो॒क॑श्च॒मे॑ श्र॒व॑श्च॑मे॒ श्रुति-
श्च॒मे॒ज्ज्यो॒ति॑श्च॒मे॒स्वृ॑श्च॒मे यज्ञे॑न॑कल्पन्ताम् ॥ ४ ॥
प्रा॒ण॑श्च॑मेपा॒न॑श्च॑मे॒व्या॒न॑श्च॒मे॒सु॑श्च॒मे॒चि॒त्त॒ञ्च॑म॒ऽआधी॑त-
ञ्च॒मे॒व्वाक्क्च॑मे॒मन॑श्च॒मे॒च॒क्षु॑श्च॒मे॑ श्रोत्र॑ञ्च॒मे॒द॒क्षे॑श्च॒मे॒-
ब॒ल॑ञ्च॒मे॒य॒ज्ञे॑न॑कल्पन्ताम् ॥५॥
इ॒मामे॑ऽअग्ग्न॒ऽइ॒ष्ट्ट॒का॒धे॒न॒व॑÷ स॒न्त्वे॒का॑च॒दश॑॑च॒दश॑॑च॒श॒त॒ञ्च॑-
श॒त॒ञ्च॑स॒ह॒स्र॑ञ्च॒स॒ह॒स्र॑ञ्चा॒यु॒त॑ञ्चा॒यु॒त॑ञ्चनि॒यु॒त॑ञ्चनि॒यु॒त॑ञ्च-
प्प्र॒यु॒त॒ञ्चा॑र्ब्बु॒द॑ञ्च॒न्न्य॒र्ब्बु॒द॑ञ्चसमु॒द्र॑श्च॒म॒द्ध्य॒ञ्चा॒न्त॑श्च॒प-
रा॒र्द्ध॑श्चै॒ता॒मे॑ऽअग्ग्न॒ऽइ॒ष्ट्ट॒का॒धे॒न॒व॑÷ सन्त्वमु॒त्रा॒मु॒ष्मिँ॑म्ल्लो॒के ॥६॥
व्वि॒॑॑व॑त॑श्च॒क्षु॒रु॒त॒व्वि॒॑॑व॑तो॑मु॒खो॒व्वि॒॑॑व॑तो॑बा॒हु॒रु॒त-
व्वि॒॑॑व॑त॑स्प्पात् ॥
सम्बा॒हु॒भ्या॒न्ध॒मति॒सम्पत॒त्रैद्द्या॒वा॒भू॒मी॑ज॒न॒य॒न्दे॒व॒ऽए॒क॑÷ ॥७॥

इति रुद्रे सप्तमोऽध्यायः ।

अथ रुद्रे अष्टमोऽध्यायः –

(रुद्रीपाठको आठौँ अध्याय)

हरिः ॐ ऋ॒चं॒व्वा॒चं॒म्प्र॒प॑द्ये॒ म॒नो॒ष॒जुं॑प्प्र॒प॑द्ये-
सा॒म॑प्प्रा॒ण॒म्प्र॒प॑द्ये॒ च॒क्षु॒ꣳ श्रोत्र॒म्प्र॒प॑द्ये ॥
व्वा॒गो॒ज॑÷ स॒हौ॒जो॒मयि॑प्प्राणापा॒नौ ॥ १ ॥
य॒न्न्मे॑च्छि॒द्र॒ञ्च॒क्षु॒षो॒ हृ॒द॒य॒स्य॒ म॒न॒स॒ो॒व्वा॒ति॒ तृ॒ण्ण॒-
म्बृ॒ह॒स्प्प॒ति॒र्म्मे॒ त॒द्द॒धा॒तु ॥
श॒न्नो॑ भव॒तु॒ भु॒व॒न॒स्य॒ य॒स्प्प॒ति॑÷ ॥ २ ॥

भूर्भुव॒ꣳस्व॑ः ÷ तत्त्स॑वि॒तुर्व्वरे॑ण्यम्भर्गो॑ दे॒वस्य॑धीमहि ॥
धियो॒ यो न॑ ÷ प्र॒चो॒द॒या॑त् ॥ ३ ॥
कया॑ नश्चि॒त्र आ भु॑वदू॒ती स॒दा॑वृधꣳसखा॑ ॥
कया॒ शचि॑ष्ठया॒ व्वृता ॥ ४ ॥
कस्त्वा॑ सत्यो॒मदा॑नाम्मꣳहि॒ष्ठो म॑त्स॒दन्ध॑सꣳ ॥
दृ॒ढा चि॑दा॒रुजे॒ व्वसु॑ ॥ ५ ॥
अ॒भी षु॑णः॒ सखी॑नामवि॒ता ज॑रि॒तॄणा॑म् ॥
शत॑म्भवास्यू॒तिभि॑ः ÷ ॥ ६ ॥
कया॒ त्वन्न॑ ऊ॒त्याभि॒ प्र म॑न्दसे॒ व्वृष॑न् ॥
कया॑स्तो॒तृभ्य॒ आभ॑र ॥ ७ ॥
इन्द्रो॒ व्वि॒श्व॑स्या॒ राजति ॥
शन्नो॑ अस्तु॒ द्वि॒पदे॒ शञ्च॒तु॒ष्प॒दे ॥ ८ ॥
शन्नो॑ मि॒त्र॒ ? शं व्वरु॑ण॒ꣳ शन्नो॑ भवत्वर्य॒मा ॥
शन्न॒ इन्द्रो॒ बृह॒स्पति॒ꣳ शन्नो॒ विष्णु॑रुरुक्र॒म॒ ? ॥ ९ ॥
शन्नो॒ व्वात॑ ÷ पवता॒ꣳ शन्न॒स्तप॑तु॒ सूर्य्य॑ ÷ ॥
शन्न॒ꣳ कनि॑क्क॒दद्दे॒व॒ ? प॒र्ज्ज॒न्यो॑ अ॒भि व॑र्षतु ॥ १० ॥
अहा॑नि॒ शम्भ॑वन्तु नः॒ शꣳ रात्री॒ꣳ प्रति॑धीयताम् ॥
शन्न॑ इन्द्रा॒ग्नी भ॑वता॒मवो॑भि॒ꣳ शन्न॒ इन्द्रा॒वरु॑णा रा॒तह॑व्या ॥
शन्न॑ इन्द्रापू॒षणा॒ व्वाज॑सातौ॒ शमि॑न्द्रा॒सोमा॑ सु॒वि॒ताय॒ शꣳ॑ योः ? ॥११॥
शन्नो॑ दि॒वीर॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑ ॥
शꣳ॑ योर॒भि स्र॑वन्तु नः॒ ॥ १२ ॥
स्यो॒ना पृ॑थिवि नो भवानृक्ष॒रा नि॒वेश॑नी ॥
यच्छा॑ नः॒ शर्म्म॑ स॒प्र॒थाः॒ ॥ १३ ॥

आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥
महेरणायचक्षसे ॥ १४ ॥
योव÷शिवतमोरसस्तस्यभाजयतेहन÷ ॥
उशतीरिवमातर÷ ॥ १५ ॥
तस्म्माऽअरङ्गमामवोयस्यक्षयायजिन्न्वथ ॥
आपोजनयथाचनꣳ ॥ १६ ॥
द्यौ?शान्तिरन्तरिक्षꣳशान्ति÷प्पृथिवीशान्तिरापꣳ
शान्तिरोषधयꣳशान्ति÷ ॥
वनस्पतयꣳशान्तिर्व्विश्वेदेवा?शान्तिर्ब्बह्म्मशान्तिꣳ
सर्व्वꣳशान्तिꣳशान्तिरेवशान्तिꣳसामाशान्तिरेधि ॥ १७ ॥
दृतेदृꣳहमामित्रस्यमाचक्षुषासर्व्वाणिभूतानिसमीक्षन्ताम् ॥
मित्रस्याहञ्चक्षुषासर्व्वाणिभूतानिसमीक्षे ॥
मित्रस्यचक्षुषासमीक्षामहे ॥ १८ ॥
दृतेदृꣳहमाज्योक्तेसन्दृशिजीव्यासञ्ज्योक्तेसन्दृशिजीव्यासम् ॥ १९ ॥
नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्च्चिषे ॥
अन्न्याँस्तेऽअस्म्मत्तपन्तुहेतय÷पावकोऽअस्म्मभ्यꣳ
शिवोभव ॥ २० ॥
नमस्तेऽअस्त्वविद्द्युतेनमस्तेस्तनयित्नवे ॥
नमस्तेभगवन्नस्तुयतꣳस्व÷समीहसे ॥ २१ ॥
यतोयतꣳसमीहसेततोनोऽअभयङ्कुरु ॥
शन्न÷कुरुपप्रजाभ्योभयन्नꣳपशुभ्य÷ ॥ २२ ॥

सुमित्रियान्नऽआपऽओषधयꣳसन्तुदुर्म्मित्रियास्तस्म्मै-
सन्तुयोस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्मः ॥ २३ ॥
तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥
पश्येमशरदः शतञ्जीवेमशरदः शतꣳशृणुयामशरदः
शतम्प्रब्ब्रवामशरदः शतमदीनाꣳस्यामशरदः
शतम्भूयश्चशरदः शतात् ॥ २४ ॥

॥ इति रुद्रे अष्टमोऽध्यायः ॥

हरिः ॐ स्वस्तिनऽइन्द्रोव्वृद्धश्रवाꣳस्वस्तिनः
पूषाव्विश्ववेदाꣳ ॥
स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिꣳस्वस्तिनोबृहस्पतिर्द्दधातु ॥१॥
विश्वानिदेवसवितर्द्दुरितानिपरासुव ॥
यद्भद्द्रन्तन्नऽआसुव ॥ २ ॥
नमः शम्भवायचमयोभवायचनमः
शङ्कायचमयस्कायचनमः शिवायचशिवतरायच ॥ ३ ॥
ॐ शान्तिः । ॐ शान्तिः । ॐ शान्तिः ॥

सद्योजातादिमन्त्रपाठः

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः । भवे भवेनाति भवे भवस्व मां भवोद्भवाय नमः ॥१॥
वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः । कालाय नमः कलविकरणाय नमो बलविकरणाय नमो ।
बलाय नमो बलप्रमथनाय नमः । सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥२॥
अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽअस्तु रुद्ररूपेभ्यः ॥३॥
तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥४॥
ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् । ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मेऽअस्तु सदाशिवोम् ॥५॥
ॐ हरहरहर महादेव ! महादेव !! महादेव !!! ॐ साम्बसदाशिवाय नमः ॥

शिवस्य विशेषपूजा

रुद्राष्टाध्यायोक्तविधिना उत्तराङ्ग पूजनम् (उत्तराङ्ग विशेष पूजा गर्ने)

(जलधाराको पञ्चामृत जल शिवजीमा स्नान गराउने र जलधारालाई घोप्ट्याई पूजा गर्ने)

पुनः संक्षेपेण पञ्चामृतस्नानं विधाय

वस्त्रम् – (शिवजीलाई वस्त्र चढाउने)

ॐ असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्यः सदृष्टो मृडयाति नः ॥
ॐ सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे । मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥
वस्त्रं समर्पयामि श्रीसाम्बसदा शिवाय नमः ।

यज्ञोपवीतम् – (जनै चढाउने)

ॐ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथोयेऽअस्य सत्वानोऽ हन्तेभ्यो करन्नमः ॥
नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् । उपवीतं चोत्तरीयं गृहाण परमेश्वर ॥ यज्ञोपवीतं सम० ।

चन्दनम् – (चन्दन चढाउने)

ॐ प्रमुञ्च धन्वनस्त्वमुभयो रात्न्योर्ज्याम् । याश्च ते हस्तऽइषवः पराता भगवो वप ॥
श्रीखण्डं चन्दनं दिव्यं गन्धाढचं सुमनोहरम् । विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥ चन्दनं सम० ।

अक्षतान् – (अक्षता चढाउने)

ॐ अक्षन्नमीमदन्त ह्यवप्रियाऽअधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी ॥
अक्षतांश्च सुरश्रेष्ठ कुंकुमाक्तान् सुशोभनान् । मया निवेदितान् भक्त्या गृहाण परमेश्वर ॥ अक्षतान् सम० ।

पुष्पाणि – (फूल माला चढाउने)

ॐ विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँऽउत । अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः ॥
माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो । मयाऽनीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥ पुष्पाणि सम० ।

बिल्वपत्राणि – (बेलपत्र चढाउने)

ॐ शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः । मा द्यावापृथिवीऽअभिशोचीर्म्मान्तरिक्षं मा वनस्पतीन् ॥
त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधम् । त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम् । बिल्वपत्रं सम० ।

धूपम् – (धूप बाल्ने)

ॐ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥
वनस्पतिरसोद्भूतो गन्धाढचो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ धूपमाघ्रापयामि ।

दीपम् – (वत्ती वालेर दर्शन गराउने)

ॐ परिते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथोयऽइषुधिस्तवारेऽअस्मन्निधेहि तम् ॥

आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यं तिमिरापहम् ॥ दीपं दर्शयामि ।

नैवेद्यम् – (नैवेद्य चढाउने)

ॐ अवतत्य धनुष्ट्वꣳसहस्राक्ष शतेषुधे । निशीर्य शल्यानाम्मुखा शिवो नः सुमना भव ॥

शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम् । उपहारं समानीतं नैवेद्यं प्रतिगृह्यताम् ॥ नैवेद्यं सम० ।

आचमनीयम् – (जल चढाउने)

एलोशीरलवङ्गादिकर्पूरादिसुवासितम् । प्राशनायाऽऽहृतं तोयं गृहाण परमेश्वर ॥ आचमनीयं सम० ।

ताम्बूलम् – (पान सुपारी चढाउने)

ॐ नमस्तऽआयुधायानाततताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ॥

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ (ताम्वूलं सम० ।

दक्षिणाम् – (भेटी पैसा चढाउने)

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ दक्षिणां सम० ।

नीराजनम् – (नीराजन बत्ती बाल्ने)

ॐ आ रात्रि पार्थिवꣳरजः पितुरप्रायि धामभिः । दिवः सदाꣳसि बृहती वितिष्ठसऽआ त्वेषं वर्तते तमः ॥

ॐ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च । त्वमेव सर्वज्योतीषि तेन नीराजयाम्यहम् ॥ नीराजनं सम० ।

कर्पूरार्तिक्यम् – (कपुर बत्ती बाल्ने, आरती गर्ने)

ॐ इदꣳहविः प्रजननम्मेऽअस्तु दशवीरꣳसर्वगणꣳस्वस्तये ।
आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि ।
अग्निः प्रजां बहुलाम्मे करोत्वन्नम्पयो रेतोऽअस्मासु धत्त ॥

कदलीगर्भसंभूतं घनसारं मनोहरम् । आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥ आरार्तिक्यं सम० ।

प्रदक्षिणाम् – (प्रदक्षिणा गर्ने)

ॐ मानो महान्तमुत मानोऽअर्भकम्मानऽउक्षन्तमुतमानऽउक्षितम् ।
मा नो वधीः पितरम्मोतमातरम्मानः प्रियास्तन्वो रुद्ररीरिषः ॥

यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥ प्रदक्षिणां सम० ।

इत्युपचारान्समर्प्य ।

पुष्पाण्यादाय बद्धाञ्जलिः प्रार्थयेत् – (फूल बेलपत्र लिएर नमस्कार गर्ने, पाती चढाउने)

ॐ मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
मा नो वीरानुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ।
नानासुगन्धिपुष्पाणि देशकालोद्भवानि च । पुष्पाञ्जलिं मयादत्तं गृहाण परमेश्वर ॥
आवाहनं न जानामि नजानामि विसर्जनम् । पूजां चैव न जानामि प्रसीद परमेश्वर ॥
विधिच्युतं भक्तिहीनमुपचारविवर्जितम् । यत्पूजितोऽसि भगवंस्तेनापीश प्रसीदसि ॥
ग्रहपीडाः प्राशाम्यन्तु भूतबाधा विनश्यतु । ज्वरादयोऽखिला रोगाः विनश्यन्तु त्वदीक्षया ॥
शिवशंकर विश्वात्मन् भूतेश्वर दयामय । भवत्स्मरणमात्रेण रक्ष नः पक्षवर्जितान् ॥
कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् । सदावसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ।
करचरणकृतं वाक्कायजं कर्मजं वा, श्रवणनयनजं वा मानसं वाऽपराधम् ।
विहितमविहितं वा सर्वमेतत् क्षमस्व, जयजयकरुणाब्धे । श्रीमहादेव ! शम्मो ! ॥
इति क्षमापयेत् । क्षमाप्रार्थना पुरः सरं मन्त्रपुष्पाञ्जलिं सम० ।

इति

उत्तराङ्गकर्म

पूर्णपात्रदानं (पेज नं. ४३) (पूर्णपात्र दान गर्ने)

दक्षिणासङ्कल्प (पेज नं. ४६) (दक्षिणासङ्कल्प गर्ने)

भोजन अमान्न सङ्कल्प (पेज नं. ४७) (सिदासङ्कल्प गर्ने)

अर्घ्यनिवेद्य (पेज नं. ४७) (अर्घ्य निवेदन गर्ने)

कर्मेश्वरार्पणम् (विसर्जनम्) (पेज नं. ४७) (वरिपरि पूजा गर्ने र विसर्जन गर्ने)

अथाभिषेकः (पेज नं. ४८) (अभिषेक गर्ने)

कुलपितृइष्टदेवता पूजनम् (पेज नं. ४८) (कुल, पितृ र इष्टदेवतालाई प्रसाद चढाउने)

प्रसादवितरणम् (पेज नं. ४८) (प्रसाद वितरण गर्ने)

आचार्यपूजनमन्त्रा (पेज नं. ४८) (आचार्यलाई पूजा गर्ने र दक्षिणा दिने)

षोडशसंस्कार पद्धति (गर्भाधान जातकर्मादि)

गर्भाधान जातकर्म (गर्भाधान जातकर्म, छैटौँ दिनदेखि छौर (मुण्डन) र गुन्यू चोलीसम्मको संस्कार)

रजस्वला भएको एघारौँ, तेह्रौँ दिन ८, १४, १५, ३० तिथि आमा बुबाको श्राद्ध, रातको पहिलो र चौथो प्रहर छोडेर जुठो सूतक नपरेको वेलामा कुलाचार अनुसार पूजा आदि गरेर बिजोर राति (१५,१७) छोरी र जोर राति (१४, १६) छोराको लागि गर्भाधान गरिन्छ भने जन्मिएको दिनको खुसी मनाउँदै पूजा गरेर सुनदान, दक्षिणादान गरेर जातकर्म संस्कार गर्नुपर्दछ। गर्भाधान, पुंसवन, सीमन्तोन्नयन, जातकर्म, नामकरण, निष्क्रमण, अन्नप्राशन, कर्णवेध, विद्यारंभ, चूडाकर्म, उपनयन, वेदारम्भ, केशान्त, समावर्तन, विवाह, अन्त्येष्टिकर्म यी सबै षोडश संस्कारहरू आ-आफ्नो चलनअनुसार गरेर पछि अग्निस्थापना अनुसार गरिन्छ।

षष्ठीपूजन कर्म (छैठी) (छैटौँ दिन गरिने पूजा)

छैटौँ दिन सूर्यास्त भएपछि बच्चाको शिरतर्फ षष्ठीदेवी र मार्कण्डेयादि अष्ट चिरञ्जीवीहरूको पूजा गर्ने, बालकलाई मह चटाएर जिब्रामा महले ॐ लेखिदिने रातभरि बत्ती बालिदिने, सिरानमा कलम कापी राखिदिने र अरू सबै अग्निस्थापना अनुसार गरेर षष्ठी पूजनकर्म गरिदिनु पर्दछ।

नामकरण संस्कार

न्वारान गर्दा ११ दिनभन्दा अरू दिन गर्नु परे हवन जुराउनु पर्दछ। ११ दिनमा दियो कलश र गणेशको पूजा गरी ब्राह्मणवरण गरी पुन्याहवाचन हवन गरी षण्डामर्कहवन पनि गर्नु पर्दछ र बच्चालाई पश्चिम फर्काई, ब्राह्मणले पूर्व फर्की पीपल वा केराको पातमा नाम लेखी बच्चाको दाहिने कानमा तीन पटक सुनाउनु पर्दछ।

॥ श्रीगणेशाय नमः ॥

नामकरणसंस्कारः

अग्निस्थापनविधिमनुसृत्य वनस्पत्यन्तहवनम् – (अग्निस्थापना अनुसार गर्ने)

षण्डामर्कहवनम् – (कनिका, अक्षता, सर्स्यूं, भलायोले हवन गर्ने)

जन्मदिनादारभ्य दशदिनपर्यन्तस्य दिनसंख्यया प्रतिदिनमाहुतिद्वयक्रमेण षण्डामर्का, आलिखन, इति द्वाभ्यां मन्त्राभ्यां तण्डुलकणमिश्रसर्षपान् जुहुयात् – (विनियोग गर्ने)

ॐ षण्डामर्कौ इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः शण्डामर्को देवता फलीकरणमिश्रसर्षपहोमे विनियोगः।

ॐ षण्डामर्का उपवीरः शौण्डिकेय उलूखलः। अलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा।

इदं षण्डामर्काय, उपवीराय, शौण्डिकेयाय उलूखलाय, मलिम्लुचाय, द्रोणेभ्यश्च्यवनाय न मम। (विनियोग गर्ने)

ॐ आलिखिन्निति प्रजापतिऋषिस्त्रिष्टुप्छन्द आलिखतादेवता फलीकरणमिश्रसर्षपहोमे विनियोगः ।

ॐ आलिखन्ननिमिषः किंवदन्त उपश्रुतिः । हर्यक्षः कुम्भी शत्रुः पात्रमाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणिच्यवनो नश्यतादितः स्वाहा ॥

इदमालिखतेऽनिमिषाय किंवदद्भ्य उपश्रुतये हर्यक्षाय कुम्भीशत्रवे पात्रपाणये नृमणये हन्त्रीमुखाय सर्षपारुणाय च्यवनाय न मम । इति ।

नामकरणम् (नामश्रावणम्) – (श्री स्वस्ति श्रीमन्मङ्गलमूर्तये नमः श्री .... नाम वालको (बालीका) दीर्घायुर्भूयात् । लेख्ने र सङ्कल्प गर्ने)

ॐ अद्येत्यादि देशकालौ स्मृत्वाऽहम्, अस्य शिशोर्बीजगर्भसमुद्भवैनोनिर्बर्हणायुरभिवृद्धिव्यवहारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थंनामकरणंकरिष्ये।इतिप्रतिज्ञाय–पिप्पलपत्रद्वयेसुवर्णशलाकयाचन्दनादिनाजन्मनक्षत्रपादप्रयुक्ताक्षरादि

नाम लिखित्वा – (दुईवटा पीपलको पातमा लेखेको नाम, थालमा चामल, फलफूल र भेटी राख्ने)

अस्य शिशोर्बह्वायुष्यप्राप्त्यर्थं नामदेवतापूजनं करिष्ये, इति सङ्कल्प्यः ॐ मनो जूतिरिति प्रतिष्ठाप्य, ॐ नामदेवताभ्यो नमः । इति षोडशोपचारैः, सम्पूज्य स्वदक्षिणस्थमातुरूत्सङ्गस्थस्य शिशोर्दक्षिणे कर्णे अङ्गादङ्गात् प्रभवसि हृदयादाभिजाय । आत्मा वै पुत्रनामासि त्वं जीव शरदां शतम् । इति मन्त्रं पठित्वा – हे कुमार । कुमारी चेत् हे कुमारि ? इति । (नाम सुनाउने)

त्वम् अमुकशर्मा असि दीर्घायुर्भव इति नाम श्रवयेत् । क्षत्रियश्चेत् – (अमुकवर्मा) इति ।

वैश्यश्चेत् – (अमुकगुप्त) इति ।

उत्तराङ्गकर्म – (अग्निस्थापना अनुसार गर्ने)

सूर्यपूजनं दर्शनं च – (गोवरको कुण्ड बनाई सूर्यको पूजा गरी दर्शन गराउने, पाउ टेकाउने र अग्निमा घुमाउने पनि चलन छ)

कर्णवेध संस्कार

(कान छेड्ने)

एक महिना, दुई महिना अथवा ६, ७ र ८ महिनासम्ममा शुभ दिन हेरी आ-आफ्नो संस्कृति अनुसार शुभ मुहूर्तमा पूजा गरेर कर्णवेध संस्कार गर्नुपर्दछ ।

अन्नप्राशन (पास्नी)

छोराको ६ या ८ महिना, छोरीको ५ या ७ महिनामा शुभ दिन हेरी आ-आफ्नो संस्कृति अनुसार शुभमुहूर्तमा पूजा गरेर शुभ वेलामा अन्नप्राशन (पास्नी) गराउनु पर्दछ र अरू सबै अग्निस्थापना अनुसार गर्नुपर्दछ ।

चूडाकरण (छोराको छेवर (क्षौर) र छोरीको गुनिउँ चोली संस्कार)

छोरा भए व्रतवन्ध भन्दा अगाडि चूडाकरण क्षौर र छोरी भए रजस्वला हुनुभन्दा पहिले नै गुनिउँ चोली संस्कार आ-आफ्नो संस्कृति अनुसार शुभ दिन हेरी शुभ मुहूर्तमा शुभ वेला पारेर पूजा गरेर अग्निस्थापना अनुसार हवन समेत गरेर गर्नुपर्दछ ।

मातृकापूजा

पञ्चगव्यप्राशनविधिः (पेज नं. ३)	(पञ्जगव्य खाने)
आशन शुद्धी (पेज नं. ४)	(आशन शुद्धि गर्ने)
आचमनम्: (पेज नं. ४)	(आचमन गर्ने)
कर्मपात्रनिर्माणविधिः (पेज नं. ४)	(कर्मपात्र वनाउने)
सर्षप देवयजन भूमौ विकिरेत् (पेज नं. ५)	(सर्स्यूं छर्ने)
स्वस्तिवाचनम्: (पेज नं. ७)	(रेखी हाल्ने)
प्रतिज्ञा सङ्कल्प (पेज नं. ७)	(प्रतिज्ञासङ्कल्प गर्ने)
तत्रादौ गोपूजनम् (पेज नं. ८)	(गोदान गर्ने)
अथ स्वस्तिवाचनम् (पेज नं. १०)	(स्वस्तिवाचन गर्ने)
अर्घस्थापनम् (पेज नं. २०)	(अर्घ वनाउने)
अथ ब्राह्मणवरणम् (पेज नं. २३)	(वरण गर्ने)
अथ पुण्याहवाचनम् (पेज नं. २४)	(पुण्याहवाचन गर्ने)
अथ दीपकलशगणेश पूजा (पेज नं. २६–२९)	(दियो, कलश, गणेश पूजा गर्ने)
अथ रक्षाबन्धनपूजा (पेज नं. २९)	(रक्षावन्धन पूजा गर्ने)
ततः कलशस्कन्धप्रदेशे (पेज नं. ३०)	(नवग्रह पूजा गर्ने)
पुस्तक प्रार्थना (पेज नं. ३०)	(पुस्तकपूजा र प्रार्थना गर्ने)

मातृकास्थापनप्रकारो यथा – (पिर्कामा गोबर, दुबो टाँसी बनाउने)

नवीनकाष्ठपीठस्य प्रथमपङ्क्तौ –

अदित्यादि-सप्तदश-गोमय-मातरः स्थापनीयाः	१७	(मातृका बनाउने विधि)
द्वितीयपङ्क्तौ– गौर्य्यादि दशतोरणमातरः स्थापनीयाः	१०	
तृतीये – नन्दादिसप्तद्वारमातरः स्थापनीयाः	७	
चतुर्थे – गौर्य्यादिषोडशमातरः स्थापनीयाः	१६	
पञ्चमपंक्तौ – ब्राह्म्यादिसप्तमातरः स्थापनीयाः	७	
	५७	

प्रतिज्ञासङ्कल्पः (प्रतिज्ञासङ्कल्प गर्ने, दियो, कलश, गणेश पूजा गर्ने र गोदान गरी मातृका पूजा गर्ने)

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ अद्य पूर्वोच्चारितसङ्कल्पसिद्धिरस्तु... अमुकगोत्रः अमुकप्रवरः अमुकवेदशाखाध्यायी समस्तवर्गादिभिः सहितअमुकशर्माहं (वर्माहं, गुप्तोऽहं वा) मम श्रुतिस्मृतिपुराणोक्तफलप्राप्तये करिष्यमाण अमुककर्मणो निर्विघ्नतासिद्धये सर्वाभ्युदय प्राप्तये च अमुककर्मणः पूर्वाङ्गत्वेन यथालब्धोपचारैः दीपकलशगणेशपूजनपूर्वकं पीठे स्थापितानां लिखितानां वा अदित्यादीनां मातृणां पूजनम् आभ्युदयिकश्राद्धञ्च अहं करिष्ये । इति प्रतिज्ञाय प्रायश्चित्तगोदानं कृत्वा दीपादीन् संपूज्य मातृणां पूजनं कुर्यात् ।

मातृकापूजा प्रयोगः (मातृकापूजा प्रयोग)

प्रक्षालितकरचरणौ पूर्वाभिमुखो यजमानः कुशहस्तः प्रथमं गोमयसप्तदशपुञ्जेषु पूजयेत् –

सङ्कल्पः (सङ्कल्प गर्ने)

ॐ अद्येह देशकालौ स्मृत्वा ममेप्सितामुक इष्टकामनासिद्धये तत्प्रतिबन्धदुरितोपशमनाय मृत्तिकामङ्गलत्वेन श्रीविनायकपूजनपूर्वकम् अदित्यादिसप्तदश-गोमयमातृदेवपूजनमहङ्करिष्ये ।

आदौ विनियोगः (विनियोग गर्ने)

ॐ कारस्य ब्रह्माऋषिर्दैवी गायत्री छन्दः परमात्माग्निर्देवता सर्वकर्मारम्भे विनियोगः ।

पुनश्च

ॐ भूर्भुवः स्वरिति महाव्याहृतीनां जमदग्नि-भरद्वाज-भृगव ऋषयोऽग्निवायुसूर्यदेवता, उष्णिक्–दैवी–बृहत्यश्छन्दांसि गणपत्याद्यावाहने विनियोगः । ततः गणानान्त्वेति... मन्त्रेण पुनः गणेशं संपूज्य वक्रतुण्डेति प्राथयेत् ।

(विनियोग गरेर पुनः गणेशको पूजा गरी प्रार्थना गर्ने)

प्राणप्रतिष्ठा (प्राण प्रतिष्ठा गर्ने)

ततः सप्तदशगोमयपिण्डेषु स्पृशन् प्रतिष्ठां कुर्यात् – (फूल, अक्षता र चन्दन लिएर छुने)

तद्यथा

हरि÷ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्प्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं य्यज्ञꣳसमिमन्दधातु ।
व्विश्श्वेदेवासऽइहमादयन्तामोँ ३॥ प्रतिष्ठा ॥ ॥ इति प्रतिष्ठाप्य ॥

आवाहनपूर्वकपूजनम् (आवाहन गरी पूजा गर्ने)

ॐ भूर्भुवः स्वः अदित्यादिसप्तदशगोमयमातर इहागच्छत इहतिष्ठत इत्यावाहनम् ।

अदितिर्देवमाता च स्वाहा सिद्धिः सरस्वती । कीर्तिलक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥
बुद्धिर्लज्जा वपुः शान्तिरेता गोमयमातरः ॥

ततः पाद्यादिभिः पूजनम्। तद्यथा

ॐ अदित्यै नमः। ॐ देवमात्रे नमः। ॐ स्वाहायै नमः। ॐ सिद्धयै नमः। ॐ सरस्वत्यै नमः।
ॐ कीर्त्यै नमः। ॐ लक्ष्म्यै नमः। ॐ धृत्यै नमः। ॐ मेधायै नमः। ॐ पुष्ट्यै नमः। ॐ श्रद्धायै नमः।
ॐ क्रियायै नमः। ॐ मत्यै नमः। ॐ बुद्धयै नमः। ॐ लज्जायै नमः। ॐ वपुषे नमः। ॐ शान्त्यै नमः।
ततः कलशे गणपतेः दुर्गायाः, वायोः, आकाशस्य अश्विनीकुमारयोश्च पञ्चोपचारैः पूजयेत्।

अथ गौर्य्यादिदशतोरणमातृणां पूजनम्

(पूजा गर्न सङ्कल्प गर्ने)

ॐ अद्येत्यादि देशकालौ स्मृत्वा ममामुकाभिष्टकामनासिद्धयर्थं गौर्य्यादिदशतोरणमातृपूजनमहं करिष्ये।
इति सङ्कल्प्य।
ॐ भूर्भुवः स्वः गौर्य्यादिदशतोरणमातर इहागच्छत इह तिष्ठत इत्यावाह्य पूजयेत्। (आवाहन गरी पूजा गर्ने)
तद्यथा

ॐ गौरी च धनदा नन्दा मङ्गला विमला बला। गङ्गा च यमुना धात्री विधात्री तोरणाम्बिका॥

ॐ गौर्यै नमः। ॐ धनदायै नमः। ॐ नन्दायै नमः। ॐ मङ्गलायै नमः।
ॐ विमलायै नमः। ॐ बलायै नमः। ॐ गङ्गायै नमः। ॐ यमुनायै नमः।
ॐ धात्र्यै नमः। ॐ विधात्र्यै नमः।

द्वार-मातृपूजा

(पूजा गर्न सङ्कल्प गर्ने)

ॐ अद्येत्यादि देशकालमुच्चार्य ममामुकाभीष्टकामनासिद्धयर्थं निर्विघ्नपरिसमाप्त्यर्थं च नन्दादिसप्तद्वारमातृपूजनमहं करिष्ये। इति सङ्कल्प्य।
ॐ भूर्भुवः स्वः नन्दादिसप्तद्वारमातरः इहागच्छत इह तिष्ठत इत्यावाह्य पूजयत्। ताश्च (आवाहन गरी पूजा गर्ने)

नन्दा नन्दिनी वाशिष्ठी वसुदेवा च भार्गवी। जया च विजया चैव सप्तैता द्वारमातरः॥

ॐ नन्दायै नमः। ॐ नन्दिन्यै नमः। ॐ वाशिष्ठयै नमः। ॐ वसुदेवायै नमः। ॐ भार्गव्यै नमः।
ॐ जयायै नमः। ॐ विजयायै नमः।

गौर्य्यादिषोडशमातृपूजा

(पूजा गर्न सङ्कल्प गर्ने)

ॐ अद्येत्यादि देशकालौ स्मृत्वा अद्य कर्तव्यामुककर्म निर्विघ्नतया समाप्त्यर्थम् तदङ्गत्वेन गणेश-दुर्गा-सूर्यादिनवग्रहान् गौर्य्यादिषोडश मातृः, ब्राह्म्यादि सप्त मातृः पूजनं चाहं करिष्ये। कलशे गणेशादीन् संपूज्य –
ॐ भूर्भुवः स्वः गौर्य्यादयो मातरः इहागच्छत इह तिष्ठत इत्यावाहच पूजयेत्। तद्यथा (आवाहन गरी पूजा गर्ने)

गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः।
धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता।

ॐ गौर्य्यै नमः । ॐ पद्मायै नमः । ॐ शच्यै नमः । ॐ मेधायै नमः । ॐ सावित्र्यै नमः । ॐ विजयायै नमः ।
ॐ जयायै नमः । ॐ देवसेनायै नमः । ॐ स्वधायै नमः । ॐ स्वाहायै नमः । ॐ मात्रे नमः । ॐ लोकमात्रे नमः ।
ॐ धृत्यै नमः । ॐ पुष्ट्यै नमः । ॐ तुष्ट्यै नमः । ॐ आत्मनः कुलदेवतायै नमः ।

अथ ब्राह्म्यादिसप्तमातरः (भित्तौ घृतधारामातरः)

(आवाहन गरी पूजा गर्ने)

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही च तथेन्द्राणी चामुण्डा सप्तमातरः ॥

ॐ ब्राह्म्यै नमः । ॐ माहेश्वर्यै नमः । ॐ कौमार्यै नमः । ॐ वैष्णव्यै नमः । ॐ वाराह्यै नमः । ॐ इन्द्राण्यै नमः ।
ॐ चामुण्डायै नमः । इति संपूज्य धूपदीपनैवेद्यादिकमलङ्कारसौभाग्यद्रव्याणि च समर्प्य स्वाचारात् सपत्नीको यजमानः
पक्वान्नं शिरसि निधाय वसोर्धारां प्रतीच्छेत् ।

(धूपवत्ती बाल्ने, नैवेद्य, सौभाग्य र वस्त्र चढाउने)

वसोर्धारा तत्र मन्त्राः

(सातओटा गोबर भित्तामा टाँसी घिउको धारा यजमानको शिरमा लगाउने)

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥
ॐ ताꣳसवितुर्वरिण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम् ।
यामस्या कण्वोऽअदुहत् प्रपीनाꣳसहस्रधारां पयसा महीङ्गाम् ॥
कण्वो हेमां ददर्श साहस्मै सहस्रधाराः सर्वान् कामान् दुदुहे ।
(तथैवैतद्यजमानाय सहस्रधाराः सर्वान्कामान्दुदुहे) । इति ॥

ततः


ॐ द्यौ शान्तिरिति पुनस्त्वेति च जपेत् प्रणमेच्च ।

अच्युतस्मरणम्

(अच्युताय नमः ३ पटक भन्ने र ढोग्ने)

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ॐ अच्युताय नमः ३ इति स्मरेत् ।



॥ इति मातृकापूजा ॥

आभ्युदयिकश्राद्धम्

अथ प्रयोगः (ब्राह्मणहरू :– मातृ १, पितृ १, मातामह १, विश्वेदेवा १ = ४ ऋषि राख्ने)

ततः कर्ता प्रक्षालितपाणिपादाचान्तः प्राङ्मुखः उदङ्मुखो वा शुद्धासने उपविश्य दीपं प्रज्वाल्य संपूज्य च, कर्मपात्रङ्कृत्वा ॐ अपवित्रः पवित्रो वा... इत्यादि मन्त्रेण श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत्।

(शुद्ध आसनमा बसी कर्मपात्र बनाउने र गोदान गरेर दियो वाली पूजा गर्ने)

प्रतिज्ञासङ्कल्पः (कुश जल लिने)

ॐ अद्यामुकगोत्राणां मातृ-पितामही-प्रपितामहीनाममुकामुकामुकदेवीनां नान्दीमुखीनां तथा अमुकगोत्राणां पितृ-पितामह-प्रपितामहानाममुकामुकामुक-शर्मणां नान्दीमुखानां तथा अमुकगोत्राणां मातामह-प्रमातामह-वृद्धप्रमाता-महानाममुकामुकामुकशर्मणां सपत्नीकानां नान्दीमुखानां वसुसत्य संज्ञकविश्वेदेवपूर्वकाणाममुककर्माङ्गतया आभ्युदयिकश्राद्धमेभिर्द्रव्यैरहं करिष्ये। इति सङ्कल्पं कृत्वा त्रिर्गायत्रीं जपेत्।

ततः प्रार्थना

(नमस्कार गर्दै तीनपटक ढोग्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥

॥ इति त्रिर्जपेत् ॥

दिग्बन्धनम्

यवकुशानादाय (कुश लिई जौ वरिपरि छर्ने)

ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम्। अपहताऽअसुरा रक्षाꣳसि व्वेदिषदः॥

ॐ तथा बर्हिषदः पान्तु याम्यां ये पितरः स्थिताः। अपहताऽअसुरा रक्षाꣳसि व्वेदिषदः॥

ॐ प्रतिचीमाज्यपास्तद्वदपहताऽअसुरारक्षाꣳसि व्वेदिषदः। ॐ उदीचीमपि सोमपाः। अपहताऽअसुरारक्षाꣳसि व्वेदिषदः। ॐ ऊर्ध्वतस्त्वर्यमारक्षेत्कव्यवाडनलोऽप्यधः। अपहताऽअसुरारक्षाꣳसि व्वेदिषदः॥ ॐ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः। सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे॥ इति पूर्वादिदिक्षु यवान् विकिरेत्। (भुइँमा र आकाशतिर पनि सेचन गर्ने)

नीविबन्धनम्

(कुश र फूल कम्मरमा सिउरिने)

ॐ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि।
त्वं वनेभ्यस्त्वमौषधीभ्यस्त्वन्नृणान्नृपतेजायसेशुचिः॥

इति मन्त्रेण दक्षिणकट्यां नीवीमारोपयेत्।

आसनम् (मातृ १, पितृ १, मातामह १, विश्वेदेवा ४ ओटा ऋषि राखी जौ, कुश, जल लिने र राख्ने)

ॐ अद्येहामुकसगोत्राणां मातृपितामहीप्रपितामहीनाममुकामुकामुकदेवीनां नान्दीमुखीनां तथा अमुकसगोत्राणां पितृपितामहप्रपितामहानां अमुकामुकामुकशर्मणां नान्दीमुखानां तथा अमुकसगोत्राणां मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां नान्दीमुखानामाभ्युदयिक-श्राद्धे श्राद्धसम्बन्धिनां वसुसत्यसंज्ञकविश्वेषां देवानामिदमासनं वो नमः ॥

(३ ओटा कुश मातृपट्टिको पहिलो मातृ ऋषिमा राख्ने)

ॐ अद्येहामुकसगोत्राणांमातृ-पितामही-प्रपितामहीनामुकामुकामुकीदेवीनांनान्दीमुखीनामाभ्युदयिक-श्राद्धे इदमासनं (इमान्यासनानि वा) युष्मभ्यं नमः । (३ ओटा कुश पितृपट्टिको दोस्रो ऋषिमा राख्ने)

(एकवचने तु ते नमः)

ॐ अद्येहामुकसगोत्राणांपितृ-पितामह-प्रपितामहानाममुकामुकामुकशर्मणांनान्दीमुखानामाभ्युदयिक-श्राद्धे इदमासनं युष्मभ्यं नमः ॥ (३ ओटा कुश पितृपितामहादि तेस्रो ऋषिमा राख्ने)

ॐ अद्येहामुकसगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीका-नामाभ्युदयिकश्राद्धे इदमासनं युष्मभ्यं नमः ॥ (३ ओटा कुश मातामहादि ऋषिमा राख्ने)

ऋज्वमूलकुशरूपमासनं सर्वेभ्यो दद्यात् । ततो गन्धाक्षतपुष्पताम्बूलवस्त्रादिभिः समभ्यर्च्य धूपदीपनैवेद्यं च कारयेत् ।

(चन्दन, अक्षता, फूल, सुपारी, वस्त्र, भेटी पितृ ३ ऋषिलाई चढाई धूपवत्ती गर्ने र नैवेद्य चढाउने)

अर्पणम्

यवकुशजलान्यादाय (जौ, कुश र जल लिने)

ॐ अद्येहामुकसगोत्राणां मातृपितामहीप्रपितामहीनाममुकामुकामुकीदेवीनां नान्दीमुखीनां तथा अमुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां नान्दीमुखानां तथा अमुकसगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकामुकशर्मणां सपत्नीकानां नान्दीमुखानां श्राद्ध-सम्बन्धिनो वसुसत्यसंज्ञकविश्वेदेवा एतान्यर्चनविधौ गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूल-द्रव्य-यज्ञोपवीतवस्त्राणि वो नमः ॥ (जौ र कुश विश्वेदेवा ऋषिमा राख्ने)

पुनश्च (जौ, कुश र जल लिने)

ॐ अद्येहामुकसगोत्रामातृपितामहीप्रपितामह्यः अमुकामुकामुकीदेव्यः नान्दीमुख्य आभ्युदयिकश्राद्धे एतान्यर्चनविधौ गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतद्रव्यवासांसि युष्मभ्यं नमः ॥

(जौ र कुश मातृऋषिमा राख्ने)

पुनः यवकुशजलान्यादाय- (पितृ ऋषिलाई पूजा गरी जौ, कुश, जल लिने र राख्ने)

ॐ अद्येहामुकसगोत्राः पितृपितामहप्रपितामहाः अमुकामुकामुकशर्माणः नान्दीमुखाभ्युदयिकश्राद्धे एतान्यर्चनविधौ गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतद्रव्यवासांसि युष्मभ्यं नमः ॥

पुनश्च- (मातामह ऋषिलाई पूजा गरी जौ, कुश, जल लिने)

ॐ अद्येहामुकसगोत्रा मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकामुकशर्माणः सपत्नीकाः नान्दीमुखाभ्युदयिकश्राद्धे एतान्यर्चनविधौ गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीत-द्रव्यवासांसि युष्मभ्यं नमः ॥

भूस्वामी (एक भाग सिदा राखी जौ, कुश र जल लिएर छुने)

यवघृतमधुजलयुतमन्नं कुशादिकमादाय-इदमामान्नं सजलमेतद्भूस्वामिपितृभ्यो नमः ॥

अन्नसङ्कल्पः (विश्वेदेवापट्टि सिदा राख्ने)

तत्र प्रथमं विश्वेदेवानामुत्तानाभ्यां पाणिभ्यां देवपात्रमालभ्य- (हातले सिदालाई ढाक्ने)

ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ॥

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पा꣡ꣳसुरे ॥

कृष्णकव्यमिदं रक्ष मदीयम् ॥ (सिदालाई देखाउने)

ॐ इदमन्नम्। ॐ इमा आपः। ॐ इदमाज्यम्।

ॐ इदं हविः। एतान्युपकरणानीति दक्षिणाङ्गुष्ठमारोप्य "ॐ यवोसियवयास्मद्वेषोयवयाराती रिति यवान् विकीर्य कुशादिकमादाय- (सिदाको वरिपरि जौ छर्ने र कुश, जल लिई सिदा छुने)

ॐ अद्येहामुकसगोत्राणां मातृपितामहीप्रपितामहीनाममुकामुकामुकदेवीनां नान्दीमुखीनां तथा अमुकसगोत्राणां पितृपितामहप्रपितामहानामुकामुकामुकशर्मणां नान्दीमुखानां तथा अमुक सगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकशर्मणां सपत्नीकानां नान्दीमुखानां श्रद्धासम्बन्धिभ्यो वसुसत्यसंज्ञकेभ्यो विश्वेभ्यो, देवेभ्यो इदमन्नं सजलं सोपस्करं वो नमः ॥

पूर्ववत् पात्रालम्भनादिकं कृत्वा- (पहिलेजस्तै गरी सिदा सङ्कल्प मातृऋषिपट्टि गर्ने)

ॐ अद्येहामुकसगोत्राभ्यः मातृपितामहीप्रपितामहीभ्यः नान्दीमुखीभ्य आभ्युदयिकश्राद्धे इदमन्नं सजलं सोपस्करं युष्मभ्यं नमः ॥ (पृथक् पृथक् गर्दा (गोत्रायै देव्यै) भन्ने)

पृथक् पृथ्क करणे तु ॐ अद्येहामुकसगोत्रायै अस्मन्मात्रेऽमुकीदेव्यै नान्दीमुख्यै इति वाक्यं प्रयोजनीयम् ॥

पुनः पूर्ववत् पात्रालभ्भनादिकं कृत्वा- (सिदा सङ्कल्प पितृऋषिपट्टि गर्ने)

ॐ अद्येहामुकसगोत्रेभ्यः पितृपितामहप्रपितामहेभ्योऽमुकामुकामुकशर्मभ्यो नान्दीमुखेभ्य आभ्युदयिक-श्राद्धे इदमन्नं सजलं सोपस्करं युष्मभ्यं नमः।

पूर्ववत् पात्रालभ्भनादिकं कृत्वा (मातामह ऋषिपट्टि सिदा सङ्कल्प गर्ने)

ॐ अद्येहामुकसगोत्रेभ्यः मातामहप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यो नान्दीमुखेभ्य आभ्युदयिकश्राद्धे इदमन्नं सजलं सोपस्करं युष्मभ्यं नमः । गायत्रीं जप्त्वा प्रार्थयेत् । (गायत्री जप्ने)

प्रार्थना

(नमस्कार गर्ने)

ॐ अन्नहीनं क्रियाहीन विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु श्रीभास्करस्य प्रसादतः ॥

नमस्तुभ्यं विरुपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥

ॐ मधुवाताऽऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥

ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳरजः । मधु द्यौरस्तु नः पिता ॥

ॐ मधुमान्नो वनस्पतिर्मधुमाँ २ऽ अस्तुसूर्यः ।

माध्वीर्गावो भवन्तु नः ॥ ॐ मधु मधु मधु इति । ततः पुरुषसूक्तादिकं च पठेत् ।

विकिरदानम् (केचिन्नैव कुर्वन्ति)

(भूमिमा कुश, जल राख्ने)

ततः प्रागग्रकुशायां भूमौ कुशयवजलान्यादाय

ॐ असंस्कृतप्रमीतानां त्यागीनां कुलयोषिताम् । उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ।

कुशरुपमासनमास्तृतकुशत्रयोपरि उत्सृजेत् ॥ (कुशमाथि विकर राख्ने)

अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम । भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥

दत्तासनकुशोपरि तदन्नं विकिरेत् । ततः आचम्य हरिं स्मरेत् । ततः कुशदूर्वादलं गृहीत्वा भूमौ

(आचमन गरी हरिहरि भन्ने)

ॐ सुप्रोक्षितमस्तु ॥ ॐ शिवा आपः सन्तु । इति जलम् । (ब्राह्मणमा जल, फूल, अक्षता चढाउने)

ॐ सौमनस्यमस्तु । इति पुष्पम् । ॐ अक्षतं चारिष्टमस्तु ।

इति अक्षतानन्नपात्रेषु (ब्राह्मणकरे) निक्षिप्य । (यहाँ अघि सिउरिएको फूल र कुश निकालिदिने)

अक्षयोदकम्

(मातृऋषिलाई अक्षयोदक निमित्त सङ्कल्प गर्ने)

सजलयवकुशत्रयमादाय

ॐ अद्येहामुकसगोत्रा मातृपितामहीप्रपितामह्योऽमुकामुकामुकीदेव्यो नान्दीमुख्यः आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयन्ताम् ।

पुनः यवजलकुशान्यादाय (पितृऋषिलाई सङ्कल्प गर्ने)

ॐ अद्येहामुकसगोत्राः पितृपितामहप्रपितामहामुकामुकामुकशर्माणो नान्दीमुखाः आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयन्ताम् ॥

पुनश्चः (मातामह ऋषिलाई सङ्कल्प गर्ने)

ॐ अद्येहामुकसगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकामुकशर्मणः सपत्नीकाः नान्दीमुखाः आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयन्ताम् ॥

ततः प्राङ्मुखोऽञ्जलिं बध्वा आशिषः प्रार्थयेत्-

आशिषः प्रार्थना

(नमस्कार गरी आशीष माग्ने)

ॐ गोत्रन्नो वर्धताम् । ॐ वर्धताम् । ॐ दातारोनोऽभिवर्धन्ताम् । ॐ वर्धन्ताम् ।
ॐ वेदाः सन्ततिरेव च । ॐ सन्तु । ॐ श्रद्धा च नो मा व्यगमत् । ॐ मागात् ।
ॐ बहुदेयं च नोऽस्तु । ॐ अस्तु । ॐ अन्नं च नो बहु भवेत् । ॐ भवतु ।
ॐ अतिथींच लभेमहि । ॐ लभध्वम् । ॐ याचितारश्च नः सन्तु ।ॐ सन्तु ।
ॐ मा याचिष्म कञ्चन । ॐ मा याचेथाः । ॐ एताः सत्याआशिषः सन्तु । ॐ सन्तु ।

ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात्- (ब्राह्मणले कर्तालाई टीका लगाइदिने)

ॐ यं कामं कामयते सोऽस्मै कामः समृद्धचताम् ।

दक्षिणादानम्

(विश्वेदेवा ऋषिलाई दक्षिणा सङ्कल्प गर्ने)

ॐ अद्येहामुकसगोत्राणां मातृपितामहीप्रपितामहीनाममुकामुकामुकीदेवीनां नान्दीमुखीनां तथा अमुकसगोत्राणां पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां नान्दीमुखानां तथा अमुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां नान्दीमुखानां आभ्युदयिकश्राद्धसम्बन्धिनां वसुसत्यसंज्ञकानां विश्वेषां देवानां कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थं इमानि द्राक्षामलक फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं विष्णुदैवतं दक्षिणात्वेन यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय दातुमहमुत्सृजे ।

पुनर्दक्षिणाद्रव्यमादाय (मातृऋषिलाई दक्षिणा सङ्कल्प गर्ने)

ॐ अद्येहामुकसगोत्राणां मातृपितामहीप्रपितामहीनाममुकाममुकामुकीदेवीनां नान्दीमुखीनां कृतैत दाभ्युदयिकश्राद्धप्रतिष्ठार्थीमिमानि द्राक्षामलकफलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं वा विष्णु दैवतं दक्षिणात्वेन यथानामगोत्रयेति पूर्ववत् ।

पुनर्दक्षिणाद्रव्यमादाय (पितृऋषिलाई दक्षिणा सङ्कल्प गर्ने)

ॐ अद्येहामुकसगोत्राणां पितृपितामहप्रपितामहनामुकामुकामुकशर्मणां नान्दीमुखानां कृतैतदाभ्युद यिकश्राद्धप्रतिष्ठार्थीमिमानि द्राक्षामलकफलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं विष्णु दैवतं दक्षिणात्वेन यथानामगोत्रायेत्यादि पूर्ववत् ।

पुनश्च (मातामह ऋषिलाई दक्षिणा सङ्ल्प गर्ने)

ॐ अद्येहामुकसगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां नान्दीमुखानां कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं वा विष्णुदैवतं दक्षिणात्वेन यथानामगोत्रायेत्यादि पूर्ववत्। (पुरोहित ब्राह्मणहरूलाई पनि दक्षिणा गर्ने)

नमस्कार :

(तीनपटक पढ्दै नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥

इति त्रिः पठेत्। ततो दीपाच्छादनं विधाय हस्तौ पादौ प्रक्षाल्य आचम्य प्रार्थयेत्- (दियोलाई ढाकी आचमन गर्ने)

प्रार्थना

(नमस्कार गर्ने)

ॐ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु च। स्मरणादेव तद्विष्णोः सम्पूर्ण स्यादिति श्रुतिः॥
आयुः प्रजां धनं विद्यां स्वर्गं मोक्षसुखानि च। प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः॥

कर्मसमर्पणम्

(कायेन वाचा गर्न कुश जौ लिने)

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिः स्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत्॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु॥
ॐ यत्कृतं तत्सुकृतमस्तु, यन्न कृतं तद्विष्णोः प्रसादात् ब्राह्मणवचनाच्च सर्वं परिपूर्णमस्तु। ॐ अस्तु परिपूर्णम्।

(ब्राह्मणबाट फूलप्रसाद लगाउने)



॥ इति आभ्युदयिकश्राद्ध ॥


॥ श्रीगणेशाय नमः ॥

नवग्रहपूजा

ग्रहशान्तिविधिः

ग्रहसमिधः (ग्रहको समिधा)

अर्कः पलाशः खदिर अपामार्गोऽथ पिप्पलः । औदुम्बरः शमि दूर्वाः कुशाश्च समिधः क्रमात् ॥३॥



ग्रह मण्डलम्

ग्रहस्थापनं पूजनम् च – (दियो, कलश, गणेश स्थापना गरी सङ्कल्प गर्ने र पूजा गर्ने)

तत्रादौ सङ्कल्पः – ॐ अद्येहेत्यादि देशकालौ स्मृत्वा, ममामुक-कर्मणः परिपूर्णतासिद्धये सर्वदोषोपशमनार्थं सूर्यादिनवग्रहदेवतास्थापनपूजनमहं करिष्ये । इति सङ्ल्प्य पूजनादिकं कुर्यात् । (विनियोग गर्ने)

ॐ प्रणवस्य ब्रह्मा ऋषिः परमात्मा देवता गायत्रीच्छन्दो व्याहृतीनां क्रमेण जमदग्नि भारद्वाजभृगव ऋषयोऽग्निर्वायुः सूर्यो देवता दैवीगायत्रीदैव्युष्णिक् दैवीबृहत्यश्छन्दांसि सूर्याद्यावाहने विनियोगः ।

(सूर्यको आवाहन गरी रातो फूल र अक्षताले पूजा गर्ने)

ततो नवग्रहमण्डलमध्ये वर्तुले द्वादशाङ्गुलमण्डले किरीटिनं पद्मारूढं हस्तद्वये पद्मधृतं लोहितवर्णं रक्तवस्त्रधरं सप्ताऽश्वरथस्थं सप्तार्चिषं प्राङ्मुखं श्रीसूर्यं – रक्तपुष्पाक्षतैः पूजयेत् – ॐ अग्निन्दूतं पुरोदधे ... ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपसगोत्र सूर्य इहागच्छ इह तिष्ठेत्यावाह्य स्थापयित्वा, पाद्यार्घ्याचमनीयादिभिः ॐ आकृष्णेन ... एतानि पाद्यार्घ्याचमनीयानि रक्तगन्धपुष्पाक्षतादीनि धूपदीपादीनि च श्रीसूर्यनारायणाय नमः ॥१॥

स्तोत्रम् (सूर्यलाई नमस्कार गर्ने)

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम्। तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्। श्रीसूर्यनारायणाय नमः।

तत आग्नेयदले – चतुरस्रे चतुर्विंशाङ्गुले मण्डले किरीटिनं द्विभुजं वरगदाहस्तं श्वेतवर्णं श्वेतदशाश्वरथस्थं श्वेतपुष्पाक्षतैः चन्दनं पूजयेत् – ॐ अप्स्वग्ने... ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयसगोत्र भो सोम इहागच्छ, इहतिष्ठेत्यावाह्य, आसनपाद्यार्घ्यादिभि उपचारैः पूजयेत् ॥ ॐ इमन्देवा ... ॐ सोमाय नमः। इति पूजनम् ॥२॥

स्तोत्रम् (चन्द्रमालाई नमस्कार गर्ने)

दधिशंखतुषाराभं क्षीरोदार्णवसम्भवम्। नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम् ॥ ॐ सोमाय नमः।

दक्षिणदले भौमम् – त्रिकोणे त्र्यङ्गुले मण्डले किरीटिनं रक्तवर्णं रक्त माल्याम्बरधरं चतुर्भुजं रक्तपुष्पाक्षतैः पूजयेत् – ॐ स्योना पृथिवि नो भवेति... ॐ भूर्भुवः स्वः अवन्ति देशोद्भव भारद्वाजसगोत्र भो भौम, इहागच्छेत्यावाह्य, ॐ अग्निर्मूर्द्धा... ॐ भौमाय नमः। इति पाद्यादिभिरुपचारैः यजेत् ॥३॥

स्तोत्रम् (मङ्गललाई नमस्कार गर्ने)

धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम्। कुमारं शक्तिहस्तं तं मंगलं प्रणमाम्यहम् ॥ ॐ भौमाय नमः।

ईशानदले – बाणाकारे चतुरङ्गुले किरीटिनं पीतवर्णं चतुर्भुजं वरखड्ग-चर्मगदाहस्तं सिंहस्थमादित्याभिमुखं बुधं पीतपुष्पाक्षतैः पूजयेत् – ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयसगोत्र भो बुध इहागच्छ इह तिष्ठेति स्थापयित्वा ॐ उद्बुद्ध्यस्वाग्ने... ॐ बुधाय नमः। इति पाद्यादिभिरुपचारैः पूजयेत् ॥४॥

स्तोत्रम् (बुधलाई नमस्कार गर्ने)

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम्। सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥ ॐ बुधाय नमः।

उत्तरदले – दीर्घचतुरस्रे षडङ्गुले मण्डले किरीटिनं पीतवर्णं पीतमाल्याम्बरधरं चतुर्भुजं वरचर्मवराक्ष-सूत्रकमण्लुधरमादित्याभिमुखं बृहस्पति पीत गन्धपुष्पाक्षतैः पूजयेत् – ॐ इन्द्रऽआसान्नेता... ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव आंगिरससगोत्र बृहस्पते। इहागच्छ इहतिष्ठ इत्यावाह्य ॐ बृहस्पतेऽअतीति ॐ बृहस्पतये नमः। इति पूजयेत् ॥५॥

स्तोत्रम् (बृहस्पतिलाई नमस्कार गर्ने)

देवानं च ऋषीणां च गुरूं काञ्चनसन्निभम्। बुद्धिभूतं त्रिलोकेशं तं नमामि वृहस्पतिम् ॥
ॐ बृहस्पतये नमः।

ततः पूर्वदले – पञ्चकोणे नवाङ्गुले मण्डले किरीटिनं श्वेतवर्णं श्वेतमाल्याम्बरधरं चतुर्भुजं वराक्षसूत्रकमण्डलुधरमादित्याभिमुखं शुक्रं शुक्लपुष्पाक्षतैः पूजयेत् – ॐ शुक्र ज्योतिश्च... । ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवसगोत्र भो शुक्र इहागच्छ, इह तिष्ठ, इत्यावाह्य प्रतिष्ठाप्य ॐ अन्नात्परिश्रुतो... इति मन्त्रेण ॐ शुक्राय नमः इति पूजयेत् ॥६॥

स्तोत्रम् (शुक्रलाई नमस्कार गर्ने)

हिमकुन्दमृणालाभं दैत्यानां परमं गुरूम् । सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥ ॐ शुक्राय नमः ।

ततो पश्चिमदले – धनुषाकारे द्वयङ्गुले मण्डले किरीटिनं कृष्णमाल्याम्बरधरं चतुर्भुजं वरत्रिशूलधनुर्बाणधरं गृध्रवाहनादित्याभिमुखं शनिं कृष्णपुष्पाक्षतैः पूजयेत् – ॐ प्रजापतेन... ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपसगोत्र भो शनैश्चर इहागच्छ इत्यावाह्य, ॐ शन्नोदेवी रिति ॐ शनैश्चराय नमः, इति पूजयेत् ॥७॥

स्तोत्रम् (शनिलाई नमस्कार गर्ने)

नीलांञ्जनसमा भासं रविपुत्रं यमाग्रजम् । छायामार्तण्डसम्भूतं तं नमामि शनैश्चरम् ॥ ॐ शनैश्चराय नमः ।

नैर्ऋत्यदले – सर्पाकारे द्वादशाङ्गुले किरीटिनं कृष्णवर्णं कृष्णमाल्याम्बरधरं करालवदनं चतुर्भुजं वरखड्गचर्मधनुर्धरं सिंहस्थं आदित्याभिमुखं राहुं कृष्णपुष्पाक्षतैः पूजयेत् – ॐ आयङ्गौः... ॐ भूर्भुवः स्वः राठिनदेशोभव पैठिनससगोत्रो राहो, इहागच्छ, इत्यावाह्य, ॐ कयानश्चित्र..., ॐ राहवे नमः इति पूजयेत् ॥८॥

स्तोत्रम् (राहुलाई नमस्कार गर्ने)

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् । सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम् । ॐ राहवे नमः ।

वायव्यकोणे – ध्वजाकारे मण्डले किरीटिनो धूम्रान् द्विभुजान् गदाहस्तान् विवृतमुखान् केतून् धूम्रपुष्पाक्षतैः पूजयेत् – ॐ ब्रह्म यज्ञानम्... ॐ भूर्भुवः स्वः अन्तर्वेदसमुद्भवा जैमिनिसगोत्रा केतवः, इहागच्छत इत्यावाह्य, ॐ केतुं कृण्वन्... केतुभ्यो नमः इति पञ्चोपचारैः पूजयित्वा, धूपदीपादिकं कृत्वा, अधिदेवताप्रत्यधिदेवतादिकं दक्षिणवामपार्श्वे पूजयेत् ।

स्तोत्रम् (केतुलाई नमस्कार गर्ने)

पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् । रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥ केतुभ्यो नमः ।

अष्टयोगिनी पूजा (अष्टयोगिनीहरूको पूजा गर्ने)

अधिदेवतापूजनम् – सूर्यस्य दक्षिणपार्श्वे ईश्वरम् – (सूर्यको दाहिनेपट्टि ईश्वरको पूजा गर्ने)

ॐ त्र्यम्बकमिति वशिष्ठ ऋषि रुद्रो देवता अनुष्टुप्छन्दः ईश्वरस्या-वाहनपूजनयोर्विनियोगः । ॐ भूर्भुवः स्वः ईश्वर इहागच्छ, इह तिष्ठ इत्यावाह्य ॐ त्र्यम्बकं यजामहे..., ॐ ईश्वराय नमः । इति पूजयेत् ॥१॥

सोमस्य दक्षिणपार्श्वे (सोमको दाहिनेपट्टि उमाको पूजा गर्ने)

ॐ श्रीश्च ते लक्ष्मीश्चेति, उत्तरनारायण ऋषि उमा देवतास्त्रिष्टुप्छन्द उमाया आवाहनपूजनयोर्विनियोगः । ॐ श्रीश्च ते लक्ष्मीश्च... इति ॐ भूर्भुवः स्वः उमे, इहागच्छे इहतिष्ठेत्यावाह्य ॐ उमायै नमः ।

इति पूजयेत् ॥२॥

ततो भौमस्य दक्षिणपार्श्वे – (भौमको दक्षिणतिर स्कन्दको पूजा गर्ने)

ॐ यदक्रन्द इति भास्कर-जमदग्नि-दीर्घतमस ऋषयः स्कन्दो देवता त्रिष्टुप्छन्दः स्कन्दस्यावाहन-पूजनयोर्विनियोगः। ॐ भूर्भुवः स्वः स्कन्द, ! इहागच्छ इह तिष्ठ इत्यावाह्य, ॐ यदक्रन्दः... ॐ स्कन्दाय नमः इति पूजयेत् ॥३॥

बुधस्य दक्षिणपार्श्वे – (बुधको दक्षिणतिर विष्णुको पूजा गर्ने)

ॐ विष्णोरराटमिति उतथ्य ऋषिः विष्णुर्देवता त्रिष्टुप्छन्दो विष्णोरावाहनपूजनयोर्विनियोगः। ॐ भूर्भुवः स्वः विष्णो ! इहागच्छ इह तिष्ठेत्यावाह्य ॐ विष्णोरराटमिति ॐ विष्णवे नमः इति पूजयेत् ॥४॥

गुरोर्दक्षिणपार्श्वे– (वृहस्पतिको दक्षिणतिर ब्रह्माको पूजा गर्ने)

ॐ आब्रह्मन्निति प्रजापति ऋर्षिर्ब्रह्मा देवता यजुर्ब्रह्मणः आवाहनपूजनयोर्विनियोगः। ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ, इह तिष्ठ इत्यावाह्य ॐ आब्रह्मन्... ॐ ब्रह्मणे नमः इति पूजयेत् ॥५॥

शुक्रस्य दक्षिणपार्श्वे – (शुक्रको दक्षिणतिर इन्द्रको पूजा गर्ने)

ॐ सजोषाऽइन्द्रेति विश्वामित्र ऋषिः इन्द्रो देवता, इन्द्रस्यावाहन–पूजनयोर्विनियोगः। ॐ भूर्भुवः स्वः इन्द्र इहागच्छ, इह तिष्ठ इत्यावाह्य ॐ सजोषाऽइन्द्रः..., ॐ इन्द्राय नमः इति पूजयेत् ॥६॥

शनेर्दक्षिणपार्श्वे – (शनिको दक्षिणतिर यमको पूजा गर्ने)

ॐ यमायत्वेति मन्त्रस्य दध्यङ्ङाथर्वण ऋषिः यमो देवता यमस्यावाहनपूजनयोर्विनियोगः। ॐ भूर्भुवः स्वः यमः इहागच्छ, इह तिष्ठ इत्यावाह्य ॐ यमायत्वा मखायत्वा... ॐ यमाय नमः इति पूजयेत् ॥७॥

राहोर्दक्षिणपार्श्वे – (राहुको दक्षिणतिर कालको पूजा गर्ने)

ॐ भूर्भुवः स्वः काल इहागच्छ, इह तिष्ठ इत्यावाह्य ॐ कार्षिरसीति प्रजापति ऋषिः अनुष्टुप्छन्दः कालो देवता कालस्यावाहनपूजनयोर्विनियोगः। ॐ कालाय नमः इति पूजयेत् ॥८॥

केतूनां दक्षिणपार्श्वे – (केतुको दक्षिणतिर चित्रगुप्तको पूजा गर्ने)

ॐ भूर्भुवः स्वः चित्रगुप्त इहागच्छ इह तिष्ठ इत्यावाह्य ॐ चित्रा वसोः... ॐ चित्रगुप्ताय नमः, इति पूजयेत् ॥९॥

प्रत्यधिदेवतापूजनम् – (सूर्यको देब्रेपट्टि अग्निको पूजा गर्ने)

ततः श्वेत-कुसुम-तण्डुलैः प्रत्यधिदेवान् आवाह्य संस्थाप्य यथोपचारैः पूजयेत्। सूर्यस्य वामपार्श्वे – ॐ अग्निन्दूतमिति... ॐ भूर्भुवः स्वः अग्ने इहागच्छ इह तिष्ठ इत्यावाह्य ॐ अग्नये नमः, इति पूजयेत् ॥१॥

सोमस्य वामपार्श्वे – (सोमको देब्रेपट्टि आपको पूजा गर्ने)

ॐ भूर्भुवः स्वः आप इहागच्छ इह तिष्ठ इत्यावाह्य ॐ अप्स्वग्ने..., ॐ अद्भ्यो नमः, इति पूजयेत् ॥३॥

भौमस्य वामपार्श्वे – (भौमको देब्रेपट्टि भूमिको पूजा गर्ने)

ॐ भूर्भुवः स्वः भूमे इहागच्छ इह तिष्ठ इत्यावाह्य ॐ स्योना पृथिवि नो भवा..., ॐ भूम्यै नमः, इति पूजयेत् ॥३॥

बुधस्य वामपार्श्वे – (बुधको देब्रेपट्टि विष्णुको पूजा गर्ने)

ॐ भूर्भुवः स्वः विष्णो ! इहागच्छ, इह तिष्ठ इत्यावाह्य ॐ इदं विष्णु..., ॐ विष्णवे नमः, इति पूजयेत् ॥४॥

गुरोर्वामपार्श्वे – (गुरुको देब्रेपट्टि इन्द्रको पूजा गर्ने)

ॐ भूर्भुवः स्वः इन्द्र ! इहागच्छ इह तिष्ठ इत्यावाह्य ॐ इन्द्रऽआसन्नेता..., ॐ इन्द्राय नमः, इति पूजयेत् ॥५॥

शुक्रस्य वामपार्श्वे – (शुक्रको देब्रेपट्टि इन्द्रायणीको पूजा गर्ने)

ॐ भूर्भुवः स्वः इन्द्राणि ! इहागच्छ, इह तिष्ठ इत्यावाह्य ॐ अदित्यै रास्नासि..., ॐ इन्द्राण्यै नमः, इति पूजयेत् ॥६॥

शनेर्वामपार्श्वे – (शनिको देब्रेपट्टि प्रजापतिको पूजा गर्ने)

ॐ भूर्भुवः स्वः प्रजापते ! इहागच्छ, इह तिष्ठ इत्यावाह्य ॐ प्रजापतेन त्वदेता..., ॐ प्रजापतये नमः, इति पूजयेत् ॥७॥

राहोर्वामपार्श्वे – (राहुको देब्रेपट्टि सर्पको पूजा गर्ने)

ॐ भूर्भुवः स्वः सर्पाः इहागच्छन्तु, इह तिष्ठन्तु इत्यावाह्य ॐ नमोस्तु सर्पेभ्यो..., ॐ सर्पेभ्यो नमः । इति पूजयेत् ॥८॥

केतूनां वामपार्श्वे – (केतुको देब्रेपट्टि ब्रह्माको पूजा गर्ने)

ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ, इह तिष्ठ इत्यावाह्य ॐ ब्रह्मयज्ञानं..., ॐ ब्रह्मणे नमः इति पूजयेत् ॥९॥

पञ्चलोकपालदेवतापूजा – श्वेतपुष्पतण्डुलादिभिः राहोरुत्तरभागे (राहुको उत्तरपट्टि विनायकको पूजा गर्ने)

ॐ भूर्भुवः स्वः विनायक, इहागच्छेह इह तिष्ठ इत्यावाह्य ॐ गणानान्त्वा..., ॐ विनायकाय नमः इति पूजयेत् ॥१॥

शनेरुत्तरभागे – (शनिको उत्तरतिर दुर्गाको पूजा गर्ने)

ॐ दुर्गे इहागच्छेह इह तिष्ठ इत्यावाह्य ॐ अम्बेऽअम्बिके..., ॐ दुर्गायै नमः, इति पूजयेत् ॥२॥

सूर्यस्योत्तरभागे – (सूर्यको उत्तरतिर वायुको पूजा गर्ने)

ॐ भूर्भुवः स्वः वायो इहागच्छेह तिष्ठ इत्यावाह्य ॐ वायो ये ते..., ॐ वायवे नमः, इति पूजयेत् ॥३॥

राहोर्दक्षिणभागे – (राहुको दक्षिणतिर आकाशको पूजा गर्ने)

ॐ भूर्भुवः स्वः आकाश इहागच्छ इह तिष्ठ इत्यावाह्य ॐ घृतं घृतपावानः..., ॐ आकाशाय नमः, इति पूजयेत् ॥४॥

केतूनां दक्षिणभागे – (केतुको दक्षिणतिर अश्विनीकुमारको पूजा गर्ने)

ॐ अश्वनौ, इहागच्छतमिहतिष्ठतम् इत्यावाह्य ॐ यावाङ्कशा..., ॐ अश्विनीकुमाराभ्यां नमः, इति पूजयेत् ॥५॥

दशदिक्पालदेवतापूजा – (पूर्वदेखि पूजा गर्ने)

ततः पूर्वतः आरभ्य दिक्पालादीन् स्थापयित्वा पूजयेत् – पूर्वे (पूर्वमा इन्द्रको पूजा गर्ने)

ॐ भूर्भुवः स्वः इन्द्र इहागच्छेह तिष्ठ इत्यावाह्य ॐ त्रातारमिन्द्रमवितार..., ॐ इन्द्राय नमः, इति पूजयेत् ॥१॥

आग्नेये – (आग्नेयमा अग्निको पूजा गर्ने)

ॐ भूर्भुवः स्वः अग्ने इहागच्छेह तिष्ठेत्यावाह्य ॐ अग्निन्दूतं पुरोदधे..., ॐ अग्नये नमः, इति पूजयेत् ॥२॥

दक्षिणे – (दक्षिणमा यमराजको पूजा गर्ने)

ॐ भूर्भुवः स्वः यम इहागच्छेह तिष्ठेत्यावाह्य ॐ यमायत्वा मखायत्वा..., ॐ यमाय नमः, इति पूजयेत् ॥३॥

नैर्ऋत्ये – (नैर्ऋत्यमा निर्ऋतिको पूजा गर्ने)

ॐ भूर्भुवः स्वः निर्ऋते इहागच्छेह तिष्ठेत्यावाह्य ॐ असुन्वन्तम्..., निर्ऋतये नमः, इति पूजयेत् ॥४॥

पश्चिमे – (पश्चिममा वरुणको पूजा गर्ने)

ॐ भूर्भुवः स्वः वरुण इहागच्छ इह तिष्ठेत्यावाह्य ॐ तत्त्वायामि..., ॐ वरुणाय नमः, इति वरुणं पूजयेत् ॥५॥

वायव्ये – (वायव्यमा वायुको पूजा गर्ने)

ॐ भूर्भुवः स्वः वायो इहागच्छेह तिष्ठेत्यावाह्य ॐ वातो वा..., ॐ वायवे नमः इति वायुं पूजयेत् ॥६॥

उत्तरे – (उत्तरमा सोमको पूजा गर्ने)

ॐ भूर्भुवः स्वः सोम इहागच्छेह तिष्ठेत्यावाह्य ॐ सोमोधेनुम् ..., ॐ सोमाय नमः इति सोमं पूजयेत् ॥७॥

ईशाने – (ईशानमा ईशानको पूजा गर्ने)

ॐ भूर्भुवः स्वः ईशान इहागच्छेह तिष्ठेत्यावाह्य ॐ वय&सोमव्रते..., ॐ ईशानाय नमः इति र्यशानं पूजयेत् ॥८॥

पूर्वेशानमध्ये – (पूर्व र ईशानको बीचमा ब्रह्माको पूजा गर्ने)

ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छेह तिष्ठेत्यावाह्य ॐ ब्रह्मयज्ञानं..., ॐ ब्रह्मणे नमः इति पूजयेत् ॥९॥

पश्चिमनैर्ऋत्यमध्ये – (पश्चिम र नैर्ऋत्यको बीचमा अनन्तको पूजा गर्ने)

ॐ भूर्भुवः स्वः ॐ अनन्त इहागच्छेह तिष्ठेत्यावाह्य ॐ नमोस्तु सर्पेभ्यो..., ॐ अनन्ताय नमः इति पूजयेत् ॥१०॥

अष्टवस्वादिवनस्पत्यन्तदेवतापूजा –

इन्द्राग्निर्मध्ये – (इन्द्र र अग्निको बीचमा अष्टवसुको पूजा गर्ने)

ॐ भूर्भुवः स्वः वसव इहागच्छेह तिष्ठेत्यावाह्य ॐ सुगावो देवा...,

ध्रुवोध्वरस्तथा सोम आपश्चैवाऽनिलोऽनलः । प्रत्यूषश्च प्रभाषश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥

ॐ वसुभ्यस्त्वा... ॐ ध्रुवाद्यष्टवसुभ्यो नमः, इति पूजयेत् ॥१॥

इन्द्र–ईशानमध्ये – (इन्द्र र ईशानको बीचमा द्वादशादित्यको पूजा गर्ने)

ॐ भूर्भुवः स्वः आदित्या इहागच्छत इहतिष्ठत इत्यावाह्य ॐ यज्ञोदेवानां प्रत्येति..., (धातार्यमा च मित्रश्च वरुणेशौ भगस्तथा । इन्द्रो विवश्वान् पूषा च पर्जन्यो दशमः स्मृतः । ततस्त्वष्टा ततो विष्णुर्द्वादशादित्यदेवता) । ॐ धात्रादिद्वादशादित्यदेवेभ्यो नमः । इति पूजयेत् ॥२॥

आग्नेयदक्षिणयोर्मध्ये – (आग्नेय र दक्षिणको बीचमा एकादश रुद्रको पूजा गर्ने)

ॐ भूर्भुवः स्वः रुद्रा इहागच्छत, इह तिष्ठत इत्यावाह्य ॐ यऽएतावन्तश्च..., (वीरभद्रश्च शम्भूश्च गिरीशश्च महायशाः । अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः । भुवनाधीश्वरश्चैव कपाली च विशांपतिः । स्थाणुर्भवश्च भगवान् रुद्रा एकादश स्मृताः ।) ॐ वीरभद्रादि एकादशरुद्रेभ्यो नमः इति पूजयेत् ॥३॥

यमनिर्ऋतिमध्ये – (यम र निर्ऋतिको बीचमा षोडशमातृको पूजा गर्ने)

ॐ भूर्भुवः स्वः गौर्य्यादि षोडश मातरः ! इहागच्छत इह तिष्ठत इत्यावाह्य ॐ गौरीर्मिमा..., (गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः धृतिस्तुष्टिस्तथा पुष्टिरात्मनः कुलदेवताः) । ॐ गौर्य्यादि षोडश मातृभ्यो नमः इति पूजयेत् ॥४॥

निर्ऋतिवरुणयोर्मध्ये – (निर्ऋति र वरुणको बीचमा विनायकको पूजा गर्ने)

ॐ भूर्भुवः स्वः गणपते इहागच्छ इह तिष्ठेत्यावाह्य ॐ गणानान्त्वा..., ॐ विनायकाय नमः इति पूजयेत् ॥५॥

वायुसोममध्ये – (वायु र सोमको बीचमा सप्तमरुद्रको पूजा गर्ने)

ॐ भूर्भुवः स्वः मरुत इहागच्छेह तिष्ठेत्यावाह्य ॐ मरुतो यस्य..., (आवहः प्रवहश्चैव उद्वहः संवहस्तथा । वहः परावहश्चैव तथापरिवहोऽनिलः) । ॐ आवाहादिसप्तमरुद्भ्यो नमः इति पूजयेत् ॥६॥

ततः वेद्यामेव (ग्रहवेद्याम्) यथावकाशं ब्रह्मादि पञ्चदेवताः पूजयेत् – (ग्रहवेदीमा पञ्चदेवताको पूजा गर्ने)

ॐ भूर्भुवः स्वः ब्रह्मन्निहागच्छेह तिष्ठेत्यावाह्य ॐ ब्रह्मयज्ञानं..., ॐ ब्रह्मणे नमः ॥१॥

ॐ भूर्भुवः स्वः विष्णो इहागच्छेह तिष्ठेत्यावाह्य ॐ इदं विष्णु..., ॐ विष्णवे नमः ॥२॥

ॐ भूर्भुवः स्वः रुद्र इहागच्छ इह तिष्ठेत्यावाह्य ॐ मानस्तोके..., ॐ रुद्राय नमः इति पूजयेत् ॥३॥

ॐ भूर्भुवः स्वः अर्क इहागच्छेह तिष्ठेत्यावाह्य अग्निरश्मि जन्मना..., ॐ अर्काय नमः इति पूजयेत् ॥४॥

गुरोर्वामपार्श्वे – (वृहस्पतिको पूजा गर्ने)

ॐ भूर्भुवः स्वः वनस्पते इहागच्छेह तिष्ठेत्यावाह्य ॐ वनस्पते वीड्वङ्ग ॐ वनस्पतये नमः, इति पूजयेत् ॥५॥

एवम् द्वि-उत्तरशतम् १२० देवतानामावहनस्थापनादिकं कृत्वा सम्पूज्य धूप-दीप-नैवेद्य-दक्षिणाद्रव्यं निवेदयेत्।

(जनै, सुपारी, धूप, बत्ती, भेटी, वस्त्र चढाई पूजा गरेर ग्रहलाई कपडाले ढाकेर छाता, जुत्ता, लौरो, नरिवल आदि चढाउने)

बलिदानम् – (नवग्रहलाई दही र अक्षता मुछेर वलि दिने)

वेदिपश्चिमभागे भूमावेव बलिर्देयः। तद्यथा प्रथमम् – (वलिर्नमः भन्दा थोरै दही, अक्षता चढाउने)

ॐ आकृष्णेन... ॐ सूर्याय गुडौदनाभावे, एष दध्यक्षतबलिर्नमः ॥१॥

ॐ इमन्देवा... ॐ सोमाय घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥२॥

ॐ अग्निमूर्द्धादिवः... ॐ भौमाय मसूरान्नाभावे, एष दध्यक्षतबलिर्नमः ॥३॥

ॐ उद्बुद्ध्यस्व ... ॐ बुधाय घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥४॥

ॐ बृहस्पतेऽअति... ॐ बृहस्पतये घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥५॥

ॐ अन्नात्परिस्रुतः... ॐ शुक्राय घृतौदनाभावे, एष दध्यक्षतबलिर्नमः ॥६॥

ॐ शन्नोदेवीः... ॐ शनिश्चराय माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ॥७॥

ॐ कयानश्चित्रः... ॐ राहवे छागमांसाभावे, एष दध्यक्षतबलिर्नमः ॥८॥

ॐ केतुं कृण्वन्न... ॐ केतुभ्यश्चित्रौदनाभावे, एष दध्यक्षतबलिर्नमः ॥९॥

अधिदेवतानां बलिदानम् – (दही र अक्षताको वलि दिने)

ॐ त्र्यम्बकं यजामहे... ॐ ईश्वराय घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥१॥

ॐ श्रीश्चते लक्ष्मीश्च... उमायै घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥२॥

ॐ यदक्रन्द... ॐ स्कन्दाय घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥३॥

ॐ विष्णोरराट... ॐ विष्णवे घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥४॥

ॐ आब्रह्मन्... ॐ ब्रह्मणे घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥५॥

ॐ सजोषा इन्द्र... ॐ इन्द्राय घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥६॥

ॐ असियमः... ॐ यमाय घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥७॥

ॐ कार्षिरसि... ॐ कालाय घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥८॥

ॐ चित्रावसो... ॐ चित्रवसवे चित्रगुप्ताय घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥९॥

प्रत्यधिदेवतानाम् – (दही र अक्षताको बलि दिने)

ॐ अग्निन्दूतं... ॐ अग्नये घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥१॥

ॐ अप्स्वन्तः... ॐ अद्भ्यो घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥२॥

ॐ स्योनापृथिवी... ॐ पृथिव्यै घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥३॥
ॐ इदं विष्णुर्विचक्रमे... ॐ विष्णवे घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥४॥
ॐ त्रातारमिन्द्र... ॐ इन्द्राय घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥५॥
ॐ नियुत्वान्वायो... ॐ शच्यै घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥६॥
ॐ प्रजापते नत्वदेता... ॐ प्रजापतये घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥७॥
ॐ नमोस्तु सर्पेभ्यो... ॐ सर्पेभ्यो घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥८॥
ॐ ब्रह्मयज्ञानम्... ॐ ब्रह्मणे घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥९॥

विनायकादिपञ्चदेवतानां बलिदानम् – (दही र अक्षताको बलि दिने)

ॐ गणानान्त्वा... ॐ विनायकाय घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥१॥
ॐ अम्बेऽअम्बिके... ॐ दुर्गायै घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥२॥
ॐ वातोवा... ॐ वायवे घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥३॥
ॐ घृतं घृतपावानः... ॐ आकाशाय घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥४॥
ॐ यावाङ्शा... ॐ अश्विनीकुमाराभ्यां घृतपायसाभावे, एष दध्यक्षतबलिर्नमः ॥५॥

दिक्पालानां बलिदानम् – (दही र अक्षताको बलि दिने)

ॐ इन्द्रस्तु महसा दिप्तः सर्वदेवाधिपो महान्। वज्रहस्तो महासत्वस्तस्मै नित्यं नमो नमः ॥१॥
ॐ इन्द्राय माषभक्ताभावे, एष दध्यक्षतबलिर्नमः।
ॐ आग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः। धूमकेतू रजोध्यक्षस्तस्मै नित्यं नमो नमः ॥२॥
ॐ अग्नये माषभक्ताभावे, एष दध्यक्षतबलिर्नमः।
ॐ यमश्चोत्पलपत्राभः किरीटी दण्डधृक्सदा। धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥३॥
ॐ यमाय माषभक्ताभावे, एष दध्यक्षतबलिर्नमः।
ॐ निर्ऋतिस्तु पुमान् कृष्णः सर्वरक्षाधिपो महान्। खड्गहस्तो महासत्वस्तस्मै नित्यं नमो नमः ॥४॥
ॐ निर्ऋतये माषभक्ताभावे, एष दध्यक्षतबलिर्नमः।
ॐ वरुणः सर्वदा विष्णुः पुरुषो निम्नगाधिपः। पाशहस्तो महासत्वस्तस्मै नित्यं नमो नमः ॥५॥
ॐ वरुणाय माषभक्ताभावे, एष दध्यक्षतबलिर्नमः।
ॐ वायुस्तु सर्ववर्णोऽयं सर्वगन्धवहः शुचिः। पुरुषोध्वजहस्तश्च तस्मै नित्यं नमो नमः ॥६॥
ॐ वायवे माषभक्ताभावे, एष दध्यक्षतबलिर्नमः।
ॐ गौरो यस्तु पुमान् सौम्यः सर्वौषधिसमन्वितः। नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः ॥७॥
ॐ सोमाय माषभक्ताभावे, एष दध्यक्षतबलिर्नमः।
ॐ ईशानः पुरुषः शुक्लः सर्वदेवाधिपो महान्। शुलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः ॥८॥
ॐ ईशानाय माषभक्ताभावे, एष दध्यक्षतबलिर्नमः।

ॐ पद्मयोनिश्चतुर्मूर्तिर्वेदवासः पितामहः । यज्ञाध्वक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः ॥९॥
ॐ ब्रह्मणे माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ।
ॐ योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम् । पुष्पवद्धारयन्मूर्ध्नि तस्मै नित्यं नमो नमः ॥१०॥
ॐ अनन्ताय माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ।

वस्वादि बलिदानम् – (दही र अक्षताको बलि दिने)

ॐ वसुभ्यस्त्वादित्येभ्यस्वा... ॐ ध्रुवाद्यष्टवसुभ्यो माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ॥१॥
ॐ यज्ञो देवानाम्... ॐ धात्रादि द्वादशादित्येभ्यो माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ॥२॥
ॐ यऽएतावन्तश्च... ॐ वीरभद्राद्येकादशेरुद्रेभ्यो माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ॥३॥
ॐ गौरीमिमा... ॐ गौऽर्यादि षोडशमातृभ्यो माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ॥४॥
ॐ मरुतो यस्य... ॐ आवहादि सप्तमरुदभ्यो माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ॥५॥
ॐ गणानान्त्वा... ॐ गणपतये माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ॥६॥
ॐ ब्रह्मयज्ञानम्... ॐ ब्रह्मणे माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ॥७॥
ॐ इदं विष्णुः... ॐ विष्णवे माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ॥८॥
ॐ मानस्तोके तन... ॐ रुद्राय माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ॥९॥
ॐ अग्निरश्मि जन्मना... ॐ अकार्य माषभक्ताभावे, एष दध्यक्षतबलिर्नमः ॥१०॥

इति बलिदानम् – (पुनः फल, पक्वान्न नैवेद्य भेटी चढाउने)

एवं बलिं दत्वा फलादि पक्वान्ननैवेद्यानि सूर्यादिदेवताभ्यो नमः इति समर्पयेत् ।
ततो ग्रहवेद्युपरि वस्त्रवितानं कुर्यात्, फलपुष्पशोभितम् वितानकं बृहस्पति दैवतं श्री सूर्यादिनवग्रहदेवताभ्यो नमः । इति ग्रहपूजा । होमः । (अग्निस्थापनाको सबै ग्रहको होम गर्ने र अग्निस्थापनाअनुसार विसर्जन गर्ने)



श्रीगणेशाय नमः

अथ मण्डपपूजाविधिः

("भागवत" शब्दको अर्थ)

भासले सच्चिदानन्दो गतिर्यस्य ह्यलौकिकी । वरेण्यं सर्वशास्त्राणां तरीभूतं भवार्णवात् ॥

सर्षाप देवयजन भूमौ विकिरेत्

(सर्स्यूं छर्ने)

ॐ अपसर्पन्तु ते भूता ये भूता भूमिमाश्रिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम् । सर्वेषामविरोधेन विष्णु कर्म समारभे ॥

अर्घ्यस्थापनम्

(अर्घको पूजा गर्ने, पेज नं. २०)

अथ दीपकलशगणेशपूजनम्

(दियो, कलश, गणेश पूजा गर्ने, पेज नं. २६–२९)

अथ मातृकापूजा

(मातृका पूजा गर्ने, पेज नं. ८३–८६)

गणपतिसहितगौर्यादिषोडशमातृभ्यो नमः ।
गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधास्वाहा मातरो लोकमातरः ॥
धृतिस्तुष्टिस्तथा पुष्टिरात्मनः कुलदेवता । गणेशेनाधिका ह्येता वृद्धौ पूज्यास्तु षोडश ॥

अथ वास्तुपूजा

(वास्तु पूजा गर्ने, पेज नं. ३४९–३५७)

ॐ वास्तोष्पते प्रतिजानी ह्यस्मान स्वावेशो । अनमीवो भवानः यत्वे महे प्रतितन्नो जुषस्व ॥
शन्नो भव द्विपदे चतुष्पदे स्वाहा । ॐ क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि ॥
मात्वाहि ꣳसीन्मा माहि ꣳसीः । पाद्यादीनि सर्वोपचरार्थे पूजयामि नमस्करोमी ॥

अथ ग्रहपूजा

(ग्रह पूजा गर्ने, पेज नं. ९३–१०२)

सूर्यादिनवग्रहेभ्यो नमः ।

(नमस्कार गर्ने)

सूर्यः सौर्यमथेन्दुरिन्द्रपदवीं सन्मंगलं मङ्गलः ।
सद्बुद्धिंच बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ॥
राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं ।
नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूलाः ग्रहाः ॥
ब्रह्मामुरारिस्त्रिपुरान्तकारी, भानु शशि भूमिसूतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

अथ सर्वतो भद्रस्थ देवतापूजा

(सर्वतो भद्रमा पूजा गर्ने)

ॐ सर्वतो भद्रस्थदेवताभ्यो नमः । ॐ जयाय नमः ॥ ॐ विजयाय नमः ॥ ॐ पुण्यशीलाय नमः ॥
ॐ सुशीलाय नमः ॥ ॐ नन्दाय नमः ॥ ॐ सुनन्दाय नमः ॥ ॐ चण्डाय नमः ॥
ॐ प्रचण्डाय नमः ॥ ॐ पुण्डरीकाय नमः ॥ ॐ उद्धवाय नमः ॥ ॐ व्यासाय नमः ॥
ॐ श्रीशुकाय नमः ॥ ॐ पराशराय नमः ॥ सर्वेभ्यो भगवद्भक्तेभ्यो नमः ॥ ॐ सर्वेभ्यो देवेभ्यो नमः ॥

तोरण पूजनम्

(तोरण पूजा गर्ने)

पूर्वद्वारे – ॐ सुदृढतोरणाय नमः । दक्षिणद्वारे – ॐ सुभद्रतोरणाय नमः । पश्चिमद्वारे – ॐ सुकर्मतोरणाय नमः । उत्तरद्वारे – सुहोत्रतोरणाय नमः । ॐ ऐरावतादिदिग्गजेभ्यो नमः । दशदिक्पालेभ्यो नमः ।

अथ मण्डपस्थ देवता पूजनम्

(मण्डपका देवताहरूको पूजा गर्ने)

मध्ये ब्रह्मणे नमः ततः ॐ दिक्पालेभ्यो नमः । अष्टवसुभ्यो नमः एकादशरुद्रेभ्यो नमः ॥
द्वादशादित्येभ्यो नमः अश्विनीकुमाराभ्यां नमः । विश्वेदेवेभ्यो नमः । पितृभ्यो नमः । सप्तयक्षेभ्यो नमः ॥
भूतनागेभ्यो नमः । स्कन्दाय नमः । नन्दीश्वराय नमः । शूलाय नमः । महाकालाय नमः ॥
दक्षादि-सप्त-दुर्गां विष्णुं मृत्युरोगान् अपः मरुतः पृथिवीम् पूजयामि ॥

अथ आयुध पूजा

(शङ्खघण्टाको पूजा गर्ने)

शंङ्ख पूजनम्

(शङ्ख पूजा गर्ने)

ॐ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे । निर्मितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते ॥ ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि । तन्नः शङ्खः प्रचोदयात् ॥ ॐ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥ ॐ भूर्भुवः स्वः शङ्खस्थदेवाय नमः ॥

घण्टापूजनम्

(घण्टा पूजा गर्ने)

ॐ सुपर्णोऽसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रञ्चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोम आत्माच्छन्दा ꣳस्यङ्गानि यजू ꣳषि नाम साम ते तनूर्व्वामदेव्यम् ॥ यज्ञायज्ञियंपुच्छन्धिष्ण्याः शफाः सुपर्ण्णोऽसि गरुत्मान्दिवङ्गच्छ स्वः पत ॥ ॐ भूर्भुवः स्वः घण्टास्थाय गरुडाय नमः पूजां समर्पयामि ।

अथ विष्णु पूजा

(षोडशोपचारले भगवान्को पूजा गर्ने)

ॐ आधारशक्तिकमलासनाय नमः । ॐ विष्णोरराट मसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोः ध्रुवोऽसि ॥ वैष्णव मसि विष्णवेत्वा ॥ ॐ विष्णवे नमः ॥

अथ प्रार्थना

(फूल, जौ, तिल, चन्दन लिएर हात जोड्ने)

मेघश्यामं पीतकौशेयवासं श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षं विष्णुं वन्दे सर्वलोकैकनाथम् ॥

अथ लक्ष्मी पूजा

(षोडशोपचारले लक्ष्मीको पूजा गर्ने)

ॐ श्रीश्चते ..... ॐ महालक्ष्म्यै नमः ॥ ॐ श्रियै नमः ॥ लोकजनन्यै नमः ॥
ॐ कमलासनायै नमः ॥ ॐ विष्णुपत्न्यै नमः ॥

प्रार्थना

(फूल, चन्दन लिएर नमस्कार गर्ने)

नमस्तुभ्यं महालक्ष्मी नमस्ते हरिवल्लभे । इमां मया कृतां पूजां गृहाण परमेश्वरि ॥
ॐ महालक्ष्म्यै नमः ॥

अथ सरस्वती पूजा

(षोडशोपचार र तिलले पुस्तक पूजा गर्ने)

ॐ व्यासाय नमः श्री शुकाय, सूताय, प्रल्हादाय, नारदाय, पराशराय, पुण्डरीकाय, अम्बरिषाय, शौनकाय, भीष्माय, रुक्माङ्गदाय, अर्जुनाय वसिष्ठाय, विभीषणाय हनुमते, वलये पाद्यादिनी सर्वोपचारार्थे सर्वेभ्यो भगवद्भक्तेभ्यो नमः ॐ वाङ्मयमूर्तये नमः श्री परमात्मने नमः श्रीपुराणपुरुषोत्तमाय नमः ।

पुस्तक प्रार्थना

(फूल लिएर नमस्कार गर्ने)

वीणाधरे विपुलमङ्गलदान शीले भक्तार्तिनाशिनि विरञ्चिहरीश वन्द्ये ।
कीर्तिप्रदेऽखिलमनोरथदेमहार्हे विद्याप्रदायिनीं सरस्वती नौमिं नित्यम् ॥
श्री पुराणपुरुषोत्तमाय नमः ।

ततो धुन्धुकारी स्थापिते वंशमूले पूजा

(धुन्धुकारीको पूजा गर्ने)

ॐ आमा वाजस्य प्रसवो जगम्या देमे द्यावापृथिवी विश्वरुपे । आमा गन्तां पितरामातरा चामा सोमोऽमृतत्वेन गम्यात् । ॐ समस्तप्राप्तगतिभ्यः पितृ देवताभ्यो नमः ॥

धूप, बत्ती, नैवेद्य, आरती, पुष्पाञ्जली

(धूप, बत्ती, नैवेद्य, आरती, पुष्पाञ्जली गर्ने– पेज नं. ३६२–३६५)

नारीकेलादिकफलं हस्ते गृहीत्वा इति पठेत् । (नरिवल लिएर हात जोड्ने)

संसारसागरे मग्नं दीनं मां करुणानिधे । कर्मग्राहगृहीताङ्गं मामुद्धर भवार्णवात् ॥
मनोरथो मदियोयं सफल सर्वथा त्वया । निर्विघ्ने नैव कर्तव्यो दासोहं तवकेशव ॥
श्रीमद्भागवताऽख्योंयं प्रत्यक्षं कृष्ण एवहि । स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे ॥

जयकारम् (जयकार मनाउने)

गणेशवाचक आचार्य पूजनमन्त्रा (गणेश, वाचक, आचार्यहरूलाई टीका लगाइदिने)

ॐ आकृष्णे... । नमो ब्रह्मण्ये ... । व्यासाय विष्णुरूपाय ... । अचतुर्वदनो ब्रह्मा... । आकाशात्... (पेज नं. ४८)

शुकरूप प्रवोधज्ञ सर्वशास्त्रविशारद । एतत् कथा प्रकाशेन मदज्ञान विनाशय ॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत ॥

ॐ असतो मा सद्गमय तमसोमा ज्योतिर्गमय मृत्योर्माऽमृतं गमय ॐ शान्तिः ।३॥

अथ पाठ क्रमः (अब भागवत पाठ सुरु गर्ने)


वेशेषार्घ्यं दद्यात् (दैनिक पाठ कथा सकी आरती, पुष्पाञ्जली गर्ने र अर्घ्य दिने)

एकाहा भागवत पाठ गर्दा कहाँदेखि कहाँसम्म पाठ गर्ने

९ जनाले गर्दा	८ जनाले गर्दा	७ जनाले गर्दा
तृतीयस्कन्धको ७ अध्यायसम्म	तृतीयस्कन्धको १२ अध्यायसम्म	तृतीयस्कन्धको १८ अध्यायसम्म
चतुर्थस्कन्धको ८ अध्यायसम्म	चतुर्थस्कन्धको १९ अध्यायसम्म	चतुर्थस्कन्धको २९ अध्यायसम्म
पञ्चमस्कन्धको १४ अध्यायसम्म	षष्ठस्कन्धको १ अध्यायसम्म	षष्ठस्कन्धको १८ अध्यायसम्म
सप्तमस्कन्धको ३ अध्यायसम्म	अष्टमस्कन्धको ६ अध्यायसम्म	नवमस्कन्धको ७ अध्यायसम्म
अष्टमस्कन्धको २४ अध्यायसम्म	दशमस्कन्धको ३ अध्यायसम्म	दशमस्कन्धको ३७ अध्यायसम्म
दशमस्कन्धको १५ अध्यायसम्म	दशमस्कन्धको ४९ अध्यायसम्म	दशमस्कन्धको ८५ अध्यायसम्म
दशमस्कन्धको ५६ अध्यायसम्म	दशमस्कन्धको ९० अध्यायसम्म	द्वादशस्कन्धको १३ अध्यायसम्म
एकादशस्कन्धको २ अध्यायसम्म	द्वादशस्कन्धको १३ अध्यायसम्म	
द्वादशस्कन्धको १३ अध्यायसम्म		

एकाहामा भन्ने संक्षिप्त कथा

प्र.(१९)अ. प्रश्न, मङ्गलाचरण, चौविस अवतार, वेदव्यासको असन्तोष, नारदजीको पूर्व जन्म, द्रौपदीका पुत्रको हत्या, परीक्षितको गर्भैमा रक्षा, परिक्षितलाई श्राप, शुकदेव गुरुको गङ्गाकिनारमा आगमनको प्रसङ्ग । द्वि.(१०) अ. परिक्षितको प्रश्न, ध्यानविधिः, विराट र सुक्ष्म रूपको वर्णन, चतुः श्लोकी भागवत, पुराणको लक्षणको प्रसङ्ग । तृ.(३३) अ. विदुर उद्धवभेट, मैत्रेय र विदुर संवाद, सृष्टिको वर्णन, वराह भगवान्, कपिल अवतारको प्रसङ्ग च.३१. अ. सती, दक्षप्रजापति, ध्रुव चरित्र, अंग, वेन, पृथु, पुरञ्जन उपाख्यान, प्रसङ्ग । प.(२६) अ. प्रियव्रत, भरत, जडभरत, रहुगण, भवाटवी, ग्रह स्थिति, शिशुमारचक्र, अतल, वितल, पाताल, तलातल लोक, सङ्कर्षण भगवान् नारायणको वर्णनको प्रसङ्ग । ष.(१९) अ. अजामिल, इन्द्रद्वारा वृहस्पतिको अपमान, नारायण कवच, इन्द्र वृत्रासुर युद्ध, चित्रकेतु, उनन्चास वायु (मरुद्गण) को प्रसङ्ग । स. (१५) अ. नारद युधिष्ठिर संवाद, प्रह्लाद, मानवधर्म, वर्णधर्म, स्त्रीधर्म, गृहस्थ सदाचार, मोक्षको उपायको प्रसङ्ग । अ. (२४) मन्वन्तरको कथा, गजेन्द्रमोक्ष समुद्र मन्थन, धन्वन्तरि मोहिनी देवासुर संग्राम वलिराजा, वामन मत्स्य अवतार भगवानको प्रसङ्ग । न. (२४) वैवस्त मनु वृषध्न च्यवन, सुकन्या, शर्याति, नाभाग, मान्धाता, सौभरी, त्रिशंकु, हरिश्चन्द्र, सगर, भगीरथ, श्रीराम, निमि राजा, जमदग्नि, परशुराम, ययाति, रन्तिदेव, कौरव यदुवंश, विदर्भ वंशको कथाको प्रसङ्ग । द. (९०) अ. वसुदेव देवकी, कृष्ण, बलराम, पुतनाउद्धार, बाललीला, कालीयदमन, चीरहरण, गोवर्धन, रासलीला, गोपी गीत, कुब्जा, कुबलयापिठ, चाणूर, मुष्टिक, कंश बध, भ्रमर गीता विद्याआर्जन, भ्रमर गीत, रुक्मिणी, जाम्ववती, सत्यभामा, भौमासुर, उषा, अनिरुद्ध, वाणासुर, नृग सुदामा, आमालाई छ पुत्र, वेदस्तुति, भस्मासुर, ब्राह्मण पुत्र ल्याई दिनुभएको प्रसङ्ग । ए. (३१) अ. श्राप, वर्णाश्रम, संन्यास, दत्तात्रयका २४ गुरु, भगवान् स्वधाम गमन । द्वा. (१३) परीक्षितको देह त्याग सर्पयज्ञ, मार्कण्डेयद्वारा माया दर्शन र वरदान, कलियुगको भाविराजा र धर्मको वर्णन, कलियुगबाट बच्ने उपाय, सूर्यगणको वर्णन, समस्त कथासार, सत्रै पुराणको श्लोकसंख्या ।



वटसावित्री पूजाविधिः (वरपीपल पूजाविधि)

सङ्कल्प (सामग्री तयार गरी सङ्कल्प गर्ने)

हरिः ॐ तत्सदित्यादि ... गोत्रा ... देवि अहं इह जन्मनि जन्मान्तरे च चिरायु सौभाग्य प्राप्तय सकल पातक दुःख नाशार्थे व्रतकल्पोक्त फलप्राप्त्यर्थं मम भर्तुः पुत्राणां च आयुरारोग्यप्राप्तये जन्मजन्मनि अवैधव्यप्राप्तये च सावित्री व्रत महं करिष्य ।

ध्यानम् (ध्यान गर्ने)

पद्मपत्रासनस्थश्च ब्रह्मा कार्यश्चतुर्मुखः ।
सावित्री तस्य कर्तव्या वामोत्सङ्गता तथा ॥
आदित्यवर्णा धर्मज्ञा साक्षमालाकरा तथा ।
ध्यानं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

आवाहनम् (आवाहन गर्ने)

ब्रह्मणा सहितां देवीं सावित्रीं लोकमातरम् ।
सत्यव्रतं च सावित्रीं यमं चावाहयाम्यहम् ॥
आवाहनं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

आसनम् (कुशको आशन दिने)

ब्रह्मणा सह सावित्रि सत्यवत्सहित प्रिये ।
हेमासनं गृह्यतां तु धर्मराज सुरेश्वर ॥
आसनं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

पाद्यम् (जल चढाउने)

गङ्गाजलं समानीतं पाद्यर्घ्यं ब्रह्मणः प्रिये ।
भक्त्या दत्तं धर्मराज सावित्री प्रतिगृह्यताम् ॥
पाद्यं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

अर्घ्यम् (अर्घको जल चढाउने)

भक्त्या समाहृतं तोयं फलपुष्पसमन्वितम् ।
अर्घ्यं गृहाण सावित्रि मम सत्यवत प्रिये ॥
अर्घ्यं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

आचमनीयम (आचमनी जल चढाउने)

सुगन्धि सह कर्पूरं सुरभि स्वादु शीतलम् ।
ब्रह्मणा सह सावित्रि कुरुष्वाचमनीयकम् ।
आचमनीयं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

पञ्चामृतम् (पञ्चामृत चढाउने)

पयो दधि घृतं चैव शर्करामधुसंयुतम् ।
पञ्चामृतं मया दत्तं स्नानार्थं देवि गृह्यताम् ॥
पञ्चामृतमं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

स्नानम् (सुद्ध जलले स्नान गराउने)

मन्दाकिन्याः समानीतमुदकं ब्रह्मणः प्रिये ।
सावित्रि धर्मराजेन स्नानार्थं प्रतिगृह्यताम् ॥
स्नानं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

वस्त्रम् (वस्त्र चढाउने)

सूक्ष्मतन्तुमयं वस्त्रयुग्मं कार्षासससंभवम् ।
सावित्रि सत्यवत्कान्ते भक्त्या दत्तं प्रगृह्यताम् ॥
वस्त्रं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

उपवीतम् (उपवस्त्र चढाउने)

सावित्रि सत्यवत्कान्ते धर्मराज सुरेश्वर ।
सावित्रि ब्रह्मणा सार्धमुपवीतं प्रगृह्यताम् ॥
उपवस्त्रं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

भूषणानि (गहना चढाउने)

भूषणानि च दिव्यानि मुक्ताहारयुतानि च ।
त्वदर्थमुपक्लृप्तानि गृहाण शुभलोचने ॥
भूषणानि समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

चन्दनम् (चन्दन चढाउने)

कुंकुमागुरुकर्पूरकस्तूरीरोचनायुतम् ।
चन्दनं ते मया दत्तं सावित्रि प्रतिगृह्यताम् ।
चन्दनं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

सिन्दूरम् (सिन्दूर चढाउने)

उद्यदादित्य संकाशं स्त्रीणां सीमन्त भूषणम् ।
वीरालङ्करणं दिव्यं सिन्दूरं प्रतिगृह्यताम् ॥
सिन्दूरं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

अवीर (अवीर चढाउने)

नाना परिमलद्रव्यै निर्मितं चूर्णमुत्तमम् ।
आरक्तनामकं दिव्यं सावित्रि प्रतिगृह्यताम् ॥
अवीर चूर्णं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

अक्षतान् (अक्षता चढाउने)

अक्षताश्च सुरश्रेष्ठे कुकुंमाक्ताः सुशोभनाः ।
मया निवेदिता भक्त्या गृहाण परमेश्वरि ॥
अक्षतान् समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

यवान् तिलान् (जौ तिल चढाउने)

ॐ विष्णु प्रिया धान्यराजा माङ्गल्या सतिला यवा ।
तस्मात्तेषां प्रदानेन ममास्त्व विकलं फलम् ॥
यावन् तिलान् समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

सौभाग्यद्रव्यम् (सौभाग्यद्रव्य चढाउने)

हरिद्राकुंकुमं चैव सिन्दूरं कज्जलान्वितम् ।
सौभाग्यद्रव्यसंयुक्तं सावित्रि प्रतिगृह्यताम् ॥
सौभाग्य द्रव्यं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

पुष्पाणि (फूल चढाउने)

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मायाहृतानि पुष्पाणि सावित्रि प्रतिगृह्यताम् ॥
पुष्पाणि समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

अथाङ्ग पूजा (अङ्ग पूजा गर्ने)

सावित्र्यै नमः – पादौ पूजयामि ।
प्रसावित्र्यै नमः – जङ्घे पूजयामि ।
कमलपत्राक्ष्यै नमः – कटीं पूजयामि ।
भूतधारिण्यै नमः – उदरं पूजयामि ।

गायत्र्यै नमः – कण्ठं पूजयामि ।
ब्रह्मण प्रियायै नमः – मुखं पूजयामि ।
सौभाग्यदात्र्यै नमः – शिर पूजयामि ।

अथ ब्रह्मसत्यपूजा

(पूजा गरिरहने)

धात्रे नमः पादौ पूजयामि ।
विधात्रे नमः जङ्घे पूजयामि ।
स्रष्टे नमः ऊरू पूजयामि ।
प्रजापतये नमः मेढ्रं पूजयामि ।
परमेष्ठिने नमः कटीं पूजयामि ।
अग्निरूपाय नमः नाभिं पूजयामि ।
पद्मनाभाय नमः हृदयं पूजयामि ।
वेधसे नमः बाहू पूजयामि ।
विधये नमः कण्ठं पूजयामि ।
हिरण्यगर्भाय नमः मुखं पूजयामि ।
ब्रह्मणे नमः शिरः पूजयामि ।
विष्णवे नमः सर्वाङ्गं पूजयामि ।

धूपम्

(धूप बालेर घुमाउने)

देवद्रुमरसोद्भूतः कालागुरुसमन्वितः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥
धूपं आघ्रापयामि ब्रह्मा सहित सावित्र्यै नमः ।

दीपम् (बत्ति बालेर देखाउने र घुमाउने)

चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम् ।
आर्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वरि ॥
दीपं दर्शयामि ब्रह्मा सहित सावित्र्यै नमः ।

नैवेद्यं (नैवेद्य चढाउने)

अन्न चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ।
मया निवेदितं भक्त्या नैवेद्यं प्रतिगृह्यताम् ॥
नैवेद्यं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

उत्तरापोशनम् (पिउनको लागि जल चढाउने)

कर्पूर वासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यताञ्च देवेशि मयादत्तं हि भक्तितः ॥
एलालवङ्ग कङ्कोल कर्पूरादि सुवासितम् ।
शीतलं तृप्ति जनकं जलं पिव यथेच्छया ॥
उत्तरापोषनं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

आचमनियम् (पुनः जल चढाउने)

उत्तरापोषणां कर्तुं तोय मुद्धृत मुज्वलम् ।
मया निवेदितं भक्त्या गृहाण कमले शुभे ॥
ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतो मुखः ।
त्वं यज्ञस्त्वं वषट्कार आपोज्योति रसो मृतम् ॥
आचमनियं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

करोद्वर्तनम् (सुगन्धित जल चढाउने)

सुगन्ध द्रव्य संयुक्तं सुवासित जगत्रयम् ।
करोद्वर्तनकं मातर्गृहाण परमेश्वरि ॥
ॐ मलयाचल संभूतं कर्पूरादिसुवासितम् ।
करोद्वर्तनकं चारु गृह्यताम् परमेश्वरि ॥
करोद्वर्तनं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

फलं वा नारिकेलादिफलम् (फल अथवा नरिवल चढाउने)

सुशोभनं फलं रम्यं खर्जुरीदल संयुतम् ।
भक्त्या मया प्रदत्तंमे पूजाँ च सफलं कुरु ॥
फलं, नारिकेलफलं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

यथाशक्ति जपं कुर्यात् (जप गर्ने)

गुह्यातिगुह्य गोप्त्रित्वं गृहाणास्मत् कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥

ताम्बूलम् (पान मसला चढाउने)

पाताल तल संभूतं वदनाम्भोज भूषणम् ।
नानागुण गणाकीर्णं ताम्बूलं प्रतिगृह्यताम् ॥
ॐ ताम्बूलदल संयुक्तं क्रमुकादि फलैर्युतम् ।
सुधाखादीर संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
ताम्बूलं पुगि फलं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

दक्षिणाम् (द्रव्य भेटी चढाउने)

सुवर्णं सर्व धातूनां श्रेष्ठंदेव प्रियं सदा ।
भक्त्या ददामि वरदे स्वर्ण वृद्धिं कुरुष्वमें ॥
द्रव्यं समर्पयणमि ब्रह्मा सहित सावित्र्यै नमः ।

आदर्शम् (ऐना देखाउने र चढाउने)

ॐ दर्शनेन त्वमा दर्श नूनं मङ्गल दायक ।
शौर्य सौभाग्य सत्कीर्ति निर्मल ज्ञानदो भव ॥
आदर्शं दर्शयामि ब्रह्मा सहित सावित्र्यै नमः ।

चामराडोलनम् (चमर पङ्खा हम्कने)

ॐ शशाङ्क कर संकाशं हेम दण्डं मनोहरम् ।
चामरं गृह्यतां देवि राजराजत्व सूचकम् ॥
ॐ वर्हि वर्ह कृताकारं मध्यदण्ड सुशोभितिम् ।
गृह्यतां व्यजनं देवि देह स्वेदानु पत्तये ॥
चामरं डोलयामि ब्रह्मा सहित सावित्र्यै नमः ।

प्रदक्षिणा (उठेर घुम्ने)

कायवाङ् मनसं पापं यत्कृतं जन्म जन्मनि ।
तन्मे नाशय देवि त्वं प्रदक्षिण पदे पदे ॥
यानि कानि च पापानि जन्मान्तर कृतानिच ।
तानि सर्वाणि नश्यन्तु प्रदक्षिण पदे पदे ॥
प्रदक्षिणां समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

पुष्पाञ्जलि (फूल लिएर नमस्कार गर्ने)

सावित्रि च प्रसावित्रि सततं ब्रह्मणः प्रिये ।
पूजितासि द्विजैः सर्वैः स्त्रीभिर्मुनिगणैस्तथा ॥
त्रिसन्ध्यं देवि भूतानां वन्दनीया सुशोभने ।
मया दत्ता च पूजेयं त्वं गृहाण नमोऽस्तुते ॥
पुष्पाञ्जलिं समर्पयामि ब्रह्मा सहित सावित्र्यै नमः ।

निराजनम् (निराजन बत्ती बालेर आरती गर्ने)

अन्तस्तेजो बहिस्तेजः एकीकृत्या मित प्रभा ।
नीराजन प्रदानेन सन्तुष्टा भव सर्वदा ॥
ॐ चन्द्रा दित्यौ च धरणि र्विद्युदग्नि स्तथैव च ।
त्वमेव सर्व ज्योतींषि तेन नीराजयाम्यहम् ॥
नीराजनं दर्शयामि ब्रह्मा सहित सावित्र्यै नमः ।

कर्पूरदीपम् (कपुर बालेर घुमाउने)

कर्पूर निर्मितं दीपं स्वर्ण पात्रे निवेशितम् ।
आरार्तिक्यं मयादत्तं गृहाण परमेश्वरि ॥
ॐ कदली गर्भ संभूतं कर्पूरञ्च प्रदीपितम् ।
गृह्यतां परमेशानि ह्यज्ञानं मे विनाशय ॥
कर्पूर दीपं दर्शयामि ब्रह्मा सहित सावित्र्यै नमः ।

अर्घ्य त्रयं दद्यात् (तीनपटक अर्घ्य दिने)

ॐकारपूर्विके देवि सर्वदुःखनिवारिणी ।
वेदमातर्नमस्तुभ्यं सौभाग्यं च प्रयच्छ मे ॥१॥

पतिव्रते महाभागे ब्रह्माणि च शुचिस्मिते ।
दृढव्रते दृढमते भर्तुश्च प्रियवादिनि ॥२॥
अवैधव्यं च सौभाग्यं देहि त्वं मम सुव्रते ।
पुत्रान्पौत्राश्च सौख्यं च गृहाणार्घ्यं नमोऽस्तुते ॥३॥
विशेषार्घ्यं समर्पयामि ब्रह्मासहित सावित्र्यै नमः ।

प्रार्थना (नमस्कार गर्ने)

सावित्रि ब्रह्मगायत्री सर्वदा प्रियभाषिणी ।
तेन सत्येन मां पाहि दुःखसंसारसागरात् ॥
त्वं गौरी त्वं शची लक्ष्मीस्त्वं प्रभा चन्द्रमण्डले ।
त्वमेव च जगन्मातस्त्वमुद्धर वरानने ॥
यन्मया दुष्कृतं सर्वं कृतं जन्मशतैरपि ।
भस्मीभवतु तत्सर्वमवैधव्यं च देहि मे ॥
अवियोगो यथा देवि सावित्र्या सहितस्य ते ।
अवियोग स्तथाऽस्माकं भूयाज्जन्मनि जन्मनि ॥

सौभाग्यद्रव्याणि (सौभाग्य द्रव्य ब्राह्मणलाई दिने)

सुवासिन्यस्ततः पूज्य दिवसे दिवसे गते ।
सिन्दूरं कुङ्कुमं चैव ताम्बूलं च पवित्रकम् ॥
तथा दद्याच्च शूर्पाणि भक्ष्यं भोज्यादिकं सदा ।
माहात्म्यं चैव सावित्र्याः श्रोतव्यं मुनिसत्तम ॥

ततः पूर्णपात्रं, ब्राह्मणेभ्यो दक्षिणां च दत्त्वा यान्तुदेवेति देवान् विसृज्य, कायेन वाचेति कर्मेश्वरार्पणं कृत्वा कर्म समापयेत् ।

॥ इति वटसावित्री पूजा विधिः ॥

श्रीकृष्णजन्माष्टमी पूजाविधिः

अथ प्रयोग (गोदान गरी दियो, कलश, गणेश पूजा गर्ने र सङ्कल्प गर्ने)

मम सकुटुम्बस्य क्षेमस्थैर्यविजयाभयायुरारोग्यैश्वर्याभिवृद्ध्यर्थं धर्मार्थकाममो क्षचतुर्विधपुरुषार्थसिद्ध्यर्थं निशीथे सपरिवारो यथाविभवनियमेन यथामिलितोपचारै जन्माष्टम्यां श्रीकृष्णपूजनमहं करिष्ये ।

ध्यानम् (ध्यान गर्ने)

गायद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादैः श्रृंगारादर्शवेन्तप्रवरकृतकरैः किन्नरैः से व्यमाना ॥ पर्यङ्के स्वास्तृता या मुदिततरमुखी पुत्रिणी सम्यगास्ते सा देवी देवमाता जयति सुवदना देवकी दिव्यरूपा । मञ्चके बालकं सुप्तं पर्यङ्के स्तनपायिनम् । श्रीवत्सवक्षसं शान्तं नीलोत्पलदलच्छविम् ॥ ध्यानम् समर्पयामि गोविन्दाय नमः ।

आवाहनम् (आवाहन गर्ने)

ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् । सभूमिꣳसर्व्वतस्पृत्त्वात्त्यतिष्ठद्दशाङ्गुलम् ॥

आवाहनम् समर्पयामि गोविन्दाय नमः ।

आसनम् (कुशको आसन राख्ने)

ॐ पुरुषऽएवेद ꣳ सर्व्वंयद्द्भूतँयच्चभाव्व्यम् । उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥

नानारत्नसमायुक्तं कार्तस्वरविभूषितम् । आसनं देवदेवेश गृहाण पुरुषोत्तम ॥

आसनं समर्पयामि गोविन्दाय नमः ॥

पाद्यम् (जल चढाउने)

ॐ एतावानस्यमहिमातोज्ज्यायाँश्च्चपूरुषः । पादोस्यव्विश्वाभूतानित्रिपादस्यामृतन्दिवि ॥

नानातीर्थाहृतं तोयं निर्मलं पुष्पमिश्रितम् । पाद्यं गृहाण देवेश विश्वरूप नमोऽस्तु ते ॥

पाद्यं समर्पयामि गोविन्दाय नमः ॥

अर्घ्यम् (अर्घ चढाउने)

ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुन÷ । ततोव्विष्व्वङ्व्यक्क्रामत्त्साशनानशनेऽअभि ॥

गन्धपुष्पाक्षतोपेतं दधिदुर्वासमन्वितम् । अर्घ्यं गृहाण देवेश मया दत्तं हि भक्तितः ॥

अर्घ्यं समर्पयामि गोविन्दाय नमः ॥

आचमनीयम् (जल चढाउने)

ॐ ततोव्विराडजायतव्विराजोऽअधिपुरुषः । सजातोऽअत्त्यरिच्च्यतपश्च्वादभूमिमथोपुर÷ ॥

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् । आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥

आचमनं समर्पयामि गोविन्दाय नमः ।

मधुपर्कम् (मह, घिउ र दही मिसाएर चढाउने)

ॐ दधि क्षौद्रमिदं शुभ्रं कपिलायाः सुगन्धिकम् । सुस्वादु मधुरं देव मधुपर्कं गृहाण भो ॥

मधुपर्कं समर्पयामि गोविन्दाय नमः ।

पुनराचमनीयम् (जल चढाउने)

ॐ शुचिर्वाप्यशुचिर्वाऽपि यस्य स्मरणमात्रतः । शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥

पुनराचमनीयं समर्पयामि गोविन्दाय नमः ।

पञ्चामृतम् (पञ्चामृतमा पहिले दुध चढाउने)

तत्रादौ पयसा- ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः पयस्वतीः प्रदिशः सन्तु महयम् ।

देवाद्यैर्वन्दिता धेनुः सर्वपापप्रणाशिनी । त्वं क्षीरस्नापितो देव नित्यं शोकहरो भव ॥

पयःस्नानं समर्पयामि गोविन्दाय नमः ।

शुद्धोदकेन (शुद्ध जल चढाउने)

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वꣳहि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि । दीक्षातपसोस्तनूरसि तान्त्वा शिवाꣳसग्मांपरिदधे भद्रं वर्ण पुष्यन् ॥

दध्ना (दही चढाउने)

ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखाकरत्प्रणऽआयु ꣳषि तारिषत् ॥

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् । दध्यर्पितं मया देव स्नानार्थं प्रतिगृह्यताम् ॥

दधिस्नानं समर्पयामि गोविन्दाय नमः।

शुद्धोदकेन (शुद्ध जल चढाउने)

ॐ आपोऽअस्मानिति... शुद्धोदकम् ।

शुद्धोदकस्नानं समर्पयामि गोविन्दाय नमः ।

घृतेन (घिउ चढाउने)

ॐ घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम।

अनुष्वध-मावह मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यम्॥

रसानामुत्तमं त्वाज्यं देवानां च सदाप्रियम्। तेन त्वं स्नापितो देव मम कान्तिप्रदो भव॥

घृतस्नानं समर्पयामि गोविन्दाय नमः।

जलेन- (शुद्ध जल चढाउने)

ॐ आपोऽअस्मानिति...।

शुद्धोदकस्नानं समर्पयामि गोविन्दाय नमः।

मधुना- (मह चढाउने)

ॐ मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳरजः। मधुद्यौरस्तु नः पिता॥ मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः॥

यस्य धारणमात्रेण तृप्ति यान्ति पितामहाः। मधुना स्नापितो देव नित्यं शोकहरो भव॥

मधुस्नानं समर्पयामि गोविन्दाय नमः।

शुद्धोदकेन- (शुद्ध जल चढाउने)

ॐ आपोऽअस्मानिति....।

शुद्धोदकस्नानं समर्पयामि गोविन्दाय नमः।

शर्करया (सख्खर चढाउने)

ॐ अपा ꣳ रसमुद्वयस ꣳ सूर्ये सन्त ꣳ समाहितम्। अपा ꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टङ् गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम्॥

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका। मलापहारिणी दिव्या स्नानाय प्रतिगृह्यताम्।

शर्करास्नानं समर्पयामि गोविन्दाय नमः।

शुद्धोदकेन (शुद्ध जल चढाउने)

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। विश्व ꣳ हि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि। दीक्षातपसोस्तनूरसि तान्त्वा शिवा ꣳ सग्मापरिदधे भद्रं वर्ण पुष्यन्॥

शुद्धोदकस्नानं समर्पयामि गोविन्दाय नमः।

वस्त्रम् (कपडा चढाउने)

ॐ तस्माद्यज्ञात्त्सर्व्वहुतःसम्भृतम्पृषदाज्ज्यम। पशूँस्त्ताँश्च्चक्त्रेव्वायव्व्यानारण्ण्याग्ग्राम्म्याश्च्चये ॥

पीताम्बरयुगं देव सर्वकामार्थसिद्धये । मया निवेदितं भक्त्या गृहाण जगदीश्वर ॥

वस्त्रयुग्मं समर्पयामि गोविन्दाय नमः ।

यज्ञोपवीतम् (जनै चढाउने)

ॐ तस्माद्यज्ञात्त्सर्व्वहुतऽऋचः सामानिजज्ञिरे। छन्दा ꣳ सिजज्ञिरेतस्माद्यजुस्त्तस्म्मादजायत ॥

दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात् । ब्रह्मसूत्रं सोत्तरीयं गृहाण जगदीश्वर ॥

यज्ञोपवीतं समर्पयामि गोविन्दाय नमः ।

आभूषणादीनि (गहनाहरू चढाउने)

ॐ किरीटकुण्डलादीनि काञ्चीवलययुग्मकम् । कौस्तुभं वनमालां च भूषणानि भजस्व भो ॥

आभूषणं समर्पयामि गोविन्दाय नमः ।

गन्धम् (चन्दन चढाउने)

ॐ तँयज्ञम्बर्हिषिप्प्रौक्षन्न्पुरुषञ्जातऽमग्ग्रतः । तेनदेवाऽअयजन्तसाद्धचाऽऋषयश्च्चये ॥

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम् ॥

श्रीखण्डचन्दनं समर्पयामि गोविन्दाय नमः ।

तिलयवाक्षता (तिल, जौ, अक्षता चढाउने)

ॐ धान्यराजाः स्वमाङ्गल्या विष्णुप्रीतिकरा यवाः । तस्मादेषां प्रदानेन ममास्त्वविकलं फलम् ॥

पुष्पम् (विभिन्न किसिमका फूल चढाउने)

ॐ श्रीश्चते लक्ष्मीश्चपत्न्याबहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ।

इमानि पुष्पाणि मनोहराणि सुरासुराणामपि दुर्लभानि ।
कल्पद्रुमादि द्रुमजानि तानि पुष्पाञ्जलिर्मेऽस्तु सुखाय नित्यम् ॥

नानाविधानिपुष्पाणि समर्पयामि गोविन्दाय नमः ।

पुष्पमालाम् (माला चढाउने)

ॐ माल्यादीनि सुगन्धीनि ग्रंथितानि प्रयत्नतः । मयाहृतानि पूजार्थं गृहाण परमेश्वरः ॥

पुष्पमालाम् समर्पयामि गोविन्दाय नमः ।

सिन्दूरादि सौभाग्यद्रव्याणि (सिन्दूर र सौभाग्य चढाउने)

सिन्दूरं च वरं रम्यं भाले शोभाविवर्धनम् । पूरणं भूषणानाञ्च सिन्दूरं प्रतिगृह्यताम् ॥

दिव्यरत्नसमायुक्ता वह्निभानुसमप्रभाः । गात्राणि शोभयिष्यन्ति ह्यलङ्काराः सुरेश्वरि ॥

सौभाग्यद्रव्याणि समर्पयामि गोविन्दाय नमः ।

अङ्गपूजा (चन्दन, अक्षता र फूलले पूजा गरिरहने)

ॐ गोविन्दाय नमः पादौ पूजयामि । ॐ माधवाय नमः जंघे पूजयामि । ॐ मधुसूदनाय नमः गुल्फौ पूजयामि । ॐ पद्मनाभाय नमः जानुनी पूजयामि । ॐ हृषिकेशाय नमः मेढ्रं पूजयामि । ॐ सङ्कर्षणाय नमः । नाभिं पूजयामि । ॐ वामनाय नमः । हृदयं पूजयामि । ॐ दैत्यसूदनाय नमः कण्ठं पूजयामि । ॐ हरिकेशाय नमः बाहूं पूजायामि । ॐ चारुमुखाय नमः मुखं पूजयामि । ॐ त्रिविक्रमाय नमः ललाटं पूजयामि । ॐ हरये नमः शिरं पूजयामि । ॐ श्रीकृष्णाय नमः सर्वाङ्गं पूजयामि ।

धूप (धूप बालेर घुमाउने)

ॐ ब्राह्मणोस्यमुखमासीद्द्बाहूराजन्न्य÷कृतः ।

ऊरूतदस्ययद्वैश्श्य÷पद्भ्या ꣳ शूद्द्रोऽअजायत ॥

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

धूपमाघ्रापयामि गोविन्दाय नमः ।

दीप (बत्ती बालेर घुमाउने)

ॐ चन्द्रमामानसोजातश्च्चक्क्षोःसूर्योऽअजायत । श्रोत्राद्द्वायुश्च्चप्प्राणश्च्चमुखादग्निरजायत ॥

घृतवर्ति- समायुक्तं वन्हिना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यातिमिरापहम् ॥

दीपं दर्शयामि गोविन्दाय नमः ।

नैवेद्यम् (नैवेद्य चढाउने)

ॐ नाऽभ्याऽआसीदन्तरिक्ष ꣳ शीष्ण्णोद्द्यौःसमवर्त्तत ।

पद्द्भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालोकाँऽअकल्प्पयन् ॥

नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु । ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥

नैवेद्यं समर्पयामि गोविन्दाय नमः ।

फलं नैवेद्यम् (फलफूल चढाउने)

रसयुक्तानि स्वादूनि यथाकालोद्भवानि च । मयानीतानि देवेश फलानि प्रतिगृह्यताम् ॥

फलादिनैवेद्यं समर्पयामि गोविन्दाय नमः ।

आचमनीयम् (जल चढाउने)

ॐ यत्त्पुरुषेणहविषादेवायज्ञमतन्न्वत । व्वसन्तोऽस्यासीदाज्ज्यङ्ग्रीष्म्मऽइद्ध्मःशरद्धविः ॥

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् । आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥

आचमनीयं समर्पयामि गोविन्दाय नमः ।

चन्दनादिकरोद्धर्तनम् (कपुर मिसाएको जल चढाउने)

ॐ श्रीखण्डं कुङ्कुमं चैव कर्पूरागरुमिश्रितम् । करोद्वर्तनकं देव गृहाण परमेश्वर ॥

करोद्वर्तनकं समर्पयामि गोविन्दाय नमः ।

नारिकेलादिफलम् (नरिवल चढाउने)

ॐ इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

नारिकेलादिफलं समर्पयामि गोविन्दाय नमः ।

ताम्बूलम् (पान मसला चढाउने)

ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । एलाचूर्णादिसहितं ताम्बूलं प्रतिगृह्यताम् ।

ताम्बूलं समर्पयामि गोविन्दाय नमः ।

दक्षिणा (द्रव्य भेटी चढाउने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

दक्षिणां समर्पयामि गोविन्दाय नमः ।

चामरम् (चामर डोलाउने)

ॐ शशाङ्ककरसंकाशं हिमडिंडिरपाण्डूरम् । प्रोत्सारयासु दुरितं चामरामरवल्लभ ॥

चामरं दोलयामि गोविन्दाय नमः ।

आदर्शम् (ऐना देखाउने)

ॐ दर्शनेन त्वमादर्श नूनं मङ्गलदायकः । शौर्यसौभाग्यसत्कीर्तिर्निर्मलज्ञानदो भव ॥

आदर्शं दर्शयामि गोविन्दाय नमः ।

ततो यथाशक्ति जपं कुर्यात् । (जप गर्ने)

नीराजनम् (नीराजन वत्ती बालेर आरती गर्ने)

ॐ पञ्चवर्तिसमायुक्तं घृतेन ज्वलितं मया । आरार्तिकप्रदानेन सन्तुष्टो भव सर्वदा ॥

चन्द्रादित्यौ च धरणीविद्युदग्निस्तथैव च । त्वमेव सर्वज्योतींषि तेन नीराजयाम्यहम् ॥

नीराजनं दर्शयामि गोविन्दाय नमः ।

प्रदक्षिणा (उठेर घुम्ने)

ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषं पशुम् ॥

यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥

नमस्कार (नमस्कार गर्ने)


ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । तेह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

ॐ विश्वेश्वराय देवाय तथा विश्वोद्भवाय च । विश्वानां पतये तुभ्यं गोविन्दाय नमो नमः ॥

ततो गोघृतेन वसोर्धारां कुर्यात् ॥ जातकर्मनालच्छेदनषष्ठीपूजनं च संक्षेपेण कुर्यात् ।

ततः पूर्णपात्रं, ब्राह्मणेभ्यो दक्षिणां च दत्त्वा यान्तुदेवेति देवान् विसृज्य, कायेन वाचेति कर्मेश्वरार्पणं कृत्वा कर्म समापयेत् ।

॥ इति श्रीकृष्णजन्माष्टमी पूजाविधिः ॥



।। श्रीगणेशाय नमः ।।

अथ व्रतबन्धविधिः

अघिल्लो दिन आचमन गरी दियो, कलश, गणेश पूजा गर्ने र
ब्रह्मा, विष्णु, शिवको पूजा गरी जुटिका बाँधिदिने

अथ चूडाकर्म/तत्रादौ जूटिकाबन्धनम् (केशाधिवासनम्)

तत्र पारस्करः – "सांवत्सरिकस्य चूडाकरणं तृतीये वाऽप्रतिहते" इति। ज्योतिः शास्त्रेषु "चूडाकर्म तृतीयेब्दे पञ्चमे सप्तमेऽपि वेति" तत्र उपनीत्या सहैव वेति स्मृतिपक्षमादाय विधिर्लिख्यते- चूडाकर्मदिवसात्पूर्वेन्हि रात्रौ दीपकलशगणेशपूजनपूर्वकं केशाधिवासनं (जूटिकाबन्धनम्) कुर्यात्। (दियो, कलश, गणेश पूजा गर्ने)

तद्यथा- पीतवस्त्रखण्डत्रयेषु हरिद्रादूर्वासर्षपाक्षतादिमङ्गलद्रव्याणि क्षिप्त्वा सूत्रेण त्रिगुणेन दृढं बद्ध्वा पोटलिकात्रयं निर्मापयेत्। ततः स्वस्तिवाचनपूर्वकं शुभासने उपविश्याचम्य ब्राह्मणवरणं पुण्याहवाचनं च विधाय गणेशपूजनं कुर्यात्। (स्वस्तिवाचन पुण्याहवाचन गरी सङ्कल्प गर्ने)

तत्र सङ्कल्पः अद्येहेत्यादि अमुकोहं अमुकनाम्न : पुत्रस्य करिष्यमाणचूडाकरणोपयोगि केशलतिकाधिवासनकर्मणि निर्विघ्नतासिद्धये भगवतो गणेश्वरस्य दीपस्य कलशस्य च यथामिलितोपचारैः पूजनं करिष्ये। (पुनः सङ्कल्प गर्ने)

इति सङ्कल्प्य दीपकलशगणेशादीन् सम्पूज्य प्रधानसङ्कल्पं कुर्यात्। यथा अद्येहेत्यादि अमुकोऽहं अमुकनाम्नः पुत्रस्य श्वः करिष्यमाणचूडाकर्मसिद्धयर्थं केशलतिकाधिवासनं (जूटिकाबन्धनं वा) करिष्ये। इति सङ्कल्प्य ब्रह्मादीन् पूजयेत्।

तत्र मन्त्रा : (ब्रह्माको पूजा गर्ने)

ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचो वेनऽआवः। सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः॥ ॐ ब्रह्मणे नमः। (विष्णुको पूजा गर्ने)

ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा।
ॐ विष्णवे नमः। (शिवको पूजा गर्ने)

ॐ नमः शम्भवाय च मयो भवाय च नमः। शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ॐ शिवाय नमः।


एवं क्रमेण पोटलिकात्रये ब्रह्माणं, विष्णुं, शिवं च संपूज्य पोटलिका आदाय एकैकया पोटलिकया एकैकां जूटिकां केशेषु बध्नीयात्। तत्र क्रमः पूर्वं दक्षिणगोदाने (शिरोदक्षिणभागस्थितेषु) केशेषु एकाम्,

पश्चिमगोदाने (पश्चिमभागस्थितेषु) द्वितीयाम्, उत्तरगोदाने (उत्तरभागस्थितेषु) तृतीयां, पोटलिकां बद्ध्वा, पीतोष्णीषेण बटुशिरो वेष्टयेत्। (कपडाले टाउकोमा बाँधी दुम्सीको काँडा घुसारिदिने)

ततो दक्षिणासङ्कल्प : (जुटिका बाँधेपछि दक्षिणा सङ्कल्प गर्ने)

अद्येहेत्यादि अमुकोऽहं अमुकनाम्नः पुत्रस्य केशाधिवासनकर्मणः साद्गुण्यार्थमिमां दक्षिणां ब्राह्मणेभ्यो दास्ये। ॐ तत्सत् इति दक्षिणां दत्वा पोटलिका उष्णीषादिना बद्ध्वा संवेशयेदिति केशाधिवासनम्॥

उपनयनादियज्ञचक्र



पञ्चगव्यप्राशनविधिः (पेज नं. ३) (पञ्चगव्य खाने)

आशनशुद्धि (पेज नं. ४) (आसन शुद्धि गर्ने)

आचमनम्: (पेज नं. ४) (आचमन गर्ने)

कर्मपात्रनिर्माणविधिः (पेज नं. ४) (कर्मपात्र बनाउने)

सर्षाप देवयजन भूमौ विकिरेत् (पेज नं. ५) (सर्स्यूं छर्ने)
स्वस्तिवाचनम्: (पेज नं. ७) (रेखी हाल्ने)
प्रतिज्ञा सङ्कल्प (पेज नं. ७) (प्रतिज्ञासङ्कल्प गर्ने)
गोदानम् (पेज नं. ८) (गोदान गर्ने)
अथ स्वस्तिवाचनम् (पेज नं. १०) (स्वस्तिवाचन गर्ने)
अर्घस्थापनम् (पेज नं. २०) (अर्घ वनाउने)
अथ ब्राह्मणवरणम् (पेज नं. २३) (वरण गर्ने)
अथ पुण्याहवाचनम् (पेज नं. २४) (पुण्याहवाचन गर्ने)
अथ दीपकलशगणेश पूजा (पेज नं. २६–२९) (दियो, कलश, गणेश पूजा गर्ने)
अथ रक्षाबन्धनपूजा (पेज नं. २९) (रक्षावन्धन पूजा गर्ने)
ततः कलशस्कन्धप्रदेशे (पेज नं. ३०) (नवग्रह पूजा गर्ने)
पुस्तक प्रार्थना (पेज नं. ३०) (पुस्तकपूजा र प्रार्थना गर्ने)
अग्निस्थापनविधिमनुसृत्य वनस्पत्यन्तहवनम् (पेज नं. ३१-३७) (अग्निस्थापना अनुसार गरेर वनस्पतिपछि)

चूडाकर्म : (चूडाकर्मको वेदीमा हवन गर्ने)

अथ पिता चूडाकर्मदिवसे प्रातरुत्थाय स्वकीयं नित्यकर्म समाप्य गीतवादित्रादिपञ्चघोषपूर्वकं पश्चिमद्वारेण शालां प्रविशेत्। सा च शाला नवग्रहयागे सिद्धैव। तत्र स्वासन उपविश्याचम्य अर्घ्यं सम्पाद्य प्राणायामं विधाय, दीपकलशगणेशादीनां मातृणां च पूजां समाप्य, चूडाकरणवेदीसमीपमागत्य प्रधानसङ्कल्पं कुर्यात्।

प्रधानसङ्कल्पः (सङ्कल्प गर्ने)

अद्येहेत्यादिदेशकालसङ्कीर्त्तनान्ते अमुकोऽहममुकनाम्नः कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणेन बलायुर्वर्चोऽभिवृद्धिद्वारा श्रीपरमेश्वरप्रीतये चूडाकर्मसंस्कारं करिष्ये। ततो वरणं कुर्यात्। (ब्राह्मणानामाचार्यः पितैव "उपनीय ददद्वेदमाचार्यः स उदाहृत" इति याज्ञवल्क्यस्मरणात्। पितुरसन्निधाने पितृव्यभ्रात्रादीनामधिकारः क्षत्रियादीनां वेदाध्यापनाभावादन्यो ब्राह्मणोऽधिक्रियते)

पुनः सङ्कल्पः (सङ्कल्प गर्ने र तीन ब्राह्मणलाई भोजन दिने)

अद्येहामुकोऽहं अमुकनाम्नः कुमारस्य करिष्यमाणचूडाकर्मणः पूर्वाङ्गत्वेन त्रीन् ब्राह्मणान् भोजयिष्ये। भोजनपर्याप्तं मिष्टान्नं तन्निष्कयद्रव्यं वा दास्ये इति त्रिभ्यो ब्राह्मणेभ्यो दद्यात्।

ततः पिता- शालायां सूक्ष्मबालुकाभिर्मृत्तिकया वा हस्तमात्रं चतुरस्रं चतुरङ्गुलोन्नतं प्रागुदक्प्रवणं स्थण्डिलं निर्मापयेत्। ततोऽङ्गुष्ठकनिष्ठिकाभ्यां गृहीतैस्त्रिभिर्दर्भैः पांसूनपसार्य तानैशान्यां प्रक्षिप्य, उदकमिश्रितेन गोमयेन

उपलिप्य, खादिरेण हस्तमात्रेण खड्गाकृतिना स्फ्येन (काष्ठेन) कुशमूलेन वा प्रादेशदीर्घाः स्थण्डिलपरिमाणा वा प्रागग्राउदक्संस्थास्तिस्रो रेखाः कृत्वा, अनामिकाङ्गुष्ठाभ्यां प्रतिरेखं यथोल्लेखं पांसूनुदधृत्योर्ध्वं निक्षिप्य, उदकं स्थण्डिले न्युब्जपाणिनाऽभिषिच्य, कांस्यपात्रे निहितं कांस्यपात्रेण पिहितमग्निं स्थण्डिलादाग्नेयभागे निधाय क्रव्यादांशं निर्ऋतिदिशि "क्रव्यादाय नमः" इति परित्यज्य, स्थण्डिले स्वाभिमुखमग्निं संस्थाप्य अग्न्यानयनपात्रे साक्षतमुदकं प्रक्षिपेत्। ततो माता मङ्गलद्रव्यैः स्नापितं परिधापितनूतनवाससं (अहते वाससी परिधाय) कुमारमङ्के निधाय पत्युर्दक्षिणतोऽग्नेः पश्चादुपविशेत्। ततः पिताग्नेर्दक्षिणस्यां दिशि स्थापिते वारणादियज्ञीयदारुनिर्मितपीठासने प्रागग्रान्कुशानास्तीर्य अग्नेरुत्तरतः प्राङ्मुखमासीनं कर्मतऽत्वज्ञं ब्राह्मणं तदभावे पञ्चाशत्कुशनिर्मितमुदङ्मुखमासीनं ब्रह्माणमनुलेपनपुष्पमाल्यवस्त्रादिभिः संपूज्य "ममामुकनाम्नः कुमारस्य चूडाकर्माहं करिष्ये तदङ्गहोमकर्मणि अमुकगोत्र। अमुकशर्मन्। ब्राह्मण त्वं मे ब्रह्मा भव" इति वृणुयात्। ब्रह्मा च "भवामि" इत्युक्त्वाऽग्नेः पूर्वतआगत्य पूर्वस्थापितासनेऽग्नेरभिमुखं ब्रह्माणमुपवेशयेत्। ब्रह्मा चेत्कौशस्तदा यजमानस्तमादायाग्नेः पूर्वतो गत्वा पूर्वोपकल्पितासनेऽग्न्यभिमुखं स्थापयित्वेतरथाऽऽवर्तेत। ततो यजमानो वितस्तिमात्रां भुवं विहायाग्नेर्वायव्ये उत्तरे च प्रागग्रकुशैरासनद्वयं कल्पयित्वा वारणं द्वयङ्गुलदण्डयुतं दण्डेन सह द्वादशाङ्गुलदीर्घं चतुरङ्गुलविस्तारं चतुरङ्गुलखातं प्रणीतापात्रं दक्षिणाहस्तेन वामहस्ते पूर्वाग्रान्निधाय दक्षिणहस्तोद्धृतपात्रस्थोदकेनात्माऽभिमुखं जलं पूरयित्वा अग्नेर्वायव्यासने निधाय दक्षिणहस्तानामिकयाऽऽलभ्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य उत्तरासने निदध्यात्। ततो बर्हिर्मुष्टिमादाय चतुर्धा विभज्यैकैकेन भागेनाग्नेः पुरस्ताद्र दक्षिणतः पश्चादुत्तरश्च प्रागग्रं बर्हिपरिस्तरणं कुर्यात्। प्रयोजनवतः पदार्थान् कार्यक्रमेण द्वयङ्गुलविप्रकर्षेण युग्मं युग्ममाज्यस्थाल्यादीनि योग्यानि न्युब्जानि कृत्वाऽऽसादयेत्॥ तत्र देशविपुलसनस्य संभवेऽग्नेरुत्तरतः प्रागग्राणामुदक्स.स्थमग्नेः पश्चादुदगग्राणां प्राक्संस्थम्॥ असम्भवे तु अग्नेः समीपे उदगग्राणां प्राक्संस्थमुदकसंस्थं वेदिपदार्थाश्च- पवित्रच्छेदनानि त्रीणि कुशतरुणानि, दृढानि पवित्रे साग्रेऽनन्तर्गर्भे द्वे कुशतरुणे, प्रोक्षणीपात्रं वारणं द्वयङ्गुलदण्डयुतं दण्डेन सह द्वादशाङ्गुलदीर्घं चतुरङ्गुलखातं चतुरङ्गुलविस्तारं पद्मपत्राकृति कमलमुकुलाकृति वा, आज्यस्थाली तैजसी, मृण्मयी वा द्वादशाङ्गुलदीर्घं चतुरङ्गुलखातं चतुरङ्गुलविस्तारं पद्मपत्राकृति कमलमुकुलाकृति वा, आज्यस्थाली तैजसी, मृण्मयी वा द्वादशाङ्गुलविशाला प्रादेशोच्चा, तथैव चरुस्थाली, सम्मार्जनकुशास्त्रयः, उपयमनकुशास्त्रिप्रभृतयः पञ्चसप्तत्रयोदश वा, समिधस्तिस्रः पालाश्याः, प्रादेशमात्र्यः, स्रुवः खादिरो हस्तमात्रोऽङ्गुष्ठपर्वमात्रखातपरिणाह-वर्तुलुष्करः, आज्यं गव्यम्। पूर्णपात्रं बहुभोक्तृपुरुषाहारषड्पञ्चाशदधिकद्वितमुष्टिपरिमिततण्डुलाद्यन्नं, शीतोदकम्, उष्णोदकम, नवनीतपिण्डम्, घृतपिण्डम्, दधिपिण्डम्, त्रिस्थानश्वेतशल्लकीकण्टकम्, प्रादेशमितानि साग्राणि त्रीणि कुशतरुणानि पृथक् बद्धानि नव, ताम्रपरिष्कृतं आयसं क्षुरः, वृषभगोमयपिण्डम् आचारात्कांस्यपात्रम्, भगिन्यः, नापितः, अशीतिरत्तिकापरिमितं ताम्रपणम्॥ ततः आसादिते कुशपत्रे गृहीत्वाऽग्रतः प्रादेशमात्रं विहाय तयोरुपरि आसादितानि त्रीणि कुशतरुणानि तिर्यङ्निधाय पवित्रमूलेन पवित्रे प्रदक्षिणमावेष्टय त्रयाणां मूलाग्राणि द्वयोर्मूलानि च दक्षिणहस्तेन पवित्रे वामहस्तेन परिगृह्य छित्वा द्वयोर्मुलं त्रीणि चोत्तरतः क्षिपेत्। प्रोक्षणीपात्रं प्रणीताया उत्तरतो निधाय, तत्र प्रणीतोदकं सपवित्रहस्तेन त्रिर्निक्षिप्य तदुदकं पवित्राभ्यां प्रादेशमात्रमूदर्ध्वं निक्षिप्य पवित्रे प्रोक्षणीपात्रे निधाय प्रोक्षणीपात्रं दक्षिणहस्तेन वामहस्ते निधाय तदुदकं दक्षिणहस्ताङ्गुष्ठानामिकाभ्यां त्रिरुर्ध्वं निक्षिप्य प्रणीतोदकेन प्रोक्षेत्॥ इत्थं

संस्कृतेन प्रोक्षिण्युदकेनासादितानि न्युब्जान्युत्तानानीकृत्वा आज्यस्थाल्यादीनि पूर्णपात्रपर्यन्तान्येकैकशस्त्रिः प्रोक्ष्य असञ्चरे प्रणीताग्न्योरन्तराले प्रोक्षणीपात्रं निदध्यात् ॥ ततः आज्यस्थालीमग्नेः पश्चान्निधाय तत्रासादितमाज्यमात्माभिमुखं प्रक्षिप्य, ततो ब्रह्माऽऽज्यस्थालीमारोप्य, ज्वलदुल्मुकं आज्योपरि समन्तादैशानीमारभ्य प्रदक्षिणं भ्रामयित्वाऽग्नौ प्रक्षिप्य, उदकं स्पृष्ट्वा इतरथाहस्तमावर्तयेत् ॥ ततो यजमानो दक्षिणहस्तेन स्रुवमादाय पूर्वाग्रमधोमुखमग्नौ तापयित्व वामेपाणावुत्तानमुखं निधाय दक्षिणहस्तमध्यधृतानां संमार्जनकुशानामग्रैर्मूलतोऽग्रपर्यन्तं मूलैरग्रतो मूलपर्यन्तं संमृज्य संमार्जनकुशानुत्तरतो निरस्य प्रणीतोदकेन न्युब्जपाणिनाऽभ्युक्ष्य पुनः पूर्ववत् प्रतप्य उदकं स्पृष्ट्वा दक्षिणतः स्वसमीपे निदध्यात् ॥ तत आज्ययुत्थाप्य चरोः पूर्वेण नित्वाऽग्नेरुत्तरतः प्रोक्षणीपात्रस्य पश्चाद्भागे स्थापयित्वा ततोऽग्नेः पश्चादानीय पवित्राभ्यां किंचिदाज्यं प्रादेशमात्रमूर्ध्वं क्षिप्वाऽऽज्यमवलोक्य अपद्रव्ये सति तन्निरस्य प्रोक्षणीश्च पूर्ववदुत्पूय प्रोक्षणीषु पवित्रे निदध्यात् ॥ उपयमनकुशान् दक्षिणपाणिना वामपाणौ निधाय, पूर्वमासादितास्तिस्रः समधि आदाय, उत्थायाग्नौ प्रक्षिप्य दक्षिणचुलुकगृहीतेन सपवित्रेण प्रोक्षण्युदकेनाग्निमीशानाद्युदक्पर्यन्तं परिषिच्य हस्तमितरथावर्त्य, पवित्रे प्रणीतासु निदध्यात् ॥ ततो यजमान आघारादि चतुर्दशाहुतिषु संस्रवधारणाय पात्रमग्निप्रणीतापात्रयोर्मध्ये निधाय ब्रह्मणा कुशेन दक्षिणबाहौ यथासंभवमन्वारब्धः पातितदक्षिणजानुः सोपयमनकुशं वामहस्तं हृदये निधायोत्तानेन शङ्खाकारेण हस्तेन मध्यघृतेन स्रुवेणाऽज्यं जुहुयात् । (हवन सुरु गर्ने)

ॐ प्रजापतय इति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ॥

ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम ॥

प्रजापतिं मनसाध्यात्व, अग्नेरुत्तरभागे प्राञ्चमृजुमूर्द्ध्वं दीर्घं संततमाघारादित्यागान्ते किञ्चित्स्रुवावशिष्टमाज्यं अवशिष्टसंस्रवधारणपात्रे प्रक्षिपेत् । एवमुत्तरत्रयोदशाहुतिषु संस्रवधारणम् ॥ सर्वत्र त्यागान्ते द्रव्यप्रक्षेपः ॥

ॐ इन्द्रायेति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः ॥

ॐ इन्द्राय स्वाहा । इदमिन्द्राय न मम ॥

अग्नेर्दक्षिणभागे पूर्ववदुत्तराघारं जुहुयात् । इत्याघारौ । समिद्धतेऽग्निप्रदेशे ॥

ॐ अग्नय इति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः ॥

ॐ अग्नये स्वाहा । इदमग्नये न मम ॥१॥

ॐ सोमायेति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः ॥

ॐ सोमाय स्वाहा । इदं सोमाय न मम ॥२॥ एतावाज्यभागौ ।

ॐ भूभुर्वः स्व इति महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवता आज्यहोमे विनियोग : ॥

ॐ भूः स्वाहा । इदमग्नये न मम । ॐ भुवः स्वाहा । इदं वायवे न मम । ॐ स्वः स्वाहा ।

इदं सूर्याय न मम ॥

सर्वप्रायश्चित्तहोम

(होम गर्ने)

ॐ त्वन्नो अग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दः अग्नीवरुणौदेवते प्रायश्चित्तहोमे विनियोगः ।

ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽवयासिसीष्ठाः ।

यजिष्ठो बन्हितमः शोशुचानो विश्श्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा ।

इदमग्नीवरुणाभ्यां न मम ।

सत्वन्न इति वामदेवऋषिस्त्रिष्टुप्छन्दः अग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः ।

ॐ सत्वन्नोऽअग्नेऽवमो भवोती नेदिष्टोऽअस्याऽउषसो व्युष्टौ ।

अवयक्ष्व नो वरुणꣳरराणो वीहि मृडीक ꣳसुहवो नऽएधि स्वाहा ।

इदमग्नीवरुणाभ्यां न मम ।

अयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः ।

ॐ अयाश्चाग्नेस्यनभिशस्ति पाश्च सत्यमित्वमयाऽअसि ।

अया नो यज्ञं वहास्यया नो धेहि भेषजꣳस्वाहा ।

इदमग्नये न मम ।

ये ते शतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणसवितृविष्णुर्विश्वेदेवा मरुतः स्वर्का देवता प्रायश्चित्तहोमे विनियोगः ।

ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः ।

तेभिर्न्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ।

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यो स्वर्केभ्यः न मम ।

उदुत्तममिति शुनः शेफऋषिस्त्रिष्टुप्छन्दोः वरुणोदेवता प्रायश्चित्तहोमे विनियोगः ।

ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳश्रथाय ।

अथा वयमादित्यव्रते तवानागसोऽअदितये स्याम स्वाहा ।

इदं वरुणाय न मम ।

ॐ अग्नये प्रजापतये स्वाहा । इदमग्नये प्रजापतये न मम ।

ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम ।

ततः संस्रवं प्राश्याचम्य पवित्राभ्यां मुखं मार्जयित्वा पवित्रे अग्नौ क्षिपेत् । ततो ब्रह्मणे ।

पूर्णपात्रदानम्

(पूर्णपात्र दान गर्ने)

अद्येहाऽमुकनाम्नः कुमारस्य चूडाकर्माङ्गहोमकर्मणः साङ्गफलप्राप्तये साद्गुण्यार्थं इदं पूर्णपात्रं ससुवर्णं ब्रह्मणे तुभ्यमहं संप्रददे ।

ततो यजमान : ॐ सुमित्रिया दुर्मित्रिया इति मन्त्रद्वयस्य प्रजापतिऋषिरापो देवता प्रणीता विमोके विनियोगः ।

ॐ सुमित्रिया नऽआपऽओषधयः सन्तु ।

इति मन्त्रेण प्रणीतोदकेन शिरः समृज्य । (प्रणीताको जलले अभिषेक गरिदिने र घोप्ट्याइदिने)

ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्च वयं द्विष्मः । इति मन्त्रेण ।

प्रणीतापात्रमैशान्यं न्युब्जीकुर्यात् । तत आस्तरण क्रमेण बर्हिरुत्थाप्याऽज्येनाभिघार्य- ॐ देवा गातुविद इति मनसस्पति ऋषिर्विराट् छन्दो वातो देवता बर्हिर्होमे विनियोगः । (कुश हवन गर्ने)

ॐ देवा गातुविदो गातुं वित्त्वा गातुमित ।
मनसस्पतऽइमन्देवा यज्ञꣳस्वाहा वातेधाः ॥

तत जुहुयात् । इति बर्हिर्होमः ।

लग्नात्सर्वारिष्टगोदानम् (गोदान गर्ने, पेज नं. ५)

तत्र सङ्कल्पः

अद्येहामुकनाम्नः कुमारस्य चूडाकर्मलग्नाद्यत्रकुत्रस्थानस्थितानाम् आदित्यादिनवग्रहाणां दुष्टानां दुष्टफलोपशान्तये शुभानां विशेषतः शुभफलप्राप्तये इदं सुवर्णं सुवर्णनिष्कयीभूतं द्रव्यं वा ब्राह्मणाय दातुमहमुत्सृजे ।

शीतोदके उष्णोदकाऽऽसेचनम् (काँसको कचौरामा तातो र चिसो पानी मिसाउने)

ततः उपकल्पितपात्रे शीतासु अप्सु उष्णा आप आसिञ्चति अनेन मन्त्रेण –

उष्णेनवाय इति मन्त्रस्य परमेष्ठी ऋषिः प्रतिष्ठाछन्दो लिङ्गोक्ता देवता उष्णोदकासेके विनियोगः । (विनियोग गर्ने)

ॐ उष्णेनवायऽउदकेनेह्यदिते केशान्वप इति । (जल मिसाउने)

ततो मिश्रितास्वप्सु तूष्णीं नवनीतपिण्डं घृतपिण्डं दधिपिण्डं वा प्रक्षिपति । तत अप आदाय पूर्वमधिवासितं दक्षिणं गोदानमुन्दति (क्लेदयति आर्द्रीकरोतीत्यर्थः) तत्र मन्त्रः –

सवित्रेति मन्त्रस्य प्रजापतिर्ऋषिर्गायत्रीछन्द आपो देवता उन्दने विनियोगः । (विनियोग गर्ने)

ॐ सवित्रा प्रसूता दैव्याऽआपऽउन्दन्तु ते तनून्दीर्घायुत्वाय वर्च्चसे । इति । (जुटिका फुकाएर केश भिजाउने)

शलल्या केशानां पृथक् करणम् (दुम्सीको काँडाले तीन भाग लगाउने र एक भाग कपालमुनि राख्ने)

ततस्त्रेण्या शलल्या तूष्णीं छेत्तुमिष्टान्केशान्विनीय (पृथक्कृत्य) तेष्वेव केशेषु कुशतरुणान्यन्तर्दधाति ।

कुशतरुणान्तर्धानम् (कुशमुनि राख्ने)

तत्र मन्त्रः

ओषध इति प्रजापतिर्ऋषिर्यजुश्छन्द ओषधिर्देवता कुशतरुणान्तद्धाने विनियोगः ।

ॐ ओषधे त्रायस्व स्वधिते मैनꣳहिꣳसीः ।

इति सकुशतरुणान् केशान्सव्यहस्ते धृत्वा दक्षिणहस्तेन क्षुरमादत्ते ।

क्षुरग्रहणम्

(मामाले छुरा लिने)

तत्र मन्त्रः – शिवोनामेति प्रजापतिर्ऋषिर्यजुश्छन्दः क्षुरो देवता क्षुरग्रहणे विनियोगः ।

ॐ शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा माहिꣳसीः ॥ ॥ इति ॥

क्षुरेण केशच्छेदनम्

(मामाले केश काट्न ठीक पर्ने)

ततः सकुशतरुणेषु केशेषु क्षुरं प्रवपति निदधाति संलग्नीकरोतीत्यर्थः । तत्र मन्त्र :–

निवर्तयामीति प्रजापतिऋषिर्यजुश्छन्दःक्षुरो देवता क्षुरकेशसंयोगे विनियोगः ।

ॐ निवर्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय । ॥ इति ॥

छिन्नानां केशानाम् आनड्डहे गोमयपिण्डे निक्षेपणम्

(दिदीवहिनीले थाल थाप्ने)

ततस्तान्केशान्क्षुरेण च्छिनत्ति अनेन मन्त्रेण :–

(एक भाग केश थालमा राख्ने)

येनावपदिति आलंबायन ऋषिः पङ्क्तिश्छन्दःसविता देवता सकेशकुशपत्रच्छेदने विनियोगः ।

ॐ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् तेन ब्रह्मणो वपतेदमस्यायुष्यञ्जरदष्टिर्यथाऽसत् । इति च्छिन्द्यात् ।

इति सकेशानि कुशतरुणानि प्रच्छिद्य उत्तरतो ध्रियमाणे आनड्डहे गोमयपिण्डे निक्षिपेत् । एवमेवापरं वारद्वयं उन्दनं शल्लकीकण्टकेन केशविनयनं कुशतरुणान्तर्धानं क्षुरादानं क्षुरकेशसंयोजनं सकेशकुशपत्रच्छेदनं गोमयपिण्डे प्रासनं च तूष्णीं कुर्यात् । (तत्र विशेष :– पिता सकेशानि पिञ्जुलानि च्छित्वा प्रागग्राणि शिशुमातृहस्ते निदधाति सा प्रागग्राण्यानड्डहे गोमयपिण्डे निदधाति ।) अथ पश्चिमगोदाने उन्दनम् विनयनं कुशतरुणान्तर्धानं क्षुरादानं क्षुरकेशसंयोगश्च पूर्वोक्तैरेवमन्त्रैः कुर्यात् । छेदने मन्त्रविशेषः ।

(टुप्पी राखेर अर्को भाग केश काट्ने)

त्र्यायुषमिति नारायणऋषिरनुष्टुप्छन्दोऽग्निर्देवता सकेशकुशपत्रच्छेदने विनियोगः ।

ॐ त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुष्म् ॥

इति छित्वा ॥ पूर्ववद्गोमयपिण्डे निदध्यात् ।

(गोबर राख्ने)

एवं पुनर्वारद्वयं इतरयोः पश्चिमगोदानयोः उन्दनं विनयनं कुशतरुणान्तर्धानं क्षुरादानं प्रवपनं गोमये प्रासनं च तूष्णीं कुर्यात् । तथोत्तरगोदाने- उन्दनविनयनकुशतरुणान्तर्धानक्षुरादान प्रवपनानि पूर्ववत्कुर्यात् । छेदने तु मन्त्रविशेष :– येनेति प्रजापतिर्ऋषिर्यजुश्छन्दः क्षुरो देवता सकेशकुशपत्रच्छेदने विनियोगः ।

(गोबरमाथि केश राख्ने)

ॐ येन भूरिश्चरा दिवं योक्च पश्चाद्धि सूर्यम् ।

तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तये ।

इति मन्त्रेण छित्वा गोमयेप्रासनं पूर्ववत् एवं पुनर्वारद्वयं इतरयोरुत्तरगोदानयोः उन्दनं विनयनं कुशतरुणान्तर्धानं क्षुरादानं छेदनं गोमये प्रासनं च तूष्णी कुर्यात् । अथ "त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति" शिरसः समन्तात्प्रदक्षिणं क्षुरंपरिभ्रामयतीत्यर्थः । सकृन्मन्त्रेण द्विस्तूष्णीं तत्र मन्त्र :– यत्क्षुरेणेति वामदेवऋषिर्यजुश्छन्दः

क्षुरोदेवता क्षुरपरिभ्रामणे विनियोगः । (पानीले भिजाई वाँकी भाग केश काट्ने)

ॐ यत्क्षुरेण मज्जयता सुपेशसा वप्त्वा वा वपति । केशाञ्छिन्धि शिरो माऽस्यायुः प्रमोषीः ॥ इति ॥

अथोन्दनशेषेण जलेन सर्वं शिर आर्द्रीकृत्य नापिताय क्षुरं प्रयच्छति । 'अक्षण्ण्वन् परिवपेति' । अक्षुण्यवन्निति वामदेवऋषिर्यजुश्छन्दः क्षुरोदेवता क्षुरप्रदाने विनियोगः ।

ॐ अक्षुण्ण्वन् परिवप : इति । परिवपामीति नापितो वदेत् । अथ यथाकुलाचारं शिखावर्ज वपनं कृत्वा ततः सकेशं गोमयपिण्डं पल्वले गोष्ठे उदकान्ते वा शुद्धस्थाने निधापयेत् ।

स्नानम् (स्नान गर्ने)

ततः सुस्नातं पर्य्युप्तशिरसं माणवकं आचार्यसमीपमानीय अग्नेः पश्चादवस्थापयेत् । अथ पिता स्वाचार्याय वरं ददाति कुमारस्याचार्याभावात् ।

दक्षिणादानम् (दक्षिणा सङ्कल्प गर्ने र दिने)

अद्येहेत्यादि अमुकनाम्नः कुमारस्य चूडाकर्माङ्गहोमकर्मणः चूडाकर्मणश्च साङ्गफलप्राप्तये साद्गुण्यार्थं च इदं सुवर्णमग्निदैवतं तन्निष्कयभूतं द्रव्यं वा आचार्याय तुभ्यमहं सम्प्रदहे । ॐ तत्सन्नममेति सङ्कल्प्य दद्यात् । आचार्यश्च मन्त्राशिषं दद्यात् । ॥ इति चूडाकर्म ॥

अथोपनयनम् (तीन वटा गोदान गर्ने)

प्रायश्चित्तम् तत्र सङ्कल्प :– अद्येहेत्यादि अमुकोऽहं स्वस्योपनेतृत्वयोग्यतायै कृच्छ्रत्रयगोत्रितयनिष्क्रयीभूतं सुर्वणं बन्हिदैवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय दास्ये । तथोपनेयोऽपि प्रायश्चित्तसङ्कल्पं कुर्यात्- अद्येहेत्यादि अमुकोऽहं ममकामाचार कामवाद कामभक्षादिदोषापनोदनद्वारा श्रीपरमेश्वरप्रीत्यर्थं स्वस्योपनेयत्वयोग्यतायै च कृच्छ्रत्रयगोत्रितयनिष्क्रयीभूतं सुवर्णं बन्हिदैवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय दास्ये । ॐ तत्सन्न ममेति दद्यात् ।

प्रधानसङ्कल्प : (सङ्कल्प गर्ने)

ॐ तत्सत् अद्येहेत्यादि अमुकशर्म्माऽहम् अमुकनाम्नोऽस्य कुमारस्य बीजगर्भसमुद्भवैनोनिवर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं वेदाध्यनादिकर्म्माधिकारसम्पादकद्विजत्वसंसिद्धिकाम उपनयनाख्यं कर्म करिष्ये । तत्पूर्वाङ्गत्वेन त्रीन्ब्राह्मणान्सहानेन बटुना भोजयिष्ये । इति सङ्कल्प्य ब्राह्मणान्भोजयित्वा तैः सह कुमारं च भोजयेत् । अथाचार्यो ब्रह्मोपवेशनादि बर्हिर्होमान्तं कर्म विदध्यात् परिस्कृतभूमौ बालुकामृत्तिकादिभिर्हस्तमात्रं चतुरस्त्रं चतुरङ्गुलोन्नतं प्रागुदक्प्रवण स्थण्डिलं रचयेत् । तत्र समुद्भवनामाग्निं स्थापयेत् । अथ पर्युप्तशिरसं कुमारं मङ्गलद्रव्यैः स्नापयित्वा वेदगीतवादित्रघोषपुरस्सरं प्रदक्षिणमग्निं परिक्रममाणमाचार्यसमीपमानयन्त्याचार्यपुरुषाः । अथाचार्यो माणवकं स्वस्य दक्षिणतोऽग्नेः पश्चात् प्राङ्मुखमुपवेश्य "ब्रह्मचर्यमागाम्" ब्रूहि, इति ब्रूयात् । (आचार्यले सोध्ने कुमारले भन्ने)

"ॐ ब्रह्मचर्यमागाम्" इति माणवको वदेत् । पुनराचार्यः "ब्रह्मचार्यसानि" इति प्रेषयति । माणवकोऽपि "ब्रहमचार्यसानि" इति ब्रूयात् । अथाचार्यो माणवकं धौतं (कौपीनं) वासः परिधापयति । वक्ष्यमाणमन्त्रेण ।

वासः परिधापनम्

(लँगौटी (कौपिन) लगाउने)

यनेन्द्रायेत्यङ्गिरा ऋषिर्बृहतीछन्दो बृहस्पतिर्देवता वासः परिधापने विनियोगः ।

ॐ येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतम् । तेन त्वा परिदधाम्यायुषे दीर्घायुष्ट्वाय बलाय वर्चसे ॥

इत्याचार्यस्यैव मन्त्रपाठः परिदधामीति मन्त्रलिङ्गात् । अत्र द्विराचमनम् । शूद्रेण हि समस्तावद्यावद्वेदे न योजितः ।

उपनेयस्य माणवकस्य द्विरपप्राशनम् । ततः –

(दुईपटक आचमन गर्ने)

मेखलाबन्धनम्

(मेखला लगाइदिने)

अथ मेखलां बध्नीते । अनेन मन्त्रेण – इयं दुरुक्तमिति वामदेवऋषिस्त्रिष्टुप्छन्दो मेखला देवता मेखलाबन्धने विनियोगः ।

ॐ इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती मऽआगात् ।

प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयम् ॥ अथवा,

ॐ युवा सुवासाः परिवीतऽआगात्स उ श्रेयान् भवति जायमानः ।

तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥ इति वा तूष्णीं वा ।

इति मन्त्रं पठतो माणवकस्य कटिप्रदेशे मेखलां त्रिरावेष्टच तृतीयवेष्टने प्रवरसङ्ख्यया ग्रन्थीन्करोति । माणवकस्यैव मन्त्रपाठः । मऽआगादिति मंन्त्रलिङ्गात् । तत्र मेखालाच-मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्या विप्रस्य मेखला । धनुर्ज्या राजन्यस्य मौर्वी वैश्यस्येति क्रमेण सूत्रोक्ता ग्राह्याः । अत्रावसरे प्रणवपूर्वया गायत्र्या । शिखाबन्धनं कुर्यात् । यद्यप्यत्र यज्ञोपवीतदानधारणे सूत्रकारेण नोपादिते तथापि "विभृयाद्दण्डकौपीनोपवीताजिनमेखलाः" इति व्यासवचनात्ते धार्ये अवसरेऽस्याप्यौ चित्यान्मेखलाबन्धनानन्तरमेकं यज्ञोपवीतं धारयेत् ।

अथाचाराद्यज्ञोपवीताष्टकदानम्

(आठ ओटा पूर्णपात्र पूजा गर्ने र दान गर्ने)

कुमारः शिखाबन्धनमाचमनञ्च कृत्वा तण्डुलपरिपूरितेष्वष्टसु पात्रेषु कांस्यभाण्डेषु फलं यज्ञोपवीतं च निधाय देयब्राह्मणान् संपूज्य कुशमादाय- देशकालकीर्तनान्तेऽमुकगोत्रस्यामुकशर्मणो मम द्विजाचारप्राप्त्यर्थं तण्डुलपूर्णपात्रस्थानि सफलानि यज्ञोपवीतानि ब्रह्मदैवतानि नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे । इत्यष्टाभ्यो दत्वा दक्षिणामादाय- कृतस्य यज्ञोपवीताष्टकदानस्य प्रतिष्ठार्थं दक्षिणां ताम्रं सूर्यदैवतं व्यवहारोपकल्पितं द्रव्यं विष्णुदैवतं वा यथानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे । इत्युक्त्वा दद्यात् ।

यज्ञोपवीतधारणम्

(तीन डोरा जनै लगाउने)

यज्ञोपवीतं धारयेत् अनेन मन्त्रेण-

यज्ञोपवीतमिति परमेष्ठी ऋषिः त्रिष्टुप्छन्दः लिङ्गोक्ता देवता श्रौतस्मार्त्तकर्मानुष्ठानसिद्धये यज्ञोपवीतधारणे विनियोगः ।

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।

आयुष्यमग्रयं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ।

ॐ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ।

एवं मन्त्रं पठतो माणवकस्य दक्षिणं बाहुमुद्धृत्य वामांसोपरि निदध्यात् । तत्र आचमनद्वयं माणवकस्य । ततः प्रदक्षिणमग्निं परीत्य माणवकोऽग्नेः पश्चात्स्थित्वा आचमनं कृत्वा स्ववर्णोक्तं ऐणेयादि चर्म यज्ञोपवीतवत्परिदध्यात् ।

मृगचर्मधारणम्

(मृगचर्म लगाइदिने)

मन्त्रः –

मित्रस्य चक्षुरिति वामदेवऋषिस्त्रिष्टुप्छन्दः अजिनं देवता अजिनधारणे विनियोगः ।

ॐ मित्रस्य चक्षुर्द्धरुणं बलीयस्तेजो यशस्वि स्थविरꣳसमिद्धम् ।
अनाहनस्यं वसनं जरिष्णुः परीदं वाज्यजिनं दधेऽहम् ।

इति मन्त्रेण ऐणेयं ब्राह्मणः रौरवं क्षत्रियः अज(बस्त) चर्म्म वैश्यः परिदध्यात् । अथाचार्यः पादादिकेशप्रमाणं स्ववर्णोक्तं पालाशबैल्वौदुम्बरजातं दण्डं तत्तद्वर्णाय माणवकाय प्रयच्छति । स च मन्त्रेणादत्ते । (आचमन गर्ने)

दण्डग्रहणम्

(वटुकलाई लट्ठी दिने)

यो मे दण्ड इति प्रजापतिर्ऋषिः यजुश्छन्दः दण्डो देवता दण्डग्रहणे विनियोगः ।

ॐ यो मे दण्डः परापतद्वैहायसोऽधिभूम्याम् । तमहं पुनराददऽआयुषे ब्रह्मणे ब्रह्मवर्चसाय : ॥

इति मन्त्रेण प्रतिगृण्हाति ।

(दिक्षावदेके दीर्घसत्रमुपैतीति) वचनात् उच्छ्रयति च उच्छ्रयस्वेति । उच्छ्रयस्वेति प्रजापतिर्ऋषिः यजुश्छन्दो दण्डोदेवता दण्डोच्छ्रयणे विनियोगः । (सुन, थैली र झोली बाँधिएको अर्को लट्ठी दिने)

ॐ उच्छ्रयस्व वनस्पतऽऊर्ध्वो मा पाह्यꣳहऽसऽआस्य यज्ञस्योदृचः ।

अथाचार्यः अद्भिः स्वाञ्जलिं जलेनापूर्य तेन माणवकाञ्जलिं वारत्रयं पूरयति ।

अञ्जलिपूरणम्

(पिताले जल दिने कुमारले आकाशतिर अर्पण गर्ने)

अपो हि ष्ठेत्यादितिसृणां सिन्धुद्वीपऋषिर्गायत्रीछन्द आपो देवता माणवकाञ्जलिपूरणे विनियोगः ।

ॐ आपो हिष्ठा मयो भुवस्ता नऽऊर्ज्जे दधातन । महे रणाय चक्षसे ॥१॥

इति प्रथमवारं पूरयेत् । कुमारश्चोध्वमुत्क्षिपेत् ।

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥२॥

इति द्वितीयवारं पूरयेत् ।

ॐ तस्माऽअरङ्गमाम वो यस्य क्षयाम जिन्वथ । आपो जनयथा च नः ॥३॥

इति तृतीयवारं पूरयेत् ।

अथाचार्यो: माणवकं प्रति सूर्यमुदीक्षस्वेति प्रैषं ददाति । माणवकश्च सूर्यमुदीक्षन्-

सूर्यावलोकनम्

(पिताले सूर्य देखाउने)

तच्चक्षुरिति दध्यङ्ङाथर्वणऋषिरुष्णिक्छन्दः सूर्यो देवता सूर्योदीक्षणे विनियोगः ।

ॐ तत्त्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतञ्जीवेम शरदः शत ँ शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः श्याम शरदः शतम्भूयश्च शरदः शतात् । इति सूर्यं पश्येत् ।

अथाचार्यो माणवकस्य दक्षिणांसोपरि स्वदक्षिणं हस्तं नीत्वा हृदयमालभते अनेन मन्त्रेण–

हृदयालम्भनम्

(हृदयमा छुने)

मम व्रते ते इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो बृहस्पतिर्देवताहृदयालम्भने विनियोगः ।

ॐ मम व्रते ते हृदयं दधामि । मम चित्तमनुचित्तं ते अस्तु ।

मम वाचमेकमना जुषस्व । बृहस्पतिष्ट्वा नियुनक्तु मह्यम् ॥ इति ॥ (पहिले गुरुले सोध्ने अनि कुमारले भन्ने)

अथाचार्यो माणवकस्य साङ्गुष्ठं दक्षिणहस्तं गृहीत्वा "को नामासि" एवं पृष्टः कुमारः "अमुशर्माहं भो ३" इति प्रत्याह । पुनराचार्यो माणवकं पृच्छति "कस्य ब्रह्मचार्यसि" "भवतः" इति माणवकेनोच्यमाने-

इन्द्रस्येति प्रजापतिर्ऋषिः यजुश्छन्दः लिङ्गोक्ता देवता पाठे विनियोगः ।

ॐ इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तव अमुकशर्म्मन् ३ ।

इति आचार्यः पठेत् । अथैनं कुमारं भूतेभ्यः परिददत्याचार्यः-

रक्षणम्

(वटुकलाई निहुरिन लगाउने)

प्रजापतये त्वेति प्रजापतिर्ऋषिः षट्यजूंषि लिङ्गोक्ता देवता रक्षणे विनियोगः ।

ॐ प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधिभ्यः परिददामि द्यावापृथिवीभ्यान्त्वा परिददामि विश्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्यै । ॥ इति ॥

अथ कुमारोऽग्निं प्रदक्षिणं परीत्य आचार्यस्योत्तरत उपविशति । अथाचार्यो ब्रह्मोपवेशनादि पर्युक्षणान्तं कर्म कुर्यात् । अग्नेर्दक्षिणस्यां दिशि स्थापिते वारणादियज्ञीयदारुनिर्मिते पीठासने प्रागग्रान् कुशानास्तीर्य अग्नेरुत्तरतः प्राङ्मसखमासीनं कर्मतत्वज्ञं ब्राह्मणं तद्भावे पञ्चाशत्कुशनिर्मितमुदङ्मुखमासीनं ब्रह्माणमनुलेपनपुष्पमाल्यवस्त्रादिभिः सम्पूज्य अमुकगोत्रस्यामुकशर्मणो मम अमुकनाम्नः कुमारस्य उपनयनहोमकर्मणि कृताकृतावेक्षणरुप-ब्रह्मकर्मकर्त्तूममुकगोत्रममुकशर्माणं ब्राह्मणमेभिश्चन्दनाक्षतपुष्पपूगीफलादिभिर्ब्रह्मत्तवेन त्वामहं वृणे ॥ इति वृणुयात् ॥ ब्रह्मा च वृतोऽस्मि इत्युक्त्वा अग्नेः पूर्वेणागत्य पूर्वस्थापिते आसनेऽग्न्यभिमुखमुपविशेत् ॥ ततः पिता वितस्तिमात्रं भुवं विहायाग्नेर्वायव्ये उत्तरत्र च प्रागग्रैः कुशैरासनद्वयं कल्पयित्वा, प्रणीतापात्रं दक्षिणहस्तेन वामहस्ते पूर्वाग्रं निधाय, दक्षिणहस्तोद्धृतपात्रस्थोदकेनात्माभिमुखं पूरयित्वाऽग्नेर्वायव्यासने निधाय, दक्षिणहस्तानामिकयाऽऽलभ्यः कुशैराच्छाद्य ब्राह्मणो मुखमवलोक्य उत्तरासने निदध्यात् । ततो बर्हिषो मुष्टिमादायाग्नेः पुरस्तात्पूर्वाग्रैरुदक्संस्थं दक्षिणतः प्रागग्रैरुदकसंस्थं पश्चात्प्रागग्रैरुदक्संस्थमुत्तरतः प्रागग्रैरुदक्संस्थं बर्हिर्भिः परिस्तरणं कुर्यात् । अग्निसमीपे

उदगग्राः प्राक्संस्थाः प्रयोजनवन्तः पदार्थाः समिधः, पर्युक्षणार्थमुदकं, भिक्षापात्रं चोपकल्प्यः तत आसादिते कुशपत्रे गृहीत्वा, अग्रतः प्रादेशमात्रं विहाय, तयोरुपरि आसादितानि त्रीणि कुशतरुणानि तिर्यङ्निधाय, पवित्रमूलेन पवित्रे प्रदक्षिणमावेष्टय, त्रयाणां मूलाग्राणि द्वयोर्मूलानि च दक्षिणहस्तेन पवित्रे वामहस्तेन परिगृह्य छित्वा द्वयोर्मूलं त्रीणि चोत्तरतः क्षिपेत् । ततः प्रोक्षणीपात्रं प्रणीताया उत्तरतो निधाय तत्र प्रणीतोदकं सपवित्रहस्तेन त्रिर्निक्षिप्य, तदुदकं पवित्राभ्यां प्रादेशमात्रमूर्ध्वं क्षिप्त्वा, पवित्रे प्रोक्षणीपात्रे निधाय प्रोक्षणीपात्रं दक्षिणाहस्तेन वामहस्ते निधाय तदुदकं दक्षिणहस्ताङ्गुष्ठानामिकाभ्यां त्रिरुर्ध्वोर्ध्वं क्षिप्त्वा प्रणीतोदकेन प्रोक्षेत् ॥ इत्थं संस्कृतेन प्रोक्षण्युदकेनाऽऽसादितानि न्युब्जानि पात्राणि उत्तानीकृत्य आज्यस्थाल्यादीनि पूर्णपात्रपर्यन्तान्येकैकशस्त्रिः पोक्ष्यासञ्चरे प्रणीताग्न्योरन्तराले प्रोक्षणीपात्रं निदध्यात् ॥ तत आज्यस्थालीमग्नेः पश्चान्निधाय, तत्र आसादितमाज्यमात्माभिमुखं प्रक्षिप्य, तत आज्यस्थालीमग्नावारोप्य, ज्वलदुल्मुकमाज्यस्योपरि समन्तादीशानीमारभ्य प्रदक्षिणं भ्रामयित्वाग्नौ प्रक्षिप्योदकं स्पृष्ट्वेतरथाहस्तमावर्त्तयेत् ॥ ततः पिता दक्षिणहस्तेन स्रुवमादाय पूर्वाग्रमधोबिलमग्नौ तापयित्वा वामे पाणावुत्तानबिलं निधाय दक्षिणहस्तधृतमध्यानां संमार्जनकुशानामग्रैर्मूलतोऽग्रपर्यन्तं, मूलैरग्रतो मूलपर्यन्तं संमृज्य, संमार्जनकुशानुत्तरतो निरस्य, प्रणीतोदकेन न्युब्जपाणिनाभ्युक्ष्य, पुनः पूर्ववत्प्रतप्योदकं स्पृष्ट्वा दक्षिणतः स्वसमीपे कुशोपरि निदध्यात् ॥ ततः आज्यमुत्थाप्य प्रथमतोऽग्नेरुत्तरतः प्रोक्षणीपात्रस्य पश्चाद्भागे स्थापयित्वा, ततोऽग्नेः पश्चादानीय पवित्राभ्यां किञ्चिदाज्यं प्रादेशमात्रमूर्ध्वं क्षिप्त्वा, आज्यमवलोक्यापद्रव्ये सति तनिनरस्य, प्रोक्षणीश्च पूर्ववदुत्पयूय, प्रोक्षणीषु पवित्रे निदध्यात् ॥ उपयमनकुशान् दक्षिणपाणिना वामपाणौ निधाय, पूर्वमासादितास्तिस्रः समिध आदायोत्थायाग्नौ प्रागग्राः प्रक्षिप्य, दक्षिणचुलुकगृहीतेन सपवित्रेणाशेषेण प्रोक्षण्युदकेनाग्निमीशानाद्युदक्पर्यन्तं परिषिच्य हस्तमितरथावर्त्य, पवित्रे प्रणीतासु निदध्यात् ॥ ततः पिता आधारादिचतुर्दशाहुतिषु संसंवधारणाय पात्रमग्निप्रणीतापात्रयोर्मध्ये निधाय, ब्रह्मणा कुशेन दक्षिणे बाहौ अन्वारबधः पातितदक्षिणजानुः उपयमनुकशान् वामहस्ते निधायोत्तानेन दक्षिणहस्तेन शङ्खमुद्रया मध्यमूलयोर्मध्ये घृतेन सुंवेणाज्येन-

(उपनउनको वेदिमा हवन गर्ने)

ॐ प्रजापतय इति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ।

ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम इति मनसा ॥

अग्नेरुत्तरभागे प्राञ्चमृजुमूर्ध्वं सन्ततधारं पूर्वाधारं हुत्वाऽवशिष्टं संस्रवं पात्रे निक्षिपेत् ।

ॐ इन्द्रायेति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः ॥

ॐ इन्द्राय स्वाहा । इदमिन्द्राय न मम ॥ अग्नेर्दक्षिणभागे पूर्ववदुत्तराधारं जुहुयात् ।

ॐ अग्नय इति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः ॥

ॐ अग्नये स्वाहा । इदमग्नये न मम ॥

इत्याग्नेयमाज्यभागमुत्तरार्धपूर्वार्धे । समिद्धतमे वाग्निप्रदेशे सर्वत्र जुहुयात् ।

ॐ सोमायेति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमोदेवता आज्यहोमे विनियोगः ।

ॐ सोमाय स्वाहा । इदं सोमाय न मम । इति सौम्यमाज्यभागं दक्षिणार्धपूर्वार्धे जुहुयात् ।

ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्भश्छन्दांसि अग्निवायुसूर्या देवता आज्यहोमे विनियोगः ॥

ॐ भूः स्वाहा । इदमग्नये न मम । ॐ भुवः स्वाहा । इदं वायवे न मम ।

ॐ स्वः स्वाहा । इदं सूर्याय न मम ॥

ॐ त्वन्नोऽअग्न इति मन्त्रस्य वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनियोगः ॥

ॐ त्वन्नोऽअग्नेवरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः ॥

यजिष्ठोवन्हितमः शोशुचानोविश्वा द्वेषा ꣳसि प्रमुमुग्ध्यस्मत्स्वाहा ॥

इदमग्नीवरुणाभ्यां न मम ॥

ॐ सत्वन्नोऽअग्न इति मन्त्रस्य वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनियोगः ॥

ॐ सत्वन्नोऽअग्ने वमो भवोती नेदिष्टोऽअस्याऽउषसो व्युष्टौ ॥

अवयक्ष्व नो व्वरुण ꣳ रराणोव्वीहि मृडीक ꣳ सुहवो नऽएधि स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥

ॐ अयाश्चाग्न इति मन्त्रस्य वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः ॥

ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि ॥

अया नो यज्ञं वहास्ययानो धेहि भेषज ꣳ स्वाहा ॥ इदमग्नये न मम ॥

ॐ येतेशतमिति मन्त्रस्य वामदेव ऋषिस्त्रिष्टुप्छन्दो वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवता आज्यहोमे विनियोगः ॥

ॐ ये ते शतं वरुणं ये सहस्रं यज्ञिया पाशा विततता महान्तः ॥

तेभिर्नोऽअद्य सवितोतविष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम ।

ॐ उदुत्तममिति मन्त्रस्य शुनः शेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता आज्यहोमे विनियोगः ॥

ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यम ꣳ श्रथाय ।

अथा वयमादित्यव्रते तवानागसोऽअदितये स्याम स्वाहा ॥ इदं वरुणाय न मम ॥

ॐ प्रजापतय इति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ॥

ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम ॥

ॐ अग्नये स्विष्टकृदिति मन्त्रस्य प्रजापतिर्ऋषिर्गायत्रीछन्दोऽग्निर्देवता स्विष्टकृद्धोमे विनियोगः ॥

ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते न मम ॥

ततः संश्रवं प्राश्याचम्य पवित्राभ्यां मुखं मार्जयित्वा पवित्रे अग्नौ क्षिपेत् ॥

ततः पूर्णपात्रमादायः

(पूर्णपात्र दान गर्ने)

ममामुकनाम्नः कुमारस्य उपनयनाङ्गहोमकर्मणि कृताकृतावेक्षणरुपब्रह्मकर्मप्रतिष्ठार्थमिदं तण्डुलपूर्णपात्रं प्रजापतिदैवतम-मुकगोत्रायामुकशर्मणे ब्रह्मणे तुभ्यमहं संप्रददे ॥ ब्रह्मा च स्वस्ति ब्रूयात् ॥ ततः- (प्रणीताको जलले सेचन गरिदिने)

ॐ सुमित्रिया दुर्मित्रिया इति मन्त्रद्वयस्य प्रजापतिर्ऋषिर्यजुरापो देवता प्रणीताविमोके विनियोगः ॥

ॐ सुमित्रिया नऽआपऽओषधयः सन्तु । इति प्रणीताजलेन कर्तुः शिरोऽभिषिच्य, ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्च वयं द्विष्मः । (प्रणीता घोप्ट्याउने)

प्रणीतापात्रं सावशिष्टजलमैशान्यां न्युब्जीकुर्यात् । तत आस्तृतं बर्हिः आस्तरण क्रमेण उत्थाप्य-

ॐ देवा गातुविद इति मन्त्रस्य वनस्पतिर्ऋषिर्विराट्छन्दो वातो देवता बर्हिर्होमे विनियोगः ।

ॐ देवा गातुविदो गातुं वित्वा गातुमित । मनसस्पतऽइमन्देव यज्ञꣳस्वाहा वाते धाः स्वाहा ॥

इदं प्रजापतये न मम । हस्तेन जुहुयात् ।

अनुशासनशिक्षा

(पहिले पिताले भन्ने अनि कुमारले भन्ने)

यथा पिता "ब्रह्मचारी असि", कुमार "असानि" (भवानी), पिता "आपोशान", कुमार "अश्नानि", पिता "कर्म कुरु", कुमार "करवाणि", पिता "मा दिवा सुषुप्थाः", कुमार "न स्वपामि", पिता "वाचं यच्छ", कुमार "यच्छामि", पिता "समिधमाधेहि", कुमार "आदधानि", पिता "अपोऽशान", कुमार "अश्नानि", ततः पिता लग्नदोषसत्वे तत्परिहाराय लग्नात्सर्वारिष्टगोदानं कुर्यात् ।

लग्नगोदानम्

(गोदान गर्ने)

अद्येहामुकोऽहं अमुकनाम्नः कुमारस्य सावित्रीग्रहणलग्नात् अनिष्टस्थानस्थितैः ग्रहैः सूचितारिष्टनिवृत्तिद्वारा शुभफलप्राप्तये ग्रहाणां प्रीतये इमां गां रुद्रदैवत्यां तत्प्रत्याम्नायीभूतं सुवर्णं वन्हिदैवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । ॐ तत्सन्न मम इति । अथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखोपविष्टाय उपसन्नाय गुरुं समीक्षमाणाय गुरुणा समीक्षिताय दक्षिणतस्तिष्ठत आसीनाय वा स्वयं पूर्वाभिमुखो गुरुः । अथ गुरो : पादावुपसङ्गृण्हीयात् । उपसङ्ग्रहणप्रकारश्च- अभिवादक उत्ताने वाममणिबन्धे उत्तानं दक्षिणमणिबन्धं निधाय पूर्वं स्वकर्णौ स्पृशन्नभिवादयेत् ।

गुरोरभिवादनम्

(गुरुपट्टि निहुरिने)

अमुकगोत्रोऽमुकप्रवरोऽमुकवेदान्तर्गतामुकशाखाध्यायी अमुकशर्म्माहं भो गुरो त्वामभिवादये । गुरुश्च आयुष्मान्भव सौम्यामुकशर्म ३ न् इत्याशिषं प्रयुञ्जीत ।

सावित्रीदानम् मन्त्रदानम् वा

(गायत्री मन्त्र दान गर्ने)

प्रणवस्य ब्रह्मा ऋषिर्दैवीगायत्री छन्दः, परमात्मा देवता, व्याहृतीनां प्रजापतिर्ऋषिः गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवता गायत्र्या विश्वामित्रऋषिर्गायत्रीछन्दः सविता देवता सावित्रीदाने विनियोगः इत्यार्षादिकं स्मृत्वा प्रणवव्याहृतिपूर्वं गायत्रीं ब्रूयात् । तद्यथा- (गायत्री मन्त्र सुनाउने)

ॐ भूर्भुवः स्वः तत्सवितुर्वरिण्यं इति प्रथमवारम् ।

ॐ भूर्भुवः स्वः तत्सवितुर्वरिण्यं भर्गो देवस्य धीमहि । इति द्वितीयवारम् ।

ॐ भूर्भुवः स्वः तत्सवितुर्वरिण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ।

इति तृतीयवारं सर्वां गायत्रीं प्रतिब्रूयात् ॥ इति ब्रह्मगायत्री ॥ क्षत्रियाय त्रिष्टुप्छन्दस्कां बृहस्पतिदृष्टां सवितृदैवत्यां "देव सवितः" इत्यादिकामृचं ब्रूयात्। यथा- (क्षत्रिय गायत्री)

ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाजं नः स्वदतु ॥

॥ इति क्षत्रिय गायत्री ॥

वैश्याय श्यावाश्वदृष्टां जगतीछन्दस्कां सवितृदेवत्यां विश्वा रुपाणीति ऋचं ब्रूयात्। (वैश्य गायत्री)

ॐ विश्वा रुपाणि प्रतिमुञ्चते कविः प्रासावीद् भद्रं द्विपदे चतुष्पदे।
विनाकमख्यत्सविता वरेण्योऽनुप्रयाणमुषसो विराजति ॥ इति वैश्यगायत्री ॥

"सर्वेषां वा गायत्रीम्" इति सूत्रवचनात् गायत्रीमेव। (सङ्कल्प गर्ने र गुरुलाई भेटी दक्षिणा दिने)

ततो ब्रह्मचारी स्वाचार्याय वरं दद्यात्। अद्येह- अमुकशर्मा (अमुकवर्मा अमुकगुप्तो वा) अहं कृतैतद्गायत्रीग्रहणकर्मणः साद्गुण्यार्थमिदं सुवर्णमग्निदैवतं वररुपेणाचार्याय तुभ्यमहं सम्प्रददे। इति सङ्कल्प्य गुरोः पादयोः प्रणिपत्य समर्पयेत्। गुरुरप्याशीर्भिरभिनन्द्य अधीतानिराकरणं कारयेत्।

गुरोरभिवादनम् वटुशिक्षणञ्च

(गुरुलाई अभिवादन गर्ने)

यथा, अथातोऽधीत्यानिराकरणम्– प्रतीकं मे विचक्षणं जिह्वा मे मधुमद्वचः । कर्णाभ्यां भूरि शुश्रुवे मा त्वाहार्षीच्छुतम्मयि। ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोऽसि सनिरसि शान्तिरस्यनिराकरणमसि ब्रह्मक्रोशमे विश। वाचा त्वापिदधामि। वाचा त्वापिदधामि। तिष्ठ प्रतिंस्वरकरणदन्त्यौष्ठ्यकण्ठ्यौरसमेधा माधुर्यग्रहणधारणोच्चारणशक्तिर्म्मयि भवत्वाप्यायन्तु। मेऽङ्गानि वाक्प्राणश्चक्षुःश्रोत्रं यशोबलं यन्मे श्रुतमधीष्ठितन्तन्मे मनसि तिष्ठतु तिष्ठतु ॐ।

इति वटुं वाचयेदेतदधीतानिराकणं नाम। ततो ब्रह्मचारी कालोपस्थितां मध्याह्नसन्ध्यामुपास्य समिदाधानं कुर्यात्।

समिदाधानम्

(पाँचओटा समिधा घ्यूमा चोबेर वटुकले लिने)

ततो ब्रह्मचारी अग्नेः पश्चादुपविश्य प्रथमतोऽग्निं पञ्चभिर्मन्त्रैः सन्धुक्षयति। पाणिनाऽग्निं परिसमूहयति समृद्धीकरोतीत्यर्थः। पाणिनेति स्रुवादेर्निरासः।

अग्ने सुश्रव इत्यादीनां पञ्चानां ब्रह्माऋषिः पञ्चयजूंषि अग्निर्देवता परिसमूहने विनियोगः।

ॐ अग्नेसुश्रवः सुश्रवसं मा कुरु ॥१॥ (पहिलो समिधा हवन गर्ने)

ॐ यथा त्वमग्ने सुश्रवः सुश्रवाऽसि ॥२॥ (दोस्रो हवन गर्ने)

ॐ एवं मा ꣳसुश्रवः सौश्रवसं कुरु ॥३॥ (तेस्रो हवन गर्ने)

ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपाऽअसि ॥४॥ (चौथो हवन गर्ने)

ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासम् ॥५॥ (पाँचौं हवन गर्ने)

इत्यग्निं परिसमूह्य। तत उपकल्पितोदकेन प्रदक्षिणमग्निं पर्युक्ष्योत्थाय अग्नय इति मन्त्रेण समिधमादधाति।

अग्नय इति प्रजापतिर्ऋषिराकृतिश्छन्दः समिद्देवता समिदाधाने विनियोगः । (तीनओटा समिधा हवन गर्ने)

ॐ अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिद्धचसऽएवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासꣳस्वाहा ।

इत्येकां समिधं जुहुयात् । एवं द्वितीयां तृतीयां च समिधं होमयित्वा ततस्तूष्णीमुपविश्य पूर्ववत् । अग्ने सुश्रव इत्यादि पञ्चभिर्मन्त्रैः परिसमूहनम् ।

अद्भिरग्नेः पर्युक्षणम्

(जल अग्निमा घुमाउने)

उपकल्पिताभिरद्भिः प्रदक्षिणं पर्युक्षणं च विधाय तूष्णीं पाणी प्रतप्य मुखं विमार्ष्टि यथा ।

मुखविमर्शनम्

(अग्निको राप तापे र मुख पुछ्ने)

तनूपाऽअग्ने इत्यादीनां बृहद्देवा ऋषयस्त्रिष्टुप्छन्दोऽग्निर्देवता मुखविमर्शने विनियोगः ।

ॐ तनूपाऽअग्नेसि तन्वं मे पाहि । ॐ आयुर्दाऽग्नेस्यायुर्मे देहि । ॐ वर्च्चोदाऽग्नेसि वर्च्चो मे देहि । ॐ अग्ने यन्मे तन्वाऽऊनन्तन्मऽआपृण । ॐ मेधां मे देवः सविताऽआदधातु । ॐ मेधां देवी सरस्वती आदधातु । ॐ मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ ।

इति सप्तभिर्मन्त्रैः प्रतिमन्त्रं ललाटादिचिबुकपर्यन्तं मुखं प्रोञ्छति (स्पृशेदिति हरिहरः) ।

अङ्गालम्भनम्

(शिरदेखि पाउसम्म छुने)

ततः "अङ्गानि च मऽआप्यायन्ताम्" इति बाहुभ्यां सर्वाङ्गं शिरस आपादमालभते ।

"वाक्चम आप्यायताम्" इति मुखे । (मुखमा छुने)

"प्राणश्च मऽआप्यायताम्" इति नासिकायाम् । (नाकमा छुने

"चक्षुश्चमंऽआप्यायताम्" इति नेत्रयोः । (आँखामा छुने)

"श्रोत्रं च मऽआप्यायताम्" इति श्रोत्रयो : । (कानमा छुने)

"यशोबलं च मऽआप्यायताम्" इति बाह्वोः । (कुममा छुने)

तिलककरणम्

(अग्निको खरानी लगाउने)

ततोऽनामिकया अग्नेर्भस्म गृहीत्वा त्र्यायुषं कुरुते । त्र्यायुषमिति नारायणऋषिरनुष्टुप्छन्दोऽग्निर्देवता त्र्यायुषकरणे विनियोगः ।

ॐ त्र्यायुषञ्जमदग्नेः, इति ललाटे । (निधारमा लगाउने)

ॐ कश्यपस्य त्र्यायुषम, इति ग्रीवायाम् । (घाँटीमा लगाउने)

ॐ यद्देवेषु त्र्यायुषम, इति दक्षिणांसे । (दायाँ र बायाँ कुममा लगाउने)

ॐ तन्नोऽअस्तु त्र्यायुषम्, इति हृदि । (हृदयमा लगाउने)

अग्न्यभिवादनम्

(शिर निहुऱ्याई अग्नि र जललाई अभिवादन गर्ने)

अमुकगोत्रोऽमुकप्रवरो यजुर्वेदान्तर्गताऽमुकशाखाध्यायी अमुकशर्माहं भो वैश्वानर त्वामभिवादये ।

भो वरुण त्वामभिवादये ।

गुरोरभिवादनम्

(गुरुलाई अभिवादन गर्ने)

ततो व्यत्यस्तपाणिभ्यां गुरोः पादौ दक्षिणेन पाणिना दक्षिणं पादं, वामेन वामं स्पृशन्नभिवादयेत् । अमुकगोत्रोऽमुकप्रवरो यजुर्वेदान्तर्गतामुकशाखाध्यायी अमुकशर्माहं भो गुरो त्वामभिवादये । इति वाक्यमुक्त्वा शिरसाऽभिवादयेत् । अभिवादितो गुरुश्च आयुष्मान्भव सौम्यामुकशर्म ३ न् इत्याशिषं दद्यात् । इति गुरुवन्दनं विधाय, अथान्यानप्यभिवादयेत् ।

मान्यजनाभिवादनञ्च

(मान्यजनहरूलाई अभिवादन गर्ने)

ते च विद्यावयस्तपोवृद्धा अभिवाद्याः । तत्र स्मृतयः -

ततोऽभिवादयेद्वृद्धानसावहमिति ब्रुवन् । मातुलाश्च पितृव्याश्च श्वशुरास्तत्स्त्रियस्तथा ॥
प्रत्युत्थायाभिवाद्याः स्युर्ज्येष्ठभ्रातर एव च । गुरुमातास्तन्यदात्री पित्रादित्रयमेव च ॥
अन्नदाता भयत्राता मन्त्रविद्योपदेशकः । एते नित्याऽभिवाद्याः स्युः सपत्नीकाः शुभार्थिना ॥
विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः । विप्रोष्य विप्रं कुशलं पृच्छेन्नृपमनामयम् ॥
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥

अथाभिवादनानर्हाः-

उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भघातिनीम् । पाखण्डं पतितं व्रात्यं महापातकिनं शठम् ॥
नास्तिकं कितवं स्तेनं कृतघ्नं नाभिवादयेत् । मत्तं प्रमत्तमुन्मत्तं धावन्तमशुचिं नरम् ।
वमन्तं जृम्भमाणं च कुर्वन्तं दन्तधावनम् । अभ्यक्तं शिरसि स्नानं कुर्वन्तं नाऽभिवादयेत् ॥
जपयज्ञस्थलस्थं च समित्पुष्पकुशानलान् । उदपात्रार्घ्यभक्षान्नं वहन्तं नाभिवादयेत् ॥
अभिवाद्य द्विजश्चैतानहोरात्रेण शुद्ध्यति ॥

शूद्राभिवादने तु त्रिरात्रेण । केचित्तु अभिवादनात्पूर्वं सन्ध्योपासनमामनन्ति । तत्र ब्रह्मचारी सन्ध्यामुपास्याऽग्निकार्यं गुरुपसंग्रहणं वृद्धेभ्यो नमस्कारं च कृत्वा भिक्षार्थं गच्छेत् ।

भिक्षादानम्

(भिक्षादान गर्न तयार हुने)

तदुक्तं याज्ञवल्क्येन –

गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः । आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत् ॥
आदिमध्यवसानेषु भवच्छब्दोपलक्षिता । ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमम् ॥ ॥ इति ॥

सूत्रं च –

भवत्पूर्वां ब्राह्मणो भिक्षेत । भवन्मध्यां राजन्यः । भवदन्त्यां वैश्यः । (भिक्षा माग्ने र आमाहरूले दिने)

तिस्रोऽप्रत्याख्यायिन्यः षट् द्वादश अपरिमिता वा मातरं प्रथमाम् इति। "भवति भिक्षां मे देहि" इति ब्राह्मणो याचेत। "भिक्षां भवति मे देहि" इति राजन्यः। "भिक्षां मे देहि भवति" इति वैश्यः। "भो गुरो इयं भिक्षा मया लब्धा" इति गुरवे निवेदयेत्। ॥ इति भिक्षा ॥ (भिक्षा गुरुलाई दिने)

ब्रह्मचारिनियमाः

(वटुकले पालना गर्नु पर्ने नियमहरू)

अथ ब्रह्मचारिनियमान् ब्रह्मचारिणे श्रावयेत्। अथ ब्रह्मचारिणो नियमान्वक्ष्यामः। अधः शाय्यक्षारालवणाशी स्यात् दण्डधारणमग्निपरिचरणं गुरुशुश्रूषां भिक्षाचरणं च कुर्यात्। मधुमांसमज्जनोपर्यासनस्त्रीगमनानृतादत्तादानानि वर्जयेत्।

अस्यार्थः– अधःशायी स्यात् खट्वादौ न शयीतेत्यर्थः। अक्षारं क्षारं तैलतक्रादि तद्वर्जितम्। अलवणं लवणवर्जितं च अश्नीयात्। दण्डधारणं स्ववर्णविहितदण्डधारणं कुर्यात्। अग्निपरिचरणं पूर्वोक्तसमिदाधानं तच्च सायंप्रातः कुर्यात्। गुरुशुश्रूषां मनोवाक्कायकर्मभिर्हितसम्पादनं गुरोः कुर्यात्। भिक्षाचरणं सायंप्रातर्भोजनार्थं कुर्यात्। मधु क्षौद्रं मांसं पललं मज्जनं नद्यादावाप्लवनं स्नानं तूद्धृतोदकेन उपर्यासनं गुवदिः सान्निध्ये उच्चासनस्थितिं पीठे पीठं निधायासनं वा न कुर्यात्। स्त्रीगमनं हावभावादिभिः। स्त्रीणां मध्ये अवस्थानम्। अनृतं मिथ्याभाषणं वृथाभाषणं वा अदत्तानां द्रव्याणाम् आदानं ग्रहणं तृणादेरपि स्तेयः तं वर्जयेत्। आदिशब्देन पर्युषितान्नमुच्छिष्टभोजनं ताम्बूलं दन्तधावनमबसक्तिकां दिवास्वापं छत्रमुपानहौ द्यूतं, नृत्यं, गीतं, वाद्यं, माल्यमुद्वर्तनमनुलेपनं, जलक्रीडां च वर्जयेत्।

कौपीनमहतं धार्यं खण्डं वा वस्त्रपार्श्वयुक्। नष्टे भ्रष्टे नवं मन्त्राद्धृत्वा भ्रष्टं जले क्षिपेत्॥

यज्ञोपवीतमजिनं मौञ्जीं दण्डं च धारयेत्।

संध्याकालातिक्रमे स्नानं प्रणायामत्रयं कृत्वा गायत्र्यष्टशतं च जपित्वा संध्यां विदध्यात्। लोपेत्वयुतं जपेत् इति। ततो होमदक्षिणा –

अद्येहामुकोहं अमुक कुमारस्योपनयनाङ्गहोमकर्मणः साद्गुण्यार्थं इदं सुवर्णं तन्निष्कयीभूतं द्रव्यं सरस्वती (वनस्पती) दैवतम् आचार्याय ब्राह्मणाय तुभ्यं संप्रददे। ॐ तत्सत्। इति दत्त्वा आशीषं प्रतिगृह्णीयात्।

वेदारम्भः

(वेदारम्भको वेदीमा हवन गर्ने)

अथ वेदारम्भः वेदारम्भस्तु प्रथमं स्ववेदस्यैव कार्यः।

गौतमः

अधीत्य शाखामात्मीयां परशाखां ततः पठेत्। पारंपर्यागतो येषां वेदः सपरिबृंहणः॥

तच्छ्राखं कर्म कुर्वीत तच्छ्राखाध्ययनं तथा। एवमध्ययनं कुर्वन् ब्रह्मसायुज्यमाप्नुयात्॥

सपरिबृंहणः सकल्पः वेदारम्भस्तूपनयनानन्तरं कार्यः।

तत्र योगियाज्ञवल्क्यः

उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम्। वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्॥ ॥ इति ॥

अथ प्रयोगः

आचार्यो वेदारम्भवेदीसमीपमागत्योपविश्याचम्य गणेशं नमस्कृत्य पञ्चभूसंस्कारपूर्वकं अग्निस्थापनं विधाय ब्रह्मोपवेशनादिपर्युक्षणान्तं कर्म कुर्यात्।

पिता आचम्य गोदानं कृत्वा वेदीं दर्भैस्त्रिः परिसमुह्य तानैशान्यां परित्यज्य, गोमयोदकेन उपलिप्य, स्रुवमूलेन स्फ्येन वा प्रादेश दीर्घाः स्थण्डिलप्रमाणा वा प्रागग्रा उदकसंस्थास्तिस्रो रेखाः कृत्वा, अनामिकाङ्गुष्ठाभ्यां ययोल्लेखं पांसूनुद्धृत्य उर्ध्वं क्षिप्त्वा, उदकेन वेदीं न्युब्जपाणिनाभिषिच्य, कांस्यपात्रे निहितं कांस्यपात्रेण पिहितमग्नि वेद्या आग्नेयभागे निधाय क्रव्यादांशं ॐ क्रव्यादाय नमः निर्ऋतिदिशि परित्यज्य, स्थण्डिले स्वाभिमुखं स्थापयितवा, अग्न्यानयनपात्रे साक्षतमुदकं क्षिपेत्। अग्नेर्दक्षिणदिक्स्थ आसने प्रागग्रान् षड्दर्भानास्तीर्य, अग्नेरुत्तरतः प्राङ्मुखं कर्मतत्वज्ञं ब्राह्मणं चन्दनाक्षतपुष्पवस्त्रद्रव्यादिभिः सन्तोष्य, अद्येहामुकगोत्रोऽमुकशर्माहममुकगोत्रस्य अमुकनाम्नो बटोर्वेदारम्भकर्माहं करिष्ये। तदङ्गहोमकर्मणि अमुकगोत्राऽमुकशर्मन् त्वं मे ब्रह्मा भव। वदेत्। ब्रह्मा च भवामि इत्युक्त्वां अग्नेः पूर्वेणागत्य पूर्वस्थापितासने उपविशेत्। ततो वितस्तिमात्रीं भुव्रं विहाय, अग्नेर्वायव्ये उत्तरे च प्रागग्रैः कुशैरासनद्वयं कल्पयित्वा, प्रणीतापात्रं दक्षिणहस्तेन वामहस्ते पूर्ववन्निधाय दक्षहस्तोद्धृतपात्रस्थोदकेन आत्माभिमुखं पूरयितवा वायव्यासने निधाय, दक्षिणहस्तानामिकयाऽऽलभ्य अग्न्युत्तरासने निदध्यात्। ततो बर्हिर्मुष्टिमादाय चतुर्धा विभज्यैकैकभागेन आग्नेयादीशानान्तमुत्तराग्रं परिस्तीर्य पात्रादीन्यासादयेत्। पवित्रच्छेदनार्थं त्रीणि कुशतरुणानि पवित्रे साग्रेऽनन्तर्गर्भे कुशपत्रे द्वे, प्रोक्षणीपात्रम्, आज्यस्थाली, सम्मार्जनमुशास्त्रयः साग्राः, उपयमनकुशास्त्रयोदश, समिधस्तिस्त्रः प्रादेशमात्र्यः, पालाश्यः, स्रुवः, आज्यं गव्यम्, वेदपुस्तकम्, पूर्णपात्रम्, तत आसादिते कुशपत्रे गृहीत्वा, अग्रतः प्रादेशमात्रं विहाय, तयोरुपरि त्रीणि कुशतरुणानि तिर्यङ् निधाय पवित्रमूलेन पवित्रे प्रदक्षिणमावेष्टच त्रायणां मूलाग्राणि द्वयोर्मूलानि च दक्षिणहस्तेन, पवित्रे वामहस्तेन परिगृह्य छित्वा, द्वयोर्मूले त्रीणि चोत्तरतः क्षिपेत्। ततः प्रोक्षणीपात्रं प्रणीताया उत्तरोतो निधाय तत्र प्रणीतोदकं सपवित्रहस्तेन त्रिर्निक्षिप्य तदुदकं पवित्राभ्यां प्रादेशमात्रमूर्ध्वं क्षिप्त्वा पवित्रे प्रोक्षणीपात्रे निधाय प्रोक्षणीपात्रं दक्षहस्तेन वामहस्ते निधाय तदुदकं दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां त्रिरुर्ध्वोर्ध्वं क्षिप्त्वा प्रणीतोदकेन प्रोक्षेत्। प्रोक्षण्युदकेन आसादितानि न्युब्जान्युत्तानानि कृत्वा, एकैकशस्त्रिः प्रोक्ष्य, असंचरे प्रणीताग्न्योर्मध्ये प्रोक्षणीं निदध्यात्। तत आज्यस्थालीमग्नेः पश्चान्निधाय तत्र आसादितं आज्यमात्मभिमुखं प्रक्षिप्य, आज्यस्थालीमग्नावारोप्य ज्वलदुल्मुकमग्नौ प्रक्षिप्य उदकं स्पृष्ट्वा इतरथा हस्तमावर्तयेत्। दक्षहस्तेन स्रुवमादाय पूर्वाग्रमधोबिलमग्नौ तापयित्वा वामहस्ते उत्तानबिलं निधाय दक्षिणहस्तधृतमध्यानां संमार्जनकुशानुत्तरतो निरस्य प्रणीतोदकेन न्युब्जपाणिनाऽभ्युक्ष्य पूर्ववत् प्रतप्य उदकं स्पृष्ट्वा दक्षिणतः स्वसमीपे निदधयात्॥ ततः आज्यमुत्थाप्य अग्नेरुत्तरतः प्रोक्षण्याः पश्चाद्भागे संस्थाप्य, अग्नेः पश्चादानीय, प्रवित्राभ्यां किञ्चिदाज्यं प्रादेशमात्रमूर्ध्वं क्षिप्त्वा, आज्यमवलोक्य, अपद्रव्ये सति तन्निरस्य, प्रोक्षणीश्च पूर्ववदुत्पूय प्रोक्षण्डां पवित्रे निदध्यात्। उपयमनकुशान् दक्षहस्तेन वामहस्ते निधाय पूर्वमासादितास्तिस्रः समिध आदाय उत्थाय अग्नौ

प्रागग्राः प्रक्षिप्य, दक्षिणचुलुकगृहीतेन सपवित्रेणाशेषेण प्रोक्षण्युदकेन अगिन पर्युक्ष्य हस्तमितरथावर्त्य पवित्रे प्रणीतासु निदध्यात्। ततो ब्रह्मणा वामबाह्वौ कुशेनाऽन्वारब्धः पातितदक्षजानुः सोपयमनकुशं वामहस्तं द्वदि निधाय उत्तानेन दक्षिणहस्तेन शङ्खमुद्रया मध्यमूलयोमर्ध्ये धृतेन स्रुवेणाज्येन – (घ्यू हवन गर्ने)

ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः। ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम। सर्वत्र स्वाहान्ते द्रव्यप्रक्षेपः। इति मनसा अग्नेरुत्तरभागे प्राञ्चमृजुं दीर्घं संततधारं पूर्वाधारमाघारयित्वा।

ॐ इन्द्रायेति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः। ॐ इन्द्राय स्वाहा, इदं इन्द्राय न मम। अग्नेर्दक्षिणभागे पाञ्चमुत्तराघारं (इत्याघारौ)। ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः। ॐ अग्नये स्वाहा, इदमग्नये न मम।

अग्नेरुत्तरार्धपूर्वार्धे –

ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः। ॐ सोमाय स्वाहा, इदं सोमाय न मम। ॥ इति दक्षिणार्ध पूर्वार्धे ॥

एतावाज्यभागौ ततो ब्रह्मणाऽनन्वारब्धः ॥

अथ यजुर्वेदाहुतयः –

ॐ अन्तरिक्षाय स्वाहा। इदमन्तरिक्षाय न मम। ॐ वायवे स्वाहा। इदं वायवे न मम।
ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे न मम। ॐ छन्दोभ्यः स्वाहा। इदं छन्दोभ्यो न मम।
ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम। ॐ देवेभ्यः स्वाहा। इदं देवेभ्यो न मम।
ॐ ऋषिभ्यः स्वाहा। इदमृषिभ्यो न मम। ॐ श्रद्धायै स्वाहा। इदं श्रद्धायै न मम।
ॐ मेधायै स्वाहा। इदं मेधायै न मम। ॐ सदसस्पतये स्वाहा। इदं सदसस्पतये न मम।
ॐ अनुमतये स्वाहा। इदमनुमतये न मम।

अथ ऋग्वेदाहुतयः –

ॐ पृथिव्यै स्वाहा। इदं पृथिव्यै न मम। ॐ अग्नये स्वाहा। इदमग्नये न मम।
ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे न मम। ॐ छन्दोभ्यः स्वाहा। इदं छन्दोभ्यो न मम।
ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम। ॐ देवेभ्यः स्वाहा। इदं देवेभ्यो न मम।
ॐ ऋषिभ्यः स्वाहा। इदमृषिभ्यो न मम। ॐ श्रद्धायै स्वाहा। इदं श्रद्धायै न मम।
ॐ मेधायै स्वाहा। इदं मेधायै न मम। ॐ सदसस्पतये स्वाहा। इदं सदसस्पतये न मम।
ॐ अनुमतये स्वाहा। इदमनुमतये न मम ॥११॥

अथ सामवेदाहुतयः

ॐ दिवे स्वाहा । इदं दिवे न मम । ॐ सूर्याय स्वाहा । इदं सूर्याय न मम ।
ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा । इदं छन्दोभ्यो न मम ।
ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । ॐ देवेभ्यः स्वाहा । इदं देवेभ्यो न मम ।
ॐ ऋषिभ्यः स्वाहा । इदमृषिभ्यो न मम । ॐ श्रद्धायै स्वाहा । इदं श्रद्धायै न मम ।
ॐ मेधायै स्वाहा । इदं मेधायै न मम । ॐ सदसस्पतये स्वाहा । इदं सदसस्पतये न मम ।
ॐ अनुमतये स्वाहा । इदमनुमतये न मम ॥११॥

अथाथर्ववेदाहुतयः –

ॐ दिग्भ्यः स्वाहा । इदं दिग्भ्यो न मम । ॐ चन्द्रमसे स्वाहा । इदं चन्द्रमसे न मम ।
ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा । इदं छन्दोभ्यो न मम ।
ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । ॐ देवेभ्यः स्वाहा । इदं देवेभ्यो न मम ।
ॐ ऋषिभ्यः स्वाहा । इदमृषिभ्यो न मम । ॐ श्रद्धायै स्वाहा । इदं श्रद्धायै न मम ।
ॐ मेधायै स्वाहा । इदं मेधायै न मम । ॐ सदसस्पतये स्वाहा । इदं सदसस्पतये न मम ।
ॐ अनुमतये स्वाहा । इदमनुमतये न मम ॥११॥

भूभुर्वः स्व इति महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्भश्छन्दांसि अग्निवायुसूर्या देवता आज्यहोमे विनियोगः ।
ॐ भूः स्वाहा । इदमग्नये न मम ॥ ॐ भुवः स्वाहा । इदं वायवे न मम ॥
ॐ स्व स्वाहा । इदं सूर्याय न मम ।

त्वन्नोऽअग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दः अग्नीवरुणौ देवते आज्यहोमे विनियोगः ।
ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽवयासिसीष्ठाः । यजिष्ठो वन्हितमः शोशुचानो विश्श्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥

सत्वन्न इति वामदेवऋषिस्त्रिष्टुप्छन्दः अग्नीवरुणौ देवते आज्यहोमे विनियोगः ।
ॐ सत्वन्नोऽअग्नेऽवमो भवोती नेदिष्टोऽअस्याऽउषसो व्युष्टौ । अवयक्ष्व नो वरुणꣳ ररााणो वीहि मृडीकꣳसुहवो नऽएधि स्वाहा ॥ इदमग्नीवरुणाभ्याम् न मम ॥

अयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः ।
ॐ अयाश्चाग्नेस्यनभिशस्ति पाश्च सत्यमित्वमयाऽअसि । अया नो यज्ञं वहास्यया नो धेहि भेषजꣳस्वाहा ॥ इदमग्नये न मम ।

ये ते शतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणसवितृविष्णुर्विश्वेदेवा मरुतः स्वर्का देवता आज्यहोमे विनियोगः ।
ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्न्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम ।

उदुत्तममिति शुनःशेफऋषिस्त्रिष्टुप्छन्दो वरुणोदेवता आज्यहोमे विनियोगः ।
ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳश्रथाय । अथा वयमादित्यव्रते तवानागसोऽअदितये

स्याम स्वाहा ॥ इदं वरुणाय न मम ।

ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ।

ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम ।

ॐ अग्नये स्विष्टकृत् इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता स्विष्टकृद्धोमे विनियोगः ।

ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम । संश्रवप्राशनम्, ब्रह्मणे पूर्णपात्रदानम् ।

पूर्णपात्रदानसङ्कल्पः

(पूर्णपात्र पूजा गर्ने र दान गर्ने)

अद्येहामुकोऽहं अमुकनाम्नः कुमारस्य वेदारम्भाङ्गहोमकर्मणः साङ्गफलप्राप्तये अपूर्णस्यपूर्णार्थमिदं पूर्णपात्रं प्रजापतिदैवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यं संप्रददे । इति दद्यात् । ततः पवित्रप्रतिपत्तिः, प्रणीताविमोकः, बर्हिर्होमश्च ।

गणेशादीनां पूजनम्

(वेदको पुस्तकमा पूजा गर्ने)

अथ वेदारम्भक्रमो यथा – अद्येहामुकोहं अमुकशर्मणो माणवकस्य वेदारम्भकर्मणः पूर्वाङ्गत्वेन गणेशादीनां स्थापनावाहनपूजनानि करिष्ये । ताम्रस्थाल्यादौ दध्यक्षतान्गृहीत्वा उत्तरवृद्ध्या स्थापयेद् । ॐ भूर्भुव स्वः गणेश इहागच्छेह तिष्ठ पूजार्थं त्वामावाहयामि । ॐ भूर्भुवःस्वः विष्णो इहा ... । ॐ भूर्भुवःस्वः सरस्वती इहा ... । ॐ भूर्भुवःस्वः लक्ष्मि इहा ... । ॐ भूर्भुवःस्वः स्वविद्यासूत्रकार कात्यायन इहा ... । एतन्त इति प्रतिष्ठाप्य नाममन्त्रेण ध्यानादिनीराजनान्तं सम्पूज्य ततो ब्रह्मचारिणे यथाविधि वेदमध्यापयेत् । यथा अग्नेरुत्तरतो ब्रह्मचारिणमुदङ्मुखं प्राङ्मुखं वा प्रागग्रेषु कुशेषूपवेश्य स्मार्ताचमनं प्राणायामं बद्धाञ्जलिं च कारयित्वा ।

वेदाध्ययनम्

(वेदको ध्यान गर्ने)

ॐ कारपूर्वां महाव्याहृतिपूर्वां त्रिवारं गायत्रीं पठित्वा स्ववेदारम्भं कुर्यात् । तत्र ॐ इषेत्वादि खम्ब्रह्मान्तस्य माध्यन्दिनीयकस्य वाजसनेयस्य यजुर्वेदाम्नायस्य विवस्वान्ऋषिर्गायत्र्यादीनि सर्वाणि च्छन्दांसि सर्वाणि यजूंषि लिङ्गोक्ता देवता यजुर्वेदारम्भे विनियोगः ।

(वेद पढ्ने र पढाउने)

हरिः ॐ भूर्भुवःस्वः इषेत्वोर्ज्जे त्वा वायवस्थ देवो वः सविता प्रार्प्पयतु श्रेष्ठतमाय कर्मणऽआप्याय ध्वमघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मा मावस्ते नऽईशत माघशꣳसो ध्रुवाऽअस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥१॥ अथवा,

(अध्ययन गर्ने)

ॐ समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन्० ॥ ॐ वसोः पवित्रम् इति स्वल्पारम्भं कारयित्वा अध्यायादीन्प्रबूयात् । ॐ कृष्णोसि० ॥२॥ ॐ समिधाग्निम्० ॥३॥ ॐ एदम्० ॥४॥ ॐ अग्नेस्तनूः० ॥५॥ ॐ देवस्य त्वा० ॥६॥ ॐ वाचस्पतये० ॥७॥ ॐ उपयामगृहीतोसि० ॥८॥ ॐ देवसवितः० ॥९॥ ॐ अपोदेवाः० ॥१०॥ ॐ युञ्जानः प्रथमम्० ॥११॥ ॐ दृशानोरुक्मः० ॥१२॥ ॐ मयि गृह्णामि० ॥१३॥ ॐ ध्रुवक्षितिर्ध्रुवयोनिः० ॥१४॥ ॐ अग्ने जातान्० ॥१५॥ ॐ नमस्ते० ॥१६॥

ॐ अश्मन्नूर्ज्जम्० ॥१७॥ ॐ वाजश्च्च० ॥१८॥ ॐ स्वाद्वीन्त्वा० ॥१९॥ ॐ क्षत्रस्य योनिः० ॥२०॥
ॐ इमम्मे० ॥२१॥ ॐ तेजोसि० ॥२२॥ ॐ हिरण्यगर्ब्भः सम्० ॥२३॥ ॐ अश्श्वस्तूपरः० ॥२४॥
ॐ शादन्दद्भिः० ॥२५॥ ॐ अग्निश्च० ॥२६॥ ॐ समास्त्वा० ॥२७॥ ॐ होता यक्षत्० ॥२८॥
ॐ समिद्धोऽअञ्जन्० ॥२९॥ ॐ देव सवितः० ॥३०॥ ॐ सहस्रशीर्षा पुरुषः० ॥३१॥ ॐ तदेव० ॥३२॥
ॐ अस्याजरासः० ॥३३॥ ॐ यज्जाग्रतः० ॥३४॥ ॐ अपेतः० ॥३५॥ (जलस्पर्शः विष्णोर्वा स्मरणम्)
ॐ ऋचंवाचम्० ॥३६॥ ॐ देवस्य त्वा० ॥३७॥ ॐ देवस्य त्वा० ॥३८॥ ॐ स्वाहा प्राणेभ्यः० ॥३९॥
ॐ ईशावास्यमिद ँ सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥
ॐ हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । योसावादित्ये पुरुषः सोसावहम् । ॐ खम्ब्रह्म ॥४०॥
व्रतमुपैष्यन्नन्तरेणाहवनीयञ्च गार्हपत्यञ्च प्राङ्तिष्ठन्नप ऽउपस्पृशति तद्यदप ऽउपस्पृशत्यमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरन्तरतो मेद्धचा वाऽआपो मेद्धचो भूत्वा व्रतमुपायानीति पवित्रं वाऽआपः पवित्रपूतो व्रतमुपायनीति तस्म्माद्वाऽआप ऽउपस्पृशति सोग्गिनमेवाभीक्षमाणो व्व्रतमुपैति ॥१॥ ॐ प्राश्नीपुत्रादासुरिवासिनः प्प्राश्नीपुत्रऽआसुरायणादासुरायण आसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्य ऽउद्दालकादुद्दालकोऽरुणादरुण ऽउपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावतो वाद्धचोगाज्जिह्वावान्वाध्योगोऽसिता द्वार्षगणादसितो वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो वागम्भिण्याऽअम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूंꣳषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥२॥ इत्यन्तं यजुर्वेदारम्भं परिसमापयेत् ।

अथ ऋग्वेदादि मन्त्रस्य मधुच्छन्दा ऋषिर्गायत्रीछन्दोऽग्निर्द्देवता स्वाध्याये विनियोगः ।
ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ इति ऋग्वेदारम्भः ।
अथ सामवेदादिमन्त्रस्य गौतमऋषिर्गायत्रीछन्दोग्निर्द्देवता स्वाध्याये विनियोगः ।
ॐ अग्नऽआयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि । इति सामवेदारम्भः ।
शन्नोदेवीरिति दध्यङ्ङाथर्वण ऋषिर्गायत्रीछन्दोग्निर्द्देवता स्वाध्याये विनियोगः ।
ॐ शन्नोदेवीरभीष्टयऽआपो भवन्तु पीतये । शं योरभिस्रवन्तु नः । इत्यथर्ववेदारम्भः ।
पुनः पूर्ववत् प्रणवमहाव्याहृतिपूर्विकां गायत्रीं त्रिरुक्त्वा "ॐ विरामोऽस्तु" इति वदन्तं गुरुं शिष्यः पादोपसङ्ग्रहणपूर्वकं प्रणम्य विरमेत् ।

दक्षिणादानम्

(दक्षिणा सङ्कल्प गर्ने)

अथ दक्षिणासङ्कल्पः – अद्येहामुकोहं अमुकशर्म्मणो वटोः वेदारम्भहोमकर्मणः वेदारम्भकर्मणश्च साङ्गतासिद्धयर्थं साद्गुण्यार्थं च इदं सुवर्णमग्निदैवतं आचार्याय तुभ्यं सम्प्रददे इति दद्यात् । आचार्यश्चाशिषं दद्यात् ॥

॥ इति वेदारम्भविधिः ॥

समावर्तनम्

(समावर्तनको वेदीमा हवन गर्ने)

अथ समावर्तनम् – तत्र सूत्रम् – "वेदं व्रतानि वा समाप्य स्नायात्" इति ।

स्मृतिश्च –

वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा । अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ॥ इति ।

त्रयः स्नातका भवन्ति । विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातकः ॥ इति ।

१. समाप्य वेदं असमाप्य व्रतं यः समावर्तते स विद्यास्नातकः ।

२. समाप्य व्रतं असमाप्य वेदं यः समावर्तते स व्रतस्नातकः ।

३. विद्यां च व्रतं चोभयं समाप्य यः स्नाति स विद्याव्रतस्नातकः ॥ इति ।

द्वादशवार्षिकादिकं व्रतं ब्रह्मचर्यव्रतमिति । ब्रह्मचर्यं वाऽष्टाचत्वारिंशकम् । आषोडशवर्षात् ब्राह्मणस्य, आ द्वाविंशाद्राजन्यस्य, आचतुर्विंशाद् वैश्यस्य, अनतीत कालो भवति । अत ऊर्ध्वं पतितसावित्रीका भवन्ति । त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनञ्च । तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन्व्यवहार्या भवन्तीति वचनात् ॥ तत्र विधिस्तु वेदारम्भवत्कार्यः । एतदेवव्रतादेशनविसर्गेषु कर्त्तव्यमिति पारस्करवचनात् । अथ स्नातको वररूपेण गवादिकमाचार्याय दद्यात् ।

तत्र सङ्कल्पः –

(सङ्कल्प गर्ने)

अद्येहामुकोऽहं स्नातकत्वाधिकारसिद्धये इमां गां गोप्रत्याम्नायीभूतं सुवर्णं वा आचार्याय तुभ्यं सम्प्रददे । इति गुरवे वरं दत्वा "भो गुरो स्नास्यामि" इति सम्प्रार्थ्य "स्नाहि" इति लब्धानुज्ञः स्नायात् । अथाचार्यः समावर्तनवेदीसमीपमागत्य उपविश्य तत्र पञ्चभूसंस्कारपूर्वकमग्निं संस्थाप्य प्रतिज्ञासङ्कल्पं कुर्यात् । अद्येह अमुकोऽहम् अमुकशर्मणः कुमारस्य स्नातकत्वसिद्धये समावर्तनकर्म करिष्ये । इति सङ्कल्प्य ब्रह्मोपवेशनादि पूर्णपात्रासादनान्तं कर्म कुर्यात् ।

अथ प्रयोगः

(जल सेचन गर्ने)

वेदादिसमाप्तौ नम्रेण ब्रह्मचारिणा यथाशक्ति दक्षिणां दत्त्वा, "भो गुरो, स्नास्यामि" इत्युक्ते, "स्नाहि" इति गुरुणोक्ते बहिः शालायां हस्तमात्रां चतुरङ्गुलोच्छ्रितां प्रागुदक्प्रवणां मृत्तिकादिभिर्वेदिं निर्माय, अङ्गुष्ठकनिष्ठाभ्यां गृहितैस्त्रिभिर्दर्भैः स्थण्डिलोपरितः पांसून्पूर्वतस्त्विरपसार्य दर्भानैशान्यां क्षिप्त्वा, गोमयोदकेन उपलिप्य, खादिरेण स्रुवेण स्फयेन कुशमूलेन वा प्रादेशदीर्घाः स्थण्डिलप्रमाणाः प्रागग्रा उदक्संस्थास्तिस्रो रेखाः कृत्वा अङ्गुष्ठकनिष्ठाभ्यां प्रतिरेखं पांसूनुध्दृत्योर्ध्वं क्षिप्त्वा, उदकेन स्थण्डिलं न्युब्जपाणिनाभिषिच्य, कांस्यपात्रे निहितं तेनैव पिहितमग्नि स्थण्डिलादाग्नेयभागे निधाय, क्रव्यादांशं नैर्ऋत्यां क्षिपेत् । स्थण्डिले स्वाभिमुखं राजपुत्रनामानमग्निं स्थापयित्वा, अग्न्यानयनपात्रे साक्षतमुदकं क्षिपेत् । ततो गुः अग्नेः दक्षिणस्यां दिशि स्थापिते पीठासने प्रागग्रान्षडदर्भान्निधाय अग्नेरुत्तरस्थितं प्राङ्मुखं ब्रह्माणं चन्दनाक्षतादिभिः सम्पूज्यअद्येहाऽमुकगोत्रोऽमु

कशर्माहं ममामुकनाम्नो ब्रह्मचारिणः समावर्तनहोमकर्मणि कृताकृतावेक्षणरुपब्रह्मकर्मकर्तुममुकगोत्रोऽमुकशर्मा त्वं मे ब्रह्मा भव इति ब्रह्मा च भवामि, उक्त्वा अग्नेः पूर्वेणागत्य वितस्तिमात्रां भुवं विहाय, अग्नेर्वायव्ये उत्तरे च प्रागग्रैः कुशैरासनद्वयं कल्पयित्वा, प्रणीतापात्र दक्षहस्तेन वामहस्ते पूर्वाग्रं निधाय दक्षहस्तोद्धृतोदकेन आत्माभिमुखं पूरयित्वा वायव्यासने निधाय दक्षहस्तानामिकयाऽऽलभ्य उत्तरासने निदध्यात्। ततो बर्हिर्मुष्टिमादाय तच्चतुर्थांशैराग्नेयादीशानान्तमुत्तराग्रं, ब्रह्मणोऽग्निपर्यन्तं पूर्वाग्रं, नैर्ऋत्याद्वायव्यान्तमुत्तराग्रम्, अग्नितः प्रणीतापर्यन्तं पूर्वाग्रम्, इति परिस्तरणं कुर्यात्। अथ उदगग्राः प्राक्संस्थाः पदार्थाः स्थाप्याः। पवित्रच्छेदनार्थं कुशपत्रत्रयम्, पवित्रे साग्रेऽनन्तर्गर्भे कुशपत्रे द्वे, प्रोक्षणीपात्रम्, आज्यस्थाली, समार्जनकुशास्त्रयः साग्राः, उपयमनकुशास्त्रयोदश, समिधस्तिस्रः प्रादेशमात्र्यः पालाश्यः, स्रुवः, आज्यं गव्यम्, पूर्णपात्रं, समिन्धनकाष्ठानि दश, पर्युक्षणार्थमुदकम्, हरितकुशान्, अष्टौ उदककुम्भान्, द्वादशाङ्गुलमौदुम्बरं दन्तकाष्ठम् दधि, नापितम्, स्नानार्थमुदककुम्भम्, उद्वर्तनद्रव्यम्, चन्दनम्, अहते वाससी, यज्ञोपवीते, पुष्पमाल्यादीनि, उष्णीषम्, कुण्डले, कज्जंलम्, आदर्शम्, नूतनं तत्रम्, उपानहौ, वेणुदण्डम्, उपकल्प्य।

तत आसादिते कुशपत्रे गृहीत्वा, अग्रतः प्रादेशमात्रं विहाय, तयो उपरि त्रीणि कुशतरुणानि तिर्यङ्निधाय, पवित्रमूलेन पवित्रे प्रदक्षिणमावेष्टच, त्रयाणां मूलाग्राणि द्वयोर्मूलानि च दक्षिणहस्तेन पवित्रे वामहस्तेन परिगृह्य छित्वा द्वयोर्मूलं त्रीणि चोत्तरतः क्षिपेत्। प्रोक्षणीपात्रं प्रणीताया उत्तरतो निधाय, प्रणीतोदकं सपवित्रहस्तेन त्रिर्निक्षिप्य तदुदकं पवित्राभ्यां प्रादेशमात्र मूर्ध्वं क्षिप्त्वा पवित्रे प्रोक्षणीपात्रे निधाय प्रोक्षणीपात्रं दक्षहस्तेन वामहस्ते निधाय, तदुदकं दक्षिणहस्ताङ्गुष्ठानामिकाभ्यां त्रिरुर्ध्वोर्ध्वं क्षिप्त्वा प्रणीतोदकेन प्रोक्षेत्। इत्थं संस्कृतेन प्रोक्षण्युदकेन आसादितानि न्युब्जानि पात्राण्युत्तानानि कृत्वा आज्यस्थाल्यादीनि पूर्णपात्रपर्यन्तानि एकैकशस्त्रिः प्रोक्ष्य असंचरे प्रणीताग्न्योर्मध्ये प्रोक्षणीपात्रं निदध्यात्। तत आज्यस्थालीमग्नेः पश्चान्निधाय तत्रासादितमाज्यमात्माभिमुखं प्रक्षिपेत्। तत आज्यस्थालीमग्नावारोग्य, ज्वलदुल्मुकं आज्यस्योपरि समन्तादीशानीमारभ्य प्रदक्षिणं भ्रामयित्वाऽग्नौ प्रक्षिप्य, उदकं स्पृष्ट्वा, इतरथा हस्तमावर्तयेत्। स्रुवं वामहस्तेन दक्षिणहस्ते निधाय, पूर्वाग्रमधोबिलमग्नौ तापयित्वा वामे पाणावुत्तानबिलं निधाय दक्षहस्तधृतमध्यानां संमार्जनकुशानामग्रैर्मूलतोऽग्रपर्यन्तं मूलैरग्रतो मूलपर्यन्तं संमृज्य, संमार्जनकुशानुत्तरतो निरस्य, प्रणीतोदकेन न्युब्जपाणिनाभ्युक्ष्य, पूर्ववत् प्रतप्य, उदकं स्पृष्ट्वा, दक्षिणतः स्वसमीपे निदध्यात्। आज्यमुत्थाप्य, प्रथमतोऽग्नेरुत्तरतः प्रोक्षणीपात्रस्य पश्चात् स्थापयित्वा, ततोऽग्नेः पश्चादानीय, पवित्राभ्यां किंचिदाज्यं प्रादेशमात्र. ऊर्ध्वं क्षिप्त्वा, आज्यमवलोक्य, सत्यपद्रव्ये तन्निरस्य, प्रोक्षणीश्च पूर्ववदुत्पूय प्रोक्षणीषु पवित्रे निदध्यात्। उपयमनकुशान् दक्षिणपाणिना वामपाणौ निधाय तिस्रः समिधः आदायाग्नौ प्रागग्राः प्रक्षिप्य दक्षचुलुकगृहीतेन सपवित्रेणाऽशेषेण प्रोक्षण्युदकेन ईशानाद्युदक्पर्यन्तमग्निं परिषिच्य, हस्तमितरथावर्त्य पवित्रे प्रणीतासु निदध्यात्। ततो ब्रह्मणा कुशेन दक्षिणबाहौ अन्वारब्धः पातितदक्षिणजानुः सोपयनकुशं वामहस्तं हृदये निधाय उत्तानेन दक्षिणहस्तेन शङ्खमुद्रया मध्यमूलयोर्मध्ये धृतेन स्रुवेण आज्येन –

हवनम्

(घ्यू हवन गर्ने)

ॐ प्रजापतय इति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ॥

ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम ॥

प्रजापतिं मनसा ध्यायन्, अग्नेरुत्तरभागे प्राञ्चमृजुमूद्ध्वं दीर्घं संततमाघारयति त्यागान्ते किञ्चित्स्रुवावशिष्टमाज्यं संस्रवधारणपात्रे प्रक्षिपेत् । एवमुत्तरत्रयोदशाहुतिषु संस्रवधारणम् ॥ सर्वत्र स्वाहान्ते द्रव्यप्रक्षेपः ॥

ॐ इन्द्रायेति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः ॥

ॐ इन्द्रायस्वाहा इदमिन्द्राय न मम ।

अग्नेर्दक्षिणभागे पूर्ववदुत्तराघारं जुहुयात् ॥ इत्याघारौ ॥ इति समिद्धतमेऽग्निप्रदेशे ॥

ॐ अग्नय इति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः ॥

ॐ अग्नये स्वाहा । इदमग्नये न मम ॥१॥

ॐ सोमायेति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः ॥

ॐ सोमाय स्वाहा । इदं सोमाय न मम ॥२॥ एतावाज्यभागौ ।

तत्र यजुर्वेदाहुतयः –

(हवन गर्ने)

ॐ अन्तरिक्षाय स्वाहा । इदमन्तरिक्षाय न मम । ॐ वायवे स्वाहा । इदं वायवे न मम ।
ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा । इदं छन्दोभ्यो न मम ।
ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । ॐ देवेभ्यः स्वाहा । इदं देवेभ्यो न मम ।
ऋषिभ्यः स्वाहा । इदं ऋषिभ्यो न मम । ॐ श्रद्धायै स्वाहा । इदं श्रद्धायै न मम ।
ॐ मेधायै स्वाहा । इदं मेधायै न मम । ॐ सदसस्पतये स्वाहा । इदं सदस्पतये न मम ।
ॐ अनुमतये स्वाहा । इदमनुमतये न मम ॥११॥

अथ ऋग्वेदाहुतयः –

(हवन गर्ने)

ॐ पृथिव्यै स्वाहा । इदं पृथिव्यै न मम । ॐ अग्नये स्वाहा । इदमग्नये न मम ।
ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा । इदं छन्दोभ्यो न मम ।
ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । ॐ देवेभ्यः स्वाहा । इदं देवेभ्यो न मम ।
ॐ ऋषिभ्यः स्वाहा । इदं ऋषिभ्यो न मम । ॐ श्रद्धायै स्वाहा । इदं श्रद्धायै न मम ।
ॐ मेधायै स्वाहा । इदं मेधायै न मम । ॐ सदसस्पतये स्वाहा । इदं सदसस्पतये न मम ।
ॐ अनुमतये स्वाहा । इदमनुमतये न मम ॥११॥

अथ सामवेदाहुतयः –

(हवन गर्ने)

ॐ दिवे स्वाहा । इदं दिवे न मम । ॐ सूर्याय स्वाहा । इदं सूर्याय न मम ।

ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा । इदं छन्दोभ्यो न मम ।
ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । ॐ देवेभ्यः स्वाहा । इदं देवेभ्यो न मम ।
ॐ ऋषिभ्यः स्वाहा । इदं ऋषिभ्यो न मम । ॐ श्रद्धायै स्वाहा । इदं श्रद्धायै न मम ।
ॐ मेधायै स्वाहा । इदं मेधायै न मम । ॐ सदसस्पतये स्वाहा । इदं सदसस्पतये न मम ।
ॐ अनुमतये स्वाहा । इदमनुमतये न मम ॥११॥

अथाथर्ववेदाहुतयः– (हवन गर्ने)

ॐ दिग्भ्यः स्वाहा । इदं दिग्भ्यो न मम । ॐ चन्द्रमसे स्वाहा । इदं चन्द्रमसे न मम ।
ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा । इदं छन्दोभ्यो न मम ।
ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । ॐ देवेभ्यः स्वाहा इदं देवेभ्यो न मम ।
ॐ ऋषिभ्यः स्वाहा । इदं ऋषिभ्यो न मम । ॐ श्रद्धायै स्वाहा । इदं श्रद्धायै न मम ।
ॐ मेधायै स्वाहा । इदं मेधायै न मम । ॐ सदसस्पतये स्वाहा । इदं सदसस्पतये न मम ।
ॐ अनुमतये स्वाहा । इदमनुमतये न मम ॥११॥
ततो भूरादिनवाहुतिहोमं स्विष्टकृतं च हुत्वा संस्रवप्राशनं, पवित्रप्रतिपत्तिः पूर्णपात्रम् ।

पूर्णपात्रदानसंकल्पः

(पूर्णपात्र दान गर्ने)

अद्येहेत्यादि अमुकोऽहं अमुकनाम्नो ब्रह्मचारिणः समावर्त्तनाङ्गहोमकर्मणः साङ्गफलप्राप्तये अपूर्णस्यपूर्णार्थं इदं पूर्णपात्रं ब्रह्मन् तुभ्यं सम्प्रददे । प्रणीताविमोकः, बर्हिहोमश्च कुर्यात् । ततो ब्रह्मचारी "अग्ने सुश्रव" इत्यादिमन्त्रैः अग्निपरिसमूहनं कुर्यात् ।

अग्निपरिसमूहनम्

(वटुकले अग्नि घुम्ने)

अग्ने सुश्रव इत्यादीनां पञ्चानां ब्रह्मा ऋषिर्यजुश्छन्दोऽग्निर्देवता परिसमूहने विनियोगः ।
ॐ अग्ने सुश्रवः सुश्रवसं मा कुरु ॥१॥ ॐ यथा त्वमग्ने सुश्रवः सुश्रवाऽअसि ॥२॥ ॐ एवं मा ँ सुश्रवः सौश्रवसं कुरु ॥३॥ ॐ यथा त्वमग्ने यज्ञस्य निधिपाऽअसि ॥४॥ ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासम् ॥५॥ प्रदक्षिणमग्निं पर्युक्ष्य (वारिणाग्निं प्रदक्षिणीकृत्य) उत्थाय ।

समिदाधानम्

(तीनओटा समिधा हवन गर्ने)

एकां समिधमादाय तिष्ठन् - अग्नये समिधमिति प्रजापतिर्ऋषिराकृतिश्छन्दः समिद्देवता समिदाधाने विनियोगः ।
ॐ अग्नये समिधमाहार्षं बृहते जातवेदसे । यथा त्वमग्ने समिधा समिद्धचसऽएवमहमायुषा मेधया वर्च्चसा प्रजया पशुभिर्ब्रह्मवर्च्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्च स्यन्नादो भूयास ँ स्वाहा ॥

इति मन्त्रेण जुहुयात्। एवं द्वितीयां तथा तृतीयां च समिधं हुत्वा उपविश्य अग्ने सुश्रव इत्यादि पञ्चभिर्मन्त्रैः पूर्ववद्धोमयेत् परिसमूहनं पर्युक्षणं च विधाय तूष्णीं पाणी प्रतप्य मुखं विमार्ष्टि।

मुखविमर्शनम्

(अग्निको राप ताप्ने)

ॐ तनूपाऽअग्नेऽसि तन्वं मे पाहि। ॐ आयुर्दाऽअग्नेस्यायुर्मे देहि। ॐ वर्च्चोदाऽअग्नेऽसि वर्च्चो मे देहि। ॐ अग्ने यन्मे तन्वाऽऊनं तन्मऽआपृण। ॐ मेधाम्मे देवः सविताऽआदधातु। ॐ मेधां देवी सरस्वती आदधातु। ॐ मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ। इति प्रतिमन्त्रं ललाटाच्चिबुकपर्यन्तं मुखं प्रोञ्छति।

अङ्गालम्भनम्

(शिरमा छुने)

ॐ अङ्गानि च मऽआप्यायन्ताम्। इति शिरस आपादमङ्गान्यालभेत्।

ॐ वाक्च मऽआप्यायताम्। इति मुखम्। (मुखमा छुने)

ॐ प्राणश्च मऽआप्यायताम्। इति नासिकाम्। (नाकमा छुने)

ॐ चक्षुश्च मऽआप्यायताम्। इति चक्षुषी। (आँखामा छुने)

ॐ श्रोत्रं च मऽआप्यायताम्। इति श्रोत्रे। (कानमा छुने)

ॐ यशोबलं च मऽआप्यायताम्। इति बाहू। (कुममा छुने

अग्न्यभिवादनम्

(अभिवादन गर्ने)

व्यत्यस्तपाणिभ्यां कार्यम् – अमुकगोत्रोऽमुकवेदान्तर्गतामुकशाखाध्यायी अमुकशर्म्मा अहं भो वैश्वानर त्वामभिवादये। इत्यग्निमभिवाद्य – भो वरुण त्वामभिवादये। इति वरुणं।

गुरोरभिवादनम्

(गुरुलाई अभिवादन गर्ने)

ततः कर्णौ स्पृष्ट्वा व्यत्यस्तपाणिभ्यां – अमुकगोत्रोऽमुकवेदान्तर्गतामुकशाखाध्यायी अमुकशर्मा अहं भो गुरो त्वामभिवादये इति गुरुमभिवादयेत्। गुरुश्च आयुष्मान्भव सौम्यामुकशर्म ३ न् इत्याशिषं ददाति।

तिलककरणम्

(तिलक लगाउने)

अथानामिकयाग्नेर्भस्म गृहीत्वा त्र्यायुषाणि कुरुते –

ॐ त्र्यायुषञ्जमदग्नेः। इति ललाटे। (निधारमा लगाउने)

ॐ कश्यपस्य त्र्यायुषम्। इति ग्रीवायाम्। (घाँटीमा लगाउने)

ॐ यद्देवेषु त्र्यायुषन्। इति दक्षिणांसे। (कुममा लगाउने)

ॐ तन्नो अस्तु त्र्यायुषम्। इति हृदि। (हृदयमा लगाउने)

अष्टकलशपूजनम् जलाभिषेचनञ्च

(आठओटा कलशको पूजा गर्ने)

अथ परिश्रितस्याग्नेरुत्तरतः पूर्वतो वाऽष्टौ कलशान्स्थापयित्वा यथाविधि संपूजयेत्।

तत्र प्रथम कलशे – (दक्षिणत उत्तरवृद्ध्या कार्या) (पहिलो कलशको पूजा गर्ने)

ॐ तत्त्वायामि ब्रह्मणावन्दमानास्तदाशास्तेयजमानोहविर्भिः ।
अहेडमानोवरुणेहबोद्ध्युरुश ँ समानऽआयुः प्रमोषीः ॥

इति वरुणं, ब्राह्मीम्, इन्द्रम्, आवाह्य पञ्चोपचारैः संपूज्य ।

द्वितीयकलशे – (दोस्रो कलशको पूजा गर्ने)

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । येऽअन्तरिक्षे ये दिवितेभ्यः सर्पेभ्यो नमः ॥

इति नागान्, माहेश्वरीम्, अग्निम् आवाह्य सम्पूज्य ।

तृतीयकलशे – (तेस्रो कलशको पूजा गर्ने)

ॐ ऋताषाड्ऋतधामाग्निर्गन्धर्वस्तस्यौषधयोप्सरसोमुदोनाम ।
स नऽइदंब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥

इति अप्सरसः, कौमारीम्, यमम्, आवाह्य पूजयेत् ।

चतुर्थे – (चौथो कलशको पूजा गर्ने)

ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विशीमतः सुरुचो व्वेनऽआवः ।
स बुध्न्याऽउपमाऽअस्य व्विष्ठाः सतश्चयोनिमसतश्चव्विवः ।

इति ब्रह्माणम्, वैष्णवीम्, निर्ऋतिम्, आवाह्य संपूज्य ।

पञ्चमे – (पाँचौं कलशको पूजा गर्ने)

ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि व्विष्णोर्द्ध्रुवोसि । वैष्णवमसि विष्णवे त्वा ॥

इति वामनं, वाराहीं वरुणम् आवाह्य संपूज्य ।

षष्ठे – (छैटौं कलशको पूजा गर्ने)

ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ।
मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तः सदमित्वाहवामहे ॥

इति रुद्रं, ऐन्द्रीं, वायुम् आवाह्य संपूज्य ।

सप्तमे – (सातौं कलशको पूजा गर्ने)

ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् । सभूमि ँ सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥

इति अष्टचिरञ्जीविनं, चामुण्डां, सोमम् आवाह्य संपूज्य ।

अष्ठमकलशे– (आठौं कलशको पूजा गर्ने)

ॐ श्रीश्चतेलक्ष्मीश्चपत्क्न्यावहोरात्रेपार्श्वेनक्षज्ञाणिरूपमश्विनौव्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ॥

इति लक्ष्मीं, महालक्ष्मीं, ईशानं आवाह्य संपूज्य धूपदीपनैवेद्यदक्षिणानतं कुर्यात् । अथ कुम्भाना. पुरस्तात् प्रागग्रान्कुशानास्तीर्य तेषु स्वयं स्थितो ब्रह्मचारी (प्राञ्चि उदञ्चि वा कर्माणि भवन्तीति न्यायात्) दक्षिणस्य प्रथमत्वं सूत्रकारेणोपात्तं तस्मादित्येवं क्रमेण प्रथमादुदकुम्भादप आदत्तेऽनेन मन्त्रेण– षेऽअप्स्वन्तरिति प्रजापतिर्ऋषिरतिजगतीछन्द आपो देवता अपामादाने विनियोगः । (विनियोग गरी कलशहरूको जलले सेचन गर्ने)

ॐ येऽप्स्वन्तरग्नयः प्रविष्टा गोह्यऽउपगोह्यो मयूखो मनोहाऽस्खलोविरुजस्तनूदूखुरिन्द्रियहा तान्विजहामि यो रोचनस्तमिह गृह्णामि ।

इति प्रथमोदककुम्भाद्दक्षिणचुलुकेन अपो गृहीत्वा आत्मानमभिषिञ्चति **तेन मामिति** मन्त्रेण तेनेति प्रजापतिर्ऋषिर्यजुश्छन्द आपो देवता अभिषेचने विनियोगः । (पहिलो कलशको जलले सेचन गर्ने)

ॐ तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय इति ॥

अथ द्वितीयोदककुम्भात् पूर्ववत् "येऽप्स्वन्तरिति" जलादानम् अभिषिञ्चने तु मन्त्रविशेषः ।

येनेति प्रजापतिर्ऋषिरनुष्टुप्च्छन्द आपो देवता अभिषेचने विनियोगः । (दोस्रो कलशको जलले सेचन गर्ने)

ॐ येन श्रियमकृणुतां येनावमृशता ꣳसुराम् । येनाक्ष्यावभ्यषिञ्चतां यद्वां तदश्विना यशः ॥ इति ।

अथ तृतीयोदककुम्भात् **"येऽअप्स्वन्तरिति"** पूर्ववदपो गृहीत्वा– आपो हि ष्ठेत्यादितिसृणां सिन्धुद्वीपऋषिर्गायत्रीछन्द आपो देवता अभिषेचने विनियोगः । (तेस्रो कलशको जलले सेचन गर्ने)

ॐ आपो हि ष्ठा मयोभुवस्ता नऽऊर्जे दधातन । महे रणाय चक्षसे ॥ इत्यभिषिच्य ।

अथचतुर्थकुम्भात् **"येऽअप्स्वन्तरिति"** पूर्वज्जलमादाय– (चौथो कलशको जलले सेचन गर्ने)

ॐ यो वः शिवतमो रसस्तस्य भाजयते ह नः । उशतीरिव मातरः ॥ इति सिञ्चेत् ।

अथ पञ्चमकुम्भात् **"येऽअप्स्वन्तरित"** पूर्वज्जलमादाय – (पाँचौं कलशको जलले सेचन गर्ने)

ॐ तस्माऽरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ इति अभिषिञ्चेत् ।

ततः षष्ठात्, सप्तमात्, अष्टमात् य उदककुम्भात् **"येऽअप्स्वन्तरिति"**

मन्त्रेणापो गृहीत्वा तूष्णीं अभिषेचनं कुर्यात् । (छैटौं, सातौं र आठौं कलशको जलले सेचन गर्ने)

सहस्रधारास्नानम्

(अष्टकलशको जल चाल्नोमा लगाई वटुकलाई नुहाइदिने)

ततोऽभिषेकावशिष्टेन जलेन सहस्रधारां शिरसि धृत्वा स्नायात् ।

मेखलामोचनम्

(मेखला फुकाउने)

अथ मेखलोन्मोकः – तत्र पूर्वधृतां मेखलां ब्रह्मचारी मन्त्रं पठन् स्वयमेव शिरोमार्गेण निस्सारयेत् ।

उदुत्तममिति शुनः शोपऋषिस्त्रिष्टुप्छन्दः वरुणो देवता मेखलोन्मोके विनियोगः ।

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यम ꣳश्रथाय ।

अथ वयमादित्य व्रते तवानागसोऽअदितये स्याम ।

मेखलामुन्मुच्य दण्डं निधायेति सूत्रात् साहचर्याच्च दण्डमजिनं च तूष्णीं निधाय आचामेत्।
ततः उपकल्पितमन्यद्वासस्तूष्णीं परिधाम आचम्य आदित्यमुपतिष्ठते मन्त्रेण – (धोती फेर्ने)

सूर्योपस्थानम्

(सूर्यको दर्शन गर्ने)

उद्यन्त्राजभृष्णुरिति प्रजापतिर्ऋषिः शक्वरीछन्द आदित्यो देवता आदित्योपस्थाने विनियोगः।

ॐ उद्यन्त्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मा गमय। उद्यन्त्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवा यावभिरस्थाच्छतसनिरसि शतसनिं मा कुर्वाविदन्मा गमय। उद्यन्त्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायं यावभिरस्थात्सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मा गमय। इति मन्त्रेण ऊर्ध्वबाहुः सूर्योपस्थानं कुर्यात्।

दधितिलप्राशनम्

(दही, केरा, तिलको अप्सानी सिकाएर खुवाउने)

ततो दधितिलान् दक्षिणहस्तगतसोमतीर्थेन प्राश्य जटालोमनखानि वापयित्वा स्नात्वा आचम्य ततः द्वादशाङ्गुल–दशाङ्गुल–अष्टाङ्गुलदीर्घेण कनिष्ठिकाग्रस्थूलेन उदुम्बरकाष्ठेन ब्राह्मणंक्षत्रियविशां क्रमेण दन्तधावनं कुर्यात्।

दन्तधावनम्

(दाँत माझ्ने र कुल्ला गर्ने)

अन्नाद्यायेत्याथर्वणअषिरनुष्टुप्छन्दः सोमो देवता दन्तधावने विनियोगः।

ॐ अन्नाद्याय व्यूहध्व ꣳसोमो राजाऽयमागमत्। स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च।॥इति॥

स्नानम्

(नुहाउने)

तत आचम्य सुगन्धिद्रव्ययुक्तेन कटुतैलयवादिचूर्णेन शरीरोद्वर्तनं कृत्वा तप्तोदकेन सशिरस्कं स्नात्वाऽऽचम्य चन्दनाद्यनुलेपनं गृहीत्वा ग्रहवेदीसमीपमागत्य उपविश्य अनुलेपनेन हस्तावुपलिप्य नासिकयोर्मुखस्य चोपगृह्णीते मन्त्रेणं।

चन्दनोपसंग्रहणम्

(चन्दन लगाउने)

प्राणापानाविति प्रजापतिर्ऋषिर्यजुश्छन्दः प्राणापानादिलिङ्गोक्ता देवताचन्दनोपसंग्रहणे विनियोगः।

ॐ प्राणापानौ मे तर्पय, नासिकायाम्। चक्षुर्मे तर्पय, चक्षुषोः। श्रोत्रं मे तर्पय, श्रोत्रयोः।॥ इति॥

ततः अपसव्यं विधाय पाणी प्रक्षाल्य तदवनेजनं दक्षिणाभिमुखः पितृतीर्थेन दक्षिणस्यां दिशि निषिञ्चेत् –

पितर इति प्रजापत्यश्विसरस्वतीन्द्राऋषयो यजुश्छन्दः पितरो देवता निषेचने विनियोगः।

"ॐ पितरः शुन्धध्वम्"

इति पाण्योरवनेजनजलं भूमौ निषिञ्चेत्। पित्र्यत्वात्सव्येनोदकस्पर्शः। ततश्चन्दनादिना सुगन्धिद्रव्येण गात्राण्यनुलिप्य "सुचक्षा" इति मन्त्रं जपेत्।

मन्त्रजपः (मन्त्र जप गर्ने)

सुचक्षा इति प्रजापतिर्ऋषि यजुश्च्छन्दः लिङ्गोक्ता देवता जपे विनियोगः ।

ॐ सुचक्षा अहमक्षीभ्यां भूयास ꣳसुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासमिति ।

अधोवासः परिधानम् (कपडा फेर्ने)

अधोपकल्पितमहतं वासः परिधत्ते । परिधास्यै इत्याथर्वण ऋषिः पंक्तिश्छन्दो वासो देवता वस्त्रपरिधाने विनियोगः ।

ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि ।

शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये ।

उत्तरीयपरिधानम् (कपडा फेर्ने)

अथोत्तरीयम् – यशसामेत्याथर्वणऋषिः पंक्तिश्छन्दो लिङ्गोक्ता देवता उत्तरीयपरिधाने विनियोगः ।

ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती । यशो भगश्च माऽविन्दद्यशो मा प्रतिपद्यताम् ॥

इति एक एव वासश्चेत्तदा पूर्वस्योत्तरवर्गेण आच्छादयीत ।

द्वितीययज्ञोपवीतधारणम् (बाँकी जनै लगाउने)

ततो द्विराचम्य द्वितीययज्ञोपवीतधारणं कुर्यात् ।

"ब्रह्मचारिण एकं तु स्नातकस्य द्वे बहूनि वा" इति वचनात् धारणमन्त्रस्तु पूर्ववत् ।

पुष्पमालाग्रहणम् (माला लगाउने)

तत आचम्य सुमनो गृह्णति –

या आहरदिति भरद्वाजऋषिरनुष्टुप्छन्दः सुमनसो देवता पुष्पग्रहणे विनियोगः ।

ॐ याऽआहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय । ता अहं प्रतिगृह्णामि यशसा च भगेन च ।

अथाबाध्नीते–

यद्यशोप्सरसामिति भरद्वाजऋषिरनुष्टुप्छन्दः सुमनसो देवता पुष्पमालाबन्धने विनियोगः ।

ॐ यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु तेन संग्रथिताः सुमनस आवध्नामि यशो मयि ।

उष्णीषेण शिरोवेष्टनम् (टोपी लगाउने)

अथोष्णीषेण शिरो वेष्टयेत् – युवा सुवासा इति अङ्गिराऋषिर्बृहतीछन्दो बृहस्पतिर्देवता शिरोवेष्टने विनियोगः ।

ॐ युवा सुवासाः परिवीतऽआगात्स उ श्रेयान् भवति जायमानः ।

तन्धीरासः कवयऽउन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥

अन्यानि कञ्चुकादीनि वासांसि, कुण्डलादीनि अलङ्करणानि च

ततोऽन्यान्यपि कञ्चुकादीनि वासांसि परिधाय कर्णवेष्टकौ परिधत्ते – (सिंगार गरिदिने र सिक्री, औंठी, माला आदि लगाईदिने)

अलङ्करणमिति प्रजापतिर्ऋषि यजुश्च्छन्द अलङ्करणं देवता अलङ्करणे विनियोगः ।

ॐ अलङ्कारणमसि भूयोऽलङ्कारणं भूयात् । मन्त्रेण कुण्डले कर्णयोर्ददाति । अथाक्षिणो अञ्जने –

वृत्रस्येति प्रजापतिर्ऋषिर्यजुश्छन्दः अञ्जनं देवता अक्ष्यञ्जने विनियोगः ।

ॐ वृत्रस्यासि कनीनकश्चक्षुर्दाऽसि चक्षुर्मे देहि ।

आदर्शप्रेक्षणाम्

(ऐना हेर्ने)

तत आत्मानमादर्शे प्रेक्षते – रोचिष्णुरितिप्रजापतिर्ऋषिर्यजुश्छन्द आदर्शो देवता आदर्शप्रेक्षणे विनियोगः ।

ॐ रोचिष्णुरसि ।

छत्रग्रहणम्

(छाता ओढ्ने)

ततश्छत्रं प्रतिगृह्णाति – बृहस्पतेश्छदिरिति गौतम ऋषिर्बृहतीछन्दः छत्रं देवता छत्रग्रहणे विनियोगः ।

ॐ बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्द्धेहि तेजसो यशसो मामन्तर्द्धेहि ॥

उपानत्प्रतिमोके

(जुत्ता, मोजा लगाउने)

तत उपानहौ युगपत्प्रतिमुञ्चते

प्रतिष्ठे स्थ इति जमदग्निर्ऋषिर्विराट्छन्दो लिङ्गोक्ता देवता उपानत्प्रतिमोके विनियोगः ।

ॐ प्रतिष्ठेस्थो विश्वतो मा पातम् ।

दण्डग्रहणम्

(लौरो लिने)

ततो वैणवं दण्डमादत्ते – विश्वाभ्य इति याज्ञवल्क्यऋषिर्यजुश्छन्दो दण्डोदेवता दण्डग्रहणे विनियोगः ।

ॐ विश्वाभ्यो मा नाष्ट्राभ्यस्परिपाहि सर्वतः । इति मन्त्रेण दण्डग्रहणं कुर्यात् ।

इति समावर्तनम् ।





अथ देशान्तरम्

(अब देशान्तर सुन्ने)

वशिष्ठ उवाच –

गर्भाष्टमेऽटमे वापि व्रतबन्धे कृते द्विज ।
मातरं पितरं नत्वा गतो देशान्तरं सुतः ॥१॥

वशिष्ठ भन्दछन् –

गर्भदेखि आठौं अथवा आठौं वर्षमा व्रतवन्ध गर्नु पर्दछ भन्ने ऋषि मुनिहरूको वचन छ ।

सुत उवाचा –

श्रृणु मातर्मयोक्तं यदहं यास्ये वनान्तरे ।
यत्रैव शारदा देवी वरार्थे प्रार्थयाम्यहम् ॥२॥
गुरुसेवा कृते तस्मिन्काश्मीरे दशशोभने ॥
विद्यासंग्रहणै कृत्वा ह्यागमिष्ये पुनर्गृहम् ॥३॥

वटुक भन्दछन् –

हे माता म देशान्तर जान्छु र उतै सरस्वती देवीको तपस्या गरेर विद्याको वरदान माग्दछु । उतैतिर गुरुको सेवा र परदेशमै सम्पूर्ण विद्या अध्ययन गर्दछु र फेरि घर फर्केर आउने छु ।

मातोवाचा –

बालतोऽपि मया पुत्र पालितं कष्टतः सदा ॥
वृद्धावस्थात्वहं जाता पुत्र त्वं पालनं कुरु ॥४॥
इदं कर्म परित्यज्य कथं यस्यसि काननम् ॥

माता भन्नुहुन्छ –

हे बाबु छोरा ! तिमीलाई मैले सानै अवस्थाबाट धेरै कष्टहरू सहेर हुर्काएँ । अब मेरो वृद्ध अवस्था हुन्छ । त्यसैले मलाई पालन गर्न छाडेर तिमी किन परदेश जान्छु भन्दछौ त्यसो नभन ।

सुत उवाच–

ब्रह्मचर्ये कृते तस्मिन्गुरोः शुश्रूषपूर्वकम् ॥५॥
संस्नाप्य सर्वतीर्थेषु ह्यागमिष्ये पुनर्गृहम् ॥
उद्धरेत्सप्तगोत्राणि तीर्थानि भ्रमतो बहु ॥
आगमिष्ये तथा मातः पञ्चविंशतिमध्यतः ॥६॥

वटुक भन्दछन् –

आमा म त्यहाँ ब्रह्मचर्य पालन गरेर गुरुको सेवा पनि गर्दछु र सो पश्चात् विभिन्न तीर्थस्थलहरू भ्रमण, स्नान गरी पच्चीस वर्षको उमेरमा घर आउने छु ।

मातोवाच –

देशान्तरं महादुःखं महाघोरं च दारुणम् ।
शीतवातातपश्चैव क्षुत्तृड्भ्यां पीडयते सुत ॥७॥

माता भन्नुहुन्छ –

हे बाबु छोरा ! परदेशमा अनेक किसिमका दुःख कष्ट हुन्छन्, शीत, ताप, भोक, प्यास आदिले धेरै दुःख पाइन्छ । त्यसैले परदेशतिर जाने कुरै नगर ।

पितोवाच–

कन्दमूलफलाहारं भूमिशय्या निरालयम् ॥
वने कष्टं सदादुःखं गृहे तिष्ठ सदा सुत ॥८॥

पिता भन्नुहुन्छ –

हे बाबु छोरा ! परदेशमा कहिले कन्दमूल खाएर रहनु पर्दछ, कहिले भूमिमा शयन गर्नुपर्दछ, त्यसैले त्यहाँ अनेक दुःख हुन्छ । त्यसैले जाने कुरा नगर घरमै बस ।

सुत उवाच –

धन्या माता पिता धन्यो यस्य पुत्रो व्रताश्रितः ॥
पितृणां तारको यस्तु दशपूर्वं दशापरम् ॥९॥

छोरा भन्दछन् –

दस पुस्ता अगाडि र दस पुस्ता पछाडि उद्धार गर्ने त्यस्ता पुत्रका मातापिता हजुरहरू धन्य हुनुहुन्छ, त्यस्ताका पुत्र म ब्रह्मचर्य व्रत पालन गर्दछु ।

मातोवाच –

देशान्तरं न याहीति महाघोरं च दारुणम् ॥
दुर्गमं पर्वतं शैलं दुर्गमं च हिमालयम् ॥१०॥

माता भन्नुहुन्छ –

हे बाबु छोरा परदेशमा धेरै ठूला ठूला कष्टहरू पर्दछन्, ठूला ठूला हिमालय आदि पर्वतहरु छन्, त्यस्ता ठाउँहरूमा कसरी बस्तछौ ?

पितोवाच –

सिंह-व्याघ्रो-गज-क्रोड-चौर-तस्करकैर्वृतम् ।
बहुकष्टं निराहारो न याहीति वनान्तरम् ॥११॥

सुत उवाच –

जातोऽहं ब्रह्मवंशेऽस्मिन् कुलीनस्तव पुत्रकः ॥
करिष्येऽहं व्रतं सर्वं पितृवर्गस्य तारणम् ॥१२॥

पितोवाच –

कष्टेन पालितः पुत्र आत्मार्थे तु मया सुतः ।
त्वयि देशान्तरे याते मम पुत्रक का गतिः ॥१३॥

मातोवाच –

दश मासे धृते गर्भे जितं निद्राक्षुधादिकम् ।
त्वयि देशान्तरे याते का गतिर्मम पुत्रक ॥१४॥

सुत उवाच –

पञ्चविंशे च सम्पूर्णे वनवासी जितेन्द्रियः ।
व्रतं करिष्ये येनैव तेन तारयते पितॄन् ॥१५॥

मातोवाच –

दुर्गमं पर्वतं शैलं दुर्गमं च हिमालयम् ॥
दुर्गमा शारदा देवी दुर्गमं वनगह्वरम् ॥१६॥

पितोवाच –

दुर्गमः काश्मीरो देशो विद्यासंग्रहणं तथा ।
दुर्गमा गुरुसेवा च देशे देशे च दुर्गमम् ॥१७
मां त्यक्त्वाऽतो न याहीति बालबुद्धिपरिग्रह ।
त्वां विना मम वंशस्य नाशमायाति पुत्रक ॥१८॥

सुत उवाच –

द्वादशे वर्षसम्पूर्णे गुरुसेवा कृते मया ॥
आगमिष्ये व्रते पूर्णे पुनश्च स्वगृहं प्रति ॥१९॥

मातोवाच –

गृहे सत्यं गृहे धर्मो गृहे चेन्द्रियनिग्रहः ॥
गृहे विद्या गृहे लक्ष्मीर्गुरुसेवा गृहे भवेत् ॥२०॥

पिता भन्नुहुन्छ –
हे बाबु छोरा ! परदेशमा जाँदा वनमा सिंह, बाघ, हात्ती, गैंडा आदि वन्यजन्तुहरू र चोर डाका आदि लाग्दछन् । समयमा खान पनि पाईदैन, त्यसैले हामीलाई छाडेर जाने कुरो नगर ।

वटुक भन्दछन् –
हे पिता म ब्राह्मण (हजुरको) वंशमा जन्मेको हजुरको पुत्र हूँ, त्यसैले सबै व्रत नियम पालन गरेर पितृहरूको उद्धार गर्नु मेरो कर्तव्य हुन आउँछ ।

पिता भन्नुहुन्छ –
आफ्नो आत्मा मानेर तिम्रो लालनपालन हामीले (आमा र मैले) गर्‍यौं । अब तिमी घर छाडेर गयौ भने हाम्रो के गति होला ?

माता भन्नुहुन्छ –
दस महिनासम्म गर्भमा धारण गरेँ, भोक प्यास निद्रा त्यागेर रक्षा गरेँ अब तिमी परदेश गयौ भने हाम्रो के गति होला छोरा ।

वटुक भन्दछन् –
गुरुको सेवा गरेर व्रत पूर्ण पार्दछु । इन्द्रियहरूलाई जित्न सक्ने हुन्छु र २५ वर्षपछि अवश्य घर फर्कन्छु। यसमा हजुरहरूले शङ्का लिनु पर्दैन ।

माता भन्नुहुन्छ –
लक्ष्मी, विद्या प्राप्ति र गुरूसेवा सबै घरमै बसेर पनि गर्न सकिन्छ, परदेशमा त धेरै दुःख हुन्छ । त्यसैले नजाऊ ।

पिता भन्नुहुन्छ –
हे बाबु छोरा, तिम्रो अहिले बालक बुद्धि छ अब मेरो कुरा सुन । गुरुको सेवा त्यहाँको विद्या हासिल गर्न गाह्रो छ । त्यसैले जाने कुरा नगर ।

वटुक भन्दछन् –
बाह्र वर्षसम्म गुरुको सेवा गर्दछु । विद्या हासिल गर्दछु र फेरि घरमै आउँछु । म सधैं परदेशमै बस्ने चाहिँ होइन ।

माता भन्नुहुन्छ –
सत्य धर्म, इन्द्रियलाई जित्ने काम, विद्या, लक्ष्मी प्राप्ति, गुरुको सेवा सबै आफ्नै घरमा बसेर गर्न सकिन्छ ।

पितोवाच –

गुरुः स्वगुरुरेवान्ये गुरवश्चैव बान्धवाः ।
तेषां वाक्यावमानेन दुःखं चैव पदे पदे ॥२१॥
गतेऽरण्ये त्वयि प्राप्ते रुदन्ति पितृमातरः ॥
महाभारं परित्यज्य कथं यातोऽसि मे सुत ॥२२॥
रुदन्ति बान्धवाः सर्वे हाहा बालकुमारकः ।
रुदन्ति गुरवस्तत्र स्वजनाः भृत्यवर्गकाः ॥२३॥

पिता भन्नुहुन्छ –
हे बाबु छोरा ! हामी (तिम्री आमा र म) वन्धुवान्धव, स्वजन, सखा, सवैले तिमीलाई नजाऊ भनिरहेका छन् । गयौ भने तिमीले त्यहाँ धेरै दुःख पाउने छौ । त्यसपछि हामी सवैलाई चिन्ता वढ्ने छ । सवै रुने छौं ।

आचार्य उवाच –

देहि पित्रोरिदं कष्टं कि स्वर्गं पितृदैवतम् ।
का गतिश्च भवेत्पुत्र पित्रोः सन्तोषणं विना ॥२४॥
माता गङ्गा समा तीर्थं पिता पुष्करमेव च ।
गुः केदारकं तीर्थं माता तीर्थं पुनः पुनः ॥२५॥
माता तीर्थं पिता तीर्थं तीर्थं स्वजनबान्धवाः ॥
वचने वचने तीर्थं गुरुमभ्यागतं परम् ॥२६॥
एतद्वाक्य ममैवोक्तं जानीहि हितकारणम् ॥
उत्साहं वृद्धिमाङ्गल्यं कुरु पुत्र गृहे वसन् ॥२७॥
हर्षिता यस्य माता च पिता हर्षेण संयुतः ।
सहर्षा बान्धवा भृत्या वादित्रं बहुवादितम् ॥२८॥
भक्ष्यं भोज्यं लेह्य पेयं चेष्यं च विविधं रसम् ।
भोगं तु कारयामास बालक परिचारकाः ॥२९॥
भरणं पोषणं चैव भोजनं रससंयुतम् ।
कारितामेव भो तात पितृदेव नमोऽस्तु ते ॥३०॥
शुरुणा सर्वशास्त्राणि दत्तानि ज्ञानवृद्धये ॥
गुरुसन्तोषणार्थाय दक्षिणां दातुमुत्सहे ॥३१॥
द्वादशो वार्षिकश्चैव व्रतपूर्णाय दक्षिणा ॥
हिताय मम भो तात दीयते गौः सदक्षिणा ॥३२॥

आचार्य गुरु भन्नुहुन्छ –
हे वटुक ! मातापितालाई यस्तो कष्ट दिएर रुवाउँदै जाँदा तिमीलाई पितृले कसरी आशीर्वाद दिन्छन् ? सुन ! माता गङ्गा समान, पिता पुष्कर समान, गुरु केदार समान माने हुन्छ । वन्धुवान्धवका प्यारो वचन नै सवै तीर्थ जस्तो हुन्छ । त्यसैले घरमै वसेर पढ (विद्या हासिल गर) यसैमा तिम्रो कल्याण हुनेछ । जो देखि माता पिता वन्धुवान्धव, स्वजन खुसी हुन्छन्, त्यसको सधैं कल्याण हुन्छ । भक्ष्य, भोज्य, व्यवस्था गरिदिने पितामातालाई ढोग । वन्धुवान्धव सवैलाई नमस्कार गर । गुरुहरूलाई दक्षिणा देऊ, यसैमा तिम्रो बाह्र वर्षको व्रत पूरा हुनेछ ।

त्यसपछि नजिकको मन्दिरमा मामाले लान्छन् र सम्झाएर माता, पिता, गुरुले भनेका वचन भन्दै फर्काएर ल्याउँछन् र वटुकले पनि म फर्केर आएँ भनेर सवैलाई नमस्कार र ढोग गरी मान्यजनलाई दाम, दक्षिणा राखी गुरुहरूलाई दक्षिणा दिएर कार्य विसर्जन गर्दछन् ।

ततोऽग्निस्थापनोक्तं उत्तराङ्गहोमं समाप्य (अग्निस्थापना अनुसार गर्ने)

॥ इति देशान्तरं शुभम् ॥

पूर्णपात्रदानम्

(पूर्णपात्र दान गर्ने)

ॐ अद्येत्यादि देशकाली स्मृत्त्वा अमुका गोत्र अमुक प्रवर अमुक शर्माहं विहितस्य समस्तकर्मणः परिपूर्णता सिद्धचर्थीमिदं तण्डुलपूरितपूर्णपात्रं प्रजापतिदैवतं सुपूजिताय अमुक गोत्राय अमुक शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । (पूर्णपात्र पूर्वं देशान्तरम् श्रावयेत् ।)

गोदानम्

(गोदान गर्ने)

तत आचार्य सम्पूज्य वरं दद्यात् – (गौर्ब्राह्मणस्य वरमुच्यते)

सङ्कल्पः –

(सङ्कल्प गर्ने)

अद्येहामुकोऽहं मम कृतस्य समावर्तनकर्मणः साङ्गतासिद्ध्यर्थ रुद्र दैवतम् इमां गां गोनिष्क्रयीभूतं सुवर्णं आचार्याय तुभ्यं संप्रददे । इति । तत आचार्यमुखात् स्नातको नियमान् श्रणुयात् । तत आचार्यः सम्पूज्य वरं दद्यात् –

सङ्कल्पः –

(दानप्रतिष्ठा सङ्कल्प गर्ने)

अद्येहामुकोऽहं मम कृतस्य समावर्तनकर्मणः साङ्गतासिद्ध्यर्थ (साद्गुण्यार्थम्) इमां गां गोनिष्क्रयीभूतं सुवर्णं आचार्याय ब्राह्मणाय तुभ्यं संप्रददे । इति । तत आचार्यमुखात् स्नातको नियमान् श्रणुयात् ।

दक्षिणा सङ्कल्प

(दक्षिणा सङ्कल्प गर्ने र दिने)

ततो भूयसीं सङ्कल्पयेत् – अद्येहेत्यादि अमुकोऽहममुकनाम्नो ब्रह्मचारिणश्चूडोपनयनवेदारम्भसमावर्तनकर्मणां न्यूनाति-रिक्तपरिपूर्त्यर्थं साद्गुण्यार्थम् इमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च विभज्य दास्ये । तथा एतत्कर्मणः साङ्गफलप्राप्त्यर्थं साद्गुण्यार्थं यथोपपन्नेन सिद्धान्नेनामान्नेन वा यथासंख्याकान् ब्राह्मणान्भोजयिष्ये ॥इति॥

नवग्रहादीनां विसर्जनम्, कर्मसर्वाङ्गपूर्त्यै विष्णोःस्मरणम् च

(विसर्जन गर्ने)

नवग्रहादीनां विसर्जनमन्त्रः–

ॐ उस्रावेतं धूर्षाहौ युज्येथामनश्रूऽअवीरहणौ ब्रह्मचोदनौ । स्वस्ति यजमानस्य गृहान् गच्छतम् ॥ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् । इष्टकामसमृद्धचर्थं पुनरागमनाय च ॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ सुरेश्वर । ॥इति॥

अथ कर्मसर्वाङ्गपूर्त्यै ॐ तत्सत् –

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ॐ अच्युताय नमः ३ । प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च । स्मरणादेव तद्विष्णोः सम्पूर्ण स्यादितिश्रुतिः ॥ ॐ विष्णवे नमः ३ ।

ब्राह्मणेभ्यो दक्षिणां दत्वा अभिषेकतिलकरक्षाबन्धनादिकं कुर्यात् ।

।। श्रीगणेशाय नमः ।।

अथ विवाहपद्धतिः

पञ्चगव्यप्राशनविधिः (पेज नं. ३) (पञ्चगव्य खाने)
आशन शुद्धी (पेज नं. ४) (आुन शुद्धि गर्ने)
आचमनम्ः (पेज नं. ४) (आचमन गर्ने)
कर्मपात्रनिर्माणविधिः (पेज नं. ४) (कर्मपात्र बनाउने)
सर्षाप देवयजन भूमौ विकिरेत् (पेज नं. ५) (सर्स्यूं छर्ने)
स्वस्तिवाचनम्ः (पेज नं. ७) (रेखी हाल्ने)
प्रतिज्ञा सङ्कल्प (पेज नं. ७) (प्रतिज्ञासङ्कल्प गर्ने)
तत्रादौ गोपूजनम् (पेज नं. ८) (गोदान गर्ने)
अथ स्वस्तिवाचनम् (पेज नं. १०) (स्वस्तिवाचन गर्ने)
अर्घस्थापनम् (पेज नं. २०) (अर्घ बनाउने)
अथ ब्राह्मणवरणम् (पेज नं. २३) (वरण गर्ने)
अथ पुण्याहवाचनम् (पेज नं. २४) (पुण्याहवाचन गर्ने)
अथ दीपकलशगणेश पूजा (पेज नं. २६–२९) (दियो, कलश, गणेश पूजा गर्ने)
अथ रक्षाबन्धनपूजा (पेज नं. २९) (रक्षाबन्धन पूजा गर्ने)
ततः कलशस्कन्धप्रदेशे (पेज नं. ३०) (नवग्रह पूजा गर्ने)
पुस्तक प्रार्थना (पेज नं. ३०) (पुस्तकपूजा र प्रार्थना गर्ने)
अग्निस्थापनविधिमनुसृत्य वनस्पत्यन्तहवनम् (पेज नं. ३१-३७) (अग्निस्थापना अनुसार गरेर वनस्पतिपछि)

स्वयंवरविधिः

(स्वयंवर गर्ने)

विधिरयं क्षत्रियाद्याचारपरम्पराप्राप्तः तत्रादौ कन्यायाः प्रायश्चित्तगोदानम् । (कन्याले गोदान गर्ने)

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

इति गां ॥ (गाईको पूजा गर्ने, पेज नं. ५)

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धितायकृष्णाय गोविन्दाय नमो नमः ॥

इति द्विजं च सम्पूज्य ।

कुशादीन्यादाय – (ब्राह्मणलाई टीका लगाई सङ्कल्प गर्ने)

पूर्वसङ्कल्पमुच्चार्य ... ... गोत्रोत्पन्ना देवी ... ... अहं मम भर्तृसहयोग-धर्म्यप्रजोत्पादन ... ... स्वगृह्योक्तविविधधर्माचरणाद्यधिकारसिद्धिपूर्वक श्रीमत्परमेश्वरप्रीतिफलकैतद्विवाहोपयुज्यमानवर्णवश्यतारायोनि ग्रहमैत्र्यादिसंमेलनपूर्वकग्रहानुकूल्यसंयोजनाद्यनुपलब्धिजनितसक लदोष निवारकाऽऽचारपरंपराप्राप्तस्वयंवरकर्मणि ज्ञाताज्ञातसमस्तपापक्षयद्वाराधिकारसिद्धये तथाऽऽनाचरितानामप्याचरणीयानां तत्तन्नियमानामाचरि तवत्त्वसिद्धि-द्वारैतत्कर्मजन्यपूर्वनिर्दिष्टफलसिद्धये इदं कृच्छ्रप्रत्याम्नायीभूतरुद्रदेवताकांगां गोनिष्कयद्रव्यं विष्णु दैवतम् ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥ प्रार्थनाः ॐ कपिले० ।

दानप्रतिष्ठा – अद्यकृतैतत् – (गोदानको दानप्रतिष्ठा गर्ने)

इन्द्राण्यादिपूजनसङ्कल्पः

कन्या कुशादीन्यादाय – (सङ्कल्प गर्ने)

गोत्रोत्पन्ना ... ... नाम्नी देव्यहं विधास्यमानविवाहपूर्वविधेयस्वयंवरकर्मणि दीपकलशगणेशपूजनपुण्याहवाचनपूर्वकं शच्यादिदेवतापूजनं करिष्ये । इति संकल्प्य – दीपं संपूज्य प्रार्थयेत् ॥ नमोस्त्वनन्ताय ॥ दीपनारायणाय नमः । यथाविधि कलशं सम्पूज्य प्रार्थयेत् । वरुण त्वं महाभाग सर्वदेवप्रपूजितः । विततं मम यज्ञेऽस्मिन्नविघ्नं कुरु सर्वदा । वरुणाय नमः ॥ ततः गणेशं यथाविधि सम्पूज्य प्रार्थयेत् । (दियो, कलशको पूजा गरी गणेशको प्रार्थना गर्ने)

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।
अविरलमदजलनिवहं भ्रमरकुलानेकसेवितकपोलम् । अभिमतफलदातारं कामेशं गणपतिं वन्दे ।
श्रीमन्मङ्गलमूर्तये महागणाधिपतये नमः ॥ (वरण गर्न सङ्कल्प गर्ने)

ततः पुण्याहवाचनम्-वरणसामग्रीं समादाय – गोत्रा ... ... नाम्नी देव्यहं मम स्वयंवरकर्मणि पुण्याहं वाचयितुमेभिर्गन्धाक्षतद्रव्यवस्त्रादिभिर्युष्मानहं वृणे । इति चतुरो ब्राह्मणान् वृत्वा–कृताञ्जलिः –

... ... गोत्रायाः ... ... देव्याः मम स्वयंवरकर्मणि । (इति प्रतिवारमुक्त्वा) (वधूले नमस्कार गर्ने)

भो ब्राह्मणाः पुण्याहम् भवन्तो ब्रुवन्तु ३ । ॐ पुण्याहम् ३ । ॐ पुनन्तुमा० (इति ब्राह्मणाः)
भो ब्राह्मणाः स्वस्ति भवन्तो ब्रुवन्तु ३ । ॐ स्वस्ति ३ । ॐ स्वस्ति न इन्द्रो० (इति ब्राह्मणाः)
भो ब्राह्मणाः ऋद्धिम् भवन्तो ब्रुवन्तु ३ । ॐ ऋद्धिः ३ । ॐ सत्रस्य० (इति ब्राह्मणाः)
भो ब्राह्मणाः वृद्धिम् भवन्तो ब्रुवन्तु ३ । ॐ वृद्धिः ३ । ॐ ज्यैष्ठ्यं च म० (इति ब्राह्मणाः)
भो ब्राह्मणाः कल्याणम् भवन्तो ब्रुवन्तु ३ । ॐ कल्याणम् ३ । ॐ यथेमां ० (इति ब्राह्मणाः)
भो ब्राह्मणाः शान्तिम् भवन्तो ब्रुवन्तु ३ । ॐ शान्तिः ३ । ॐ द्यौः शान्तिः० (इति ब्राह्मणाः)
भो ब्राह्मणाः श्रियम् भवन्तो ब्रुवन्तु ३ । ॐ श्रीः ३ । ॐ मनसः० (इति ब्राह्मणाः) (प्रसाद लगाइदिने)

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥

इत्याशिषो गृहीत्वा थाल्यामष्टदलं कमलं विलिख्य पूर्वादिक्रमेण पूजयेत् । (अष्टदल बनाउने र कलशमा थाली स्थापना गर्ने)

इन्द्राण्यादि पूजा

(पूर्वदेखि क्रमैले पूजा गर्ने)

कौसल्यां, सीतां, मन्दोदरीं, ताराम, अञ्जनाम्, दमयन्तीम्, सुवर्चोवतीम्, नर्मदाम्, गङ्गाम्, गान्धारीम्, कुन्तीम्, द्रौपदीम्, सुभद्राम्, हिडिम्बाम्, छायाम्, रोहिणीम्, मित्राम्, बुद्धिमतीम्, सावित्रीम्, लक्ष्मीम्, उमाम्, रुक्मिणीम्, अनसूयाम्, अरुन्धतीं च सम्पूज्य मध्ये शचीं यथासंपादितैः पाद्यादिभिरुपचारैः पूजयेत् ॥ (माला चढाउने र धूपवत्ती गर्ने)

प्रार्थना

(नमस्कार गर्ने)

धूपदीपनैवेद्यादिनीराजनान्तं पूजनं विधाय गृहीतपुष्पाञ्जलिः प्रार्थयेत् ॥ तत्र मन्त्रौ –

देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियवादिनि । विवाहभाग्यमारोग्यं पुत्रलाभं च देहि मे ॥
धान्यं देहि धनं देहि पशून् देहीन्द्रभामिनि । यशो देहि सुखं देहि सर्वकार्यकरी भव ॥ इति ॥

ततो ज्योतिर्विदादिष्टे सुमुहूर्ते प्राप्ते दूर्वादिरचितां माङ्गलिकीं वरणस्रजं हस्ताभ्यां धृत्वा –

स्वयंवर

(स्वयंवर गर्न बेहुलीले जल लिई बेहुलालाई ३ पटक परिक्रमा गर्ने)

देवेन्द्राणि नमस्तुभ्यं महालक्ष्मी नमोऽस्तु ते । आवयोः प्रीतिरतुला त्वत्प्रसादात्सदा भवेत् ॥
पाण्डवानां द्रुपदजा यथा सत्या पतिव्रता । वायोरप्यञ्जना देवी यथा च्छाया विभावसोः ॥
शन्तनोश्च यथा गङ्गा चन्द्रस्य रोहिणी यथा । रुक्मिणी वासुदेवस्य रामस्य जानकी यथा ।
धृतराष्ट्रस्य गान्धारी सावित्री ब्रह्मणो यथा । तथा भवेयं सततं त्वत्प्रसादात्पुलोमजे ॥
सर्वे देवाश्च मुनयो मानवाः साक्षिणो मम । मनसा कर्मणा वाचा वृतोऽयं हि पतिर्मया ॥ इति ॥
ॐ भद्रंकर्णेभिः, आनोभद्राः, स्वस्तिनः इन्द्रो, मङ्गलं भगवान् विष्णुः, तदेव लग्नं सुदिनं तदेव तारावलं चन्द्रवलं तदेव । विद्यावलं दैववलं तदेव लक्ष्मीपते तेऽन्घ्रियुगं स्मरामि ॥

(पूर्व पश्चिम फर्किएर बेहुलीले बेहुलालाई र बेहुलाले बेहुलीलाई टीका, माला, औंठी लगाइदिने)

इत्यादीन् मंगलमन्त्रान् पठत्सु द्विजेषु, वाद्यमानेषु वाद्येषु तां वरणस्रजं वरस्य कण्ठदेशे निदधीत ॥ ततः पूजितानां देवानां विसर्जनं विधाय दक्षिणां दद्यात् । तत्र वाक्यम् – देव्याः मम ... ... स्वयंवरकर्मणि कृतस्य दीपकलशगणेशशच्यादिदेवतार्चनकर्मणः साङ्गतासिद्धिद्वारा समीहितदाम्पत्यसुखसमृद्धिसिद्ध्यै इमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुमहमुत्सृजे । इति दत्त्वा यस्यस्मृत्येति साञ्जलिरच्युतं प्रणम्य, अभिषेकं प्रसादञ्च वरपुरःसरं कन्या गृह्णीयात् । ततः कन्यावरयोरन्योन्याङ्गुलीयकमुद्राविनिमय आचारात् । इति स्वयंवरविधिः ।

(ब्राह्मणहरूलाई दक्षिणा दिने)

अथ पटलाञ्छनम्

(बेहुलाले छाप लगाएको कपडासहित साइत पत्र (साहिपाटा) लैजाने)

तत्र-कन्या कुशादीन्यादाय –

(सङ्कल्प गर्ने)

गोत्रायाः ... ... देव्याः मम करिष्यमाणे विवाहकर्मणि प्राग्विधेयत्वेन शिष्टाचार परम्पराप्राप्तं पटलाञ्छनं कर्म दीप-कलश-गणेश-शचीपूजनपूर्वकमहं करिष्ये । इति प्रतिज्ञाय - दीपादीनां पूजायां निवृत्तायां गृहीतपुष्पाञ्जलिः ।

नमोस्त्वनन्ताय इति दीपनारायणं । (दियो, कलश, गणेश पूजा गर्ने)

वरुण त्वं महाभाग सर्वदेवप्रपूजित । विततते मम यज्ञेऽस्मिन्नविघ्नं कुरु सर्वदा ॥

इति वरुणम् ॥ वक्रतुण्डेति गणेशं च संप्रार्थ्य, प्रसारिते सिततण्डुलपुञ्जेऽष्टदलकमलकर्णिकायां गन्धाक्षतपुष्पाण्यादाय –

ॐ शचि इहागच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरा वरदा भव इत्यावाह्य आसनं, पाद्यम्, अर्घ्यं, स्नानं, पञ्चामृतस्नानम्, शुद्धोदकम्, गन्धम्, अक्षतान्, पुष्पाणि, सिन्दूरम्, पिष्टातकम्, अभ्रकम्, माल्यम्, धूपम्, दीपम्, नैवेद्यम्, पानीयम्, सौभाग्यद्रव्यम्, दक्षिणाम्, नीराजनं च, शच्यै नमः ।

(बेहुलातर्फ छाप लगाएको कपडामा वेहुलीले छाप लगाउने र साइतपत्र पूजा गर्ने)

इति नाममन्त्रेण समर्प्य गृहीतपुष्पाञ्जलिः प्रार्थयेत् । तत्र मन्त्रौ –

देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियवादिनि । विवाहभाग्यमारोग्यं पुत्रलाभं च देहि मे ॥
धान्यं देहि धनं देहि पशून् देहीन्द्रभामिनि । यशो देहि सुखं देहि सर्वकार्यकरी भव ॥

ततः सुमुहूर्ते वाद्यमानेषु वाद्येषु, पठत्सु मङ्गलान् वैदिकमन्त्रान् ब्राह्मणेषु, कर्पूर–कुङ्कुम-कस्तूरी-मिश्रितपीतचन्दनाक्तपाणिद्वया कन्या ईषद्विरलिताङ्गुलिपञ्चका वरपाणिलाञ्छन-योरधस्तात् श्वेतपटे शनैः शनैः लाञ्छनं कुर्यात् । तत्र मन्त्रौ –

ॐ दक्षिणत उहैक उपदधाति तदेताः पुण्या लक्ष्मीर्दक्षिणतो दध्मः ।
तस्माद्यस्या दक्षिणतो लक्ष्म भवति तां पुण्यलक्ष्मीमाचक्षते ॥ (ब्राह्मणले साइतपत्र सुनाउने, वेहुलीले दक्षिणा दिने)
ॐ कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः ।
अभित्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाध्वर्यूसादयतामिह त्वा ॥

ततो दक्षिणासङ्कल्पः – तत्र वाक्यम् – गोत्राया ... ... मम शिष्टाचारपरंपराप्राप्तविवाहप्राक्कालविधेयपटलाञ्छनकर्माङ्गतया कृतस्य शच्यादिदेवतापूजनंकर्मणः साङ्गतासिद्धिद्वारा यावदपेक्षितगार्हमेधिकसुखसमृद्धि – सिद्धये न्यूनतातिरिक्तादोषपरिहाराय इदं दक्षिणाद्रव्यं रजतं चन्द्रदैवतम् ... ... इत्यादि ॥ ततो लब्धप्रसादकुसुमादिर्वधूः साञ्जलिः – यस्य स्मृत्येत्यादि पठेदिति शिवम् ॥ इति पटलाञ्छनम् ॥ (बेहुलालाई तीन पटक परिक्रमा गरी जन्ती पर्सने)

वाग्दानसंक्षिप्तविधिः

(कन्यापितालेवरको हातमा जनै, सुपारी, नरिवल आदि दिने)

ज्योतिर्विदादिष्टे शुभदिने कृतशकुनदर्शनाः सुवेषाः वरपित्रा, वरभ्रात्रा, वरबान्धवेन येन केनापि वा समेताः द्व्यदयोऽष्टपर्यन्ताः युग्माः ब्राह्मणाः कन्यागृहं गच्छेयुः । श्रावयेयुश्च कन्यापित्रादिकान् कन्याप्रार्थनवचनम् ।

मत्पुत्रार्थं मद्भ्रात्रर्थं मद्बन्ध्वर्थं मन्मित्रार्थं वा प्रयच्छ निजां कन्यां महाभाग । इति ।

ततः कन्याप्रदः (पित्रादिः) स्वीकृतभार्याद्यनुमतिः उच्चैःस्वरेण त्रिवारं दास्यामि –३ । इति उक्त्वा शुचिः प्रक्षालितपाणिपादः पूर्वाभिमुख उपविश्य आचम्य कुशादीन्यादाय – देशकालौ स्मृत्वा ... ... शर्माऽहं दीपकलशगणेशपूजनपूर्वकं करिष्यमाणकन्याविवाहाङ्गभूतं वाग्दानं करिष्ये । इति संकल्प यथाविधि दीपादीन्

संपूज्य पुण्याहं च वाचयित्वा कन्यायाचकं प्राङ्मुखम् आसने उपवेश्य स्वयं तदग्रतः प्रत्यङ्मुख उपविश्य तं गंधादिभिः समभ्यर्च्य धौतोत्तरीयान्तरीय–नारिकेल–ब्रह्मसूत्र–हरिद्रा–पूगीफल–ताम्बूल–चन्दनाक्षत–दूर्वादल–पुष्प–द्रव्य–संभृतं पात्रं हस्ताभ्यामादाय – गोत्रोत्पन्ना ... ... पुत्री ... ... नाम्नीं कन्यां ज्योतिर्विदादिष्टे सुमुहूर्ते दास्ये । इति तत्पात्रं दत्त्वा –

प्रार्थना – (कन्यापक्षले वरपितालाई टीका माला लगाई नमस्कार गर्ने)

अव्यङ्ग्येऽपतितेऽक्लीबे दशदोषविवर्जिते । इमां कन्यां प्रदास्यामि देवाग्निद्विजसन्निधौ ॥

इति कृताञ्जलिः पठित्वा पुनः – (कन्याको पितखाले भन्ने)

ॐ वाचा दत्ता मया कन्या पुत्रार्थं स्वीकृता त्वया ।
कन्यावलोकनविधौ निश्चितस्त्वं सुखी भव । इति पठेत् ।

ततो वरपिता – (वरपिता वा वरले भन्ने)

ॐ वाचा दत्ता त्वया कन्या पुत्रार्थं स्वीकृता मया ।
वरावलोकनविधौ निश्चितस्त्वं सुखी भव । इति पठेत् ।

ततश्च सहागतान् जनान् गन्धाक्षतताम्बूलदक्षिणादिभिः सत्कृत्य कन्यां च दध्यक्षतैः कुङ्कुमाक्तैरलं कुर्यात् । समागता ब्राह्मणा आशीर्मन्त्रान् उच्चार्य पुष्पप्रदानेन कन्यापितरं प्रतोष्य वरेण सह वरगृहान् प्रतिगच्छेयुः । ततश्च कन्याऽपि प्रक्षालितपाणिपादा शुद्धासने उपविश्य आचम्य दीपकलशगणेशान्संपूज्य संप्रार्थ्य सिततण्डुल-पुञ्जे शचीमावाह्य शच्यै नमः । इति नाममन्त्रेण पाद्यार्घाचमनीयगन्धाक्षतादिभिर्नीराजनान्तैरुपचारैःसंपूज्य, सोपायनद्रव्यं श्रीफलं हस्तयोर्धृत्वा प्रार्थयेत् । तत्र मन्त्राः – (फल लिई नमस्कार गर्ने)

इदं फलं मया देवि स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियवादिनि । विवाहभाग्यमारोग्यं पुत्रलाभं च देहि मे ॥
धान्यं देहि धनं देहि पशुन्देहीन्द्रभामिनि । यशोदेहि सुखं देहि सर्वकार्यकरी भव ॥
त्वदाराधनतः सर्वमलभ्यं नैव भूतले । तस्माद्देहि ममैश्वर्यं विपुलं वज्रिवल्लभे ॥ इति ॥

ततः सच्चरित्राः सुवासिन्यः समङ्गलगानं कन्यां नीराजयेयुः । ब्राह्मणाश्च – ॐ श्रीश्चते० ॐ कुलायिनी० ॐ मनसः- काम० ॐ दीर्घायुस्त० इत्यादिमन्त्रपाठान्ते कन्यकां प्रसादेनालङ्कुर्युः ॥ इति वाग्दानविधानम् ।

अथ वरणी (वरलाई पिर्कामा उभ्याई कपडाले छेक्ने र वधूको पिताले फूल अक्षता लिई नमस्कार गर्ने)

भवनद्वारसमीपं समायाते वरे कन्याप्रदः– (अकृतभोजनः) पित्रादिः स्वबान्धवान् आप्तानन्याँश्च सह कृत्वा सवाद्यं समङ्गलगानं कलशं संभारं पुरस्कृत्य गृहीतपर्युक्षणोपचारः (स्वीकृतलाजाक्षतपुष्पादिसामग्रीकः) वाहनस्थमेव सकलशं वरं सपर्युक्षणं त्रिः परिक्रम्य तिलकेनाऽलंकृत्य स्वकीयकलशे वरकलशेन संयोजिते वरं वाहनाद् अवतार्य कलशयुगलं समङ्गलगानं पुरस्कृत्य सज्जीकृतार्चनोपचारां द्वारभूमिम् आनयेत्, पूर्वाभिमुखं च कारयेत् ।

स्वयं च शुद्धासने प्रत्यङ्मुख उपविश्य आचम्य कुशादीन्यादाय – (सङ्कल्प गर्ने)

पूर्वसंकल्पमुच्चार्य ... ... गोत्रः ... ... शर्माऽहं ... ... नाम्न्याः कन्यायाः करिष्यमाणविवाहकर्मणि समागतस्य ... ... गोत्रस्य ... ... प्रवरस्य ... ... शर्मणो वरस्य दीपकलशगणेशपूजन – (वाग्दान) पूर्वकं यथासंपादितोपचारैः पूजनं करिष्ये। इति संकल्प्य, यथाविधि दीपादीन् संपूज्य (वाग्दाने पूर्वमकृते वाग्दानाविधिना वाग्दानं च कृत्वा)। पीतवस्त्राच्छन्नायां संभवतश्चम्पककाष्ठपीठिकायां वरं प्राङ्मुखमारोह्य स्वयं संमुखीभूय मध्ये पीतंपटं प्रसार्य बद्धाञ्जलिः – स्वयमेवैतान् मन्त्रान् पठेत्, (आचार्यं वा पाठयेत्)। (बेहुलीको बुवाले फूल अक्षता लिई हात जोड्ने)

ॐ नमः श्रीपते नाथ नमस्तुभ्यमुमापते। गजवक्त्र नमस्तुभ्यं भारति त्वां नमाम्यहम्॥

ॐ स्वस्ति नवग्रहाः स्वस्ति स्वस्ति नारायणः सदा। स्वस्ति सुरेश्वर इन्द्रो द्यौर्भूमिर्वायुः स्वस्तये॥

ॐ स्वस्ति वैश्वानरः स्वस्ति विश्वेदेवाश्च स्वस्तये। स्वस्ति रुद्रः पिता स्वस्ति स्वस्तिकर्ता महेश्वरः॥

ॐ स्वस्ति वायुर्धनं स्वस्ति स्वस्तिदाता नृपः स्वयम्। स्वस्ति श्रीर्गणपतिश्चैव स्वस्ति श्रीर्माधवप्रिया॥

ॐ प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्वभयं नो वृद्धिः॥ अथ वरं वृणीते श्रियः प्रयाणे सुखाय कल्याणं धर्मार्थकाममोक्षरतो देवाय दातव्यम्। अविरलसन्तानचिरजीविनं सुखाय विन्दानं सुतवर एवं कामान् यस्तु वरः। प्रियसावित्रीं गुणसंयुक्तां दोषरहितां बहुकुलनिर्मलसंयुक्ताम्। तुष्यन्ति देवता मातृगणो वरोऽभिषिक्ते दीर्घमायुः स्वस्तिब्रूता ब्रूहि॥ आवाहयाम्यहं देवं सुन्दरं कामरूपिणम्। मम पापविनाशाय प्रजापतेति च क्रमात्॥ ॐ प्रजापते नत्वदेतान्यन्यो विश्वारूपाणि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳस्याम पतयो रयीणाम्॥

हिमाचलो यथा देवं रुद्रमावाहयत् पुरा। तथा भवन्तं प्रवरं वरमावाहयाम्यहम्॥

ॐ नमस्ते रुद्र मन्यवऽउतो त इषवे नमः। बाहुभ्यामुत ते नमः॥

त्वं च ब्रह्मा त्वं च विष्णुस्त्वं च देवो महेश्वरः। आगच्छन् दिव्यमूर्तिस्त्वं सर्वपापहरो भव॥

ॐ असङ्ख्याता सहस्राणि ये रुद्रा अभिभूम्याम्। तेषाꣳसहस्रयोजने वधन्वानि तन्मसि॥

धर्मदं मोक्षदं चैव सर्वारिष्टविनाशनम्। नारायणस्वरूपस्य पश्यामि वदनं तव॥

ॐ अथ व्वरं व्वृणीते बलवद्ध वै देवाऽएतस्य ग्रहस्य होमं प्रेप्सन्ति तेऽस्माएतं वरꣳसमर्द्धयन्ति क्षिप्रे न ऽइमं ग्रहं जुहवदिति तस्माद् वरं वृणीते॥१॥

अथ वरं वृणीते यꣳह वै कं च सुषुवाणे वरं व्वृणीते सोऽस्मै सर्वः समृद्ध्यते तस्माद्वरं वृणीते॥२॥

अथ वाराह्याऽउपानहाऽउपमुञ्चते अग्नौ ह वै देवा घृतकुम्भं प्रवेशयाञ्चक्रुस्ततो वराहः सम्बभूव तस्माद्वराहो मेदुरो घृताद्धि सम्भूतस्तस्माद्वराहे गावः सञ्जानते स्वमेवैतद्र-समभिसञ्जानते। तत्पशूनामेवैतद्रसे प्रतितिष्ठति तस्माद्वाराह्या ऽउपानहाऽउपमुञ्चते॥३॥

स आजगाम गौतमो यत्र प्रवाहणस्य जैवलेरास, तस्मा आसनमाहृत्योदकमाहारयाञ्चकारा थ हास्माऽअर्घं चकार तंꣳहोवाच वरं भवते गौतमाय दद्म इति॥४॥

स होवाच प्रतिज्ञातो म ऽएष व्वरो यां तु कुमारस्यान्ते वाचमभाषथास्तां मे ब्रूहीति॥५॥

स होवाच देवेषु वै गौतम तद्वरेषु मानुषाणां ब्रूहीति॥६॥

स होवाच व्विज्ञायते हास्ति हिरण्यस्योपात्तं गोऽश्वानां दासीनां प्रवाराणां परिधानानां मा नो भवान् बहोरनन्तस्यापर्यन्तस्याभ्यवदान्यो भूदिति, स वै गौतम तीर्थे नेच्छासा इति ।
उपैम्यहं भगवन्तमिति, व्वाचा ह स्मैव पूर्वऽउपयन्ति सहोवायनकीर्ताऽउवाच ॥७॥
ॐ असौ यस्ताम्रोऽअरुणऽउत ब्रभ्रुः सुमङ्गलः ।
ये चैन ꣳ रुद्रा ऽअभितो दिक्षु श्रिताः सहस्रशो वैषा ꣳ हेड ईमहे ॥
ततः पीतपटमपसार्य – (ढाकेको वस्त्र झिकिदिने)
'ॐ अर्चयिष्यामो भवन्तम्' इति कन्याप्रदो ब्रूयात् । (कन्याका पिताले भन्ने)
'ॐ अर्चय' इति वरः प्रतिब्रूयात् । (वरले भन्ने)
ततः – (कन्याको पिताले जल लिएर तीनपटक परिक्रमा गर्ने)
ॐ यानि कानि च पापानि जन्मान्तर कृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥
इति ।
वरं त्रिःपरिक्रम्य अञ्जलिं वद्ध्वा प्रार्थयेत् –
"ॐ आगतोऽसि वरश्रेष्ठ सर्वकामार्थसिद्धये । प्रतिग्रहसमर्थोऽसि अर्घं गृह्ण नमोऽस्तुते" ॥ इति ।
गृह्णामीति वरेणोक्ते तदञ्जलौ क्रमेण – (लेखेका सामान वरको अञ्जुलीमा क्रमशः राख्ने)
विष्टरं, चन्दनम्, अक्षतान्, विविधानि पुष्पाणि, जाति–चम्पक-आम्र-अश्वत्थ–वट-उदुम्बर–पल्लवान्, पञ्चरत्नानि, गङ्गोदकम्, यवान्, कर्पूरम्, पूँगीफलम्, ताम्बूलम्, दूर्वाङ्कुरान्, सर्षपान्, लाजान्, नारिकेलफलं, सुगन्धि–द्रव्यम्, द्रव्यं च समर्प्य दधि-मधु-घृत-पुष्पाक्षत–गङ्गोदक-कुशखण्ड-सहितं शङ्खरूपमर्घपात्रं हस्ताभ्यामादाय वरस्य नाभौ (नाभीमा), हस्तयोः (दुई हातमा), हृदि (हृदयमा), स्कन्धे (दुई काँधमा), शिरसि (शिरमा), पादयोः (पाउमा), जानुनोः (घुँडामा), उदरे (पेटमा), चाऽर्घं दत्वा– (थोरै अर्घ्यले छुने गरी मात्र दिने)

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे । (बेहुलाको पूजा गर्ने)
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥
इति पठन चन्दनाक्षतमाल्यैर्वरं पूजयेत् । (वरणी सामग्री धोती, टोपी, छाता, औंठी आदि सङ्कल्प गरी बेहुलालाई दिने)
ततोः वरणसामग्रीं गन्धाक्षतपुष्पपूगीफलस्वर्णद्रव्ययज्ञोपवीततताम्बूलपादुकोपानहपुष्पमालोष्णीषधौतान्त रीयोत्तरीय-कुण्डलाङ्गदग्रैवेयक (कण्ठिका) (मुद्रिकादिका) हस्ताभ्यां गृहीत्वा एभिर्यथाशक्त्युपकल्पितैर्गन्धाक्षत पुष्पपूगीफलद्रव्य-यज्ञोपवीतादिभिर्द्रव्यैः करिष्यमाणकन्यादानप्रतिग्रहार्थं ... ... गोत्रम् ... ... प्रवरम् ... ... वेदाध्यायिनम् ... ... शाखिनम् ... ... शर्माणम् कन्यार्थिनं त्वामहं वरत्वेन वृणे । इत्युक्त्वा वरहस्तयोः, समर्पयेत् । वरश्च 'वृतोऽस्मी' ति प्रतिब्रुवन् तत्सर्वं स्वीकुर्यात्, यथायोग्यं मुद्रिकोत्तरीयादिकं परिदध्याच्च ।
ततो वरः पुष्पादिकमादाय – (वरले वधूका पितालाई टीका लगाइदिने)
ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योतिव्याधी महारथो जायतान्दोग्ध्री

धेनुर्वोढा नड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णु रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतां निकामे निकामे नः पर्जन्यो व्वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥

इति पठित्वा कन्यापित्रे आशीः प्रसादं समर्पयेत् ।

ततः कन्यापिता वरस्य दक्षहस्ताङ्गुष्ठं गृहीत्वा – (वरको बुढीऔंला समाई मण्डपमा लाने वा अलिकति हिँडाउने)

दूरदेशागतो भद्र शान्तिक प्रियदर्शन । कालक्षेपो न कर्तव्यो लग्नवेला प्रवर्तते ॥

इति पठित्वा तं पीठादुत्तारयेत् । ततश्च तं यानमारोह्य जनवासं (वारयात्रिकजनस्थानं) प्रापय्य यथासुखं विश्रामयेत् । ततश्च सवरान् वारयात्रिकान् यथोत्साहं यथावैभवं सत्कुर्यात् । ॥ इति वरणीविधिः ॥ (भोजन गराउने)

अथ कन्यादानविधिः

(कन्यादान विधि)

अथ कन्याप्रदः कृतवरणीकृत्यः यथासमयं शुल्काम्बरधरः शुचिः प्रक्षालितपाणिपादः समाहितचेताः सपत्नीकः प्रत्यङ्मुख उपविश्य प्राङ्मुखं निविष्टम् ऊद्ध्वंजानुं वरं संबोध्य– ॐ साधुभवानास्तामित्यस्य प्रजापतिऋषिः त्रिष्टुप् छन्दः यजुः ब्रह्मा देवता वरार्चने विनियोगः । ॐ साधु भवानास्ताम्, अर्चयिष्यामो भवन्तम् इति ब्रूयात् । (पिताले भन्ने)

वरश्च – ॐ अर्चय इति प्रतिब्रूयात् । (वरले भन्ने)

विष्टरो विष्टरो विष्टरः इति कन्यापक्षीयाः ब्रूयुः । (कन्यापक्षले भन्ने)

ॐ विष्टरः प्रतिगृह्यताम् इति कन्याप्रदोक्ते – (कन्यापक्षले भन्ने)

वरः– 'ॐ विष्टरं प्रतिगृह्णामि' इति उक्त्वा विष्टरं प्रतिगृह्य– (वरले भन्ने)

ॐ वर्ष्मोस्मीत्याथर्वण ऋषिः अनुष्टुप् छन्दः विष्टरो देवता आत्मस्तुतिपूर्वकोपवेशने विनियोगः । (विनियोग गर्ने)

ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः । इमं तमभितिष्ठामि यो मा कश्चाभिदासति ॥

इति पठन् उत्तराग्रं विष्टरं स्वासनाधः स्थापयेत् । (विष्टर आसनमुनि राख्ने)

ततः 'पाद्यम्–पाद्यम्–पाद्यम्' इति कन्यापक्षीयैः उक्ते कन्याप्रदः अञ्जलौ पाद्यं कृत्वा – (कन्यापक्षले भन्ने)

ॐ पाद्यं प्रतिगृह्यताम्' इति वदेत् । (कन्यापक्षले भन्ने)

वरः 'ॐ पाद्यं प्रतिगृह्णामि' इत्युक्त्वा दातुरञ्जलेः पाद्यं निजाञ्जलौ प्रतिगृह्य आचामेत् । (वरले भन्ने)

पादप्रक्षालनम् ततः कन्याप्रदः –

ॐ विराजोदोहोसीति प्रजापतिऋषिरापोदेवता यजुः पादप्रक्षालने विनियोगः । (वरको गोडा धुन विनियोग गर्ने)

ॐ विराजोदोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः ॥

इति मन्त्रेण दक्षिणं पादं प्रक्षाल्य मन्त्रावृत्त्या वामं प्रक्षालयेत् । (क्षत्रियादिर्वरश्चेत् पूर्वं वामं पादं प्रक्षाल्य दक्षिणं पश्चात्प्रक्षालयेत्) कन्यायास्तु सर्ववर्णानां वामं पादं प्रक्षालनीयम् । तत्र मन्त्रः– (कन्याको गोडा धुने)

का धेनुः कस्य को वत्सः का धेनुः कस्य दोहकः । कस्य धेनुर्विराजस्य किन्नामा कस्य दोहकः ॥
धर्म दुग्धं द्विजो धेनुः कन्या वत्सकमेव च । कन्यापाद विराजश्च यजमानश्च दोहकः ॥

इति कन्यापादप्रक्षालनं कृत्वा – (वरवधूलाई टीका लगाउने र दक्षिणा दिने)

अर्घग्रहणम्

(दुबो, अक्षता, चन्दन राखी शङ्खार्घ बनाउने)

ततः 'अर्घोऽर्घोऽर्घः' इति कन्यापक्षीयैरूक्ते दूर्वाक्षतचन्दनजलादिपूर्णं शङ्खार्घपात्रं हस्ताभ्यामादाय कन्याप्रदः –

'ॐ अर्घः प्रतिगृह्यताम्' इति वदेत्। (कन्यातर्फवाट भन्ने)

वरः – 'ॐ अर्घं प्रतिगृह्णामि' इत्युक्त्वा – (वरले भन्ने)

ॐ आप स्येति प्रजापतिऋषिरापोदेवता यजुः अर्घग्रहणे विनियोगः। (विनियोग गर्ने)

ॐ आपः स्थ युष्माभिः सर्वान्कामानवाप्तवान् इति पठन् अर्घं गृहीत्वा किंचित् पुष्पादिकं शिरसि धृत्वा –

ॐ समुद्रं वः प्रहिणोमीत्याथर्वण ऋषिः अनुष्टुप् छन्दः अर्घाभिमन्त्रणे विनियोगः।

(विनियोग गर्ने र वरको शिरमा फूल आदि राख्ने)

ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत। अरिष्टाऽ अस्माकं वीरा मा परासेचि मत्पयः॥

इति पठन् अर्घपात्रम् ऐशान्यां दिशि असञ्चरे (जनगतागतवर्जिते अघचनाम्नि प्रदेशे) स्थापयेत्। ततः आचमनीयम् आचमनीयम् आचमनीयम्। इति कन्यापक्षीयैरुक्ते आचमनीयम् आदाय कन्याप्रदः –

'ॐ आचमनीयं प्रतिगृह्यताम्' इति वदेत्। (आचमन गराउन जल वधूको हातमा राखिदिने)

वरः– 'ॐ आचमनीयं प्रतिगृह्णामि' इत्युक्त्वा ब्राह्मे तीर्थे आचमनीयं धृत्वा – (वरले भन्ने)

ॐ आमागन्निति परमेष्ठी ऋषिः आपो देवता बृहतीच्छन्दः आचमने विनियोगः। (विनियोग गर्ने)

ॐ आमागन् यशसा स ँसृज व्वर्चसा।

तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्॥

इति सकृत् आचम्य द्विवारंतूष्णीमाचामेत्। (वरले आचमन गर्ने)

मधुपर्कविधिः

(मधुपर्क गराउने)

ततः 'मधुपर्को मधुपर्को मधुपर्कः' इति कन्यापक्षीयैरुक्ते मधुपर्कं हस्ताभ्यां धृत्वा कन्याप्रदः–

ॐ मधुपर्कः प्रतिगृह्यताम् इति वदेत्। (कन्याका पिंताले भन्ने)

वरः – 'ॐ मधुपर्कं प्रतिगृह्णामि' इत्युक्त्वा – (वरले भन्ने)

ॐ मित्रस्य त्वेति बृहस्पतिऋषिः मधुपर्कोदेवता यजुः मधुपर्कावेक्षणे विनियोगः। (विनियोग गर्ने)

ॐ मित्रस्य त्वा चक्षुषा समीक्षे। (मधुपर्क लिने)

इति तत्क्षणदूरीकृतपिधानपात्रं कन्याप्रदकरस्थं मधुपर्कम् अवेक्ष्य – (विनियोग गर्ने)

ॐ देवस्यत्वेति परमेष्ठी ऋषिर्गायत्री छन्दः सविता देवता मधुपर्कग्रहणे विनियोगः।

ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।

अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि।

इति मधुपर्क प्रतिगृह्य वामहस्तेन धृत्वा – (विनियोग गर्ने)

'ॐ नमः– श्यावेति प्रजापति ऋषिः सविता देवता यजुः मधुपर्कालोडने विनियोगः।

मधुपर्कडोलनम्

(मधुपर्क डोलाउने)

ॐ नमः भ्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि ।
दधिश्रेष्ठं मधुश्रेष्ठं घृतश्रेष्ठं तथैवच । त्रिश्रेष्ठं तद्विजानीयात् कथं मधु प्रतीक्षते ॥
दधिं च पलमेकं तु द्विपलं मधु उच्यते । एवं पलमेकं धुर्त कुर्यात् मधु प्रदीक्षते ॥
इति दक्षहस्तस्याऽनामिकया त्रिरालोडच अनामिकाऽङ्गुष्ठाभ्यां भूमौ त्रिर्निरुक्ष्य– ॐ यन्मधुन इति कुत्सऋषिर्मधुपर्को देवता जगतीच्छन्दः मधुपर्कप्राशने विनियोगः ।
ॐ यन्मधुनो मधव्यं परम ँ रूपमन्नाद्यम् । (तीन तीन पटक आ-आफ्नो ओठमा लगाई आचमन गर्ने)
तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्नादोसानि ॥
इति मन्त्रावृत्त्या त्रिः (३) प्राश्य शेषमसञ्चरे निदध्यात् ।

अङ्गालम्भनम् तत आचम्य –

ॐ वाङ्म इत्यादीनां सप्तानां परमेष्ठी ऋषिः दैवीगायत्री छन्दः परमात्मा देवता प्राणोपस्पर्शने विनियोगः ।
'ॐ वाङ्मऽ आस्येऽस्तु' (इति दक्षिणकराग्रेण मुखम्) (मुखमा छुने)
'ॐ नसोर्मे प्राणोऽस्तु' (इति तर्जन्यङ्गुष्ठाभ्यां युगपन्नासिकारन्ध्रद्वयम्) (नाकमा छुने)
'ॐ अक्ष्णोर्मे चक्षुरस्तु' (इति अनामिकाङ्गुष्ठाभ्यां युगपच्चक्षुर्द्वयम्) (आँखामा छुने)
'ॐ कर्णयोर्मे श्रोत्रमस्तु' (इति मन्त्रावृत्त्या मध्यमाङ्गुष्ठाभ्यां क्रमशः दक्षिणवामौ कर्णौ) (कानमा छुने)
'ॐ बाह्वोर्मे बलमस्तु' (इति करद्वयाग्राभ्यां परस्परं बाहू) (कुममा छुने)
'ॐ ऊर्वोर्मे ओजोस्तु' (इति करतलाभ्यां युगपदूरूद्वयम्) (तिघ्रामा छुने)
'ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु' इति शिरः प्रभृतिपादान्तानि अङ्गानि व्यस्ताभ्यां हस्ताभ्याम् आलभेत । (स्पृशेत्) ततस्त्विराचामेत् । (शिरदेखि पाउसम्म छुने)

गोरभिमन्त्रणम् ततः–

(कन्यापक्षले कुश लिने)
'गौर्गौर्गौः' इति कन्यापक्षीयैरुक्ते गोप्रतिनिधित्वेन कुशं गृहीत्वा कन्याप्रदः (कन्यापक्षले भन्ने)
'ॐ गौर्गृह्यताम्' इति वदेत् ।
'ॐ गृह्णामि' इत्युक्त्वा कुशं गृहीत्वा वरः (वरले भन्ने)
ॐ माता रुद्राणामिति वसिष्ठऋषिः गौर्देवता त्रिष्टुप् छन्दः गोरभिमन्त्रणे विनियोगः । (विनियोग गर्ने)
ॐ माता रुद्राणां दुहिता वसूना ँ स्वसादित्यानाममृतस्य नाभिः ।
प्रणुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥ (वरले कुश लिने)
मम चामुष्य (... ... शर्म्मणः कन्याप्रदस्य) च पाप्मा हत उत्सृजत तृणान्यत्तु, इत्युच्चार्य कुशं नखाग्रेण छिन्द्यात् ।। इति । (नङले कुश चुड्ने र भुइँमा छोड्ने)

अग्निस्थापनम् पूजनञ्च

(अग्निस्थापना अनुसार गर्ने)

ततः पुरोहितः केशतुषशर्करादिरहितां गोमयोपलिप्तां होमवेदीं कुशैः परिसमूह्य, तान् ऐशान्यं परित्यज्य, गोमयोदकेन त्रिः उपलिप्य, स्फ्येन स्रुवमूलेन वा प्रागग्रतया प्रादेशमितं प्रदेशम् उत्तरोत्तरक्रमेण त्रिः (३) उल्लिख्य, उल्लेखनक्रमेण दक्षिणहस्तानामिकाङ्गुष्ठाभ्यांय थोल्लिखिताभ्यो रेखाभ्यः त्रिः (३) पांसूनुद्धृत्य, कर्मपात्रजलेन अभ्युक्ष्य, तूष्णीं कांस्यपात्रस्थमग्निं योजकनामानं प्रत्यङ्मुखं मध्यतः समाधाय, तं प्रज्ज्वाल्य, तद्रक्षार्थं कंचन ब्राह्मणं नियुञ्जीत ॥

कन्यायै वस्त्रदानम्

(कन्यालाई वस्त्र दिने)

ततः कौतुकागारात् कन्यायाम् आनीतायां वरः कन्यायै प्रदेयं अन्तरीयं वस्त्रं (लहँगाख्यं) गृहीत्वा–

ॐ जरां गच्छेति प्रजापतिऋषिर्वासो देवता त्रिष्टुप् छन्दः वस्त्रपरिधापने विनियोगः । (विनियोग गर्ने)

ॐ जरां गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपावा ।
शतं च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वासः ॥

इति पठित्वा कन्याहस्तयोः दद्यात् । (कन्याको हातमा वस्त्र दिने)

तत उत्तरीयं (चोलो दुपटाख्यं) गृहीत्वा – (पछ्यौरा वस्त्र दिने)

ॐ या अकृन्तन्निति प्रजापतिऋषिर्वासो देवता जगती छन्दः उत्तरीयपरिधापने विनियोगः । (विनियोग गर्ने)

ॐ याऽअकृन्तन्नवयं याऽअतन्वत याश्च देवीस्तन्तूनभितो ततन्थ ।
तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः ।

इति पठित्वा कन्यायै दत्त्वा सौभाग्याभरणतया प्रसिद्धानि ललन्तिकादीनि (तिलहरी, नत्थ, पोते, पदवाच्यानि) भूषणानि वरः स्वयं तूष्णीं परिधापयेत् । शृङ्गारसामग्रीं च दद्यात् । (सौभाग्य सामग्री दिने)

वराय वस्त्रदानम्

(दुलाहालाई वस्त्र दिने)

ततः कन्याप्रदः वराय अन्तरीयं (धोतीप्रभृति नामक) दद्यात् । तद् गृह्णन् वरः –

ॐ परिधास्या इति आथर्वणऋषिर्लिङ्गोक्ता देवता पङ्क्तिश्छन्दः अन्तरीयपरिधाने विनियोगः । (विनियोग गर्ने)

ॐ परिधास्यै यशोधास्यै दीर्घायुत्त्वाय जरदष्टिरस्मि ।
शतं च जीवामि शरदः पुरुचीरायस्पोषमभिसंव्ययिष्ये ॥ इति पठेत् । (वस्त्र हातमा दिने)

कन्याप्रदः राङ्कवादिकं दोसल्लाख्योर्णवस्त्रप्रभृति उत्तरीयं, तद् वृह्णन् वरः – (दोसल्ला दिने)

ॐ यशसा मेत्याथर्वणऋषिर्लिङ्गोक्ता देवता त्रिष्टुप् छन्दः उत्तरीयपरिधाने विनियोगः । (विनियोग गर्ने)

ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती ।
यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम् ॥ इति पठेत् ।

ततः कन्याप्रदः वराय अन्यानि यथाशक्ति सज्जीकृतानि परिधानीयानि वस्त्राणि भूषणानि च तूष्णीं दद्यात् । वरश्च यथोचितं परिदध्यात् । ततः कन्या वरश्च द्विराचामेत् । ततः कन्याप्रदः –

'परस्परं समञ्जेथाम्' इति प्रैषमुच्चार्य कन्यावरौ संमुखौ कुर्यात्। (वरवधूले हेराहेर गर्ने)

वरः– कन्यां पश्यन् –

'ॐ समञ्जन्तु इत्याथर्वणऋषिर्लिङ्गोक्ता देवता अनुष्टुप् छन्दःसमञ्जने विनियोगः। (विनियोग गर्ने)

ॐ समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ।
संमातरिश्वा संधाता समुदेष्ट्री दधातु नौ। इति पठेत्। (फेरि हेराहेर गर्ने)

ततः कन्याप्रदपक्षीयः कोऽपि ब्राह्मणः साक्षतदूर्वापूगीफलद्रव्यैर्वस्त्र ग्रन्थिबन्धनं कुर्यात्। कन्याप्रदश्च चरणप्रक्षालनपूर्वं गन्धमाल्यादिना कन्यां वरं च संपूज्य धूपदीपौ च कारयेत्। अत्रैवाऽवसरे इतरेऽपि कन्यापक्षीयाश्चरणौ प्रक्षालयन्ति कन्यावरयोः)। (लगनगाँठो बनाउन वस्त्र, जनै, सुपारी दुबैपट्टिबाट ठीक पार्ने)

ततो वरं प्राङ्मुखं, कन्यां प्रत्यङ्मुखीं कृत्वा यथा चद्रं स्थानसौविध्येन वा कन्याप्रदः वरदक्षिणपार्श्वे उदङ्मुखः स्वदक्षिणपार्श्वस्थितया पत्न्या सहितः शुद्धासने उपविश्य बद्धशिखः शुचिः पवित्रपाणिः आचम्य प्राणानायम्य-लग्नशुद्धये लग्नगोदानं कुर्यात्। (पैसा, जनै, सुपारी राखेर लगनगाँठोको पूजा गर्ने)

ततः– गोनिष्क्रयीभूतं द्रव्यम्, ब्राह्मणं च संपूज्य कुशादीन्यादाय –(कन्यादान दिनेले गोदान गर्ने, पेज नं.८)

पूर्वसंकल्पमुच्चार्य ... ... गोत्रः ... ... शर्माहं ... ... राशेः अस्याः कन्यायाः विवाहलग्नात् निषिद्धे स्थाने स्थितानां ग्रहाणां दुष्टफलनिवृत्तिपूर्वकं शुभे स्थाने स्थितानां ग्रहाणां शुभफलाधिकतावाप्तये इदं गोनिष्क्रयीभूतं द्रव्यं ... ... दैवतं ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे। इति दत्वा।

ॐ कपिले सर्वदेवानामित्यादिना प्रार्थ्य दानप्रतिष्ठाद्रव्यं सकुशोदकमादाय – ॐ अद्यकृतैतद्ग्रहप्रातिकूल्य-संभाविताशुभफलनिवृत्तिपूर्वकशुभफलावाप्तये कृतस्य गोनिष्क्रयीभूत द्रव्यदानकर्मणः साङ्गतासिद्धये इदं ... ... द्रव्यं ... ... दैवतं दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे। इति दद्यात्।

प्रतिज्ञासंकल्पः

(प्रतिज्ञा सङ्कल्प गर्ने)

ततः कुशादीन्यादाय –

पूर्वसङ्कल्पमुच्चार्य ... ... गोत्रः ... ... प्रवरः .. ... शर्माऽहं समस्तपितृणां निरतिशयानन्दब्रह्मलोकावाप्त्यादि-कन्यादानकल्पोक्तनिखिल फलावाप्तये, तथा अनेन वरेण अस्यां कन्यायाम् उत्पादयिष्यमाणया सन्तत्या द्वादश परान् द्वादशावरान् आत्मना सपञ्चविं – शान् पुरुषान् पवित्रीकर्तुं श्रीमल्लक्ष्मीनारायणप्रीतये ब्राह्मेण विवाह विधिना यथाशक्ति अलंकृतायाः कन्यायाः प्रदानं करिष्ये। इति संकल्पजलमुत्सृजेत्।

कृताञ्जलिः – (कन्यादान दिनेले हात जोड्ने)

ॐ दाताहं वरुणो राजा द्रव्यमादित्यदैवतम्। वरोसौ विष्णुरूपेण प्रतिगृह्णत्वयं विधिः ॥ इति च पठेत्।

ततः उत्थाय वरस्य दक्षिणपाणितलस्योपरि कन्यायाः दक्षिणं पाणिं निधाय, शङ्खस्थदूर्वाक्षतकुशजलादीनि कन्याङ्गुष्ठं च गृहीत्वा अधस्तात् पात्रं निधाय पत्न्यां भृङ्गारेण (झारी-करुवा नाम पात्रेण) जलधारां प्रवर्तयन्त्याम् आचार्यः सङ्कल्पं पठेत्।

कन्यादानमहासंकल्पः (पानी, शङ्ख, कुश, जौ, तिल, जल लिएर कन्याको दाहिने हातको बुढी औंला समाई जल नटुटाई संकल्प गर्ने)

ततः उत्थाय दूर्वाक्षत सहित शंखोदकं हस्ते समादाय दक्षिणस्थया स्वपत्न्या भृङ्गारकेण जलपूर्णेन पूर्वमुखस्य वरस्य दक्षिणपाण्योपरि कन्याहस्तं कृत्वा आचार्यः संकल्पं पठेत्। ॐ श्रीमन्महागणाधिपतये नमः। श्रीमन्मङ्गलमूर्त्तये नमः। श्रीगुरवे नमः। श्रीसरस्वत्यै नमः। श्रीइष्टदेवताभ्यो नमः। ॐ वेदपुरुषाय नमः। कुलदेवताभ्यो नमः। ग्रामदेवताभ्यो नमः। स्थानदेवताभ्यो नमः। बास्तुदेवताभ्यो नमः। एतत्कर्मप्रधानदेवताभ्यो नमः। सर्वेभ्योदेवेभ्यो नमः। सर्वेभ्योब्राह्मणेभ्यो नमः। अविघ्नमस्तु। (वेहुलाले दुवै हात थापिरहने)

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः ॥१॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥२॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥३॥
शुक्लाम्बरधरं देवं शशिवर्णं चर्तुर्भुजम्। प्रसन्नवदनं ध्यायेत्सर्वकामार्थसिद्धये ॥४॥
अभीप्सितार्थसिद्धयर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥५॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ॥६॥
वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ। अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥७॥
वागीशाद्या सुमनसः सर्वार्थानामुपक्रमे। यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥८॥
गणनाथं नमस्कृत्य नमस्कृत्य पितामहम्। विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ॥९॥
स्थानं क्षेत्रं नमस्कृत्य दीनानाथं निशाकरम्। धरणीगर्भसम्भूतं शशिपुत्रं बृहस्पतिम् ॥१०॥
दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं शनैश्चरम्। राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ॥११॥
शक्रादिदेवताः सर्वा ऋषींश्चैव तपोधनान्। गर्गं मुनिं नमस्कृत्य नारदं पर्वतं तथा ॥१२॥
वशिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम्। अगस्त्यं च पुलस्त्यं च दशमित्रं पराशरम् ॥१३॥
भरद्वाजं च माण्डव्यं याज्ञवल्क्यं च गालवम्। अन्ये विप्रास्तयोयुक्ता देवशास्त्रविचक्षणाः ॥१४॥
तान्सर्वान्प्रणिपत्याहं शुभकर्म समारभे। लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषां हृदिस्थो भगवन्मङ्गलायतनोहरिः ॥१५॥
अग्रतः श्रीनृसिंहश्च पृष्ठतो देवकीसुतः। रक्षतां पार्श्वयोर्देवौ भ्रातरौ रामलक्ष्मणौ ॥१६॥
उत्तमवल्लीरिपुजा कन्या सा यस्य वल्लभा। यस्य हाररिपुस्वामी तस्य कान्ता स्थिरा भव ॥
यावद्गङ्गा कुरूक्षेत्रे यावत् तपति भास्करः। सुमेरुर्निश्चलो यावत् तावज्जीवतु बालकः ॥

"ॐ स्वस्ति श्रीमुकुन्द सच्चिदानन्दस्य ब्रह्मणोऽनिर्वाच्यमायाशक्तिविजृम्भितावियोगात्–कालकर्मस्वभावा-विर्भूतमहत्तत्वोदिताहङ्कारोद्भूत वियदादिपञ्चमहाभूतेन्द्रियदेवतानिर्मितेऽण्ड-कटाहे चतुर्दशलोकात्मके लीलया तन्मध्यवर्तिनो भगवतः श्रीनारायणस्य नाभिकमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तदुद्धरणाय प्रजापतिप्रार्थितस्य समस्त जगदुत्पत्तिस्थितिलयकारणस्य जगद्रक्षाशिक्षाविचक्षणस्य प्रणतपारिजातस्य अच्युतानन्त–

वीर्यस्य श्रीमद्भगवतो महापुरुषस्य, अचिन्त्यापरिमितशक्त्याधियमाणस्य महाजलौघमध्ये परिभ्रममाणाना-मनेककोटिब्रह्माण्डानामेकतमेऽव्यक्तमहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशाद्या-वरणैरावृते, अस्मिन् महति ब्रह्माण्डखण्डे आधारशक्तिश्रीमदादिवाराहदंष्टाग्रविराजिते कूर्मानन्तवासुकीतक्षककुलिककर्कोटकपद्ममहापद्म शङ्खाद्यष्टमहानागैर्ध्रियमाणे, ऐरावत-पुण्डरीक-वामन-कुमुदाञ्जन-पुष्पदन्त-सार्वभौम-सुप्रतिकाष्टदिग्गज प्रतिष्ठितानाम्, अतल-वितल-सुतल-तलातल-रसातल-महातल-पाताल लोकानामुपरिभागे भूर्लोक-भुवर्लोक-स्वर्लोक-महर्लोक-जनलोक-तपोलोक-सत्यलोकाख्यसप्तलोकानामधोभागे, चक्रवालशैलमहावलयनागमध्य-वर्तिनोमहाकालमहाफणिराजशेषस्य सहस्रफणानां - मणिमण्डलमण्डिते दिग्दन्तिशुण्डोत्तम्भिते, अमरावती - अशोकवती - भोगवती - सिद्धवती - गान्धर्ववती - काञ्च्यवत्यलकावती - यशोवतीति पुण्यपुरीप्रतिष्ठिते इन्द्राग्नियम - निर्ऋतिवरुणवायुकुवेरे-शानाष्टदिक्पालप्रतिष्ठिते वरघुवाघरसोमपाप्रभञ्जनाऽनलप्रत्यूष - प्रभाख्याष्टवसुभिर्विराजिते हरत्र्यम्बकरुद्रमृगव्याधा-पराजितकपालीभैरव शम्भुकपर्दि - वृषाकपिबटुरूपाख्यैकादशरुद्रैः संशोभिते रुद्रोपेन्द्रसवितृधातृत्वष्ट्रर्य-मेन्द्रेशानभगमित्र - पूषाख्यद्वादशादित्यप्रकाशिते यमनियमाऽसनप्राणायामप्रत्त्याहारधारणाध्यानसमाध्य-ष्टाङ्ग - निरतवसिष्ठबालखिल्यविश्वामित्र- दक्षकात्त्यायनकौण्डियण्यगौतमाङ्गिरसपाराशर्य्यव्यास-वाल्मीकिशुकशौनकभरद्वाजसनकसनन्द-सनातनसनत्कुमारनारदादिमुख्यमुनिभिः पवित्रिते लोकालोकाचलवलयिते लवणेक्षुरससुरा-सर्पिदधिक्षीरोदकयुक्तसप्तार्णवपरिवृते जबमूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्कराख्यसप्तद्वीपयुते, इन्द्रकांस्य - ताम्र - गभस्ति - नाग - सौम्य - गन्धर्व - चारण - भारतेति नवखण्डमण्डिते सुपर्णगिरिकर्णिकोपेत-महासरोरुहाकारपञ्चाशत्कोटियोजनविस्तीर्णे भूमण्डले, अयोध्या - मथुरा - माया - काशी - काञ्च्यवन्तिका-द्वारावतीति-सप्तपुरीप्रतिष्ठिते महामुक्तिप्रदस्थले शालग्रामशम्भलनन्दिग्रामेति ग्रामत्रयविराजिते चम्पकारण्य वदरिकारण्य दण्डकारण्य धर्मारण्य पद्मारण्य गुह्यारण्य जम्बूकारण्य विन्ध्यारण्य द्राक्षारण्य नहुषारण्य काम्यकारण्य द्वैतारण्य नैमिषारण्यादीनां मध्ये सुमेरु निषधकूट शुभ्रकूट श्रीकूट हेमकूट रजतकूट चित्रकूट त्रिकूट किष्किन्धश्वेताद्रिकूट हिमविन्ध्याचलानां हरिवर्षकिम्पुरुषवर्षयोश्च दक्षिणे नवसहस्रयोजनविस्तीर्णे भरतखण्डे मलयाचलसह्याचलविन्ध्याचलानामुत्तरेण स्वर्णप्रस्थ चण्डप्रस्थ सूक्तिक आवन्तक रमणक महारमणक पाञ्चजन्य सिंहल लंकाऽशोकवत्यलकावती सिद्धवती गान्धर्ववत्यादिपुण्यपुरी विराजिते नवखण्डोपद्वीपमण्डिते दक्षिणावस्थित रेणुकाद्वय शूकर काशी काञ्ची कालिकाल वटेश्वर कालञ्जर महाकालेति नवोषरयुते द्वादशज्योतिर्लिङ्ग गङ्गा (भागीरथी) गोदावरी (गौतमी) क्षिप्रा यमुना सरस्वती नर्मदा तापी पयोष्णी चन्द्रभागा कावेरी मन्दाकिनी प्रवरा कृष्णा वेण्या भीमरथी तुङ्गभद्रा मलापहा कृतमाला ताम्रपर्णी विशालाक्षी वञ्जुला चर्मण्वती वेत्रवती भोगवती विशोका कौशिकी गण्डकी वाशिष्ठी प्रमदा विश्वामित्री फल्गुनी चित्रकाश्यपी सरयू सर्वपापहारिणी करतोया प्रणीता वज्रा वक्रगामिनी सुवर्णरेखा शोणा भवनाशिनी शीघ्रगा कुशावर्त्तिती ब्रह्मानन्दा महीतनयेत्यनेकपुण्यनदीभिर्विलसिते ब्रह्मपुत्रसिन्धुनदादिपरमपवित्रजलविराजिते हिमवन्मेरुगोवर्धन क्रौञ्च चित्रकूट हेमकूट महेन्द्र मलय सह्येन्द्रकील पारियात्राद्यनेकपर्वतसमन्विते मतङ्ग माल्य किष्किन्ध

ऋष्यश्रृङ्गेतिमहानगसमन्विते अङ्ग वङ्ग कलिङ्ग कास्मीरकाम्बोज सौवीर सौराष्ट्र महाराष्ट्र मगध नेपाल केरल चोल पाञ्चाल गौड मालव मलय सिंहल द्रविड कर्नाटक ललाट करहाट वरहाट पाण्डच निषध मागध आन्ध्र दशार्णव भोज कुरु गान्धार विदर्भ विदेह वाल्हीक बर्बर कैकेय कोसल विराट शूरसेन कोङ्कण कैकट मत्स्य मद्र पारसिक खर्जूर यवन म्लेच्छ जालन्धरेति सिद्धवत्यन्यदेशविशेष भाषा भूमिपाल विभूषिते, इलावृत कुरु भद्राश्व केतुमाल किम्पुरुष रमणक हिरण्मयादि नववर्षाणां मध्ये भारतवर्षे भरतखण्डे वकुल चम्पक पाटलाब्ज पुन्नाग जाति करवीर रसाल कल्हार केतक्यादिनानाविधकुसुमस्तवक विराजिते कोकन्त हिरण्यश्रृङ्ग कुब्जार्वुद मणिकर्णी वटशालाग्राम शूकर मथुरा गया निष्क्रमण लोहार्गल पोतस्वामि प्रभास वदरीति चतुर्दश गुह्यविलसिते "जम्बूद्वीपे कुरुक्षेत्रादिसमभूमध्यरेखायाः पश्चिम दिग्भागे कुलमेरोर्दक्षिणदिग्भागे विन्ध्यस्य दक्षिणेदेशे श्रीशैलस्य वायव्यदेशे कृष्णावेण्ययोर्मध्यदेशे मत्स्यकूर्म वराहनृसिंह वामन परशुराम राम कृष्ण बुद्ध कल्कीति दशावताराणांमध्ये बौद्धावतारे गङ्गादिसरिद्भिः पाविते, एवं नवसहस्रयोजनविस्तीर्णे भारतवर्षे निखिलजन पावन परमभागवतोत्तम शौनकादि निवासिते नैमिषारण्ये आर्यावर्तान्तर्गत ब्रह्मावर्तैक देशे सूर्य्यान्वय भूभृत्प्रतिष्ठिते श्रीमन्नारायण नाभिकलोद्भूतसकलजगत्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीयमुहूर्त्ते रथन्तरादि द्वात्रिंशत्कल्पानां मध्ये अष्टमे श्वेतवाराहकल्पे स्वायम्भुवादि मन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वन्तरे कृतत्रेताद्वापरकलिसंज्ञकानां चतुर्युगानां मध्ये वर्त्तमाने अष्टाविंशतितमे कलियुगे तस्य प्रथमचरणे श्रीमन्नृपविक्रमार्कात् शालिवाहनाद्वा यथासंख्यागमेन चान्द्रसावन सौर नक्षत्रादि प्रकारेणागतानां प्रभवादि षष्टि संवत्सराणां मध्ये ... ... नाम्नि सम्वत्सरे ... ... दक्षिण वा उत्तर गोलाव – लम्बिनिश्रीमार्त्तण्डमण्डले ... ... ऋतौ ... ... मासे ... ... पक्षे ... ... तिथौ ... ... वासरे ... ... नक्षत्रे ... ... योगे ... ... करणे ... ... राशिस्थिते चन्द्रमसि ... ... राशिस्थिते सवितरि ... ... राशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथा स्थानस्थितेषु सत्सु, एवंग्रहगण विशेषेण विशिष्टायां शुभपुण्य तिथौ, अद्य ... ... गोत्रस्य ... ... प्रवरस्य शुक्लयजुर्वेद माध्यन्दिनीय वाजसनेय शाखाध्यायिनः ... ... शर्मणः सभार्य्यस्य सपरिवार कुम्टुम्ब सहितस्य मम, इन्हजन्मनि जमान्तरे वा बाल्य-यौवन-वार्धक्या-वस्थासु वाक्पाणि-पादपायूपस्थ-घ्राणरसना चक्षुःस्पर्शन श्रोत्रमनोभिश्चरित-ज्ञाताज्ञातकामाकाममहापातको-पपातकादिसञ्चितानां पापानां ब्रह्महनन-सुरापान-सुवर्णस्तेयगुरुतल्पगमनतत्संसर्ग-रूपाणां पातकानां बुद्धिपूर्वकाणां मनोवाक्यायकृतानां बहुकालाभ्यस्तानां उपपातकानं च स्पृष्टास्पृष्टसङ्करीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरणाविहिताकरण कर्मलोपजनितानां रसविक्रयकन्याविक्रयहयविक्रयगोविक्रयखरोष्ट्रविक्रयदासीविक्रयाजादिपशुविक्रय स्व गृहविक्रय नीलीविक्रयाक्रेयविक्रयपण्यविक्रयजलचरादि-जन्तुविक्रयस्थलचरादिविक्रयखेचरा-दिविक्रयसम्भूतानां निरर्थकवृक्षच्छेदन ऋणानपाकरण ब्रह्मस्वापहरणदेवस्वापहरणराज-स्वापहरण परद्रव्यापहरण तैलादिद्रव्याप-हरणफलादिहरणलोहादिहरणनानावस्तुहरण रूपाणां ब्राह्मणनिन्दागुरुनिन्दावेदनिन्दा शास्त्रनिन्दा परनिन्दाभक्ष्या-भक्षणाभोज्यभोजनाचोष्यचोषणा – लेह्यलेहनापेयपानास्पृश्यस्पर्शनाश्राव्य श्रवणाहिंस्यहिंसनावन्द्यवन्दना-चिन्त्यचिन्तनायाज्यय-जनापूज्यपूजनरूपाणां मातृपितृतिरस्कार-स्त्रीपुरुषप्रीतिभेदन परस्त्रीगमन विधवागमन

वेश्यागमन दासीगमन चाण्डालादिहीनजातिगमनगुदागमन रजस्वलागमन पश्वादि गमनरूपाणां कूटसाक्षित्ववा दमिथ्यापवादम्लेच्छसम्भाषण ब्रह्मद्वेषकरण ब्रह्मवृत्तिच्छेदन परवृत्तिहरण रूपाणां मित्रवञ्चनगुरुवञ्चन स्वामी-वञ्चनासत्यभाषणगर्भपातनपथिता - म्बूलचर्वण हीनजाति सेवन परान्न-भोजन गणान्न भोजन लशुन पलाण्डु गृञ्जनभक्षण तालवृक्षफल भक्षणोच्छिष्टभक्षण – मार्जारोच्छिष्टभक्षण पर्युषितान्नभक्षण रूपाणां पंक्तिभेदकरण भ्रूणहिंसा बालहिंसा–द्यनेकहिंसोद्भूतानां शौचत्याग स्नानत्याग संध्यात्यागौपासनाग्नित्याग वैश्वदेवत्यागरूपाणां निषिद्धाचरणकुग्रामवास-ब्रह्मद्रोह-पितृमातृद्रोह परद्रोह-परनिन्दाऽत्मस्तुति दुष्टप्रतिग्रह दुर्जनसंसर्गरूपाणां गोयान वृषभयान महीषीयान गर्दभयानोऽष्ट्रयानाजयान भृत्याभरणस्वग्रामत्यागगोत्रत्याग कुलत्याग दूरस्थमन्त्रण विप्राशाभेदना-वन्दिताशिर्वाद ग्रहण पतितसम्भाषणरूपाणां पतितजनपंक्तिभोजनाहः सङ्गम वृथामनोरथादिपापानां तथा –

महापापोपपापाभ्यां नानायोनिषु यत्कृतम्। बालभावेन यत्पापं क्षुतृडर्थे च यत्कृतम्॥
आत्मार्थं चैव यत्पापं परार्थे चैव यत्कृतम्। तीर्थेषु चैव यत्पापं गुर्ववज्ञा कृतं च यत्॥
रागद्वेषादिजनितं कामक्रोधेन यत्कृतम्। हिंसानिद्रादिजनितं भेददृष्ट्या च यन्मया॥
देहाभिमानजं पापं सर्वदा यन्मयाकृतम्। शुष्कमार्द्रं च यत् पापं महल्लघु च यद्भवेत्॥
नाशमायातु तत्सर्वं महादानफलोदयात्। कन्यादानं महादानं दानानां चोत्तमोत्तमम्॥
नाशमायान्ति पापानि कन्यादानाद्विशेषतः।

इत्यादि प्रकीर्ण पातकानामेतत्कालपर्य्यन्तं सञ्चितस्थूलानां लघुसूक्ष्माणां च विशेषताः परिहारार्थं दशावरान् दशपरान् आत्मनासहितान्, एकविंशतिपुरुषानुद्धर्त्तुं ब्रह्मलोकावधि पञ्चाशत्कोटियोजनविस्तीर्णेऽस्मिंभूमण्डले सप्तर्षिमण्डल पर्य्यन्तवालुकाभिः कृतराशेः वर्षसहस्रावसाने एकैकवालुकापकर्षक्रमेण सर्वराश्यापकर्षसम्मितकालपर्य्यन्तं ब्रह्म-लोकब्रह्मसायुज्यताप्राप्त्यर्थं तथा मम समस्तपितृणाम् आत्मनश्च विष्ण्वादिलोकप्राप्तये (अत्रत्रिपुरुषोच्चारणम् शारवोच्चारणं वा) (दुलाहातर्फको) अमुक ... ... गोत्रस्य, ... प्रवरस्य, माध्यन्दिनीयशाखान्तर्गतशुक्लयजुर्वेदा ध्यायिनः ... ... शर्मणः (वर्मण, गुप्तस्य) प्रपौत्राय, गोत्रस्य ... ... प्रवरस्य – वेदाध्यायिनः ... ... शर्मणः पौत्राय, गोत्रस्य ... प्रवरस्य ... वेदाध्यायिनः ... ... शर्मणः पुत्राय (दुलहीतर्फको) गोत्रस्य ... प्रवरस्य ... वेदाध्यायिन ... शर्मणः प्रपौत्रीम्, गोत्रस्य ... ... प्रवरस्य ... ... वेदाध्यायिनः ... ... शर्मणः पौत्रीम्, गोत्रस्य प्रवरस्य ... ... वेदाध्यायिनः ... ... शर्मणः पुत्रीम्, (इत्येवं त्रिवारं पठित्वा) अनेन वरेण अस्यां कन्यायाम् उत्पत्स्यमानया सन्तत्या द्वादशावरान् द्वादश परान् आत्मना सपञ्चविंशान् पुरुषान् पवित्रीकर्तुम् श्रीमल्लक्ष्मीनारायणप्रीतये ... ... गोत्राय ... ... प्रवराय ... ... वेदाध्यायिने ... ... शर्मणे नारायणस्वरूपाय कन्यार्थिने वराय, ... गोत्रोत्पन्नाम् ... ... नाम्नीम् इमां यथाशक्त्यलङ्कृताम् प्रजापतिदैवतां श्रीरूपिणीं कन्यां देवद्विजाग्निसाक्षिकतया सहधर्माचरणाय पत्नीत्वेन तुभ्यं संप्रददे। इति कुशाक्षतजलादिसहितं कन्यादक्षिणपाण्यङ्गुष्ठं वरदक्षिणपाणौ दद्यात्। अत्र दानकाले लग्नग्रन्थि वन्धनम्, सौभाग्य (लगन पोते) परिधापनञ्च शिष्टाचारः।

(बेहुलीको बुढी औंला बेहुलालाई दिने र बेहुलाले लगनपोते लगाइदिने)

प्रार्थना : (बेहुलीपक्षले नमस्कार गर्ने)

या सा वेदमुखी सदा रणमुखी चित्ते च निद्रामुखी । या सा वेदधरी सदा गुणकरी विद्याधरी शङ्करी ॥
गौरी पीनपयोधरी जयकरी शान्तीकरी सुन्दरी । ह्युत्पत्तिस्थितिसहृतित्रयकरी सा चण्डिका पात वः ॥

वरः –

ॐ स्वस्ति, प्रजापतये कन्यां प्रतिगृह्णामि । (वरले भन्ने)

ॐ द्यौस्त्वेति प्रजापतिऋषिः त्रिष्टुप् छन्दः लिङ्गोक्ता देवता कन्याग्रहणे विनियोगः । (विनियोग गर्ने)

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु । इति पठन्प्रतिगृह्णीयात् । (दुलहीको बूढी औंला भूमिमा स्पर्श गराउने)

केचित् कन्याहस्तेन वरो भूमिं स्पृशेदिति वदन्ति । ततः ब्राह्मणः कन्याप्रदः कृताञ्जलिः वरमुद्दिश्य प्रार्थयेत् ।

प्रार्थना (कन्यादान दिनेले नमस्कार गर्ने)

गौरीं कन्यामिमां विप्र यथाशक्तिविभूषिताम् ।
ददामि विष्णवे तुभ्यं दत्तां विप्र समाश्रय ॥ इति पठेत् ।



क्षत्रियादिः कन्याप्रदः कृताञ्जलिः –

कन्यां कनकसंपन्नां कनकाभरणैर्युताम ।
ददामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥ इति पठेत् ।

पुनः कन्यामुद्दिश्य कृताञ्जलिः –

कन्यां कनकसंपन्नां कनकाभरणैर्युताम् ।
ददामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥ इति पठेत् ।

पुनः कन्यामुद्दिश्य कृताञ्जलिः –

कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः । कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम् ॥ इति पठित्वा आसने उपविश्य दानप्रतिष्ठायै सकुशयवतिलजलं सुवर्णं तन्निष्क्रयीभूतं द्रव्यं वाऽऽदाय ।

दानप्रतिष्ठा

(कन्यादानको दानप्रतिष्ठा गर्ने)

ॐ अद्यकृतैतत्कन्यादानसाङ्गतासिद्ध्यर्थम् दानप्रतिष्ठात्वेन इदं सुवर्णं वन्हिदैवतं (.... द्रव्यं यथानामदैवतं वा) ... ... गोत्राय .... शर्मणे वराय दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे । ॐ तत्सन्न मम, इत्युच्चार्य दद्यात् ।

ततः कृताञ्जलिः – कन्या मम कुले जाता पालिता वत्सराष्टकम् । तुभ्यमद्य मया दत्ता पुत्रपौत्रप्रवर्धिनी ॥ धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयम् । इति वरं प्रार्थयेत् । (कन्यापक्षले भन्ने गाली नगर्नुहोस्)

वरः – 'नातिचरामि' इति प्रतिज्ञां कुर्यात् । (वरले भन्ने हवस् म गर्दिनँ)

वराय गोदानम्

(वरलाई गोदान गर्ने, पेज नं. ८)

ततः कन्याप्रदः वराय गोमिथुनं (गाम् एव वा) दद्यात् । सोपस्कारां गाम् उपनीय संपूज्य कुशादीन्यादाय –

ॐ पूर्वसंकल्पसिद्धिरस्तु ... ... गोत्रः– ... ... शर्मा सपत्नीकोऽहं ... ... अद्यकृतैतत्कन्यादानसाङ्गतासिद्धि द्वारा कन्यादान कल्पोक्तसकलफलावाप्तये यथोपपन्नालङ्कार-समन्विताम् सवत्साम् इमां गाम् (समन्वितम् इदं गोमिथुनं वा) गोत्राय ... ... शर्मणे वराय तुभ्यं संप्रददे । ॐ तत्सन्न मम, इति दद्यात् । 'कपिले' इत्यादिना गां प्रार्थ्य दानप्रतिष्ठाद्रव्यमादाय ॐ अद्यकृतैतत् इति पठित्वा दद्यात् ।

वरः – ॐ स्वस्ति रुद्राय गां प्रतिगृह्णामि इत्युक्त्वा प्रतिगृह्णीयात् । (वरले भन्ने)

भूयसीदक्षिणादानम्

(दक्षिणा सङ्कल्प गर्ने र वाँडिदिने)

ततः कन्याप्रदः भूयसीम् दक्षिणाम् उपनीय, 'देयद्रव्याय नमः' इति संपूज्य सकुशतिलयवजलं हस्तेनादाय – ॐ पूर्वसंकल्पसिद्धिरस्तु ... ... गोत्रः ... ... शर्मा सपत्नीकोऽहं कृतस्य कन्यादानकर्मणः साङ्गतासिद्धिद्वारा श्रीलक्ष्मीनारायणप्रीतिपुरःसरंश्रुतिस्मृतिपुराणोक्तसकलफलावाप्तयेइमांभूयसींदक्षिणांनानानामगोत्रेभ्योब्राह्मणेभ्यो दीनानाथेभ्योऽन्येभ्यो दक्षिणीयेभ्यश्च विभज्य दातुम् उत्सृजे । ॐ तत्सन्न मम, इति उत्सृज्य यथार्हं दद्यात् ।

ततो वरः गन्धपुष्पादीनि आदाय – (वरले चन्दन, फूल लिई नमस्कार गर्ने)

ॐ ब्राह्मणमद्य व्विदेयं पितृमन्तं पैतृमत्यमृषिमार्षेय ँसुधातु दक्षिणम् । अस्मद्द्राता देवत्रा गच्छतप्र दातारमाविशत ॥११॥ ॐ अग्नये त्वा मह्यं व्वरुणो ददातु सोऽमृतत्वमशीयायुर्दात्रऽएधि मयो मह्यं प्रति ग्रहीत्रे रुद्राय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीय प्राणो दात्रऽएधि व्वयो मह्यं प्रतिग्रहीत्रे बृहस्पतये त्वा मह्यं व्वरुणो ददातु । सोऽमृतत्वमशीय त्वग्दात्रऽएधि मयो मह्यं प्रतिग्रहीत्रे यमाय त्वा मह्यं व्वरुणो ददातु सोऽमृतत्वमशीय ह्योदात्रऽएधि व्वयो मह्यं प्रतिग्रहीत्रे ॥२॥ कोदात् कस्माऽअदात् कामोऽदात् कामायाऽदात् । कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥३॥

इति पठित्वा सपत्नीकं कन्यापितरं तिलकपुष्पाभ्यामलङ्कुर्यात् । (वरले कन्यापक्षलाई टीका लगाइदिने)

निष्क्रमणम्

ततो वरः कन्यायाः दक्षिणपाणिं गृहीत्वा – (दुलहीको हात समाती यज्ञबाट निस्कने)

ॐ यदैषीत्याथर्वणऋषिर्लिङ्गोक्ता देवता अनुष्टुप् छन्दः निष्क्रमणे विनियोगः । ॐ यदैषि मनसा दूरं दिशो नु पवमानो वा । हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोतु – देवि, इत्युच्चार्य कन्यामादायोत्थाय वेदीं प्रति निष्क्रामेत् ॥ इति कन्यादानविधिः । (दुलाहाले मनपर्ने नाम राख्ने)

अथ विवाहविधिः

(सिँगारपटार गरी यज्ञमा आउने)

ततः सवधूको वरो वधूं दक्षिणतः कृत्वा वेद्याः समीपे उदङ्मुख उपविशेत् । पुष्पपल्लववस्त्रभूषितं सजलं कलशं स्कन्धेन दधानः कश्चन दृढो ब्राह्मणादिः (शूद्रभिन्नः) होमवेद्या दक्षिणभागे मौनी तिष्ठेत् ।

परस्परेक्षणम्

(हेराहेर गर्ने)

ॐ अघोरचक्षुरित्यादीनां चतुर्णा प्रजापति ऋषिः आद्यन्तयोस्त्रिष्टुप्छन्दः कुमारी देवता परस्परेक्षणे विनियोगः ।

कन्याप्रदः– 'परस्परं समीक्षेथाम्' इति प्रैषं दत्वा वधूवरौ परस्परमीक्षयेत्। इक्षमाणां वधूम् इक्षमाण एव वरः – ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः। वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥१॥ ॐ सोमः प्रथमो व्विविदे गन्धर्वो विविद उत्तरः। ततीयोऽअग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥२॥ ॐ सोमोद दद्गन्धर्वाय गन्धर्वो ददद्गनये। रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम् ॥३॥ ॐ सा नः पूषा शिवतमामैरय सा न ऊरुऽउशती विहर। यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्टचै ॥४॥ इति पठेत्।

ततः वधूसहितो वरः अग्निं प्रदक्षिणीकृत्य अग्नेः पश्चिमतः दक्षिणतो वा शुचिवस्त्राद्याच्छन्ने तृणकटे प्रथमं दक्षिणं चरणं निधाय वधूं दक्षिणतः कृत्वा उपविशेत्। (वरवधूले अग्निको प्रदक्षिणा गर्ने)

ब्राह्मणवरणम्

(ब्राह्मण वरण गर्ने सामग्री पूजा गर्ने)

आचम्य वरणसामग्रीं गृहीत्वा कुशादीन्यादाय ब्राह्मणं च वृणुयात्। तत्र वाक्यम् – (सङ्कल्प गर्ने)

पूर्वसंकल्पमुच्चार्य 'गोत्रः शर्माऽहं धर्मार्थकामसिद्धिद्वारा श्रीमत्परमेश्वरप्रीतीजननाय ब्राह्मेण विधिना पित्रा प्रदत्तया अनया कन्यकया सह करिष्यमाणे विवाहहोमकर्मणि कृताकृतावेक्षणादि ब्रह्मकर्मकर्तुं गोत्रं ... ... शर्माणं ब्राह्मणमेभिर्गन्धाक्षतपुष्प– (धौतौत्तरीयासनजलपात्रमुद्रिका) प्रभृतिभिर्ब्रह्मत्वेन त्वां वृणे। इति वृत्वा गन्धादिभिरर्चयेत्। 'वृतोऽस्मी' (वरले भन्ने) ति ब्राह्मणेनोक्ते **'यथाविहितं कर्म कुरु'** (वरले भन्ने) इति वरो ब्रूयात्, **'करवाणि' यथा ज्ञानेन कर्वामः** (ब्राह्मणले भन्ने) इति च ब्राह्मणः। ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् षट् कुशानास्तीर्य तं ब्रह्मत्वेन वृतं ब्राह्मणं (पञ्चाशत्कुशमयं ब्राह्मणं वा) अग्निप्रदक्षिणीकरण क्रमेण आनीय 'अत्र त्वं मे ब्रह्मा भव' इति प्राङ्मुखमुपवेश्य बद्धाञ्जलिः– (नमस्कार गर्ने)

यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः। तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम॥

इति प्रार्थयेत्। ततः प्राग्वृतैर्ब्राह्मणैः कुशकण्डिकामारभ्य पञ्चवारुणीपूर्वकं चतुः स्वस्त्यादिपर्यन्तेऽग्निस्थापनपद्धतिप्रोक्ते तत्तदेवतापूजनहवनादिके कर्मणि, पूर्वं तदानीं वा समापिते सति –

हवनसंकल्पः

(हवन सङ्कल्प गर्ने)

वरः कुशादीन्यादाय – गोत्रः ... ... शर्मा सवधूकोऽहम् अस्मिन् विवाहकर्मणि "प्रजापतिम्, इन्द्रम्, अग्निम्, सोमम्, (४) अग्निम्, वायुम्, सूर्यम्, (३) अग्नीवरुणौ, अग्नीवरुणौ, अग्निम्, वरुणम्–सवितारम्–विष्णुम्–विश्वान्देवान्–मरुतः स्वर्कान्, वरुणम्, (५) ऋतासाहम्, ऋतधामानं, गन्धर्वम्, ओषधीरप्सरसोमुदः, स ँ हितंविश्वसामानंगन्धर्वम्, मरीचीरप्सरसआयु वः सुषुम्ण ँ सूर्यरश्मिंचन्द्रमसं गन्धर्वम्, नक्षत्राण्यप्सरसोभेकरीः, इषिरं विश्वव्यचसंवातंगन्धर्वम्, अपोऽप्सरसः – ऊर्ज्जः, भुज्यु ँ सुपर्णंयज्ञंगन्धर्वम्, दक्षिणाअप्सरसस्तावाः, प्रजापतिः विश्वकर्माणं मनोगन्धर्वम्, ऋक्सामान्यप्सरसऽएष्टीः, (१२) चित्तम्, चित्तिम्, आकूतम्, आकूतिम्, विज्ञातम्, विज्ञातिम्, मनः, शक्वरीः, दर्शम्, पौर्णमासम्, बृहत्, रथन्तरम्, प्रजापतिम् (१३) अग्निंभूतानामधिपतिम्, इन्द्रंज्येष्ठानामधिपतिम्, यमंपृथिव्याअधिपतिं, वायुमन्तरिक्षस्याधिपतिं, सूर्यंदिवोधिपतिं, चन्द्रमसंनक्षत्राणामधिपतिं,

बृहस्पतिंब्रह्मणोधिपतिं, मित्रꣳसत्यानामधिपतिम्, वरुणमपामधिपतिम्, समुद्र ꣳ स्रोतसामधिपतिम्, अन्न ꣳ साम्राज्यानामधिपतिम्, सोममोषधीनामधिपतिम्, सवितारंप्रसवानामधिपतिम्, रुद्रंपशूनामधिपतिम्, त्वष्टारंरूपाणामधिपतिम्, विष्णुंपर्वतानामधिपतिम्, मरुतोगणानामधिपतीन्, पितॄन्पितामहान्परानवरान्ततान्ततामहान् (१८) अग्निम्, अग्निम्, अग्निम्, वैवस्वतं मृत्युम्, (५) एतान्देवान् स्वयमाचार्यद्वारा वा) अर्यमणम्, अग्निम्, अर्यमणम्, अग्निम्, अर्यमणम्, अग्निम्, अग्निम्, भगम् (१०) (एतान्देवान् वधूद्वारा) प्रजापतिम्, अग्नि ꣳ स्विष्टकृतम् २. (एतौ देवौ स्वयमाचार्यद्वारा वा) (४+३+५+१२×१३+१८×५+१०×२=७२) यथार्हमाज्यलाजाभ्यां यक्ष्ये । इत्युत्सृजेत् । तत उपयमनकुशान् वामहस्ते धृत्वा प्रजापतिं मनसा ध्यायन् उत्थाय समिद्धतमेऽग्नौ पूर्वासादितास्तिस्रः समिधःप्रक्षिप्य, उपविश्य सपवित्रदक्षिणचुलुकस्थप्रोक्षण्युदकेन ईशानाद्युदगपवर्गं प्रदक्षिणक्रमेण अग्नि पर्युक्ष्य, प्रणीतापात्रे पवित्रे निधाय, पातितदक्षिणजानुः कुशेन ब्रह्मणाऽन्वारब्धः स्वयमाचार्यो वा स्रुवेण आज्याहुतीर्जुहुयात् । तत्र तत्तदाहुतिषु स्रुवावशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः कर्तव्यः ॥ (तीनओटा समिधा अग्निमा हवन गर्ने)

आज्यहोमः

(घ्यू हवन गर्ने)

ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवताऽऽज्यहोमे विनियोगः ।

ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम ॥१॥ इति मनसा ॥

ॐ इन्द्रायेति प्रजापतिऋषिस्त्रिष्टुप्छन्द इन्द्रोदेवताऽऽज्यहोमे विनियोगः ।

ॐ इन्द्राय स्वाहा, इदमिन्द्राय न मम ॥ प्रोक्षणीपात्रे प्रक्षेपः । एवं सर्वत्र । एतौ आघारौ ॥

ॐ अग्नये स्वाहा, इदमग्नये न मम ॥१॥ ॐ सोमाय स्वाहा, इदं सोमाय न मम ॥२॥

एतावाज्यभागौ ॥

ॐ महाव्याहृतीनां प्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवता होमे विनियोगः

ॐ भूः स्वाहा, इदमग्नये न मम ॥१॥ ॐ भुवः स्वाहा, इदं वायवे न मम ॥२॥

ॐ स्वः स्वाहा, इदं सूर्याय न मम ॥३॥

ॐ त्वन्नो अग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनियोगः ।

ॐ त्वन्नो अग्ने व्वरुणस्य व्विद्वान्देवस्य हेडो अवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो व्विश्वाद्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥४॥

ॐ सत्वन्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोग्नीवरुणौ देवते आज्यहोमे विनियोगः ।

ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्या उषसो व्युष्टौ । अवयक्ष्व नो व्वरुणꣳररराणो वीहि मृडीकꣳसुहवो नऽएधि स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥५॥

ॐ अयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता सर्वप्रायश्चित्तहोमे विनियोगः ।

ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्वमित्वमयाअसि । अयानो यज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा ॥ इदमग्नये न मम ॥६॥

ॐ येतेशतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणः सवितविष्णुर्विश्वेमरुतः स्वर्का देवताः सर्वप्रायश्चित्तहोमे विनियोगः ।
ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशावितता महान्तः ।
तेभिर्नोऽअद्य सवितोत व्विष्णुर्व्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥७॥
ॐ उदुत्तममिति शुनः शेषऋषिस्त्रिष्टुप्छन्दो वरुणो देवता सर्वप्रायश्चित्तहोमे विनियोगः ।
ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳश्रथाय ।
अथावयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा ॥ इदं वरुणाय न मम ॥८॥
ततो ब्रह्माऽऽचार्यो वा वधूवरौ अभिषिञ्चेत् । तत्र मन्त्रौ – (दुलाहादुलहीलाई अभिषेक गर्ने)
गणाधिनाथवरुणब्रह्मविष्णुशिवादयः । दम्पत्योः कुशलं कुर्युः पूजिता इह देवताः ॥
उत्सर्गे वारुणे चैव वरुणो विष्णुना सह । तुष्टिपुष्टिकरो भूयादुभयोः स्त्रीकुमारयोः ॥२॥

अथ राष्ट्रभृद् (ऋताषाडादि) होमः (हवन गर्ने)

ॐ ऋताषाडिति प्रजापतिऋषिर्यजुः ऋताषाड्ऋतधामाग्निर्गन्धर्वो देवता होमे विनियोगः ।
ॐ ऋताषाड्ऋतधामाग्निर्गन्धर्वस्तस्यौषधयोप्सरसो मुदो नाम ताभ्यः स्वाहा ।
इदमोषधिभ्योप्सरोभ्यो मुद्भ्यो न मम ॥१॥
ॐ सꣳहितइति प्रजापतिऋषिर्यजुः सꣳहितोविश्वसामासूर्योगन्धर्वोदेवता होमे विनियोगः ।
ॐ सꣳहितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् ॥
इदं स ꣳ हिताय विश्वसाम्ने सूर्याय गन्धर्वाय न मम ॥२॥
ॐ सꣳहित इति प्रजापतिऋषिः यजुः मरीचयोऽप्सरसः आयुवोदेवता होमे विनियोगः ।
ॐ सꣳहितो विश्वसामा सूर्योगन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा ॥
इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यो न मम ॥३॥
ॐ सुषुम्ण इति प्रजापतिऋषिर्यजुः सुषुम्णं सूर्यरश्मिचन्द्रमागन्धर्वो देवता होमे विनियोगः ।
ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः स न इदं ब्रमक्षत्रं पातु तस्मै स्वाहा व्वाट् ॥
इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय न मम ॥४॥
ॐ सुषुम्ण इति प्रजापतिऋषिः यजुः नक्षत्राण्यप्सरसोभेकुरयो देवताः होमे विनियोगः ।
ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा ॥
इदं नक्षत्रेभ्योप्सरोभ्योभेकुरिभ्यो न मम ॥५॥
ॐ इषिर इति प्रजापतिऋषिः यजुः इषिरा विश्वव्यचावातोगन्धर्वो देवता होमे विनियोगः ।
ॐ इषिरो व्विश्वव्यचा व्वातो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् ॥
इदम् इषिराय विश्वव्यचसे वाताय गन्धर्वाय न मम ॥६॥

ॐ इषिरइति प्रजापतिऋषिः यजुः आपोप्सरऊर्जो देवता होमे विनियोगः ।
ॐ इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽप्सरस ऊर्जो नाम ताभ्यः स्वाहा ॥
इदम् अद्भ्योऽप्सरोभ्य ऊर्गभ्यो न मम ॥७॥
ॐ भुज्युरिति प्रजापतिऋषिर्यजुः सुपर्णो यज्ञो गन्धर्वो देवता होमे विनियोगः
ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् ॥
इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय न मम ॥८॥
ॐ भुज्युरिति प्रजापतिऋषिः यजुः दक्षिणाप्सरस्तावा देवता होमे विनियोगः ।
ॐ भुज्युः सुपर्णो यज्ञोगन्धर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम ताभ्यः स्वाहा ॥
इदं दक्षिणाभ्यो प्सरोभ्यस्तावाभ्यो न मम ॥९॥
ॐ प्रजापतिरिति प्रजापतिऋषिर्यजुः प्रजापतिर्विश्वकर्मा मनोगन्धर्वो देवता होमे विनियोगः
ॐ प्रजापतिर्विश्वकर्मा मनोगन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा व्वाट् ॥
ॐ प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय न मम ॥१०॥
ॐ इदं प्रजापतिरिति प्रजापतिऋषिः यजुः ऋक्सामान्यप्सरस एष्टयो देवता होमे विनियोगः ।
ॐ प्रजापतिर्विश्वकर्मा मनोगन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा ॥
इदं ऋक्सामभ्योप्सरोभ्य एष्टिभ्यो न मम ॥११॥ । इति राष्ट्रभृद्वोमः ।
ततो वधूवरौ अभिषिञ्चेत् एतैर्मन्त्रैः – (वरवधूलाई अभिषेक गर्ने)
ॐ ऋताषाडाद्याहुतिभिर्दद्यात् प्रीतो हुताशनः । आयुदीर्घं च सौख्यं च पुत्रपौत्रप्रवर्धनम् ॥१॥
उत्सर्गे वारूणे चैव वरुणो विष्णुदेवता । कुरुतां सुखसौभाग्यमुभौ तावनयोर्द्वयम् ॥२॥
पञ्चानां लोकपालानामृषीणां च ध्रुवस्य च । यत् कल्याणं तद्नयोर्दद्यात् प्रीतो हुताशनः ॥३॥
गन्धर्वाप्सरसश्चैव प्रयच्छन्तु यशः श्रियम् । दीर्घमायुस्तथारोग्यमुभयोर्वरकन्ययोः ॥४॥

अथ जयाहोमः (हवन गर्ने)

ॐ चित्तं चेति परमेष्ठाऋषिः चित्तं देवता यजुः जयाहोमे विनियोगः ।
ॐ चित्तं च स्वाहा, इदं चित्ताय न मम ॥१॥
ॐ चित्तिश्चेति परमेष्ठीऋषिः चित्तिर्देवता यजुः होमे विनियोगः ।
ॐ चित्तिश्च स्वाहा, इदं चित्यै न मम ॥२॥
ॐ आकूतं चेति परमेष्ठीऋषिः आकूतं देवता यजुः होमे विनियोगः ।
ॐ आकूतं च स्वाहा, इदमाकूताय न मम ॥३॥
ॐ आकूतिश्चेति परमेष्ठीऋषिः आकूतिर्देवता यजुर्होमे विनियोगः ।
ॐ आकूतिश्च स्वाहा, इदमाकूत्यै न मम ॥४॥

ॐ विज्ञातं चेति परमेष्ठीऋषिर्विज्ञातं देवता यजुर्होमे विनियोगः ।
ॐ विज्ञातं च स्वाहा, इदं विज्ञाताय न मम ॥५॥
ॐ विज्ञातिश्चेति परमेष्ठीऋषिर्विज्ञातिर्देवता यजुर्होमे विनियोगः ।
ॐ विज्ञातिश्च स्वाहा, इदं विज्ञात्यै न मम ॥६॥
ॐ मनश्चेति परमेष्ठी ऋषिर्मनो देवता यजुर्होमे विनियोगः ।
ॐ मनश्चस्वाहा, इदं मनसे न मम ॥७॥
ॐ शक्करीश्चेति परमेष्ठीऋषिः शक्करी देवता यजुर्होमे विनियोगः ।
ॐ शक्करीश्च स्वाहा, इदं शक्करीभ्यो न मम ॥८॥
ॐ दर्शश्चेति परमेष्ठीऋषिर्दर्शोदेवता यजुर्होमे विनियोगः ।
ॐ दर्शश्च स्वाहा, इदं दर्शाय न मम ॥९॥
ॐ पौर्णमासं चेति परमेष्ठीऋषिः पौर्णमासं देवता यजुर्होमे विनियोगः ।
ॐ पौर्णमासं च स्वाहा, इदं पौर्णमासाय न मम ॥१०॥
ॐ बृहच्चेति परमेष्ठीऋषिर्बहद्देवता यजुर्होमे विनियोगः ।
ॐ बृहच्च स्वाहा, इदं बृहते न मम ॥११॥
ॐ रथन्तरं चेति परमेष्ठीऋषि रथन्तरं देवता यजुर्होमे विनियोगः ।
ॐ रथन्तरं च स्वाहा, इदं रथन्तराय न मम ॥१२॥
ॐ प्रजापतिरिति परमेष्ठी ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता जयाहोमे विनियोगः ।
ॐ प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतना जयेषु ।
तस्मै विशः समनमन्त सर्वाः स उग्रः स इ हव्व्यो बभूव स्वाहा ॥ इदं प्रजापतये न मम ॥१३॥
इति जहाहोमः । ततो वधूवरौ अभिषिञ्चेत्, तत्र मन्त्रौ – (अभिषेक गर्ने)
वधूवराभ्यां यच्छन्तु होमेनाऽनेन तर्पिताः । चिरमायुर्महत्तेजश्चित्ताद्यास्त्रिदिवौकसः ॥१॥
गौरी लक्ष्मीस्तथेन्द्राणी लोपामुद्रा शुभप्रदा । कुर्यात् सदाचारवतीं स्वतुल्यां कन्यकामिमाम् ॥२॥

अथ अभ्यातानहोमः (हवन गर्ने)

ॐ अग्निर्भूतानामिति प्रजापतिऋषिरग्निर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ अग्निर्भूतानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदमग्नये भूतानामधिपतये नम मम ॥१॥
ॐ इन्द्रो ज्येष्ठानामिति प्रजापतिऋषिरिन्द्रोज्येष्ठानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोग ।
ॐ इन्द्रो ज्येष्ठानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदमिन्द्राय ज्येष्ठानामधिपतये न मम ॥२॥

ॐ यमः पृथिव्याइति प्रजापतिऋषिर्यमः पृथिव्या अधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ यमः पृथिव्या अधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं यमाय पृथिव्या अधिपतये न मम (अत्रप्रणीतोदकस्पर्शः) ॥३॥
ॐ वायुरिति प्रजापतिऋषिर्वायुरन्तरिक्षस्याधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ वायुरन्तरिक्षस्याधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधाया-मस्मिन्कर्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं वायवेऽन्तरिक्षस्याधिपतये न मम ॥४॥
ॐ सूर्योदिवोऽधिपतिरिति प्रजापतिऋषिः सूर्योदिवोऽधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ सूर्योदिवोऽधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं सूर्याय दिवोऽधिपतये न मम ॥५॥
ॐ चन्द्रमा नक्षत्राणामिति प्रजापतिऋषिश्चन्द्रमा नक्षत्राणामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ चन्द्रमा नक्षत्राणामधिपतिः स मावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मि-न्कर्म्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं चन्द्रमसे नक्षत्राणामधिपतये न मम ॥६॥
ॐ बृहस्पतिरिति प्रजापतिऋषिर्बृस्पतिर्ब्रह्मणोऽधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ बृहस्पतिर्ब्रह्मणोऽधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मि-न्कर्म्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं बृहस्पतये ब्रह्मणोधिपतये न मम ॥७॥
ॐ मित्र इति प्रजापतिऋषिर्मित्रः सत्यानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ मित्रः सत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मि-न्कर्म्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं मित्राय सत्यानामधिपतये न मम ॥८॥
ॐ वरुण इति प्रजापतिऋषिर्वरुणोऽपामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ वरुणोऽपामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं वरुणायापामधिपतये न मम ॥९॥
ॐ समुद्र इति प्रजापतिऋषिः समुद्रः स्रोत्यानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ समुद्रः स्रोत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मि-न्कर्म्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं समुद्राय स्रोत्यानामधिपतये न मम ॥१०॥
ॐ अन्नमिति प्रजापतिऋषिरन्न ꣳसाम्राज्यानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ अन्न ꣳसाम्राज्यानामधिपतिस्तन्मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधाया-मस्मिन्कर्म्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदमन्नाय साम्राज्यानामधिपतये न मम ॥११॥
ॐ सोम इति प्रजापति ऋषिः सोमओषधीनामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः
ॐ सोम ओषधीनामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मि-न्कर्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं सोमायौषधीनामधिपतये न मम ॥१२॥

ॐ सवितेति प्रजापतिऋषिः सविता प्रसवानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ सविता प्रसवानामधिपतिः स मावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं सवित्रे प्रसवानामधिपतये न मम ॥१३॥
ॐ रुद्र इति प्रजापतिऋषि रुद्रः पशूनामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ रुद्रः पशूनामधिपतिः स मावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्म्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं रुद्राय पशूनामधिपतये न मम ॥१४॥ (अत्र प्रणीतोदकस्पर्शः)

(सुरोको टुप्पो प्रणीतामा चोब्ने)

ॐ त्वष्टेति प्रजापतिऋषिस्त्वष्टारूपाणामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ त्वष्टारूपाणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं त्वष्ट्रे रूपाणामधिपतये न मम ॥१५॥
ॐ विष्णुरिति प्रजापतिऋषिर्विष्णुः पर्वतानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ विष्णुः पर्वतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्म्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं विष्णवे पर्वतानामधिपतये न मम ॥१६॥
ॐ मरुत इति प्रजापतिऋषिर्मरुतो गणानामधिपतयो देवताः पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ मरुतो गणानामधिपतयस्ते मावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं मरुद्भ्यो गणानामधिपतिभ्यो न मम ॥१७॥
ॐ पितर इति प्रजापतिऋषिः पितरः पितामहाः परेऽवरे ततास्ततामहा देवताः पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ।
ॐ पितरः पितामहाः परेऽवरे ततास्ततामहा इह मावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ꣳ स्वाहा ॥ इदं पितृभ्यः पितामहेभ्यस्ततेभ्यस्ततामहेभ्यो न मम (अत्र प्रणीतोदकस्पर्शः) ॥१८॥ अथ वधूवरौ अभिषिञ्चेत् तत्र मन्त्रौ – (वरवधूलाई अभिषेक गर्ने)
ॐ ब्रह्मा विष्णुस्तथा रुद्रो गुरु शुक्रश्च भार्गवः । आयुर्दीर्घं च सौख्यं च प्रयच्छन्त्वनयोर्द्वयोः ॥१॥
अग्निर्भूरपि यज्ञेऽस्मिन् श्रीधरश्च श्रिया सह । देयात् पुत्रान् सुखं लक्ष्मीं सौभाग्यमपि सर्वदा ॥२॥

अथ गुप्ताहुतयः

(दुलाहा दुलहीलाई छेक्ने र हवन गर्ने)

वधूवरयोः पुरस्तात् प्रसारितेन पटेन वन्हिं व्यवधाय – ॐ अग्निरैतु इत्यादिनां चतुर्णां मन्त्राणां प्रजापतिऋषिः परंमृत्यो इति मन्त्रस्य सङ्गसुकऋषिः पञ्चानामपि त्रिष्टुप् छन्दः लिङ्गोक्ता देवता आज्याहुतिहोमे गुप्ताहुतिहोमे च विनियोगः ।
ॐ अग्निरैतु प्रथमो देवताना ꣳ सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् ।
तदय ꣳ राजा व्वरुणोऽनुमन्यतां यथेय ꣳ स्त्री पौत्रमघं न रोदात्स्वाहा ॥ इदमग्नये न मम ॥१॥
ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः ।
अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामिय ꣳ स्वाहा ॥ इदमग्नये न मम ॥२॥
ॐ स्वस्ति नो अग्ने दिव आ पृथिव्या विश्वानि धेह्ययथा यजत्र ।

यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्र ँ स्वाहा ॥ इदमग्नये न मम ॥३॥
ॐ सुगन्नु पन्थां प्रदिशन्नऽएहि ज्योतिष्मद्धेह्यजरन्न आयुः ।
अपैतु मृत्युरमृतं न आगाद्वैवस्वतो नोऽअभयं कृणोतु स्वाहा ॥ इदं वैवस्वताय न मम (अत्रप्रणीतोदकस्पर्शः) ॥४॥
ॐ परं मृत्यो अनु परेहि पन्थां यस्तेऽअन्यऽइतरो देवयानात् । (सुरोको टुप्पो प्रणीतामा चोब्ने)
चक्षुष्मते श्रण्वते ते ब्रवीमि मा नः प्रजा ँ रीरिषो मोत व्वीरान् स्वाहा ॥
इदं मृत्यवे न मम । (अत्र प्रणीतोदकस्पर्शः) ॥५॥
प्रसारितं वस्त्रमुत्तार्य वधूवरौ अभिषिञ्चेत्, तत्र मन्त्रः– (कपडा झिकी दुलाहादुलहीलाई अभिषेक गर्ने)
ॐ गोविन्दो गोकुले तिष्ठन् गोपीभिर्विहरन् सह । तुष्टिपुष्टि करो भूयादनयोर्वरकन्ययोः ॥

अथ लाजाहोमः (शिला राख्ने र नाइलामा लाजा वेहुलीको भाइले तीन भाग लगाई एक भाग दुलहीको अञ्जलिमा दिने)

तत्प्रकारश्च – वधूर्वेद्याः पश्चिमतः प्राङ्मुखीभूय तिष्ठेत्, तस्या वामतो वरस्तिष्ठेत्, घृताभिघारितानां शमीपलाशमिश्रितानां शूर्पे चतुर्भागतया पृथक् स्थापितानां लाजानां मध्ये, प्रथमभागतः भ्रात्रा अञ्जलिना प्रदत्तान् लाजान् अञ्जलौ गृहीत्वा, वरेण अन्वारब्धा वधूर्मन्त्रं पठित्वा त्रिवारं जुहुयात्, तत्र मन्त्राः –
ॐ अर्यमणमित्याथर्वणऋषिरनुष्टुप्छन्दो लिङ्गोक्ता देवता लाजाहोमे विनियोगः ।
ॐ अर्यमणं देवं: कन्या अग्निमयक्षत । स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा ॥
इदमर्यम्णे न मम ॥१॥ इति वरः । (दुलहीले लाजा हवन गर्ने)
इति प्रथमाहुतौ हुतायाम्, पुनः प्रथमभागतो भ्रात्रा दत्तान् लाजान् अञ्जलौ गृहीत्वा –
ॐ इयं नार्युपब्रूते लाजानावपन्तिका । (दोस्रो पटक हवन गर्ने)
आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा ॥ इदमग्नये न मम ॥२॥
इति द्वितीयाहुतौ हुतायां, प्रथमभागतो भ्राता दत्तान् लाजान् गृहीत्वा पुनः –
ॐ इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव । (तेस्रो पटक हवन गर्ने)
मम तुभ्यं च संवननं तदग्निरनुमन्यतामिय ँ स्वाहा । इदमग्नये न मम इति वरः प्रति हवनान्तं त्यागं कुर्यात् । (इति जुहुयात्) ॥३॥

पाणिग्रहणम् (वधूको दाहिने हातको बूढी औंला समाती वरवधू घुम्ने)

ततो वरः वध्वाः दक्षिणहस्ताङ्गुष्ठं गृहीत्वा चतुरः (४) मन्त्रान् पठेत्, तत्र मन्त्राः– ॐ गृभ्णामीत्यादीनां चतुर्णां याज्ञवल्क्यभरद्वाजाथर्वणप्रजापतय ऋषयः त्रिष्टुबुष्णिगनुष्टुप्यजुश्छन्दांसि पाणिग्रहणे विनियोगः ।
ॐ गृभ्णामि ते सौभगाय हस्तं मया पत्या जरदष्टिर्यथाऽऽसः । भगो अर्य्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥१॥ ॐ अमोऽहमस्मि सा त्व ँ सा त्वमस्यमोऽहम् । सामाहमस्मि ऋक् त्वं द्यौरहं पृथिवी त्वम् ॥२॥ ॐ तावेहि विवहावहै सह रेतो दधावहै । प्रजां प्रजनयावहै पुत्रान् विन्दावहै बहून् ॥३॥ ॐ ते सन्तु जरदष्टयः सम्प्रियौ रोचिष्णू सुमनस्यमानौ । पश्येम शरदः शतं जीवेम शरदः शत ँ श्रृणुयाम शरदः शतम् ॥४॥

अश्मारोहणम् (शिलाको तीन रेखामा दुलहीले बूढी औंलाले टेक्ने र दुलहाले हातको बुढी औंलाले छुने)

ततोऽग्नेरुत्तरतः पाङ्मुखीं वधूं कृत्वा पूर्वापकल्पितायां ससिन्दूररेखात्रयायां शिलायां वध्वा दक्षिणं पादाङ्गुष्ठं स्वदक्षिणकरेण गृहात्वा मन्त्रं पठन् आरोहयेत् वरः । तत्र मन्त्राः – ॐ आरोहेममश्मानमित्याथर्वणऋषिः अनुष्टुप् छन्दो वधूर्देवता अश्मारोहणे विनियोगः ।

ॐ आरोहेममश्मानमश्मेव त्वꣳस्थिरा भव । अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायतः ॥ इति

गाथागानम् (गाथा (श्लोक या गीत) गाउने)

तस्यामारूढायां पुनः पठेद्वरः– ॐ सरस्वति प्रेदमिति विश्वामित्र ऋषिः सरस्वतीदेवताऽनुष्टुप्छन्दः गाथागाने विनियोगः ।

ॐ सरस्वति प्रेदमव सुभगे वाजिनीवति । यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः ॥
यस्यां भूतꣳसमभवद्यस्यां विश्वमिदं जगत् । तामद्यगाथां गास्यामि या स्त्रीणामुत्तमं यशः ॥ (इति ॥

परिक्रमणम् (वधू अगाडि लगाई लगनगाँठो समाएर अग्निमा परिक्रमा गर्ने)

ततो वरः वधूमग्रतः कृत्वा मन्त्रं पठन् प्रदक्षिणमग्निं परिक्रामेत् ।

तत्र मन्त्रः – ॐ तुभ्यमग्न इत्याथर्वण ऋषिरग्निर्देवताऽनुष्टुप्छन्दः परिक्रमणे विनियोगः ।

ॐ तुभ्यमग्ने पर्यवहन्त्सूर्यां वहतु ना सह । पुनः पतिभ्यो जायां दाऽग्ने प्रजया सह ॥

इति परिक्रम्य, पूर्वं स्थानमागत्य पूर्ववत् समन्त्रपाठं वधूवरौ लाजाहोमम्, अङ्गुष्ठग्रहणम्, अश्मारोहणम्, गाथागानम्, अग्निपरिक्रमणं च द्विवारं कुर्याताम् ॥ एवं तृतीयपरिक्रमणे समापिते भ्रात्रा दत्तस्य शूर्पस्य कोणेन सर्वानेव लाजान् समन्त्रपाठं जुहुयात् । तत्र मन्त्रः – ॐ भगायेति मन्त्रस्य प्रजापतिऋषिस्त्रिष्टुप् छन्दो भगो देवता लाजाहोमे विनियोगः ।

ॐ भगाय स्वाहा, इदं भगाय न मम (इति वरो ब्रूयात्) । (चौथोपटक लाजा सबै हवन गर्ने)

शिलापूजनम् (शिला पूजा गर्ने)

ततस्तूष्णीं चतुर्थं परिक्रमणम्, तत्र आचाराद्वधूवरौ पूर्वप्रकल्पितां शिलामारोहणाक्रमेण गन्धाक्षतपुष्पाण्यादाय पूजयेतामेभिर्मन्त्रैः –

तमालपुष्पप्रतिमाङ्गि ! मातः ! सनालनीलोत्पलयुग्महस्ते ! स्फुरत्सरस्वद्बृहदम्बरे ! त्वं धरे ! समागच्छ वरं प्रदातुम् ॥ ॐ भूरसि भूमिरस्यदितिरसि विश्वधा या विश्वस्य भूवनस्य धर्त्री । पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः ॥१॥ मातरं वसुधां देवीं पितरं च महेश्वरम् । आवां प्रपन्नौ स्वः कामान्प्राप्नुयाव यथेप्सितान् ॥ ॐ अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे श्यामं च मे लोहं च मे सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम् ॥२॥ देहल्यां स्थापिता सेयं भक्तितोऽभ्यर्चिता शिला । ददातु विपुलान्


भोगान् पुत्रपौत्रादिसंयुतान् ॥ ॐ स्थिरो भव वीड्वङ्गऽआशुर्भव वाज्यर्वन् । पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहणः ॥३॥ इति । (शिलाको प्रसाद दुवैले शिरमा राख्ने)

ततो वर उपविश्य ब्रह्मणाऽन्वारब्धः प्रजापतिं ध्यायन् आज्येन जुहुयात्। तत्र मन्त्रः – ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप् छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः। ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम। हुतशेषस्य आज्यस्य प्रोक्षणीपात्रे प्रक्षेपः ॥ ततो वधूवरौ यथास्थानमागत्य उपविशेताम् ॥ (वरवधू आफ्नो ठाउँमा बस्ने)

अष्टपर्वतपूजा (कपडामा लाजाको आठओटा थुप्रो बनाई अष्टपर्वत पूजा गर्ने)

ततोऽष्टदिक्षु वस्त्रोपरि पुञ्जीकृतैस्तण्डुलैर्लाजैर्वा प्रकल्पितान् अष्टौ पर्वतान् पूजयेत्। पुञ्जीकरणपूजनयोराकृतिः -

१. सुमेरुः
२. शिखिरः
३. उदयाचलः
४. मरुतः
५. विन्ध्यः
६. हिमालयः
७. वैराटः
८. शारदः



वधूवरौ गन्धाक्षतपुष्पाद्यैः पूजयेताम्, तत्र मन्त्राः – (वरवधूले आठै थुप्रोको क्रमशः पूजा गर्ने)

१. सुमेरुं काञ्चनमयं चतुःश्रृङ्गविराजितम्। मण्डलस्योत्तरे भागे चन्द्रमा इति पूजये ॥
ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥
ॐ सुमेरुपर्वताय नमः ॥१॥

२. शिखिरं च महादेवं पाण्डुरं हेमभूषितम्। येतेशतमितीशाने विदिग्भागे प्रपूजये ॥
ॐ येतेशतं व्वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः ।
तेभिर्नो अद्य सवितोत व्विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा ॥
ॐ शिखिराय नमः ॥२॥

३. उदयं पर्वतं पीतरक्तश्वेतं विभूषितम्। त्रातारमितिमन्त्रेण साधिष्ठातारमर्चये ॥
ॐ त्रातारमिन्द्रमवितारमिन्द्र ँहवे हवे सुहव ँशूरमिन्द्रम्।
ह्वायामि शक्रं पुरुहूतमिन्द्र ँस्वस्ति नो मघवा धात्विन्द्रः ॥
ॐ उदयाचलाय नमः ॥ ३ ॥

४. समुन्नतं कृष्णवर्णं मरुतं नाम पर्वतम्। आग्नेय्यां स्थितमत्युग्रं मरुत्वानिति पूजये ॥
ॐमरत्वाँऽइन्द्र वृषभो रणाय पिबा सोम मनुष्यधम्मदाय ।
आसिञ्चस्व जठरे मदध्वऽऊर्मिन्त्वꣳराजासि प्रतिपत्सुतानाम् ॥
उपयामगृहीतोसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ॥
ॐ मरुताय नमः ॥४॥

५. आरक्तश्वेतवपुषं दक्षिणस्यां दिशि स्थितम्। धामच्छदितिमन्त्रेण विन्ध्यं पर्वतमर्चये ।
ॐ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः ।
सचेतसो विश्वेदेवा यज्ञं प्रावन्तुनः शुभे ॥
ॐ विन्ध्याचलाय नमः ॥५॥

६. नैर्ऋत्यामुषितं तुङ्गं मणिहेमादिभूषितम्। हिरण्यगर्भमन्त्रेण हिमवन्तं समर्चये ।
ॐ हिरण्यगर्भः समवर्ततात्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा व्विधेम ॥
ॐ हिमाचलाय नमः ॥६॥

७. पाण्डवैर्गुप्तचर्यार्थमाश्रितं पश्चिमे स्थितम्। धन्वनागेतिमन्त्रेण वैराटं गिरिमर्चये ।
ॐ धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामङ्कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥
ॐ वैराटाय नमः ॥७॥

८. शरदं शुभ्रवर्णाढ्यं ज्ञानदं करुणायुतम्। वायव्यां दिशि वायव्यैर्व्वायव्यानिति पूजये ॥
ॐ व्यायव्यैर्व्वायव्यान्याप्नोतिशतेन द्रोणकलशम् ।
कुम्भीभ्यामम्भृणौसुते स्थालीभिः स्थालीराप्नोति ॥
ॐ शारदाय नमः ॥८॥ अन्ते प्रसादग्रहणम्। (दुलाहादुलहीले अष्टपर्वतको प्रसाद लगाउने)

अथ सप्तपदी (कपडामा सिन्दूरको सात टीका लगाई सप्तपदी पूजा गर्ने)

वेद्या उत्तरोत्तरतः आस्तृते वस्त्रे सिन्दूरादिभिः सप्त मण्डलानि कृत्वा, वधूम् उदङ्मुखीम् उत्स्थितां कृत्वा, तस्याः दक्षपादाङ्गुष्ठं दक्षहस्तेन गृहीत्वा वरः सप्तपदानि क्रमेण समन्त्रपाठं प्रक्रामयेत्। मन्त्राः – (वरले देखाउने, दुलहीले कुल्चैदै जाने)

ॐ एकमिष इत्यादिसप्तानां प्रजापतिऋषिर्यजुर्लिङ्गोक्ता देवता सप्तपदा प्रक्रमणे विनियोगः ।

ॐ एकमिषे विष्णुस्त्वा नयतु (१) (इति प्रथमे पदाक्रमणे मन्त्रः)। (पहिलो टीकामा कुल्चिने)

ॐ द्वे ऊर्जे विष्णुस्त्वानयतु (२) (इति द्वितीये०)। (दोस्रो कुल्चिने)

ॐ त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु (३) (इति तृतीये०)। (तेस्रो कुल्चिने)

ॐ चत्त्वारि मायोभवाय विष्णुस्त्वा नयतु (४) (इति चतुर्थे०)। (चौथो कुल्चिने)

ॐ पञ्च पशुभ्यो विष्णुस्त्वा नयतु (५) इति पञ्चमे०)। (पाँचौँ कुल्चिने)

ॐ षड्ऋतुभ्यो विष्णुस्त्वा नयतु (६) (इति षष्ठे०) (छैटौँ कुल्चिने)

ॐ सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयतु (७) (इति सप्तमे मन्त्रः) ॥ (सातौँ कुल्चिने)

ततस्तेषु सप्तसु मण्डलेषु क्रमेण सप्त ऋषीन् वधूवरौ गन्धाक्षतंपुष्पैः पूजयेताम्।

तत्र मन्त्राः – (सातै टीकामा क्रमशः पूजा गर्ने)

अत्रिं मुनिं सपत्नीकमावाह्य प्रथमे पदे। पत्न्याऽनयाऽभिनवया संयुक्तः पूजयाम्यहम् ॥

ॐ आदित्याङ्गर्भं पयसा समङ्ग्धि सहस्रस्य प्रतिमां विश्वरूपम्।

परिवृङ्ग्धि हर सा मा भिमꣳस्थाः शतायुषं कृणुहि चीयमानः ॥ ॐ अत्रये नमः ॥१॥

पदे द्वितीये सूर्येन्दुरूपं पत्नीसमन्वितम। मुनिं वसिष्ठमावाह्य सदारः पूजयाम्यहम् ॥

ॐ वातो वा मनोवा गन्धर्वः सप्तविꣳशतिः।

तेऽअग्रेश्वमयुञ्जँस्तेऽअस्मिञ्जवमादधुः ॥ ॐ वसिष्ठाय नमः ॥२॥

पदे तृतीयेऽङ्गिरसं मुनिवर्गसमर्चितम्। दम्पत्योर्जयदातारं सदारः पूजयाम्यहम् ॥

ॐ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङक्तया सह।

बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ॥ ॐ अङ्गिरसे नमः ॥३॥

उद्भावितहरिश्चन्द्रमहिमानं मुनीश्वरम्। पदे चतुर्थे गाधेयं सदारः पूजयाम्यहम् ॥

ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्।

होतारं रत्नधातमम् ॥ ॐ विश्वामित्राय नमः ॥४॥

पराशरसुतं व्यासं मत्स्यगर्भसमुद्भवम्। पञ्चमेऽत्र पदे प्रीतः सदारः पूजयाम्यहम् ॥

ॐ सोमो धेनुꣳसोमो अर्वन्तमाशुꣳ सोमो व्वीरङ्कर्म्मण्यं ददाति।

सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ॥ ॐ व्यासाय नमः ॥५॥

षष्ठे पदे भरद्वाजं मुनिं षड्ऋतुविग्रहम्। आवाह्य यज्ञरक्षायै सदारः पूजयाम्यहम् ॥

ॐ वसन्तेनऽऋतुना देवा वसवस्त्रिवृता स्तुताः।

रथन्तरेण तेजसा हविरिन्द्रे व्वयो दधुः ॥ ॐ भरद्वाजाय नमः ॥६॥

सप्तमेऽत्र पदे शम्भोरंशभूतं मुनीश्वरम्। दुर्वाससं शुभावाप्त्यै सदारः पूजयाम्यहम् ॥

ॐ सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम्।

सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ। ॐ दुर्वाससे नमः ॥७॥

इत्थं संपूज्य वधूवरौ प्रसादमादाय सप्तब्राह्मणान् दक्षिणाभोजनादिभिः सन्तोषयेताम् ॥ (प्रसाद लगाउने)

राजविजयप्रशस्तिगानम्

(खाँडो जगाउने र सबैको जय होस् भन्ने)

अस्मिन्नवसरे राजवंशविरुदावलिवेत्ता कश्चन ओजस्वी क्षत्रियादिपुरुषः खड्गमुन्नीय साभिनिवेशं राजविजय-प्रशस्तिमुच्चैर्गायेदिति ॥ (गोरक्षदेशाचारः) ॥

वधूमूर्धाभिषेचनम्

(जलले दुलाहादुलहीलाई अभिषेक गर्ने)

ततो वरः सपत्नीकोऽग्नेः पश्चिमतः स्थित्वा मौनिपुरुषस्कन्धस्थितकलशजलेन साम्रपल्लवेन वधूं मूर्धन्यभिषिञ्चेत् ।

तत्र मन्त्राः – ॐ आप इति प्रजापतिऋषिर्लिङ्गोक्ता देवता यजुर्मूर्धाभिषेचने विनियोगः ।

ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् । इति ।

पुनः –

ॐ आपो हिष्ठे ति त्र्यृचस्य सिन्धुद्वीपऋषिर्गायत्री छन्द आपो देवताः वधूमूर्धाभिषेके विनियोगः ।

ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे ॥१॥

यो वः शिवतमो रसस्तस्य भाजयते ह नः । उशतीरिव मातरः ॥२॥

तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥३॥ (इति प्रतिमन्त्रम्) ।

सूर्योदीक्षणम्

(दुलाहाले दुलहीलाई सूर्य देखाउने)

अथ दिवा विवाहे वरः वधूं सूर्यमुदीक्षस्व इति प्रैषेण सूर्यं दर्शयेत् । तत्र मन्त्रः स्वयं पठेत् –

ॐ तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिः ब्राह्मी त्रिष्टुप् छन्दः सूर्यो देवता सूर्योदीक्षणे विनियोगः ।

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः, शतं जीवेम शरदः शतꣳशृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः, शतं भूयश्च शरदः शतात् ॥

इति उदैक्षि इति कन्या ब्रूयात् । रात्रौ विवाहे तु ध्रुवमुदीक्षस्व इति वरो ध्रुवं दर्शयेत् मन्त्रं च स्वयं पठेत् –

ॐ ध्रुवमसीति प्रजापति ऋषिर्ध्रुवो देवता पङ्क्तिश्छन्दः ध्रुवोदीक्षणे विनियोगः । (चन्द्रमा वा ध्रुवतारा देखाउने)

ॐ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि ।

मह्यं त्वादाद्बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदःशतम् । इति ।

वधूश्च ध्रुवमवीक्षमाणापि उदीक्षे इति ब्रूयात् ।

हृदयालम्भनम्

(दुलाहाले दुलहीको हृदयमा छुने)

अथ वरः वध्वाः दक्षिणस्कन्धतो हस्तं नीत्वा तस्याः हृदयमालभेत । तत्र मन्त्रः –

ॐ ममव्रत इति मन्त्रस्य प्रजापतिऋषिर्देवता च त्रिष्टुप्छन्दः वधूहृदयालम्भने विनियोगः ।

ॐ ममव्रते ते हृदयं दधामि मम चित्तमनु चित्तं तेऽअस्तु । (दुलाहाले मेरो चित्त, हृदय नै तिम्रो पनि हो भन्ने)
मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम् ॥ इति ॥

अथ सिन्दूरार्पणम्

(सिन्दूर हाल्दा माइती पक्षले नहेर्ने चलन छ।)

(दुवै पक्षको सिँदुरे कपडा दुलहीको निधारबाट गणेश या इशान कलशसम्म राख्ने र तीनपटक सिन्दूर हाल्ने)

ऐशान्यां स्थापिताद् गणेशादारभ्य वधूसीमन्तपर्यन्तं (उभयपक्षीये) वस्त्रद्वये प्रसारिते सति, वर उत्थाय सिन्दूरपात्रं वामहस्तेन धृत्वा, गणेशादिभ्यो देवताभ्यः सिन्दूरं समर्प्य त्रिरुत्क्षिप्य वस्त्रद्वये अविच्छिन्नां सिन्दूररेखां प्रवर्तयन् वधूसमीपमागत्य – (दियो, कलश, गणेश, अग्नि र भूमिमा सिन्दूर चढाउने र हाल्ने)

ॐ सुमङ्गलीरितिमन्त्रस्य प्रजापतिऋषिरनुष्टुप्छन्दो लिङ्गोक्ता देवताऽभिमन्त्रणे विनियोगः। (सिन्दूर हाल्ने)

ॐ सुमङ्गलीरियं वधूरिमा ꣳसमेत पश्यत। सौभाग्यमस्यै दत्त्वा यथास्तं विपरेतन॥

इति मन्त्रेण त्रिवारं सीमन्तदेशे सिन्दूरं निःक्षिप्य ललाटमध्यं च सिन्दूरबिन्दुविभूषितं कृत्वाऽवशिष्टसिन्दूरसहितं पात्रं तस्यै दद्यात्॥ (सिन्दूर हालेपछि सिउँदो छोप्ने चलन छ)

स्थानपरिवर्तनम्

(दुलाहाले दुलहीलाई उचालेर ठाउँ सारी वायाँतर्फ राख्ने)

अथ वरः (बलवानन्यो वा कश्चित् सुशीलो ब्राह्मणादिः) कन्यामुत्थाप्य –

ॐ इह गाव इति मन्त्रस्य प्रजापतिऋषिरनुष्टुप्छन्दो लिङ्गोक्ता देवता उपवेशने विनियोगः।

ॐ इह गावो निषीदन्त्विहाश्वाऽइह पूरुषाः। इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदतु॥

इति मन्त्रं पठन् (अग्नेः प्रागुदग्वा पूर्वप्रकल्पिते गुप्तागारे उत्तरलोम्नि प्राग्ग्रीवे लोहिते आनडुहे चर्मणि) प्रागग्रैरुदगग्रैर्वा कुशैरास्तृते लोहितवस्त्रच्छन्ने सुखासने वा उपवेशयेत्, उपविष्टा वधूश्च वरस्य वस्त्रान्तमाकृष्य स्थीयताम् इति वदन्ती तं स्वदक्षिणत उपवेशयेत् पादयोः प्रणमेच्च। अथ वर आचार्याय गोयुग्मं (गां वा) दद्यात्। गोयुग्मं (गां वा) ब्राह्मणं च संपूज्य कुशादीन्यादाय। (गोदान गर्ने)

पूर्वसंकल्पसिद्धिरस्तु इत्युक्त्वा ... ... गोत्रः ... ... शर्माऽहम् कृतस्यैतावतो वैवाहिकस्य कर्मणः साङ्गतासिद्धये रुद्रदेवताकम् इदं गोयुग्मं (इमां रुद्रदेवताकां गां वा) ... ... गोत्राय ... ... शर्मणे तुभ्यं संप्रददे। इति दद्यात्। ब्राह्मणः कोदादिति, स्वस्तीति च ब्रूयात्, कपिले० इति गां प्रार्थ्य, संकल्प्य दानप्रतिष्ठाद्रव्यं दद्यादिति॥

अथ मधुपर्कप्राशनमाचारात्

(माहुर खुवाउने र आचमन गर्ने)

दधिमधुघृतं पिहितं कांस्यपात्रे समानीतं वन्हौ तापितं पुरस्तात् कृत्वा पिधानमपसार्य वधूवरौ समालोडयेताम्, कनिष्ठिकया समं विभज्य अहंपूर्विकामालम्ब्य, मन्त्रपाठं विनैव परस्परं प्राशयेतां च हस्तौ प्रक्षाल्य आचामेताम् च।

अथादित्यदुहिता शैलराजदुहिता च

(लाजा भुट्ने र सुपारी खेल्ने)

वधूवरौ परस्परं संमुखीभूय यथासुखं स्थित्वा सपणं (ठिनी) विन्यासं दीव्येताम् अक्षैः। तयोरुपरि वस्त्रं प्रसार्य, तत्र लाजान् प्रक्षिप्य, चामराभ्याम् आलोडयेताम् च कलशवाहिन्यौ केचन अन्ये वा स्त्रियौ यावत् न मन्त्रपाठः समाप्यते तावत्। आचार्यः – ॐ तपसस्तेजसा प्रभाविता जटाभाराजिनसंछन्नाऽऽदित्यदुहिता बहूनि वर्षाणि तताप। तेजसा तपन्ती च सा तपतीति विख्याता बभूव। अथैकदा सन्नद्धधन्वा सेनया सहितो वने विचरन्

धृतातपत्रो नृपः संवरणः समुपसृत्याऽवोचत्प्रेक्षन्तीं सुभ्रुवं नीलकेशीं यौवनवतीं पीनस्तनीं पृथुश्रोणीं ताम्। हे ! त्वं कस्याऽसि किंनामा दुहितेति। सा होवाच, यस्यैकचक्रं भुजगनियमितं सप्ताश्वमचरणेन सारथिना ऽरुणेन प्रणुद्यमानं स्यन्दनं, य एष भ्राजमानः प्रातरुद्यति, तस्याहं दुहिताऽऽशीर्नामेति, देवरूपी कुण्डलाभरणो महाबाहुः कस्त्वं भोः ! कया कामनया मामेत्यादरेण पृच्छसीति। स होवाच तस्या अमृतोपमां वाचं निशम्य नृपवरः। सुन्दरि नृपः संवरणोऽहं भार्या मे भव रूपिणीति, श्रुत्वा सा होवाच य एवं मामजीजनत् तं गत्वा तेजोराशिमुद्यन्तं भास्करं वृणुष्वेति। स निशितैः कामशरैस्तुद्यमानः स्वपुरोहितं भगवन्तं वसिष्ठमुपातिष्ठत, मदर्थे तां ब्रध्नं वृणुष्वेति। स होवाच ब्रध्नस्तेन गत्वा ऋग्भिर्यजुर्भिः सामभिस्तूयमानो वसिष्ठो ३ यज्ञमं कामयसे तत्ते दास्यामीति। स होवाच स एष कामो याज्यो मे नृपः संवरणस्तस्यार्थे दुहितरं ते वृणोमीति। दत्तेसि स होवाच प्रतिगृहाणेति। अथ वसिष्ठस्तां वाचमनुश्रुत्य तुष्टः प्रतीचीं दिशमागतस्तत्सर्वं तस्मै निवेदयामास। अथ तेन निवेदिते सुदिने सुमुहूर्ते सुनक्षत्रे सुयोगे पुण्याहे पाणिं जग्राह संवरणः पाणिनाऽऽदौ पित्राऽनुमङ्गलं पत्तम्। उभावध्वर्युरन्वारेभे। कुशैर्लाजैः शमीपलाशैः समिद्भिः समन्तं हव्यवाहे हुयमाने देवतानामृषीणां गन्धर्वाणामप्सरसां सतां पशयतां मङ्गलध्वनिभिर्ऋग्यजुः सामाथर्वाङ्गिरसेतिहासपुराणमन्त्रध्वनिमिलितैः सनृत्यवादित्रगीतैर्विवाहः संवृत्तः। अथ हैतद्भानुर्धनं ददौ, गोश्वानां दासीनां महिषाणामजाविकानांकुञ्जराणां शतं साहस्र वस्त्रमपरिमितं रजतं काञ्चनम्।

तद्गृहीत्वा स्वपुरं रथेन वाजिभिर्युक्तेन गच्छन्तौ संमोदमानौ दम्पती जगाद तौ भानुः– भोः संवरण धरणीपते तपती नाम सेयं भार्या ते संवृत्ता, श्रणुतं मद्वाक्यम्– ब्राह्मणवत्सलो भव, एषा ते दारक दारिका अविधवा अष्टपुत्रा जीववत्सा अनुत्तरवादिनी प्रैषकारिणी सत्यवादिनी ब्राह्मणस्तवा दैवतस्तवा मातरंसंत्यज्य पितरं सन्त्यज्य भ्रातृन्सन्त्यज्य भर्तारमर्चितं सुपूजितं चाऽनुयाति त्वाम्। यथेन्द्रस्येन्द्राणी, यथा दशरथस्य कौशल्या, यथा रामस्य सीता, यथा नलस्य दमयन्ती, यथा बालिनश्च तारा, यथा वायोश्चाञ्जनी, यथा नलस्य दमयन्ती, यथा सौदासस्य मदयन्ती, यथा पुरूरवस उर्वशी, यथा पुरुकुत्सस्य नर्मदा, यथा शंतनोश्च गङ्गा, यथा धृतराष्ट्रस्य गान्धारी, यथा पाण्डोश्च कुन्ती, यथा पाण्डवानां द्रौपदी, यथा भीमसेनस्य हिडिम्बा, यथाऽर्जुनस्य सुभद्रा, यथा दुर्योधनस्य भानुमति, यथादित्यस्य (मम) च्छाया, यथा चन्द्रस्य रोहिणी, यथा गणेशस्य सिद्धिबुद्धी, यथाऽगस्त्यस्य लोपामुद्रा, यथा योगेश्वरस्य मैत्रेयी, यथा वसिष्ठस्याऽरुन्धती, यथाऽत्रेरनसूया, यथा ब्रह्मणः सावित्री, यथा कृष्णस्य रुक्मिणी, यथा पशुपतेरुमा, यथा गौतमस्याऽहल्या, यथा हिमालयस्य मेनका, यथैवमन्येषामन्या, तथा तवेयमनुगामिनीति, ॥१॥ अथ शैलराजगृहे मेनका कन्यकां प्रजाता, कपर्दिने भवाय प्रत्तां च तां दुहितरं सा होवाच पत्यौ श्रृण्वति, अविधवा सुभगा कल्याणवती धनुवती पुत्रवती यौवनवती यशोवती भवेति, भवं चोवाच।

श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणामुम्म इषाण सर्वलोकम्म इषाण ॥ इति।

अथ भवः प्रत्युवाच सदा सुप्रीता वरदा भव, अथात इयं सर्वमङ्गला भूयात्, माहेन्द्रीव वारुणीवोत्तमानि लप्सीष्ट शोभनानि, नाहमेनां जह्याम्। त्रैलोक्ये सन्ति ये देवा ब्रह्मविष्णवादयः सुराः। एते त्वत्साक्षिणस्त्वं मेऽभवः

प्रागङ्गना सती ॥ त्यज्यते समयान्माता त्यज्यन्ते भ्रातरोऽपि वा । त्यज्यन्ते बान्धवाः सर्वे नाऽङ्गना सहगामिनी ॥ न रोचयेऽश्वं न गजं हिरण्यं कौशेयं वासो विविधं च रत्नम् । शुद्धा कन्या करगा शैलभर्तस्तव प्रसादान्मम शंकरस्य ॥ लोके कीर्तिः कुले वृद्धिर्लक्ष्मीश्च गृहमागता । स्त्रीरत्नं च मया प्राप्तं त्वत्प्रसादाद्धिमालय ॥ यद्यत्कल्याणकृल्लोके या च भक्तिरधोक्षजे । आवयोर्दत्तचित्तानां सर्वे भवतु तत्सदा ॥ इति ॥ इत्यादित्यदुहिता, शैलराजदुहिता च ॥

अथ ग्रहतिलकम्

(ब्राह्मणले वरवधूलाई टीका लगाइदिने)

वधूवरयोरभिमुखीभूतः कश्चन ब्राह्मणः सदधिसिन्दूरात्तैरक्षतैः पूर्वं वरस्य पश्चाद्वध्वा ललाटे प्रतिमन्त्रान्ते तिलकं कुर्यात् । तत्र मन्त्राः –

ॐ गजाननः पाशसनाथपाणी, रक्ताम्बरो ह्युन्दुरुवाहनश्च ।
लड्डुकहस्तो हि गणधिनाथो, वरस्य वध्वा वितनोतु भूतिम् ॥१॥
हंसाधिरूढः स चतुर्मुखः श्च, कमण्डलुर्यज्ञपवित्रदेहः ।
इन्द्रादिदेवैरभिपूजितश्च, वरस्य वध्वा० ॥२॥
शङ्खं गदां चक्रसरोरुहे च, करैर्दधानो गरुडाधिरूढः ।
जगत्पतिर्वाक्पतिपूजितश्च, वरस्य वध्वा० ॥३॥
गङ्गाधरो भस्मजटाधरश्च ललाटचन्द्रो वृषवाहनश्च ।
त्रिशूलखट्वाङ्गधरो महेशो, वरस्य वध्वा० ॥४॥
त्रिवेदमूर्तिर्जगदेकचक्षुर्विरिञ्चिनारायणशङ्करात्मा ।
प्रभाकरश्चाखिललोकहेतु, र्वरस्य वध्वा० ॥५॥
कलानिधिः कैरववर्गबन्धुः, कम्बुद्युतिः पुण्यविवृद्धिहेतुः ।
महौषधीशो रजनीपतिश्च, वरस्य वध्वा० ॥६॥
महीतनूजो महिमातिधीरः, सदा बलीयान् सततं पुराणः ।
हिरण्यवर्णः कनकाभिधानो, वरस्य वध्वा० ॥७॥
शशाङ्कसूनुर्गुणपूर्णनामा, सुखादिहेतुर्व्यसनापहारी ।
बुधश्च विज्ञानविचक्षणोऽसौ, वरस्य वध्वा० ॥८॥
समस्तविज्ञानगुरुर्मनीषी, सुरेन्द्रपूज्यः सुजनैकगम्यः ।
बृहस्पतिर्मङ्गलनामधेयो, वरस्य वध्वा० ॥९॥
तेजोऽधिकश्चाऽखिलखेचराणां, शुक्रः सुदीप्तः सुरशत्रुपूज्यः ।
यशोधनोऽसौ मृतजीवनश्च, वरस्य वध्वा० ॥१०॥
समस्तखेटोपरिमार्गगामी, शनैश्चरः सन्ततमादरेण ।
अस्मिन् सुलग्ने समुपागतः सन् , वरस्य वध्वा० ॥११॥

यो धावते ऽद्यापि सुधाशनः सँस्तमोमयश्चन्द्रमसं च सूर्यम् ।
स्वयं बली लब्धवरः स राहु, र्वरस्य वध्वा० ॥१२॥
समस्तसंपत्समवाप्तिहेतुः, केतुः प्रपन्नार्तिहरोऽत्र लग्ने ।
भूत्वाऽर्धमूर्तिः क्षितिसौख्यकर्ता, वरस्य वध्वा० ॥१३॥
सुधूम्रवर्णश्चलसप्तजिह्वः, शाण्डिल्यपुत्रः स धनञ्जयश्च ।
श्रृङ्ग्याख्यगोत्रो ह्यरणीप्रसूश्च, वरस्य वध्वा० ॥१४॥
सिंहाधिरूढा वरचापखड्ग, शूलारिखेटेष्वहियुक्तबाहुः ।
त्रैलोक्यमाता सुचिराय दुर्गा, वरस्य वध्वा० ॥१५॥
सुराश्च सर्वे ग्रहदेवताश्च, सप्तर्षयो दिक्पतयो नगाश्च ।
सयोगवारास्तिथयोऽखिलाश्च, वरस्य वध्वाश्च शुभानि कुर्युः ॥१६॥
ये यन्निदेशादिह कर्तुमीशा, ये यन्निदेशादपि हर्तुमीशाः ।
ते तन्निदेशादनयोः शुभानि, प्रत्यर्प्य गच्छन्तु यथावकाशम् ॥१७॥

इति ग्रहतिलकम् ।

ततोऽग्निस्थापनोक्तं उत्तराङ्ग होमं समाप्य – (अग्निस्थापना अनुसार गर्ने)

(अन्माउने बेलामा पूजा कोठामा लगेर टीका लगाई धर्मे गाँठो दिएर दही खुवाई यज्ञ परिक्रमा गराउने)

। इति विवाहपद्धतिः ।

अथ चतुर्थीकर्मपद्धतिः

(चतुर्थ दिन गर्नुपर्ने कर्म भोलिपल्ट गर्ने चलन छ)

विवाहदिनाच्चतुर्थे दिने यथाचारं विवाहदिन एव वा चतुर्थीकर्म क्रियते। अथ प्रयोगः ॥ वधूवरौ अपररात्रे उद्वर्तनपूर्वकं (यथाचारं युगकाष्ठोपरि) स्नापयित्वा वस्त्राभरणैः अलङ्कृत्य कर्मस्थाने प्राङ्मुखौ उपवेशयेत् ।

(सबै अग्निस्थापना अनुसार गर्ने)

आज्यहोमः

तत्र मन्त्राः – (घ्यू हवन गर्ने)

ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता चतुर्थीकर्मणि आज्यहोमे विनियोगः ।

ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम (इति मनसा) ॥१॥

ॐ इन्द्रायेति प्रजापति, ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता चतुर्थीकर्मणि आज्यहोमे विनियोगः ।

ॐ इन्द्राय स्वाहा, इदमिन्द्राय न मम (एतावाघारौ) ॥२॥

ॐ अग्नय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः अग्निर्देवता चतुर्थीकर्मणि आज्यहोमे विनियोगः ।

ॐ अग्नये स्वाहा, इदमग्नये न मम ॥३॥

सोमायेति प्रजापतिऋषिस्त्रिष्टुप्छन्दः सोमो देवता चतुर्थीकर्मणि आज्यहोमे विनियोगः ।

ॐ सोमाय स्वाहा, इदं सोमाय न मम (एतावाज्यभागौ) ॥४॥

ततः अग्नेरुत्तरतः प्रोक्षणीपात्रसमीपे जलपूर्णं पृथूदकं नाम पात्रं स्थापयेत् । दास्यमानाहुतिपञ्चके तत्तदाहुत्यन्ते तत्रैव हुतशेषस्य प्रक्षेपं च कुर्यात् । ततः अनन्वारब्ध एव – ॐ अग्ने प्रायश्चित्त इत्यादीनां पञ्चानां परमेष्ठीऋषिः अग्निवायुसूर्यचन्द्रगन्धर्वदेवताः अनुष्टुप्छन्दश्चतुर्थीकर्मणि आज्यहोमे विनियोगः । (कसार हवन गर्ने चलन छ)

ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणास्त्वा नाथकाम उपधावामि ।
यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा ।

इदमग्नये न मम' इति हुत्वा पृथूदकपात्रे संस्रवं प्रक्षिपेत् (एवमग्रेऽपि) ॥१॥

ॐ वायो प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामऽउपधावामि ।
यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा । इदं वायवे न मम ॥२॥

ॐ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि ।
यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा । इदं सूर्याय न मम ॥३॥

ॐ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि ।
यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा । इदं चन्द्राय न मम ॥४॥

ॐ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि ।
यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा । इदं गन्धर्वाय न मम ॥५॥

ततः प्रजापतिं मनसा ध्यायन् आज्याभिघारितेन स्थालीपाकेन स्रुवस्थापितेन –

ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम । हुतशेषं प्रोक्षणीपात्रे प्रक्षिपेत् ।

ततो ब्रह्मणाऽन्वाराब्ध आज्यसहितं स्थालीपाकं स्रुवेणाऽऽदाय – ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते न मम' । (इति प्रोक्षणीपात्रे प्रक्षिपेत् एवमग्रेऽपि) ततः केवलेन आज्येन वक्ष्यमाणानवाहुतर्जुहुयात् । ॐ व्याहृतीनां प्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवताः चतुर्थीकर्मणि प्रायश्चित्तहोमे विनियोगः ।

ॐ भूःस्वाहा, इदमग्नये न मम ॥१॥ ॐ भुवः स्वाहा, इदं वायवे न मम ॥२॥

ॐ स्वःस्वाहा, इदं सूर्याय न मम ॥३॥

ॐ त्वन्नो अग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दश्चतुर्थीकर्मणि प्रायश्चित्तहोमे विनियोगः ।

ॐ त्वन्नो अग्ने व्वरुणस्यव्विद्वान् देवस्य हेडो अवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो व्विश्वाद्वेषा ँसि प्रमुमुग्ध्यस्मत् स्वाहा । इदमग्नीवरुणाभ्यां न मम ॥४॥

ॐ सत्वन्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दश्चतुर्थीकर्मणि प्रायश्चित्तहोमे विनियोगः ।

ॐ सत्वन्नोऽअग्ने वमोभवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ । अवयक्ष्वनो व्वरुण ँरराण्नो व्वीहिमृडीक ँ सुहवो नऽएधि स्वाहा । ॐ इदमग्नीवरुणाभ्यां न मम ॥५॥

ॐ आयाश्चाग्नइति वामदेव ऋषिरग्निर्देवता त्रिष्टुप्छन्दश्चतुर्थीकर्मणि प्रायश्चित्तहोमे विनियोगः ।

ॐ आयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि ।
अयानो यज्ञं वहास्ययानो धेहि भेषजꣳस्वाहा । इदमग्नये न मम ॥६॥
ॐ येतेशतमिति वामदेव ऋषिस्त्रिष्टुप्छन्दो वरुणः सवितावि‍ष्णुर्विश्वे देवाः मरुतः स्वर्काश्च देवताश्चतुर्थीकर्मणि सर्वप्रायश्चित्तहोमे विनियोगः ।
ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः ।
तेभिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्क्केभ्यः न मम ॥७॥
ॐ उदुत्तममिति शुनः शेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता चतुर्थीकर्मणि सर्वप्रायश्चित्तहोमे विनियोगः
ॐ उदुत्तमं वरुणपाशमस्मदवाधमं व्विमध्यमꣳश्रथाय ।
अथाव्वयमादित्यव्रते तवानागसोऽअदितये स्याम स्वाहा । इदं व्वरुणाय न मम ॥८॥
ॐ प्रजापतयइति प्रजापतिऋषिर्देवता च त्रिष्टुप्छन्दश्चतुर्थीकर्मणि सर्वप्रायश्चित्तहोमे विनियोगः । (मनसा)
ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम ॥९॥ ततः संस्रवप्राशनम्, आचमनं च वधूवरयोः ॥

पूर्णपात्रदानम्

(पूर्णपात्र पूजा गर्ने र सङ्कल्प गर्ने)

सकुशोदकं पूर्णपात्रमादाय– ॐ अद्यकृतैतच्च्चतुर्थीहोमकर्मणः अपूर्णस्य पूरणार्थमिदं सद्रव्यफलब्रह्मसूत्रं पूर्णपात्रं प्रजापतिदैवतं ... ... गोत्राय ... ... शर्मणे ब्रह्मरूपाय तुभ्यमहं संप्रददे । इति दद्यात्, स्वस्तीत्युच्चार्य ब्राह्मणः प्रतिगृह्णीयात् ।

प्रणीताविमोकः

(प्रणीताको जलले अभिषेक गर्ने)

ॐ सुमित्रिया, दुर्मित्रिया इति द्वयोर्यजुषोः प्रजापतिऋषिरापोदेवता प्रणीताविमोके विनियोगः ।
ॐ सुमित्रिया नऽ आप ओषधयः सन्तु । (इति सपवित्रेण प्रणीताप्रोक्षण्योर्जलेन वधूवरौ अभिषिच्य)
ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मः । (इति ऐशान्यां प्रणीतापात्रं न्युब्जीकुर्यात्)

बर्हिहोमः

(कुश घ्यूमा चोबेर अग्निमा लगाउने)

तत आस्तरणक्रमेणवर्हींषि समानीय घृतेनाऽभिधार्य हस्तेन जुहुयात् । तत्र मन्त्रः –
ॐ देवा गातु विदो गातुमितिमन्त्रस्य वनस्पतिऋषिर्विराट्छन्दो वातो देवता बर्हिहोमे विनियोगः
ॐ देवागातुविदो गातुं वित्त्वा गातु मित । मनसस्पतऽइमन्देवयज्ञꣳस्वाहा वाते धाः । इति ।

वधूमभिषेञ्चनम्ः

(वरवधूलाई अभिषेक गरिदिने)

ततः पृथूदकपात्रस्थजलेन साम्रपल्लवेन समन्त्रपाठं वधूमभिषिञ्चेद्वरः – तत्र मन्त्रः –
ॐ यातइत्यस्य प्रजापतिऋषिस्त्रिष्टुप्छन्दः वधूर्देवताऽभिषेचने विनियोगः ।
ॐ या ते पतिघ्नी प्रजाघ्नी पशुघ्नी यशोघ्नी गृहघ्नी निन्दिता तनूः ।

जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सह ... ... देवि । इति

स्थालीपाकभोजनम्

(वरले कसार टोकी दुलहीलाई खान दिने)

ततो वरः – ॐ प्राणैस्त इति मन्त्रस्य प्रजापतिऋषिर्यजुर्वधूर्देवता चरुशेषभोजने विनियोगः ।

ॐ प्राणैस्ते प्राणान्त्संदधामि (१)

ॐ अस्थिभिस्ते अस्थीनि संदधामि (२)

ॐ मांसैस्ते मांसानि संदधामि (३)

ॐ त्वचा ते त्वचं संदधामि (४)

इति मनसा मन्त्रं जपन् चतुर्वारं स्वभुक्तशेषं स्थालीपाकं वधूं प्राशयेत्, आचामेत् आचामयेच्च । (आचमन गर्ने)

हृदयालम्भनम्

(वरले वधूको हृदयमा छुने)

ततो वरः वधूदक्षिणस्कन्धतो नीतेन स्वदक्षिणपाणितलेन वध्वाः हृदयं स्पृशेत । तत्र मन्त्रः –

ॐ यत्ते इति मन्त्रस्य प्रजापतिऋषिरनुष्टुप्छन्दो वधूर्देवता हृदयालम्भने विनियोगः ।

ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम् । (शिला पूजा गरी कपडामा हाली दुवैले ओछ्यानमा लाने चलन छ)

वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतꣳशृणुयाम शरदः शतम् । इति ।

अस्मिन्नवसरे यथाचारं कङ्कणमोचनम्, अञ्चलग्रन्थिमोचनम् । (द्यूतग्रन्थिमोचनम् च भवति) (लगनगाँठो फुकाउने)

अथ पूर्णाहुतिः

(सुरोमा फल राखी घृतधारा लगाउने)

उत्थाय होता ब्रह्मणाऽन्वारब्धः सपत्नीकेन वरेण च पादयोरन्वारब्धः स्रुवे फलादिकं निधाय अविच्छिन्नया घृतधारया– ॐ मूर्धानमित्यस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता चतुर्थीकर्मणि पूर्णाहुतिहोमे विनियोगः ।

ॐ मूर्धानन्दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम् ।

कविꣳसम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः स्वाहा ॥ इति जुहुयात् ।

तिलककरणम्

(तिलक लगाइदिने)

ततः स्रुवेण दग्धं चरुमानीय दक्षकरानामिकया वधूवरयोस्तिलकं कुर्यात् ।

ॐ त्र्यायुषमिति नारायणऋषिरुष्णिक्छन्दआयुर्देवता भस्मना तिलककरणे विनियोगः ।

ॐ त्र्यायुषं जमदग्नेः (इति ललाटे) । ॐ कश्यपस्य त्र्यायुषम् (इति ग्रीवायाम्) ।

ॐ यद्देवेषु त्र्यायुषम् इति दक्षिणबाहुमूले । ॐ तन्नोऽअस्तु त्र्यायुषम् (इति हृदि) ।

भूयसीदक्षिणादानम् विसर्जनञ्चः

(दक्षिणा सङ्कल्प गर्ने र विसर्जन गर्ने)

ततो वरः– कृतस्य होमकर्मणः साङ्गतायै पूर्वोक्तरीत्या गां, भूयसीं दक्षिणां च संकल्प्य दद्यात् । ब्राह्मणाश्च पूजितान्देवान् यान्तु देवगणा इत्यादिना, वह्निं च –

ॐ यज्ञयज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा ।
एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा ॥ इत्यनेन विसृज्य, कलशजलेन वधूवरावभिषिच्य, गन्धपुष्पादिभिराशीर्वादं समन्त्रपाठं दद्युः । वरश्च सत्नीकः साञ्जलिबन्धः –
ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णता.याति सद्यो वन्दे तमच्युतम् ॥ ॐ अच्युतायः नमः – ३ ।
ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु । इतीश्वरं प्रार्थयेत् । अथाऽऽचाराद्वधूः पत्युः पादौ प्रक्षाल्य तदुदकं पिबेत् ॥ ततश्च यथाकुलाचारं कुर्वाणौ वधूवरौ यथासुखं तिष्ठेताम् ॥ इति चतुर्थीकर्म, समाप्तं शुभम् ॥

अथ वधूवरविसर्जनादिविधिः

(भित्रिने वेलामा दियो, कलश, गणेश पूजा गरी वरवधूले फूल लिई नमस्कार गर्ने)

अथ यथाचारं कृतभोजनौ विश्रान्तौ यथासमयं धृतवस्त्राभरणौ वधूवरौ सज्जीकृतविसर्जनो– पचारं सन्निहितश्व-श्रूश्वशुरादिपरिवारं वैवाहिकं देवागारं प्रविश्य आसने देवाभिमुखौ उपविश्य पाणी प्रक्षल्य पुष्पाञ्जलिमादाय –
ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ।
दीपनारायणाय नमः । इति दीपाय – (नमस्कार गर्ने)
ततः – (गणेशको प्रार्थना गर्ने)
वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमोनमस्ते ॥
श्रीमन्मङ्गलमूर्तये गणाधिपतयेनम इति गणेशाय –
ततः – (कलशको प्रार्थना गर्ने)
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ।
सपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥ वरुणाय नमः ॥
ततः – (मातृकाको नमस्कार गर्ने)
ब्राह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लोकपा, कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरमुखी ऐन्द्री च वज्रायुधा, चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ॥
मातृकाभ्यो नमः इति मातृकाभ्यः समर्पयेताम् । (दिदी बहिनीहरूले झारी लिएर घुमी बत्ती बाली ढोका छेक्ने र दुलहीद्वारा केही पाएपछि धानमाथि बालेको बत्तीमा टेकेर पस्ने चलन छ । (बत्तीको नजिकै टेके पनि हुन्छ ।)

श्वश्रूर्जामातरं कन्यां च गन्धाक्षतैर्माल्यैश्चालंकृत्य दधिकदलीफलादिकं शकुनं प्राशयेत् । पूगीफलयज्ञसूत्रद्रव्यसहितेन वस्त्रेण धर्मग्रन्थिं च बध्नन्ती कन्यासंरक्षणं च सविनयं प्रार्थयेत् ॥

ततो वरः श्वश्रूप्रभृतीः समाश्वास्य प्रणम्य च, उभयपक्षीये कलशभारादिके पुरतः प्रस्थिते, पितृभ्रात्रादिभिः पृष्ठेन उह्यमानां वधूमग्रतः कृत्वा स्वयं च केनचिदुह्यमानः देवागारात् गणेशादिकान् देवान् स्मरन निष्कामेत् । कन्यापित्रादयश्च त्रिवारं भ्रामयित्वा कन्यां वरं च यथाक्रमं शिबिकादौ सहैव पृथग्वा निवेशयेयुः । ततः संबन्धिद्वयसंमेलनम् । स्वपक्षीयान्, कृतवादनान् वादकजनान् कलशादिकाँश्च पुरस्कृत्य वधूमनु वरस्य प्रस्थानं च । अस्मिन्नवसरे शिबिकावाहकानां चोपरोधस्तत्सन्तोषणं च ।

भवनाङ्गणं प्राप्तयोर्वरवध्वोर्भगिनीद्वयकर्तृकं नीराजनं, तत्कर्तृको द्वारोपरोधस्तत्सन्तोषणं च । व्रीहिपुञ्जेषु तण्डुलपिष्टपात्रे तिलतैलेन प्रज्वालितानां दीपानांचरणचङ्क्रमेण निर्वापणं कुर्वाणायाः वध्वा वैवाहिकदेवागारप्रवेशः । सपत्नीकस्य वरस्य पूर्वावाहितपूजितदेवानां पूर्वरीत्या पुष्पाञ्जलिः । ततः श्वश्रूस्नुषयोः कवरीद्वयसंयोजनं सह वसोः पवित्रमसीति वैदिकमन्त्रपाठसहितेन घृत (वसु) धारानिपातनम् । ततो वध्वाः श्वश्रूचरणयोर्वन्दनं सद्रव्यनिक्षेपम् । श्वश्रूकर्तृको वधूमुखावलोकश्च सति संभवे द्विगुणीकृतद्रव्यप्रत्यर्पणपूर्वकः ।

तत इतरेषां तथैव वन्दनं तथैव च मुखावलोकः (समयान्तरेऽप्येतत्कर्म क्रियते) ततो वरमातुर्धर्मग्रन्थिमोचनम्, तदीय द्रव्यं निधाय स्नुषया सह धान्यैर्घटीस्थापनपात्राधारीकृतैः अन्यैर्वा कैश्चन प्रस्थसंभरणम्, तद्धान्यमादाय पुरःस्थितया वध्वा पश्चात्स्थितया श्वश्रूा च धान्यकोशे (भकारीनामनि पात्रे) स्थापनं च ।

परतरेऽहनि शिलापुत्रस्य पूजनं, तस्य शय्यायां स्थापनं चेत्यादिकः सर्वेऽप्ययं पूर्वजैः प्रवर्तितो लौकिको विविधविधिकलापः कर्तव्यः ।

त्रिरात्रमक्षारालवणाशिनौ स्याताम्, अधःशयीयाताम्, संवत्सरं न मिथुनमुपेयाताम्, द्वादशरात्र० षड्रात्रं त्रिरात्रमन्ततः, ग्रामवचनं च कुर्युः, विवाहश्मशानयोर्ग्रामं प्रविशतात्, तस्मात्तयोर्ग्रामः प्रमाणम्, इत्यादीनि श्रुतिसूत्रकृद्वचनानि ।

'येनाऽस्य पितरो याता येन याताः पितामहाः । तेन यायात् सतां मार्गं तेन गच्छन्न रिष्यते ॥

इत्यादीनि स्मृतिवचनानि च नोपेक्षणीयानि कल्याणकामैर्मतिमद्भिरिति शम् ॥

(मातृकाको छेउमा गई नमस्कार गरेर बत्ती बालेर राखेको धान बुहारीले ढोकाबाट सासूले भित्रबाट बटुल्ने र नाङ्लोमा हाली पाथी राखेर धर्मेगाँठो फुकाली जनै सुपारी पैसा धान माथि राखी खन्याउने र खोज्ने । त्यसपछि धान ढुकुटीमा लाने, सासूबुहारीले चुल्ठो जोडाउने र टीका लगाउँदै मुख हेर्ने ।)

विवाहको श्लोक

भाग्यले हाम्री बुहारी लक्षिन्की छिन्–सब् सुगन्ध गुणकी ।
विदुषी ज्ञानी र आध्यात्मिक ज्ञान-परिपूर्ण भएकी ॥
पाएमा रमेर म सिक्न रमुला – हृदय नै खोलून् यी ।
ज्ञान गुन्का कुरा सुनाउनु उन्ले –सुन्ने छौं हामी चाख् ली ॥

(सासु-ससूराले बुहारीलाई आफ्नै छोरी मान्नु पर्दछ र बुहारीले पनि आफ्नो आमा-बुबा मान्नु पर्दछ ।)

लक्षणले रही विनम्र भएर-मिठासले बोलुँला ।
रहरका झोली अमृत झै मिठो - बोल् बोलेर भरुँला ॥
दुई दिन् रहनु छ संसारमहाँ – प्रेमले नै रहुँला ।
मिठो या नमिठो सन्तोषले खाई – मिलेर नै बसुँला ॥

खुसिले रुच्छ शरीरमा लाग्दछ – अमृत त्यो बन्दछ ।
यस्तो ज्ञान सधैं अप्नायो यदि भने – सबै सुख मिल्दछ ॥
बुहारीको आदर सम्मान सेवा लिनलाई हतार ।
गरेको हैन तै पनि हुन्छ तन्मा – मनमा त रहर ॥

मान अनुसारको सम्मान खोज्ने मानिसको स्वभाव ।
मनतनमा आफैं उब्जेर आउँछ – सबै यस्तै स्वभाव ॥
यो तथ्य सधैं बुझी सम्मान सेवा – गरेमा बुहारीले ।
हर्षले मन फुरुक्क परी माया – ममता र मोहले ॥

रहर माथि अझ रहर थपी, बुहारीको गुणले ।
यो मन हरी झन् माया दया ओइरो – खिचिलिने छिन् रे ॥
रहरकी बुहारी झन् रहर लाग्ने – उनी सधैं हुने छिन् ।
कर्तव्य पूरा गरेमा ठूली बनि – ज्ञान पनि सिक्दछिन् ॥
दिनदिनै फलिफाप भएर खुसी – हुने नै छिन् पुण्यले ।
त्यसैले सम्मान बाबा – आमा गुरुको गर्छन् बुझक बुहारीले ॥

निहुरी निहुरी दर्शन सम्मान गर्नु – नराम्रो नै होइन ।
यो भन्दा ठूलो सम्मान अरु कुनै छँदा पनि छइन ॥
यसैले माता पिता सासु ससुरा – गुरु पाहुना महाँ ।
मान्यजनको अगाडि श्रद्धाले झुक्छन् – ठूला कुलानिमहाँ ॥

माता पिता, गुरु पाहुना पूजे ता – द्यौता सरी गरेर ।
शान्ति वैभव दुवै मिल्छ फरक ता – पर्दैन क्यै गरेर ॥
माता पिता सज्जनहरू रिसाए, सुख बिलाउँछ रे ।
बाबा, आमा सबै जना सुखी भए, आनन्द त्यहीं छ रे ॥

भाग्यैले भरिपूर्ण लक्षण भरी, हाम्री बुहारी भई ।
ज्ञानी ज्ञान र धर्म कर्म विदुषी, अध्यात्ममा सात्विकी ॥
पाएमा म रमेर बस्न सकुँला, खानी सरी हृदयी ।
सुन्ने छौं गुन ज्ञान पूर्ण उनका, मीठा कुरा चाख ली ॥

अथ विष्णु प्रतिमा विवाह विधिः

सङ्कल्प (पिताले दीप, कलश, गणेश पूजा गरेर जल, कुश, लिने)

अद्येह ममामुकराशेरस्याः कन्याया जन्मसामयिकलग्नात् अमुकामुकस्थान स्थितामुकग्रहैः संसूचित वालवैधव्यादि दोष नानाविधवन्ध्या काकवन्ध्या-दुर्भगा-मृतापत्या-दुःशीला-स्वैरिणी-वैरिणी-दुश्चारिणी-कुलटा-घूतादि-दोष-निराकरण-पूर्वक सौभाग्यप्राप्त्यार्थं श्रीपरमेश्वरप्रीतये च विष्णुप्रतिमामयी कन्योद्वाहकर्माहं करिष्ये ।

प्राणप्रतिष्ठा (अष्टदलको बीचमा प्रतिमा राखेर फूल अक्षता लिएर छुने)

ॐ आं ह्रीं क्रौं सोऽहं विष्णवे प्राणा इह प्राणा० इह स्थितः ।

ध्यानम् (फूल अक्षता लिई नमस्कार गर्ने)

प्राप्यमाणं महाघोरं यशः सौख्य धनायहम् । वैधव्यढाद्यतिदुःखौघनाशाय सुखलब्धये ॥
वहु सौमाम्यलब्ध्यै च महाविष्णोरिमां तनुम् । सौवर्णीं निर्मितां शक्त्या तुभ्यं संप्रददे द्विज ॥
ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा ꣳ सुरे स्वाहा ॥

षोडषोपचारै पूजनम् (षोडषोपचारले पूजा गरेर सवै विवाहविधि अनुसार गर्ने)

अथ कुम्भविवाह विधिः

सङ्कल्प (पिताले दीप, कलश, गणेश पूजा गरेर जल कुश लिने)

अद्येह ममामुकराशेरस्याः कन्याया जन्म–सामयिकलग्नाद् अमुकस्थानास्थितामुकदुष्टग्रहसंसूचित वैधव्यादि दोषनिराकरण-पूर्वक-सौभाग्यप्रात्त्यार्थं कुम्भेन सह कन्योद्वाहकर्माहं करिष्य ।

प्राणप्रतिष्ठा (फूल अक्षता लिई छुने)

ॐ भूर्भुवः स्वः सुवर्णप्रतिमायां वरूण इहागच्छेह तिष्ठ सुप्रतिष्ठितो वरदो भव ।

ध्यानम् (फूल अक्षता लिई नमस्कार गर्ने)

वरूणाङ्गस्वरूपस्त्व जीवनानां समाश्रय । पतिं जीवय कन्यायाश्चिर देहि तथा सुखं ॥
ॐ तत्त्वायामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अडेहमानो वरुणेह बोध्युरुश स ꣳ मा नऽआयुः प्रमोषीः ॥

षोडषोपचारै पूजनम् (षोडषोपचारले पूजा गरेर सबै विवाह विधि अनुसार गर्ने)

अथार्कविवाहविधिः


सङ्कल्प (पितालेदीप, कलश, गणेश पूजा गरेर जल कुश लिने)

अद्येह ममामुकराशेरस्याः कन्याया श्रुतिस्मृतिपुराणोक्त फलप्राप्तिपूर्वक-करिस्यमाण-तृतीय-मानुषी विवाह तज्जन्य -वैद्यव्यादिदोषापनुत्यनन्तरवृद्धिहेतवेऽर्कं विवाहमहं करिष्ये ।

अर्कध्यानम् (फूल अक्षता लिई आँकको बोटको ध्यान गर्ने)

मया कृतमिदं कर्म स्थावरेषु दरायुण । अर्कापत्यानि मे देहि तत्सर्वं क्षन्तुमर्हसि ॥

षोडषोपचारै पूजनम् (षोडषोपचारले पूजा गरेर सबै विवाहविधि अनुसार गर्ने)



।। श्रीगणेशाय नमः ।।

अथ चतुरशीतिपूजा

चतुरशीतिपूजा/सहस्रचन्द्रदर्शनोद्यापनविधि (पूर्वदिन मातृकापूजा र आभ्युदयिक श्राद्ध गर्ने)

पूर्वदिने मातृकापूजनादिकं कृत्वा मण्डपं निर्माय संपूज्य च अपरदिने चतुरशीतिपूजा कर्तव्या ।

प्रतिज्ञासंकल्प (प्रतिज्ञासङ्कल्प गर्ने)

ॐ अद्येत्यादिदेशकालौ स्मृत्वा ... गोत्रस्य ... प्रवरस्य शुक्लयजुर्वेदान्तर्गत माध्यन्दिनीय-वाजसनेयशाखाध्यायिनश्चतुरशीतिवर्षे वर्तमानस्य दृष्टपूर्णचन्द्रसहस्रस्य ... ... शर्मणो मम श्रीचन्द्रहरेः प्रसादात् पुत्रपौत्रादीनामायुरारोग्यैश्वर्योदयाद्यभिवृद्धचर्थं स्वस्य च कृत्याकृत्यभोज्याभोज्यगम्यागम्यपेय्यापेय्यवाच्यावाच्यकर्माननु सन्धानवशात् उत्पन्नानां ज्ञाताज्ञातशुष्कार्द्रलघुगुर्वादिपापानां क्षयपूर्वकं चन्द्रमार्गेण श्रीहरिपदप्राप्त्यर्थं श्रीदीपकलश-गणेशपूजनपूर्वकं चन्द्रसहस्रपूजनं तदङ्गत्वेन हवनं ब्राह्मणदम्पत्योः पूजनं चाहं करिष्ये। । इति सङ्कल्प्य ।

दीपादीनां पूजनम् (ब्राह्मण वरण, पुण्याहवाचन गर्ने र दियो, कलश, गणेशको पूजा गर्ने)

दीपं प्रज्वाल्य स्वस्तिवाचनं कृत्वा कुण्डे वन्हिं संस्थाप्य चतुरः पञ्च षोडशो वा ब्राह्मणान् वृत्वा पुण्याहं च वाचयित्वा दीपगणेशकलशग्रहमातृकावास्तुमण्डलदेवानां सर्वतोभद्र च पूजां विधाय चन्द्रसहस्रपूजनं कुर्यात्।

प्रतिमास्थापनप्रकार (कलशमा थालीमाथि प्रतिमा राख्ने)

शुभधान्योद्भूतैरक्षुण्णैस्तण्डुलैः सहस्रसङ्ख्याकाश्चन्द्रमण्डलनिभा वेद्याः आस्तीर्णश्वेत-वस्त्रोपरि कार्याः। तासु च प्रत्येकं रौप्यमयान् कलशान् संस्थाप्य तेषां मुखेषु रौप्यमयीः स्थालीश्च संस्थाप्य षोडशमाषपरिमितेन रौप्येण प्रत्येकं निर्मिता चन्द्रबिम्बनिभाः षोडशकलायुताः प्रतिमाः स्थापयेत्।

तच्च यथा –

मध्ये तण्डुलोपरि गोदुग्धपूरितं रौप्यकलशमेकं स्थापयेत्। तस्य मुखे च रौप्यस्थाल्यां चन्द्रप्रतिमां न्यसेत्। तस्य कलशस्य (आग्नेयादि) चतुष्कोणेषु चत्वारः कलशाः स्थाप्याः । तेषु च पूर्ववच्चतस्रः स्थालीः संस्थाप्य तासु एकैकां प्रतिमां स्थापयेत्। सति सम्भवे एतेऽपि कलशा गोदुग्धेनैव पूरणीयास्तदभावे जलेन पूरणीयाः किञ्चिद् गोदुग्धं च तेषु निक्षेप्तव्यम्। ततो बहिः पूर्णचन्द्राकाराः श्वेततण्डुलमया विस्तृता ९७९ संख्याका वेदीर्निर्माय तासु च सतिसम्भवे पूर्ववत् कलशप्रतिमादिकं स्थापयेत्। तदसम्भवे ९७९ मृत्कुम्भेषु पूर्णपुटकेषु वा जलं निक्षिप्य तेषु प्रतिमास्वरूपाणि रौप्यखण्डानि द्रव्याणि वा स्थापयेत्। असम्भवे तु पूर्वोक्ताः षोडशकलशादयोऽपि मृदादिका एवोपयोक्तव्याः । ताम्रकलशप्रयोगं तु सजलदुग्धेन पूरणीयाः । ततो मध्यकलशे चन्द्रहरेः प्रतिमायां प्राणप्रतिष्ठां कुर्यात्।

प्राणप्रतिष्ठा

(फूल अक्षता लिई प्रतिमालाई छुने)

आदौ विनियोगः तद्यथा – अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषय ऋग्यजुः सामानि छन्दांसि जगत्सृष्टिः प्राणशक्तिर्देवता आं बीजम्, ह्रीं शक्तिः, क्रौं कीलकम् प्राणप्रतिष्ठापने विनियोगः ।

ततः प्राणप्रतिष्ठा – दक्षिणहस्ताङ्गुलीभिः प्रतिमां स्पृष्ट्वा इमानि मन्त्राणि पठेत् – अस्यै प्राणा प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च । अस्यै देवत्वमर्चयै मामहेति च कश्चन ॥ इति प्राणान् प्रतिष्ठाप्य न्यासं कुर्यात् । ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं चन्द्रहरेः प्राणा इह प्राणाः । ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं चन्द्रहरेः जीव इह स्थितः । ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं चन्द्रहरेः सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुः श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानीहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा । ॐ मनो जूति ... मों ३ प्रतिष्ठ ॥

ततः कलान्यासः – अनेन मन्त्रेण – ॐ भूर्भुव स्वः यमुनातीरोद्भव आत्रेय सगोत्र शुक्लवर्ण सम्पूर्णषोडशकल सोम इहागच्छ, इत्यावाह्य दक्षिणहस्ताङ्गुलिभिरेव प्रतिमां सर्वतः स्पृशन् इदं मन्त्रं पठेत् –

ॐ इमन्देवा असपत्न ꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्यायमहते जानराज्यायेन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोमी राजा सोमोस्माकं ब्राह्मणाना ꣳ राजा । । इति ।

ततः स्वशरीरशुद्धये प्रणवं च पञ्चदशवारं जपेत्। ततः षोडशोपचारेण चन्द्रहरेः पूजां कुर्यात्। सोमसूक्तेन प्रत्यृचं पुराणमन्त्रैश्च प्रतिमन्त्रम् आसनपाद्यार्घ्याचमनादिना ततो धूपदीपनैवेद्ययज्ञोपवीतताम्बूलपूगीफलवस्त्रद्रव्यमाल्यादिभिश्चन्द्रहरेः पूजां विधाय शङ्खघण्टादिवादनं कृत्वा षोडशनामभिः पुनस्तस्य पूजां कुर्यात् । तत्प्रकारो यथा –

चन्द्रहरेः पूजनम्

(पूजा गर्ने)

भो चन्द्रहरे ! इहागच्छ इहतिष्ठ यावत्पूजां करोमि तावत्त्वम् अस्यां प्रतिमायां सुस्थिरो भव । ततः सोमसूक्तस्य विनियोगः । त्वं सोम इत्यादि सोमसूक्तस्य त्रयोविंशत्यृचः गौतमऋषिर्गायत्र्युष्णिक्त्रिष्टुप्छन्दांसि सोमो देवता जपे विनियोगः । इति विनियोगं कृत्वा –

आसनम्

(आसन राख्ने)

त्वं सोम प्रचिकितो मनीषा त्वं रजिष्ठमनुनेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥
चन्द्रदेव नमस्तुभ्यं जगतां शन्तिदायक । आसनं वै मया दत्तं गृहाण रोहिणीप्रिय ॥
आसनं समर्पयामि चन्द्रहरये नमः ।

पाद्यम्

(जल चढाउने)

त्वं सोम क्रतुभिः सुक्रतुर्भू –
स्त्वं दक्षैः सुदक्षो विश्ववेदाः । त्वं वृषा वृषत्वेभिमहित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः ॥
शशाङ्क रेवतीनाथ प्राणिना तापहारक । पाद्यंगृहाण मद्दत्तं सर्वपापहरो भव ॥ पाद्यं समर्पयामि चन्द्रहरये नमः ।

अर्घ्यम्

(अर्घ्य चढाउने)

राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥
दधिगन्धजलैर्युक्तमिदमर्घ्यं पुरःस्थितम् । शशिन् आदेहि भोगार्थं मम शान्तिप्रदो भव ॥
अर्घ्यं समर्पयामि चन्द्रहरये नमः ।

आचमनीयम्

(जल चढाउने)

या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वौषधीष्वप्सु ।
तेभिर्नो विश्वैः सुमना अहेड न्राजन्त्सोम प्रति हव्या गृभाय ॥
हिमाद्रिदुहितुः शुद्धं शीतलं वारि मङ्गलम् । दत्तमाचमनार्थं वै सोमेदं प्रतिगृह्यताम् ।
आचमनीयं समर्पयामि चन्द्रहरये नमः ।

पञ्चामृतस्नानम् – तत्रादौ पयःस्नानम् –

(दुध चढाउने)

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥
देवाद्यैर्वन्दिता धेनुः सर्वपापप्रणाशिनी । तत्क्षीरस्नापितो देव नित्यं मे वरदो भव ॥
ततः – ॐ आपोऽअस्मान्निति शुद्धोदकस्नानम् ।

दधिस्नानम्

(दही चढाउने)

ॐ दधिक्राव्णोऽअकारिषं जिष्णोरस्वस्य वाजिनः । सुरभि नो मुखाकरत् प्रणऽआयूꣳषि तारिषत् ॥
कामतोऽकामतो वापि यन्मया दुष्कृतं कृतम् । तत्सर्वं विलयं यातु दधिस्नानेन सर्वदा ॥ आपोऽअस्मान् ।

घृतस्नानम्

(घ्यू चढाउने)

ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥
रसानामुत्तमं त्वाज्यं देवानां च सदा प्रियम् । तेन त्वं स्नापितो देव निधिकान्तिप्रदो भव ॥ ॐ आपोऽअस्मान् ० ।

चौरासी पूजामा हवन कुण्डसहित मण्डप तयार पार्नु पर्दछ । बीचमा १७ वटा कलश अटाउने गरी वेदी बनाउनु पर्दछ । ग्रहवेदी पनि बनाउनु पर्दछ । मातृका पूजा, आभ्युदयिक श्राद्ध, ग्रह पूजा सर्वतोभद्रमा ८४ कलश थाली राखेर सिद्धहरूको पूजा, चाँदीको १६ चन्द्रमाको पूजा, बीचमा लक्ष्मीनारायणको पूजा, सबै देवतालाई हवन, २७ नक्षत्रहरूको पूजा, वेद पाठ, पाञ्चायनपाठ, गीतापाठ, ८६ गौदान, दशदान, अष्टमहादान, गोदान, शय्यादान, गीतादान गर्नुपर्दछ । पूजा सकेर व्रतालुलाई खाटमा बसाएर सजिसजाऊ गराई गाउँघरमा परिक्रमा गराउने चलन पनि छ । परिक्रमा गराउन नसके सबै भेला भएर स्वागत गर्नुपर्दछ ।

मधुस्नानम्

(मह चढाउने)

ॐ मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥
मधु नक्तमुतोषसो मधुमत्पार्थिवꣳरजः । मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधु माँऽअस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ ॐ आपोऽअस्मान्० ।

शर्करास्नानम्

(चिनी वा सखर चढाउने)

ॐ अपाꣳरसमुद्वयसꣳसूर्ये सन्तꣳसमाहितम् । अपाꣳरसस्य यो रसस्तं वो गृह्णाम्युत्तमुपयामगृ
हीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येषते योनिरिन्द्राय त्वा जुष्टतमम् ॥
तत आपोऽअस्मान्निति शुद्धोदकस्नानं समर्पयामि चन्द्रहरये नमः ।

वस्त्रम्

(कपडा चढाउने)

गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः सुमित्रः सोम नो भव ॥
शुक्लाम्बरधरो नित्यं शुक्लवर्णच शोभन । शुक्लवस्त्रं मया दत्तं परिधेहि शुभप्रद ॥ वस्त्रं समर्पयामि चन्द्रहरये नमः ।

यज्ञोपवीतम्

(जनै चढाउने)

सोम रारन्धिनो हृदि गावो न यवसेष्वामर्यइवस्व औक्ये ।
जैवातृक निशानाथ शम्भुचूडास्थितः शुभः ।
यज्ञोपवीतं देवेश मया दत्तं गृहाण भोः ॥ यज्ञोपवीतं समर्पयामि चन्द्रहरये नमः ॥

गन्धम्

(चन्दन चढाउने)

त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा । त्वं भद्रो असि क्रतुः ॥
मलयाचलसंभूतं सुगन्धं चन्दनं शुभम् । इन्दो दत्तं मया तुभ्यं गृहीत्वा कीर्तिदो भव ॥
गन्धं समर्पयामि चन्द्रहरये नमः ।

अक्षतान्

(अक्षता चढाउने)

त्वं च सोम नो वशो जीवातुं न मरामहे । प्रियस्तोत्रो वनस्पतिः ॥
अक्षतानक्षतो भूत्वाऽऽदेहि कुमुदबान्धव । अक्षतं मे यशः कुर्याः सन्ततीश्च सदैव मे ॥
अक्षतान्समर्पयामि चन्द्रहरये नमः ।

पुष्पाणि

(फूल चढाउने)

त्वं सोम महे भगं त्वं यून ऋतायते । दक्षं दधासि जीवसे ॥
सुगन्धीनि सुपुष्पाणि विधो कालोद्भवानि च । आयच्छ गन्धवत्तेषां मम कीर्तिं प्रवर्धय ॥
पुष्पाणि मालाश्च समर्पयामि चन्द्रहरये नमः ।

धूपम्

(धूप वाल्ने)

त्वं नः सोम विश्वतो रक्षा राजन्नघायतः । न रिष्ये त्वावतः सखा ॥

धूपोऽयं कुङ्कुमैर्युक्तो गुग्गुलो वृक्षसम्भवः । सुधांशो गृह्यतामेष मया दत्तः सुसौरभः ॥

धूपं आघ्रपयामि चन्द्रहरये नमः ।

दीपम्

(वत्ती वाल्ने)

सोम यास्ते मयोभुव ऊतयः सन्ति दाशुषे । ताभिर्नोऽविता भव ॥

दीपोऽयं गोघृताक्तश्च तिमिरान्तकरः परः । शुभ्रांशो स्वीकुरुष्व त्वं ममाज्ञानहरो भव ॥

दीपं दर्शयामि चन्द्रहरये नमः ।

नैवेद्यम्

(नैवेद्य चढाउने)

इमं यज्ञमिदं वचो जुजुषाण उपागहि । सोम त्वं नो वृधे भव ॥

मोदकं शस्कुलीं पूपं संयावं कर्णसस्कुलीम् । पायसं च गृहाणत्वमोषधीश नमो नमः ॥

नैवेद्यं समर्पयामि चन्द्रहरये नमः ।

पुनराचमनीयम्

(जल चढाउने)

सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः । सुमृडीको न आविश ॥

निशापते नमस्तुभ्यं सुस्वादु शीतलं जलम् । पुनराचमनार्थं वै दत्तं ते प्रतिगृह्यताम् ॥

पुनराचमनीयं समर्पयामि चन्द्रहरये नमः ।

ताम्बूलम्

(पान चढाउने)

उरुष्याणो अभिशस्तेः सोम नि पाह्यंहसः । सखा सुशेव एधि नः ॥

खादिरादिसमायुक्तं तेजोत्साहप्रदायकम् । ताम्बूलं प्रददे तुभ्यं कलानां निधये नमः ॥

ताम्बूलं समर्पयामि चन्द्रहरये नमः ।

पुगीफलम्

(सुपारी चढाउने)

आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ।

मुखशुद्धिकरं देव पूगीफलमिदं तव । दीयते श्रद्धया मिष्टं द्विजराज नमोऽस्तु ते ॥

पूगीफलं समर्पयामि चन्द्रहरये नमः ।

द्रव्यम्

(पैसा चढाउने)

यः सोम सख्ये तव रराणद्देव मर्त्यः । तं दक्षः सचते कविः ॥

येन तुष्यन्ति राजानो भिक्षुका धनिनोऽपि वा । देवाश्च तत्प्रयच्छामि द्रव्यं चन्द्राय ते नमः ॥

द्रव्यं समर्पयामि नीराजनम्, चामरम्, व्यजनम् प्रदक्षिणा च चन्द्रहरये नमः ॥

षोडशनामभिश्चन्द्रपूजनम्

(चन्द्रमाको १६ नामले पूजा गर्ने)

एवं षोडशोपचारैश्चन्द्रहरेः पूजां विधाय पुनः षोडशनामभिश्चन्द्रपूजां कुर्यात्। तद्यथा –

१. ॐ हिमांशवे नमः।
२. ॐ सोमचन्द्राय नमः।
३. ॐ चन्द्राय नमः।
४. ॐ विधवे नमः।
५. ॐ कुमुदबन्धवे नमः।
६. ॐ सुधांशवे नमः।
७. ॐ ओषधीशाय नमः।
८. ॐ अब्जाय नमः।
९. ॐ मृगाङ्काय नमः।
१०. ॐ कलानिधये नमः।
११. ॐ नक्षत्रनाथाय नमः।
१२. ॐ शर्वरीपतये नमः।
१३. ॐ जैवातृकाय नमः।
१४. ॐ द्विजराजाय नमः।
१५. ॐ रोहिणीवल्लभाय नमः।
१६. ॐ इन्दवे नमः।

एवं नामभिः सम्पूज्य पुष्पादिकं गृहीत्वा सोमसूक्तेन एभिः पौराणमन्त्रैश्च स्तुतिं कुर्यात्।

प्रार्थना

(फूल अक्षता लिएर नमस्कार गर्ने)

आप्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः। भवानः सुश्रवस्तमः सखावृधे ॥ सं तेपयांसि समुयन्तु वाजाः। संवृष्ण्यान्यभिमातिषाहः। आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥ या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम्। गयस्फानः प्रतरणः सुवीरोऽ वीरहा प्रचरा सोम दुर्यान् ॥ सोमो धेनुꣳ सोमोऽअर्वन्तमाशुꣳसोमो वीरं कर्मण्यं ददाति। सादन्यं विदथ्य सभेयं पितृश्रवणं यो ददाशदस्मै ॥ अषाढंयुत्सु पृतनासु पप्रिं स्वर्षामप्सां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम ॥ त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः। त्वमाततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वितमो ववर्थ ॥ देवेन नो मनसा देव सोम रायो भागꣳसहसावन्नभि युध्य। मा त्वा तनदीशिष्ये वीर्यस्योभयेभ्यः प्रचिकित्सागविष्टौ।

हिमांशवे नमश्चैव सोमचन्द्राय वै नमः।
चन्द्राय विधवेनित्यं नमः कुमुदबन्धवे ॥
सुधांशवे च सोमाय ओषधीशाय वै नमः।
नमोऽब्जाय मृगाङ्काय कलानां निधये नमः ॥
नमो नक्षत्रनाथाय शर्वरीपतये नमः।
जैवातृकाय सततं द्विजराजाय वै नमः।
इन्दवे च नमस्तुभ्यं रोहिणिवल्लभाय च ॥

॥ इति ॥

इति च पठित्वा स्वाञ्जलौ गृहीतं पुष्पादिकं चन्द्रहरये समर्पयेत्। शङ्खजलनिवेदनम् – (शङ्खको जल चढाउने)
ततश्च पुष्पफलचन्दनसहितं शङ्खतोयं गृहीत्वा –
नमस्ते मासमासान्ते जायमानः पुनः पुनः। गृहाणार्घ्यं शशाङ्क त्वं रोहिण्या सहितो मम ॥
इति शङ्खतोयं चन्द्रहरये समर्पयेत्।
अन्यकलशेष्वपि चन्द्रस्य पूजनम्, लक्ष्मीनारायणपूजनम् हवनम् ब्राह्मणभोजनञ्च । तदन्तरं चतुष्कोणेषु स्थापितेषु चतुर्ष्वपि कलशेषु तथैव पूजयेत्। पूर्वोक्तेनैव विधिना षोडशष्वपि कलशेषु षोडशोपचारेण चन्द्रस्य पूजां कृत्वा अवशिष्टेष्वपि कलशेषु पर्णपुटकेषु मृत्कुम्भेषु वा तन्त्रेण चन्द्रस्य पूजां कुर्यात्। सोममन्त्रेण सहस्रसङ्ख्यका आहुतीर्जुहुयात्। सोमसूक्तं सोमोत्पत्तिं च पाठयेत्। मिष्टान्नपक्वान्नादिभिर्ब्राह्मणान् भोजयित्वा स्वयं च प्रसादीभूतं पवित्रमन्नं संभुज्य चन्द्रोत्पत्तिकथां श्रृण्वानो नियमेनैव दिनं नीत्वा रात्रौ च अधः सुप्त्वा अपरस्मिन् दिने भगवतो लक्ष्मीसहितस्य नारायणस्य पूजां कुर्यात्।

शय्यादानप्रतिज्ञा

(शय्यादान तयार गर्ने)

ततः खट्वादिकमानीय तस्योपरि शय्यामास्तीर्य तस्य समीपे वर्षभोग्यपरिमितं यथाशक्ति वान्नं द्विदल-व्यञ्जन-घृत-लवणादीनि भोग्य भोज्य-वस्तूनि पाकस्थाल्यादीनि भाण्डानि सप्तधान्यादीनि च संस्थाप्य विष्णुलक्ष्मीप्रतिमां च शय्योपरि स्थापयित्वा 'विष्णोरराट' मित्यादिभिः 'श्रीश्च ते' इत्यादिभिर्मन्त्रैर्विष्णुलक्ष्म्यौ च सम्पूज्य ब्राह्मणदम्पती च पूजयेत्। तौ च वस्त्राभूषणादिभिः सम्भूष्य शय्यासङ्ल्पं कुर्यात्। तद्यथा।

द्विजदम्पतीपूजनम् शय्यादानसंकल्पश्च

(ब्राह्मण ब्राह्मणीलाई पूजा गर्ने)

तदा पुण्यकाले सूपलिप्तायां भूयौ प्राङ्मुख उपविश्व दीपं प्रज्वाल्याचम्य हंसतूल्यादिसमायुक्तां शय्यां पूर्वारायतामास्तीर्य शिरः प्रदेशे निद्राकलशाख्यं घृतपूर्णं ताम्रकलशं निधाय पादप्रदेशे ज्वलन्तं चतुर्वीर्तियुतं दीपं संस्थाप्य अधः प्रदेशे कर्पूरादिवासितं जलकलशंसंस्थाप्य अन्यानि चोपकरणानि पार्श्वयोः संस्थाप्य शय्योपरि अग्न्युत्तारितां पञ्चामृतस्नापितां पञ्चगुञ्जाऽन्यूनसुवर्णनिर्मितां लक्ष्मीनारायणप्रतिमां संस्थाप्य यथोक्तलक्षणं ब्राह्मणमुदङ्मुखमुपवेश्य गणेशादीन् गुर्वादींश्च प्रणम्य पुष्पाञ्जलिं च तेभ्यो दत्वा अर्घस्थापनादिभूतोत्सादनान्तं कृत्वा कुशादिकमादाय – (शय्या दान प्रतिज्ञा सङ्कल्प गर्ने)

देशकालौ सङ्कीर्त्य दानकल्पोक्तफलकामः सकलपापलक्षयपूर्वकं विष्णुप्रीतिकामो वा शय्यादानमहं करिष्ये। इति प्रतिज्ञां कृत्वा शय्यादानप्रतिग्रहार्थं ब्राह्मणस्य पूजनपूर्वकं वरणं कृत्वा लक्ष्मीनारायणप्रतिमाम् 'ॐ एतन्ते' इति प्रतिष्ठाप्य पुरुषसूक्तादिना षोडशोपचारैः सम्पूज्य शय्यां च नाम मन्त्रेण सम्पूज्य 'ॐ नमः प्रमाण्यै देव्यै' इति चतुर्दिशं तां प्रदक्षिणीकुर्वन् प्रणम्य हस्ते कुशादिकमादाय – (सङ्कल्प गर्ने र दान गर्ने)

देशकालौ सङ्कीर्त्य अहं ममात्मनः स्त्रीसहस्रावृतदशवर्षसहस्रस्वर्गलोकवाससर्वसुखप्राप्तिपूर्वकइन्द्रलोकवास-अप्सरोगणसेव्यमानविमानारोहणपूर्वक आभूतसम्प्लवावधिस्वर्गवासकामः सकलपापक्षयपूर्वकपरमेश्वरप्रीतिकामो वा इमां सालदारुमयीं हंसतूलीगण्डोपधान-प्रच्छादन-पटादिवस्त्रघृतकुम्भजलकलश-ताम्बूल-कुङ्कुम-अगरु-

कर्पूरचन्दन दीपिका-पादुकोपानत्-छत्र-चामरासन-नानाविधभाजन-सप्तधान्य-सुवर्ण-रजत-भूषण-विविधभक्ष्य-भोज्यादर्श-कङ्कण-यथासम्भव-पट्ट-कौशेय-क्षौमौर्णकार्पास-वस्त्र-वाहनायुध-हैमलक्ष्मीनारायणप्रतिमायुतां शय्यां प्रजापतिदैवतां यथानामगोत्राय ब्राह्मणाय सपत्नीकायै तुभ्यमहं संप्रददे । न मम इत्युक्त्वा अञ्जलिं बद्ध्वा प्रार्थयेत् ।

प्रार्थना

(नमस्कार गर्ने)

यथा न कृष्णशयनं शून्यं सागरजातया । शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ॥
यस्मादशून्यं शयनं केशवस्य शिवस्य च । शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ।
इति पठेत् ।

(दानप्रतिष्ठा, गोदान गरी पूर्णपात्र दक्षिणा गर्ने)

ततः गोदानं कृत्वा नीराजनं प्रदक्षिणादिकं च कृत्वा पुर्णपात्रं भूयस्यादिदक्षिणाः सति सम्भवे अन्यान् षोडशकलशान् वस्त्राभूषणदक्षिणादींश्च ब्राह्मणेभ्यो दत्त्वा तदसम्भवे सवस्त्रं भूषणदक्षिणान् पूर्वपूजितानेव षोडश एकविंशतिसंख्यकान् पूर्वपूजितानेव कलशान् ब्राह्मणेभ्यो दत्त्वा मिष्टपक्वान्नादिभिर्ब्राह्मणान् भोजयित्वा स्वयं च प्रसादीभूतं पवित्रमन्नं संभुज्य नियमं च विसर्जयेत् । अत्र केचित् कुमारिकाणां पूजां च कुर्वन्ति । इति स्कन्दपुराणानुसारिणी चन्द्रसहस्रपूजापद्धतिः समाप्ता ।

चन्द्रसहस्रदर्शनविधिकथनम्

(स्कन्दपुराणमा कथा छ)

चन्द्रसहस्रदर्शनविधिश्च श्रीस्कन्दमहापुराणे द्वितीये वैष्णवखण्डे अयोध्यामाहात्म्ये व्यासागस्त्यसंवादे यथा –

चन्द्रसहस्रदर्शनव्रतकथा

(पाठ गर्ने)

श्री व्यास उवाच –

भगवान् ब्रूहि तत्त्वेन तस्य चन्द्रहरेः शुभम् । उत्पत्तिञ्च तथा चन्द्रव्रतस्योद्यापने विधिम् ॥१॥

अगस्त्य उवाच –

अयोध्यानिलयं विष्णुं नत्वा शीतांशुरुत्सुकः । आगच्छत्तीर्थमाहात्म्यं साक्षात्कर्तुं सुधानिधिः ॥
अत्रागत्य च चन्द्रोऽ थ तीर्थयात्रां चकार सः ॥२॥
क्रमेण विधिपूर्वं च नानाश्चर्यसमन्वितः । समाराध्य ततो विष्णुं तपसा दुश्चरेण वै ॥३॥
तत्प्रसादं समासाद्य स्वाभिधानपुरस्सरम् । हरिं संस्थापयामास तेन चन्द्रहरिः स्मृताः ॥४॥
वासुदेवप्रसादेन तत् स्थानं जातमद्भुतम् । तद्धि गुह्यतमं स्थानं वासुदेवस्य सुव्रत ॥५॥
सर्वेषामेव भूतानां भर्तुर्मोक्षस्य सर्वदा । अस्मिन्सिद्धाः सदा विप्र गोविन्दव्रतमास्थिताः ॥६॥
नानालिङ्गधरा नित्यं विष्णुलोकाभिकाङ्क्षिणः । अभ्यस्यन्ति परं योगं मुक्तात्मानो जितेन्द्रियाः ॥७॥
यथा धर्ममवाप्नोति अन्यत्र न तथा क्वचित् । दानं व्रतं तथा होमः सर्वमक्षयतां व्रजेत् ॥८॥
सर्वकामफलावाप्तिर्जायते प्राणिनां सदा । तस्मादत्र विधातव्यं प्राणिभिर्यत्नतः क्रमात् ॥
दानादिकं विप्रपूजा दम्पत्योश्च विशेषतः ॥९॥

सर्वयज्ञादिकफलं सर्वतीर्थावगाहनम् । सर्वदेवावलोकस्य यत्पुण्यं जायते नृणाम् ॥१०॥
तत् सर्वं जायते पुण्यं प्राणिनामस्य दर्शनात् । तस्मादेतन्महाक्षेत्रं पुराणादिषु गीयते ॥११॥
उद्यापनविधिश्चात्र नृभिर्द्विजपुरस्सरम् । अग्रे चन्द्रहरेश्चन्द्रसहस्रव्रतसंज्ञकः ॥१२॥
गतेवर्षद्वये सार्धे पञ्चपक्षे दिनद्वये । दिवसस्याष्टमे भागे पतत्येकोऽधिमासकः ॥१३॥
त्र्यधिके वा अशीत्यब्दे चतुर्मासयुते ततः । भवेच्चन्द्रसहस्रं तु तावज्जीवति यो नरः ॥
उद्यापनं प्रकर्तव्यं तेन यात्रा प्रयत्नतः ॥१४॥
यत्पुण्यं परमं प्रोक्तं सततं यज्ञयाजिनाम् । सत्यवादिषु यत्पुण्यं यत्पुण्यं हेमदायिनि ॥
तत्पुण्यं लभते विप्र सहस्राब्दस्य जीविभिः ॥१५॥ सर्वसौख्यप्रदं तादृक् पुण्यव्रतमिहोच्यते ॥१६॥
चतुर्दश्यां शुचिः स्नात्वा दन्तधावनपूर्वकम् । चरितब्रह्मचर्यस्य जितवाक्कायमानसः ।
पौर्णमास्यां तथा कृत्वा चन्द्रपूजां च कारयेत् ॥१७॥
पूर्वञ्च मातरः पूज्या गौर्यादिकक्रमेण च । ऋत्विजः पूजयेद्भक्त्या वृद्धिश्राद्धपुरः सरम् ॥१८॥
प्रयतैः प्रतिमा कार्या चन्द्रमण्डलसन्निभा । सहस्रसंख्या त्वथवा तदर्धं वा तदर्धकम् ॥
निज वित्तानुमानेन तदर्धेन तदर्धकम् ॥१९॥
ततः श्रद्धानुमानाद्वा कार्या वित्तानुमानतः । अथवा षोडश शुभा विधातव्याः प्रयत्नतः ॥२०॥
चन्द्रपूजां ततः कुर्यादागमोक्तविधानतः । माषैः षोडशभिः कार्या प्रत्येकं प्रतिमा शुभा ॥२१॥
सोममन्त्रेण होमस्तु कार्यो वित्तानुमानतः । प्रतिमास्थापनं कुर्यात्सोममन्त्रमुदीरयेत् ॥२२॥
सोमोत्पत्तिं सोमसूक्तं पाठयेच्च प्रयत्नतः । चन्द्रपूजां ततः कुर्यादागमोक्तविधानतः ॥२३॥
चन्द्रन्यासं कलान्यासं कारयेन्मण्डले जलम् । एकादशेन्द्रियन्यासं तथैव विधिपूर्वकम् ॥२४॥
चन्द्रविम्बनिभं कार्यं मण्डलं शुभ्रतण्डुलैः । मध्ये च कलशः स्थाप्यो गव्येन पयसा प्लुतः ॥२५॥
चतुरस्रेषु समपूर्णान् कलशान्स्थापयेद्बहिः । मण्डले चन्द्रपूजा च कर्तव्या नामभिः क्रमात् ॥२६॥
हिमांशवे नमश्चैव सोमचन्द्राय वै नमः । चन्द्राय विधवे नित्यं नमः कुमुदबन्धवे ॥२७॥
सुधांशवे च सोमाय औषधीशाय वै नमः । नमोऽब्जाय मृगाङ्काय कलानां निधये नमः ॥२८॥
नमो नक्षत्रनाथाय शर्वरीपतये नमः । जैवातृकाय सततं द्विजराजाय वै नमः ॥२९॥
एवं षोडशभिश्चन्द्रः स्तोतव्यो नामभिः क्रमात् ॥३०॥
ततो वै प्रयतो दद्याद्विधिमन्मन्त्रपूर्वकम् । शङ्खतोयं समादाय सपुष्पफलचन्दनम् ॥३१॥
नमस्ते मासमासान्ते जायमानः पुनः पुनः । गृहाणार्घ्यं शशाङ्कत्वं रोहिण्या सहितो नमः ॥३२॥
एवं सम्पूज्य विधिवच्छशिनं प्रणतो भवेत् । षोडशान्ये च कलशा दुग्धपूर्णाः सरत्नकाः ॥
सवस्त्राच्छादनाः शान्त्यै दातव्यास्ते द्विजन्मने ॥३३॥ अभिषेकं ततः कुर्यात्पायसेन जलेन तु ॥३४॥
ऋत्विजां मनसस्तुष्टिः कार्या वित्तानुमानतः । ब्राह्मणं भोजयेत्तत्र सकुटुम्बं विशेषतः ॥३५॥
पूजनीयौ प्रयत्नेन वस्त्रैश्च द्विजदम्पती । कर्तव्यञ्च ततो भूरिदक्षिणादानमुत्तमम् ॥३६॥
प्रतिमाश्चप्रदातव्या द्विजेभ्यो धेनुपूर्विकाः । सुवर्णं रजतं वस्त्रं तथान्नं च विशेषतः ॥
दातव्यं चन्द्रसुप्रीत्यै हर्षादेवं द्विजन्मने ॥३७॥

उपवासविधानेन दिनशेषं नयेत्सुधीः । अनन्तरे च दिवसे कुर्याद्भगवदर्चनम् ॥
बान्धवैः सह भुञ्जीत नियमञ्च विसर्जयेत् ॥३८॥
एवञ्च कुरुते चन्द्रसहस्रं व्रतमुत्तमम् । ब्राह्मघ्नोऽपि सुरापोऽपि स्तेयी च गुरुतल्पगः ॥
व्रतेनानेन शुद्धात्मा चन्द्रलोकं व्रजेन्नरः ॥३९॥
यादृशश्च भवेद्विप्र प्रियो नारायणस्य च । एवं करोति नियतं कृतकृत्यो भवेन्नरः ॥४०॥
इति श्री स्कन्दे चन्द्रहरेर्माहात्म्यवर्णने तृतीयः ।

चन्द्रपूजनम् गोगिता दानञ्च

(चन्द्रमाका ८४ नामले र ८४ नरकको नामले पूजा गरिसकेपछि चामल, श्रीखण्ड, कपुर, चाँदी, शङ्ख, सेतो वस्त्र, दही, मोती, ८६ गोदान, ८४ गीता दान गर्नुपर्दछ ।)

अथ चतुरशीतिसिद्धानां पूजनम्

ततो मङ्गलाचरणपाठं कृत्वा कर्मपात्रं विधाय दीपकलशगणेशादीनां पूजां समाप्य ब्राह्मणद्वारा–

ॐ पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीञ्जीवदानुम् ।
यामैरयंश्चन्द्रमसि स्वधाभिस्तामु धीरासोऽअनुदिश्य यजन्ते ॥

प्रोक्षणीरासादय द्विषतो वधोसि । इति मन्त्रस्य सहस्रसंख्यया जपं कारयेत् । ततो लोकपालानां पूजा मध्ये वेद्यामनन्तं कूर्मं पीठादधो धर्ममधर्मं ज्ञानमज्ञानं वैराग्यमवैराग्यमैश्वर्यमनैश्वर्य-मीशानक्रमेण पूजयित्वा महीद्यौरिति मन्त्रेण भूमिशोधनं कृत्वा धान्यमसीति मन्त्रेण धान्यं संस्थापयेत् । तत्र कलशं संस्थाप्य तस्योपरि ताम्रपात्रे चतुरशीति सुवर्णप्रतिमासु चतुरशीति सिद्धानां मनोजूतिरिति मन्त्रेण प्राणप्रतिष्ठां कृत्वा ततो सिद्धकोष्ठाद्बहिरीशानादि क्रमेण चतुष्कोणेषु सनक-सनन्दन-सनातन-सनत्कुमारान् सम्पूज्य सिद्धभद्रमालिख्य मध्यकोष्ठेषु सर्वतोभद्रमण्डलस्थदेवानां दध्यक्षतादिभिरीशानादिक्रमेण परितो दशरेखाषु पूजयेत् –

(सर्वतोभद्रमाथि धान राखेर ८४ कलशमा थालीमाथि प्रतिमा राखेको कोठामा पूजा गर्ने)

१. ॐ ऋद्ध्यै नमः ।
२. ॐ वृद्ध्यै नमः ।
३. ॐ तुष्ट्यै नमः ।
४. ॐ कान्त्यै नमः ।
५. ॐ दयायै नमः ।
६. ॐ पुष्ट्यै नमः ।
७. ॐ क्रियायै नमः ।
८. ॐ उन्नत्यै नमः ।
९. ॐ क्षान्त्यै नमः ।
१०. ॐ क्षमायै नमः ।
११. ॐ शुभ्रायै नमः ।
१२. ॐ योगायै नमः ।
१३. ॐ प्रभावत्यै नमः ।
१४. ॐ वैष्णव्यै नमः ।
१५. ॐ चान्द्रयै नमः ।
१६. ॐ सौर्यै नमः ।
१७. ॐ मोघायै नमः ।
१८. ॐ कलायै नमः ।
१९. ॐ सिद्धायै नमः ।

ततश्चतुरशीतिकोष्ठेषु सिद्धादीन् पूजयेत् । ईशानादिक्रमेण नाम मन्त्रैः –

(८४ कलशको थालीमाथिको प्रतिमामा ८४ नामले र कोष्ठका ८४ नरकको पूजा गर्ने)

(यी कोष्ठका ८४ नरक पूजा गरी ८६ गोदान गर्नुपर्दछ)

१. ॐ सिद्धाय नमः । (वह्निकुण्ड)
२. ॐ सिद्धेश्वराय नमः । (तप्तकुण्ड)
३. ॐ सिद्धसुखाय नमः । (क्षरकुण्ड)
४. ॐ सिद्धदर्शनाय नमः । (विट्कुण्ड)
५. ॐ महासिद्धाय नमः । (मूत्रकुण्ड)
६. ॐ सिद्धदेवाय नमः । (श्लेष्मकुण्ड)
७. ॐ सिद्धशास्त्राय नमः (गरकुण्ड)
८. ॐ सिद्धाचार्याय नमः । (दूषिकुण्ड)
९. ॐ ज्ञानसिद्धाय नमः । (वसाकुण्ड)
१०. ॐ सिद्धभुजे नमः । (शुक्रकुण्ड)
११. ॐ सिद्धदक्षिणाय नमः । (असृक्कुण्ड)
१२. ॐ तीर्थसिद्धाय नमः । (अश्रुकुण्ड)
१३. ॐ योगसिद्धाय नमः । (गात्रमलकुण्ड)
१४. ॐ भोगसिद्धाय नमः । (कर्णविटकुण्ड)
१५. ॐ गुणसिद्धाय नमः । (मज्जाकुण्ड)
१६. ॐ चन्द्रसिद्धाय नमः । (मांसकुण्ड)
१७. ॐ गणसिद्धाय नमः । (नक्रकुण्ड)
१८. ॐ अतिसिद्धाय नमः । (लोमकुण्ड)
१९. ॐ सिद्धसेनाय नमः । (केशकुण्ड)
२०. ॐ सिद्धघटाय नमः । (अस्थिकुण्ड)
२१. ॐ सिद्धसूर्याय नमः । (ताम्रकुण्ड)
२२. ॐ अनुसिद्धकाय नमः । (लोहकुण्ड)
२३. ॐ सिद्धकालाय नमः । (चर्मकुण्ड)
२४. ॐ सिद्धकामाय नमः । (तप्तसुराकुण्ड)
२५. ॐ सिद्धब्रह्मस्वरूपाय नमः । (तृक्ष्णकण्टककुण्ड)
२६. ॐ सिद्धकर्त्रे नमः । (विषकुण्ड)
२७. ॐ सिद्धभर्त्रे नमः । (प्रतप्तकुण्ड)
२८. ॐ सिद्धिदाय नमः । (कुन्तकुण्ड)
२९. ॐ सिद्धसाधकाय नमः । (कृमिकुण्ड)
३०. ॐ सिद्धातिगाय नमः । (पूयकुण्ड)
३१. ॐ कलासिद्धाय नमः । (सर्पकुण्ड)
३२. ॐ सर्वसिद्धाय नमः । (मशकुण्ड)
३३. ॐ प्रसिद्धकाय नमः । (दंशकुण्ड)
३४. ॐ सिद्धमानाय नमः । (गरलकुण्ड)
३५. ॐ सिद्धमानाय नमः । (वज्रदष्ट्रकुण्ड)
३६. ॐ सिद्धकल्पाय नमः । (वृश्चिककुण्ड)
३७. ॐ सिद्धामृतकलातीताय नमः । (शरकुण्ड)
३८. ॐ सिद्धपाराय नमः । (शूलकुण्ड)
३९. ॐ सिद्धज्ञाय नमः । (खड्गकुण्ड)
४०. ॐ सिद्धनायकाय नमः । (गोलाकुण्ड)
४१. ॐ सिद्धावलाय नमः । (नक्रकुण्ड)
४२. ॐ सत्सिद्धाय नमः । (काककुण्ड)
४३. ॐ सिद्धमयाय नमः । (मन्थानकुण्ड)
४४. ॐ सिद्धैकसाधनाय नमः । (वीजकुण्ड)
४५. ॐ लोकसिद्धाय नमः । (बज्रकुण्ड)
४६. ॐ यज्ञसिद्धाय नमः । (तप्तपाषाणकुण्ड)
४७. ॐ शुद्धसिद्धाय नमः । (तीक्ष्णपाषणकुण्ड)
४८. ॐ अवसिद्धाय नमः । (लालाकुण्ड)
४९. ॐ वषट्सिद्धाय नमः । (मसीकुण्ड)
५०. ॐ स्वस्तिसिद्धाय नमः । (चूर्णकुण्ड)
५१. ॐ भूतसिद्धाय नमः । (चक्रकुण्ड)
५२. ॐ धीसिद्धाय नमः । (वक्रकुण्ड)
५३. ॐ भव्यसिद्धाय नमः । (कूर्मकुण्ड)
५४. ॐ पूतसिद्धाय नमः । (ज्वालाकुण्ड)
५५. ॐ शम्भुसिद्धाय नमः । (भस्मकुण्ड)
५६. ॐ सुसिद्धकाय नमः । (दग्धकुण्ड)
५७. ॐ दक्षसिद्धाय नमः । (असिपत्रकुण्ड)
५८. ॐ रूपसिद्धाय नमः । (क्षुरधारकुण्ड)
५९. ॐ हंससिद्धाय नमः । (तप्तसूचिमुखकुण्ड)
६०. ॐ प्रसिद्धाय नमः । (गोकामुखकुण्ड)
६१. ॐ विष्णुसिद्धाय नमः । (नक्रमुखकुण्ड)
६२. ॐ मुक्तसिद्धाय नमः । (गजंमुखकुण्ड)

६३. ॐ सिद्धकसिद्धाय नमः । (गोमुखकुण्ड)
६४. ॐ सिद्धवाक् सिद्धधाम्ने नमः । (कुम्भिपाककु.)
६५. ॐ सिद्धतनवे नमः । (कालसूत्रकुण्ड)
६६. ॐ सिद्धानन्दस्वरूपाय नमः । (मत्स्यौदकु.)
६७. ॐ पुण्यसिद्धाय नमः । (कृमितन्तुसकुण्ड)
६८. ॐ भुवः सिद्धाय नमः । (पांसुभोज्यकुण्ड)
६९. ॐ स्वर्गसिद्धाय नमः । (पाशवेष्टकुण्ड)
७०. ॐ सिद्धमन्त्रालय नमः । (शूलप्रोतकुण्ड)
७१. ॐ शान्तिसिद्धाय नमः । (प्रकम्पनकुण्ड)
७२. ॐ पुरुसिद्धाय नमः । (उल्कामुखकुण्ड)
७३. ॐ हिरण्यसिद्धाय नमः । (अन्धकूपकुण्ड)
७४. ॐ वाक्सिद्धाय नमः । (वेधनकुण्ड)
७५. ॐ तत्त्वसिद्धाय नमः । (ताडनकुण्ड)
७६. ॐ अतिसिद्धाय नमः । (जालरंध्रंकुण्ड)
७७. ॐ सिद्धरत्नाय नमः । (देहचूर्णकुण्ड)
७८. ॐ सिद्धमालिने नमः । (दलनंकुण्ड)
७९. ॐ सिद्धवैकुण्ठधृषे नमः । (शोषणकुण्ड)
८०. ॐ सिद्धसेनाय नमः । (कषम्कुण्ड)
८१. ॐ सिद्धसाराय नमः । (शूर्पकुण्ड)
८२. ॐ रुद्रसिद्धाय नमः । (ज्वालामुखकुण्ड)
८३. ॐ महामहामहासिद्धाय नमः । (धूमांधंकुण्ड)
८४. ॐ चतुरशीतिसंज्ञकाय नमः । (नागवेष्टनंकु.)

बहिश्चतुष्कोणेषु सनकादिचतुरः सिद्धान् पूजयेत् । (नक्षत्रहरूको पूजा गर्ने)

ॐ सनकाय नमः । ॐ सनन्दनाय नमः । ॐ सनातनाय नमः । ॐ सनत्कुमाराय नमः । पुनश्चतुरशीति प्रतिकोष्ठेषु त्रिरावृत्या अष्टाविंशति नक्षत्राणि पूजयेत् । तानि यथाः–

१. ॐ रोहिण्यै नमः ।
२. ॐ मृगशिरसे नमः ।
३. ॐ आर्द्रायै नमः ।
४. ॐ पुनर्वसवे नमः ।
५. ॐ तिष्याय नमः ।
६. ॐ अश्लेषायै नमः ।
७. ॐ मघायै नमः ।
८. ॐ पूर्वाफाल्गुन्यै नमः ।
९. ॐ उत्तराफाल्गुन्यै नमः ।
१०. ॐ हस्ताय नमः ।
११. ॐ चित्रायै नमः ।
१२. ॐ स्वात्यै नमः ।
१३. ॐ विशाखायै नमः ।
१४. ॐ अनुराधायै नमः ।
१५. ॐ ज्येष्ठायै नमः ।
१६. ॐ मूलाय नमः ।
१७. ॐ पूर्वाषाढायै नमः ।
१८. ॐ उत्तराषाढायै नमः ।
१९. ॐ अभिजिते नमः ।
२०. ॐ श्रवणाय नमः ।
२१. ॐ धनिष्ठायै नमः ।
२२. ॐ शतभिषजे नमः ।
२३. ॐ पूर्वभाद्रपदायै नमः ।
२४. ॐ उत्तरभाद्रपदायै नमः ।
२५. ॐ रेवत्यै नमः ।
२६. ॐ अश्विन्यै नमः ।
२७. ॐ भरण्यै नमः ।
२८. ॐ कृत्तिकायै नमः ।

तत्रादौ न्यासः (न्यासविधि)

१. ॐ अर्यम्णे नमः ।
२. ॐ मित्राय नमः ।
३. ॐ वरुणाय नमः ।
४. ॐ इन्द्राय नमः ।

५. ॐ विवस्वते नमः । ६. ॐ त्वष्ट्रे नमः ।
७. ॐ विघवे नमः । ८. ॐ अंशवे नमः ।
९. ॐ भगाय नमः । १०. ॐ पूष्णे नमः ।
११. ॐ पर्जन्याय नमः । १२. ॐ धात्रे नमः ।
१३. ॐ माघवाय नमः । इति क्रमतो न्यसेत् ।

पुनः प्रतिकोष्ठेषु अष्टाविंशति नक्षत्राणि त्रिरावृत्या पूजयेत् । (पुनः नक्षत्रहरूको पूजा गर्ने)

ततो मध्यमकोष्ठे सर्वतोभद्रं संस्थाप्य प्रतिकोष्ठेषु सर्वतोभद्रस्य षट्पञ्चाशद्देवता आवाह्य पूजयेत् । क्रमतः कलशपूर्णपात्रभूतकर्णिकायां धान्यतण्डुलयोरुपरि आजिघ्रकलशमिति मन्त्रेण चित्रकलशं संस्थाप्य वरुणमावाह्य पूजयेत् । (चित्रकलशको पूजा गर्ने)

कलशोपरि षड्दलाम्रस्थाल्यां स्वर्णनिर्मितपलत्रयपरिमितचन्द्रप्रतिमायां प्राणप्रतिष्ठां कृत्वा चन्द्रपूजाविधिना पूजनञ्च कृत्वोपायनादिकं समर्प्य अर्घ्यं दत्त्वा नमस्कृत्य चन्द्रपूजां समाप्य मध्ये सुवर्णपलत्रयनिर्मितलक्ष्मीनारायणप्रतिमां संस्थाप्य प्राणप्रतिष्ठां कृत्वा न्यासं कुर्यात् –

लक्ष्मीनारायणपूजने आदौ न्यासः

(न्यास गर्ने)

ॐ विष्णवे नमः, वामकरे । ॐ माधवाय नमः, दक्षकरे । ॐ गोविन्दाय नमः, वामपादे । ॐ कृष्णाय नमः, वामजानुनि । ॐ केशवाय नमः, दक्षजानुनि । ॐ श्रीपतये नमः, वामकट्याम् । ॐ पद्मनाभाय नमः, दक्षकट्याम् । ॐ हृषीकेशाय नमः, नाभौ । ॐ वासुदेवाय नमः, हृदये । ॐ जगत्पतये नमः, वामकुक्षौ । ॐ वैकुण्ठाय नमः, दक्षकुक्षौ । ॐ पुण्डरीकाक्षाय नमः, कण्ठे । ॐ मधुसूदनाय नमः, वक्त्रे । ॐ गोपतये नमः, वामचक्षुषि । ॐ दामोदराय नमः, दक्षचक्षुषि । ॐ जगन्नाथाय नमः, शिरसि ।

षोडशोपचारेण पूजनम्

(षोडशोपचारले पूजा गर्ने)

ततः पुरुषसूक्तेन पाद्यादिभिः षोडशोपचारैः संपूज्य अङ्गपूजां कुर्यात् ।

अङ्गपूजा

(अङ्गपूजा गर्ने)

ॐ कृष्णाय नमः, पादौ पूजयामि । ॐ केशवाय नमः गुल्फौ पूजयामि । ॐ वामनाय नमः, कटिं पूजयामि । ॐ अच्युताय नमः, हृदयं पूजयामि । ॐ माधवाय नमः, कण्ठं पूजयामि । ॐ रामाय नमः, बाहू पूजयामि । ॐ नृसिंहाय नमः, मुखं पूजयामि । ॐ वराहाय नमः, नासिकां पूजयामि । ॐ विष्णवे नमः, नेत्रे पूजयामि । ॐ शार्ङ्गिणे नमः, ललाटं पूजयामि, ॐ मुरारये नमः शिरः पूजयामि । ॐ लक्ष्मीनारायणाय नमः, सर्वाङ्गं पूजयामि । इत्यङ्गपूजां विधाय धूपं दीपं नैवेद्यां च कृत्वाऽऽचमनमारार्तिकं ताम्बूलमुपायनं च दत्त्वा प्रदक्षिणां नमस्कारं कृत्वा गोदानशय्यादानं च कृत्वा षट्पञ्चाशदधिकद्विशतमुष्टि (२५६) परिमिततण्डुलयुतं सदक्षिणं पूर्णपात्रं कुर्यात् । ततो विसर्जनाभिषेकतिलकादिकं कृत्वा तत्सर्वं आचार्याय प्रतिपादयेत् । यस्यस्मृत्येत्यादि पठित्वा कर्मेश्वरार्पणं कुर्यात् ।

(अष्टमहादान, दशदान, पञ्चधेनु, शय्यादान, पूर्णपात्र, सिदा, दक्षिणा गरी विसर्जन गर्ने)

। इति चतुरशीतिपूजाविधिः ।

।। श्रीगणेशाय नमः ।।

सत्यनारायणपूजा

पञ्चगव्यप्राशनविधिः (पेज नं. ३) (पञ्चगव्य खाने)

आशन शुद्धी (पेज नं. ४) (आसन शुद्धि गर्ने)

आचमनम्ः (पेज नं. ४) (आचमन गर्ने)

कर्मपात्रनिर्माणविधिः (पेज नं. ४) (कर्मपात्र वनाउने)

सर्षाप देवयजन भूमौ विकिरेत् (पेज नं. ५) (सर्स्यूं छर्ने)

प्रतिज्ञा सङ्कल्प (पेज नं. ७) (प्रतिज्ञासङ्कल्प गर्ने)

तत्रादौ गोपूजनम् (पेज नं. ८) (गोदान गर्ने)

अर्घस्थापनम् (पेज नं. २०) (अर्घ वनाउने)

अथ ब्राह्मणवरणम् (पेज नं. २३) (वरण गर्ने)

अथ दीपकलशगणेश पूजा (पेज नं. २६–२९) (दियो, कलश, गणेश पूजा गर्ने)

ततः कलशस्कन्धप्रदेशे (पेज नं. ३०) (नवग्रह पूजा गर्ने)

पुस्तक प्रार्थना (पेज नं. ३०) (पुस्तकपूजा र प्रार्थना गर्ने)

प्रधानकलशस्थापनं पूजनञ्च (बीचको कलश पूजा गरी अष्टदल लेखिएको थाली कलशको मुखमा राख्ने)

मध्ये- धान्योपरि कलशं सस्थाप्य पूर्वोक्तकलशपूजाविधिना कलशं सम्पूज्य ततस्ताम्रस्थाल्यामष्टदलं विलिख्य कलशोपरि स्थापयेत्।

सङ्कल्प (तिल, जौ, कुश लिने)

अद्येह समस्तपापक्षयद्वारा श्रीसत्यनारायणदेवताप्रीतयेऽमुकसंक्रान्तिव्रतमहंकरिष्ये।

पीठपूजा (पूर्वदेखि क्रमैले पूजा गर्ने)

पूर्वे- ॐ विमले इहागच्छ इह तिष्ठ मम पूजां गृहाण यावत्पूजां करोमि तावत्त्वं सुस्थिरा भव इत्यावाहय पाद्यादिभिरुपचारैः पूजयेत्। इत्यनेनैव क्रमेणः आग्नये- ॐ ज्ञानरूपायै नमः। दक्षिणे- ॐ क्रियायै नमः। नैर्ऋत्यै- ॐ योगायै नमः। पश्चिमे- ॐ प्रभायै नमः। वायव्ये- ॐ सत्यायै नमः। उत्तरे- ॐ अनुग्रहायै नमः। ईशाने- ॐ ईशान्यै नमः। मध्ये- ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्म-संयोगाय योगपद्मपीठात्मने नमः। इति आवाहनादि पाद्यादिभिरुपचारैः पीठपूजां कुर्यात्।

पुनः पूर्वे- ॐ लक्ष्म्यै नमः। दक्षिणे- ॐ सरस्वत्यै नमः। पश्चिमे- ॐ आदिपुरुषाय नमः। उत्तरे- ॐ अनादि पुरुषाय नमः। आग्नये- ॐ गणपतये नमः। नैर्ऋत्ये- ॐ सूर्याय नमः। वायव्ये- ॐ अम्बिकायै नमः। ईशाने- ॐ शिवाय नमः। वायव्ये- ॐ श्रीरामाय नमः। तत्रैव- ॐ श्रीलक्ष्मणाय नमः।

दिक्पालपूजा (पूर्ववाट पृथक् पृथक् नामले पूजा गर्ने)

पूर्वदले- ॐ भो इन्द्र इहागच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव। इत्यावाहय पाद्यादिभिरुपचारैः पूजयेत्। एवं क्रमेण, आग्नयेदले- ॐ अग्नये नमः। दक्षिणदले- ॐ यमाय नमः। नैऋत्यदले- ॐ निर्ऋतये नमः। पश्चिमदले- ॐ वरुणाय नमः। वायव्यदले- ॐ वायवे नमः। उत्तरदले- ॐ कुबेराय नमः। ईशानदले- ॐ ईशानाय नमः। पूर्वेशानयोर्मध्ये- ॐ ब्रम्हणे नमः। निर्ऋतिवरुणमध्ये- ॐ अनन्ताय नमः। इति पाद्यादिभिरुपचारैः पूजयेत्।

द्वारपालपूजा (द्वारपालहरूको पूजा गर्ने)

पूर्वे- ॐ नन्दाय नमः। आग्नये- ॐ सुनन्दाय नमः। दक्षिणे- ॐ बलाय नमः। नैर्ऋत्ये- ॐ प्रबलाय नमः। पश्चिमे- ॐ जयाय नमः। वायव्ये - ॐ विजयाय नमः। उत्तरे- ॐ सुशीलाय नमः। ईशाने- ॐ पुण्यशीलाय नमः। इति आवाहनपाद्यादिभिरुपचारैः सम्पूज्य धूपदीपनैवेद्यादिकं च कुर्यात्।

प्रधानदेवतापूजा (अष्टदलको बीचमा प्रतिमा राखेर फूल अक्षता लिएर छुने)

ततः स्थालीमध्ये सुर्वणप्रतिमां संस्थाप्य तत्र रमासहितस्य श्रीसत्यनारायणस्य पूजां कुर्यात् तत्र क्रमः-

प्राणप्रतिष्ठा– (प्राणप्रतिष्ठा गर्ने)

ॐ आं ह्रीं क्रौं रमासहितस्य श्रीसत्यनारायणस्य जीवप्राणवाक्यपाणीपादपायूपस्थ सर्वेन्द्रियाणि इहागत्य यथासुखं चिरं तिष्ठन्तु नमः।

ॐ मनोजुतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ँ समिमन्दधातु।
विश्वेदेवासऽइह मादयन्तामों ३ प्रतिष्ठ॥ इति मन्त्रेणा प्राणप्रतिष्ठां कुर्यात्।

आवाहनम् (आवाहन गर्ने)

ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्॥ सभूमि ँ सर्व्वतस्पृत्त्वात्त्यतिष्ठद्दशाङ्गुलम्॥
ॐ भुर्ब्भुवः स्वः रमासहित श्रीसत्यनारायण इहागच्छ इह तिष्ठ मम पूजां गृहाण यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव॥

ध्यानम् (फूल अक्षता लिई नमस्कार गर्ने)

ॐ ध्यायेत्सत्यं गुणातीतं गुणत्रयसमन्वितम्। लोकनाथं त्रिलोकेशं कौस्तुभाभरणं हरिम्॥
सुलोचनं चतुर्वाहुं शंखचक्रगदाधरम्। किरीटिनं कुण्डलिनं वनमालाविभूषितम्॥
कङ्कणाङ्गुलिभूषाभिः केयूरैश्च विराजितम्। गोविन्दं गोकुलानन्दं ब्रह्माद्यैरभिपूजितम्॥
ध्यानं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः।

आसनम्- (कुश राख्ने)

कुशद्वयासनम् ॐ पुरुषऽएवेद ँ सर्व्वंयद्द्भूतँयच्च्वभाव्व्यम्। उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥
नानारत्नसमायुक्तं कार्तस्वरविभूषितम्। आसनं देवदेवेश गृहाण पुरुषोत्तम ॥
आसनं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ॥

पाद्यम्- (जल चढाउने)

ॐ एतावानस्यमहिमातोज्ज्यायाँश्च्चपूरुषः। पादोस्यव्विश्वाभूतानित्रिपादस्यामृतन्दिवि ॥
नानातीर्थाहृतं तोयं निर्मलं पुष्पमिश्रितम्। पाद्यं गृहाण देवेश विश्वरूप नमोऽस्तु ते ॥
पाद्यं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः।

अर्घ्यम्- (अर्घ चढाउने)

ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुन÷। ततोव्विष्व्वङ्व्यक्क्रामत्साशनानशनेऽअभि ॥
गन्धपुष्पाक्षतोपेतं दधिदुर्वासमन्वितम्। अर्घ्यं गृहाण देवेश मया दत्तं हि भक्तितः ॥
अर्घ्यं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ॥

आचमनीयम्- (जल चढाउने)

ॐ ततोव्विराडजायतव्विराजोऽअधिपुरुषः। सजातोऽअत्त्यरिच्च्यतपश्च्चादभूमिमथोपुर÷ ॥
कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम्। आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥
आचमनं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः।

मधुपर्कम्- (मह, घिउ र दही मिसाएर चढाउने)

ॐ दधि क्षौद्रमिदं शुभ्रं कपिलायाः सुगन्धिकम्। सुस्वादु मधुरं देव मधुपर्कं गृहाण भो ॥
मधुपर्कं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः।

पुनराचमनीयम्- (जल चढाउने)

ॐ शुचिर्वाप्यशुचिर्वाऽपि यस्य स्मरणमात्रतः। शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥
पुनराचमनीयं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः।

पञ्चामृतम्- (पञ्चामृतमा पहिले दुध चढाउने)

तत्रादौ पयसा- ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः पयस्वतीः प्रदिशः सन्तु महयम्।
देवाद्यैर्वन्दिता धेनुः सर्वपापप्रणाशिनी। त्वं क्षीरस्नापितो देव नित्यं शोकहरो भव ॥
पयःस्नानं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः।

शुद्धोदकेन- (शुद्ध जल चढाउने)

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। विश्व ꣳहि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि। दीक्षातपसोस्तनूरसि तान्त्वा शिवा ꣳसग्मांपरिदधे भद्रं वर्ण पुष्यन्॥

दध्ना- (दही चढाउने)

ॐ दधिक्राब्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखाकरत्प्रणऽआयु ꣳषि तारिषत्॥
पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्। दध्यर्पितं मया देव स्नानार्थं प्रतिगृह्यताम्॥
दधिस्नानं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः।

शुद्धोदकेन- (शुद्ध जल चढाउने)

ॐ आपोऽअस्मानिति... शुद्धोदकम्।
शुद्धोदकस्नानं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः।

घृतेन- (घिउ चढाउने)

ॐ घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम।
अनुष्वध-मावह मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यम्॥
रसानामुत्तमं त्वाज्यं देवानां च सदाप्रियम्। तेन त्वं स्नापितो देव मम कान्तिप्रदो भव॥
घृतस्नानं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः।

जलेन- (शुद्ध जल चढाउने)

ॐ आपोऽअस्मानिति...।
शुद्धोदकस्नानं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः।

मधुना- (मह चढाउने)

ॐ मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳरजः। मधुद्यौरस्तु नः पिता॥ मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः॥
यस्य धारणमात्रेण तृप्ति यान्ति पितामहाः। मधुना स्नापितो देव नित्यं शोकहरो भव॥
मधुस्नानं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः।

शुद्धोदकेन- (शुद्ध जल चढाउने)

ॐ आपोऽअस्मानिति....।
शुद्धोदकस्नानं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः।

शर्करया (सखर चढाउने)

ॐ अपा ँरसमुद्वयस ँसूर्ये सन्त ँसमाहितम् । अपा ँरसस्य यो रसस्तं वो गृह्णाम्युत्तममुपया मगृहीतोसीन्द्राय त्वा जुष्टङ् गृहणाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका । मलापहारिणी दिव्या स्नानाय प्रतिगृह्यताम् ।

शर्करास्नानं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

शुद्धोदकेन (शुद्ध जल चढाउने)

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्व ँहि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि । दीक्षातपसोस्तनूरसि तान्त्वा शिवा ँसग्मापरिदधे भद्रं वर्ण पुष्यन् ॥

शुद्धोदकस्नानं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

वस्त्रम् (कपडा चढाउने)

ॐ तस्माद्यज्ञात्त्सर्व्वहुतःसम्भृतम्पृषदाज्यम । पशूँस्ताँश्च्चक्रेव्वायव्व्यानारण्ण्याग्ग्राम्म्याश्च्चये ॥

पीताम्बरयुगं देव सर्वकामार्थसिद्धये । मया निवेदितं भक्त्या गृहाण जगदीश्वर ॥

वस्त्रयुग्मं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

यज्ञोपवीतम् (जनै चढाउने)

ॐ तस्माद्यज्ञात्त्सर्व्वहुतऽऋचः सामानिजज्ञिरे । छन्दा ँसिजज्ञिरेतस्माद्यजुस्तस्म्मादजायत ॥

दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात् । ब्रह्मसूत्रं सोत्तरीयं गृहाण जगदीश्वर ॥

यज्ञोपवीतं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

आभूषणादीनि (गहनाहरू चढाउने)

ॐ किरीटकुण्डलादीनि काञ्चीवलययुग्मकम् । कौस्तुभं वनमालां च भूषणानि भजस्व भो ॥

आभूषणं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

गन्धम् (चन्दन चढाउने)

ॐ तँयज्ञम्बर्हिषिप्प्रौक्षन्न्पुरुषञ्जातऽमग्ग्रतः । तेनदेवाऽअयजन्तसाद्धचाऽऋषयश्च्चये ॥

श्रीखण्डं चन्दनं दिव्यं गन्धाढचं सुमनोहरम् । विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम् ॥

श्रीखण्डचन्दनं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

तिलयवाक्षता (तिल, जौ, अक्षता चढाउने)

ॐ धान्यराजाः स्वमाङ्गल्या विष्णुप्रीतिकरा यवाः । तस्मादेषां प्रदानेन ममास्त्वविकलं फलम् ॥

पुष्पम् (विभिन्न किसिमका फूल चढाउने)

ॐ श्रीश्चते लक्ष्मीश्चपत्न्याबहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ।

इमानि पुष्पाणि मनोहराणि सुरासुराणामपि दुर्लभानि ।

कल्पद्रुमादि द्रुमजानि तानि पुष्पाञ्जलिर्मेऽस्तु सुखाय नित्यम् ॥

नानाविधानिपुष्पाणि समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

पुष्पमालाम् (माला चढाउने)

ॐ माल्यादीनि सुगन्धीनि ग्रंथितानि प्रयत्नतः । मयाहृतानि पूजार्थं गृहण परमेश्वरः ॥

पुस्पमालाम् समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

सिन्दूरादि सौभाग्यद्रव्याणि (सिन्दूर र सौभाग्य चढाउने)

सिन्दूरं च वरं रम्यं भाले शोभाविवर्धनम्। पूरणं भूषणानाञ्च सिन्दूरं प्रतिगृह्यताम् ॥

दिव्यरत्नसमायुक्ता वह्निभानुसमप्रभाः । गात्राणि शोभयिष्यन्ति ह्यलङ्काराः सुरेश्वरि ॥

सौभाग्यद्रव्याणि समर्पयामि श्रीरमायैः नमः ॥

अङ्गपूजा (चन्दन, अक्षता र फूलले पूजा गरिरहने)

ॐ विष्णवे नमः पादौ पूजयामि । ॐ नारायणाय नमः । जंघे पूजयामि । ॐ केशवाय नमः गुल्फौ पूजयामि । ॐ रामाय नमः । जानुनी पूजयामि । ॐ कृष्णाय नमः मेढ्रं पूजयामि । ॐ नृसिंहाय नमः । नाभिं पूजयामि । ॐ दामोदराय नमः । हृदयं पूजयामि । ॐ जनार्दनाय नमः कण्ठं पूजयामि । ॐ श्रीधराय नमः बाहू पूजायामि । ॐ वाचस्पतये नमः मुखं पूजयामि । ॐ जगन्नाथाय नमः ललाटं पूजयामि । ॐ सर्वात्मने नमः शिरः पूजयामि । ॐ सत्यनारायणाय नमः सर्वाङ्गं पूजयामि ।

तुलसीपत्राणि (तुलसीपत्र चढाउने)

तुलसीं रत्नरूपां च हेमरूपां च मञ्जरीम्। भवमोक्षप्रदां नित्यमर्पयामि हरिप्रियाम् ॥

तुलसीपत्रं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

धूप (धूप बालेर घुमाउने)

ॐ ब्राह्मणोस्यमुखमासीद्द्बाहूराजन्न्य÷कृतः । ऊरूतदस्ययद्वैश्श्य÷पद्भ्या ँ शूद्द्रोऽअजायत ॥

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

धूपमाघ्रापयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

दीप (बत्ती बालेर देखाउने र घुमाउने)

ॐ चन्द्रमामानसोजातश्च्चक्क्षोःसूर्योऽअजायत । श्रोत्राद्द्वायुश्च्चप्प्राणश्च्चमुखादग्निरजायत ॥

घृतवर्ति- समायुक्तं वन्हिना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥

दीपं दर्शयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

नैवेद्यम् (नैवेद्य चढाउने)

ॐ नाब्म्याऽआसीदन्तरिक्ष ँ शीर्ष्णोद्द्यौःसमवर्त्तत । पद्द्भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालोकाँ ऽअकल्पयन् ॥

नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु । ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥

नैवेद्यं समर्पयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः ॥

फलं नैवेद्यम् (फलफूल चढाउने)

रसयुक्तानि स्वादूनि यथाकालोद्भवानि च । मयानीतानि देवेश फलानि प्रतिगृह्यताम् ॥

फलादिनैवेद्यं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

अपूपम् (अपुङ्गो (अपूपम्) चढाउने)

ॐ त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पितम् । गृहाण सुमुखोभूत्वा प्रसीद परमेश्वर ॥

रम्भाफलं घृतं क्षीरं गोधूमस्य च चूर्णकम् । जातीपत्रलवङ्गैलाशर्करागुडमिश्रितम् ॥

सपादं सर्वभक्ष्याणि चैकीकृत्य निवेदितं । मया श्रद्धावता देव गृहाण जगदीश्वर ॥

अपूपं समर्पयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः ।

आचमनीयम् (जल चढाउने)

ॐ यत्त्पुरुषेणहविषादेवायज्ञमतन्न्वत । व्वसन्तोऽस्यासीदाज्ज्यङ्ग्रीष्म्मऽइद्ध्मःशरद्धविः ॥

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् । आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥

आचमनीयं समर्पयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः ।

चन्दनादिकरोद्धर्तनम् (कपुर मिसाएको जल चढाउने)

ॐ श्रीखण्डं कुङ्कुमं चैव कर्पूरागरुमिश्रितम् । करोद्वर्तनकं देव गृहाण परमेश्वर ॥

करोद्वर्तनकं समर्पयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः ।

नारिकेलादिफलम् (नरिवल चढाउने)

ॐ इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

नारिकेलादिफलं समर्पयामि श्रीरमासहिताय सत्यनारायणाय नमः ।

ताम्बूलम् (पान मसला चढाउने)

ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । एलाचूर्णादिसहितं ताम्बूलं प्रतिगृह्यताम् ।

ताम्बूलं समर्पयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः ।

दक्षिणा (द्रव्य भेटी चढाउने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

दक्षिणां समर्पयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः ।

चामरम् (चामर डोलाउने)

ॐ शशाङ्ककरसंकाशं हिमडिंडिरपाण्डूरम् । प्रोत्सारयासु दुरितं चामरामरवल्लभ ॥

चामरं दोलयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः ।

व्यजनम् (पङ्खा डोलाउने)

ॐ शिखिपुङ्खसमायुक्तं शैत्यमानन्ददायकम् । व्यजनं दोलयामित्वामतः शान्तिं प्रयच्छ मे ॥

व्यजनं दोलयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः ।

आदर्शम् (ऐना देखाउने)

ॐ दर्शनेन त्वमादर्श नूनं मङ्गलदायकः । शौर्यसौभाग्यसत्कीर्तिर्निर्मलज्ञानदो भव ॥

आदर्शं दर्शयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः ।

ततो यथाशक्ति जपं कुर्यात् । (जप गर्ने)

नीराजनम् (नीराजन बत्ती बालेर आरती गर्ने)

ॐ पञ्चवर्तिसमायुक्तं घृतेन ज्वलितं मया । आरार्तिकप्रदानेन सन्तुष्टो भव सर्वदा ॥

चन्द्रादित्यौ च धरणीविद्युदग्निस्तथैव च । त्वमेव सर्वज्योतींषि तेन नीराजयाम्यहम् ॥

नीराजनं दर्शयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः ।

कर्पूरदीपम् (कपुर दीप बालेर घुमाउने)

सूर्येन्दुतारकावह्निस्तेजः पुञ्जविराजितम् । कर्पूरदीपं देवेश गृहाण पुरुषोत्तम ॥

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा । अग्निर्वर्चोज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ॥ ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥

अथ चामराडोलनम् (आरतीपछि चामर डोलाउने)

ॐ अविनयमपनय विष्णो-र्दमय मनः शमय विषयमृगतृष्णाम् । भूतदयां वस्तारय-तारय संसारसागरतः ॥

दिव्यधुनिमकरन्दे परिमल-परिभोग-सच्चिदानन्दे । श्रीपतिपदारविन्दे-भवभयखेदच्छिदे वन्दे ॥

सत्यविभेदापगमे नाथ तवाहं-न मामकी नस्त्वम् । सामुद्रो हि तरङ्गः क्वचन-समुद्रो नहि तारङ्गः ॥

उद्यृतनगनगभिदनुजदनुज-कुलामित्र-मित्रशशिदृष्टे । वृष्टेभवति प्रभवति न भवति-किं भवतिरस्कारः ॥

मत्स्यादिभिरवतारैरवतावता-रवता सदा वसुधाम् । परमेश्वर परिपाल्यो भवता-भवतापभीतोऽहम् ॥

दामोदरगुणमन्दिर सुन्दर-वदनारविन्द-गोविन्द । भवजलधिमथनमन्दर-परमंदरमपनय त्वं मे ॥
नारायण करुणामय शरणं-करबाणि तावकौ चरणौं । इति षट्पदीमदीये-वदनसरोजे सदा वसतु ॥

पुष्पाञ्जलि (फूल लिएर नमस्कार गर्ने)

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
तेह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥
ॐ नमो भगवते तुभ्यं सत्यनारायणाय ते । नमस्ते विश्वरूपाय शङ्खचक्रगदाभृते ॥
पद्मनाभाय देवाय हृषीकपतये नमः । नमस्तेऽनन्तरूपाय त्रिगुणात्मविभाविने ॥
लक्ष्मीकान्ताय देवाय जगदानन्दकारिणे । सहस्रशिरसे तुभ्यं वाग्विभूतिकृते नमः ॥

प्रदक्षिणा (उठेर घुम्ने)

ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषं पशुम् ॥
यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥

नमस्कार (फूल अक्षता लिएर नमस्कार गर्ने)

सत्यनारायणं देवं वन्देऽहं कामदं विभुम् । लीलया विततं विश्वं येन तस्मै नमो नमः ॥
प्रणामामि सदा सत्यं सत्यनारायणं गुरुम् ।

बद्धाञ्जलिः पठेत् (नमस्कार गर्ने)

अमोघं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् । हृषीकेश जगन्नाथं वागीशं वरदायकम् ॥
योगेश्वरं गुणातीतं गोविन्दं गरुडध्वजम् । जनार्दनं व्रजानन्दं श्रीवल्लभमधीश्वरम् ॥
सत्यनारायणं देवं वन्देऽहं कामदं विभुम् । लीलया रचितं विश्वं येन तस्मै नमो नमः ॥
प्रणमामि सदा सत्यं सत्यनारायणं परम् । दुर्गमे विषमे घोरे शत्रुभिः परिपीडिते ॥
विविधापत्सु घोरेषु दुःखेष्वपि च यद्भयम् । विनाशाय सदादेव तत्सर्वमुपसर्गकम् ॥
त्वन्मायामोहिताः सर्वे ब्रह्माद्यास्त्रिदिवौकसः । न जानन्ति गुणं रूपं तवाश्चर्यमिदं प्रभो !
मूढोऽहं त्वां कथं जाने मोहितस्तव मायया ॥ प्रसीद पूजितो भक्त्या यथाविभवविस्तरैः ।
पुत्रं वित्तं च मच्चित्तं पाहि मां शरणागतम् ॥ शरणं तं प्रपद्येऽहं सर्वकामार्थसिद्धये ।
प्रणमामि सदा सत्यं देवं नारायणं गुरुम् ॥

वेशेषार्घ्यं दद्यात् (अर्घ्य दिने)

ॐ जातो दैत्यवधार्थाय देवानां पालनाय च । तस्मै देवाय सत्याय सगुणाय महात्मने ॥
व्यक्ताव्यक्तस्वरूपाय हृषीकपतये नमः । गृहाणार्घ्यं मया दत्तं रमया सहित प्रभो ॥

(घोप्टो गरी पूजा गरेर उत्तानो गरी जल राख्ने चलन छ)

क्षमापनम् (क्षमा माग्ने)

ॐ त्राहि मां सर्वग श्रीश हरे संसारसागरात्। पुष्कराक्ष निमग्नोऽहं मायाविज्ञानमत्सरात्॥
त्राहि मां देवदेवेश त्वत्तो नास्तीह रक्षिता।

इत्यर्घ्यं निवेद्य शङ्खजलं निवेदयेत् (शङ्खको जल चढाउने)

ॐ यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलम्। निवेदितं च नैवेद्यं गृहाण चानुकम्पया॥
मन्त्रहीनं क्रियाहीनं विधिहीनं सुरेश्वर। यत्पूजितं मयादेव परिपूर्णं तदस्तु मे॥
साधु वासाधु वा कर्म यद्यदाचरितं मया। तत्सर्वं क्षम्यतां देव गृहाण परमेश्वर॥

(घोप्टो गरी पूजा गर्ने, शङ्खलाई उत्तानो गरी जल राख्ने र पूजा गर्ने)

इत्यर्घ्यं पराङ्मुखं कुत्वा- ॐ अर्घ्यपात्राय नमः। ॐ शंखपात्राय नमः। इति पूजनम्।
ततो ब्राह्मणद्वारा कथां शृणुयात। कथाश्रवणानन्तरं पूर्णपात्रं कुर्यात्- (फलयज्ञोपवीत- वस्त्रादिद्रव्यसमेतं तण्डुलपूर्णपात्रं हस्तेनादाय सङ्कल्पं कुर्यात्)। (पूर्णपात्र पूजा गर्ने र दान गर्ने)

अद्येत्यादि देशकालौ समुच्चार्य... मम कृतैतत् दीपकलशगणेशपूजनपूर्वकं साङ्गसपरिवार-रमासहित श्रीसत्यनारायणपूजनकर्मणः परिपूरणार्थ-मिदं पूर्णपात्रं प्रजापतिदैवतं ... गोत्राय... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे।

दक्षिणासङ्कल्पः (दक्षिणा सङ्कल्प गर्ने र दिने)

हरिः ॐ तत्सदित्यादि देशकालौ संस्मृत्य मम श्रुतिस्मृतिपुराणोक्त फलावाप्तिपूर्वक-मनोवाञ्छासिद्धयर्थं सत्यनारायणव्रताङ्गत्वेन कृतस्य दीपकलशगणेशगण-पत्यादिवनस्पत्यन्त देवतापूजनपूर्वकसाङ्गपरिवाररमा- सहित श्री सत्यनारायणपूजनकर्मणः प्रतिष्ठासाङ्गतासिद्धयर्थमिमां दक्षिणां रौप्यं चन्द्रदैवतं... गोत्राय.... नाम शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे। (ब्राह्मणलाई दक्षिणा दिने)

विसर्जनम् (विसर्जन गर्दा पूजा गर्ने)

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम्। इष्टकामप्रसिद्धयर्थं पुनरागमनाय च॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर। यत्र ब्रह्मादयो देवास्तत्र गच्छ सुरेश्वर॥
आवाहनं न जानामि न जानामि विसर्जनम्। पूजां चैव न जानामि त्वं गतिः परमेश्वर॥

कर्मेश्वरार्पणम् (कुशको औँठी र अन्य कुश लिएर जल लिने)

ॐ कायेन वाचा मनसैन्द्रियैर्वा बुद्धयात्मना वानुसृतः स्वभावात्।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत्॥

प्रार्थना (नमस्कार गर्ने)

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥
ॐ अच्युताय नमः ३ । कर्मेश्वरार्पणमस्तु ॥

अभिषेक (अभिषेक गर्ने)

ॐ द्यौः शान्ति... । तच्चक्षुर्देवहितम्... । ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवा... ।
इत्यादि मन्त्रैरभिषेकं कुर्यात् ।

प्रसादवितरणम् (प्रसाद लिई भन्ने)

यजमान अपूपपुष्पादि हस्तेनादाय मन्त्रं पठेत्
बलिर्विभीषणो भीष्मः प्रल्हादो नारदो ध्रुवः । कपिलशचान्तरिक्षश्च वसुर्वायुसुतस्तथा ॥
विश्वक्सेनोद्धवाक्रूरसनकाद्या महर्षयः । वासुदेवप्रसादोऽयं सर्वे गृह्णन्तु वैष्णवाः ॥
इति मन्त्रोच्चारणपूर्वक विष्णुभक्तेभ्यः प्रसादादिक समर्पयेत् ।

यजमानाय प्रसादवितरणम्- (प्रसाद लगाइदिने र वितरण गर्ने)

आशिषमन्त्रपठनपूर्वकं प्रसादवितरणं कुर्यात्-
ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते । धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

॥ इति सत्यनारायणपूजाविधः ॥

नागपूजाविधिः

नागप्रार्थना (नागपञ्चमीमा ढोकामाथि गोबरले टाँसेर दही, दूबो, कुश, सिन्दूर, चन्दन आदिले नागपूजा गरेर प्रार्थना गर्ने)

आस्तिकस्य मुनेर्मातर्जगदानन्दकारिण ।
एह्येहि मनसे देवी ! नागमातर्नमोऽस्तु ते ॥
अगस्त्यश्च पुलस्त्यश्च वैशम्पायन एव च ।
सुमन्तुर्जैमिनीश्चैव पञ्चैते वज्रवारकाः ॥
मुनेः कल्याणमित्रस्य जैमिनेश्चाति कीर्तनात् ।
विद्युदग्निभयं नास्ति लिखितं गृहमण्डले ॥
अनन्तो वासुकि पद्म महापद्मश्च तक्षकः ।
कुलीर कर्कटः शंखश्चाष्टौ नागाः प्रकीर्तिताः ॥



।। श्रीगणेशाय नमः ।।

जन्मोत्सवविधिः

अथ प्रयोग– (पूर्व फर्किएर वस्ने)

तत्र कर्ता सर्वौषधिस्नानपूर्वकं स्नात्वा कृतनित्यक्रियः शुचिराचान्तः प्राङ्मुख उदङ्मुखो वा उपविश्य सङ्कल्पं कुर्यात्। तद्यथा-

प्रतिज्ञा सङ्कल्प

(जल कुश लिई प्रतिज्ञा सङ्कल्प गर्ने)

ॐ अद्येत्यादि देशकालादीन् सङ्कीर्त्य अमुकगोत्रस्य मम जन्मदिवसे वर्षवृद्धौ जन्मोत्सवकर्मणि दीर्घायुरारोग्यैश्वर्योदयाद्यभिवृद्धयर्थं दीपकलशगणेशपूजनपूर्वकं मार्कण्डेयाद्यष्टचिरञ्जीविनां महाषष्ठिकायाश्च यथासम्पादितोपचारैः पूजनमहङ्करिष्ये। इति सङ्कल्प्य ब्राह्मणवरणं पुण्याहवाचनं च विधाय दीपकलशगणेशान् यथाविधि सम्पूजयेत्। (ब्राह्मणवरण गरी पुण्याहवाचन गर्ने र दीप, कलश, गणेशको पूजा गर्ने)

तत्र मङ्गलाभिधानकलशे गुरुं, नारायणदेवं, अग्निं, प्रजापतिम्, पितॄन् स्वस्वनाममन्त्रैश्चतुर्थ्यन्तपदैः पूजयेत्। ततः कलशसमीपे पीठीकोपरि तण्डुलोपरि वा वस्त्रमास्तीर्य स्थाल्यां अष्टदलपद्मं लिखित्वा तदुपरि संस्थाप्य अष्टदले पूगीफलं तण्डुलपुञ्जं वा विन्यस्य पूर्वादिक्रमेण पूजयेत्। (बीचमा कलशमाथि थाली राखी फूल, अक्षता आदिले पूजा गर्ने)

अष्टचिरञ्जीवीदेवानां पूजनम्

तद्यथा- (अष्टचिरञ्जीवीहरूको पूजा गर्ने)

पूर्वे- मार्कण्डेयम् आवाहयामि, स्थापयामि, पूजयामि। भो मार्कण्डेय ! इहागच्छ, इहतिष्ठ मम पूजां गृहाण इत्यावाह्य आसनम्, पाद्यम्, अर्घ्यम्, आचमनीयम् स्नानीयम्, पञ्चामृतम्, पुनराचमनीयम्, चन्दनम्, अक्षतान्, पुष्पाणि समर्पयामि मार्कण्डेयाय नमः। एवम्, आग्नेयदले-व्यासम्, दक्षिणे-परशुरामम्, नैऋत्ये-द्रौणिम् (अश्वत्थाम्ने नमः), पश्चिमे-कृपाचार्यम्, वायव्ये-बलिम्, उत्तरे-हनूमन्तम्, ईशाने-विभीषणम्, मध्ये-षष्ठिकां च स्थापयित्वा पूजयेत्। तत्समीपे स्वजन्मसंवत्सरं, स्वजन्ममासं, स्वनक्षत्रम्, स्वतिथिं, राशिं, बारम्, योगकरणादिंश्चस्वस्वनामभिः चतुर्थ्यन्तपदैरर्चयेत्। ततो वस्त्रम्, यज्ञोपवीतम्, आभूषणम्, गन्धम्, मालामं, सिन्दूरं, सौभाग्यद्रव्यं, धूपम्, दीपं, नैवेद्यं नारिकेलादिफलम्, ताम्बूलम्, कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यं दक्षिणां च समर्पयेत्। (सबै थोक चढाई धूप, दीप गरी नैवेद्य चढाउने)

षष्ठिकायै दधिभक्तदानम्

(दही र चिउरा चढाउने)

ततः षष्ठिकायै दधिभक्तबलिं दद्यात्। तद्यथा- ममायुरारोग्यवृद्धये षष्ठिकायै मात्रे एष दधिभक्तबलिस्तुभ्यं नमः।

पोटलिका-निर्माणम् (पहेँलो कपडामा जौ, दुबो, सर्स्यूं, कुमकुम, गोरोचन, निमपत्ता राखेर पूजा गरी बुटीजस्तो बनाउने)

ततः पीतवस्त्रे गुग्गुलं, निम्बं, सिद्धार्थं, दूर्वागोरोचनादिकञ्च संस्थाप्य तत्र गणेशं, भास्करं च पूजयेत्। ततो मार्कण्डेयाय गुडतिलमिश्रं दुग्धं समर्प्य क्रमेणाष्टचिरजीविनः प्रार्थयेत्। (गुड, तिल, दुध चढाउने)

अष्टचिरजीविनां प्रार्थना

(फूल, अक्षता लिई प्रार्थना गर्ने)

मार्कण्डेयस्य

ॐ शरदिन्दुनिभं शान्तं द्विभुजं तं वरप्रदम्। छत्राभयकरं ध्याये मार्कण्डेयं महामुनिम्॥
वटवृक्षसमारूढं सच्छत्रं ब्रह्मचिन्तकम्। ऋषिवृन्दशतैस्तुत्यं मार्कण्डेय नमाम्यहम्॥

व्यासस्य

ॐ सर्वशास्त्रार्थतत्वज्ञं वेदवेदाङ्गपारगम्। शास्त्रमूलप्रवक्तारं पराशरसुतं भजे॥

परशुरामस्य

ॐ कार्तवीर्यस्यहन्तारं परशुहस्तं महाबलभ्। एकविंशतिनिः क्षत्रं कुर्वन्तं त्वां नमाम्यहम्॥

अश्वत्थाम्न (द्रौणिम्)

ॐ शयामवर्णं महातेजः खड्गपाणिं वरप्रदम्। अश्वत्थामानमाचार्यं ध्याये द्रोणसुतं शिवम्॥
ब्राह्मणाय नमस्तुभ्यं द्रोणाचार्यसुताय वै। वेदवेदाङ्गपूर्णाय अश्वत्थाम्ने नमो नमः॥

कृपस्य

ॐ धनुर्बाणधरं वीरं श्वेतपीतद्युतिं परम्। भारद्वाजकुलोत्पन्नं कृपं ध्याये मलापहम्॥
राजर्षभ नमस्तुभ्यं भारद्वाजकुलोद्भव। कृपाचार्य सदा तुष्ट धीरवीरपराक्रम॥

बले

ॐ दैत्येन्द्रकुलसम्भूत दानयज्ञक्रियारत। प्रपन्नः शरणं त्वाहं दीर्घमायुः प्रयच्छ मे॥
भूमिं स्वर्गं च पातालं येन दत्तं द्विजन्मने। भविता यो ऽमरावत्यां महेन्द्रस्तं नमाम्यहम्॥

हनूमत

ॐ वायुपुत्रं महावीरं रक्तवर्णं त्रिलोचनम्। कन्दमूलफलप्रीतं हनूमन्तं नमाम्यहम्॥
अञ्जनीगर्भसम्भूतं हनूमन्तं नमाम्यहम्। कपीशमक्षहन्तारं बन्दे लङ्काभयङ्करम्॥

विभीषणस्य

ॐ लङ्कावास नमस्तुभ्यं पौलस्त्यकुलसम्भव। राक्षसाधिपते देव नमस्तेऽस्तु विभीषण॥

षष्ठिकायाः प्रार्थना

(फूल अक्षता लिएर नमस्कार गर्ने)

ॐ जगन्मातर्जगद्धात्रि जगदानन्दकारिणि। प्रसीद मम कल्याणि नमोऽस्तु षष्ठिदेवते॥

रुपं देहि यशो देहि भद्रं कल्याणि देहि मे । पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे ॥

कार्तिकेयस्य पूजनं प्रार्थना च

(फूल अक्षताले पूजा गरेर नमस्कार गर्ने)

ततः कार्तिकेयं सम्पूज्य प्रार्थयेत्-

ॐ कार्तिकेय महाबाहो गौरीहृदयनन्दन । स्कन्द मां रक्ष सर्वत्र एहि देव नमोऽस्तु ते ॥

ततो होमकरणपक्षे - अग्निस्थापनविधिना होमं कुर्यात् । (हवन गर्ने हुँदा अग्निस्थापना अनुसार गर्ने)

ततो हस्ते गन्धपुष्पादिकमादाय मार्कण्डेयस्य प्रार्थना कुर्यात् ।

मार्कण्डेय प्रार्थना

(फूल अक्षता लिएर नमस्कार गर्ने)

तद्यथा-

ॐ मार्कण्डेयाय मुनये नमस्ते महदायुषे । चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ॥
रूपवान् वित्तवांश्चैव श्रियायुक्तश्च सर्वदा । मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ॥
आयुरारोग्यसिद्धयर्थं प्रसीद भगवन्मुने । नराणामायुरारोग्यैश्वर्यसौख्यसुखप्रद ॥
सौम्यमूर्ते नमस्तुभ्यं भृगुवंशधराय च । महातपो मुनिश्रेष्ठ सप्तकल्पान्तजीवन ॥
मार्कण्डेय नमस्तुभ्यं दीर्घायुष्यं प्रयच्छ मे । मार्कण्डेय महाभाग प्रार्थये त्वां कृताञ्जलिः ॥
चिरजीवि यथा त्वं तु मुनीनां प्रवर द्विज । कुरुष्व मुनिशार्दूल तथा मां चिरजीविनम् ॥

मन्त्रपाठपूर्वकं पोटलिकाबन्धनम्

(पोटलिकावन्धन गर्ने)

ततः

ॐ मार्कण्डेयमहाभाग आयुरारोग्यदायक । शुभदौ विघ्नहर्तारौ भानुर्विघ्नेश एव तु ॥
धारयामि भुजे दक्षे मम कल्याणहेतवे । पूरयध्वं सदास्माकं कामनाँश्च मनोरथान् ॥
इति मन्त्रं पठित्वा पोटलिकां दक्षहस्ते धारयेत् ।

पयः पानम्-

(दुध र तिल पान गराउने)

ततः

ॐ सतिलं गुडसंमिश्रमञ्जल्यर्धमिदं पयः । मार्कण्डेयाद्वरं लब्ध्वा पिबाम्यायुर्विवृद्धये ॥
इति पठित्वा तिलगुडमिश्रं पयः पिबेत् ।

पूर्णपात्रादिदानम् विसर्जनञ्च

(पूर्णपात्र दक्षिणा दान गरी विसर्जन गर्ने)

ततः पूर्णपात्रं, ब्राह्मणेभ्यो दक्षिणां च दत्त्वा यान्तुदेवेति देवान् विसृज्य, कायेन वाचेति कर्मेश्वरार्पणं कृत्वा कर्म समापयेत् ।

॥ इति जन्मोत्सवविधिः ॥

।। श्रीगणेशाय नमः ।।

श्रीस्वस्थानीव्रतपूजाविधिः

अथ प्रयोग

(गोदान गरी दियो, कलश, गणेश पूजा गर्ने)

कृतनित्यक्रिया व्रतकर्त्री हस्तौ पादौ प्रक्षाल्य गोमयोपलिप्ते शुचौ देशे पीठाद्यासनमुपकल्प्य तत्र पूर्वाभिमुखी उपविश्याऽऽचम्य दीपं प्रज्वाल्य – इति मन्त्रेणा सर्षपान् विकीर्य कर्मपात्रं निर्माय ॐ अपवित्रः पवित्रो वा इति कर्मपात्रस्थजलेनाऽऽत्मानं पूजासामग्रीं च सम्प्रोक्ष्य प्रायश्चित्तगोदानं कुर्यात्। ततो हस्ते कुशादिकमादाय पूजासामग्रीं हस्ते कृत्वा प्रतिज्ञासङ्कल्पं कुर्यात्।

(स्वस्तिवाचन, पुण्याहवाचन गर्ने)

प्रतिज्ञासङ्कल्प

(कुश, जल लिएर प्रतिज्ञासङ्कल्प गर्ने)

हरिः ॐ तत्सदित्यादि ... ... गोत्रा ... ... देवि अहं कायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञातसकलपापक्षयपूर्वकं श्रुतिस्मृतिपुराणागमोक्तफलावाप्तये आध्यात्मिकाधिदैविकाधिभौतिकत्रिविधतापोपशमनार्थं दुःखदारिद्र्यदुःस्वप्नदुग्रहदुरितोपशमनपुर्वकम्, आधिव्याधिभयशोकादिविघ्नोपसर्गादिजनितपीडा निवृत्यर्थं श्रीस्वस्थानी-देवीवरप्रसादसिद्धिद्वारा पुत्रपौत्रधनधान्यायुरारोग्यादिनानाविधसुखसौभाग्यसमृद्ध्यर्थं श्रीसदाशिवसायुज्यमुक्तिपदप्राप्त्यर्थं दीपकलशगणेश–पूजनपूर्वकं सदाशिवसहितायाः श्रीस्वस्थानीदेव्या यथालब्धोपचारैः पूजनं करिष्ये। इति।

प्रधानदेवतापूजा

तत्रादौ न्यास-

(न्यास गर्ने र प्रधान देवता पूजा गर्ने)

ॐ देवीवरकामिन्यै नमः, हृदयाय नमः। ॐ मित्रबन्धनमदनायै नमः, शिरसे स्वाहा। ॐ त्रैलोक्यचिन्तामण्यै नमः, शिखायै वषट्। ॐ दिगम्बरधरणीधारिण्यै नमः। ॐ कवचाय हुम्। ॐ चण्डमुण्डप्रमथिन्यै नमः। ॐ नेत्रत्रयाय वौषट्। ॐ स्वस्थान्यै नमः। ॐ अस्त्राय फट्। इति षडङ्गन्यासः। (बालुवाको शिवलिङ्ग बनाउने)

प्राणप्रतिष्ठा

(फूल अक्षता लिएर छुने)

ॐ सदाशिवसहितायाः श्रीस्वस्थानीदेव्याः जीवप्राणेन्द्रियाणि इहागत्य यथासुखं चिरं तिष्ठन्तु स्वाहा। ॐ एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे। तेन यज्ञमव तेन यज्ञप्पतिन्तेन मामव॥ ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमन्दधातु। विश्वे देवासऽइह मादयन्तामों ३ प्रतिष्ठ॥ इति प्राणान्प्रतिष्ठाय।

ध्यानम्

(ध्यान गर्ने)

ॐ सुवर्णवर्णदीप्ताभां त्रिनेत्रां कमलासनाम्। सिंहासनसमासीनां सर्वालङ्कारभूषिताम्॥
नीलोत्पलाभयां वामे दक्षिणे वरदाभयाम्। खड्गचर्मधरां चोर्ध्वं वामदक्षिणयोः क्रमात्॥

चतुर्भुजां च मां तत्र पूजयेद्वृषकेतनम्। एवं ध्यायेन्महादेवीं स्वस्थानीं जगदीश्वरीम्॥

ध्यानं समर्पयामि सदाशिवसहितायै श्रीस्वस्थानी देव्यै नमः। इति ध्यात्वा- ततोऽर्घ्यस्थापनविधिनाऽर्घ्यं संस्थाप्य-

अर्घ्यस्थापनम्

(अर्घ्य पूजा गर्ने)

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वती। नर्मदे सिन्धो काबेरी जलेऽस्मिन् सन्निधिं कुरु॥

इत्यङ्कुशमुद्रया तीर्थानावाह्य गन्धादिभिः सम्पूज्य ताम्रादिनिर्मिते स्मिश्चित्पात्रे सूर्यमण्डलं विलिख्य सम्पूज्य-

ततः सूर्याय अर्घ्य दद्यात्

(कुण्ड बनाई सूर्यलाई अर्घ्य दिने)

ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते। अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर॥

श्रीसूर्यनारायणाय नमः, इदमर्घ्यं समर्पयामि। इत्यर्घ्यं दत्वा पुनरर्घ्यं संस्थाप्य यथाविधि पूजयेत्।

आवाहनम्

(थालीमा ॐकार लेखेर आवाहन गर्ने)

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमि ँ सर्वतस्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम्॥

ॐ भूर्भुवः स्वः सदाशिवसहिते श्रीस्वस्थानीदेवि इहागच्छेह तिष्ठ मम पूजां गृहाण यावत्पूजां करोमि तावत्वं सुस्थिरा भव। इत्यावाह्य-

आसनम्

(कुशको आसन राख्ने)

ॐ पुरुषऽएव०।

पादासनं च देवेशि निर्मलं स्वर्णनिर्मितम्। भूषितं विविधैः रत्नैः कुरु त्वं पादुकासनम्॥

आसनं समर्पयामि सदाशिवसहितायै श्रीस्वस्थान्यै नमः।

पाद्यम्

(जल चढाउने)

ॐ एतावानस्य०।

ॐ गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाऽऽहृतम्। तोयमेतत्सुखस्पर्शं पाद्यं मे प्रतिगृह्यताम्॥

पाद्यं समर्पयामि सदाशिवसहितायै श्रीस्वस्थान्यै नमः।

अर्घ्यम्

(अर्घ्य चढाउने)

ॐ त्रिपादूर्ध्वः ०।

ॐ व्रतमुद्दिश्य देवेशि गन्धपुष्पाक्षतैर्युतम्। गृहाणार्घ्यं मया दत्तं सर्वसिद्धिप्रदा भव॥

अर्घ्यं समर्पयामि ०।

स्नानम्

(जल चढाउने)

ॐ ततो विराट्०।

ॐ हिममिक्षु सरोजातं निर्मलञ्च हिमोपमम्। स्नानं समर्पितं पूर्वं लक्ष्मि तुभ्यं नमो नमः॥

स्नानं समर्पयामि०।

पञ्चामृतम् (पञ्चामृत चढाउने)

ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतमः । सरस्वती तु पञ्चधा सोऽदेशेऽभवत्सरित् ॥

ॐ पयोदधिघृतं देवि शर्करामधुसंयुतम् । पञ्चामृतं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥ पञ्चामृतं सम० ।

शुद्धोदकस्नानम् (शुद्ध जल चढाउने)

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्व ६ हि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि । दीक्षातपसोस्तनूरसि तान्त्वा शिवा ७ सग्मापरिदधे भद्रं वर्ण पुष्यन् ॥ शुद्धोदकस्नानं सम० ।

वस्त्रम् (वस्त्र चढाउने)

ॐ तस्माद्यज्ञात्त्सर्व्वहुतःसम्भृतम्पृषदाज्यम । पशूँस्ताँश्च्चक्रेव्वायव्व्यानारण्याग्ग्राम्याश्च्चये ॥

ॐ दुकूलपट्टदेवाङ्गं नानावस्त्रसुशोभितम् । समर्पये महेशानि भुक्तिं मुक्तिं च देहि मे ॥ वस्त्रं सम० ।

यज्ञोपवीतम् (जनै चढाउने)

ॐ तस्माद्यज्ञात्त्सर्व्वहुतऽऋचः सामानिजज्ञिरे । छन्दा ७ सिजज्ञिरेतस्माद्यजुस्तस्म्मादजायत ॥

ॐ अष्टचत्वारिंशदाख्यं द्विजसंस्कारमुत्तमम् । नागसूत्रयुतं पूर्णं ब्रह्मसूत्रं प्रगृह्यताम् । यज्ञोपवीतं सम० ।

आभूषणानि (गरगहनाहरू चढाउने)

ॐ दिव्यरत्नसमायुक्ताः वह्निभानुसमप्रभाः । गात्राणि शोभयिष्यन्ति ह्यलङ्काराः सुरेश्वरि ॥

सीमनतशोभनं दिव्यं भर्तुरायुः प्रवर्धनम् । गृहाण देवि सौभाग्यप्रवर्धनपरा भव ॥ आभूषणानि सम० ।

भूमौ धान्यं निधाय तस्योपरि कलशं स्थापयित्वा यथाविधि सम्पूज्य कलशोपरि स्थालीं स्थापयेत् । ततः स्थाल्यां पूर्वादिदिग्विदिक्षु भो इन्द्रः इहागच्छेहतिष्ठेत्यावाहनादिक्रमेण इन्द्रादिदशदिक्पालान् पूजयेत् ।

आवरणपूजा (चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ नन्दिन्यै नमः । ॐ गुरुभ्यो नमः । ॐ क्षेत्रपालाय नमः । ॐ नन्दिने नमः । ॐ महाकालाय नमः । ॐ भृङ्गिणे नमः । ॐ वृषाय नमः । ॐ चण्डिकायै नमः । ॐ सदाशिवाय नमः । ॐ श्रीस्वस्थानीदेव्यै नमः । ॐ विष्णवे नमः । ॐ शङ्करायेन्द्रसहिताय नमः । ॐ उग्राय नमः । ॐ अपर्णसहिताय नमः । ॐ कपर्दिने नमः । ॐ भवानीसहिताय नमः । ॐ भूतेशानमदनवासिनीसहिताय नमः । ॐ व्योमकेशाय नमः । ॐ उग्रसहिताय् नमः । ॐ भवाय नमः । ॐ भवाय तोयान्नसहिताय नमः । ॐ कृत्तिवाससे नमः । ॐ षड्रसे मङ्गलसहिताय नमः । ॐ चन्द्रशेखराय नमः । ॐ सतीदेवीसहिताय नमः । ॐ सुभद्रासहिताय नमः । ॐ महेश्वराय नमः । ॐ स्वस्थानीदेवीसहिताय नमः । ॐ सर्वव्यापिन्यै नमः । इति पूजयेत् ।

बलिपूजा

(चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ गणपतेय नमः । ॐ बटुकाय नमः । ॐ योगिनीभ्यो नमः । ॐ असिताङ्गभैरवाय नमः । ॐ उन्मत्तभैरवाय नमः । ॐ कपालभैरवाय नमः । ॐ भीमभैरवाय नमः । ॐ स्वस्थानीक्षेत्रपालाय नमः । ॐ सर्वभूतेभ्यो नमः । ॐ त्रैलोक्यचिन्तामण्यै नमः । ॐ चण्डमुण्डप्रमथिन्यै नमः । ॐ जयायै नमः । ॐ अजितायै नमः । ॐ स्वस्थानीदेव्यै नमः । ॐसदाशिवाय नमः । ॐ वशिष्ठादिसप्तर्षिभ्यो नमः । ॐ आदित्यादिनवग्रहेभ्यो नमः । ॐमार्कण्डेयाद्यष्टचिरञ्जीविभ्यो नमः । ॐ विष्कुम्भादिसप्तविंशतियोगेभ्यो नमः । ॐ मेषादिद्वादशराशिभ्यो नमः । ॐ ब्रह्मणे नमः । ॐ गोमा ब्राह्मण्यै नमः । ॐ शिवभट्टाय नमः । ॐ नवराजाय नमः । ॐ पापिन्यै नमः । इति ।

अष्टमातृकापूजा (अष्टदिक्षु)

(थालीमा अष्टदल लेखेर आठ दिशा पूजा गर्ने)

ॐ ब्राह्म्यै नमः । ॐ माहेश्वर्यै नमः । ॐ कौमार्यै नमः । ॐ वैष्णव्यै नमः । ॐ वाराह्यै नमः । ॐ इन्द्राण्यै नमः । ॐ चामुण्डायै नमः । ॐ महालक्ष्म्यै नमः । इत्यावाहनादिक्रमेण पूजयेत् ।

चन्दनम्

(चन्दन चढाउने)

ॐ तं यज्ञम्० ।

ॐ श्रीखण्डं चन्दनं दिव्यं सर्वारम्भसुमङ्गलम् । प्रियं हि सर्वदेवानां चन्दनं प्रतिगृह्यताम् । चन्दनं सम० ।

सिन्दूरादिसौभाग्यद्रव्यम्

(सिन्दूर, सौभाग्य आदि चढाउने)

ॐ उद्यदादित्यसङ्काशं स्त्रीणां सीमन्तभूषणम् । वीरालङ्करणं देवि सिन्दूरं प्रतिगृह्यताम् । सिन्दूरं सम० ।

पुष्पाणि

(फूल चढाउने)

ॐ यत्पुरुषम्० ।

ॐ उद्यानोद्भवपुष्पाणि मालत्यादीनि चेश्वरि । मयानीतानि पूजार्थं शङ्करि प्रतिगृह्यताम् । पुष्पाणि सम० ।

पुष्पमाला

(फूल माला चढाउने)

ॐ उद्योनोद्भवपुष्पाणि सुगन्धीनि तथैव च । ग्रथितानि प्रतीच्छ त्वं स्वस्थानी परमेश्वरि ॥
कालोचितं यथापुष्पं पञ्चवर्णैः सुगन्धिभिः । विचित्रग्रथितं माल्यं गृहाण परमेश्वरि ॥ पुष्पमालां सम० ।

कमलपुष्पाणि

(कमलको फूल चढाउने)

ॐ पद्मं च सरसी जातं लक्ष्मीवासगृहं शुभम् । गृहाण जगदीशानि । स्वस्थानी ? त्वं प्रसीद मे ॥ पद्मं सम० ।

बिल्वपत्राणि

(बेलपत्र चढाउने)

ॐ त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधम् । त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम् । बिल्वपत्राणि सम० ।

दूर्वाक्षता (दुवो अक्षता चढाउने)

ॐ दूर्वाक्षतं समानीतमष्टोत्तरशतं शुभम्। गृहाण परमेशानि भुक्तिमुक्ति फलप्रदे ॥ दूर्वाक्षतान् सम०।

सूत्रम् (धागो चढाउने)

ॐ नवतन्तुसमायुक्तं कार्पासं सूत्रमुत्तमम्। सर्वपापविनाशाय स्वस्थान्यै तन्निवेदये ॥ सूत्रम् सम०।

धूप (धूप वालेर देखाउने)

ॐ ब्राह्मणोऽस्य०।

ॐ वनस्पतिरसोत्पन्नो नानागन्धेन संयुतः। आघ्रेयः सर्वदेवनां धूपोऽयं प्रतिगृह्यताम्। धूपमाघ्रापयामि०।

दीप (वत्ती वालेर देखाउने)

ॐ चन्द्रमा मनसः०।

ॐ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेशि सर्वत्र तिमिरापहम्। दीपं दर्शयामि०।

नैवेद्यम् (नैवेद्य चढाउने)

ॐ नाभ्याऽआसीत्०।

ॐ घृतपक्वं हविष्यान्नं पायसं च सशर्करम्। नानाविधञ्च नैवेद्यं गृह्यतां परमेश्वरि। नैवेद्यं सम०।

आचमनम् (जल चढाउने)

ॐ यत्पुरुषेण०।

ॐ उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रतः। शुद्धिमाप्नोति तस्यै ते पुनराचमनीयकम्। आचमनं सम०।

फलानि (फल चढाउने)

ॐ इदं फलं मया देवि कदलीपनसादिकम्। इक्ष्वादियुक्तं सरसं गृह्यतां परमेश्वरि ॥ फलानि सम०।

ताम्बूलं पूगीफलञ्च (पान सुपारीका साथै गनेका १०८ सबै सामग्रीहरू चढाउने)

ॐ पूगीफलसमायुक्तं नागवल्लीदलैर्युतम्। कर्पूरैलासमायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ताम्बूलं सम०।

ततः- ॐ अक्षन्नममीमदन्तेति अष्टोत्तरशतम्, (१०८) अक्षतान्। ॐ श्रीश्चत इति अष्टोत्तरशतं (१०८) बेलीपुष्पाणि। ॐ नमः शम्भवायेति अष्टोत्तरशतं (१०८) यज्ञसूत्राणि। ॐ नाभ्याऽआसीदिति अष्टोत्तरशतं (१०८) नैवेद्यानि - मालपुवारोटी)। अष्टोत्तरशतं (१०८) ताम्बूलानि। अष्टोत्तरशतं (१०८) पूगीफलानि। अष्टोत्तरशतं (१०८) दक्षिणाः - भेटी)। समर्प्यः -

नीराजनम् (१०८ नीराजन बत्ती बाल्ने)

१०८ वर्तिकाभिर्नीराजनम्, कर्पूरदीपं च-

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्योज्योतिर्ज्योतिः सूर्यः स्वाहा। अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा। ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥

ॐ आ रात्रि पार्थिवꣳरजः पितुरप्रायि धामभिः । दिवः सदाꣳसिं वितिष्ठसऽ आ त्वेषं वर्तते तमः ॥
ॐ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च । त्वमेव सर्वज्योतींषि तेन नीराजयाम्यहम् ॥
नीराजनं दर्शयामि० ।

प्रदशिक्षणा (तीनपटक प्रदक्षिणा गर्ने)

ॐ सप्तास्यासन्० ।
ॐ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि प्रणश्यन्ति प्रदक्षिणपदे पदे ॥ प्रदशिक्षण सम० ।

पुष्पाञ्जलि (फूल लिएर नमस्कार गर्ने)

ॐ यज्ञेन यज्ञम्० ।
ॐ नमोऽस्तु ते महादेवि स्वस्थानि परमेश्वरि । त्रिलोकजननि नित्ये प्राणीनां पापहारिणि ।
त्रिपुरघ्न महादेव भक्तवत्सल विश्वकृत् । नमस्करोमि देवेश ब्रह्ममाधववन्दित ॥
अन्यत्र शरणं नास्ति युवां वै शरणं मम । तस्मात्कारुण्यभावेन रक्षेतां परमेश्वरौ ॥
मन्त्रपुष्पाञ्जलिं समर्पयामि सदाशिवसहितायै श्रीस्वस्थानीदेव्यै नमः ।

नमस्कार (नमस्कार गर्ने)

ॐ नमस्तेऽस्तु जगन्मातः स्वस्थानि ! सर्वमङ्गले । तव प्रसादाद्देवेशि व्रतपूर्णं भवेन्मम ॥
इति नमस्कुर्यात् ।

विशेषार्घ्यम् (थालीमा अर्घ्य दिने)

ॐ स्वस्थानि देवदेवेशि पूर्णार्थं मम तारकम् । गृहाणार्घ्यं मया दत्तं प्रसीद परमेश्वरि ॥
इदमर्घ्यं समर्पयामि सदाशिवसहितायै श्रीस्वस्थानीदेव्यै नमः ।

पूर्णपात्रम् (पूर्णपात्र दान गर्ने)

हरिः ॐ तत्सदित्यादि..... गोत्रा ..... देवी अहं श्रीस्वस्थानीदेवीप्रीतये दीपकलशगणेशपूजनमपूर्वकं कृतस्य श्रीसदाशिवसहितायाः श्रीस्वस्थानीदेव्याः पूजनकर्मणः परिपूरणार्थमिदं पूर्णपात्रं प्रजापतिदैवतं .... गोत्राय शर्मणे ब्राह्मणाय० ।

दक्षिणासङ्कल्प (दक्षिणा सङ्कल्प गर्ने र दिने)

हरिः ॐ तत्सदित्यादि पूर्वोचचारितसङ्कल्पसिद्धिरस्तु..... गोत्रा..... देवी अहं श्रीस्वस्थानीव्रताङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं कृतस्य सदाशिव सहितायाः श्रीस्वस्थानीदेव्या व्रतपूजाकर्मणः साङ्गतार्थमिमां.... ... ... दक्षिणां ब्राह्मणाय समर्पये तत्सत् न मम । ततो- यान्तु देवेति देवान् विसृज्य कायेन वाचेति कर्मेश्वरार्पणं कृत्वा प्रसादादिकं गृह्णीयात् । (विसर्जन गर्ने)

॥ इति श्रीस्वस्थानीव्रतपूजाविधिः ॥

॥ श्रीगणेशाय नमः ॥

हरितालिकापूजाविधिः

अथ प्रयोग- (गोदान गरी दियो, कलश, गणेश पूजा गर्ने)

भाद्रशुक्लतृतीयायां प्रातस्तिलामलककल्केन नद्यादौ स्नात्वा पट्टवस्त्रं परिधाय आसन उपविश्य आचम्य कर्मपात्रं कृत्वा सङ्कल्पं कुर्यात्- (जल, कुश लिएर सङ्कल्प गर्ने)

ॐ अद्येहेत्यादि मासपक्षादीनुल्लिख्य मम समस्तपापक्षयपूर्वकानेकजन्मपर्यन्ताखण्डित राज्यसौभाग्यादिविवृद्धये श्रीउमामहेश्वरप्रीत्यर्थं हरितालिका व्रतमहं करिष्ये। इति सङ्कल्पं कृत्वा व्रतं चरेत्। ततः प्रातःकाले दन्तधावनपूर्वकं नद्यां तडागे कूपे वा यथाविधि स्नात्वा शुद्धवस्त्रं परिधाय पूजास्थानमागत्य कदलीस्तम्भध्वजतोरणादिभिर्मण्डपं मण्डयित्वा आसन उपविश्य ईशानाभिमुखो भूत्वा बालुकामयं गौरीसहितं शिवलिंग निर्माय स्वगृहयोक्तविधिना प्राणप्रतिष्ठादिकं कृत्वा पूजां कुर्यात्। तत्रादौ आचम्य कर्मपात्रं विधाय प्रतिज्ञासङ्कल्पं कुर्यात्-

प्रतिज्ञासङ्कल्प (प्रतिज्ञासङ्कल्प गर्ने)

ॐ पूर्वसङ्कल्पसिद्धिरस्तु ..... गोत्रा ..... अहं सकलजन्मजन्मनि सञ्चितान्यनेकमहापातकोपपातकनिरसनपूर्वकमस्मिँल्लोके समस्तश्रियाभिजुष्टनानाविधैश्वर्यसुखप्राप्ति- पूर्वकममुत्रस्वर्णविमानाधिरोहणोर्वश्यादिदेवाङ्गनाभिः सह नन्दनवनोद्यानविहरणाद्यनेकविधस्वर्गीयभोगकामस्तदुत्तरशिवसायुज्यप्राप्तये आदौ दीपकलशगणेशपूजनकपूर्वकं यथामिलितोपचारैः उमामहेश्वरपूजनं करिष्ये। ततोऽर्घस्थापनं कृत्वा गन्धाक्षतपुष्पादिभिः, दीपं, कलशं, गणेशं च यथाविधि पाद्यादिभिरुपचारैः सम्पूजयेत्। (दियो, कलश, गणेश पूजा गरी अर्घ्य स्थापना गर्ने)

बालुकायमे शिवलिङ्गे उमामहेश्वरपूजा उमासहितं महेश्वरं आवाहनादिक्रमेण पूजयेत्।

उमामहेश्वरपूजाविधिः (उमासहित बालुवाको शिवलिङ्ग बनाउने)

तत्रादौ ध्यानम् (नमस्कार गर्ने)

ॐ मन्दारमालाकुलितालकायै कपालमालाङ्कितशेखरायै।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय॥ ॐ उमामहेश्वराभ्यां नमः। ध्यायामि।

आवाहनम् (आवाहन गर्ने)

ॐ देवदेव समागच्छ प्रार्थयेऽहं जगन्मय। इमां मया कृतां पूजां गृहाण सुरसत्तम॥
ॐ उमामहेश्वराभ्यां नमः। आवाहयामि।

आसनम् (आसन राख्ने)

ॐ हर शम्भो महादेव विश्वेशामरवल्लभ । अनेकरत्नसंयुक्तमासनं प्रतिगृह्यताम् ॥

ॐ उमामहेश्वराभ्यां नमः । आसनं समर्पयामि ।

पाद्यम् (जल चढाउने)

ॐ जलं सुशीतलं चारु नानागन्धसमन्वितम् । पाद्यं गृहाण देवेश महादेव नमोऽस्तुते ॥

ॐ उमामहेश्वराभ्यां नमः । पाद्यं समर्पयामि ।

अर्घ्यम् (अर्घ्य चढाउने)

ॐ श्रीपार्वति महाभागे शङ्करप्रियवादिनि । अर्घ्यं गृहाण कल्याणि भर्त्रा सह पतिव्रते ॥

ॐ उमामहेश्वराभ्यां नमः । अर्घ्यं समर्पयामि ।

आचमनीयम् (जल चढाउने)

ॐ गङ्गाजलैः समानीतं सुवर्णकलशे स्थितम् । आचम्यतां महाभाग उमया सहितोऽनघ ॥

ॐ उमामहेश्वराभ्यां नमः । आचमनीयं सम० ।

स्नानम् (जल चढाउने)

ॐ गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैः । स्नापितोऽसि मया देव तथा शान्तिं कुरुष्व मे ॥

ॐ उमामहेश्वराभ्यां नमः । स्नानं सम० ।

पञ्चामृतम् (पञ्चामृत चढाउने)

ॐ पयोदधिघृतं चैव शर्करामधुसंयुतम् । पञ्चामृतेन स्नपनं प्रीत्यर्थं प्रतिगृह्यताम् ॥

ॐ उमामहेश्व० । पञ्चामृतं सम० ।

शुद्धोदकस्नानम् (शुद्ध जल चढाउने)

ॐ किरणाधूतपापा च पुण्यतोया सरस्वती । मणिकर्णीजलं शुद्धं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ उमा महेश्व० । शुद्धो० स्नानं सम० ।

वस्त्रम् (वस्त्र चढाउने)

ॐ सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे । मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥

ॐ उमामहेश्व० । वस्त्रं सम० ।

यज्ञोपवीतम् (जनै चढाउने)

ॐ सुवर्णतन्तुग्रथितं कार्तस्वरविभूषितम् । यज्ञोपवीतं देवेश गृहाण जगदीश्वर ॥

ॐ उमामहेश्व० । यज्ञो० सम० ।

गन्ध (चन्दन चढाउने)

ॐ कुङ्कुमागरु कस्तूरी चन्दनं घनमिश्रितम्। विलेपनं महादेव गन्धं दास्यामि भक्तितः ॥

ॐ उमामहेश्व०। गन्धं सम०।

अक्षता (अक्षता चढाउने)

ॐ रञ्जिताः कुङ्कुमौघेन अक्षताश्चातिशोभनाः। भक्त्या समर्पितास्तुभ्यं प्रसन्नो भव शङ्कर ॥

ॐ उमामहेश्व०। अक्ष० सम०। अथ उमायै सिन्दूरं कज्जलं, कञ्चुक्यादि सौभाग्यद्रव्यं च समर्पयेत्।

सिन्दूरम् (सिन्दूर चढाउने)

ॐ उदितारुणसङ्काशं जपाकुसुमसन्निभम्। सीमन्तभूषणार्थाय सिन्दूरं देवि गृह्यताम् ॥

ॐ उमायै नमः। सिन्दूरं सम०।

कज्जलम् (सुगन्धित वस्तु चढाउने)

ॐ यदञ्जने त्रैककुदं नेत्रसौन्दर्यसाधनम्। चक्षुषोः कज्जलं धेहि देवि स्वर्णशलाकया ॥

ॐ उमायै नमः। कज्जलं सम०।

कञ्चुक्यादिसौभाग्यद्रव्याणि (सौभाग्य सामग्री चढाउने)

ॐ कञ्चुकीमुपवस्त्रं च नानारत्नैः समन्वितम्। गृहाण त्वं मया दत्तं पार्वती च नमोऽस्तुते ॥

ॐ हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलान्वितम्। सौभाग्यद्रव्यसंयुक्तं गृहाण जगदीश्वरि ॥

ॐ उमायै नमः। कञ्चुक्यादि सौभाग्यद्रव्याणि सम०।

पुष्पाणि (फूल माला चढाउने)

ॐ सेवन्तिकाबकुलचंपकपाटलाब्जैः पुन्नागजातिकरवीर रसालद्रोणैः।
बिल्वप्रवालतुलसीदलमालतिभिस्त्वां पूजयामि जगदीश्वर मे प्रसीद ॥

ॐ उमामहेश्वराभ्यां नमः। पुष्पाणि सम०।

अथाङ्गपूजा (चन्दन अक्षता फूलले पूजा गर्ने)

ॐ शङ्कराय नमः, पादौ पूजयामि। ॐ महेश्वराय नमः, जङ्घे पूजायमि। ॐ शम्भवे नमः, जानुनी पूजयामि। ॐ भूतेशाय नमः, ऊरूं पूजायामि। ॐ नीललोहिताय नमः, कटिं पू०। ॐ उग्राय नमः, नाभिं पू०। ॐ कृशानुरेतसे नमः, उदरं पू०। ॐ हराय नमः, स्तनौ पू०। ॐ नीलकण्ठाय नमः, कण्ठं पू०। ॐ शिवाय नमः, मुखं पू०। ॐ त्रिनेत्राय नमः, नेत्रे पू०। ॐ रुद्राय नमः, कर्णौ पू०। ॐ ललाटाक्षाय नमः, ललाटं पू०। ॐ शर्वाय नमः, शिरः पू०। ॐ शम्भवे नमः, सर्वाङ्गं पूजयामि।

अथ धूपः (धूप बाल्ने)

ॐ वनस्पतिरसोद्भूतः कृष्णागरुसमन्वितः । आनीतोऽयं मया धूपो गृहाण परमेश्वरः ॥

ॐ उमामहेश्वराभ्यां नमः । धूपं आघ्रपयामि ।

दीपः (वत्ती बाल्ने)

ॐ त्वं ज्योति सर्वदेवानां तेजसां तेज उत्तमः । आत्मज्योतिः परंधामदीपोऽयं प्रतिगृह्यताम् ॥

ॐ उमामहेश्वराभ्यां नमः । दीपं दर्शयामि ।

नैवेद्यम् (नैवेद्य चढाउने)

ॐ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् । भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥

ॐ उमामहेश्वराभ्यां नमः । नैवेद्यं समर्पयामि ।

आचमनीयम् (जल चढाउने)

ॐ मलयाचलसंभूतं कर्पूरेण समन्वितम् । आचम्यतां जलं स्वच्छं प्रसन्नो भव सर्वदा ॥

ॐ उमामहेश्वराभ्यां नमः । आचमनीयं सम० । करोद्वर्तनकं समर्पयामि । ॐ उमामहेश्वराभ्यां नमः ।

फलम् (फलफूल चढाउने)

ॐ इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।

ॐ उमामहेश्वराभ्यां नमः । फलं सम० ।

ताम्बूलम् (पान सुपारी चढाउने)

ॐ पूगीफलं महाद्दिव्यं नागवल्लीदलैर्युतम् । एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ उमामहेश्वराभ्यां नमः । ताम्बूलं सम० ।

दक्षिणा (द्रव्य भेटी चढाउने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

ॐ उमामहेश्वराभ्यां नमः । दक्षिणां सम० ।

आभूषणम् (गरगहनाहरू चढाउने)

ॐ वज्रमाणिक्यवैदूर्यमुक्ताबिन्दुसमन्वितम् । पुष्परागसमायुक्तं भूषणं प्रतिगृह्यताम् ॥

ॐ उमामहेश्वराभ्यां नमः । आभूषणं सम० ।

नीराजनम् (नीराजन बत्ती बाल्ने)

ॐ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च । त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ॥

ॐ उमामहेश्वराभ्यां नमः । नीराजनं सम० ।

अथ नामपूजा (चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ उमायै नमः । ॐ गौर्यै नमः । ॐ पार्वत्यै नमः । ॐ जगद्धात्र्यै नमः । ॐ जगत्प्रतिष्ठायै नमः । ॐ शान्तिरूपिण्यै नमः । ॐ हराय नमः । ॐ महेश्वराय नमः । ॐ शंभवे नमः । ॐशूलपाणये नमः । ॐ पिनाकधृषे नमः । ॐ शिवाय नमः । ॐ पशुपतये नमः । ॐमहादेवाय नमः ।

अथ पुष्पाञ्जलिः (फूल अक्षता लिएर नमस्कार गर्ने)

ॐ मन्दारमालाकुलितालकायै कपालमालाङ्कितशेखराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥
ॐ उमामहेश्वराभ्यां नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ।

प्रदक्षिणा (प्रदक्षिणा गर्ने)

ॐ यानिकानि च पापानि जन्मान्तर कृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणः पदे पदे ॥
ॐ उमामहेश्वराभ्यां नमः । प्रदक्षिणं सम० ।

नमस्कार : (नमस्कार गर्ने)

ॐ नमः शिवाय शान्ताय पञ्चवक्त्राय शूलिने । नन्दिभृङ्गिमहाकालगणयुक्ताय शम्भवे ॥
शिवायै शिवरूपायै मङ्गलायै महेश्वरि । शिवसर्वार्थदे नित्यं शिवरूपे नमोऽस्तुते ॥
ॐ अन्यथा शरणं नास्ति युवां हि शरणं मम । तस्मात्कारुण्यभावेन रक्षतां त्रिदशेश्वरौ ॥
ॐ उमामहेश्वराभ्यां नमः ।

प्रार्थना (नमस्कार गर्ने)

ॐ पुत्रान्देहि धनं देहि सौभाग्यं देहि सुव्रते । अन्यांश्च सर्वकामांश्च देहि देव नमोऽस्तु ते ॥
ॐ उमामहेश्वराभ्यां नमः । ततोऽर्धरात्रे षोडशोपचारेण पुनः पूर्ववत् पूजां कृत्वा नानाविधकौतुक-नृत्यगीतकथाश्रवणगौरीशनामकीर्तनादिभिर्जागरणं कुर्यात् । (राती जाग्राम बसी भजन कीर्तन गर्ने)

अपरदिने उत्तराङ्गकर्म (पूजा, पूर्णपात्रं, दक्षिणा, विसर्जनम्) (भोलिपल्ट पूजा, पूर्णपात्र, दक्षिणा विसर्जन गर्ने)

ततः अपरदिने प्रातः स्नानादिकं कृत्वा पूर्वदिनकृतपूजास्थानमागत्य, गन्धपुष्पाक्षतधूपदीपनैवेद्यादिभिः पूर्वदिनवत् पूजां विधाय अर्घ्यं निवेदयेत्

ॐ श्रीपार्वीति महाभागे शङ्करप्रियवादिनि । अर्घ्यं गृहाण कल्याणि भर्त्रा सह पतिव्रते ॥
ॐ उमामहेश्वराभ्यां नमः । अर्घ्यं निवेदयामि । ततो वायनानि ब्राह्मणाय दद्यात्

वायनम् (अर्घ्य दिने)

ॐ अन्नं सुवर्णपात्रस्यं सवस्त्रफल दक्षिणाम् । वायनं गौरि विप्राय ददामि प्रीतये तव ॥
सौभाग्यारोग्यकामाय सर्वसम्पत्समृद्धये । गौरीगौरीशतुष्ट्यर्थं वायनं ते ददाम्यहम् ॥ ॐ उमामहेश्वराभ्यां नमः ।

अथ पूर्णपात्रदानम्

(पूर्णपात्र दान गर्ने)

गन्धादिभिः संपूज्य कुशादीन्यादाय सङ्कल्पं कुर्यात्- ॐ अद्यहेत्यादि पूर्वसङ्कल्पसिद्धिरस्तु अहं मम पूर्वदिने हरितालिकोपवासव्रताङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं कृतस्य उमामहेश्वरपूजनकर्मणः साङ्गतासिद्धयर्थमपूर्णस्य परिपूरणार्थमिदं पूर्णपात्रं प्रजापतिदैवतं अमुकगोत्राय अमुकशर्मणे ब्राम्हणाय तुभ्यमहं संप्रददे तत्सन्न मम।

प्रार्थना

(नमस्कार गर्ने)

ॐ अन्नं सुवर्णपात्रस्थं सवस्त्रफलदक्षिणाम्। वायनं गौरि विप्राय ददामि प्रीतये तव ॥

दक्षिणासङ्कल्प

(दक्षिणासङ्कल्प गर्ने)

ॐ हिरण्यगर्भेति संपूज्य कुशादीन्यादाय- ॐअद्येत्यादि पूर्वसङ्कल्पसिद्धिरस्तु अहं पूर्वदिने हरितालिकोपवासव्रताङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं कृतस्य उमामहेश्वरपूजनकर्मणः साङ्गतासिद्धयर्थमिमां दक्षिणां रौप्यखण्डं चन्द्रदैवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे।

अथ विसर्जनम्

(विसर्जन गर्दा चन्दन, अक्षता फूलले पूजा गर्ने)

गन्धपुष्पादिकं चादाय- ॐ यान्तु देवेति, गच्छ गच्छेति च देवान् विसर्जयेत्।

ततः

(औंठी फुकाली कायेन वाचा गर्ने)

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वानुसृतेः स्वभावात्।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये तत् ॥

॥ इति कर्मेश्वरार्पणं कुर्यात् ॥

इति हरितालिकापूजा

व्रतपारायणविधिः

(व्रतपारायण विधिः)

(हरितालिकाव्रतपारायणायं प्रथमं लोपामुद्रां अगस्तिं पूजयित्वा अर्घ्यं च दत्वा पारणां कुर्वन्ति। अतः स एव क्रमाऽत्र प्रस्तूयते)

लोपामुद्रापूजा अगस्तिपूजा अर्घ्यदानं च

(लोपमुद्रा र अगस्त्यको पूजा गर्ने)

हरितालिकाव्रताङ्गत्वेन उमामहेश्वरपूजां समाप्य बहिः प्राङ्गणे गोमयनिर्मितकुण्डे काशपुष्पनिर्मितमूर्तिसहिते पूर्णकुम्भे वा लोपामुद्रासहितमगस्तिं पूजयेत्। तद्यथा अर्घ्यं संस्थाप्य तत्र यथाविधिः सम्पूज्य। (गोबरको कुण्ड बनाई पूजा गर्ने)

ॐ अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः।
उभौ वर्णावृषिरुग्रः पुपोष सत्यादेवेष्वाशिषो जगामा ॥ (नैवेद्य चढाई धूपवत्ती गर्ने)

इति मन्त्रेण पाद्यादिभिरुपचारैः अगस्तिं, नाममन्त्रेण लोपामुद्रां च पूजयेत्।
ततो धूपदीपनैवेद्यादीन् समर्प्य अर्घ्यं दद्यात्।

अगस्त्यर्घ्यमन्त्रः (अगस्त्यलाई अर्घ्य दिने)

तत्र ब्राह्मणश्चेदगस्त्यः खनमानः, इति पूर्वोक्तमन्त्रेण ब्राह्मणेतरश्चेत् वक्ष्यमाणमन्त्रेणार्घ्यं दद्यात् ।

ॐ काशपुष्पप्रतिकाश वन्हिमारुतसम्भव । मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥
विन्ध्यवृद्धिक्षयकर मेघतोयविषापह । रत्नवल्लभ देवेश लङ्कावास नमोऽस्तु ते ॥
वातोऽपि भक्षितो येन समुद्रः शोषितः पुरा । लोपामुद्रापतिः श्रीमान् योऽसौ तस्मै नमो नमः ॥
तस्मै नमोऽस्त्वगस्त्याय सशिष्याय च पुत्रिणे । लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ॥

लोपामुद्रार्घ्यमन्त्रः (अर्घ्य दिने)

ॐ राजपुत्रि महाभागे ऋषिपत्नि वरानने । लोपामुद्रे नमस्तुभ्यमर्घ्यं मे प्रतिगृह्यताम् ॥

इत्यर्घ्यं दत्त्वा प्रणिपत्य विसर्जयेत् ।

व्रतपारायण (तुलसी, शालिग्रामको जल खाने)

अर्घ्यपात्रे तुलसीदलयुतं सफलं सदक्षिणं शालग्रामचरणोदकं च ताम्रपात्रे संस्थाप्य हस्ताभ्यां गृहीत्वा वक्षमाणमन्त्रान् पठेत् ।

ॐ व्रतानां व्रतराजेन्द्र व्रतानां व्रतमुत्तमम् । व्रतच्छिद्रं तपश्छिद्रं यच्छिद्रं व्रतकर्मणि ॥
सर्वं भवतु मेऽच्छिद्रं यदि चेच्छन्ति ब्राह्मणाः । ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः ॥
सर्वदेवमयो विप्रो नतद्वचनमन्यथा । उपवासो व्रतं चैव दानं तीर्थ जपं तपः ॥
विप्रैः संभाषितं यद्यत्तत्सर्वं सफलं भवेत् । अन्नव्यञ्जनपानेषु शय्यायां ताम्रभाजने ॥
यच्च भुक्तमभुक्तं वा स्वप्नान्तरमथापि वा । दन्तान्तरविलग्नं वा क्षम्यतां परमेश्वर ॥
सर्वं भवतु मेऽच्छिद्रं ब्राह्मणा भवतां गिरा । ब्राह्मणा जङ्गम तीर्थं त्रिषु लोकेषु विश्रुतम् ॥
तेषां वाक्योदकेनैव शुद्धयन्ति मलिना जनाः । व्यासवाल्मीकिवचनात्पराशरवसिष्ठयोः ॥
गर्गगौतमधौम्यात्रिकश्यपाङ्गिरसां तथा । वचनान्नारदादीनं सम्पूर्ण भवतु व्रतम् ॥
अच्छिद्रं भक्ष्यभोज्येषु पर्यङ्केष्वासनेषु च । नियमेषु च सर्वेषु भवति द्विजवाक्यतः ॥
कुतैतन्नीराहारव्रतं विधिहीनं द्रव्यहीनं दक्षिणाहीनं च युत्कृतं तत्सुकृतमस्तु, यन्नकृतं तद्विष्णोः प्रसादाद ब्राह्मणवचनाच्च सर्वं परिपूर्णमस्तु, इति च वदेत् । तत आचार्यः यजमानहस्तापात्रमादाय – ॐ अस्तुपरिपूर्णमित्युक्त्वा –

ॐ व्रतेन दीक्षामाप्नोति दीक्षामाप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥
ॐ अज्ञानतिमिरान्धस्य ज्ञानेनानेन केशव । प्रसादसुमुखो भूत्वा ज्ञानदृष्टिप्रदो भव ॥

इत्यभिमन्त्र्य व्रतीहस्ते दद्यात् व्रती च फलं दक्षिणां चचार्याय दत्त्वा –

ॐ अकालमृत्युहरण सर्वव्याधिनिवारणम् । विष्णोः पादोदकं पीत्वा पुनर्जन्म न विद्यते ॥

इति जलं पिबेत् । ॥ इति व्रतपारायणविधिः ॥

॥ श्रीगणेशाय नमः ॥

ऋषिपञ्चमीपूजा

अथ प्रयोग

(नदीमा गएर नुहाउने, ३६० ओटा अपमार्ग र दतिवनले दाँत माझ्ने)

गङ्गायां नद्यादौ तडागे वा गत्वा पूर्वाभिमुखो भूत्वा ३६० अपामार्गकाष्ठेन दन्तधावनं कुर्यात् । तत्रादौ वनस्पतिप्रार्थना –

(नमस्कार गर्ने)

ॐ आयुर्बलं यशोवर्चः प्रजापशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते ॥ इति संप्रार्थ्य ।

ॐ मुखदौर्गन्ध्यनाशाय दन्तानां च विशुद्धये । ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥ (दियो, कलश, गणेश पूजा गर्ने)

इति मन्त्रेण दन्तान् संशोध्य ३६० मृत्तिकालेपनं ३६० अपमार्गपत्रैरभिषेचनपूर्वकं स्नानं विधाय शुद्धे वाससी परिधाय पूजास्थानमागत्य पञ्चगव्यं प्राश्य आसने उपविश्याऽऽचम्य दीपं प्रज्वाल्य कर्मपात्रं विधाय प्रायश्चित्तगोदानं कुर्यात् ।

प्रतिज्ञासङ्कल्प

(प्रतिज्ञासङ्कल्प गर्ने)

ॐ अद्येत्यादिदेशकालकीर्तनान्ते अहं मम श्री कश्यपादिसप्तर्षिप्रीतिद्वारा ऋषिपञ्चमीव्रताङ्गत्वेन दीपकलश-गणेशपूजनपूर्वक-मरुन्धतीसहितानां कश्यपादिसप्तर्षीणां यथामिलितोपचारैः पूजनं करिष्ये ।

(दियो, कलश, गणेश पूजा गरी अर्घ्य स्थापना गर्ने)

ततोऽर्घस्थापनपूर्वकं यथाविधि दीपं कलशं गणेशं च सम्पूज्य धूपदीपनैवेद्यादिकं च कुर्यात्

अरुन्धतीसहितकश्यपादिसप्तर्षिपूजनम्

(अरुन्धती र सप्तर्षिहरू स्थापना गर्ने)

ताम्रपात्रे तन्दुलान् प्रक्षिप्य तत्र कुशनिर्मितान् अरुन्धतीसहितान् कश्यपादि-सप्तर्षीन् संस्थाप्य सूत्रेण परिवेष्टय यथाविधिपूजनम्

(अरुन्धतीसहित कश्यप आदि सप्तर्षिहरूको पूजा गर्ने)

कश्यपोऽत्रिर्भारद्वाजो विश्वामित्रोऽथ गौतमः । जमदग्निर्वशिष्ठश्च साध्वी चैवाप्यरुन्धती ॥

इत्येतान् अरुन्धत्या सहितान् कश्यपादीन्सप्तर्षीन् यथाक्रमेणावाह्य पूजयेत् ।

आवाहनम्

(आवाहन गर्ने)

ॐ आगच्छन्तु महाभागाश्चतुर्वेदस्वरूपिणः । यावत्पूजामहं कुर्वे तावद् भवन्तु सुस्थिराः ॥

ॐ कश्यपाय नमः, कश्यपमावाहयामि । ॐ अत्रये नमः, अत्रिमावाहयामि । ॐ भरद्वाजाय नमः, भरद्वाजमावाह-यामि । ॐ विश्वामित्राय नमः, विश्वामित्रमावाहयामि । ॐ गौतमाय नमः, गौतममावाहयामि, ॐ जमदग्नये नमः, जमदग्निमावाहयामि । ॐ वसिष्ठाय नमः, वसिष्ठमावाहयामी । ॐ अरुन्धत्यै नमः, अरुन्धतीमावाहयामि इति क्रमेणावाह्य

ध्यानम् (नमस्कार गर्ने)

ॐ मूर्तिर्बह्मण्यदेवस्य ब्रह्मणस्तेज उत्तमम्। भानुकोटिप्रतीकाशमृषिवृन्दं विचिन्तये ॥

आसनम् (कुश राख्ने)

ॐ ऋग्यजुः सामवेदानां स्वरूपेभ्यो नमो नमः। पुराणपुरुषेभ्यो हि देवर्षिभ्यो नमो नमः ॥

ॐ कुशासने पवित्रेऽस्मिस्तिष्ठन्तु मुनिसत्तमा। अरुन्धत्या समेतास्ते जटामुकुटधारिणः ॥

पाद्यम् (जल चढाउने)

ॐ गन्धपुष्पाक्षतैर्युक्तं पाद्यं गृह्णन्तु भो द्विजाः। प्रसादं कुरुत प्रीताः प्रणतस्य सदा मम।

अर्घ्यम् (अर्घ चढाउने)

ॐ नमस्ते शुक्लपञ्चम्यामर्चिता ऋषिसत्तमाः। पापं दहन्तु मे सर्वं गृह्णन्त्वर्घ्यं नमो नमः।

आचमनम् (जल चढाउने)

ॐ लोकानां तुष्टिकर्तारोयुयं सर्वे तपोधनाः। नमो वो धर्मविज्ञेभ्यो गृह्णीताचमनं त्विदम् ॥

पञ्चामृतम् (पञ्चामृत चढाउने)

ॐ पयोदधिघृतं चैव शर्करामधुसंयुतम्। पञ्चामृतेन स्नपनं करिष्ये ऋषिसत्तमाः ॥

स्नानम् (जल चढाउने)

ॐ मन्दाकिन्याः समानीतं यमुनागौतमीजलम्। कृष्णा च नर्मदा तापी ताभ्यः स्नानार्थमर्पितम् ॥

वस्त्रम् (वस्त्र चढाउने)

ॐ यूयं सर्वे तपोनिष्ठा ब्रह्मज्ञाः सत्यवादिनः। वस्त्राणि प्रतिगृह्णन्तु मुक्तिदाः सन्तु मे सदा ॥

यज्ञोपवीतम् (जनै चढाउने)

ॐ नानामन्त्रैः समुद्भूतं त्रिवृतं ब्रह्मसूत्रकम्। प्रत्येकं च प्रयच्छामि ऋषयः प्रतिगृह्यताम् ॥

गन्धम् (चन्दन चढाउने)

ॐ कुङ्कुमागरुकर्पूरसुगन्धैर्मिश्रितं शुभम्। गन्धाढ्यं चन्दनं दिव्यं गृह्णन्तु ऋषिसत्तमाः ॥

अक्षताः (अक्षता चढाउने)

ॐ रञ्जिताः कुङ्कुमौघेन अक्षतास्तु सुशोभनाः। गृह्णन्तु मम सन्तुष्टा भवन्तु मुनिसत्तमाः ॥

अरुन्धत्यै सिन्दुरादि सौभाग्यद्रव्यम्

सौभाग्यम् (सौभाग्यहरू चढाउने)

ॐ कण्ठसूत्रं ताडपत्रं हरिद्रा कुङ्कुमाञ्जनम्। सिन्दुरालक्तकं दास्ये सौभाग्यद्रव्यमीश्वरि ॥

पुष्पाणि (फूल चढाउने)

ॐ मालती चम्पकादीनि नानापुष्पाणि वै द्विजाः । मयाहृतानि पूजार्थं गृह्णन्तु मुनिपुङ्गवाः ॥

धूपः (धूप वाल्ने)

ॐ वनस्पतिरसोद्भूतो गन्धाढ्यः सुमनोहरः । आघ्रेय सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

दीपः (वत्ती वाल्ने)

ॐ आज्यं च वर्तिसंयुक्तं वन्हिना योजितं मया । गृह्णन्तु ऋषयः सर्वे दीपोऽयं तिमिरापहः ॥

नैवेद्यम् (नैवेद्य, जल चढाउने र हात धुने)

ॐ नानापक्वान्नसंयुक्तं रसैः षड्भिः समन्वितम् । गृह्णन्तु ऋषयः सर्वे नैवेद्यं सुमनोहरम् ॥

नैवेद्यान्ते पानीयम् । उत्तरापोशनं, हस्तप्रक्षालनं, करोद्वर्तनं च ॐ सप्तर्षिभ्यो नमः, इति मन्त्रेण देयम् ॥

फलम् (फल चढाउने)

ॐ नमो वेदविदांश्रेष्ठा ऋषयः सूर्यसन्निभाः । गृह्णन्त्विदं फलं तुष्टा मया दत्तं हि भक्तितः ॥

पूगीफलं ताम्बूलं च ॐ सप्तर्षिभ्यो नमः, इति मन्त्रेण समर्पयेत् ।

दक्षिणा (द्रव्य चढाउने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

प्रदक्षिणा (चरण नउठाई प्रदक्षिणा गर्ने)

चरणोत्थापनं विना (चरणौ भूमिसंलग्नौ यथा स्यात् तथा) सप्तर्षिप्रदक्षिणा –

ॐ यानिकानि च पापानि जन्मान्तर कृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणः पदे पदे ॥

नीराजनम् (नीराजन बत्ती बाल्ने)

ॐ चक्षुर्वै सर्वलोकानां तिमिरस्य निवारणम् । जमदग्निर्वसिष्ठश्च गृह्णन्तु ऋषिसप्तमाः ॥

पुष्पाञ्जलि (फूल लिएर नमस्कार गर्ने)

ॐ कस्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः । जमदग्निर्वसिष्ठश्च गृह्णन्तु कुसुमाञ्जलिम् ॥

नमस्कार (नमस्कार गर्ने)

ॐ नमोस्तु ऋषिवृन्देभ्यो देवर्षिभ्यो नमो नमः । सर्वपापहरेभ्यो हि वेदविद्भ्यो नमो नमः ॥

प्रार्थना (नमस्कार गर्ने)

ॐ एते सप्तर्षयस्सर्वे भक्त्या संपूजिता मया । सर्वपापं व्यपोहन्तु ज्ञानतोऽज्ञानतः कृतम् ॥

क्षमापनम् (क्षमा माग्ने)

ॐ न्यूनातिरिक्तकर्माणि मया यानि कृतानि हि । क्षमध्वं तानि सर्वाणि यूयं सर्वे तपोधनाः ॥

अर्घ्यनिवेदनम् (अर्घ्य दिने)

ॐ कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः । जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः ॥
गृह्णन्त्वर्घ्यं मया दत्तं तुष्टा भवन्तु मे सदा ।

अथ वायनम् (पूर्णपात्र, सौभाग्यहरू, दक्षिणा दान गरी विसर्जन गर्ने)

ॐ वायनं फलसंयुक्तं सघृतं दक्षिणान्वितम् । द्विजवर्याय दास्यामि व्रतसम्पूर्तिहेतवे ॥
ऋषयः प्रतिगृह्णन्तु तेजोरूपास्तपोधनाः । उभयोस्तारकाः सन्तु वायनस्य प्रदानतः ॥
ततो ब्राह्मणेभ्यो दक्षिणां दद्यात् ।

विसर्जनम् (विसर्जन गर्दा चन्दन, अक्षता फूलले पूजा गर्ने)

तत अवाहितदेवेभ्यः पुष्पाक्षतादिभिरभ्यर्च्य 'यान्तु देवेति, गच्छ गच्छेति' च विसृज्य कायेन वाचा ... इति कर्मेश्वरार्पणं कुर्यात् । ततः कथां श्रुत्वा प्रसादादिकं गृहीत्वा अकृष्टभूम्युत्पन्नैः शाकैः श्यामाकैर्नीवारैर्वाऽहारं प्रकल्प्य ऋषिध्यानपरा भवेयुः । (विसर्जन गरी फलाहार गर्ने)



॥ इति ऋषिपञ्चमीपूजा समाप्त ॥

॥ श्रीगणेशाय नमः ॥

तुलसीपूजाविधिः

अथ प्रयोग

(आचमन गरी दियो, कलश, गणेश पूजा अग्निस्थापना अनुसार गर्ने)

आचमनम्-केशवाय नमः । नारायणाय नमः । माधवाय नमः । गोविन्दाय नमः, इति करं प्रक्षाल्य, विष्णवे नमः, इति नेत्रयोरुदकस्पर्शनम् ।

प्रतिज्ञासङ्कल्प

(प्रतिज्ञासङ्कल्प गर्ने)

पूर्वसङ्कल्पमुच्चार्य अहं मम श्रीतुलसीदेवता प्रीतिद्वारा सुखसौभाग्यसन्तत्यायुरारोग्यैश्वर्याभिवृद्ध्ययं श्रीपरमेश्वरप्रीतये दीपकलशगणेश- पूजनपूर्वकं तुलसीपुजनं करिष्ये । इति सङ्कल्प्यार्घ्यं संस्थाप्य, दीपं-कलशं-गणेशं चावाह्य पाद्यादिभिरुपचारैः पूजयेत् ।

श्रीतुलसीध्यानम्

(तुलसीको ध्यान गर्ने)

ॐ ध्यायेच्च तुलसीं देवीं श्यामां कमललोचनाम् । प्रसन्नां पद्मवदनां वराभयचतुर्भुजाम् ॥
किरीटहारकेयूरकुण्डलादिविभूषणाम् । धवलाङ्कुशसंयुक्तां पद्मासननिवेशिताम् ॥
ध्यायाम्यहं प्रियां विष्णोः सर्वदेवनमस्कृताम् । इति ध्वात्वा-

आवाहनम्

(आवाहन गर्ने)

ॐ देवि त्रैलोक्यजननी सर्वलोकैकपावनि । आगच्छ वरदे मातः प्रसीद तुलसि प्रिये ।
श्री तुलस्यै नमः, आवाहयामि ।

आसनम्

(आसन राख्ने)

ॐ सर्वदेवमयं देवि सर्वदा विष्णुवल्लभे । देवि स्वर्णमयं दिव्यं गृहाणासनमव्यये ॥
श्रीतुलस्यै नमः । आसनं समर्पयामि ।

पाद्यम्

(जल चढाउने)

ॐ सर्वे देवा यथा स्वर्गे तथा त्वं भुवि सर्वदा । दत्तं पाद्यं गृहाणेदं तुलसी त्वं प्रसीद मे ॥
श्रीतुलस्यै नमः । पाद्यं समर्पयामि ।

अर्घ्यम्

(अर्घ्य चढाउने)

ॐ गन्धपुष्पसमायुक्तं सर्वेषां प्रीतिदायकम् । अर्घ्यं गृहाण त्वं देवि दैत्यान्तकरणप्रिये ॥
श्रीतुलस्यै नमः । अर्घ्यं समर्पयामि ।

आचमनम्

(जल चढाउने)

ॐ कर्पुरवासितं तोयं सुवर्णकलशे स्थितम्। दत्तमाचमनीयं च गृहाण हरिवल्लभे ॥

श्रीतुलस्यै नमः। आचमनं समर्पयामि।

स्नानम्

(जल चढाउने)

ॐ गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैः। स्नापितोऽसि मया देवि तथा शान्तिं कुरुष्व मे ॥

श्री तुलस्यै नमः। स्नानं समर्पयामि।

मलापकर्षणस्नानम्

(जल चढाउने)

ॐ गङ्गागोदावरीकृष्णापयोष्ण्याद्यापगास्तथा। आयान्तु ताः सदा देव्यास्तुलस्याः स्नानकर्मणि ॥

श्रीतुलस्यै नमः। मलापकर्षणस्नानं समर्पयामि।

पञ्चामृतस्नानम्

(पञ्चामृत चढाउने)

ॐ पञ्चामृतं मयानीतं पयोदधिघृतं मधु। सह शर्करया देवि स्नानार्थं प्रतिगृह्यताम्।

श्रीतुलस्यै नमः। पञ्चामृतं समर्पयामि।

शुद्धोदकस्नानम्

(शुद्ध जल चढाउने)

ॐ आपोऽअस्मान्... ।

सकलपुजापरिपूरणार्थं गन्धाक्षतपुष्पाणि समर्पयामि।

(निर्माल्यं विसृज्य पुनश्च गन्धाक्षतपुष्पाण्यर्पयित्वाऽभिषेकं कुर्यात्)

अभिषेक

(तुलसीको जल शिरमा अभिषेक गर्ने)

ॐ कृष्णा सरस्वती काली तुङ्गभद्रा शची यथा। भागीरथी पार्वती च रमा नारायणी मता ॥

सुभद्रा द्रौपदी साध्वी माता चैवाप्यरुन्धती। सावित्री कालिकाऽहल्या स्नापयिष्यन्तु सर्वदा ॥

ताभिः कृताभिषेका त्वं ददासि गुरुसौभगम्। अतस्त्वां स्नापयिष्यामि तुलसी विष्णुवल्लभे ॥

ॐ शान्तिः शान्तिः सुशान्तिर्भवतु। अमृताभिषेकोऽस्तु। श्रीतुलस्यै नमः, अभिषेकं समर्पयामि।

वस्त्रम्

(कपडा चढाउने)

ॐ क्षीरोदमथनोद्भुते चन्द्रलक्ष्मी सहोदरे। गृह्यतां परिधानार्थमिदं पीताम्बरं शुभम् ॥

श्रीतुलस्यै नमः। वस्त्रं समर्पयामि।

कञ्चुकीमुपवस्त्रं च

(वस्त्र, सौभाग्य चढाउने)

ॐ कञ्चुकीमुपवस्त्रं च नानारत्नैः समन्वितम्। गृहाण त्वं मया दत्तं तुलसी भयहारिणी ॥

श्रीतुलस्यै नमः। कञ्चुकीमुपवस्त्रं समर्पयामि।

कुङ्कुमम्

(सुगन्ध चढाउने)

ॐ केशरागरुसंयुक्तं चन्दनादि समविन्तम्। कस्तूरिकासमायुक्तं कुङ्कुमं प्रतिगृह्यताम्॥

श्रीतुलस्यै नमः। कुङ्कुमं समर्पयामि।

अक्षतान्

(अक्षता चढाउने)

ॐ अक्षतांश्च महादेवि तुलसी सौख्यदायकान्। अर्पयामि सदा भक्त्या सुखसन्ततिलब्धये॥

श्रीतुलस्यै नमः। अक्षतान् समर्पयामि।

सौभाग्यद्रव्यम्

(सौभाग्यहरू चढाउने)

ॐ हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलान्वितम्। मया निवेदितं भक्त्या गृहाण परमेश्वरि॥

श्रीतुलस्यै नमः। सौभाग्यद्रव्यं समर्पयामि।

पुष्पाणि

(फूलमाला चढाउने)

ॐ माल्यादीनि सुगन्धीनि मालत्यादीनि सत्तमे। मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम्॥

श्रीतुलस्यै नमः। पुष्पाणि समर्पयामि।

धूपम्

(धूप बाल्ने)

ॐ वनस्पतिरसोद्भूतो गन्धाढचो गन्ध उत्तम :। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृहचताम्॥

श्रीतुलस्यै नमः। धूपं समर्पयामि।

दीपम्

(बत्ती बाल्ने)

ॐ वैश्नानरप्रज्वलितं घृतकार्पासनिर्मितम्। दीपं भक्त्या गृहाणेदं त्रैलोक्यध्वान्तनाशके॥

श्रीतुलस्यै नमः। दीपं समर्पयामि।

नैवेद्यम्

(नैवेद्य चढाउने)

ॐ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम्। नैवेद्यमर्पयामि त्वां तुलसि माधवप्रिये॥

ॐ प्राणाय नमः। ॐ अपानाय नमः। ॐ व्यानाय नमः। ॐ समानाय नमः। ॐ उदानाय नमः। इति **मन्त्रैर्ग्रासमुद्राः प्रदर्श्य-** श्रीतुलस्यै नमः। नैवेद्यं समर्पयामि। मध्ये पानीयं उत्तरापोशानं हस्तप्रक्षालनं करोद्वर्तनार्थे चन्दनं च समर्पयामि।

(जल चढाई हात धुने र चन्दन चढाउने)

फलम्

(फलफूल चढाउने)

ॐ इदं फलं मया देवि स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥

श्रीतुलस्यै नमः। फलं समर्पयामि।

ताम्बूलम्

(पान सुपारी चढाउने)

ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । कर्पूरैलादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

श्रीतुलस्यै नमः । ताम्बूलं समर्पयामि ।

दक्षिणा

(पैसा चढाउने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

श्रीतुलस्यै नमः । दक्षिणां समर्पयामि ।

कर्पूरार्तिक्यम्

(नीराजन कपुर वाल्ने)

ॐ नीराजयामि सततं हरिवल्लभे ते कर्पूरवर्तिभिरलं सुखदायकं त्वाम् ।
पादौ भजाम्यविरतं तव देवि माये वंशाय सौख्यमपि देहि बलं च पूर्णम् ॥

श्रीतुलस्यै नमः । कर्पूरार्तिक्यं दर्शयामि ।

प्रदक्षिणा

(प्रदक्षिणा गर्ने)

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि प्रणश्यन्तु प्रदक्षिणपदे पदे ॥
नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये । नम आहवनीयाय तुलस्यै ते नमो नमः ॥

श्रीतुलस्यै नमः । प्रदक्षिणां समर्पयामि ।

मन्त्रपुष्पयुक्तो नमस्कार

(फूल लिएर नमस्कार गर्ने)

ॐ विष्णुप्रियकरे देवि तुलसि सुखदायिके । पुष्पाञ्जलिं प्रयच्छामि पतेरायुष्यवृद्धये ॥

श्रीतुलस्यै नमः । पुष्पयुक्तं नमस्कारं समर्पयामि ।

विशेषार्घ्य

(अर्घ्य दिने)

ॐ गन्धप्रसूनसंयुक्तं फलमुद्राप्रशोभितम् । अर्घ्यं ददामि तुलसि तव प्रीत्यै नमो नमः ॥

श्रीतुलस्यै नमः । विशेषार्घ्यं समर्पयामि ।

प्रार्थना

(नमस्कार गर्ने)

ॐ सौभाग्यं सन्ततिं देवि धनं धान्यं च मे सदा । आरोग्यशोकशमनं कुरु मे माधवप्रिये ॥
अभीष्टफलसिद्धिं च सदा देहि हरिप्रिये । देवैस्त्वं निर्मिता पूर्वमर्चितासि मुनीश्वरैः ॥
अतो मां सर्वदा भक्त्या कृपादृष्टचा विलोकय । पतेरायुष्यभाग्यं च सदा देवि हरिप्रिये ॥
पूतनाभयसंत्रासाद्रक्षितश्च यथा हरिः । तथा संसारसन्त्रासाद्रक्ष मे वंशमुत्तमम् ।
श्रीतुलस्यै नमः । प्रार्थनां समर्पयामि । अनेन पूजनेन श्रीतुलसीदेवता प्रीयताम् ।
ब्राह्मणाय दक्षिणां दत्त्वा पूजां समापयेत् ।

(पूर्णपात्र दक्षिणा गरी विसर्जन गर्ने)

॥ इति तुलसीपूजा ॥

॥ श्रीगणेशाय नमः ॥

लक्ष्मीपूजा

अथ लक्ष्मीपूजाविधिः

आचम्य प्राणानायम्य कर्मपात्रं कृत्वा प्रतिज्ञासङ्कल्पं कुर्यात्। (आचमन गरेर कर्मपात्र बनाउने)

प्रतिज्ञा सङ्कल्प

(तिल, जौ, कुश लिएर सङ्कल्प गर्ने)

तद्यथा - ॐ अद्येत्यादि पूर्वसङ्कल्पं पठित्वा अहं मम श्रीमहालक्ष्मीप्रीतिद्वारा अलक्ष्मीपरिहारपूर्वकं विपुलश्रीप्राप्ति-सन्मङ्गलमहैश्वर्यकुलाभ्युदयसुखसमृद्ध्यादिकल्पोक्त - फलसिद्ध्यर्थं दीपकलशगणेशपूजनपूर्वकं लक्ष्मीपूजनं करिष्ये। इति सङ्कल्प्य - अर्घ्यं संस्थाप्य दीपं कलशं गणेशं च गन्धाक्षतपुष्पधूपदीपनैवेद्यादिभिः संपूज्याष्टदलमध्ये सुवर्णप्रतिमां संस्थाप्य ध्यायेत् - (अर्घ्य स्थापना गर्ने, दियो, कलश गणेश पूजा गर्ने र अष्टदल बनाई लक्ष्मीको पूजा गर्ने)

ध्यानम्

(फूल अक्षता लिई ध्यान गर्ने)

ॐ ध्यायामि तां महालक्ष्मी कर्पूरक्षोदपाण्डुराम्। शुभ्रवस्त्रपरिधानां मुक्ताभरणभूषिताम्॥
पङ्कजासनसंस्थानां स्मेराननसरोरुहाम्। शारदेन्दुकलाकान्तिं स्निग्धनेत्रां चतुर्भुजाम्॥
पद्मयुग्माभयवरव्यग्रचारुकराम्बुजाम्। अभितो गजयुग्मेन सिच्यमानां कराम्बुना॥

आवाहनम्

(आवाहन गर्ने)

ॐ महालक्ष्मी समागच्छ पद्मनाभपदादिह। पूजामिमां गृहाणत्वं त्वदर्थं देवि संभृताम्॥

आसनम्

(कुश राख्ने)

ॐ आलयं ते हि कथितं कमलं कमलालये। कमले ह्ययस्मिन् स्थितिं त्वं कृपया कुरु॥
ॐ कमले पाहि मे देवि स्वर्णसिंहासनं शुभम्। गृहाणेदं मया दत्तं भक्तियुक्तेन चेतसा॥

पाद्यम्

(जल चढाउने)

ॐ गङ्गादिसलिलाधारं तीर्थमन्त्राभिमन्त्रितम्। दूरयात्राश्रमहरं पाद्यं मे प्रतिगृह्यताम्॥

अर्घ्यम्

(अर्घ चढाउने)

ॐ तीर्थोदकैर्महादिव्यैः पापसंहारकारकैः। अर्घ्यं गृहाण देवेशि देवानामुपकारिणि॥

आचमनीयम्

(जल चढाउने)

ॐ आचम्य जगदाधारे सिद्धिलक्ष्मी जगत्प्रिये। चपले देवि ते दत्तं तोयं गृह्ण नमोऽस्तु ते॥

पञ्चामृतम्

(पञ्चामृत चढाउने)

ॐ पयो दधि घृतं क्षौद्रं सितया च समायुतम्। स्नानं पञ्चामृतेनाथ कुरु देवि दयानिधे॥

स्नानम् (जल चढाउने)

ॐ इदं तव महालक्ष्म्याः कर्पूरागुरुवासितम्। तीर्थेभ्यः सुसमानीतं स्नानार्थं प्रतिगृह्यताम्॥

वस्त्रम् (कपडा चढाउने)

ॐ सूक्ष्मतन्तुभवं वस्त्रं निर्मितं विश्वकर्मणा। लोकलज्जाहरं देवि गृहाण सुरसत्तमे॥

कञ्चुकं सिन्दूरादि सौभाग्यद्रव्यं च (सिन्दूरादि सौभाग्य कपडा चढाउने)

ॐ तालपत्रं मयानीतं हरिद्राकुङ्कुमाञ्जनम्। सिन्दूरालक्तकं दास्ये सौभाग्यद्रव्यमीश्वरि॥

आभूषणानि (गहनाहरू चढाउने)

ॐ रत्नकङ्कणकेयूरकाञ्चीकुण्डलनूपुरम्। मुक्ताहारं किरीटं च गृहाणाभरणानि मे॥

चन्दनम् (चन्दन चढाउने)

ॐ मलयाचलसंभूतं घनसारं मनोहरम्। शीतलं बहुलामोदं चन्दनं प्रतिगृह्यताम्॥

पुष्पाणि (फूल चढाउने)

ॐ नीलोत्पलं महामोदं मत्तालिकुलसङ्कुलम्। आनन्दिनन्दनोत्पन्नं पद्म गृह्ण नमोऽस्तु ते॥

अथ नामपूजा (चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ श्रियै नमः। ॐ लक्ष्म्यै नमः। ॐ वरदायै नमः। ॐ विष्णुपत्न्यै नमः। ॐ क्षीरसागरवासिन्यै नमः। ॐ हिरण्यरूपायै नमः। ॐ सुवर्णमालिन्यै नमः। ॐ पद्मवासिन्यै नमः। ॐ मुक्तालङ्कारिण्यै नमः। ॐ तुर्यायै नमः। ॐ चन्द्राननायै नमः। ॐ विश्वमूर्त्यै नमः। ॐ मुक्त्यै नमः। ॐ मुक्तिदात्र्यै नमः। ॐ ऋद्धयै नमः। ॐ समृद्धयै नमः। ॐ तुष्ट्यै नमः। ॐ धनेश्वर्यै नमः। ॐ ऋद्धायै नमः। ॐ भोगिन्यै नमः। ॐ भोगदायै नमः। ॐ धान्यै नमः। इति।

अथ धूपः (धूप बाल्ने)

ॐ गन्धसम्भारसन्नद्धकस्तूरीमोदसम्भवम्। सुरासुरनरानन्दि धूपं देवि गृहाण मे॥

दीप (बत्ती बाल्ने)

ॐ मार्तण्डमण्डलाखण्डचन्द्रबिम्बाग्नितेजसाम्। निधानं देवी दीपोऽयं निर्मितस्तव भक्तितः॥

नैवेद्यम् (नैवेद्य चढाउने)

ॐ देवतालयपातालभूतलाधारधान्यजम्। षोडशाकारसम्भारं नैवेद्यं ते नमः सदा॥

आचमनीयम् (जल चढाउने)

ॐ स्नानादिकं विधीयन्ते यतः शुद्धि प्रजायते। एतदाचमनीयं च महालक्ष्मी विधीयताम्॥

करोद्धर्तनम् (कपुर मिसाएको जल चढाउने)

ॐ गन्धकर्पूरसंयुक्तं कस्तूर्यादिविमिश्रितम्। करोद्धर्तनकं दिव्यं गृहाण परमेश्वरि॥

नारिकेलफलम् (नरिवल चढाउने)

ॐ इदं फलम् मया देवि स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

ताम्बूलम् (पान सुपारी चढाउने)

ॐ पातालतलसम्भूतं वदनाम्भोजभूषणम् । नानागुणसमाकीर्णं ताम्बूलं प्रतिगृह्यताम् ।

दक्षिणा (द्रव्य चढाउने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

ततो यथाशक्तिजपं कृत्वा समर्पयेत् । (यथाशक्ति जप गर्ने)

ततो नीराजनम् (नीराजन वत्ती वाल्ने)

ॐ नीराजनं तव पुरः करोम्युज्वलदीपकैः । गृहाण तिलतैलाज्यसम्भवैः शक्तिसम्मितैः ॥

कर्पूरार्तिक्यम् (कपुरवत्ती बालेर आरती गर्ने)

ॐ कदलीगर्भसम्भूतं घनसारं शशिप्रभम् । आरार्तिक्यमहं कुर्वे पश्य मे वरदा भव ॥

प्रदक्षिणा (प्रदक्षिणा गर्ने)

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि प्रणश्यन्तु प्रदक्षिणपदे पदे ॥

पुष्पाञ्जलि (फूल अक्षता लिएर नमस्कार गर्ने)

ॐ केतकीजातिकुसुमैर्मल्लिकामालतीभवैः । पुष्पाञ्जलिर्मया दत्तस्तव प्रीत्यै नमोऽस्तु ते ॥

प्रार्थना (नमस्कार गर्ने)

ॐ कमला चपला लक्ष्मीश्चलमूर्तिर्हरिप्रिया । पद्मा पद्मालया संपदुच्चैः श्रीः पद्मधारिणी ॥
नमस्ते सर्वदेवानां वरदासि हरिप्रिये । या गतिस्त्वत्प्रपन्नानां सा मे भूयात्वदर्चनात् ॥
या देवि सर्वभूतेषु लक्ष्मीरुपेण संस्थिता । नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥
शारदेन्दुकलाकान्तिः स्निग्धनेत्रा चतुर्भुजा । पद्मयुग्मा चाभंयदा करव्यग्रकराम्बुजा ॥
विष्णोर्वक्षसि पद्मे च शङ्खे चक्रे गदाधरे । लक्ष्मिदेवि यथाऽसि त्वं मयि नित्यं तथा भव ॥

इति संप्रार्थ्य ततः कुवेरं षोडशोपचारैर्नाममन्त्रेण सम्पूज्य प्रार्थयेत् -

ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च । भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः ॥ (पूर्णपात्र दक्षिणा गरी विसर्जन गर्ने)

ततो विशेषार्घ्यं निवेद्य ब्राह्मणाय दक्षिणां दत्त्वा देवान् विसृज्य पूजां समापयेत् । ततः पुराणपाठगीतादिना रात्रिं नयेत् ।

गोवर्धन, गो, वलिपूजा, भ्रातृ पूजा

(गोवर्धन, गाई, बलि पूजा, दाजुभाइ पूजा षोडषोपचारले कलशमा यमुना, अष्टचिरञ्जीवी, नवग्रह, यमराज, यमुनापरिचारीकाहरूको पूजा गरी दिदीबहिनीले दाजुभाइ र दाजुभाइले दिदीबहिनीलाई टीका माला लगाई सगुनसमेत दिनुपर्दछ ।)

॥ इति लक्ष्मीपूजा ॥

॥ श्रीगणेशाय नमः ॥

एकादशीव्रतपूजाविधिः

अथ प्रयोगः (आचमन गर्ने)

व्रती प्रातः स्नानादिकं विधाय शुक्ले वाससी परिधाय शुद्धासने समुपविश्याऽऽचम्य कर्मपात्रं कृत्वा कुशतिलजलमादाय-

व्रतसंकल्पः (तिल, जौ, कुश लिई सङ्कल्प गर्ने)

हरि ॐ तत्सदित्यादि पूर्वसङ्कल्पमुच्चार्य (अमुक) गोत्रः (अमुक) शर्माहं श्रीमहाविष्णुप्रीतिद्वारा जन्मोपार्जित समस्तपापक्षयार्थं (अमुक) एकदशी- (निराहार) व्रतं करिष्ये । इति सङ्कल्प्य केशवं मनसा ध्यात्वा जलकुशयवतिलसहितं ताम्रस्थाली पुष्पं वा हस्ताभ्यामादाय व्रतसङ्कल्पं कुर्यात् ।

एतद्गृहीतं गोविन्द ! मया त्वत्पुरतो व्रतम् । सिद्धिं गच्छतु निर्विघ्नं तव पादानुकम्पया ।
यथा चञ्चलचित्तोऽहं लोभमोहमयो नरः । शक्तोऽहं तद् व्रतं कर्तुं तव चानुग्रहोऽस्तु मे ॥
एकादश्यां निराहारः स्थित्वा चैव परेऽहनि । भोक्ष्यामि पुण्डरीकाक्ष ! शरणं मे भवाव्यय ॥

इति पठित्वा ताम्रस्थालीं पुष्पादिकं वा भूमौ निधाय दण्डवत् प्रणमेत् । इति व्रतसङ्कल्पः ।

एकादशीव्रतपूजा (दियो बाल्ने र सर्स्यूं छर्कने)

ततः सोपवासो विष्णुं स्मरन् दिनं निनयेत् । ततः सायं प्रक्षालितपाणिपादः धौते वाससी परिधाय पूजास्थांनमागत्य शुद्धासने उपविश्य पवित्रपाणिराचम्य दीपं प्रज्वाल्य प्राणानायम्य परितः सर्षपतिलाक्षतान् विकीर्य भूतादिकमपसार्य स्वेष्टदेवतां ध्यात्वा- (नमस्कार गर्ने)

ॐ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ (स्वस्तिवाचन पढ्ने)

इति विष्णुं प्रणम्य 'आनो भद्रेत्यादि' स्वस्तिवाचनमन्त्रान् पठित्वा विनायकं नमस्कृत्य कर्मपात्रं कुर्यात्-
ताम्रपात्रं स्वस्य दक्षिणतो निधाय हस्तेन स्पृष्टवा- 'ॐ यद्देवा देवहेडनम्' इति देवानावाह्य 'ॐ पवित्रे स्थः' इति पवित्रं क्षित्वा 'ॐ शन्नोदेवीः' इति जलम् । 'ॐ गन्धद्वाराम्' इति चन्दनम् । 'ॐ अक्षन्नमीमदन्त' इत्याक्षतान् 'ॐ तिलोसि' इति तिलान् । 'ॐ यवोसि' इति यवान् । 'ॐ श्रीश्चते' इति पुष्पं क्षिपेत् । तत् कुशत्रयसहितं कर्मपात्रोदकमादाय 'ॐ अपवित्रः पवित्रो वा' इति मन्त्रेणात्मानं पूजासामग्रीं च प्रोक्ष्य प्रायश्चित्तगोदानं कुर्यात् । (कर्मपात्र बनाई गोदान गर्ने)

प्रतिज्ञासङ्कल्प (प्रतिज्ञासङ्कल्प गर्ने)

हरि ॐ तत्सत् ३ ॐ विष्णुः ३ ॐ अद्येहेत्यादि देशकालौ स्मृत्वा (अमुक) गोत्रः (अमुक) शर्माहं श्रीमहाविष्णुप्रीतिद्वारा जन्मजन्मोपार्जितसमस्तपापक्षयपूर्वकधर्मार्थकाममोक्षादिचतुर्विधपुरुषार्थसिद्धयर्थं श्री (अमुक) एकदशी (निराहार)

व्रताङ्गत्वेन दीपकलशगणेशपूजनं श्रीलक्ष्मीनारायणपूजनं, एकदशीपूजनं च यथामिलितोपचारैरहं करिष्ये । इति सङ्कल्पं कुर्यात् ।

अर्घ्यंस्थापनम्

(अर्घ्य स्थापन गर्ने)

भूमौ स्वस्य पुरतः किञ्चित् वामे त्रिकोणवृत्तात्मकं मण्डलं चन्दनादिना जलेन वा विलख्य त्रिकोणे क्रमेण- ॐ कूर्माय नमः । ॐ पृथिव्यै नमः । ॐ अनन्ताय नमः । मध्ये- ॐ आधारशक्तये नमः । इति सम्पूज्य वामे अर्घ्यं दक्षिणे शङ्खार्घ्यपात्रं संस्थाप्य-

(अर्घ्य पूजा गर्ने)

ॐ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे । तेन सत्येन देवेश तीर्थं देहि दिवाकर ॥

इति सूर्यमण्डलात् अङ्कुशमुद्रया तीर्थमावाह्य-

(मुद्रा वनाई अर्घ्यमा देखाउने)

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धु कावेरी जलेऽस्मिन् सन्निधिं कुरु ॥

इति अर्घ्यपात्रे जलं, दुग्धं, यव-कुश-दूर्वा-सर्षप-दधि-अक्षता-तिल-फलादिकं च प्रक्षिप्य गन्धपुष्पादिभिः पूजयेत्। ततो दीपं कलशं गणेशं च यथाविधि सम्पूज्य धूपदीपनैवेद्यादिकं च समर्पयेत् । (दियो, कलश, गणेश पूजा गर्ने)

पीठपूजा

(चन्दन, अक्षता, फूलले पूजा गर्ने)

ततोऽष्टदलमध्ये पूर्वादिक्रमेण पीठपूजां कुर्यात

(अष्टदलमा पूर्वको कोठावाट क्रमैले पूजा गर्ने)

पूर्वे- ॐ विमले इहागच्छेह तिष्ठेत्यावाह्य ॐ विमलायै नमः, इति पाद्यादिभिरुपचारैः पूजयेत् । एवं क्रमेण आग्नेये - ॐ उत्कर्षिण्यै नमः । दक्षिणे - ॐ क्रियायै नमः । नैर्ऋत्ये - ॐ यज्ञायै नमः । पश्चिमे - ॐ योगायै नमः । वायव्ये - ॐ प्रध्यै नमः । उत्तरे - ॐ सत्यायै नमः । ईशाने - ॐ ईशान्यै नमः । मध्ये - ॐ अनुग्रहायै नमः । ॐ नमो भगवते विष्णुदेवाय योगपद्मपीठाय नमः ॥

आवरणदेवतापूजा

(चन्दन अक्षता फूलले पूजा गर्ने)

ततः पूर्वदले- ॐ सुदर्शनाय नमः । इति मन्त्रेण पाद्यादिनमुस्कारान्तैः सुदर्शनं पूजयेत् ॥ आग्नेयदले- ॐ पाञ्चजन्याय नमः । दक्षिणे- ॐ कौमोदक्यै नमः । नैर्ऋत्ये- ॐ पद्मायै नमः । पश्चिमे- ॐ चर्मणे नमः । वायव्ये- ॐ खड्गाय नमः । उत्तरे- ॐ शार्ङ्गधनुषे नमः । ईशाने- ॐ वाणाय नमः । मध्ये- ॐ पाशाय नमः ॥

द्वारपालपूजा

(चन्दन, अक्षता, फूलले पूजा गर्ने)

पूर्वादिक्रमेण पूर्वे - ॐ जयाय नमः, आग्नेये- ॐ विजयाय नमः । दक्षिणे- ॐ नन्दाय नमः । नैर्ऋत्ये- ॐ सुनन्दाय नमः । पश्चिमे- ॐ बलाय नमः । वायव्ये- ॐ प्रबलाय नमः । उत्तरे- ॐ सुशीलाय नमः । ईशाने- ॐ पुण्यशीलाय नमः ।

दशदिक्पालपूजा

(चन्दन, अक्षता, फूलले पूजा गर्ने)

दशदिक्षु पूर्वादिक्रमेण- ॐ इन्द्राय नमः । ॐ अग्नये नमः । ॐ यमाय नमः । ॐ निर्ऋतये नमः । ॐ वरुणाय नमः । ॐ वायवे नमः । ॐ कुबेराय नमः । ॐ ईशानाय नमः । ॐ ब्रह्मणे नमः । ॐ अनन्ताय नमः । इति

दिक्पालपूजा । एवं वज्र शक्ति दण्ड खड्ग पाश अङ्कुश गदा शित्रूल कमण्डलु सुदर्शनाद्यायुधान् पूजयेत् ।

लक्ष्मीनारायणपूजा (प्रधानदेवता) (चन्दन, अक्षता, फूल लिई छुने)

लक्ष्मीनारायण-प्रतिमामग्नौ तापयित्वा पञ्चगव्येन जलेन च स्नापयित्वा पात्रान्तरे निधाय प्रतिमाया उपरि दुग्धधारां जलधाराञ्च पातयन्- 'ॐ समुद्रस्यत्वा...' 'ॐहिमस्य त्वा...' इत्यादिमन्त्रान् पठेत् । ततः प्रतिमामुत्तार्य मध्यकलशोपरि निहितायां स्थाल्यां निधाय प्रतिमायां (देवस्य हृदि) अङ्गुष्ठं दत्त्वा- ॐ आँ ह्रीँ, क्रौँ ॐ एतन्ते- 'ॐ मनोजूति..' इत्यादि मन्त्रान् पठित्वा प्राणप्रतिष्ठां कुर्यात् । ततः सप्रणवगायत्रीं श्रावयित्वा 'लक्ष्मीसहितनारायणाय नमः' इत्युच्चार्य ध्यायेत्-

आसीनं हेमपीठे जलनिचिततयालंकृतं क्रोडदेशे । विद्युल्लेखोज्ज्वलाभ्रद्युतिरुचिरतनुं दीर्घदोर्भिश्चतुर्भिः ॥
नित्यं विभ्राजमानं सकलमुनिगणैः सायुधं पद्मनेत्रं । पश्यन्तं श्रीसरसिजमनिशं तं भजेऽपाङ्गदृष्ट्या ॥

इति ध्यात्वा लक्ष्मीनारायणं पुरुषसूक्तेन षोडशोपचारैः पूजयेत्-

आवाहनम्- (आवाहन गर्ने)

आगच्छ भगवन् देव सहितः श्रीपते श्रिया । पूजां गृहाण देवेश मम भक्त्या प्रयच्छत ॥

आसनम्- (आसन राख्ने)

सर्वलक्षणसम्पन्नं लक्ष्म्या सह जगद्गुरो ! अस्मिन् वरासने तिष्ठ यावत्पूजां करोमि ते ॥
समस्तलोकविख्यातं कीर्त्या नारायण प्रभो ! ब्रूहि मे कुशलं सर्वं सर्वज्ञोऽसि सुरार्चित ॥

पाद्यम्- (जल चढाउने)

पाद्यं गृहाण देवेश ! नारायण सुवासितम् । पापौघचारुसंहारि पवित्रमतिशीतलम् ॥

अर्घ्यम्- (अर्घ्य चढाउने)

अर्घ्यं ददामि ते विष्णो ! दूर्वापल्लवसंयुतम् । अखण्डतण्डुलोपेतं पुण्डरीक नमोऽस्तु ते ॥

आचमनीयम्- (जल चढाउने)

इदमाचमनीयं तु सुपवित्रं ददामि ते । गृहाण परमानन्द परामानन्दवर्द्धनम् ॥

मधुपर्कम्- (दही, घ्यू, मह मिसाएर चढाउने)

मधुपर्कीमिमं देव दध्याज्यमधुसाधितम् । कांस्यपात्रस्थितं विष्णो ! कल्पयामि प्रसीद मे ॥

पुनराचमनीयम्- (जल चढाउने)

उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रतः । शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥

पञ्चामृतम्- पयसा-

देवाद्यैर्तिर्मिता धेनुः सर्वपापप्रणाशिनी । तत्क्षीरस्नापितो देव नित्यं मे वरदो भव ॥

दध्ना- (दही चढाउने)

कामतोऽकामतो वापि यन्मया दुष्कृम् कृतम्। तत्सर्वं विलयं यातु दधिस्नानेन कामद ॥

घृतेन- (घिउ चढाउने)

रसानामुत्तमं त्वाज्यं देवानां च सदा प्रियम्। तेन त्वं स्नापितो देव निधिकान्तिप्रदो भव ॥

मधुना- (मह चढाउने)

यस्य स्मणमात्रेण तृप्तिं यान्ति पितामहाः। मधुना स्नापितो देव ! नित्यं शोकहरो भव ॥

शर्करया- (सखर चढाउने)

यमलोकभयात् त्रस्तः शरणं त्वां गतः प्रभो। खण्डस्नानेन देवेश मां कुरुष्व सुखान्वितम् ॥

जलेन- (जल चढाउने)

गङ्गा च यमुना चैव नर्मदा च सरस्वती। तापी पयोष्णी रेवा च ताभ्यः स्नानार्थमाहृतम् ॥

वस्त्रम्- (वस्त्र चढाउने)

सोत्तरीयमिदं वस्त्रं वस्त्रश्रेणीसुशोभनम्। लक्ष्मीनारायणो देवः प्रीयतां पीतवाससा ॥

उपवीतम्- (जनै चढाउने)

सौवर्णतन्तुग्रथितं ब्रह्मसूत्रं सुशोभनम्। त्रयीमयं गृहाणेदं त्रिगुणात्मकमीश्वर ॥

चन्दनम्- (चन्दन चढाउने)

मया दत्तेन गन्धेन जरामरणनाशनम्। तवास्तु भूषितं गात्रं लक्ष्मीनाथ ! सुगन्धिना ॥

अक्षता - (अक्षता चढाउने)

अक्षतान् धवलान् देव ! गृहाण वरदर्षभ ! सर्वदेवोत्तमस्त्वं हि चाक्षयं कुरु मे फलम् ॥

पुष्पाणि- (फूल चढाउने)

गृहाण कुसुमं देव ! सामोदं विकचं हरे ! कालदेशोद्भवं दिव्यं पुष्पाणि प्रतिगृह्यताम् ॥

ततो लक्ष्मीनारायणप्रतिमासमीपे अमुक नाम्नि एकादश्यै नमः इति नाममन्त्रेण षोडशोपचारैः पूजयेत्।

अङ्गपूजा- (चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ दामोदराय नमः पादौ पूजयामि। ॐ माधवाय नमः जानुनी पूजयामि।

ॐ कामपतये नमः। गुह्यं पूजयामि। ॐ वामनाय नमः। कटिं पूजयामि।

ॐ नारायणाय नमः। उदरं पूजयामि। ॐ सुरेश्वराय नमः नाभिं पूजयामि।

ॐ ज्ञानगम्याय नमः। हृदयं पूजयामि। ॐ श्रीकण्ठाय नमः। कण्ठं पूजयामि।

ॐ सहस्रबाहवे नमः बाहू पूजयामि। ॐ सहस्राक्षाय नमः नेत्रे पूजयामि।

ॐ योगयोगिने नमः मुखं पूजयामि । ॐ सर्वकामदाय नमः दन्तान् पूजयामि ।
ॐ मुरलीधराय नमः ललाटं पूजयामि । ॐ सर्वेशाय नमः । श्रोत्रे पूजयामि ।
ॐ सहस्रशिरसे नमः । शिरः पूजयामि । ॐ महाविष्णवे नमः सर्वाङ्गं पूजयामि ।

इति अङ्गपूजा ।

धूप (धूप वाल्ने)

सृष्टोऽयं विधिना पूर्वं देवानां तुष्टिवृद्धये । अतस्तुभ्यं सुरश्रेष्ठ ! धूपोऽयं दीयते मया ॥

दीप (वत्ती वाल्ने)

तमसस्तोमसंहर्ता घृतपूर्णो जनार्दन ! तवास्तु प्रीतये दीप एष शेषभुजङ्गम ! ॥

नैवेद्यम् (नैवेद्य चढाउने)

अन्नं चतुर्विधं स्वादु भूतानां जीवनं परम् । नैवेद्यं ते मया दत्तं देवेश प्रतिगृह्यताम् ।

आचमनीयम् (जल चढाउने)

कर्पूरवासितं तोयं गङ्गायास्तु समाहृतम् । आचम्यतां जगन्नाथ ! प्रणतार्तिहर प्रभो ॥

ताम्बूलम् (पान सुपारी चढाउने)

मुखदुर्गन्धिहरणं कर्पूरेण समन्वितम् । गृहाण विष्णो ताम्बूलं कैवल्यद सह श्रिया ॥

फलम् (फल चढाउने)

इदं फलं मया देव ! स्थापितं भवदग्रतः । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

करोद्वर्तनम् (जल चढाउने)

'इदं विष्णुः' इति, 'विष्णोरराटमसी' इति द्वाभ्याम् । नारिकेल लवंग जातिफलादीनि समर्प्य ॥

दक्षिणा (द्रव्य चढाउने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

आदर्शम् (ऐना देखाउने)

वृतश्चैवोपचारेषु जलप्राधानिकेषु च । गृह्ण गात्रावलोकार्थं दर्पणं च सुरेश्वर ! ॥

व्यजनम्, आभूषणानि, क्षत्राणि च 'इदं विष्णुरिति' मन्त्रेण समर्पयेत् । (गरगहना चढाउने)

चामरम् (चामर डोलाउने)

शशाङ्करसंकाश हेमडिण्डिरपाण्डूर । प्रोत्सारयासु दुरितं चामरामरवल्लभ ॥

नमस्कारः (नमस्कार गर्ने)

नमःसर्वहितार्थय जगदाधारहेतवे । साष्टाङ्गोऽयं प्रणामस्तु प्रयत्नेन मया कृतः ॥

प्रदक्षिणा (प्रदक्षिणा गर्ने)

अनेकजन्मस्वपि तत्कृतानि पापानि सर्वाण्यपि यानि कानि । नाशं प्रयान्त्वद्य हि तानि देव ! प्रदक्षिणाभिस्तु भवत्कृताभिः ॥ ॐ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि नश्यन्तु प्रदक्षिणपदे पदे ॥

नीराजनम् (नीराजन वत्ती बालेर अर्पण गर्ने)

दीपावली मया दत्ता गृहाण परमेश्वर ! आरार्तिक्यप्रदानेन मम तेजः प्रदो भव ॥

पुष्पाञ्जलि (फूल अक्षता लिएर नमस्कार गर्ने)

देवदेव जगन्नाथ गोपाल प्रतिपालक । गोपदैः कृतसन्त्राण गृहाण कुसुमाञ्जलिम् ॥
नमो नमस्ते गोविन्द नमस्ते अमरप्रिय ! पुष्पाञ्जलिर्मया दत्ता गृहाण परमेश्वर ! ॥

क्षमापनम् (क्षमा माग्ने)

मन्त्रहीनं क्रियाहीनं विधिहीनं च यद् भवेत् । तत्सर्वं क्षम्यतां विष्णो प्रसीद करुणानिधे ॥
अज्ञानात् विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् । विपरीतं तु तत्सर्वं क्षमस्व परमेश्वर ! ॥

विशेषार्घ्यम् (अर्घ्य दिने)

शङ्खे रौप्यपात्रे वा फलं चन्दनं पुष्पं दधिदूर्वाक्षतादीनि क्षिप्त्वा–
फलान्नं चैव शुभ्रं च भक्तियुक्तेन चेतसा । गृहाणार्घ्यमिमं देव लक्ष्म्या सह जगद्गुरो ! ॥
इदमर्घ्यम् समर्पयामि लक्ष्मीसहितनारायणाय नमः । अमुकनाम्न्यै एकादश्यै नमः ॥ अनेनैव विधिना-पाद्यादिभिरुपचारैः एकादशीं च पूजयेत् ।

चन्द्रार्घ्यदानम् (चन्द्रमालाई अर्घ्य दिने)

अत्रिनेत्रसमुद्भूत क्षीरोदार्णवसम्भव । गृहाणार्घ्यं मया दत्तं रोहिणीसहित प्रभो ! ॥

विसर्जनम् (विसर्जन गर्ने)

रात्रौ जागरणं कृत्वा प्रभाते विसर्जनं कुर्यात्-
आवाहनं न जानामि न जानामि विसर्जनम् । मन्त्रपूजां न जानामि क्षमस्व परमेश्वर ! ॥
क्षमस्व देवदेवश ! नारायण सुरोत्तम ! वरं देहि सुरश्रेष्ठ ! दासोऽहं सर्वदा तव ॥
धेनुमुद्रां प्रदर्श्य संहारमुद्रया पुष्पमीशाने प्रक्षिपेत् । नैवेद्यं किञ्चिदीशाने देयम् ॐ निर्माल्यभोजिविष्वक्सेनाय नमः ।

पूर्णपात्रदानम् (पूर्णपात्र गर्ने)


पूर्वोक्तसङ्कल्पमुच्चार्य अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणो मम श्रुतिस्मृतिपुराणोक्त-फलावाप्तये कृतैतद् दीपकलशगणेशपूजनपूर्वकं लक्ष्मीनारायण-एकादश्यादिदेवतापूजन-कर्मणः साङ्गतासिद्धचर्थं न्यूनाति-रिक्तपरिपूर्णार्थं पूर्णपात्रं प्रजापतिदैवताकं यथानामगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ॥

प्रार्थना (नमस्कार गर्ने)

त्रैलोक्यनाथो देवेश शंख-चक्र-गदाधर । दानेनानेन सुप्रीतः प्रसन्नो भव सर्वदा ॥
यान्तु देवगणाः सर्वे पूजामादाय मामिकाम् । इष्टकामप्रसिद्धयर्थं पुनरागमनाय च ॥

दक्षिणा (दक्षिणासङ्कल्प गर्ने र विसर्जन गर्ने)

अद्येत्यादि देशकालादि सङ्कीर्त्य अमुकगोत्रस्यामुकशर्मणो मम सकल-जन्मोपार्जित-पापक्षयार्थं श्रीलक्ष्मीनारायणप्रीतये श्रीवष्णुलोक-कामनयाऽ अमुकैकादशी-कृतसोपवासजा-गरण-पूर्वकं श्रीविष्णुपूजनकर्मणः सांगतासिद्ध्यर्थम् अमुकद्रव्यममुकदैवताकं यथानाम-गोत्राय यथानामशर्मणे ब्राह्मणाय दक्षिणात्वेन दातुमहमुत्सृजे। कायेनवाचा..... इति विसर्जयेत् । ततोऽभिषेकादिकं गृहीत्वा ब्राह्मणान् सन्तोषयेत् ॥



॥ इति एकादशीव्रतपूजाविधिः ॥

॥ श्रीगणेशाय नमः ॥

पूर्णिमाव्रतम्

चन्द्रपूजाविधिः

(कर्मपात्र पूजा गरी गोदान गर्ने)

पूर्णिमायां उपविश्याऽऽचम्य दीपं प्रज्ज्वाल्य सर्षपान् विकीर्य कर्मपात्रं विधाय प्रायश्चित्तं कृत्वा प्रतिज्ञासङ्कल्पं कुर्यात्-

प्रतिज्ञासङ्कल्पः

(प्रतिज्ञासङ्कल्प गर्ने)

हरिः ॐ तत्सत् ॐ विष्णुः ३ इत्यादि देशकालौ स्मृत्वा अहं श्रीपरमेश्वरप्रीतिद्वारा आजन्मोपार्जितसमस्तपापक्षय ग्रहपीडाविविधोसर्गभयव्याध्यादिसकलदोषनिवृत्तिपूर्वकम्, आयुरारोग्यधनधान्यपुत्रपौत्रादिसम्पत्यसमृद्धये अखण्ड-सौभाग्यविवृद्धये दीपकलशगणेशपूजनपूर्वकं श्रीलक्ष्मी-नारायणपूजनं षोडशकलात्मकचन्द्रपूजनं च करिष्ये ।

ततोऽर्घ्यं संस्थाप्य संपूज्य, दीपं कलशं गणेशं च यथाविधिः सम्पूजयेत् । (दियो, कलश, गणेश पूजा गर्ने)

चन्द्रपूजा

(चन्दन, अक्षता, फूलले पूजा गर्ने)

स्थाल्यां चन्दनादिना सकर्णिकमष्टपत्रं तद्बहिः षोडशपत्रं तद्बहिरष्टाविंशति-पत्रात्मकं वृत्तं तद्बहिः कान्तिमालावृत्तम्, अथवा षोडशदलात्मकं चन्द्रविम्बं विलिख्य भूमौ धान्यं संस्थाप्य तदुपरि स्थालीं निधाय स्थालीमध्ये रजतनिर्मितं चन्द्रबिम्बं संस्थाप्य, स्वमस्तकम् अमृताधारं चन्द्रं ध्यात्वा मूलमन्त्रेणाञ्जलित्रयं दत्त्वा पीठपूजां कुर्यात्-

(कलशमा थाली राखेर पीठ पूजा गर्ने)

ॐ मूलप्रकृतये नमः । ॐ आधार शक्तये नमः । ॐ कूर्माय नमः । ॐ अनन्ताय नमः । ॐ पृथिव्यै नमः । ॐ श्वेतद्वीपाय नमः । ॐ कल्पवृक्षाय नमः । ॐ रत्नमण्डपाय नमः । ॐ सिंहासनाय नमः ।

ततः पूर्वादिदिक्षु आवाहनादिक्रमेण पूजयेत्-

(पूर्वदेखि चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ अधर्माय नमः । ॐ अज्ञानाय नमः । ॐ अवैराग्याय नमः । ॐ अनैश्वर्याय नमः । मध्ये- ॐ आत्मने नमः । ॐ अन्तरात्मने नमः । ॐ ज्ञानात्मने नमः । ॐ परमात्मने नमः । ॐ अग्निमण्डलाय नमः । ॐ सोममण्डलाय नमः । ॐ सूर्यमण्डलाय नमः । ॐ सं सत्त्वरूपाय नमः ।

ततोऽष्टदलेषु- ॐ अमृतायै नमः । ॐ तारकायै नमः । ॐ ज्योत्स्नायै नमः । ॐ विमलायै नमः । ॐ व्यापिन्यै नमः । ॐ चित्रायै नमः । ॐ कृत्तिकायै नमः । ॐ कान्त्यै नमः । मध्ये- ॐ श्रवणायै नमः ।

ततः 'ॐ सौं अमृतकलात्मने संवित्पीठाय नमः' इति पीठे पुष्पाञ्जलिं दत्त्वा ध्यायेत्-

ॐ कुन्दकर्पुरसंकाशं श्वेतपद्मकरद्वयम् । एकास्यं द्वीक्षणं सौम्यं श्वेतांशुं मणिभूषितम् ॥
सप्तहस्तं विमानस्थं रोहिण्यासहितं स्मितम् । सशक्तिं सायुधं साङ्गं कलाषोडशभिर्युतम् ॥

आत्मसंस्थमजं शुद्धं त्वामहं परमेश्वर । अरण्यामिव हव्याशं मूर्तावावाहयाम्यहम् ॥
देवेश भक्तिसुलभ परिवारसमन्वित । यावत्त्वां पूजयिष्यामि तावत्त्वं सन्निधौ भव ॥
इति ध्यात्वा (प्राणप्रतिष्ठा गर्ने)

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ँ समिमन्दधातु । विश्वे देवासऽइह मादयन्तामों ३ प्रतिष्ठ ॥ भो पूर्णकलात्मक सोम इहागच्छेह तिष्ठेत्यावाह्य, प्रतिष्ठाप्य-

आसनम् (कुश राख्ने)

ॐ नानारत्नसमायुक्तं कार्तस्वरविभूषितम् । आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यताम् ॥
आसनं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

पाद्यम् (जल चढाउने)

ॐ यद्भक्तिलेशसंपर्कात्परमानन्दसम्भवः । तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये ॥
पाद्यं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

अर्घ्यम् (अर्घ्य चढाउने)

ॐ तापत्रयहरं दिव्यं परमानन्दलक्षणम् । तापत्रयविमोक्षाय तवार्घ्यं कल्पयाम्यहम् ॥
अर्घ्यं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

आचमनम् (जल चढाउने)

ॐ वेदानामपि वेदाय देवनां देवतात्मने । कल्पयामीश शुद्धाय तोयं संसुद्धिहेतवे ॥
आचमनं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ॥

मधुपर्कम् (मह, घिउ, दही मिसाएर चढाउने)

ॐ सर्वकालुष्यहीनाय परिपूर्णसुखात्मने । मधुपर्कीमिमं देव कल्पयामि प्रसीद मे ।
मधुपर्कम् समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

पुनराचमनम् (जल चढाउने)

ॐ उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रतः । शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥
पुनराचमनं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

पञ्चामृतम्

ॐ पयो दधि घृतं चैव शर्करा मधुसंयुतम् । पञ्चामृतं कल्पयामि स्नानार्थं प्रतिगृह्यताम् ॥
पञ्चामृतं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

शुद्धोदकस्नानम् (जल चढाउने)

ॐ परमानन्दबोधाब्धिनिमग्ननिजमूर्तये । साङ्गोपाङ्गमिदं स्नानं कल्पयाम्यहमीश ते ॥
शुद्धोदकस्नानं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

वस्त्रम् (कपडा चढाउने)

ॐ मायाचित्रपटच्छन्ननिजगूह्योरुतेजसे । निरावरणविज्ञान वासस्ते कल्पयाम्यहम् ॥

वस्त्रं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

उत्तरीयकम् (उपर्ना वस्त्र चढाउने)

ॐ यमाश्रित्यमहामाया जगत्संमोहनी सदा । तस्मै ते परमेशाय कल्पयाम्युत्तरीयकम् ॥

उत्तरीयकम् समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

यज्ञोपवीतम् (जनै चढाउने)

ॐ यस्य शक्तित्रयेणेदं संप्रोततमखिलं जगत् । यज्ञसूत्राय तस्मै ते इदं सूत्रं प्रकल्पये ॥

यज्ञोपवीतं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

आभूषणानि (गरगहना चढाउने)

ॐ स्वभावसुन्दराङ्गाय पीताम्बरधराय च । भूषणानि विचित्राणि कल्पयाम्यमरार्चित ॥

आभूषणानि समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

चन्दनम् (चन्दन चढाउने)

ॐ परमानन्दसौरभ्य परिपूर्णदिगन्तर । गृहाण परमं गन्धं कृपया परमेश्वर ॥

गन्धं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

पुष्पाणि

ॐ तुरीयवनसम्भूतं नानागुणमनोहरम् । अमन्दसौरभं पुष्पं गृह्यतामिदमुत्तमम् ॥

पुष्पाणि समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

अक्षता (अक्षता चढाउने)

ॐ अक्षतान्धवलान्देव गृहाण वरदर्षभ । सर्वदेवोत्तमस्त्वं हि अक्षयं कुरु मे फलम् ॥

अक्षतान् समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

अङ्गपूजा (चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ सोमाय नमः । पादौ पूजयामि । ॐ आनन्ददात्रे नमः । जङ्घे पूजयामि । ॐ जलोदराय नमः । ऊरू पूजयामि । ॐ अनङ्गराजाय नमः । मेढ्रं पूजयामि । ॐ कामसुखप्रदाय नमः । कटिं पूजयामि । ॐ अमृतोदराय नमः । उदरं पूजयामि । ॐ विधिलोचनाय नमः । नाभिं पूजयामि । ॐ चन्द्राय नमः । मुखं पूजयामि । ॐ द्विजाधिपतये नमः । दन्तान् पूजयामि । ॐ चन्द्रमसे नमः । आस्यं पूजयामि । (मुखमण्डलम्) । ॐ कुमुदप्रियाय नमः । ओष्ठौ पूजयामि । ॐ वनौषधीनां पतये नमः । नासां पूजयामि । ॐ आनन्दमूर्तये नमः । पुनर्भवान् पूजयामि (पुनरागतान् दन्तान्) । ॐ इन्दीवरश्यामकराय नमः । नेत्रद्वयं पूजयामि । ॐ समस्तामरवन्दिताय

नमः । करौ पूजयामि । ॐ दैत्यनिषूदनाय नमः । कर्णद्वयं पूजयामि । ॐ उदधिप्रियाय नमः । ललाटं पूजयामि । ॐ सुषुमणाधिपतये नमः । केशान् पूजयामि । ॐ शशाङ्काय नमः । शिरः पूजयामि । ॐ पूर्णचन्द्राय नमः । सर्वाङ्गं पूजयामि ।

आवरणपूजा (पूर्वदेखि चन्दन, अक्षता, फूलले पूजा गर्ने)

पूर्वादिक्रमेण- ॐ रोहिण्यै नमः । ॐ कृत्तिकायै नमः । ॐ रेवत्यै नमः । ॐ भरण्यै नमः । ॐ रात्र्यै नमः । ॐ आर्द्रायै नमः । ॐ ज्योत्स्नायै नमः । ॐ कलायै नमः । मध्ये- ॐ हारसमप्रभायै नमः ।

पुनः पूर्वादिक्रमेण- (फेरि पूजा गर्ने)

ॐ आदित्याय नमः । ॐ मङ्गलाय नमः । ॐ बुधाय नमः । ॐ शनये नमः । ॐ बृहस्पतये नमः । ॐ राहवे नमः । ॐ शुक्राय नमः । ॐ केतुभ्यो नमः ।

षोडशकलापूजा (फूल, अक्षताले पूजा गर्ने)

ततः षोडशपत्रेषु चन्द्रस्य षोडशकलाः पूर्वादिक्रमेण पूजयेत्-

ॐ अमृतायै नमः । ॐ मानदायै नमः । ॐ पूषायै नमः । ॐ पुष्टयै नमः । ॐ तुष्ट्यै नमः । ॐ रत्यै नमः । ॐ धृत्यै नमः । ॐ शशिन्यै नमः । ॐ चन्द्रिकायै नमः । ॐ कान्त्यै नमः । ॐ ज्योत्स्नायै नमः । ॐ श्रियै नमः । ॐ प्रीत्यै नमः । ॐ अङ्गदायै नमः । ॐ पूर्णायै नमः । ॐ पूर्णामृतायै नमः ।

ततो बहिरष्टाविंशतिबिन्दुषु पूजयेत् (चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ रोहिण्यै नमः । ॐ मृगशिरसे नमः । ॐ आर्द्रायै नमः । ॐ पुनर्वसवे नमः । ॐ तिष्याय नमः । ॐ अश्लेषायै नमः । ॐ मघायै नमः । ॐ पूर्वाफाल्गुन्यै नमः । ॐ उत्तरफाल्गुन्यै नमः । ॐ हस्ताय नमः । ॐ चित्रायै नमः । ॐ स्वात्यै नमः । ॐ विशाखायै नमः । ॐ अनुराधायै नमः । ॐ ज्येष्ठायै नमः । ॐ मूलाय नमः । ॐ पूर्वाषाढायै नमः । ॐ उत्तराषाढायै नमः । ॐ अभिजिते नमः । ॐ श्रवणाय नमः । ॐ धनिष्ठायै नमः । ॐ शतभिषजे नमः । ॐ पूर्वभाद्रपदायै नमः । ॐ उत्तरभाद्रपदायै नमः । ॐ रेवत्यै नमः । ॐ अश्विन्यै नमः । ॐ भरण्यै नमः । ॐ कृत्तिकायै नमः ।

इत्यावरणपूजां कृत्वा देवाय पुष्पाञ्जलिं दद्यात् (फूल चढाउने)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल । भक्त्या समर्पये तुभ्यं समस्तावरणार्चनम् ॥

धूप (धूप बाल्ने)

ॐ वनस्पतिरसो दिव्यो गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

धूपं आघ्रापयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

दीप (बत्ती बाल्ने)

ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः । सबाह्याभ्यन्तरज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥

दीपं दर्शयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

नैवेद्यम् (नैवेद्य चढाउने)

ॐ सत्पात्रसिद्धसुहविर्विविधानेकभक्षणम्। निवेदयामि देवेश सानुगाय गृहाण तत्॥

नैवेद्यं निवेदयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः।

आचमनम् (जल चढाउने)

ॐ गङ्गा च यमुना चैव नर्मदा च सरस्वती। ताभ्यो जलं मयानीतं पुनराचमनीयकम्॥

आचमनं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः।

फलम् (फल चढाउने)

ॐ इदं फलं मया देव स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥

ॐ कदलीदाडिमं धात्रीफलं च वदरीफलम्। नारङ्गं कर्कटीमिक्षु जम्बीरं बीजपूरकम्॥

ऋतुकालोद्भवं सर्वं ज्योत्स्नेश ! प्रतिगृह्यताम्। फलं सपर्मयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः।

ताम्बूलम् (पान सुपारी चढाउने)

ॐ पूगीफलंसताम्बूलंखादिरादिमनोहरम्। कर्पूरादिसमायुक्तं ताम्बूलं प्रतिगृह्यताम्॥

ताम्बूलं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः।

सुगन्धद्रव्यम् (सुगन्धद्रव्य चढाउने)

ॐ संसारार्णवसंमग्नं त्राहि मां रोहिणीपते। सुगन्धञ्च सुरश्रेष्ठ गृहाण परमेश्वर॥

सुगन्धद्रव्यं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः।

दक्षिणाम् (द्रव्य चढाउने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

दक्षिणां समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः।

नीराजनम् (नीराजन बत्ती बाल्ने)

ॐ त्वं ज्योतिः सर्वदेवानां तेजसां तेज उत्तमम्। आत्मज्योतिः परंधाम दीपोऽयं प्रतिगृह्यताम्॥

कदलीगर्भसम्भूतं घनसारं मनोहरम्। कर्पूरदीपं देवेश गृहाण सुरसत्तम॥

नीराजनं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः।

दर्पणम् (ऐना देखाउने)

ॐ दर्शनेन त्वमादर्श नूनं मङ्गलदायक। सौर्यसौभाग्यसत्कीर्तिनिर्मलज्ञानदो भव॥

दर्पणं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः।

चामरम् (चामर डोलाउने)

ॐ शशाङ्करसङ्काश हिमडिण्डिरपाण्डुर। प्रोत्सारयाशु दुरितं चामरामरवल्लभ॥

चामरं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः।

प्रदक्षिणा (प्रदक्षिणा गर्ने)

यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि प्रणश्यन्तु प्रदक्षिणपदे पदे ॥

प्रदक्षिणं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

नमस्कार (नमस्कार गर्ने)

ॐ नमः शुभ्रांशवे तुभ्यं द्विजराजपते नमः । रोहिणीपतये तुभ्यं लक्ष्मीभ्रात्रे नमोऽस्तु ते ॥

नमस्कारं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

पुष्पाञ्जलि (फूल लिएर नमस्कार गर्ने)

ॐ नमस्ते पुण्डीकाक्ष नमस्ते ह्यमरप्रिय । नमस्ते कमलाकान्त वासुदेव नमोऽस्तु ते ॥
नमः शुधांशवे तुभ्यं द्विजराजाय वै नमः । नमोऽस्तु ते निशानाथ लक्ष्मीभ्रातर्नमोऽस्तु ते ॥

पुष्पाञ्जलिं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

अर्घ्यदानमन्त्रा (अर्घ्य दिने)

ॐ विद्ये विद्यामालिनि चन्द्रिणि चन्द्रमुखि स्वाहा । ॐ क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव ॥
गृहाणार्घ्यं मयादत्तं पूर्णचन्द्र नमोऽस्तु ते । ज्योत्स्नायाः पतये तुभ्यं नमस्ते ज्योतिषांपते ॥
नमस्ते रोहिणीकान्त अर्घ्यं मे प्रतिगृह्यताम् । अत्रिनेत्रसमुद्भूत क्षीरोदार्णवसम्भव ॥
गृहाणार्घ्यं मयादत्तं रोहिणीसहित प्रभो ।

अर्घ्यं समर्पयामि ॐ पूर्णकलात्मने चन्द्रमसे नमः ।

स्तुति (नमस्कार गर्ने)

ॐ नमोऽस्त्वमृतरूपाय परमामृतवर्षिणे । जगतां जीवभूताय जीवदात्रे नमोऽस्तु ते ॥
जगत्स्रष्टे जगत्पात्रे जगत्संहृतिकारिणे । शिवरूपाय शान्ताय मृत्युरोगविनाशिने ॥
नमस्तेऽस्तु निशानाथ रोहिणीप्रियवल्लभ । नमस्ते हररूपाय कलाषोडशधारिणे ॥
त्वं व्रतं चरतामेवं वरदः सर्वदेहिनाम् । रोगमृत्युमहोत्पातग्रहशान्ति कुरुष्व नः ।
ग्रहनक्षत्रभेदं च राशिभेदं च सर्वदा । तत्सर्वं कुरु मे शान्तिं ताराधिप नमोऽस्तु ते ॥

क्षमापनम् (क्षमा माग्ने)

ॐ न्यूनातिरिक्तकर्माणि मया यानि कृतानि च । क्षमस्व तानि सर्वाणि ताराधिप नमोऽस्तु ते ॥
मन्त्रहीनं क्रियाहीनं विधिहीनं सुरोत्तम । यत्पूजितं मया देव परिपूर्णं नमोऽस्तु ते ॥

पूर्णपात्रम् (पूर्णपात्र दान गर्ने)

पूर्णादर्वीति संपूज्य कुशादिकमादाय-

ॐ अद्य पूर्वोचचारितसंकल्पसिद्धिरस्तु..... गोत्रा..... देवी अहं समस्तपापक्षयपूर्वकग्रह- पीडाविषव्याध्यादि

नानादोषनिवृत्तिपूर्वकम् आयुरारोग्यपुत्र-पौत्रधनधान्यसुखसौ-भाग्यसमृद्धयर्थं दीपकलशगणेशपूजनपूर्वकं कृतस्य लक्ष्मीनारायणषोडशकलात्मकचन्द्रपूजनकर्मणः परिपूरणार्थं इदं पूर्णपात्रं प्रजापतिदैवतं.... अमुक गोत्राय..... ।

दक्षिणादानम्

(दक्षिणा सङ्कल्प गर्ने)

ॐ अद्येत्यादि कृतैतच्चन्द्रपूजनकर्मणः साङ्गतासिद्धयर्थमिमां दक्षिणां रजतं चन्द्रदैवतं गोत्राय.... ।

ततो विसर्जनम्

(विसर्जन गर्ने)

ॐ देवाधिदेवदेवोऽसि पूजितोऽसि मया प्रभो । गच्छ देववर स्थानं यत्र नक्षत्रसंहतिः ॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर । मासमेकं विहायाशु पुनरागमनाय वै ॥
ततः कायेन वाचेति कर्मेश्वरार्पणं कुर्यात् ।



॥ इति पूर्णिमाव्रते चन्द्रपूजाविधिः ॥

॥ श्रीगणेशाय नमः ॥

दुर्गापूजाविधिः

प्रथमदिनकृत्यम् दीपकलशगणेशादिपूजनम् – (घटस्थापनाको दिन कर्मपात्र बनाई दियो, कलश, गणेश पूजा गर्ने)

सङ्कल्पः (प्रतिज्ञासङ्कल्प गर्ने)

हरिः ॐ तत्सदित्यादि पूर्वसङ्कल्पमुच्चार्य अहं मम श्री महाकाली-महालक्ष्मी महासरस्वती श्रीष्टदेवतास्वरूपिणी भगवती दुर्गादेवी-प्रीतिद्वारा सर्वपापक्षयसकलारिष्ट सर्वापच्छान्तिपूर्वकम् इह जन्मनि दीर्घायुरारोग्यविपुलधनधान्यादि-नानाविधैश्वर्यपुत्रपौत्राद्यविच्छिन्नसन्तति वृद्धि स्थिरलक्ष्मीकीर्तिलाभशत्रुपरा–जयसदभीष्टसिध्यर्थम् अपरजन्मनि श्रीभगवतीदुर्गापदप्राप्त्यर्थं शारदनवरात्राङ्गत्वेन दीपकलशगणेशपूजनं घटस्थापनं यवारोपणं स्वर्णनिर्मितप्रतिमायां प्रतिदिनं श्रीदुर्गापूजनं कुमारीपूजनं सप्तशतीपाठं श्रीशुक्लयजुर्वेदपाठं च स्वयं प्रतिनिधित्वेन ब्राह्मणद्वारा वा करिष्ये।

इति प्रतिज्ञासङ्कल्पं विधाय –

ॐ दुर्गे दुर्गे रक्षिणि स्वाहा दुर्गादेव्यै नमः। इति मन्त्रेण प्राणानायम्य न्यासं कुर्यात्।

तद्यथा आचमन्या जलमादाय (विनियोग गर्ने)

ॐ अस्य श्रीजयदुर्गामन्त्रस्य नारायणऋषि–र्गायत्रीछन्दः श्रीजयदुर्गादेवता ॐ दुर्गे दुर्गे बीजं, रक्षिणिशक्तिः, स्वाहा कीलकं, पूजादौ न्यासे विनियोगः। इति आचमन्या गृहीतं जलं भूमौ त्यजेत्। (आचमन गर्ने)

तत्रादौ ऋष्यादिन्यास (ऋषिन्यास गर्ने)

ॐ नारदऋषये नमः, शिरसि। ॐ गायत्रीछन्दसे नमः, मुखे। ॐ श्रीजयदुर्गायै देवतायै नमः, हृदि। ॐ दुर्गे दुर्गे बीजाय नमः, गुह्ये। ॐ रक्षिणिशक्तये नमः, पादयोः। ॐ स्वाहा कीलकाय नमः, सर्वाङ्गे।

अथ करन्यास (करन्यास गर्ने)

ॐ दुर्गे, अङ्गुष्ठाभ्यां नमः। ॐ दुर्गे, तर्जनीभ्यां स्वाहा। ॐ दुर्गायै, मध्यमाभ्यां वषट्। ॐ भूतरक्षिणि, अनामिकाभ्यां हुम्। ॐ दुर्गे दुर्गे, कनिष्ठिकाभ्यां वौषट्। ॐ रक्षिणि स्वाहा, करतलकरपृष्ठाभ्यां फट्। इति करन्यासः।

अथाङ्गन्यास (अङ्गन्यास गर्ने)

ॐ दुर्गे, हृदयाय नमः। ॐ दुर्गे, शिरसे स्वाहा। ॐ दुर्गायै, शिखायै वषट् ॐ भूतरक्षिणि, कवचाय हुम्। ॐ दुर्गे दुर्गे, नेत्रत्रयाय वौषट्। ॐ रक्षिणि स्वाहा, अस्त्राय फट्। इत्यङ्गन्यासः। इति न्यासान् विधाय ध्यायेत्।

ततः शङ्खघण्टादि पूजनं कुर्यात्। तद्यथा – (शङ्ख घण्टा पूजा गर्ने)

ध्यानम् (नमस्कार गर्ने)

ॐ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां । कन्याभिः करबालखेटविलसद्धस्ताभिरासेविताम् ॥
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं । बिभ्राणामनलात्मिकां शशिधरां दुर्गा त्रिनेत्रां भजे ॥
ॐ जटाजूटसमायुक्तामर्धेन्दुकृतशेखराम् । लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम् ॥
तप्तकाञ्चनवर्णाभां सुप्रतिष्ठां सुलोचनाम् । नवयौवनसम्पन्नां सर्वाभरणशोभिताम् ॥
इति ध्यात्वा यथाशक्ति मूलमन्त्रजपं विधाय । (जप गर्ने)
ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ इति जपं निवेदयेत् ।
अर्घ्यस्थापनपूर्वकं दीपकलशगणेशान् यथाविधि सम्पूज्य धूपदीपनैवेद्यानि समर्पयेत् ।
(अर्घ्य स्थापना गरी दीप, कलश, गणेश पूजा गरेर धुप वत्ती बाल्ने)

घटस्थापनम् (घडा स्थापना गर्ने)

ईशानदिग्भागेऽष्टदलं विलिख्य तदुपरि धान्यं संस्थाप्य तदुपरि घटं स्थापयेत् । तत्र दध्यक्षत-नानारागरञ्जितगोमयतिर्यगूर्ध्वाधोगतरेखान्वितं ताम्रं मृण्मयं वा विस्तीर्णघटं पुरत आनीय सबीजान् प्ररोहणसमर्थान् शुद्धान् यवान् वपेत् । (थालीमा अष्टदल लेखी घडामा राख्ने)

मन्त्र (गोवर टाँसी जौ (जमरा) राख्ने)

ॐ ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्त ँ राजन्पारयामसि ॥
इति मन्त्रेण यवान् वप्त्वा स्थापयेत् । तत्र क्रमः – (घडा कलशको मन्त्रले पूजा गर्ने)

पुनः कलशे – ॐ आब्रह्मन् ... । इति मन्त्रेण ब्रह्माणम् – (क्षेत्रपालको पूजा गर्ने)
ॐ क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि । मा त्वा हि ँ सीन्मा मा हि ँ सीः ॥ (धूपवत्ती गर्ने र नैवेद्य चढाउने)
इत्यनेन क्षेत्रपालं सम्पूज्य गणपत्यादिवनस्पत्यन्तदेवाँश्चावाह्य सम्पूज्य धूपदीपनैवेद्यादिकं च कुर्यात् ।
कलशोपरि रजतस्थाली ताम्रस्थालीं वा निधाय तत्र अष्टदलं देवीयन्त्रं नवकोणयन्त्रं वा विलिख्य तत्र स्वर्णमयीं दुर्गाप्रतिमां निधाय पूजनम् – (दुर्गाको प्रतिमा अष्टदलमा राख्ने)

दुर्गापूजनम् (प्रतिमालाई आगोमा देखाउने)

आचम्य प्राणानायम्य अग्न्युत्तारणपूर्वकं प्रतिमायां प्राणप्रतिष्ठां कुर्यात् । तद्यथा–दुर्गाप्रतिमां समानीय अग्नौ प्रताप्य पञ्चगव्येन शुद्धजलेन च प्रक्षाल्य पात्रान्तरे निधाय प्रतिमोपरिजलधारां पातयन् पठेत् – (प्रतिमालाई स्नान गराउने)
ॐ हिमस्य त्वा जरायुणाग्ने परिव्ययामसि । पावकोऽअस्मभ्य ँ शिवो भव ॥१॥ उपज्मन्नुपवेतसेवतरनदीष्वा । अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमन्नो यज्ञं पावक वर्ण ँ शिवङ्कृधि ॥२॥ अपामिदं न्ययन ँ समुद्रस्य निवेशनम् । अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्य ँ शिवो भव ॥३॥ अग्ने पावक रोचिषा मन्द्रया देव जिव्हया । आदेवान्वक्षि

यक्षि च ॥४॥ स नः पावक दीदिवोग्ने देवाँ २ ऽइहावह । उप यज्ञ ँ हविश्च नः ॥५॥ पावकया यश्चितयन्त्या कृपा क्षामन्नुरुच उषसो च भानुना । तूर्वन्न यावन्नेतशस्य नू रणऽआयो घृणेन ततृषाणोऽअजरः ॥६॥ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे अन्याँस्तेऽअस्मत्तपन्तु हेतयः । पावकोऽअस्मभ्य ँ शिवो भव ॥७॥

इत्यग्न्युत्तारणं कृत्वा वस्त्रेण सम्मार्ज्य स्थाल्यां यन्त्रमध्ये संस्थाप्य प्रतिमाया हृद्यङ्गुष्ठं दत्वा –

प्राणप्रतिष्ठा (फूल अक्षता लिएर प्रतिमालाई छुने)

ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोहं श्रीदुर्गादेव्याः प्राणा इह प्राणाः । ॐ आं ह्रीं ... श्रीदुर्गादेव्याः जीव इह स्थितः । ॐ आं ह्रीं ... श्रीदुर्गादेव्याः सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिव्हाघ्राणपाणिपाद-पायूपस्थानि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमं दधातु । विश्वे देवासऽइह मादयन्तामों ३ प्रतिष्ठ ।

इति प्राणान्प्रतिष्ठाप्य हस्ते पुष्पाञ्जलिं गृहीत्वा श्वेतद्वीपान्निजहृदयस्थलं ततो नासविवरेण हस्तस्थपुष्पाञ्जल्या-मायान्तीं सायुधां सपरिवारां सर्वालङ्कार-शोभितां निजशक्तिभिः सहितां दुर्गादेवीं ध्यायेत् –

ध्यानम् (फूल अक्षता लिएर नमस्कार गर्ने)

ॐ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासेवितां ।
हस्तैश्चक्रगदासिखेटविशिखाँश्चापं गुणं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गा त्रिनेत्रां भजे ॥

आवाहनम् (आवाहन गर्ने)

ॐ एहि दुर्गे महाभागे रक्षार्थं मम सर्वगे । आवाहयाम्यहं देवि सर्वकामार्थसिद्धये ॥
रक्षां कुरु सदा भद्रे दुर्गे देवि नमोऽस्तु ते । सर्वविघ्नहरे देवि सर्वपापप्रणाशिनि ॥
यज्ञं रक्ष महादेवि पुत्रपौत्रप्रवर्धिनि । असुराणां क्षयकरि सर्वशत्रुविनाशिनि ॥
त्वं लक्ष्मीस्त्वं च ब्रह्माणी त्वं गौरी त्वं च पार्वती । दुर्गा भगवती त्वं च चण्डी नारायणीति च ॥
कौमारी वैष्णवी चैव शारदा त्वं सरस्वती । आगच्छ वरदे देवि दैत्यदर्पनिषूदिनी ॥
पूजां गृहाण सुमुखि नमस्ते शङ्करप्रिये । सर्वतीर्थमयं वारि सर्वदेवसमन्वितम् ॥
इमं घटं समागच्छ तिष्ठ देवगणैः सह ॥
ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी । दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥
ॐ दुर्गे दुर्गे रक्षिणि स्वाहा । ॐ भो भगवति दुर्गे आगच्छ अस्मिन् घटे निजपरिवारैः सह सुखं तिष्ठ, यावत्पूजां करोमि तावत्त्वं सुस्थिरा भव । इत्यावाह्य । पुनः पुष्पाक्षतादिभिः ॐ देवीसिंहासनाय नमः । ॐ मण्डूकादिपीठदेवताभ्यो नमः । इति सम्पूज्य । ततो देव्याः परित ईशानादि विदिक्षु मध्ये च क्रमेण पूजयेत् –

(चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ विष्णवे नमः । ॐ शिवाय नमः । ॐ विनाकाय नमः । ॐ श्रीसुर्याय नमः । इति समपूज्य, ॐ देवीपरिवारेभ्यो नमः । इति पूजयेत् ।

अथासनम्

(थालीको वीचमा कुश राख्ने)

ॐ नानाप्रभासमाकीर्णं नानावर्णविचित्रितम् । आसनं कल्पितं देवि प्रीत्यर्थं प्रतिगृह्यताम् ॥

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी । दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ।

ॐ दुर्गे दुर्गे रक्षिणि स्वाहा । ॐ दुर्गादेव्यै नमः । आसनं समर्पयामि ।

पाद्यम्

(जल चढाउने)

ॐ गङ्गादिसर्वतीर्थेभ्य आनीतं तोयमुत्तमम् । पाद्यं तेऽहं प्रदास्यामि गृहाण परमेश्वरि ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा । ॐ दुर्गादेव्यै नमः । पाद्यम् समर्पयामि ।

अर्घ्यम्

(अर्घ्य चढाउने)

ॐ गन्धाक्षतैश्च सहितं फलपुष्पयुतं तव । अर्घ्यं गृहाण दत्तं मे प्रसीद परमेश्वरि ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा । ॐ दुर्गादेव्यै नमः । अर्घ्यम् समर्पयामि ।

आचमनीयम्

(जल चढाउने)

ॐ इमा आपो मया भक्त्या तव पाणितलेऽर्पिता । आचम्यतां महादेवि प्रीता शान्तिं प्रयच्छ मे ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा । ॐ दुर्गादेव्यै नमः । आचमनीयं समर्पयामि ।

स्नानीयम्

(जल चढाउने)

ॐ ज्ञानमूर्ते भद्रकालि दिव्यमूर्ते सुरेश्वरि । स्नानं गृहाण देवेशि नारायाणि नमोऽस्तु ते ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा । ॐ दुर्गादेव्यै नमः । स्नानीयमं समर्पयामि ।

मधुपर्कम्

(दही, घ्यू, मह मिसाएर चढाउने)

ॐ मधुपर्कीममं देवि दधिमध्वाज्यसंयुतम् । ब्राह्मणा निर्मितं पूर्वं गृह्ण देवि महेश्वरि ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा । ॐ दुर्गादेव्यै नमः । मधुपर्कं समर्पयामि ।

पञ्चामृतम्

(पञ्चामृत चढाउने)

ॐ पयोदधिघृतं चैव शर्करामधुसंयुतम् । पञ्चामृतं कल्पयामि प्रीत्यर्थं प्रतिगृह्यताम् ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा । ॐ दुर्गादेव्यै नमः । पञ्चामृतं समर्पयामि ।

शुद्धोदकम्

(शुद्ध जल चढाउने)

ॐ गङ्गा गोदावरी चैव यमुना च सरस्वती । ताभ्यः स्नानार्थमानीतं तोयं ते प्रतिगृह्यताम् ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा । ॐ दुर्गादेव्यै नमः । शुद्धोदकं समर्पयामि ।

उद्वर्तनम् (कपुर मिसाएको जल चढाउने)

ॐ गन्धकर्पूरसंयुक्तं कस्तूर्यादिसुवासितम्। अङ्गोद्वर्तनकं देवि गृहाण परमेश्वरि ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। उद्वर्तनं समर्पयामि।

गङ्गोदकम् (गङ्गाजल चढाउने)

ॐ परमानन्दबोधाब्धि निमग्ननिजमूर्तये। साङ्गोपाङ्गमिदं स्नानं कल्पयाम्यसुरारि ते ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। गङ्गोदकं समर्पयामि।

ततः स्नानाङ्गमाचनीयम् (जल चढाउने)

ॐ दुर्गे दुर्गे रक्षिणि स्वाहा दुर्गा देव्यै नमः। स्नानाङ्गमाचमनीयं समर्पयामि।

वस्त्रयुग्मम् (वस्त्र चढाउने)

ॐ निर्मितं तन्तुभिः सूक्ष्मैर्नानावर्णविचित्रितम्। वस्त्रं गृहाण मे देवि प्रीत्यर्थं तव युग्मकम्।

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। वस्त्रयुग्मं समर्पयामि।

सौभाग्यालङ्कारान् (सौभाग्य चढाउने)

ॐ अलङ्कारान् महादिव्यान् नानारत्नविनिर्मितान्। गृहाण देवदेवि त्वं प्रसीद सुरनायिके ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। सौभाग्यालङ्कारान् समर्पयामि।

चन्दनम् (चन्दन चढाउने)

ॐ मलयाद्रिसमुद्भूतं कुङ्कुमागुरुवासितम्। मया निवेदितं भक्त्या चन्दनं प्रतिगृह्यताम् ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। चन्दनं समर्पयामि।

सिन्दूरम् (सिन्दूर चढाउने)

ॐ उद्यदादित्यसङ्काशं स्त्रीणां सिमन्तभूषणम्। वीरालङ्करणं देवि सिन्दूरं प्रतिगृह्यताम्।

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। सिन्दूरं समर्पयामि।

अभीरकम् (अबिर चढाउने)

ॐ चन्दनागुरुकस्तूरीकुङ्कुमद्रवसंयुतम्। आभीरचूर्णं रुचिरं त्वं गृहाण दिगम्बरि ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। अभीरकं समर्पयामि।

रक्तदध्यक्षताः (रातो अक्षता चढाउने)

ॐ अक्षताश्च सुरश्रेष्ठे कुङ्कुमेन च रञ्जिताः। मया निवेदिता भक्त्या प्रीत्यर्थं प्रतिगृह्यताम् ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। रक्तदध्यक्षतान् समर्पयामि।

यवतिलाः (जौ तिल चढाउने)

ॐ शुभ्रान् यवान् कृष्णतिलान् हरिदेहसमुद्भवान्। सर्वदेवप्रियं देवि गृहाण जगदम्बिके ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। यवतिलान् समर्पयामि।

पुष्पाणि (फूल चढाउने)

ॐ तुरीयवनसम्भूतं नानागुणमनोहरम्। शारदीयमिदं पुष्पं गृह्यतां सुरवन्दिते ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। पुष्पाणि समर्पयामि।

माला (माला चढाउने)

ॐ माल्यानि च सुगन्धीनि ग्रथितानि प्रयत्नतः। मयाहृतानि पूजार्थं गृहाण वरवर्णिनि ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। मालां समर्पयामि।

बिल्वपत्राणि (वेलपत्र चढाउने)

ॐ अमृतोद्भवश्रीवृक्षपत्रमाल्यमिदं शुभम्। गृहाण परमेशानि वरदा भव सुव्रते ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। विल्वपत्राणि समर्पयामि।

अङ्गपूजा (चन्दन, अक्षता, फूलले अङ्ग पूजा गर्ने)

ॐ रक्ताक्षतपुष्पबिल्वपत्रादिकं गृहीत्वा – ॐ महाकाल्यै नमः, पादौ पूजयामि। **ॐ मङ्गलायै नमः**, गुल्फौ पूजयामि। **ॐ कात्यायन्यै नमः**, जानुनी पूजयामि। **ॐ भद्रकाल्यै नमः**, ऊरू पूजयामि। **ॐ कमलायै नमः**, कटिं पूजयामि। **ॐ शिवायै नमः**, नाभिं पूजयामि। **ॐ क्षमायै नमः**, उदरं पूजयामि। **ॐ स्कन्दायै नमः**, हृदयं पूजयामि। **ॐ नानास्त्रधारिण्यै नमः**, बाहून पूजयामि। **ॐ महिषासुरमर्दिन्यै नमः**, कण्ठं पूजयामि। **ॐ जगन्मायायै नमः**, मुखं पूजयामि। **ॐ जगन्मत्यै नमः**, दन्तान् पूजयामि। **ॐ जगद्धात्र्यै नमः**, नासिकां पूजयामि। **ॐ उमायै नमः**, नेत्रे पूजयामि। **ॐ सुरवन्दितायै नमः**, कर्णौ पूजयामि। **ॐ बिन्ध्यवासिन्यै नमः**, ललाटं पूजयामि। **ॐ सर्वेश्वर्यै नमः**, शिरः पूजयामि। **ॐ दुर्गायै नमः**, सर्वाङ्गं पूजयामि। इत्यङ्गपूजा।

धूपम् (धूप बाल्ने)

ॐ दशाङ्गं गुग्गुलं धूपं चन्दनागुरुवासितम्। मया निवेदितं भक्त्या गृहाण परमेश्वरि ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। धूपमाघ्रापयामि।

दीपम् (बत्ती बाल्ने)

ॐ आज्यं च वर्तिसंयुक्तं वन्हिना योजितं मया। दीपं गृहाण देवि त्वं त्रैलोक्यतिमिरापहम् ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। दीपं दर्शयामि।

नैवेद्यम् (नैवेद्य चढाउने)

ॐ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम्। भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। नैवेद्यं समर्पयामि।

कर्पूरंवासितम् जलम् (जल चढाउने)

ॐ कर्पूरैलासमायुक्तं स्वच्छं स्वादु सुशीतलम्। पानीयं मधुरं दत्तं तव प्रीत्यर्थमादरात्॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। पानीयं समर्पयामि।

आचमनयिम् (कपुर मिसाएको जल चढाउने)

ॐ कर्पूरवासितं तोयं गङ्गाजलसमिन्वतम्। आचम्यतां महादुर्गे कल्पितं जगदीश्वरि॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। आचमनीयं समर्पयामि।

चन्दनादिकरोद्वर्तनम् (चन्दन र कपुर मिसाएको जल चढाउने)

ॐ गन्धकर्पूरसंयुक्तं कस्तूर्यादिसुवासितम्। करोद्वर्तनकं देवि गृहाण जगदीश्वरि॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। करोद्वर्तनं समर्पयामि।

फलम् (फल चढाउने)

ॐ फलमुलानि प्राप्तानि ग्राम्यारण्यानि यानि च। तानि स्वीकुरु सर्वज्ञे ममोपरि दयां कुरु॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। फलं समर्पयामि।

ताम्बूलम् (पान सुपारी चढाउने)

ॐ पुगीफलं महद्दिव्यं नागबल्लीदलैर्युतम्। कर्पूरैलासमायुक्तं मुखवासं प्रतिगृह्यताम्।

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। ताम्बूलं समर्पयामि।

नारिकेलफलम् (नरिवल चढाउने)

ॐ इदं फलं मया देवि स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि।

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। नारिकेलफलं समर्पयामि।

दक्षिणाद्रव्यम् (दक्षिणा द्रव्य चढाउने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपूण्यफलमदमतः शान्तिं प्रयच्छ मे॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। दक्षिणाद्रव्यं समर्पयामि।

सुगन्धिद्रव्यम् (सुगन्ध द्रव्य चढाउने)

ॐ पुष्पसारमिदं स्वच्छं सुगन्धि सुमनोहरम्। प्रीतिदं सर्वलोकानां त्वं गृहाण दिगम्बरि।

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। सुगन्धिद्रव्यं समर्पयामि।

नीराजनम् (नीराजन बत्ती बाल्ने)

ॐ नीराजनं तव पुरः करोम्युज्ज्वलदीपकैः। गृहाण तिलतैलाज्यसम्भवैः शक्तिसम्मितैः॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। नीराजनं समर्पयामि।

कर्पूरार्तिक्यम् (कपुर र वत्ती वालेर आरती गर्ने)

ॐ कदलीगर्भसंभूतं विद्युदग्निसमप्रभम्। कर्पूरदीपं देवेशि गृहाण जगदम्बिके ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। कर्पूरार्तिक्यं समर्पयामि।

दपर्णम् (ऐना देखाउने)

ॐ वृत्तश्चैवोपचारेषु जलप्राघानिकेषु च। गृह्ण गात्रावलोकार्थं दर्पणं सुरसुन्दरि ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। दर्पणं दर्शयामि।

चामरम् (चामर डोलाउने)

ॐ शशाङ्ककरसङ्काशं हिमडिण्डिरपाण्डुरम्। प्रोत्सारयाशु दुरितं चामरामरवल्लभ ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। चामरं डोलयामि।

व्यजनम् (पङ्खा डोलाउने)

ॐ बर्हिबर्हकृताकारं मध्यदण्डसमन्वितम्। गृहचतां व्यजनं दुर्गे देहस्वेदापनुत्तये ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। व्यजनं दोलयामि।

ततो यथाशक्ति मूलमन्त्रं जपित्वा हस्ते जलमादाय – (ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे यथाशक्ति जप गर्ने)

ॐ गुह्यातिगुह्यगोप्तृ त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥

इति देव्या वामहस्ते जपं निवेदयेत्।

प्रदक्षिणा (प्रदक्षिणा गर्ने)

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। प्रदक्षिणं समर्पयामि।

छत्रोपानहादिकम् (छाता, जुत्ता चढाउने)

ॐ जयन्ती मङ्गला .....। ॐ दुर्गे दुर्गे रक्षिणि स्वाहा। ॐ दुर्गादेव्यै नमः। छत्रोपानहादिकं समर्पयामि।

यवारोपणम् (जमरा राख्ने)

तद्यथा – ॐ भूरसि भूमिरसि ... इति मन्त्रेण भूमिं संशोध्य ॐ अश्मा च मे मृत्तिकाश्च मे ...। इति मन्त्रेण बालुकां मृदं वा संस्थाप्य – ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः इति मन्त्रेण स्थण्डिलोपरि कुशानास्तीर्य, ॐ शन्नो देविः ... इति कर्मपात्रोदकेनाभ्युक्ष्य– (कुश राखी जल सेचन गर्ने)

ॐ पृष्टो दिवि पृष्टोऽअग्निः पृथिव्यां पृष्टो विश्वाऽओषधीराविवेश। वैश्वानरः सहसा पृष्टोऽअग्निः स नो दिवा सरिषस्पातु नक्तम्। इत्येनेन गोमूत्राक्तान् शुद्धान् यवानादाय – ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीः। ॐ जयन्ती ... इति मन्त्रौ पठन् वेद्यां विकिरेत्। ततो गन्धपुष्पादिना ॐ भगवती प्रसादरूपेभ्योकरिष्यमाणेभ्यो यवेभ्यस्तदधिष्ठात्रीदेवीदेवेभ्यश्च नमः। इति पूजयेत्। (पूजा गर्ने)

ब्राह्मणवरणम्

(ब्राह्मणवरण गर्ने)

ततो ब्राह्मणानाहूय धौतोत्तरीयगन्धपुष्पाक्षतफलादिकं गृहीत्वा वेदपाठार्थं चण्डीपाठार्थं च वृणुयात् –

ॐ अद्येह अहं मम श्रुतिस्मृतिपुराणागमोक्तफलावाप्तये श्रीमहाकाली-महालक्ष्मी-महासरस्वतीइष्टदेवतास्वरूपिणी भगवतीदुर्गादेवीप्रीतये अद्यारभ्य नवमीपर्यन्तं संपूटितसाङ्गोपाङ्गसाधारणसप्तशतीस्तोत्रपाठं यजुर्वेदपारायणं (अन्यदपि) स्तोत्रपाठं वा ब्राह्मणद्वारा (स्वयं वा) करिष्ये । इति संकल्प्य ब्राह्मणान् वृत्वा कारयेत् स्वयं वा कुर्यात् ।

कूष्माण्डबलिदानम्

(कुभिण्डो वलिदान गर्ने)

देव्यग्रे भूमौ षट्कोणं त्रिकोणं मण्डलं वा विलिख्य तत्र ॐ मण्डलदेवताभ्यो नमः इति पुष्पाक्षतैः संपूज्य लक्षणयुतं कुष्माण्डं यन्त्रोपरि स्थापयेत् । (भूमिमा षट्कोण लेखी मण्डलदेवताको पूजा गर्ने र कुभिण्डो राख्ने)

ततः कर्मपात्रोदकेन संप्रोक्ष्य ॐ कूष्माण्डबलये नमः इति संपूज्य ॐ खड्गाय नमः इति संप्रोक्ष्य संपूज्य भो खड्ग ! मया सम्पूजितोऽसि क्षमस्व इति प्रार्थयेत् । (हतियार पूजा गर्ने)

ततः कुशादीन्यादाय – (कुश जल लिई सङ्कल्प गर्ने)

ॐ अद्येह अहं सशैलवनकाननभूमिदानजन्यफलसमफलप्राप्तिकामः श्रीदुर्गादेवीप्रीत्यर्थं कूष्माण्डमहाफलाय, महामहिषरूपाय महाद्भूतदानवाय श्रीदुर्गात्रिपुरसुन्दरीमहाकालीशाकम्भरी-प्रियाय महाष्टमीनवमीसंयुताय मम सकलशत्रुदुष्टजनान् भक्षय भक्षय प्रसादं कुरु कुरु, इमं कूष्माण्डबलिं महिषमर्दिनीप्रीतये अर्पयिष्ये ।

इति सङ्कल्प्य घण्टाडमरुवाद्यघोषपूरःसरं भगवती कौशिकी कुष्माण्डवलिना आप्यायताम्, इति देव्यै समर्पयेत् ।

ततः कर्कटीक्षुदण्डमूलकबिल्वनारिकेलादिकं कुशादिसहितमादाय – (सङ्कल्प गर्ने)

ॐ अद्येह ममायुरारोग्यैश्वर्योदयाद्यनेकविधोत्तरोत्तरहर्षविजयोदयादिविवृद्धयर्थं श्रीदुर्गाभगवती प्रीत्यर्थं बल्यर्थे इमानि कर्कटीक्षुमूलकबिल्वनारिकेलादीनि अहमर्पयिष्ये । इति सङ्कल्प्य समर्पयेत् ।

पुनस्तथैव घृतपायसबटकलाजापृधुकसक्तुतण्डुलादीनि यथासम्भवं देव्यै समर्पयेत् ।

कृशरबलिदानम्

(तिल, चामल चढाउने)

देव्या ईशानदिग्भागे चतुष्कोणात्मकं नवकोष्ठमण्डलं विलिख्य कृशरबलिं वामहस्ताङ्गुष्ठेन कुशादिकं दक्षहस्तेन गृहीत्वा –

ॐ पूर्वोक्तसङ्कल्पसिद्धिरस्तु, अद्येह अहं मम श्रीदुर्गादेवीप्रीतिद्वारा नानाप्रतिबन्धनिवारणपूर्वकसकलाभीष्टसिद्धयर्थं इमं कृशरबलिं समर्पयिष्ये । इति कुशादिकं भूमौ निक्षिप्य लिखितनवकोष्ठके पूर्वादिदक्षिणावर्तक्रमेण बलिं दद्यात् – ॐ जयन्त्यै नमः । ॐ मङ्गलायै नमः । ॐ काल्यै नमः । ॐ भद्रकाल्यै नमः । ॐ कपालिन्यै नमः । ॐ दुर्गायै नमः । ॐ क्षमायै नमः । ॐ शिवायै नमः । ॐ धात्र्यै नमः । इति समर्पयेत् ।

पुष्पाञ्जलि

(फूल लिएर नमस्कार गर्ने)

ॐ शरणागतदीनार्थपरित्राणपरायणे । सर्वस्यार्ति हरे देवी नारायणी नमोऽस्तु ते ॥

ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी । दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥
इति मन्त्रैः पुष्पाञ्जलिं समर्पयेत् ।
ततो यथाशक्ति जपपाठहवनादिकं कृत्वा – (चण्डीपाठ हवन गर्ने)

ततः क्षमापनम् (क्षमा माग्ने)

(ॐ भो भगवति दुर्गे जगत्त्राणकारिणि न्यूनातिरिक्तं सर्वं क्षमस्व ।) इति क्षमाप्य दण्डवत्प्रणमेत् । ततः शक्तौ सत्यां कन्यापूजनं कुर्यात् । तद्यथा – (कन्या पूजा गर्ने)
द्विवर्षीयां कन्यामानीय कुमारीतिनाम्ना संबोध्य पादौ प्रक्षाल्य चन्दनाक्षतपुष्पमालासौभाग्यालङ्कारवस्त्रधूपदीप-नैवेद्यभक्ष्यभोज्यफलद्रव्यादिभिस्तां सम्पूज्य प्रार्थयेत् । (नमस्कार गर्ने)
ॐ जगत्पूज्ये सर्ववन्द्ये सर्वशक्तिस्वरूपिणि । पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥
इति संप्रार्थ्य प्रणम्य विसर्जयेत् । नवम्यां सकृन्नवकन्यापूजने तु तत्तन्मन्त्रानुद्धृत्य प्रार्थयेत् । इति कन्या पूजा ।
ततो घण्टाडमरुगीतवाद्यपुरःसरं समुत्थाय इक्षुखण्डादिकं प्रसादभक्षणं कुर्वन् यथा सुखं विहरेत् ।
ततः सायङ्काले – ॐ जयन्ती मङ्गलेत्यादि मन्त्रैर्धूपदीपनैवेद्यादिभिर्देव्या आरार्तिकं कृत्वा यथाशक्ति जपपाठादिकं च विधाय वाद्यघोषपुरःसरं जलेन यवाङ्कुराणि परिषिञ्चेत् । (साँझमा आरती गरी जमरामा जल छर्कने)

तत्र मन्त्रः
ॐ यव त्वं यवरूपोऽसि यज्ञार्थे निर्मितो विधेः । देवानां तृप्तिकृद्यस्मात्तस्मात्त्वं वरदो भव ॥ इति सायंकृत्यम् ।
इति प्रतिपत्कृत्यविधिः । एवं द्वितीयतृतीयादिदिनेष्वपि अनेनैव क्रमेण प्रातः कृत्यं सायं कृत्यं च सर्वं कुर्यात् ।
॥ इति प्रथमदिनकृत्यम् ॥ (पहिलो दिनको जस्तै नौ दिनसम्म गर्ने)

द्वितीयाकृत्यम्

द्वितीयदिने द्वितीयायां तिथौ कृतनित्यक्रियः पूजास्थानमागत्यासने उपविश्य आचम्य – (आचमन गरी सङ्कल्प गर्ने)
ॐ अपवित्रः पवित्रो वेति कर्मपात्रो वेति कर्मपात्रोदकेन पूजासंभारानात्मानं चाभ्युक्ष्य तत्कुशादिकमादाय – ॐ अद्येह अहं मम सकलारिष्टशान्तिपूर्वकं सर्वाभ्युदयावाप्तये श्रीमहाकालीमहालक्ष्मीमहासरस्वतीष्टदेवतास्वरूपिणी दुर्गादेवीप्रीत्यर्थं यथामिलितोपचारैर्द्वितीयदिनविहितपूजनमहं करिष्ये । इति सङ्कल्प्य मूलेन प्राणानायम्य पूर्वोक्तप्रकारेण न्यासं ध्यानं च विधाय यथाशक्ति जपं च कृत्वा निवेदयेत् । ततोऽर्घ्यपात्रे कर्मपात्रोदकेन संप्रोक्ष्य जलपञ्चामृतादिकं निक्षिप्य पाद्याद्युपचारैर्दीपकलशगणेशादीन, गणपत्यादीन्, ब्रह्माणं, क्षेत्रपालं, देवीपरिवारांश्च पूजयेत् ।

दुर्गापूजा (दुर्गा थापेको थालीमा पूजा गर्ने)

पूर्वोक्तैर्मन्त्रैः पाद्यम्, अर्घ्यं, आचमनीयम्, स्नानीयम्, मधुपर्कम्, पञ्चामृतम्, शुद्धोदकम्, सुगन्धतैलम्, उद्वर्तनम्, गन्धोदकम्, स्नानाङ्गमाचमनीयम्, वस्त्रम्, आचमनम्, सौभाग्यद्रव्यम्, चन्दनम्, सिन्दूरम्, अभीरकम्, अक्षतान्, यवतिलान्, पुष्पाणि, मालाम्, बिल्वपत्राणि च निवेद्य ततोऽङ्गपूजां कृत्वा धूपम्, दीपम्, नैवेद्यम्, पानीयम्,

आचमनम् करोद्वर्तनम्, फलम्, ताम्बूलम्, नारिकेफलम्, दक्षिणाद्रव्यम्, सुगन्धिद्रव्यम्, नीराजनम्, कर्पूरार्तिक्यम्, दर्पणम्, चामरम्, व्यजनं च क्रमेण समर्प्य किञ्चित्मूलमन्त्रं जप्त्वा जपं निवेद्य प्रदक्षिणां छत्रोपानहादिकांश्च समर्पयेत् । ततः पूर्वोक्तविधिना कूष्माण्डदानम्, कर्कटीक्षुदण्जादि, घृतपायसादि, कृशरादि बलिं, पुष्पाञ्जलिं च समर्प्य जपपाठहवनादिकं कृत्वा 'ॐ महिषघ्नि महामाये, इत्यादि पठित्वा देवीं स्तुवीत । ततो देवीं क्षमाप्य दण्डवत्प्रणमेत् । ततस्त्रिवर्षां कन्यामानीय त्रिमूर्तिनाम्ना सम्बोध्य पाद्यादिभिरुपचारैः संपूज्य विशेषेण केशसंस्कारकपट्टडोरकं दत्त्वा संभोज्य प्रार्थयेत् – (कन्यालाई नमस्कार गर्ने)

ॐ त्रिपुरां त्रिगुणां धात्रीं सुखज्ञानस्वरूपिणीम् । त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥

इति संप्रार्थ्य तां विसृज्य प्रसादं गृहीत्वा विरमेत् । सायङ्कालेऽपि पूर्ववत् ।

॥ इति द्वितीयाकृत्यम् ॥

तृतीयाकृत्यम् (दोस्रो दिनको जस्तै गर्ने)

तृतीयदिने तृतीयायां तिथौ द्वितीयदिनवत् सर्वं विधाय देव्यै दर्पणसिन्दूरालक्तकं समर्प्य चतुर्वर्षीयां कन्यामानीय कल्याणिनाम्ना संबोध्य संपूज्य संभोज्य विशेषेण दर्पणं सिन्दूरम् आलक्तकं च दत्त्वा प्रार्थयेत् – (नमस्कार गर्ने)

ॐ कालिकां तु कलातीतां कारुण्यहृदयां शिवाम् । कल्याणजननीं नित्यां कल्याणीं प्रार्थयाम्यहम् ॥

इति संप्रार्थ्य तां विसृज्य प्रसादं गृहीत्वा विरमेत् । सायङ्कालेऽपि पूर्ववत् कुर्यात् ।

॥ इति तृतीयाकृत्यम् ॥

चतुर्थीकृत्यम् (पहिलेको जस्तै गर्ने)

सर्वं द्वितीयदिनवत्कृत्वा विशेषेण देव्यै मधुपर्ककज्जलतिलकादिकं समर्प्य पञ्चवर्षीयां कन्यामानीय कामाक्षिनाम्ना संबोध्य संपूज्य भोजयित्वा विशेषेण मधुपर्ककज्जलतिलकादिकं दत्त्वा प्रार्थयेत् – (कन्यालाई नमस्कार गर्ने)

ॐ अणिमादिगुणोदारामकाराद्यक्षरात्मिकाम् । अनन्तशक्तिभेदां तां कामाक्षीं पूजयाम्यहम् ॥

इति तां विसृज्य प्रसादं गृहीत्वा विरमेत् । सायंकालेऽपि पूर्वोक्तमेव ।

॥ इति चतुर्थीकृत्यम् ॥

पञ्चमीकृत्यम् (पहिलेको जस्तै गर्ने)

द्वितीयादिदिनवत्पूजादिकं सर्वं समाप्य देव्यै अङ्गरागचक्षुः समालेपनादि समर्प्य षड्वर्षीयां कन्यामानीय गायत्रीनाम्ना संबोध्य पूजयित्वा भोजयेत् । विशेषतोऽङ्गरागं यथाशक्त्यलंकारणं च दत्त्वा प्रार्थयेत् – (नमस्कार गर्ने)

ॐ कामचारीं महामायां कारुण्यहृदयां शिवाम् । कामदां करुणोदारां गायत्रीं पूजयाम्यहम् ॥

इति संप्रार्थ्य तां विसृज्य प्रसादं गृहीत्वा विरमेत् । सायमपि पूर्ववत्कुर्यात् ।

॥ इति पञ्चमीकृत्यम् ॥

षष्ठीकृत्यम् (पहिलेको जस्तै गर्ने)

पूजनादिकं सर्वं द्वितीयादिनवत्कृत्वा देव्यै चोलकोपवस्त्रादिकं समर्प्य सप्तवर्षीयां कन्यामानीय चण्डिकेति नाम्ना

संबोध्य पूजयित्वा संभोज्य चोलकोपवस्त्रादिकं दत्त्वा प्रार्थयेत् –

ॐ चण्डवीरं चण्डमायां चण्डमुण्डप्रमर्दिनीम्। तां नमामि च देवेशीं चण्डिकां प्रार्थयाम्यहम्॥

इति प्रार्थयित्वा तां विसृज्य प्रसादं गृहीत्वा विरमेत्। सायङ्कालेऽपि पूर्ववत्कुर्यात्।

सायंकाले बिल्वनिमन्त्रणम्

(छैटौँ दिनको वेलुका वेलको निमन्त्रणा गर्ने)

षष्ठयां सायङ्काले बिल्वं निमन्त्रयेत्। तत्र क्रमः –

पूजासंभारं सम्पाद्य बिल्ववृक्षसमीपं गत्वा शुचिः पूर्वाभिमुख उत्तराभिमुखो वा उपविश्याचम्य कर्मपात्रं कृत्वा कुशजलेन पूजासामग्रीमात्मानं चाभ्युक्ष्य तत्कुशादिकमादाय – (वेलको फेदमा गएर सङ्कल्प गर्ने)

ॐ अद्येह मम अस्मिन् शारदनवरात्रदुर्गापूजोत्सवाङ्गबिल्वनिमन्त्रणकर्मणि श्रीदुर्गादेवीप्रीतये बिल्ववृक्षपूजनं दुर्गापूजनं चाहं करिष्ये। इति सङ्कल्पं विधाय दीपकलशगणेशादीन् संस्थाप्य तत्पूजाविधिना संपूज्य रक्तवस्त्रेण मूलमाच्छाद्य तत्र– ॐ भगवति दुर्गे इच्छागच्छेह तिष्ठेत्यावाहय ॐ भगवत्यै दुर्गादेव्यै नमः इति पाद्यादिनमस्कारान्तं सम्पूज्य। ॐ शरणागत ... ॐ जयन्ती ... इति मन्त्राभ्यां पुष्पाञ्जलिं निवेद्य बद्धाञ्जलिः पठेत् – (नमस्कार गर्ने)

ॐ रावणस्य वधार्थाय रामस्यानुग्रहाय च। अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा॥
अहमप्याश्विने षष्ठयां सायान्हे बोधयाम्यतः। शक्रेणापि च संबोध्य प्राप्तं राज्यं सुरालये॥
तस्मादहं त्वां प्रतिबोधयामि विभूतिराज्यप्रतिपत्तिहेतोः। यथैव रमेण हतो दशास्यस्तथैव शत्रून् विनिपातयामि॥

इति दुर्गां संबोध्य पुनः पुष्पाञ्जलिं निवेद्य पुष्पाक्षतेन बिल्ववृक्षं स्पृशन् – (फूल अक्षता लिएर बेलको फेदमा छुने)

ॐ मेरुमन्दरकैलाशहिमवच्छिखरे गिरौ। जातः श्रीबिल्ववृक्ष त्वमम्बिकाशिवयोः प्रियः॥
श्रीशैलशिखरे जात श्रीफल श्रीनिकेतन्। नेतव्योऽसि मयाऽऽगच्छ पूज्यो दुर्गास्वरूपतः॥
बिल्ववृक्ष महाभाग सदा त्वं सकलप्रियः। गृहीत्वा तव शाखां वै देवीपूजां करोम्यहम्॥
शाखाच्छेदोद्भवं दुःखं न च कार्यं त्वया विभो। देवैर्गृहीत्वा ते शाखां पूज्या दुर्गेति विश्रुतिः॥

इत्यभिमन्त्र्य, ॐ कोऽसि कतमोऽसि कस्यासि को नामासि इति मन्त्रेण बिल्ववृक्षस्य वायव्यनैर्ऋत्यस्थिताया युग्मफलपत्रसहिताया बिल्वशाखाया मूलप्रदेशे तैलहरिद्रादिभिर्लेपयेत्। ततः गन्धाक्षतपुष्पमालादिभिः समभ्यर्च्य माषभक्तादिबलिं सम्पाद्य उपनीय गन्धाक्षतपुष्पादिकं प्रक्षिप्य सजलहस्तेनादाय – ॐ ह्रीं हूं क्रीं भूतक्रूरेभ्यः स्वाहा।

भूताः प्रेताः पिशाचाश्च ये वसन्त्यत्र भूतले। ते गृह्णन्तु मया दत्तं बलिमेवं प्रसाधितम्॥
पूजिता गन्धपुष्पाद्यैस्तर्पिता बलिभिस्तथा। देशादस्माद्विनिः सृत्य पूजां गृह्णन्तु मत्कृताम्॥

इति भूमौ बलिं दत्त्वा यवसर्षपमुष्टिमादाय –

ॐ वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः। अपसर्पन्तु ते सर्वे दुर्गापूजां करोम्यहम्॥

ॐ फट्। इति सप्तवारमभिमन्त्र्य दश दिक्षु विकिरेत्। ततो बिल्वशाखस्थां देवीं प्रणम्य, (ॐ रक्षोहणं बलगहनम् ...) इति मन्त्रेण शाखामभिमृश्य रक्षां कृत्वा गृहां प्रत्यावर्त्य सायं कृत्यं पूर्ववत्कुर्यात्। इति बिल्वनिमन्त्रणविधिः॥

॥ इति षष्ठीकृत्यम्॥

सप्तमीकृत्यम्

(पहिलेको जस्तै गर्ने)

पूजनादिकं सर्वं द्वितीयादिनवत्कृत्वा विशेषत उत्तरीयवस्त्रं देव्यै समर्प्य अष्टवर्षीयां कन्यामानीय तां शाम्भवीनाम्ना सम्बोध्य पूजयित्वा भोजयेत्। विशेषेण उत्तरीयं वस्त्रं तस्यै दत्त्वा प्रार्थयेत् – (कन्यालाई पूजा गरी नमस्कार गर्ने)

ॐ सदानन्दकरीं शान्तं सर्वदेवनमस्कृताम्। सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं प्रार्थयाम्महम्॥

इति संप्रार्थ्य तां विसृजेत्।

सरस्वतीपूजा

(सरस्वती पूजा गर्ने)

ततस्तस्मिन्नेव दिने सरस्वतीं पूजयेत्। तद्यथा – यथालाभस्थाने पुस्तकम्, लेखनीम्, मसीपात्रादिकं च संस्थाप्य कुशादीन्यादाय, – (कपी, मसी चढाउने र सङ्कल्प गर्ने)

ॐ अद्येह मम शारदनबरात्राङ्गदुर्गा पूजनोत्सवकर्मणि श्री इष्टदेवता दुर्गादेवीप्रीत्यर्थं श्रीसरस्वतीपूजनमहं करिष्ये। इति सङ्कल्पं बिधाय, 'ॐ ऐं वद वद वाग्वादिनि स्वाहा' ॐ सरस्वत्यै नमः इति मन्त्रेणासनाद्युपचारैः सम्पूज्य प्रार्थयेत् – ॐ शुक्लां ब्रह्मविचार ...। ॐ या कुन्देन्दुतुषार ...। इति संप्रार्थ्य प्रसादादिकं गृहीत्वा यथासुखं विरमेत्। सायमपि पूर्ववत्कुर्यात्।

नवपत्रिकाप्रवेशः तासां पूजा च

(नवपत्रिका प्रवेशका लागि पूजा गर्ने)

सप्तम्यां मध्यान्हे मूलनक्षत्रयुते केवले वा सुमुहूर्ते पूर्वदिननिमन्त्रितबिल्ववृक्ष-समीपं गत्वा तरुमूले उपविश्य, ॐ दुर्गाप्रियाय बिल्ववृक्षाय नमः। इति पुष्पाक्षतादिभिरभ्यर्च्य प्रार्थयेत् – (बेलको रूखमा गई पूजा गरी नमस्कार गर्ने)

ॐ बिल्ववृक्ष महाभाग सदा त्वं शङ्करप्रियः। गृहीत्वा तव शाखाङ्गं दुर्गापूजां करोम्यहम्॥
शाखाछेदोद्भवं दुःखं न च कार्यं त्वया विभो। नेतव्योऽसि मयाऽऽगच्छ पूज्यो दुर्गास्वरूपतः॥

इति संप्रार्थ्य पूर्वदिने सुपूजितां फलयुग्मसहितां शाखां संपूज्य – (बेलको जोर फलसहित पूजा गर्ने र हाँगासँगै ल्याउने)

ॐ छिन्धि २ फट् २ स्वाहा अस्त्राय नमः। इति पठन् संछिद्य प्रार्थयेत् – (नमस्कार गर्ने)

ॐ पूत्रायुर्धनवृद्धचर्थं नेष्यामि चण्डिकालये। बिल्वशाखां समाश्रित्य राज्यं लक्ष्मीं प्रयच्छ मे॥
आगच्छ चण्डिके देवि सर्वकल्याणहेतवे। पूजां गृहाण सुमुखि नमस्ते शङ्करप्रिये॥

इति पठित्वा नवपत्रिकाः संगृह्य जलेनाभ्युक्ष्य पुष्पाक्षतैरभ्यर्च्य बिल्वशाखया सह वाद्यघोषपुरःसरं देवीगृहाङ्गणमानयेत्। नवपत्रिकानामानि यथा – (बाहिर पूजा गरेर बाजागाजा, शङ्ख, घण्टा, डमरु बजाउँदै प्रवेश गराउने)

कदली दाडिमी धान्या हरिद्रा मानकं कचु। बिल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिकाः॥

ततः किञ्चिद्दिनशेषे पुष्पदध्यक्षतगीतवाद्यघण्टाडिण्डिमखड्गकलशादिभिः शतघ्नीवाद्यघोषपुरःसरं तत्र गत्वा नवपत्रिकासहितां बिल्वशाखां त्रिः प्रदक्षिणं कृत्वा गङ्गोदकेन पञ्चगव्येन च स्नापयित्वा पुष्पाक्षतेन संपूज्य सुलिप्तभूमौ संस्थाप्यार्घ्यस्थापनपूर्वक पूजयेत। तत्र सङ्कल्पः – (अर्घ्य पूजा गरी सङ्कल्प गर्ने)

ॐ अद्येह अहं सपरिवारस्य मम सर्वपापसर्वशत्रुक्षयसर्वारिष्टशान्ति-सकलदारिद्र्योपशमन दीर्घायुरारोग्यैश्वर्योद याद्यभिवृद्धचर्थम् आदौ दीप-कलशगणेशपूजनपूर्वकं नवपत्रिकापूजनं करिष्ये। (नवपत्रिका पूजा गर्ने)

इति सङ्कल्पं कृत्वा यूपसमीपे दीपादीन् सम्पूज्य बिल्वशाखासहितां नवपत्रिकां च 'ॐ जयन्ती ... ।' इति मन्त्रेण गन्धाद्युपचारैः पृथक् पृथक् पूजयेत् । (छुट्टाछुट्टै पूजा गर्ने)

ततः कुष्माण्डबलिं कृशरबलिं च दद्यात् । बलिदानविधिस्तु पूर्वोक्त एव । ततः – चामुण्डे चल चल चालय चालय शीघ्रं मम देवीमन्दिरे प्रवेशय पूजालये स्वाहा इति पठन् । बिल्वशाखासहिता नवपत्रिका गृहीत्वा संचाल्य गीतावाद्यशतघ्नी-घोषपूर्वकमन्तर्देवीगृहं प्रवेशयित्वा कर्मपात्रोदकेन पत्रिकाः पृथक् पृथक् स्नापयेत् । तत्र मन्त्राः – (जलले सेचन गर्ने)

रम्भास्नाने (केरा) (केराको बोटमा पूजा गरी नमस्कार गर्ने)

ॐ दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय । रम्भारूपेण मे नित्यं शान्तिं कुरु सदा शुभे ॥

दाडीमिस्नाने (दाडीम) (दाडिमको बोटमा पूजा गरी नमस्कार गर्ने)

ॐ दाडिमि त्वं पुरा युद्धे रक्तबीजस्य सम्मुखे । उमाकार्यं कृतं यस्मात्तस्माद्दुर्गे नमोऽस्तु ते ॥

धान्यस्नाने (धान) (धानको गाँजमा पूजा गरी नमस्कार गर्ने)

ॐ जगतः प्राणरक्षार्थं ब्रह्मणा निर्मितं पुरा । उमाप्रीतिकरं धान्यं तस्माद्रक्षतु सर्वदा ॥

हरिद्रास्नाने (बेसार) (बेसारको बोटमा पूजा गरी नमस्कार गर्ने)

ॐ हरिद्रे वरदे देवि उमारूपासि सुव्रते । मम विघ्नविनाशाय पूजां गृह्ण सुरोत्तमे ॥

मानकस्नाने (मानक) (मानकको बोटमा पूजा गरी नमस्कार गर्ने)

ॐ यस्य पत्रे वसेद्देवी मानवृक्ष शचिप्रिय । मम चानुग्रहार्थाय ह्यागतासि सुरप्रिये ॥

कचुस्नाने (कचु) (कचुको बोटमा पूजा गरी नमस्कार गर्ने)

ॐ महिषासुरयुद्धेषु कच्चीभूतासि सुव्रते । मम चानुग्रहार्थाय ह्यागतासि सुरप्रिये ॥

बिल्वस्नाने (बेल) (जोडी बेल पूजा गरी नमस्कार गर्ने)

ॐ महादेवप्रियकरो वासुदेवप्रियः सदा । उमाप्रीतिकरो नित्यं बिल्ववृक्ष नमोऽस्तु ते ॥

अशोकस्नाने (अशोक) (अशोकको बोटमा पूजा गरी नमस्कार गर्ने)

ॐ हरप्रियकरो वृक्ष त्वमेकः शोकनाशनः । दुर्गाप्रीतिकरो यस्मात्तस्मात्त्वं रक्ष मां सदा ॥

जयन्तीस्नाने (जयन्ती)(जयन्तीको बोटमा पूजा गरी नमस्कार गर्ने, धूपबत्ती गर्ने र शङ्ख, घण्टा, डमरु बजाई स्वागत गर्दै फूलपाती भित्र्याउने)

ॐ निशुम्भशुम्भमथने सेन्द्रैर्देवगणैः सह । जयन्ति पूजयामि त्वामस्माकं वरदा भव ॥ (देवीको छेउमा नवपत्रिका राख्ने)

इति प्रत्येकं संस्नाप्य दुर्गाघटस्य समीपे भूमौ पीतवस्त्रं प्रसार्य तत्रोत्तरोत्तरक्रमेण कदल्यादिनवपित्रकां संस्थाप्य बिल्वपत्राधिष्ठात्र्या शिवायाः पूजास्थाने युग्मफलसहितं बिल्वशाखां संस्थाप्य आसने उपविश्य कुशादीन्यादाय अद्येह मम शारदनवरात्रदुर्गापूजाङ्गत्वेन नवपत्रिकापूजनं तदधिष्ठात्रीदेवी-पूजनं बिल्वे दुर्गापूजनं चाहं करिष्ये । इति सङ्कल्पं विधाय प्रत्येकं नवपत्रिकां विश्वशाखां च गन्धादिना सम्पूज्य प्रार्थयेत् । (सङ्कल्प, पूजा गरी नमस्कार गर्ने)

ॐ कैलासशिखराद्देवि विन्ध्याद्रेर्हिमपर्वतात् । आगत्य बिल्वशाखायां चण्डिके कुरु सन्निधिम् ॥

ततः ॐ भगवति चण्डिके इहागच्छेहतिष्ठेत्यावाह्य (आवाहन गरी पूजा गर्ने, प्राणप्रतिष्ठा गर्ने)

'ॐ मनो जूतिरिति' प्राणान् प्रतिष्ठाप्य, 'दक्षयज्ञविनाशिन्यै महाघोरायै योगिनीकोटिपरिवृतायै भद्रकाल्यै ह्रीं नमः' इति पठित्वा आसनपाद्यादिनमस्कारान्तं सम्पूज्य प्रार्थयेत् (नमस्कार गर्ने)

ॐ उग्रचण्डोरुचण्डे च चण्डोग्रे चण्डनायिके । चण्डे चण्डवति चण्डे तुभ्यं चण्डि नमो नमः ॥
महिषघ्नि महामाये चामुण्डे मुण्डमालिनि । क्षेममारोग्यमैश्वर्यं देहि देवि प्रसीद मे ॥

इति संप्रार्थ्य । ततः कदल्याम् – रम्भाधिष्ठात्र्यै ॐ ब्राह्म्यै नमः । दाडिम्याम्-दाडिम्याधिष्ठात्र्यै ॐ रक्तदन्तिकायै नमः । धान्ये-धान्याधिष्ठात्र्यै ॐ लक्ष्म्यै नमः । हरिद्रायां-हरिद्राधिष्ठात्र्यै ॐ दुर्गायै नमः । मानके-मानकाधिष्ठात्र्यै ॐ चामुण्डायै नमः । कचौ-कच्चधिष्ठात्र्यै ॐ कालिकायै नमः । बिल्वे-बिल्वाधिष्ठात्र्यै ॐ शिवायै नमः । अशोके-अशोकाधिष्ठात्र्यै ॐ शोकहारिण्यै नमः । जयन्त्याम् – जयन्त्यधिष्ठात्र्यै ॐ कार्तिक्यै नमः । इति क्रमेण पाद्यादिषोडशोपचारैः प्रत्येकं सम्पूज्य प्रार्थयेत् (प्रत्येकमा पूजा गरी नमस्कार गर्ने)

ॐ पत्रिके नवदुर्गे त्वं महादेवमनोरमे । पूजां समस्तां सङ्गृहच रक्ष मां त्रिदशेश्वरि ॥ इति ।

सप्तम्यामेव भद्रकालीपूजा (भद्रकाली पूजा)

ततः स्वर्णप्रतिमायां दुर्गाघटे वा 'ॐ भद्रकाल्यै नमः' । इति षोडशोपचारैः सम्पूज्य धूपदीपनैवेद्यछत्र-चामरोपानहकाष्ठपादुकायष्टिपर्यङ्कादीनि समर्प्य पूर्वोक्तप्रकारेण कूष्माण्डकृशरान्नादिबलिं च समर्प्य प्रदक्षिणा-नीराजनमस्कारान्तं कृत्वा पुष्पाञ्जलिमादाय (सुनको प्रतिमा राखी पूजा गर्ने र छाता, जुत्ता चढाउने)

ॐ ऐं ह्रीं श्रीं नमोऽस्तुते जगद्धात्रि तथा महिषमर्दिनि । त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥
ज्वालाकरालमत्युग्रमशेषासुरसूदनम् । त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥ इति पुष्पाञ्जलिं समर्पयेत् ।

प्रार्थना (नमस्कार गर्ने)

ॐ महिषघ्नि महामाये चामुण्डे मुण्डमालिनि । आयुरारोग्यविजयं देहि देवि नमोऽस्तु ते ॥
पथि देवालये दुर्गे अरण्ये प्रान्तरे जले । सर्वत्रोपगते दुर्गे नारायणि नमोऽस्तु ते ॥
शिरो मे सर्वदा पातु पातु कण्ठं महेश्वरि । हृदयं पातु चामुण्डा सर्वतः पातु कालिका ॥
देवद्वारे नदीतीरे राजद्वारे च सङ्कटे । पर्वतारोहणे दुर्गे दुर्गे रक्ष नमोऽस्तुते ॥
सङ्ग्रामे विजयं देहि वरं देहि च सर्वदा । पुत्रान्देहि महाभागे दारान् दारिद्रचनाशिनि ॥
आन्ध्यं कुष्ठं च दारिद्यं रोगं शोकं च दारुणम् । बन्धुस्वजनवैराग्यं तत्सर्वं हर चण्डिके ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
सर्वा बाधाः प्रशमनं त्रैलोक्यस्याखिलेश्वरि । एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते । अभेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ।
जयन्ती मङ्गला काली भद्रकाली कपालिनी । दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥

जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि । जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥
दुर्गे स्मृता हरसि भीतिमशेषजन्तोः । स्वस्थै स्मृता मतिमतीव शुभां ददासि ॥
दारिद्रचदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥
इति संप्रार्थ्य दण्डवत्प्रणमेत्। ततः छत्रायुधादीनि राजोपकरणादीनि सर्वाण्यपि सुसंस्कृतानि प्रोक्षितानि देवीपूजालये यथास्थानं संस्थाप्य डमरुवाद्यघण्टा-घोषपुरःसरं प्रदक्षिणीकृत्य उत्थायपूर्वदिनवद्यवाङ्कुराणि परिषिच्य प्रसादं गृहीत्वा यथासुखं विहरेत्। इति पत्रिका प्रवेशपूजनविधिः ॥

अष्टमीकृत्यम्

(पहिलेको जस्तै गर्ने)

अथाष्टम्याम् – देवीपूजनं द्वितीयादिन इव सर्वं कृत्वा विशेषतो देव्यै वस्त्रं समर्प्य नववर्षीयां कन्यामानीय तां 'दुर्गा' नाम्ना सम्बोध्य पूजां कृत्वा संभोज्य विशेषतो वस्त्रं दत्त्वा प्रार्थयेत् – (कन्या पूजा गरी नमस्कार गर्ने)

ॐ दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम्। प्रणमामि सदा भक्त्या दुर्गां दुर्गतिनाशिनीम् ॥
ततस्तां विसृज्य प्रसादादिकं गृहीत्वा विरमेत्। ॥ इत्यष्टमीकृत्यम् ॥

तत्राष्टमीकृत्ये कालरात्रिविधिः

(अष्टमीको दिन कालरात्री गर्ने)

अथ महाष्टम्यां रात्रौ पूजास्थानमागत्य आचम्य मूलेन प्राणानायम्य पूर्ववत् (प्रथमदिनकृत्यवत्) न्यासं विधाय (ॐ जटाजूटेति) ध्यात्वा, किञ्चिन्मूलमन्त्रं जपित्वा (ॐ गुह्यातीति ...) जपं समर्पयेत्।

ततः कुशादीन्यादाय – (सङ्कल्प गर्ने)

ॐ अद्येह अहं मम श्रीमहाकाली महालक्ष्मी-महासरस्वती-इष्टदेवता-स्वरूपिणी-दुर्गादेवीप्रीतिद्वारा दुर्भिक्षदारिद्रचदुःख दौर्भाग्यदुर्वृत्तनिवृत्तिसर्वपापक्षयपूर्वककल्पोक्तफलावाप्तये दुर्गापदप्राप्तये अद्य महाष्टम्यां कालरात्रिनिमित्तकपूजनं करिष्ये। इति सङ्कल्पं विधायार्घ्यं संस्कृत्य दीपं कलशं गणेश ब्राह्मणं क्षेत्रपालं ग्राहांश्च सम्पूज्य, ततो गन्धपुष्पादीन्यादाय दुर्गाकलशं स्पृशन् – (दियो, कलश, गणेश र ग्रह पूजा गरी दुर्गाकलशलाई छुने)

ॐ एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा। आवाहितासि प्रागेव सर्वकामार्थसिद्धये ॥
अस्यां मूर्तौ समास्थाय मम पूजां गृहाण भो। रक्षां कुरु महाभद्रे दुर्गे देवि नमोऽस्तु ते ॥
ॐ भगवती दुर्गे इहागच्छ इहतिष्ठ सुप्रसन्ना शुभदा वरदा भव। इति संवोध्य ॐ जयन्ती मङ्गला ... इति मन्त्रेण ॐ भगवत्यै दुर्गादिव्यै नमः, इति पाद्यादिभिः षोडशोपचारैः संपूज्य – (षोडशोपचारले नवपत्रिकाको पूजा गर्ने)

ॐ हूँ अम्बिकायै नवपत्रिकाभ्यस्तदधिष्ठात्रीदेवीदेवेभ्यो नमः, इति नवपत्रिकाश्च पूजयेत्। ततो देव्या दक्षिणतः ॐ ह्रीं जयन्त्यै नमः। एवं क्रमेण मङ्गलायै ...। काल्यै ...। भद्रकाल्यै ...। कपालिन्यै ...। दुर्गायै ...। क्षमायै ... शिवायै ...। धात्र्यै ...। स्वाहायै ...। स्वधायै ...। इति 'ॐ ह्रीं इति बीजपूर्वकं चतुर्थ्यन्तपदेन षोडशोपचारैः सम्पूज्य, देव्या वामतः – 'ॐ ह्रीं इति बीजपूर्वकं – ॐ ह्रीं उग्रदंष्ट्रायै नमः एवं - सुदंष्ट्रां, करालिनीं, पिङ्गनेत्रां, विशालाक्षीं मङ्गलां, विजयां, जयां च चतुर्थ्यन्तपदेन पूजयेत्। (देवीको छेउमा पूजा गर्ने)

तथैव देव्यग्रे – 'ॐ ह्रीं' इति बीजमादितः, मङ्गलां, नन्दिनीं, भद्रां लक्ष्मीं, कीर्तिं यश्यस्विनीं, पुष्टिं, मेधां, शिवां, साध्वीं, यशः, शोभां, जयां धृतिं, आनन्दां, सुनन्दा एतांश्च चतुर्थ्यन्तपदेन पूजयेत्।

तथैव देवीसमीपे – 'ॐ ह्रीं, बीजमादितः। 'जयन्तीं, मङ्गलां, धृतिं, शान्तिं, शिवां, शाखां क्षमां, ब्रह्माणीं, कौशिकीं, मति., दुर्गां, क्रियां, घण्टाकर्णां, कपालिनीं, रौद्रीं, भीमां, कालीं, भद्रां, सिद्धिं, पुष्टिं एताश्च चतुर्थ्यन्तपदेन प्रत्येकं पूजयेत्। ततो देव्याः शिरसि – (भैरवको पूजा गर्ने)

ॐ भैरवं परमं देवं सर्वकामप्रसाधनम्। पूजयाम्यूर्ध्वतो देव्याः सर्वकामप्रसाधनम्॥

ॐ भैरवाय नमः। इति भैरवं पूजयेत्। (अर्घ्य दिने)

ततः एषोऽष्टाङ्गोर्घ्यो ॐ भगवत्यै दुर्गादेव्यै मया दत्तं नमः। इत्यर्घ्यं दत्त्वा चन्दनलिप्तं बिल्वपत्रं ग्रीहीत्वा – ॐ अमृतोद्भवं श्रीवृक्षं महादेवप्रियं सदा। बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरी॥ ॐ दुर्गादेव्यै नमः।

ततो बिल्वपत्रमालामादाय (वेलपत्रको माला चढाउने)

ॐ चन्दनेन समालिप्ते कुङ्कुमेन विलेपिते। बिल्वपत्रकृतापीडे दुर्गेऽहं शरणं गतः।

ॐ दुर्गादेव्यै नमः। इत्यर्पयेत्।

सिंहपूजा (देवीसहित सिंहको पूजा गर्ने)

ॐ ह्रौं ह्रः हः महाशार्दूलविताताय पिङ्गललोचनाय नमः। इति पूजयेत्।

देव्याः षडङ्गन्यासः (न्यास गर्ने)

ॐ कालीवज्रेश्वरीलोहदण्डायै स्वाहा, हृदयाय नमः। ॐ काली-वज्रेश्वरीलोहदण्डायै स्वाहा, शिरसे स्वाहा। ॐ कालीवज्रेश्वरी-लोहदण्डायै स्वाहा, शिखायै वषट्। ॐ कालीवज्रेश्वरी लोहदण्डायै स्वाहा, कवचाय हुम्। ॐ कालीवज्रेश्वरी लोहदण्डायै स्वाहा, नेत्राभ्यां वौषट्। ॐ कालीवज्रेश्वरी लोहदण्डायै स्वाहा, अस्त्राय फट्।

दिक्पूजा (पूर्वदेखि क्रमैले पूजा गर्ने)

पूर्वे – ॐ ह्रां कालीवज्रेश्वरी, ईशानाय नमः। दक्षिणे – ॐ ह्रीं कालीवज्रेश्वरी, तत्पुरुषाय नमः। पश्चिमे – ॐ ह्रूं काली वज्रेश्वरी, अघोराय नमः। उत्तरे – ॐ ह्रैं कालीवज्रेशवरी, सद्योजाताय नमः। मध्ये – ॐ ह्रीं काली वज्रेश्वरी वामदेवाय नमः। ॐ ह्रः काली वज्रेश्वरी, सर्वेभ्यो वक्त्रेभ्यो नमः। ततो देव्याः शिरसि भैरवसमीपे – ॐ काली-वज्रेश्वरी लोहदण्डायै विद्याभ्यो नमः। इति पूजयेत्।

शस्त्रास्त्रपूजा (हतियारहरू पूजा गर्ने)

पूर्वदिनत एव सम्यक्प्रक्षालितानि शस्त्रास्त्राणि यथास्थाने संस्थाप्य गन्धाद्युपचारैः पूजयेत्। हस्ते पुष्पाक्षतादीन्यादाय खड्गं स्पष्ट्वा पठेत् –

ॐ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः। श्रीगर्भो विजयश्चैव धर्माधारस्तथैव च॥
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा। नक्षत्रं ते कृतिका तु दैवतं च जनार्दनः॥

पिता पितामहो देवस्त्वं मां पालय सर्वदा । नीलजीमूतसङ्काश तीक्ष्णदंष्ट्रकृशोदर ॥
आश्चर्यो वर्षणश्चैव अतितेजास्तथै व च । इयं येन धृता क्षोणी हतश्च महिषासुरः ॥
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः ॥ (अस्त्र, औजारहरू पूजा गर्ने)
इति पठन् ॐ खड्गाय नमः इति पूजयेत् । एवमोङ्कारपूर्वकं – ॐ त्रिशूलाय नमः । ॐ बाणाय नमः । ॐ चक्राय नमः । ॐ चर्मणे नमः । ॐ दुग्धपूर्णकलशाय नमः । ॐ छुरिकायै नमः । ॐ कट्टारकाय नमः । ॐ कुन्ताय नमः । ॐ धनुषे नमः । ॐ दुन्दुभये नमः । ॐ पताकायै नमः । ॐ ध्वजाय नमः । ॐ छत्राय नमः । ॐ शङ्खाय नमः । ॐ चामराय नमः । ॐ चर्मणे नमः । इति संपूज्य सिंहासनं पूजयेत् –
ॐ विजयो जयदो जेता रिपुजेता प्रियङ्करः । दुःखहा धर्मदः शान्तः सर्वारिष्टविनाशकः ॥
इत्यष्टौ तव नामानि तस्मात् सिंहपराक्रमः । तेन सिंहासनो नित्यं नाम्ना देवेषु गीयते ॥
त्वयि स्थितः शिवः साक्षात् त्वयि शक्रः सुरेश्वरः । त्वयि स्थितो हरिदेवस्त्वदर्थस्तप्यते तपः ॥
नमस्ते सर्वतोभद्र शिवो भव महीपते । त्रैलोक्यजय सर्वस्व सिंहासन नमोऽस्तु ते ॥
ॐ सिंहासनाय नमः । इति शस्त्रास्त्रपूजा ।

नवदुर्गापूजा (केराको पातमा नौ थुप्रो चामल, पैसा र सुपारी राखेर नवदुर्गा पूजा गर्ने)

ततस्ताम्रपात्रेऽष्टदलोपरि पूर्वाद्यष्टदिक्षुमध्ये च, कदलीपत्रे अक्षतपुञ्जेषु वा ॐ ह्रीं श्रीं इति बीजपूर्वकं पूजयेत्–
यथा – ॐ ह्रीं श्रीं रुद्रचण्डायै नमः । एवमेव – प्रचण्डायै ... । चण्डोग्रायै... । चण्डनायिकायै... । चण्डायै... । चण्डवत्यै... । चण्डरूपायै... चण्डिकायै... । उग्रचण्डायै... । ततः पत्रवाह्ये तेनैव क्रमेणाष्टावर्तेन चतुःषष्टियोगिनीः पूजयेत् – प्रथमावर्ते – ॐ ह्रीं श्रीं ब्रह्माण्यै नमः । एवमेव – चण्डिकायै ... । रोद्रयै... । गौर्यै... ऐन्द्राण्यै... । कौमार्यै... । भैरव्यै... । दुगादिव्यै नमः । द्वितीयावर्ते – नारसिंह्यै... । चामुण्डायै... । शिवदूत्यै... । वाराहयै... । कौशिक्यै... माहेश्वर्यै... । शाङ्र्यै... । जयन्तीदेवयै नमः । तृतीयावर्ते – सर्वमङ्गलायै... । काल्यै... । करालिन्यै... । मेधायै... । शिवायै... शाकम्भर्यै... शिवायै... । शान्तायै... । चतुर्थावर्ते – भ्रामर्यै... । रुद्रायै... । अम्बिकायै... । क्षमायै... । धात्र्यै... । स्वाहायै... स्वधायै... । अर्पणायै... । पञ्चमावर्ते – मोहायै... घोररूपिण्यै... । महाकाल्यै... भद्रकाल्यै... । कपालिन्यै... । क्षेमङ्कर्यै... । उग्रचण्डायै... । चण्डोग्रायै... । षष्ठावर्ते – चण्डनायिकायै... । चण्डायै... । चण्डवत्यै... । महामोहाङ्घ्रि-पङ्कजायै... । बलविकरिण्यै... । बलप्रमथिन्यै... । सर्वभूतदमन्यै... । उमायै... ।
सप्तमावर्ते – तारायै... । निद्रायै... । विजयायै... । जयायै... । शैलपुत्र्यै... । चण्डिकायै... । चण्डघण्टायै... । स्कन्दमात्रे... । कात्यायन्यै... । चन्द्रघण्टायै... । पाराताये... भद्रायै... । माहेश्वर्यै... । कालरात्र्यै... ।
एताः संपूज्य तद्वाह्ये, पूर्वे – ॐ ह्रीं श्रीं कोटियोगिनीभ्यो नमः । इति पूजयेत् ।

ततोऽष्टदलेषु ईशानादिक्रमेण मध्ये च पूर्वोक्तबीजपूर्वकं –(थालीमा अष्टदल लेखी पूर्वबाट क्रमैले पूजा गर्ने)
ॐ ह्रीं श्रीं ब्राह्मचै नमः । एवं माहेश्वर्यै... । कौमार्यै... । वाराह्यै... । नारसिंह्यै... । इन्द्राण्यै... । चामुण्डायै... ।

इति सम्पूज्य ततो देवीसन्निधाने पूर्वोक्तबीजपूर्वकं– ॐ ह्रीं श्रीं जयन्त्यै नमः । एवं – मङ्गलायै... । काल्यै... । भद्रकाल्यै... । कपालिन्यै... । दुर्गायै... । धात्र्यै... स्वाहायै... स्वधायै... । इति सम्यक् पूजयेत् ।

ततः कूष्माण्डादि बलिदानम् । तद्यथा – देव्यग्रे त्रिकोणमण्डलोपरि कूष्माण्डं संस्थाप्य जलेनाभ्युक्ष्य, ॐ कूष्माण्डबलये नमः । इति सम्पूज्य तथैव खड्गमपि संप्रोक्ष्य सम्पूज्य, भो खड्ग मया पूजितोऽसि क्षमस्व । इति संम्प्राथर्य कुशादीन्यादाय – (कुभिन्डो पूजा गरी सङ्कल्प गर्ने)

ॐ अद्येह अहं सैशलवनकाननभूदानजन्यफलसमफलप्राप्तिकामः श्रीदुर्गादेवी-प्रीत्यर्थं कूष्माण्डाय महामहिषफलरूपाय महाद्भूतदानवाय श्रीदुर्गात्रिपुरसुन्दरी महाकालीशाकम्भरीप्रियाय महाष्टमीनवमीसंयुताय मम सकलशत्रुदुष्टजनान् भक्षय भक्षय प्रसादं कुरु कुरु इमं कूष्माण्डबलिं महिषमर्दिनीप्रीतयेऽपयिष्ये । भो भगवती कौशिकी कूष्माडबलिना आप्यायताम् । इति घण्टाडमरुवाद्यघोषपुरःसरं देव्यै समर्पयेत् ।

ततः कर्कटीक्षुदण्डमूलकबिल्वनारिकेलादिकं कुशादिसहितमादाय – (बेल, नरिवल पूजा गरी सङ्कल्प गर्ने)

ॐ अद्येह मम आयुरारोग्यैश्वर्योदयाद्यनेकविधोत्तरोत्तरहर्षविजयोदयाद्यभिवृद्धचर्थं श्रीदुर्गाभगवतीप्रीत्यर्थं बल्यर्थे इमानि कर्कटीक्षुदण्डमूलक-बिल्वनारिकेलादीनि अहमर्पयिष्ये । इत्युक्त्वा समर्पयेत् । पुनस्तयैव घृतपायसवटकलाजापृथुकसक्तुतण्डुलादीनि देव्यै समर्पयेत् ।

ततः कृशरबलिदानम्-देव्या ईशानभागे चतुष्कोणात्मकं नवकोष्ठमण्डलं विलिख्य कृशरं वामहस्ताङ्गुष्ठेन कुशादिकं दक्षहस्तेनादाय – (सङ्कल्प गर्ने र तिल, चामलको बलि दिने)

ॐ अद्येह अहं मम श्रीदुर्गादेवीप्रीतिद्वारानानाप्रतिबन्धनिवारणसकला-भीष्टसिद्धचर्थीमिमं कृशरबलिमर्पयिष्ये । इत्युक्त्वा कुशादिकं भूमौ निःक्षिप्य लिखितनवकोष्ठके पूर्वादिक्रमेण ॐ जयन्त्यै नमः । ॐ मङ्गलायै नमः । ॐ काल्यै नमः । ॐ भद्रकाल्यै... । ॐ कपालिन्यै... । ॐ दुर्गायै... । ॐ क्षमायै... । ॐ शिवायै... । ॐ धात्र्यै... इत्यर्पयेत् । इति बलिदानम् । (पुष्पाञ्जली गरी प्रसाद लगाउने)

ततो देवीगृहं गत्वा पुष्पाञ्जलिं गृहीत्वा– ॐ दुर्गे स्मृता... ॐ शरणागत... ॐ सर्वमङ्गलमाङ्गल्ये... ॐ जयन्ती... इत्यादिमन्त्रान् पठित्वा पुष्पाञ्जलिमर्पयेत् । ततो जपस्तोत्रपाठादिकं विधाय प्रसादग्रहणं कुर्यात् ।

होमः (अग्निस्थापना अनुसार हवन गर्ने)

ततोऽग्निस्थापनस्थानं गत्वाऽग्निस्थापनविधिनाऽग्निं संस्थाप्य ब्राह्मणान् वृत्वा पुण्याहं वाचयित्वा दीपादीन् संपूज्य आघाराज्यभागौ हुत्वा पञ्चवारुणिहोमपूर्वक गणपत्यादिवनस्पत्यन्तदेवताश्च हुत्वा पूजितदेवताभ्यो घृताहुतिपूर्वकं देव्युक्त-होमद्रव्येण चर्वादिना माध्यायमन्त्रैर्वा होमयेत् । ततश्चतुः स्वस्त्यादि-होमशेषं समाप्य पूर्णाहुतिं हुत्वा पूर्णपात्रं विधाय ब्राह्मणेभ्यो दक्षिणां दत्त्वा शेषं कर्म समाप्य अभिषेकादीर्वादतिलकादिकं गृहीत्वा ब्राह्मणान् भोजयित्वा सुहृद्युक्तः स्वयमपि भुञ्जीत । ततो यथासुखं विहरेत् । इत्यष्टमीकृत्ये कालरात्रिविधिः ।

नवमीकृत्यम् (पहिलेको जस्तै देवीको पूजा गर्ने)

अथ नवम्यां देवीपूजनादिकं सर्वं द्वितीयादिनवत्कृत्वा विशेषेण दुर्गायै वस्त्रं दत्त्वा दशवर्षीयां कन्यामानीय

'सुभद्रा' नाम्ना संबोध्य पूजां कृत्वा विशेषेण वस्त्रं दत्त्वा सम्भोज्य प्रार्थयेत् – (नमस्कार गर्ने)

ॐ सुन्दरीं स्वर्णवर्णाभां सर्वसौभाग्यदायिनीम् । सुभद्रां जननीं देवीं सुभद्रां प्रार्थयाम्यहम् ॥

ततस्तां विसृज्य देव्या विशेषपूजां कुर्यात् ।

ततो देव्या नित्यपूजां समाप्य विशेषपूजां कुर्यात् । आचम्य प्राणानायम्य कुशादीन्यादाय – (सङ्कल्प गर्ने)

ॐ अद्येह मम श्री भगवती दुर्गादेवीप्रतिद्वारा-सर्वपापक्षयपूर्वकदेवीपदप्राप्त्यर्थं अद्य महानवमीदिने दुर्गास्वरूपिणीं त्रिशूलिनीं देवीमहं पूजयिष्ये इति सङ्कल्पं विधाय महाष्टम्यां रात्रौ पूजिताष्टदलमध्ये – (पूर्वदेखि पूजा गर्ने)

'ॐ ह्रीं श्रीं उग्रचण्डायै नमः' इति सम्पूज्य पुष्पादीन्यादाय, ॐ नमो भगवति त्रिशूलिनि दुर्गे इहागच्छेह तिष्ठेत्यावाहय, ॐ भगवतीदुर्गास्वरूपिण्यै त्रिशूलिन्यै नमः । इति मन्त्रेण पाद्यादिभिः षोडशोपचारैः सम्पूज्य, ततोऽष्टदले पूर्वादिक्रमेण – ॐ ब्रह्माण्यै नमः । ॐ माहेश्वर्यै नमः । ॐ कौमार्यै नमः । ॐ वैष्णव्यै नमः । ॐ वाराह्यै नमः । ॐ नारसिंहयै नमः । ॐ ऐन्द्रयै नमः । ॐ शिवदूत्यै नमः । एताः प्रत्येकं षोडशोपचारैः पूजयेत् ।

वाहन पूजा (हात्ती, घोडा, मोटर, मोटरसाइकल र मेसिनहरूको पूजा गर्ने)

ॐ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः । श्रीगर्भो विजयश्चैव धर्माधारस्तथैव च ॥
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा । नक्षत्रं ते कृतिका तु दैवतं च जनार्दनः ॥

कन्यापूजा (कन्यापूजा गर्ने)

सकृन्नवकुमारीपूजनप्रयोग : – पूजास्थाने उपविश्य आचम्य प्राणानायम्य कुशादीन्यादाय – (सङ्कल्प गर्ने)

ॐ अद्येह अहं श्रीभगवतीदुर्गाप्रसादसिद्धिद्वारा समस्तमनोभिलषितफलावाप्तये श्रीदेवीपदप्राप्तये अद्य महानवमीदिने नवकुमारी (कुमारी) पूजनादिकं करिष्ये । (अर्घ्य स्थापना गरी दियो, कलश, गणेश पूजा गर्ने)

ततोऽर्घ्यस्थापनपूर्वकं दीपं कलशं गणेशं च सम्पूज्य गन्धपुष्पाक्षतादीन्यादाय कन्यासंमुखो भूत्वा – (नमस्कार गर्ने)

ॐ चतुर्वर्गप्रदात्री त्वं चतुर्वेदप्रतिष्ठिता । प्रसीद वैष्णवि स्वस्थे मुक्तये प्रार्थयाम्यहम् ॥
मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् । नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥

इत्यावाहय प्रत्येकं कुमारीणां चरणान् प्रक्षाल्य अलङ्कारैर्भूषयित्वा पाद्यादिभिः षोडशोपचारैः सम्पूज्य धूपदीपनैवेद्यद्रव्यादिकं निवेद्य, ॐ शरणागत ... । ॐ जयन्ती ... इति मन्त्राभ्यां पुष्पाञ्जलिं समर्प्य नमस्कारं विधाय प्रसादग्रहणं च कृत्वा यथेच्छं भोजयेत् । इति कन्यापूजाविधिः । (प्रत्येक कन्यालाई पूजा गरी वस्त्र लगाइदिने)

बलिदानम् (कुभिन्डो बलि सङ्कल्प गर्ने र दिने)

कूष्माण्डकर्कटीक्षुदण्डादिदानं पूर्ववत्कृत्वा नानाविधद्रव्यैः सामान्यबलिं प्रकल्प्य जलादिसहितमादाय, ॐ नमः कपालग्रहनक्षत्र सुरासुगन्धर्वयक्षराक्षसविद्याधरगरुडमहोरगकिन्नरगजेन्द्रदेवताप्सरोगणभूतप्रेतक्रव्यादपिशाच–मनुष्यमातृगणडाकिनीयोगिनीगणा इमं नानाद्रव्यबलिं गृह्णन्तु स्वाहा । इति दत्त्वा पठेत् –

ॐ शिवाः कङ्कालवेतालाः पूतनाजृम्भकादयः । ते सर्वे तृप्तिमायान्तु बलिदानेन तोषिताः ॥ इति बलिदानम् ।

॥ इति नवमीकृत्यम् ॥

दशमीकृत्यम्

(दियो कलश गणेश पूजा गर्ने)

दशम्याम् – दुर्गापूजनं तु द्वितीयादिनवत्कृत्वा उत्तराङ्गपूजार्घ्यनिवेदनादिकं कृत्वा अपराजितां च सम्पूज्य विसर्जनं कुर्यात्। इति दशमीकृत्यविधिः।

अपराजिता पूजा

(देवीको पूजा गर्ने)

देव्या नित्यार्चनं विधाय उत्तराङ्गं च कृत्वा कुशादीन्यादाय –

(सङ्कल्प गर्ने)

ॐ अद्येह मम श्रीपरमेश्वरीष्टदेवता महाकाली महालक्ष्मी महासरस्वतीस्वरूपिणी भगवती दुर्गादेवीप्रीतये प्रतिपदादारभ्याद्यपर्यन्तं कृतस्य शरत्कालिकदेवीपूजनकर्मणः कल्पोक्तफलप्राप्त्यर्थमपराजिताजयाविजयादीनां पूजनं तथा एतावद्दिनपर्यन्तं स्थापितपूजितदेवीदेवानां विसर्जनं चाहं करिष्ये। इति सङ्कल्प्य न्यासं कुर्यात् –

ॐ अँ अङ्गुष्ठाभ्यां नमः। ॐ पं तर्जनीभ्यां स्वाहा। ॐ राँ मध्यमाभ्यां वषट्। ॐ जिँ अनामिकाभ्यां हुम्। ॐ ताँ कनिष्ठिकाभ्यां वौषट्। ॐ अः करतलकरपृष्ठाभ्यां फट्। इति करन्यासः।

ॐ अं हृदयाय नमः। ॐ पं शिरसे स्वाहा। ॐ रां शिखायै वषट्। ॐ जिं कवचाय हुम्। ॐ तां नेत्रत्रयाय वौषट्। ॐ अः अस्त्राय फट्। इत्यङ्गन्यासः। ततः (ॐ फट्) इत्यर्घ्यं कर्मपात्रोदकेन संशोध्य धेनुमुद्रां प्रदर्शयेत्।

(धेनुमुद्रा बनाउने)

ततः पुष्पादीन्यादाय हृदयकमलमध्ये गौरवर्णां पीतवस्त्रां सर्वाङ्गसुन्दरी खड्गचर्मधरां व्यग्रकरां सर्वालङ्कारयुतां चतुर्भुजां त्रिनेत्रां देवीं ध्यात्वा मानसोपचारैः संपूज्य हृदयाद् वामनासापुटेन पुष्पाञ्जलावानीतं विभाव्य भगवतीघटमुखे सन्निधाय, ॐ भगवत्यपराजिते आवाहिता सुप्रतिष्ठा भव। तथैव जयां विजयां च ध्यात्वाऽऽवाह्य ॐ जयन्ती...।

(नमस्कार गर्ने)

इति मन्त्रेण – ॐ अपराजितायै नमः। तद्दक्षिणे ॐ जयायै नमः। वामे – ॐ विजयायै नमः। तत्रैव – ॐ आदित्यादिनवग्रहेभ्यो नमः। इति प्रत्येकं पाद्यादिभिः षोडशोपचारैः सम्पूज्य ततः पञ्चवर्णपताकाः पञ्च कार्पासबीज-बहुतरकूष्माण्डपुष्पाणि, तथा अपराजितासोमराजी-द्रोण-करवीरबिल्व-रुद्रजटा-लोध्रपुष्पैर्देवीं यथासम्भवमभ्यर्च्य तत्परिवारान् स्वकुलदेवांश्च सम्पूज्य प्रार्थयेत् –

(नमस्कार गर्ने)

जय देवि जगन्मातर्जय विश्वविमोहिनि। प्रसीद मम कल्याणि वाञ्छासिद्धिकरी भव॥ इति॥

ततः – ॐ दुर्गे स्मृता...। ॐ देवी प्रपन्नार्ति...। ॐ न मन्त्रं नो यन्त्रं... इत्यादिभिः क्षमापयेत्।

ततः पीतवस्त्रे सर्षपमपराजितापत्रं च निधाय पोटलिकां कृत्वा कङ्कणबद्धं कारयेत् ततः ॐ क्रियासिद्धयै अपराजितायै नमः। ॐ दुर्गायै नमः। इति सम्पूज्य देव्या दक्षिणभुजे बद्धं स्मरन् स्थापयेत्। ततः – ॐ अः हृदयाय नमः। इति देवीं प्रदक्षिणीकृत्य शङ्खजलं भ्रामयित्वा अर्घ्यमुत्थाप्य शिरः समीपं नीत्वा भगवत्याश्चरणयुगलं स्मरन् –

ॐ गन्धाक्षतैश्च संयुक्तं फलपुष्पयुतं तव । दत्तमर्घ्यंगृहाणेदं प्रसीद परमेश्वरि ॥

इति निवेद्य, पुष्पादीन्यादाय – (फूल लिएर नमस्कार गर्ने)

ॐ अपराधसहस्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ इत्यर्पयेत् ।

॥ इति दशमीकृत्ये अपराजितापूजा ॥

विसर्जनम्

(विसर्जन गर्ने)

पुष्पाक्षतादीन्यादाय (फूल लिएर नमस्कार गर्ने)

ॐ दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते । संवत्सरे व्यतीते तु पुनरागमनाय वै ॥

ॐ उत्तिष्ठ देवि चण्डेशि शुभपूजां प्रवृत्य च । कुरुस्व मम कल्याणमष्टाभिः शक्तिभिः सह ॥

ॐ गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके । यत्पुजितं मया देवि परिपूर्णं तदस्तु मे ॥

ॐ भगवति दुर्गे, गणपत्याद्यावाहितदेवीदेवाः पूजिताः स्थ क्षमध्वम् । इत्युक्त्वा देव्या घटोपरि पूजितदेवीदेवानामुपरि इतस्ततो निःक्षिप्य प्रणमेत् । ततो दुर्गाप्रतिमासहितं पात्रं सञ्चाल्योद्धृत्य भूमौ निदध्यात् ।

ततो घटस्थजलप्रसादादिकं नैवेद्यं यवाङ्कुरामि च किञ्चित्किञ्चिदुद्धृत्य कस्मिश्चित्पात्रे निधाय – ॐ प्रसादग्राहिदेवेभ्यो देवीपार्षदेभ्यो भकतेभ्यश्च इमं भगवत्या जलप्रसादादिकं समर्पयामि नमः । इत्यर्पयेत् । इति दशमीकृत्ये विसर्जनम् ।

अभिषेकः

(अभिषेक गर्ने)

ततः स्वयं यजमानः सपरिवारान्वितो ब्राह्मणहस्तेनाभिषेकं गृह्णीयात् । तत्र मन्त्राः –

ॐ सुरास्त्वामभिषिञ्चन्तु... । ॐ देवस्य त्वा... । ॐ द्यौ शान्तिः... । ॐ तच्चक्षुः... । ॐ स्वस्तिनः... । ॐ विश्वानि देव... । रोगानशेषा... । शूलेन पाहि... । इत्यादि पौराणिकैर्वैदिकैश्च मन्त्रैरभिषेकं गृहीत्वा वस्त्र-भूषणानि धारयेत् इति दशमीकृत्ये अभिषेकः ।

प्रसादग्रहणम्

(प्रसाद ग्रहण गर्ने)

ततो ब्राह्मणाः हस्ते प्रसादादिकं गृहीत्वाऽऽशीर्वादमन्त्रान् पठेयुः – (प्रसाद ग्रहण गर्दा पढ्ने मन्त्र)

आयुर्द्रोणसुते श्रियो दशरथे शत्रुक्षयो राघवे ।
ऐश्वर्यं नहुषे गतिश्च पवने मानं च दुर्योधने ॥
शौर्यं शान्तनवे बलं हलधरे सत्यं च कुन्तीसुते ।
विज्ञानं विदुरे भवन्तु भवतां कीर्तिश्च नारायणे ॥
जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥

॥ इति दशमीकृत्यम् ॥

अश्वत्थामाको जस्तो आयु होस्, दशरथको नैतिक गुण, शत्रु नाश गर्न श्रीराम, नहुष राजाको जस्तो ऐश्वर्य, पवनको जस्तो गति, दुर्योधनको जस्तो सम्मान, भीष्मपितामहको जस्तो साहस, बलरामको जस्तो बल, विदुरको जस्तो ज्ञान, भगवान् विष्णुको जस्तो कीर्ति प्राप्त होस् ।

॥ इति दुर्गापूजा ॥

॥ श्रीगणेशाय नमः ॥

शिवरात्रिपूजा

अथ पूजाविधिः (आचमन गरी कर्मपात्र बनाउने)

अथ व्रती स्नानादिकं विधाय पूजासामग्रीं सम्पाद्य पूजास्थानमागत्यासने उपविश्याचम्य प्राणानायम्य कर्मपात्रं कृत्वा कुशतिलजलान्यादाय- (सङ्कल्प गर्ने)

ॐ अद्येत्यादि पूर्वसकल्पं पठित्वा अहं मम श्रीसदाशिवप्रीतिद्वारा समस्तपाप- क्षयपूर्वकनानासुखभोगोत्तर मक्षय्यमोक्षपदप्राप्त्यर्थं शिवरात्रि-व्रताङ्गत्वेन दीपकलशगणेश- पूजनपूर्वकं श्रीसदाशिवपूजनं करिष्ये।
इति सङ्कल्प्य दीपादीन् यथाविधि संपूज्य, ततः षोडशोपचारैः शिवपूजां कुर्यात्। (अष्टदल लेखेर पूर्वदेखि पूजा गर्ने)

तद्यथा- स्थाल्यामष्टदलं लिखित्वा पूर्वादिक्रमेण दशदिक्पालानावाह्य पूजयेत्-
पूर्वे- भो इन्द्र इहागच्छेह तिष्ठेति ॐ इन्द्राय नमः। इन्द्रं पूजयामि। **आग्नेये**- भो अग्ने इहागच्छेह तिष्ठेति ॐ अग्नये नमः। अग्निं पूजयामि। **दक्षिणे**- भो यम इहागच्छेह तिष्ठेतिॐ यमाय नमः। यमं पूजयामि। **नैर्ऋत्ये**- भो निऋते इहागच्छेह तिष्ठेति ॐ निऋतये नमः। निर्ऋतिं पूजयामि। **पश्चिमे**- भो वरुण इहागच्छेह तिष्ठेति ॐ वरुणाय नमः। वरुणं पूजयामि। **वायव्ये** – भो वायो इहागच्छेह तिष्ठेति ॐ वायवे नमः। वायुं पूजयामि। **उत्तरे**- भो धनद इहागच्छेह तिष्ठेति ॐ धनदाय नमः। धनदं पूजयामि। **ईशाने**- भो ईशान इहागच्छेह तिष्ठेति ॐ ईशानाय नमः। ईशानं पूजयामि। **पूर्वेशानमध्ये**- भो ब्रह्मन् इहागच्छेह तिष्ठेति ॐ ब्रह्मणे नमः। ब्रह्माणं पूजयामि। **निर्ऋतिवरुणमध्ये**- भो अनन्त इहागच्छेह तिष्ठति ॐ अनन्ताय नमः। अनन्तं पूजायमि। इति पाद्यादिभिरुपचारैः सम्पूज्य, मध्ये स्वर्णमयीं शिवप्रतिमां संस्थाप्य-

(प्रतिमा राखी फूल अक्षताले छुने)

ॐ मनो जूतिरिति प्राणान् प्रतिष्ठाप्य ध्यायेत्-

ध्यानम् (बेलपत्र लिई नमस्कार गर्ने)

ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं, रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं, विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्॥

आवाहनम् (आवाहन गर्ने)

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमि ँ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम्।
ॐ आगच्छ देवदेवश मर्त्यलोकहितेच्छया। पूजयामि विधानेन प्रसन्नः सुमुखो भव॥

आसनम्

(कुश राखे)

ॐ पुरुष एवेद ꣳ सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

ॐ गङ्गादिवर्सतीर्थेभ्यो मया प्रार्थनाहृतम्। तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ॥

पाद्यम्

(जल चढाउने)

ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

पादासनं कुरु प्राज्ञ निर्मलं स्वर्णनिर्मितम्। भूषितं विविधै रत्नैः कुरु त्वं पादुकासनम् ॥

अर्घ्यम्

(अर्घ्य चढाउने)

ॐ त्रिपाद्दूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत् पुनः। ततो विष्वङ् व्यक्रामत्साशनानशने ऽअभि ॥

ॐ गन्धोदकेन पुष्पेण चन्दनेन सुगन्धिना। अर्घ्यं गृहाणदेवेश भक्तिं मे ह्यचलां कुरु ॥

आचमनीयम्

(जल चढाउने)

ॐ ततो विराडजायत विराजोऽअधि पूरुषः। स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥

ॐ कर्पूरोशीरसुरभिशीतलं निर्मलं जलम्। गङ्गायास्तु समानीतं गृहाणाचमनीयकम् ॥

स्नानम्

(जल चढाउने)

ॐ मन्दाकिन्याः समानीतं हेमांभोरुहवासितम्। स्नानाय ते मया भक्त्या नीरं स्वीक्रियतां विभो ॥

मधुपर्कम्

(दही, घ्यू, मह मिसाएर चढाउने)

ॐ मधुपर्क महादेव ब्रह्माद्यैः परिकल्पितम्। मया निवेदितं भक्त्या गृहाण परमेश्वर ॥

पञ्चामृतम्

(पञ्चामृत चढाउने)

ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः। सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥

गन्धोदकस्नानम्

(चन्दन चढाउने)

ॐ मलयाचलसम्भूतं चन्दनागरुमिश्रितम्। चन्दनं देवदेवेश स्नानार्थं प्रतिगृहचताम् ॥

उद्वर्तनम्

(विभिन्न सुगन्धित चन्दन चढाउने)

ॐ नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम्। उद्वर्तनं मया दत्तं स्नानार्थं प्रतिगृहचताम् ॥

शुद्धोदकस्नानम्

(शुद्ध जल चढाउने)

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। विश्वꣳहिरिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि। दीक्षातपसोस्तनूरसि तां त्वा शिवा ꣳशग्मां परिदधे भद्रं वर्णं पुष्यन् ॥

ततः दुग्धेन शिवोपरि धारां दत्वा शतरुद्रीयमन्त्रेणाथर्वशीर्षेण वा शिवमन्त्रेण वा स्नानं कुर्यात्।

वस्त्रम्

(वस्त्र चढाउने)

ॐ तस्माद्यज्ञात्त्सर्व्वहुतःसम्भृतम्पृषदाज्ज्यम। पशूँस्ताँश्च्चक्केव्वायव्व्यानारण्याग्ग्राम्याश्च्चये ॥

ॐ वस्त्रं सूक्ष्मं दूकूलं च देवानामपि दुर्लभम्। गृहाण त्वमुमाकान्त प्रसन्नो भव सर्वदा ॥

यज्ञोपवीतम्

(जनै चढाउने)

ॐ तस्माद्यज्ञात्त्सर्व्वहुतऽऋचः सामानिजज्ञिरे । छन्दा ँसिजज्ञिरेतस्माद्यजुस्तस्म्मादजायत ॥

ॐ यज्ञोपवीतं सहजं ब्रह्मणा निर्मितं पुरा । आयुष्यं बलवर्चस्वमुपवीतं गृहाण मे ॥

अलङ्करणम्

(गरगहना चढाउने)

ॐ तस्मादश्वाऽ अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥

ॐ दिव्यरत्नसमायुक्ता वह्निभानुसमप्रभाः । गात्राणि शोभयिष्यन्ति ह्यलङ्काराः सुरेश्वर ॥

चन्दनम्

(चन्दन चढाउने)

ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातऽमग्रतः । तेन देवाऽ अयजन्त साध्याऽ ऋषयश्च ये ॥

ॐ श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ गृहाण परमेश्वर ॥

अक्षता

(अक्षता चढाउने)

ॐ अक्षन्नमीमदन्त ह्यवप्रियाऽअधूषत । अस्तोषत स्वभानवो विप्रा नविष्टया मती योजान्विद्र ते हरी ॥

ॐ श्वेताः कुङ्कुमसंयुक्ता उत्तमाः शालितण्डुलाः । मया निवेदिता भक्त्या गृहाण परमेश्वर ॥

पुष्पाणि

(फूल चढाउने)

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत् किं बाहू किमूरू पादाऽ उच्येते ॥

ॐ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो । मयानीतानि पुष्पाणि गृहाण परमेश्वर ॥

बिल्वपत्रम्

(बेलपत्र चढाउने)

ॐ शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः । मा द्यावापृथिवीऽअभिशोचीर्मान्तरिक्षं मा वनस्पतीन् ॥

ॐ त्रिदलं त्रिगुणाकारं त्रिनेत्रं च शिवप्रियम् । त्रिजन्मोत्थं हरेत्पापं बिल्वपत्रं शिवार्पणम् ॥

पुष्पमाला

(माला चढाउने)

ॐ नानासुगन्धसंयुक्ता नानापुष्पविमिश्रिता । मया निवेदिता माला ग्राह्या तव महेश्वर ।

बिल्वपत्रमाला

(बेलपत्रको माला चढाउने)

ॐ सुत्रेण ग्रथितं माल्यं नानापुष्पविमिश्रितम् । मया निवेदिता माला ग्राह्या तव महेश्वर ।

धूप

(धूप बाल्ने)

ॐ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्या ँ शूद्रोऽअजायत ॥

ॐ वनस्पतिरसो दिव्यो गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

दीप

(बत्ती बाल्ने)

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥

ॐ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥

नैवेद्यम्

(नैवेद्य चढाउने)

ॐ नाभ्याऽआसीदन्तरिक्ष ꣳ शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँऽअकल्पयन् ॥

ॐ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् । भूतानां जीवनं चैव नैवेद्यं प्रतिगृह्यताम् ॥

अमृतै रचितं दिव्यं नानारुपविनिर्मितम् । मिष्टान्नं विविधं देव गृहाण मम भावतः ॥

मोदकं स्वादु संयुक्तं शर्करादि विमिश्रितम् । सुरम्यं भोजनं दिव्यं मया दत्तं प्रगृह्यताम् ॥

जलम्

(जल चढाउने)

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्मऽइद्ध्मः शरद्धविः ॥

ॐ जलं च शीतलं स्वच्छं सुगन्धिं सुमनोहरम् । मया निवेदितं भक्त्या गृहाण परमेश्वर ॥

करोद्वर्तनम्

(चन्दन चढाउने)

ॐ गन्धकर्पूरसंयुक्तं कस्तूर्यादिविमिश्रितम् । करोद्वर्तनकं दिव्यं गृहाण परमेश्वर ॥

फलम्

(फल चढाउने)

ॐ याः फलिनीर्याऽअपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व ꣳ हसः ॥

ॐ इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

ताम्बूलम्

(पान सुपारी चढाउने)

ॐ पूगीफलं महद्दिव्यं नागवल्लिदलैर्युतम् । एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

दक्षिणा

(द्रव्य चढाउने)

ॐ हिरययगर्भः समवर्तताग्रे... । ॐ हिरण्यगर्भगर्भस्थं... ।

नीराजनम्

(नीराजन बत्ती बाल्ने)

ॐ पञ्चवर्तिसमायुक्तं गोघृतेन च पूरितम् । नीराजनं मया दत्तं गृहाण भगवन् हर ॥

कर्पूरार्तिक्यम्

(कपुर र बत्ती बालेर आरती गर्ने)

ॐ इद ꣳ हविः प्रजननं मेऽअस्तु दश वीर ꣳ सर्वगण ꣳ स्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि । अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतोऽअस्मासु धत्त ॥

ॐ कदलीगर्भसंभूतं घनसारं शिशप्रभम् । आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥

प्रदक्षिणा

(प्रदक्षिणा गर्ने)

ॐ सप्तास्यासन्... । ॐ यानि कानि.... ।

पुष्पाञ्जलि

(फूल लिएर नमस्कार गर्ने)

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

ॐ नानासुगन्धिपुष्पाणि देशकालोद्भवानि च । पुष्पाञ्जलि मया दत्तं गृहाण परमेश्वर ॥

क्षमापनम्

(क्षमा माग्ने)

ॐ नमः शिवायं शान्ताय कारणत्रयहेतवे । निवेदयामि चात्मानं त्वं गतिः परमेश्वर ॥ ॐ अपराधसहस्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥ श्रूयतां धर्मसर्वस्वं शिवरात्रौ शिवार्चनम् । व्रतयज्ञविधानेन स्वर्गपुण्येन कर्मणा ॥ कृत्वा स्नानं शुचिर्भूत्वा धौतवस्त्रसमन्वितः । स्थापयेद्देवदेवेशं मन्त्रैर्वेदसमुद्भवैः । ततः पूजा प्रकर्तव्या पूर्वोक्तविधिना ततः ।

विशेषार्घ्यम्

(अर्घ्य दिने)

प्रथमप्रहरे बिल्वयुक्तं विशेषार्घ्यं दद्यादनेन मन्त्रेण- ॐ नमो यज्ञ जगन्नाथ नमस्त्रिभुवनेश्वर । पूजां गृहाण मद्दत्तां महेश प्रथमे पदे । इति प्रथमप्रहरपूजा । द्वितीयप्रहरेऽपि अनेनैव विधिना षोडशोपचारैः पूजयेत् ।

द्वितीयप्रहरे विशेषः पूर्वे नन्दिमहाकालौ शृङ्गिभृङ्गी च दक्षिणे ।
वृषस्कन्दौ पश्चिमे च देशकालौ तथोत्तरे ॥
गङ्गा च यमुना चैव पार्श्वे चैव व्यवस्थिते । इति ।
पूजान्ते बीजपूरेणार्घ्यं दद्यादनेनमन्त्रेण-
ॐ नमोऽव्यक्ताय सूक्ष्माय नमस्ते त्रिपुरान्तक ।
पूजां गृहाण देवेश यथाशक्त्युपपादितम् ॥
तृतीयप्रहरेऽपि पूजां समाप्य रम्भाफलेनार्घ्यं दद्यात् । मन्त्रस्तु-
ॐ बद्धोऽहं विविधैः पाशैः संसारभवबन्धनैः । पतितं मोहजालं मां त्वं समुद्धर शङ्कर ॥
चतुर्यप्रहरे आद्यावत् पूजां कृत्वाऽर्घ्यं दद्यात्-
ॐ नमः शिवाय शान्ताय सर्वपापहराय च ।
शिवरात्रौ मया दत्तं गृहाणार्घ्यं नमोऽस्तु ते ॥
ततः प्रभाते स्वात्वा विधिवत्पूजां विधाय विशेषार्घ्यं दद्यादनेन मन्त्रेण-
ॐ दुःखदारिद्र्यभाववैश्च दग्धोद्दहं पार्वतीपते ।
मां वै त्राहि महादेव किं न जानासि शङ्कर ॥
किं न जानासि देवेश तावद् भक्तिं प्रयच्छ मे ।
स्वपादाग्रतहे देव दास्यं देहि जगत्पते ॥
इत्यर्घ्यं दत्वा पूजां समाप्य ब्राह्मणाय दक्षिणां दत्वा भोजयेत् ।



(बिहान पूर्णपात्र दक्षिणा गरेर विसर्जन गर्ने)

॥ इति शिवरात्रिपूजा ॥

॥ श्रीगणेशाय नमः ॥

रामनवमीपूजा

रामनवमीपूजाविधिः

अथ व्रती नद्यादौ गत्वा स्नानादिकं विधाय शुद्धभूमौ मण्डपं कारयित्वा ध्वजतोरणादिकं च विस्तार्य सामग्रीं स्वस्वस्थाने संस्थाप्याचम्य प्राणायामं कुर्यात्। (कर्मपात्र वनाउने र सङ्कल्प गर्ने)

ततः कर्मपात्रं कृत्वा कुशतिलजलान्यादाय- ॐ अद्येत्यादि मासपक्षाद्युल्लिख्य अहं मम समस्तपापक्षयकामः श्रीरामप्रीतये रामनवमीव्रतं करिष्ये, तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं यथासंपादितोपचारैः श्रीरामपूजां करिष्ये। इति सङ्कल्प्य फलपुष्पाक्षतसहितं जलपूर्णताम्रपात्रं गृहीत्वा- (फूल अक्षता लिने)

ॐ उपोष्य नवमीं त्वद्य यामेष्वष्टसु राघव। तेन प्रीतो भव त्वं मे संसारात्त्राहि मां हरे॥

इति मन्त्रेण पात्रस्थं जलं भूमौ क्षिपेत्-

षडङ्गन्यासः

(दियो, कलश, गणेश, पूजा गरेर न्यास गर्ने)

ततो राममन्त्रेण षडङ्गन्यासं विधायार्घस्थापनपूर्वकं दीपादीन् सम्पूज्य प्रार्थयेत्। ततः शक्तितः हैमीं (रजतमयीं वा यथासम्भवम्) रामप्रतिमां कृत्वा अग्न्युत्तारणपूर्वकं अष्टदलमध्ये संस्थाप्य ॐ मनो जुतिरिति मन्त्रं पठन्प्राणप्रतिष्ठां कुर्यात्। (अष्टदल लेखेको थालीमा प्रतिमा राख्ने र प्राणप्रतिष्ठा गर्ने)

ततो ध्यानम्

(ध्यान गर्ने)

ॐ कोमलाङ्गं विशालाक्षमिन्द्रनीलसमप्रभम्। दक्षिणाङ्के दशरथं पुत्रावेक्षणतत्परम्॥
पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभम्। पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ॥
अग्रेऽव्यग्रं हनूमन्तं रामानुग्रहकांक्षिणम्। इति ध्यात्वा षोडशापचारैः पूजयेत्। तद्यथा-

आवाहनम्

(आवाहन गर्ने)

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमि ꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥
ॐ आवहयामि विश्वेशं जानकीवल्लभं प्रभुम्। कौसल्यातनयं विष्णुं श्रीरामं प्रकृतेः परम्॥

सन्निधापनम्

(ध्यान गर्ने)

ॐ श्रीरामागच्छ भगवन् रघुवीर नृपोत्तम। जानक्या सह राजेन्द्र सुस्थिरो भव सर्वदा॥
रामचन्द्र महेष्वास रावणान्तक राघव। यावत्पूजां समाप्स्येऽहं तावत्वं सन्निधो भव॥

संमुखीकरणम

(भगवान् आफूपट्टि फर्किएको सम्झिएर ध्यान गर्ने)

ॐ रघुनायकराजर्षे नमो राजीवलोचन। रघुनन्दन मे देव श्रीराम सम्मुखो भव॥

आसनम्

(कुश राख्ने)

ॐ पुरुष एवेद ꣳ सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

ॐ राजाधिराज राजेन्द्र रामचन्द्र महीपते। रत्नसिंहासनं तुभ्यं दास्यामि स्वीकुरु प्रभो ॥

पाद्यम्

(जल चढाउने)

ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

ॐ त्रैलोक्यपावनानन्त नमस्ते रघुनायक। पाद्यं गृहाण राजर्षे नमो राजीवलोचन ॥

अर्घ्यम्

(अर्घ्य चढाउने)

ॐ त्रिपाद्दूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत् पुनः। ततो विष्वङ् व्यक्रामत्साशनानशने ऽअभि ॥

ॐ परिपूर्ण परानन्द नमो रामाय वेधसे। गृहाणार्घ्यं मया दत्तं कृष्ण विष्णो जनार्दन ॥

आचमनीयम्

(जल चढाउने)

ॐ ततो विराडजायत विराजोऽअधि पूरुषः। स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥

ॐ नमः सत्याय शुद्धाय नित्याय ज्ञानरूपिणे। गृहाणाचमनं नाथ सर्वलोकैकनायक ॥

स्नानम्

(जल चढाउने)

ॐ ब्रह्माण्डोदरमध्यस्थैस्तीर्थैश्च रघुनन्दन। स्नापयिष्याम्यहं भक्त्या त्वं गृहाण जनार्दन ॥

मधुपर्कम्

(मह, दही, घ्यू मिसाएर चढाउने)

ॐ नमः श्रीवासुदेवाय तत्वज्ञानस्वरूपिणे। मधुपर्कं गृहाणेदं जानकीपतये नमः ॥

पञ्चामृतम्

(पञ्चामृत चढाउने)

ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः पयस्वतीः प्रदिशः सन्तु महयम्।

ॐ पञ्चामृतं मयानीतं पयोदधि घृतं मधु। शर्करामधुसंयुक्तं राम त्वं प्रतिगृह्यताम् ॥

शुद्धोदकस्नानम्

(शुद्ध जल चढाउने)

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। विश्व ꣳ हिरिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि। दीक्षातपसोस्तनूरसि तां त्वा शिवा ꣳ शग्मां परिदधे भद्रं वर्ण पुष्यन् ॥

पुष्पं धूपं दीपं नैवेद्यं समर्प्य संप्रार्थ्य निर्माल्यं विसृज्य पुनःस्नानम्- (धूप, दीप, नैवेद्य चढाउने)

ॐ ब्रह्माण्डोदरमध्यस्थैस्तीर्थैश्च रघुनन्दन। स्नापयिष्याम्यहं भक्त्या त्वं गृहाण जनार्दन ॥

गन्धोदकस्नानम्

(चन्दन चढाउने)

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

ॐ मलयाचलसंभूतं कर्पूरादिसुवासितम्। चन्दनं देवदेवेश स्नानार्थं प्रतिगृहचताम् ॥

उद्वर्तनम् (सुगन्धित चन्दन चढाउने)

ॐ नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम्। उद्वर्तनं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम्॥

शुद्धोदकस्नानम् (शुद्ध जल चढाउने)

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। विश्व ꣳ हिरिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि। दीक्षातपसोस्तनूरसि तां त्वा शिवा ꣳ शग्मां परिदधे भद्रं वर्ण पुष्यन्॥

ततः सहस्रशीर्षेत्यादि पुरुषसूक्तेन विष्णुसूक्तैश्चाभिषिञ्चेत्। (पुरुषसूक्त पाठ गर्ने)

वस्त्रम् (वस्त्र चढाउने)

ॐ तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये॥

ॐ तप्तकाञ्चनसंकाशं पीताम्बरमिदं हरे। संगृहाण जगन्नाथ रामचन्द्र नमोऽस्तु ते॥

यज्ञोपवीतम् (जनै चढाउने)

ॐ तस्माद्यज्ञात् सर्वहुतऽ ऋचः समानि जज्ञिरे। छन्दा ꣳ सि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥

ॐ श्रीरामाच्युत यज्ञेश श्रीधरानन्त राघव। ब्रह्मसूत्रं सोत्तरीयं गृहाण रघुनन्दन॥

चन्दनम् (चन्दन चढाउने)

ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातऽमग्रतः। तेन देवाऽ अयजन्त साध्याऽ ऋषयश्च ये॥

ॐ कुङ्कुमागरुकस्तुरी कर्पूरं चन्दनं तथा। तुभ्यं दास्यामि राजेन्द्र श्रीराम स्वीकुरु प्रभो॥

अक्षता (अक्षता चढाउने)

ॐ अक्षन्नमीमदन्त ह्यवप्रियाऽअधूषत। अस्तोषत स्वभानवो विप्रा नविष्टया मती योजान्विद्र ते हरी॥

ॐ अक्षताः परमा दिव्याः कुङ्कुमाक्ताः सुशोभनाः। भवदुःखविनाशार्थं गृहाण रघुनन्दन॥

पुष्पाणि (फूल चढाउने)

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्यासीत् किं बाहू किमूरू पादाऽ उच्येते॥

ॐ तुलसीकुन्दमन्दारजातीपुन्नागचंपकैः। कदम्बकरवीरैश्च कुसुमैः शतपत्रकैः॥

नीलाम्बुजैर्बिल्वपत्रैरर्चयेद्राघवं विभुम्। पूजयिष्याम्यहं भक्त्या संगृहाण जनार्दन॥

तुलसीपत्रम् (तुलसीपत्र चढाउने)

ॐ तुलसीं रत्नरुपां च हेमरुपां च मञ्जरीम्। भवमोक्षप्रदां तुभ्यमर्चयामि हरिप्रियाम्॥

अङ्गपूजा (चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ श्री रामचन्द्राय नमः, पादौ पूजयामि। ॐ राजीवलोचनाय नमः, गुल्फौ पूजयामि। ॐ रावणान्तकाय नमः, जानुनी पूजयामि। ॐ वाचस्पतये नमः, ऊरु पूजयामि। ॐ विश्वरुपाय नमः, जङ्घे पूजयामि। ॐ लक्ष्मणाग्रजाय नमः, कटीं पूजयामि। ॐ विश्वमूर्तये नमः, मेढ्रं पूजयामि। ॐ विश्वामित्रप्रियाय नमः, नाभिं पूजयामि। ॐ परमात्मने नमः, हृदयं पूजयामि। ॐ श्रीकण्ठाय नमः, कण्ठ पूजयामि। ॐ सर्वास्त्रधारिणे नमः, बाहू पूजयामि। ॐ रघूद्वहाय नमः, मुखं पूजयामि। ॐ पद्मनाभाय नमः, जिव्हां पूजयामि।

ॐ दामोदराय नमः, दन्तान् पूजयामि । ॐ सीतापतये नमः, ललाटं पूजयामि । ॐ ज्ञानगम्याय नमः, शिरः पूजयामि । ॐ सर्वात्मने नमः, सर्वाङ्गं पूजयामि ।

धूप (धूप बाल्ने)

ॐ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्या ꣳ शूद्रोऽअजायत ॥

ॐ वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः । रामचन्द्र महीपाल धूपोऽयं प्रतिगृह्यताम् ॥

दीप (बत्ती बाल्ने)

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥

ॐ ज्योतिषां पतये तुभ्यं नमो रामाय वेधसे । गृहाण दीपकं चैव त्रैलोक्यतिमिरापहम् ॥

नैवेद्यम् (नैवेद्य चढाउने)

ॐ नाभ्याऽआसीदन्तरिक्ष ꣳ शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँऽअकल्पयन् ॥

ॐ इदं दिव्यान्नममृतं रसैः षड्भिः समन्वितम् । लेह्यं पेय्यं च नैवेद्यं सीतेश प्रतिगृह्यताम् ॥

आचमनीयम् (जल चढाउने)

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्मऽइद्ध्मः शरद्धविः ॥

ॐ जलं च शीतलं स्वच्छं नित्यं शुद्धं मनोहरम् । पानीयं ते प्रयच्छामि गृहाण रघुनायक ॥

फलम् (फल चढाउने)

ॐ इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

ताम्बूलम् (पान सुपारी चढाउने)

ॐ नागवल्लीदलैर्युक्तं पूगीफलसमन्वितम् । ताम्बूलं गृह्यतां राम कर्पूरादिसमन्वितम् ॥

दक्षिणा (द्रव्य चढाउने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

दर्पणम् (ऐना देखाउने)

ॐ दर्शनेन त्वमादर्श नूनं मङ्गलदायक । सौर्यसौभाग्यसत्कीर्तिनिर्मलज्ञानदो भव ॥

चामरम् (चामर डोलाउने)

ॐ शशाङ्ककरसङ्काश हिमडिण्डिरपाण्डूर । प्रोत्सारयाशु दुरितं चामरामरवल्लभ ॥

ततो यथाशक्ति जपं कृत्वा समर्पयेत् । (यथाशक्ति जप गर्ने)

निराजनम् (नीराजन बत्ती बाल्ने)

ॐ मङ्गलार्थं महीपाल नीराजनमिदं हरे । सङ्गृहाण जगन्नाथ रामचन्द्र नमोऽस्तु ते ॥

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा । सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहाः । अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा । सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा । ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥

कर्पूरदीप (कपुर र वत्ती बालेर आरती गर्ने)

ॐ आरार्तिक्यं तव पुरः करोम्युज्ज्वलदीपकैः । मणिकर्पूरतैलाज्यसम्भवैः शक्तिसम्मितैः ॥

ॐ इद ँ हविः प्रजननं मेऽअस्तु दश वीर ँ सर्वगण ँ स्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि । अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतोऽअस्मासु धत्त ॥

नमस्कार (नमस्कार गर्ने)

ॐ नमस्कारान्प्रकुर्वेऽहं मनसा वचसा दृशा । भूमिसंलग्नहृत्पादललाटकरजानुकान् ॥

प्रदक्षिण (प्रदक्षिणा गर्ने)

ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाऽअबद्ध्नन् पुरुषं पशुम् ॥

ॐ यानि कानि च पापानि जन्मान्तर कृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणः पदेपदे ॥

पुष्पाञ्जलि (फूल लिएर नमस्कार गर्ने)

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

ॐ नमो देवाधिदेवाय रघुनाथाय शार्ङ्गिणे । चिन्मयानन्तरुपाय सीतायाः पतये नमः ॥

ततः अशोककुसुमैरर्घ्यं दद्यात् (अर्घ्य दिने)

ॐ दशाननवधार्थाय धर्मसंस्थापनाय च । राक्षसानां वधार्थाय दैत्यानां निधनाय च ॥
परित्राणाय साधूनां जातो रामः स्वयं हरिः । गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ ॥

इत्यर्घ्यं दत्त्वा प्रार्थयेत् (प्रार्थना नमस्कार गर्ने)

ॐ नृत्यैर्गीतैश्च वाद्यैश्च पुराणपठनादिभिः । प्रेमोपचारैरखिलैः सन्तुष्टो भव राघव ॥

ततो ब्राह्मणं सम्पूज्य वायनं (पूर्णपात्र) दद्यात्- (पूर्णपात्र सिदा, दक्षिणा गर्ने)

ॐ वायनं वंशपात्रस्थं सवस्त्रं दक्षिणान्वितम् । ददामि द्विजमुख्याय व्रतसाङ्गत्वसिद्धये ॥

ततो दक्षिणां दत्त्वा यान्तु देवेति देवान् विसृज्य प्रार्थयेत्- (नमस्कार गर्ने र विसर्जन गर्ने)

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

आवाहनं न जानामि... । मन्त्रहीनं क्रियाहीनं... ।
अनेन यथाज्ञानकृतेन पूर्वोत्तराराधनेन भगवान् श्रीरामचन्द्रः प्रीयताम् ।
ततः ॐ कायेनवाचा... इति कर्मेश्वरार्पणं कुर्यात् ।

॥ इति रामनवमीपूजा ॥

॥ श्रीगणेशाय नमः ॥

आदौ श्रीरामनवमीव्रतोद्यापनविधिः

अथ श्रीरामनवमीव्रतोद्यापनविधिः

(रामनवमी व्रत उद्यापन गर्ने)

सर्वोद्यापनविधौ सर्वतोभद्रमण्डलैकदेशे कलशं संस्थाप्य सम्पूज्य च, तदुपरि ताम्रस्थाली निधाय स्थाल्युपरि सवर्णनिर्मितां जानकीसहित श्रीरामप्रतिमां तत्पूजाविधिना (रामनवली पूजाविधिना) सम्पूज्य रात्रौ जागरणं कुर्यात् ॥ प्रातर्देवस्योत्तरपूजां विधाय पायससमिच्चरुतिलैः पुरुषसूक्तेन मूलमन्त्रेण वा १०८ होमं समाप्य श्रीरामं प्रार्थयेत् – (कलश थाली स्थापना गरी जानकीसहित श्रीरामको प्रतिमा राखी पूजा, हवन र नमस्कार गर्ने)

नतोऽस्मि देवदेवेश । श्रीराम ! त्वत्पदाम्बुजम् । यच्चिन्त्यते कर्मपाशाद् हृदि नित्यं मुमुक्षुभिः ॥
मायया गुणमय्या त्वं सृजस्यसि विलुम्पसि । अतस्त्वत्पादकमले भक्तिरेव सदाऽस्तु मे ॥
संसारभयतप्तानां भैषज्यं भक्तिरेव ते ॥

(तामाको थालीमा तिल राखी प्रतिमा राख्ने र पूजा गरी ब्राह्मण ब्राह्मणीलाई प्रतिमा, वस्त्र दान गर्ने)

बटु-ब्रह्मचारिभ्यः फल-वस्त्र-वराटकसहितनववंशदण्डदानम् ।
षोडशब्राह्मणेभ्यः सहिरण्यघृततिलताम्रपात्रदानम् । (कन्या र कुमारको पूजा गर्ने)
कन्या-कुमारपूजां विधाय प्रतिमादानं, पूर्णपात्रदानं, शय्यादानं च पूर्ववत् कुर्यात् । (सङ्कल्प गर्ने)
अद्येत्यादि अमुकगोत्रोऽहं मम श्रीरामप्रीतये कृतस्य यथाकालमारभ्यैतावत्काल पर्यन्तं कृतस्य रामनवमी-व्रतस्योद्यापनाङ्गत्वेन सुपूजितां सोपस्करां सौवर्णी रामप्रतिमां श्रीरामप्रीतये अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना

(नमस्कार गर्ने)

इमां स्वर्णमयीं रामप्रतिमां समलङ्कृताम् । चित्रवस्त्रयुगच्छन्नां रामाय राघवाय वै ॥
श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः ॥

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

अद्य कृतैतत् सुपूजित-स्वर्णनिर्मित-सोपस्कर-रामप्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्देयं तद्दैवतं यथानामगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्

(गोदान गर्ने पेज नं. ८)

॥ इति रामनवमीव्रतप्रतिष्ठा ॥

॥ श्रीगणेशाय नमः ॥

हरितालिकाव्रतोद्यापनविधिः

सर्वोद्यापनविधौ सर्वतोभद्रमण्डलैकदेशे कलशं संस्थाप्य सम्पूज्य च, तदुपरि ताम्रस्थालीं निधाय स्थाल्युपरि रजतनिर्मितां वृषारुढां महादेवप्रतिमां सुवर्णनिर्मितां गौरीप्रतिमां च तत्पूजनविधिना (हरितारिकापूजाविधिना) समपूज्य रात्रौ जागरणं कुर्यात्। (तामाको थालीमा गौरी सहित महादेवको प्रतिमा राखी पूजा गर्ने)

प्रातर्देव्या उत्तरपूजां विधाय प्रार्थना

(नमस्कार गर्ने)

नमः शिवाय शान्ताय पञ्चवक्त्राय शूलिने। नन्दि-भृङ्गि-महाकालगणयुक्ताय शम्भवे ॥
शिवायै हरकान्तायै प्रकृत्यै सृष्टिहेतवे। शिवायै सर्वमाङ्गल्यै शिवरुपे जगन्मये ॥
संसारभयसन्तापात् त्राहि मां सिंहवाहिनि। येन कामेन देवेशि पूजितासि महेश्वरि ! ॥
राज्य-सौभाग्य-सम्पत्तिं देहि मामम्ब पार्वति ! (सौभाग्य वस्त्रसहित शय्यादान र पूर्णपात्र दान गर्ने)
षोडशब्राह्मणेभ्यः सौभाग्यद्रव्यवस्त्रसहितषोडशपात्रदानम् ॥ शय्यादानदिने च तान् दत्वा पूर्णपात्रदानम्।

प्रतिमादानम्

(प्रतिमा दान गर्ने)

अद्येत्यादि अमुकगोत्रोऽहं मम श्रुति-स्मृति-पुराणोक्तफलावाप्तिपूर्वक श्रीउमामहेश्वरप्रीतये कृतस्य हरितालिका-व्रतस्योद्यापनाङ्गत्वेन सुपूजितोपस्करां रौप्यनिर्मितमहेश्वरप्रतिमां सुवर्णनिर्मितगौरिप्रतिमामुमामहेश्वरदेवता-मुमामहेश्वरप्रीतये यथानामगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना

(नमस्कार गर्ने)

शम्भो ! प्रसीद देवेश ! सर्वलोकवरप्रद ! तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु मे ॥

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

अद्य कृतैतदुमामहेश्वरप्रतिमादानकर्मणः साङ्गतासिद्धये यद्देयं तद्दैवतं यथानामगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्

(गोदान गर्ने पेज नं. ८)

इति हरितालिकोद्यापनम्। अन्यत्सर्वं पूर्ववत् ॥

॥ श्रीगणेशाय नमः ॥

ऋषिपञ्चमीव्रतोद्यापनविधिः

सर्वोद्यापनविधौ सर्वतोभद्रमण्डलैकदेशे कलशं संस्थाप्य सम्पूज्य च, तदुपरि ताम्रस्थालीं निधाय स्थाल्युपरि सौवर्णीः ऋषिप्रतिमाः संस्थाप्य तत् पूजाविधिना (ऋषिपञ्चमीपूजाविधिना) पूजां निर्वर्त्य रात्रौ जागरणं कुर्यात् । प्रातः ऋषिणामुत्तरपूजां विधाय तिलसर्पिषा १०८ – (तामाको थालीमा सुनको ऋषि प्रतिमा राखी पूजा गरी १०८ हवन गर्ने)

ॐ सप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् ।
सप्तापः स्वपतोलोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ ।

इति मन्त्रेण होमं समाप्य ऋषीन् प्रार्थयेत् (नमस्कार गर्ने)

नमोऽस्तु ऋषिवृन्देभ्यो देवर्षिभ्यो नमो नमः । सर्वपापहरेभ्यो हि वेदविद्भ्यो नमो नमः ॥
एते सप्तर्षयः सर्वे भक्तचा सम्पूजिता मया । सर्वं पापं व्यपोहन्तु ज्ञानतोऽज्ञानतः कृतम् ॥
न्युनातिरिक्तकर्माणि मया यानि कृतानि च । क्षमध्वं तानि सर्वाणि यूयं सर्वे तपोधनाः ॥
ततः ब्राह्मणेभ्यो वस्त्रालङ्कारदक्षिणादानम् । शय्यां चैतेभ्यो दद्यात् ॥

पूर्णपात्रदानम् । प्रतिमादानम् (पूर्णपात्र, शय्या, प्रतिमा दान गर्ने)

अद्येत्यादि अमुकदेव्यहं मम रजस्वलावस्थायां ज्ञाताज्ञातकृतऋतुसम्पर्कजनितदोषनिवृत्तये सप्तर्षिप्रीत्यर्थं कृतस्य ऋषिपञ्चमीव्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन संपूजिताः सौवर्ण्यः सारुन्धतिकाः सप्तर्षिप्रतिमाः सप्तर्षिप्रीतये अमुक गोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

प्रार्थना (नमस्कार गर्ने)

तपोधना ज्योतिरूपा ऋषयो मे प्रसीदतः । भवतां मूर्तिदानेन व्रतं सम्पूर्णमस्तु मे ॥

दानप्रतिष्ठा (दानप्रतिष्ठा गर्ने)

अद्य कृतैतत् संपूजितसारून्धतिकसप्तर्षिप्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये इदं अमुकद्रव्यममुक दैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम् (गोदान गर्ने पेज नं. ८)

॥ इति ऋषिपञ्चम्युद्यापनविधिः ॥

॥ श्रीगणेशाय नमः ॥

अथ अनन्तपूजाविधिः

(दियो, कलश, गणेश पूजा गरी फूल लिएर नमस्कार गर्ने)

प्रातर्नद्यादिके स्नात्वा नित्यकर्म समाप्य च । अनन्तं हृदये कृत्वा शुचिस्तत्र समाहितः ॥
अव्रणं कलशं चैव वस्त्रयुग्मेन वेष्टितम् । मुष्टिमात्रेण दर्भैस्तु फणिराजं च कारयेत् ॥
स्थापयेत् कलशस्याग्रे जगदाधारमव्ययम् । आराधयेदनन्तं च तस्मिन् कुम्भे विशेषतः ॥
गोचर्ममात्रमालिप्य गोमयेन विचक्षणः । तन्मध्येस्थण्डिलं कृत्वा पदमष्टदलं लिखेत् ॥
तस्योपरि न्यसेत्कुम्भं चूतपल्लवसंयुतम् । प्राणायामं ततः कृत्वा तीर्थादि परिकीर्तयेत् ॥

सङ्कल्प

(सङ्कल्प गर्ने)

अद्येहेत्यादि मम सकुटुम्बस्य क्षेमस्थैर्यायुरारोग्यचतुर्विधपुरुषार्थसिद्ध्यर्थं श्रीमदनन्त देवता प्रीत्यर्थं यथा ज्ञानेन ध्यानावाहनादिषोडशोपचारैः श्रीमदनन्तपूजां करिष्ये ॥ तथा च आसनादिकं च करिष्ये ।

आसनम्

(आसन राख्ने)

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

कलशस्थापनम्

(कलश स्थापना गर्ने)

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

कलशं वरुणं च सम्पूज्य । ततः शङ्खं घण्टां च सम्पूजयेत् । (शङ्खघण्टाको पूजा गर्ने)

कुशत्रयसहितं कर्मपात्रोदकमादाय

(जलले सेचन गर्ने)

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥

इति पूजाद्रव्याणि आत्मानं च प्रोक्ष्य... गोत्र... अहं यमुनापूजनं करिष्ये ।

ध्यानम्

(ध्यान गर्ने)

लोकपालास्तु तां देवीमिन्द्रनीलसमुद्भवाम् । यमुने ! त्वामहं ध्याये सर्वकामार्थसिद्धये ॥

आवाहनम्

(आवाहन गर्ने)

सरस्वति ! नमस्तुभ्यं सर्वकामप्रदायिनी ! । आगच्छ देवि ! यमुने ! व्रतसम्पूर्तिहेतवे ॥

आसनम्

(कुश राख्ने)

सिंहासनसमारूढे ! देवशक्तिसमन्विते ! । सर्वलक्षणसम्पूर्णे ! यमुनायै नमोऽस्तु ते ॥

पाद्यम्

(जल चढाउने)

रुद्रपादे ! नमस्तुभ्यं सर्वलोकहितप्रिये ! । सर्वपापप्रशमनि तरङ्गिण्यै नमोऽस्तु ते ॥

अर्घ्यम् (अर्घ्य चढाउने)

ताक्ष्र्यपादे नमस्तुभ्यं शङ्करप्रियभामिनि ! । सर्वकामप्रदे ! देवि ! यमुने ! ते नमो नमः ॥

आचमनम् (जल चढाउने)

विष्णुपादोद्भवे देवि ! सर्वाभरणभूषिते । कृष्णामूर्ते ! महादेवि ! कृष्णावेण्यै नमो नमः ॥

मधुपर्कम् (मह, दही, घ्यू मिसाएर चढाउने)

सर्वपापहरे देवि ! विश्वप्रियप्रदर्शिनि । सौभाग्यं यमुने ! देहि यमुनायै नमोऽस्तु ते ॥

पञ्चामृतम् (पञ्चामृत चढाउने)

नदीपादे ! महादेवि ! शङ्करार्धशरीरिणि ! । सर्वलोकहिते देवि ! भीमरथ्ये ! नमोऽस्तु ते ॥

शुद्धोदकस्नानम् (जल चढाउने)

सिंहपादोत्तमे ! देवि नारसिंहसमप्रभे । सर्वलक्षणसम्पूर्णे भवनाशिनि ते नमः ॥

श्वेतवस्त्रम् (सेतो कपडा चढाउने)

विष्णुपादाब्जसम्भूते गङ्गे ! त्रिपथगामिनि । सर्वपापहरे देवि भागीरथ्यै नमोऽस्तु ते ॥

कञ्चुकीम् (वस्त्र चढाउने)

शङ्करस्य जटोद्भूते गौतमस्याघनाशिनि । सप्तधासागरं याति गोदावरि नमोऽस्तु ते ॥

आभरणम् (गरगहना चढाउने)

माणिक्यमुक्तावलिकौस्तुभैश्च गोमेदवैदूर्यसुपुष्परागैः । वज्रैश्च नीलैश्च सुशोभितानि गृहाण सर्वाभरणानि देवि ॥

गन्धम् (चन्दन चढाउने)

चन्दनागरुकस्तूरी रोचनं कुङ्कुमं तथा । कर्पूरेण समायुक्तं गन्धं दद्मि च भक्तितः ॥

अक्षतान् (अक्षता चढाउने)

श्वेतांश्च चन्द्रवर्णाभान् हरिद्रा-रागरञ्जितान् । अक्षतांश्च सुरश्रेष्ठ ! ददामि यमुने शुभे ॥

पुष्पाणि (फूलमाला चढाउने)

मन्दारमालती जाती केतकी पाटलैः शुभैः । पूजायामि च देवेशि यमुने भक्तवत्सले ॥

अङ्गपूजा (चन्दन, अक्षता, फूलले पूजा गर्ने)

चञ्चलायै नमः पादौ पूजयामि । **चपलायै नमः** जानुनी पूजयामि । **भक्तवत्सलायै नमः** ऊरू पूजयामि । **हरायै नमः** नाभिं पूजयामि । **मन्मथवासिन्यै नमः** गुह्यं पूजयामि । **अज्ञानवासिन्यै नमः** कटीं पूजयामि । **भद्रायै नमः** स्तनौ पूजयामि । **अघहन्त्र्यै नमः** भुजौ पूजयामि । **रक्तकण्ठचै नमः** कण्ठं पूजयामि । **भवहन्त्र्यै नमः** मुखं पूजयामि । **गौर्यै नमः** नेत्रे पूजयामि । **भागीरथ्यै नमः** ललाटं पूजयामि । **यमुनायै नमः** शिरः पूजयामि । **सरस्वत्यै नमः** सर्वाङ्गं पूजयामि ।

नामपूजा (पूजा गर्ने)

यमुनायै नमः । सितायै नमः । कमलायै नमः । उत्पलायै नमः । अभीष्टप्रदायै नमः । धात्र्यै नमः । हरिहररूपिण्यै नमः । गायत्र्यै नमः । गरुडाय नमः । गिरिजायै नमः । चन्द्रचूडायै नमः । सर्वेश्वर्यै नमः । महालक्ष्म्यै नमः । सर्वपापहरे देवि ! सर्वोपद्रवनाशिनि । सर्वसम्पत्प्रदे देवि ! यमुनायै नमोऽस्तु ते ॥

धूपम् (धूप बाल्ने)

दशाङ्गो गुग्गुलोद्भूतश्चन्दनागरुसंयुतः । कपिलाघृतसंयुक्तो धूपोऽयं प्रतिगृह्यताम् ॥

दीपम् (दीप बाल्ने)

घृतवर्तिसमायुक्तं बन्हिना योजितं मया । गृहाण दीपकं देवि ! सर्वैश्वर्यप्रदायिनि ॥

नैवेद्यम् (नैवेद्य चढाउने)

शर्करामधुसंयुक्तं दधिक्षीराज्यसंयुतम् । पक्वमन्नं मया दतं नैवेद्यं प्रतिगृह्यताम् ॥

हस्तप्रक्षालनम् (हात धुने)

पानीयं पावनं श्रेष्ठं गङ्गादिसरिदुद्भवम् । हस्तप्रक्षालनं देवि गृहाण मुखशोधनम् ॥

मुखप्रक्षालनम् (मुख कुल्ला गर्ने)

कर्पूरेण समायुक्तं यमुने ! चारुचन्दनम् । समर्पितं मया तुभ्यं करोद्वर्तनकं कुरु ॥ (पान, सुपारी, फल, पैसा चढाउने)

करोद्वर्तनार्थे – चन्दनम् । इदं फलमिति फलम् । पूगीफलमिति ताम्बूलम् । हिरण्यगर्भेति दक्षिणाम् ।

आर्तिक्यम् (आरती गर्ने)

त्रैलोक्यपावने ! गङ्गे ! अन्धकारविनाशिनि । पञ्चार्तिक्यं गृहाणेदं विश्वप्रीत्यै नमोऽस्तु ते ॥

पुष्पाञ्जलिम् (पुष्पाञ्जलि गर्ने)

केतकीजातिकुसुमैर्मल्लिकामालतीभवैः । पुष्पाञ्जलिर्मयादत्तस्तव प्रीत्यै नमोऽस्तुते ॥

प्रदक्षिणा (प्रदक्षिणा गर्ने)

अन्यथा शरणं नास्ति त्वमेव शरणं मम । तस्मात्कारुण्यभावेन संरक्ष परमेश्वरि ! ॥

नमस्कारान् (नमस्कार गर्ने)

सुरासुरेन्द्रादिकिरीटमौक्तिकैर्युक्तं सदा यत्तव पादपङ्कजम् । परावरं पातु वरं सुमङ्गलं नमामि भक्त्या मम कामसिद्धये ॥ भवानि ! च महालक्ष्मि ! सर्वकामप्रदायिनि । व्रतं सम्पूर्णतां यातु यमुनायै नमोऽस्तु ते ॥

यमुनाकलशोपरि पूर्णपात्रं निधाय तस्योपरि सप्तफणायुक्तं शेषं संस्थाप्य पूजयेत् –

ध्यानम् (ध्यान गर्ने)

ब्रह्माण्डाधारभूतं च यमुनान्तरवासिनम् । फणासप्तसमायुक्तं ध्यायेऽनन्तं हरिप्रियम् ॥

आवाहनम् (आवाहन गर्ने)

शेषं सप्तफणायुक्तं कालपन्नगनायकम् । अनन्तशयनार्थं त्वां भक्तचा ह्यावाहयाम्यहम् ॥

आसनम् (आसन राख्ने

नवनागकुलाधीश शेषोद्धारक काश्यप । नानारत्नसमायुक्तमासनं प्रतिगृह्यताम् ॥

पाद्यम् (जल चढाउने)

अनन्तप्रिय शेषेश जगदाधारविग्रह ! । पाद्यं गृहाण भत्या त्वं काद्रवेय ! नमोऽस्तु ते ॥

अर्घ्यम् (अर्घ्य चढाउने)

कश्यपानन्दजनक मुनिवन्दित भो प्रभो ! । अर्घ्यं गृहाण सर्वज्ञ सादरं शङ्करप्रिय ॥

आचमनम् (जल चढाउने)

सहस्रफणिरूपेण वसुधोद्धारक प्रभो ! । गृहाणाचमनं देव पावनं च सुशीतलम् ॥

मधुपर्कम् (मह, घ्यू, दही मिसाएर चढाउने)

कुमाररूपिणे तुभ्यं दधिमध्वाज्यसंयुतम् । मधुपर्कं प्रदास्यामि सर्पराज नमोस्तु ते ॥

पञ्चामृतम् (पञ्चामृत चढाउने)

पयो दधि घृतं चाथ मधु वै शर्करा तथा । पञ्चामृतं गृहाण त्वं प्रसीद परमेश्वर ॥

स्नानम् (जल चढाउने)

गङ्गादिपुण्यतीर्थैस्त्वामभिषिञ्चेयमादरात् । बलभद्रावतारेश ! नन्दज श्रीपतेः सखे ॥

वस्त्रम् (कपडा चढाउने)

कौशेययुग्मं देवेश ! प्रीत्या तव मयाऽर्प्रितम् । गृहाण पन्नगाधीश तार्क्ष्यशत्रो नमोऽस्तु ते ॥

यज्ञोपवीतम् (जनै चढाउने)

सुवर्णनिर्मितं सूत्रं ग्रथितं कण्ठहारकम् । अनेकरत्नैः रचितं सर्पराज नमोऽस्तु ते ॥

सर्वाभरणम् (सुनचाँदीका गहना र रत्नहरू चढाउने)

अनेकरत्नान्वितहेमकुण्डले माणिक्यसङ्गाशितकङ्कणद्वयम् । हेमाङ्गुलीयं कृतरत्नमुद्रिकं हैमं किरीटं फणिराजमर्पितम् ॥

चन्दनम् (चन्दन चढाउने)

श्रीखण्डं चन्दनं दिव्यं गन्धाढचं सुमनोहरम् । विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥

अक्षता (अक्षता चढाउने)

अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः । मया निवेदिता भक्त्या गृहाण परमेश्वर ॥

पुष्पाणि

(फूल चढाउने)

करवीरैर्जातिपुष्पैश्चंपकैर्बकुलैः शुभैः । तव पूजां करोम्यत्र विष्णुप्रिय नमोऽस्तु ते ॥

अङ्गपूजा

(चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ सहस्रपादाय नमः पादौ पूजयामि ॥ गुढगुल्फाय नमः गुल्फौ पूजयामि ॥ हेमजङ्घाय नमः जङ्घे पूजयामि ॥ मन्दगतये नमः जानुनी पूजयामि ॥ पीताम्बराय नमः कटिं पूजयामि ॥ गम्भीरनाभाय नमः नाभिं पूजयामि । पवनाशनाय नमः उदरं पूजयामि ॥ उरगाय नमः हस्तौ पूजयामि । कालिकाय नमः भुजौ पूजयामि ॥ कम्बुकण्ठाय नमः कण्ठं पूजयामि ॥ विषवक्त्राय नमः वक्त्रं पूजयामि ॥ अनन्तप्रियाय नमः सर्वाङ्गं पूजयामि ॥

धूपम्

(धूप वाल्ने)

वनस्पतिरसोद्भूतो गन्धाढचो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

दीपम्

(वत्ती वल्ने)

आज्यं च वर्तिसंयुक्तं वन्हिना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥

नैवेद्यम्

(नैवेद्य चढाउने)

नानापक्वान्नसंयुक्तं सुस्वादु मधुरं मधु । नैवेद्यं गृहचतां देव भक्तिं मे ह्यचलां कुरु ॥

मध्ये पानीयम् ॥ उत्तरापोशनम् ॥ हस्तप्रक्षालनम् ॥ मुखप्रक्षालनम् ॥ करोद्वर्तनार्थे चन्दनम् ॥ पूगीफलम् ॥ ताम्बूलम् ॥ फलम् – इदं फलम्... ॥ दक्षिणाम् - हिरण्यगर्भेति ... ॥

(जल चढाउने, कुल्ला गर्ने, हात धुने, चन्दन, सुपारी, पान र दक्षिणा चढाउने)

मन्त्रपुष्पम्

(फूल लिई नमस्कार गर्ने)

नानाकुसुमसंयुक्तं पुष्पाञ्जलिमिमं प्रभो ! । कश्यपानन्दजनक सर्पेश ! प्रतिगृह्यताम् ॥

प्रदक्षिणा

(प्रदक्षिणा गर्ने)

यानिकानि च पापानि जन्मान्तर कृतानि च । तानि तानि प्रणश्यन्तु प्रदक्षिणा पदे पदे ॥

नमस्कार

(नमस्कार गर्ने)

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥

प्रार्थना

(नमस्कार गर्ने)

अनन्तकल्पोक्तफलं देहि मे त्वमहीश्वर ! । त्वत्पूजारहितश्चार्द्धफलं प्राप्नोति मानव ॥

द्वारपूजा

(चन्दन, अक्षता, फूलले पूजा गर्ने)

प्राग्द्वारे (द्वारपालहरूको पूजा गर्ने)

द्वारश्रियै नमः । नन्दायै नमः । सुनन्दायै नमः । धात्र्यै नमः । विधात्र्यै नमः । चिच्छक्तयै नमः । शङ्खनिधये नमः पद्मनिधये नमः ।

दक्षिणद्वारे (दक्षिणतिर पूजा गर्ने)

द्वारश्रियै नमः । चण्डायै नमः । प्रचण्डायै नमः । धात्र्यै नमः विधात्र्यै नमः । चिच्छक्तयै नमः मायाशक्तयै नमः शङ्खनिधये नमः । पद्मनिधये नमः ।

पश्चिमद्वारे (पश्चिमतिर पूजा गर्ने)

द्वारश्रियै नमः । बलायै नमः । धात्र्यै नमः । विधात्र्यै नमः । चिच्छक्तयै नमः । मायाशक्तयै नमः । शङ्खनिधये नमः । पद्मनिधये नमः ।

उत्तरद्वारे (उत्तरतिर पूजा गर्ने)

द्वारश्रियै नमः । महाबलायै नमः । प्रबलायै नमः । धात्र्यै नमः । विधात्र्यै नमः । चिच्छक्तयै नमः । मायाशक्तयै नमः शङ्खनिधये नमः । पद्मनिधये नमः ।

पीठपूजा (चन्दन, अक्षता, फूलले पूजा गर्ने)

मध्ये वास्तुपुरुषाय नमः । मण्डूकाय नमः । कालाग्निरुद्राय नमः । आधारशक्तयै नमः । कूर्मायै नमः । पृथिव्यै नमः । अमृतार्णवाय नमः । श्वेतद्वीपाय नमः । कल्पवृक्षेभ्यो नमः । मणिमन्दिराय नमः । हेमपीठाय नमः । धर्माय नमः । अधर्माय नमः । ज्ञानाय नमः । वैराग्याय नमः । ऐश्वर्याय नमः । अनैश्वर्याय नमः । सहस्रफणान्वितायानन्ताय नमः । सर्वसत्त्वाय नमः । पद्माय नमः । आनन्दकन्दाय नमः । संविन्नालाय नमः । वन्हिमण्डलाय नमः । संसत्वाय नमः । रं रजसे नमः । तं तमसे नमः । आत्मने नमः । परमात्मने नमः । अन्तरात्मने नमः । ज्ञानात्मने नमः । प्राणात्मने नमः । कालात्मने नमः ॥

पूर्वादिदिक्षु (पूर्वदेखि क्रमैले पूजा गर्ने)

जयायै नमः । विजयायै नमः । अजितायै नमः । अपराजितायै नमः । नित्यायै नमः । विनाशिन्यै नमः । दोग्ध्रयै नमः । अघोरायै नमः । मङ्गलायै नमः । आधारशक्तिकमलासनाय नमः । अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋक्सामाथर्वाणिच्छन्दांसि परा प्राणशक्तिर्देवता ॥ आं बीजम् । ह्रीं शक्तिः क्रौं कीलकम् । श्रीमदनन्तस्य प्राणप्रतिष्ठापने विनियोगः ॥ (विनियोग र प्राणप्रतिष्ठा गर्ने)

ॐ आँ ह्रीं क्रौं अं यं रं लं वं शं षं सं हं क्षं अः क्रौं ह्रीं आं अनन्तस्य प्राणा इह प्राणाः ॥ ॐ आं ह्रीं क्रौं... अनन्तस्य जीव इह स्थितः ॥ ॐ आं ह्रीं क्रौं... अनन्तस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुः श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानीहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥

ॐ असुनी ते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् ॥ ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते

मृडया नः स्वस्ति ॥ चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ।

गर्भाधानादि संस्कारसिद्धचर्थं पञ्चदशप्रणवावृत्तिः करिष्ये । ॐ रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः ॥
पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यङ्कुशं पञ्चबाणान् । बिभ्राणाऽसृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या ॥
देवीबालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

अनन्तपूजा ध्यानम्

(नमस्कार गर्ने)

ततस्तु मूलमन्त्रेण नमस्कृत्य जनार्दनम् । नवाम्रपल्लवाभासं पिङ्गलश्मश्रुलोचनम् ॥
पीताम्बरधरं देवं शङ्ख-चक्र-गदाधरम् । अलङ्कृतं समुद्रस्थं विश्वरूपं विचिन्तये ॥

आवाहनम्

(आवाहन गर्ने)

आगच्छानन्त देवेश तेजोराशे जगत्पते ! । इमां मया कृतां पूजां गृहाण पुरुषोत्तम ॥

आसनम्

(कुश राख्ने)

नानारत्नसमायुक्तं कार्तस्वरविभूषितम् । आसनं देवदेवेश ! गृहाण पुरुषोत्तम ॥

पाद्यम्

(जल चढाउने)

गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाऽऽहृतम् । तोयमेतत् सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ॥

अर्घ्यम्

(अर्घ्य चढाउने)

अनन्तानन्तदेवेश ! अनन्तफलदायक । अनन्तनन्तरूपोऽसि गृहाणार्घ्यं नमोऽस्तु ते ॥

आचमनम्

(जल चढाउने)

गङ्गोदकं समानीतं सुवर्णकलशे स्थितम् । आचम्यतां हृषीकेश ! प्रसीद पुरुषोत्तम ॥

स्नानम्

(जल चढाउने)

अनन्तगुणरूपाय विश्वरूपधराय च । नमो महात्मदेवाय अनन्ताय नमो नमः ॥

पञ्चामृतम् – तत्र पयसा

(पञ्चामृतमा पहिले दुध चढाउने)

सुरभेस्तु समुत्पन्नं देवानामपि दुर्लभम् । पयो ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ॥

दधि

(दही चढाउने)

चन्द्रमण्डलसङ्काशं सर्वदेवप्रियं हि तत् । ददामि दधि देवेश स्नानार्थं प्रतिगृह्यताम् ॥

घृतम्

(घ्यू चढाउने)

आज्यं सुराणामाहारं आज्ये लोकाः प्रतिष्ठिताः । आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यताम् ॥

मधु (मह चढाउने)

सर्वौषधिसमुत्पन्नं पीयूषसदृशं मधु । स्नानाय ते मया दत्तं गृहाण परमेश्वर ॥

शर्करा (सखर चढाउने)

इक्षुसारसमुद्भूतां शर्करां मधुरां शुभाम् । स्नानाय ते मया दत्तं गृहाण परमेश्वर ॥

वस्त्रम् (कपडा चढाउने)

तप्तकाञ्चनवर्णाभं कौशेयं च सुनिर्मितम् । वस्त्रं गृहाण देवेश ! लक्ष्मीयुक्त ! नमोऽस्तु ते ॥

यज्ञोपवीतम् (जनै चढाउने)

दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात् । ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ॥

ग्रन्थिपूजा (क्रमैले ग्रन्थि पूजा गर्ने)

श्रियै नमः । मोहिन्यै नमः । पद्मिन्यै नमः । महाबलायै नमः । अजायै नमः । मङ्गलायै नमः । वरदायै नमः । शुभायै नमः । जयायै नमः । विजयायै नमः । जयन्त्यै नमः । पापनाशिन्यै नमः । विश्वरूपायै नमः । सर्वमङ्गलायै नमः ॥१४॥

अङ्गपूजा (चन्दन, अक्षता, फूलले पूजा गर्ने)

मत्स्याय नमः पादौ पूजयामि । कूर्माय नमः गुल्फौ पूजयामि । वराहाय नमः जानुनी पूजयामि ॥ नारसिंहाय नमः ऊरू पूजयामि । वामनाय नमः कटिं पूजयामि । रामाय नमः । उदरं पूजयामि । श्रीरामाय नमः । हृदयं पूजयामि । कृष्णाय नमः मुखं पूजयामि । सहस्रशिरसे नमः शिरः पूजयामि । श्रीमदनन्ताय नमः सर्वाङ्गं पूजयामि ।

प्रथमावरणपूजा (पूजा गर्ने)

अनन्तस्य दक्षिणपार्श्वे – रमायै नमः । वामपार्श्वे – भूम्यै नमः ॥ आवरणदेवतामावाह्य हस्तौ प्रक्षाल्य गन्धं पुष्पं तर्जनीमध्यमाङ्गुष्ठैर्धृत्वा मध्ये शङ्खोदकं गृहीत्वा मन्त्रान्ते शङ्खोदकं भूमौ निक्षिप्य पुष्पं देवोपरि निक्षिपेत् ॥ दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्तचा समर्पये तुभ्यं प्रथमावरणार्चनम् ॥१॥

द्वितीयावरणार्चनम् (पूर्वदेखि पूजा गर्ने)

पूर्वादिक्रमेण–वृद्धोल्काय नमः । महोल्काय नमः । शतोल्काय नमः । सहस्रोल्काय नमः । दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥२॥

तृतीयावरणार्चनम् (पूजा गर्ने)

वासुदेवाय नमः । सङ्कर्षणाय नमः । प्रद्युम्नाय नमः । अनिरुद्धाय नमः । दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥३॥

चतुर्थावरणार्चनम् (पूजा गर्ने)

प्राच्याम्–केशवाय नमः । नारायणाय नमः । माधवाय नमः । गोविन्दाय नमः । मधुसूदनाय नमः । त्रिविक्रमाय नमः । वामनाय नमः । श्रीधराय नमः । हृषीकेशाय नमः । पद्मनाभाय नमः । दामोदराय नमः । दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ॥४॥

पञ्चमावरणार्चनम्

(पूर्वदेखि क्रमैले पूजा गर्ने)

पूर्वादिक्रमेण–मत्स्याय नमः । कूर्माय नमः । नारसिंहाय नमः । वामनाय नमः । परशुरामाय नमः । श्रीरामाय नमः । कृष्णाय नमः । बौद्धाय नमः । कल्कये नमः । अनन्ताय नमः । विश्वरूपिणे नमः ॥ दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥५॥

षष्ठावरणार्चनम्

(पूर्वदेखि पूजा गर्ने)

पूर्वे-अनन्ताय नमः । दक्षिणस्यां ब्रह्मणे नमः । पश्चिमायां वायवे नमः । उत्तरस्यामीशानाय नमः । आग्नेयां वारुण्यै नमः । नैर्ऋत्यां गायत्र्यै नमः । वायव्यां भारत्यै नमः । ऐशान्यां गिरिजायै नमः । अग्रे गरुडाय नमः । वामे सुपुण्याय नमः ॥ दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं षष्ठाख्यावरणार्चनम् ॥६॥

सप्तमावरणार्चनम्

(पूजा गर्ने)

पूर्वादिक्रमेण–इन्द्राय नमः । अग्नये नमः । यमाय नमः । निर्ऋतये नमः । वरुणाय नमः । वायवे नमः । सोमाय नमः । ईशानाय नमः ॥ दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम् ॥७॥

अष्टमावरणार्चनम्

(पूजा गर्ने)

आग्नेयां शेषाय नमः । नैर्ऋत्यां विष्णवे नमः । वायव्यां विधये नमः । ऐशान्यां प्रजापतये नमः ॥ दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं अष्टमावरणार्चनम् ॥८॥

नवमावरणार्चनम्

(पूजा गर्ने)

आग्नेयां, गणपतये नमः । नैर्ऋत्यां, सप्तमातृभ्यो नमः । वायव्यां, दुर्गायै नमः । ऐशान्यां, क्षेत्राधिपतये नमः ॥ दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं नवमावरणार्चनम् ॥९॥

दशमावरणार्चनम्

(पूजा गर्ने)

मध्ये, ब्रह्मणे नमः । भास्कराय नमः । शेषाय नमः । सर्वव्यापिने नमः । ईश्वराय नमः । विश्वरूपाय नमः । महाकायाय नमः । सृष्टिकर्त्रे नमः । कृष्णाय नमः । हरये नमः । शिवाय नमः । स्थितिकारकाय नमः । अन्तकाय नमः ॥ दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं दशमावरणार्चनम् ॥१०॥

एकादशावरणार्चनम्

(पूजा गर्ने)

शौरये नमः । वैकुण्ठाय नमः । महाबलाय नमः । पुरुषोत्तमाय नमः । अजाय नमः । पद्मनाभाय नमः । मङ्गलाय नमः । हृषीकेशाय नमः । वरदाय नमः । मधुसूदनाय नमः । अच्युताय नमः । अनन्ताय नमः । गोविन्दाय नमः । विजयाय नमः । अपराजिताय नमः । कृष्णाय नमः ॥ दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं एकादशावरणार्चनम् ॥११॥

द्वादशावरणार्चनम्

(पूजा गर्ने)

अनन्ताय नमः । कपिलाय नमः । शेषाय नमः । सङ्कर्षणाय नमः । हलायुधाय नमः । तारणाय नमः ।

शीरपाणये नमः । बलभद्राय नमः ॥ दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं द्वादशावरणार्चनम् ॥१२॥

त्रयोदशावरणार्चनम्

(पूजा गर्ने)

क्षीराब्धिशायिने नमः । अच्युताय नमः । भूम्याधाराय नमः । लोकनाथाय नमः । फणामणिविभूषणाय नमः । सहस्रमूर्ध्ने नमः । सहस्रार्चिषे नमः ॥ दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं त्रयोदशावरणार्चनम् ॥१३॥

चतुर्दशावरणार्चनम्

(पूजा गर्ने)

केशवाय नमः । नारायणाय नमः । माधवाय नमः । गोविन्दाय नमः । मधुसूदनाय नमः । त्रिविक्रमाय नमः । वामनाय नमः । श्रीधराय नमः । हृषीकेशाय नमः । पद्मनाभाय नमः । दामोदराय नमः । आदि चतुर्विंशतिनामभिः ॥ दयाब्धे ! त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये तुभ्यं चतुर्दशावरणार्चनम् ॥१४॥

पत्रपूजा

(फूलका पातहरूले पूजा गर्ने)

कृष्णाय नमः पलाशपत्रं समर्पयामि । विष्णवे नमः औदुम्बरपत्रं समर्पयामि । हरये नमः अश्वत्थपत्रं समर्पयामि । शम्भवे नमः भृङ्गराजपत्रं समर्पयामि । ब्रह्मणे नमः जटाधारपत्रं समर्पयामि । ईश्वराय नमः आम्रपत्रं समर्पयामि । विश्वरूपिणे नमः कदलीपत्रं समर्पयामि । महाकालाय नमः अपामार्गपत्रं समर्पयामि । सृष्टिकर्त्रे नमः करवीरपत्रं समर्पयामि । स्थितिकर्त्रे नमः पुन्नागपत्रं समर्पयामि । अन्तकाय नमः नागवल्लीपत्रं समर्पयामि ॥

पुष्पपूजा

(विभिन्न फूलहरूले पूजा गर्ने)

अनन्ताय नमः पद्मपुष्पं समर्पयामि । विष्णवे नमः जातीपुष्पं समर्पयामि । अव्ययाय नमः कह्लारपुष्पं समर्पयामि । सहस्रजिते नमः केतकीपुष्पं समर्पयामि । अनन्तरूपिणे नमः बकुलपुष्पं समर्पयामि । इष्टाय नमः शतपुष्पं समर्पयामि । विशिष्टाय नमः पुन्नागपुष्पं समर्पयामि । शिष्टेष्टाय नमः करवीरपुष्पं समर्पयामि । महीधराय नमः मालतीपुष्पं समर्पयामि । अच्युताय नमः कर्णिकारपुष्पं समर्पयामि । अन्तकाय नमः कदलीपुष्पं समर्पयामि ॥

अष्टोत्तरशतनामभिः पूजयेत्

(१०८ नामले पूजा गर्ने)

ॐ अनन्ताय नमः । अच्युताय नमः । अद्भूतकर्मणे नमः । अमितविक्रमाय नमः । अपराजिताय नमः । अखण्डाय नमः । अग्निनेत्राय नमः । अग्निवपुषे नमः । अदृश्याय नमः । अत्रिपुत्राय नमः ॥१०॥ अनन्तकुलाय नमः अनिशिने नमः । अनघाय नमः । अब्दनीलाय नमः । अहरहाय नमः । अष्टमूर्तये नमः । अनिरुद्धाय नमः । अनिविष्टाय नमः । अचञ्चलाय नमः । शब्दातिगाय नमः ॥२०॥ अचलरूपाय नमः । अखिलधराय नमः । अव्यक्ताय नमः । अनुरूपाय नमः । अभयङ्कराय नमः । अक्षताय नमः । अवपुषे नमः । अयोनिजाय नमः । अरविन्दाय नमः । अशनवर्जिताय नमः ॥३०॥ अधोक्षजाय नमः । अदितिपुत्राय नमः । अम्बिकापतिपूर्वजाय नमः । अपस्मारनाशिने नमः । अव्ययाय नमः । अनादये नमः । अप्रमेयाय नमः । अघशत्रवे नमः । अमरारिघ्नाय नमः । अनीश्वराय नमः ॥४०॥ अजाय

नमः । अघोराय नमः । अनादिनिधनाय नमः । अमरप्रभवे नमः । अग्राह्याय नमः । अक्रूराय नमः । अनुत्तमाय नमः । अरूपाय नमः । अन्हे नमः । अमोघाधिपतये नमः ॥५०॥ अजाय नमः । अक्षयाय नमः । अमृताय नमः । अघोरवीर्याय नमः अव्यङ्गाय नमः । अविघ्नाय नमः । अतीन्द्रियाय नमः । अमिततेजसे नमः । अमितये नमः । अष्टमूर्तये नमः ॥६०॥ अनिलाय नमः । अवशाय नमः । अणोरणीयसे नमः । अशोकाय नमः । अरविन्दाक्षाय नमः । अधिष्ठाय नमः । अमितनयनाय नमः । अरण्यवासिने नमः । अप्रमत्ताय नमः । अनन्तरूपाय नमः ॥७०॥ अनलाय नमः । अनिमिषाय नमः । अस्त्ररूपाय नमः । अग्रगण्याय नमः । अप्रमिताय नमः । अनन्तकाय नमः । अचिन्त्याय नमः । अपांनिधये नमः । अतिसुन्दराय नमः । अमरप्रियाय नमः ॥८०॥ अष्टसिद्धिप्रदाय नमः । अरविन्दप्रियाय नमः । अरविन्दोद्भवाय नमः । अनयाय नमः । अर्थाय नमः । अक्षोभ्याय नमः । अर्चिष्मते नमः । अनेकमूर्तये नमः । अनन्तब्रह्माण्डपतये नमः । अनन्तशयनाय नमः ॥९०॥ अमराधिपतये नमः । अनाधाराय नमः । अनन्तनाम्ने नमः । अनन्तश्रिये नमः । अक्षराय नमः । अमायाय नमः । आश्रमस्थानाय नमः । आश्रमातीताय नमः । अन्नदाय नमः । आत्मयोनये नमः ॥१००॥ अवनीपतये नमः । अवनीधराय नमः । अनादये नमः । आदित्याय नमः । अमृताय नमः । अपवर्गप्रदाय नमः । अव्यक्ताय नमः । अनन्ताय नमः ॥१०८॥

धूपम् (धूप वाल्ने)

दशाङ्गङ्गुग्गुलोद्भूतं चन्दनागुरुसंयुतम् । सर्वेषामुत्तमं धूपं गृहाण सुरपूजित ॥

दीपम् (बत्ती वाल्ने)

आज्यं च वर्तिसंयुक्तं वन्हिना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥

नैवेद्यम् (नैवेद्य चढाउने)

अन्नं चतुर्विधं स्वादु पयोदधिघृतैर्युतम् । नानाव्यञ्जनशोभाढ्यं नैवेद्यं प्रतिगृह्यताम् ॥

उत्तरापोशनम् (जल चढाउने)

उत्तरापोशनार्थं ते दद्मि तोयं सुवासितम् । गृहाण सुमुखो भूत्वा अनन्ताय नमो नमः ॥

करोद्वर्तनम् (जल चढाउने)

करोद्वर्तनकं देव मया दत्तं हि भक्तितः । चारुचन्द्रप्रभं दिव्यं गृहाण जगदीश्वर ॥

नारिकेलफलम् (नरिवल चढाउने)

इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

ताम्बूलम् (पान सुपारी चढाउने)

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । कर्पूरैलासमायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

दक्षिणाम् (भेटी चढाउने)

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । दक्षिणा काञ्चनी देव स्थापिता मे तवाग्रतः ॥

प्रदक्षिणाम् (प्रदक्षिणा गर्ने)

यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि विनश्यन्ति प्रदक्षिणपदेपदे ॥

नमस्कारम् (नमस्कार गर्ने)

नमस्ते भगवन् भूयो नमस्ते धरणीधर । नमस्ते सर्वनागेन्द्र नमस्ते मधुसूदन ॥

मन्त्रपुष्पम् (फूल लिएर नमस्कार गर्ने)

नमस्ते देवदेवेश नमस्ते गरुडध्वज । नमस्ते कमलाकान्त अनन्ताय नमो नमः ॥

दोरकप्रार्थना (पाखुरामा बाँध्ने डोरीको प्रार्थना गर्ने)

अनन्ताय नमस्तुभ्यं सहस्रशिरसे नमः । नमोऽस्तु पद्मनाभाय नागानां पतये नमः ।
अनन्तकामदः कामाननन्तो मे प्रयच्छतु । अनन्तो दोररूपेण पुत्र-पौत्रान् प्रवर्धतु ॥

दोरकबन्धनम् (पाखुरामा डोरी बाँध्ने)

अनन्तसंसारमहासमुद्रमग्नं समभ्युद्धर वासुदेव । अनन्तरूपे विनियोजयस्व ह्यनन्तसूत्राय नमो नमस्ते ॥

जीर्णदोरकविसर्जनम् (पहिले बाँधिराखेको डोरी विसर्जन गर्ने)

नमः सर्वहितानन्त जगदानन्दकारक । जीर्णदोरममुं देव विसृजेऽहं तवाज्ञया ॥

वायनम् (पूर्णपात्र, दक्षिणा, सिदा दान गर्ने र क्षमा माग्ने)

गृहाणेदं द्विजश्रेष्ठ वायनं दक्षिणायुतम् ।
त्वत्प्रसादादहं देव मुच्येयं कर्मबन्धनात् ॥
प्रतिगृह्णन् द्विजश्रेष्ठ अनन्तफलदायक ।
पक्वान्नफलसंयुक्तं दक्षिणां घृतसंयुतम् ॥
वायनं द्विजवर्याय दास्यामि व्रतपूर्तये ॥
जीर्णदोरक दानम् ।

अनन्तः प्रतिगृह्णाति अनन्तो वै ददाति च ।
अनन्तस्तारकोभाभ्यामनन्ताय नमो नमः ॥
ततो यथाशक्ति ब्राह्मणान् भोजयेत् ।
अनेन कृतपूजनेन श्रीमदनन्तः प्रीयतां नमः ॥

(विसर्जन गर्ने)



॥ इति अनन्तपूजाविधिः ॥

॥ श्रीगणेशाय नमः ॥

अथ अनन्तचतुर्दशीव्रतोद्यापनविधिः

(कलश थाली स्थापना गर्ने र पूजा गर्ने)

सर्वोद्यापनविधौ सर्वतोभद्रमण्डलैकदेशे कलशं संस्थाप्य सम्पूज्य च, तदुपरि ताम्रस्थालीं निधाय ताम्रस्थाल्युपरि ग्रन्थिवत्सुवर्णानन्तदोरकं सलक्ष्मीकं चतुर्भुजं वासुदेवप्रतिमां तत्पूजाविधिना (अनन्तचतुर्दशीपूजाविधिना) सम्पूज्य रात्रौ जागरणं प्रातर्देवस्योत्तरपूजां विधाय ॥ दधिमध्वाज्यदुग्धाक्तितिलैर्वा पायसेनाश्वत्थशमीपल्लवैश्च –

अतोदेवाऽअवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्तधामभि ॥

मन्त्रेण प्रत्येकं १०८ होमं कृत्वा प्रार्थयेत्

(१०८ हवन गरी नमस्कार गर्ने)

अनन्तकामान् मे देहि सर्वकामफलप्रद । अनन्ताय नमस्तुभ्यं पुत्रपौत्रायुवर्धन ॥

अनन्तः सर्वकामानामधिपः सर्वकामदः । व्रतेनानेन सुप्रीतो भव त्वं हि सदा मम ॥ (शैय्या दान गर्ने)

चतुर्दशब्राह्मणेभ्यः पक्वान्नपूरितवस्त्रोपवीतसहित चतुर्दशकुम्भदानम् । सति सम्भवे शय्यां दत्वा- पूर्णपात्रदानम् ।

प्रतिमादानम्

(पूर्णपात्र गरी प्रतिमा दान गर्ने)

अद्येत्यादि अमुकशर्माहं मम क्षेमस्थैर्यायुरारोग्य-चतुर्विधपुरुषार्थसिद्धिपूर्वकानन्तप्रीतये कृतस्यानन्तचतुर्दशीव्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन सुपूजितां सौवर्णीं सोपस्करां अनन्तप्रतिमां अनन्तदेवताकां यथानामगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ (आवाम् सम्प्रदद्वहे, वयं सम्प्रदद्महे)

प्रार्थना

(नमस्कार गर्ने)

अनन्त देवदेवेश ! सर्वलोकवरप्रद । तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु मे ॥

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

अद्य कृतैतत् संपूजितस्वर्णनिर्मितानन्तप्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्देयं तद्दैवतं अमुकगोत्राया-मुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्

(गोदान गर्ने पेज नं. ८)

॥ इति अनन्तचतुर्दश्युद्यापनम् ॥

॥ श्रीगणेशाय नमः ॥

पौषरविवार व्रतपूजाविधिः

श्रीसूर्याय नमः । आचम्य कर्मपात्रं कृत्वा सङ्कल्पः – (आचमन गरी सङ्कल्प गर्ने)

ॐ अद्येत्यादि मम समस्तरोगनिवारणार्थमायुष्यादिसकलकामनासिद्ध्यर्थं श्रीसूर्यनारायणप्रीत्यर्थं रविपूजनं तदङ्गत्वेन च दीप-कलश-गणेश पूजनमहं करिष्ये ॥ (दियो, कलश, गणेश पूजा गरी अष्टदल लेखी कलश स्थापना गर्ने)

दीप-कलश-गणेशपूजनम् । ताम्रपात्रे रक्तचन्दनेन अष्टदलं लिखित्वा देवं पूजयेत् ।

ध्यानम् (नमस्कार गर्ने)

तेजोरूप सहस्रांशु सप्ताश्वरथगं वरम् । द्विभुजं वरदं पद्मलाञ्छनं सर्वकामदम् ॥

आवाहनम् (आवाहन गर्ने)

आगच्छ भगवन् सूर्य मण्डले च स्थिरो भव । यावत् पूजां समाप्येत तावत् त्वं सन्निधौ भव ॥

आसनम् (कुश राख्ने)

हेमासनं महद्दिव्यं नानारत्नविभूषितम् । दत्तं मे गृह्यतां देव ! दिवाकर नमोऽस्तु ते ॥

पाद्यम् (जल चढाउने)

गङ्गाजलं मयानीतं परमं पावनं महत् । पाद्यं गृहाण देवेश ! धामरूप नमोऽस्तु ते ।

अर्घ्यम् (अर्घ्य चढाउने)

भो भो सूर्य महद्भूत ब्रह्मविष्णुस्वरूपिणे । अर्घ्यमञ्जलिना दत्तं गृहाण परमेश्वर ! ॥

आचमनीयम् (जल चढाउने)

गङ्गादितीर्थजं तोयं जातिपुष्पेण वासितम् । ताम्रपात्रे स्थितं दिव्यं गृहाणाचमनीयकम् ॥

स्नानम् (जल चढाउने)

जान्हवीजलमत्यन्तं पवित्रकरणं परम् । स्नानार्थं च मया नीतं स्नानं कुरु जगत्पते ॥

पञ्चामृतम् (पञ्चामृत चढाउने)

पयोदधिघृतं चैव शर्करा मधुसंयुतम् । कृतं मया च स्नपनं प्रीयतां परमेश्वर ॥

स्नानम् (जल चढाउने)

गङ्गा-गोदावरी चैव यमुना च सरस्वती । नर्मदासिन्धुकाबेर्यस्ताभ्यः स्नानार्थमाहृतम् ।

वस्त्रम् (कपडा चढाउने)

वस्त्रपट्टयुगं देव ! सूक्ष्मतन्तुविनिर्मितम् । शुद्धं चैव मया दत्तं गृहाण कमलाकर ! ॥

उपवीतम् (जनै चढाउने)

नमः कमलहस्ताय विश्वरूपाय ते नमः । उपवीतं मया दत्तं तद्गृहाण दिवाकर ! ॥

चन्दनम् (चन्दन चढाउने)

कुङ्कुमागरुकस्तूरीसुगन्धैश्चन्दनादिभिः । रक्तचन्दनयुक्तं तु गन्धमेतत् प्रगृह्यताम् ॥

पुष्पम् (फूल माला चढाउने)

जपा-कदम्ब-कुसुम-रक्तोत्पलयुतानि च । पुष्पाणि गृह्यतां देव ! सर्वकामप्रदो भव ॥

अक्षताः (अक्षता चढाउने)

रक्तचन्दनसंमिश्रा अक्षताश्च सुशोभनाः । मया दत्ता गृहाण त्वं वरदो भव भास्कर ॥

अङ्गपूजा (चन्दन अक्षताले पूजा गर्ने)

ॐ मित्राय नमः पादौ पूजयामि । रवये नमः जङ्घे पूजयामि । सूर्याय नमः जानुनी पूजयामि । खगाय नमः उरू पूजयामि । पूष्णे नमः गुह्यं पूजयामि । हिरण्यगर्भाय नमः । कटिं पूजयामि । मरीचये नमः नाभिं पूजयामि । आदित्याय नमः जठरं पूजयामि । सवित्रे नमः हृदयं पूजयामि । अर्काय नमः स्तनौ पूजयामि । भास्कराय नमः । कण्ठं पूजयामि । अर्यम्णे नमः स्कन्धौ पूजयामि । भास्कराय नमः हस्तौ पूजयामि । अहस्कराय नमः मुखं पूजयामि । व्रध्नाय नमः नासिकां पूजयामि । जगदेकचक्षुषे नमः । नेत्रे पूजयामि । सवित्रे नमः कर्णौ पूजयामि । त्रिगुणात्मधारिणे नमः ललाटं पूजयामि । विरिञ्चिनारायणशङ्करात्मने नमः शिरः पूजयामि । तिमिरनाशिने नमः सर्वाङ्गं पूजयामि ।

धूपम् (धूप बाल्ने)

त्रिदशागुग्गुलोद्भूतः कालागरुसमन्वितः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

दीपम् (बत्ती बाल्ने)

कार्पासवर्तिकायुक्तं गोघृतेन समन्वितम् । दीपं गृहाण देवेश ! त्रैलोक्यतिमिरापहम् ॥

नैवेद्यम् (नैवेद्य चढाउने)

पायसं घृतसंयुक्तं नानापक्वान्नसंयुतम् । नैवेद्यं च मया दत्तं शान्तिं कुरु जगत्पते ! ॥

जलम् (कपुर मिसिएको जल चढाउने)

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् । आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥

करोद्वर्तनम् (जल चढाउने)

मलयाचलसम्भूतं कर्पूरेण समन्वितम् । करोद्वर्तनकं चारु गृह्यतां च जगत्पते ! ॥

फलम् (फल चढाउने)

इदं फलं मया देव ! स्थापितं पुरतस्तव । तेन मे स फलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

ताम्बूलम् (पान सुपारी चढाउने)

एलालवङ्गकर्पूरैः खादिरैश्च सपूगकैः । नागवल्लीदलैर्युक्तं ताम्बूलं प्रतिगृह्यताम् ॥

दक्षिणा (द्रव्य चढाउने)

दक्षिणां काञ्चनीं देव स्थापितांश्च तवाग्रतः । गृहाण सुमुखो भूत्वा प्रभाकर नमोऽस्तु ते ॥

नीराजनम् (नीराजन बत्ती बालेर घुमाउने)

पञ्चवर्तिसमायुक्तं सर्वमङ्गलदायकम् । नीराजनं गृहाणेदं सर्वसौख्यकरो भव ॥

प्रदक्षिणा (प्रदक्षिणा गर्ने)

यानि कानि च पापानि जन्मान्तरकृतानि च । विलयं यान्ति तानीह प्रदक्षिणपदे पदे ॥

नमस्कारम् (नमस्कार गर्ने)

नमः पङ्कजनाभाय नमः पङ्कजधारिणे । नमः पङ्कजनेत्राय भास्कराय नमो नमः ॥

वायनम् (पूर्णपात्र, सिदा, दक्षिणा गर्ने)

तण्डुलैः पूरितं पात्रं हिरण्यन समन्वितम् । रक्तवस्त्रयुगं चैव वायनं ते ददाम्यहम् ॥

प्रार्थना (नमस्कार गर्ने र विसर्जन गर्ने)

यस्योदयः स्याज्जगतः प्रबोद्धा यः कर्मसाक्षी भुवनस्य गोप्ता ॥
कुष्ठादिकव्याधिविनाशको यः स भास्करो मे दुरितं निहन्यात् ॥
ततो ब्रह्मणान् भक्ष्य-भोज्य-दक्षिणादिभिः सन्तोष्य विसर्जयेत् ॥



इति पौषमासादित्यवारपूजा समाप्ता ।

॥ श्रीगणेशाय नमः ॥

पौषार्क-व्रतप्रतिष्ठा

अथ पौषार्क-व्रतप्रतिष्ठाविधिः

(कलशथाली स्थापना गरी पूजा गर्ने)

सर्वोद्यापनविधौ सर्वतोभद्रमण्डलैकदेशे कलशं संस्थाप्य सम्पूज्य च, तदुपरि ताम्रस्थाली निधाय स्याल्युपरि स्वर्णनिर्मितरविप्रतिमां संस्थाप्य तद्विधिना (पौषार्क पूजाविधिना) सम्पूज्य रात्रौ जागरणं कुर्यात्। प्रातर्देवस्योत्तरपूजां विधाय होमं १०८ कृत्वा प्रार्थयेत् –

(१०८ पटक हवन गर्ने)

सूर्याय वै पापविनाशनाय विश्वात्मने सप्ततुरङ्गमाय । सामग्र्यजुर्वामनिघं विधातर्भवाब्धिपोताय नमः सवित्रे ॥
भानो ! भास्कर ! मार्तण्ड ! चण्डरश्मे ! दिवाकर ! । आरोग्यमायुर्विजयं विद्यां देहि नमोऽस्तु ते ॥

धान्य-गोधूम-गुड-लवणादिदानम् ॥

(धान, सखर, दुध, नुनसहित शय्या दान गरी पूर्णपात्र गर्ने)

सम्भवेसति शय्यां दत्वा ॥ पूर्णपात्रदानम् ॥

प्रतिमादानम्

(प्रतिमा दान गर्ने)

ॐ अद्येत्यादि अमुकशर्मा मम एतावत्कालकृतस्य पौषार्कव्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन सुपूजितां सोपस्करां सूर्यप्रतिमां सूर्यप्रीतये यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना

(नमस्कार गर्ने)

भानो ! प्रसीद देवेश ! सर्वलोकनमस्कृत । तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु ते ॥

दानप्रतिष्ठा

(दान प्रतिष्ठा गर्ने)

अद्य कृतैतत् संपूजित-सोपस्कर-सुवर्णनिर्मित-भास्करप्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्

(गोदान गर्ने पेज नं. ८)

॥ इति पौषार्क-व्रतप्रतिष्ठा ॥

पौर्णमासी व्रतप्रतिष्ठा

(पौर्णमासी व्रतप्रतिष्ठा पनि चन्द्रमाको पूजा गरेर पौषार्ककै विधिले गर्नुपर्दछ)

प्रार्थना

(चन्द्रमाको पूजा गरी नमस्कार गर्ने)

चन्द्र प्रसीद देवेशः सर्वलोकवरप्रद । तव विम्वप्रदानेन व्रतं सम्पूर्णमस्तुते ॥

॥ इति पौर्णमासीव्रतप्रतिष्ठा ॥

॥ श्रीगणेशाय नमः ॥

कृष्णाष्टमीव्रतोद्यापनविधिः

अथ कृष्णाष्टमीव्रतोद्यापनविधिः

(कलश थाली स्थापना गरी पूजा गर्ने)

सर्वोद्यापनविधौ सर्वतोभद्रमण्डलैकदेशे कलशं संस्थाप्य सम्पूज्य च, तदुपरि ताम्रस्थालीं स्थाल्युपरि लक्ष्मीयुक्तचतुर्भुजकौस्तुभादिसंयुक्त सुवर्णप्रतिमां संस्थाप्य तत्पूजाविधिना (कृष्णाष्टमी पूजाविधिना) पूजां समाप्य रात्रौ जागरणं कुर्यात् ॥ प्रातर्देवस्योत्तरपूजां विधाय तिलाज्ययुक्तपायसेन मूलमन्त्रेण १०८ पुरुषसूक्तेन च हुत्वा देवं प्रार्थयेत् –

(१०८ हवन गरी नमस्कार गर्ने)

नमस्तुभ्यं जगन्नाथ ! देवकीतनय ! प्रभो ! वासुदेवात्मजानन्त यशोदानन्दवर्धन ॥
गोविन्द गोकुलानन्द ! गोपीकान्त ! नमोऽस्तु ते । त्राहि मां सर्वपापघ्नदुःखशोकार्णवात् प्रभो ॥
सर्वलोकेश्वर ! त्राहि पतितं मां भवार्णवात् ॥ इति ॥

अष्टब्राह्मणेभ्योऽन्नपूर्णकलशाष्टकदानम् । सति सम्भवे शय्यां दत्वा ।

(शय्या दान गर्ने)

पूर्णपात्रदानम् । प्रतिमादानम्

(पूर्णपात्र दान गरी प्रतिमा दान गर्ने)

अद्येत्यादि अमुकशर्माऽहं मम सकुटुम्बस्य कृष्णाष्टमीव्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन सुपूजितां सौवर्णसोपस्करां श्रीकृष्णप्रतिमां श्रीकृष्णप्रीतये यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना

(नमस्कार गर्ने)

अवतारसहस्राणि करोषि मधुसूदन !। अस्य प्रदानात् देवेश ! व्रतं सम्पूर्णमस्तु मे ॥

दानप्रतिष्ठा

(दान प्रतिष्ठा गर्ने)

अद्य कृतैतत् सुपूजित-स्वर्णनिर्मित-सोपस्कर-श्रीकृष्णप्रतिमादानकर्मणः प्रतिष्ठासाङ्गता सिद्धये यद्देयं तद्दैवतं यथानामगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्

(गोदान गर्ने पेज नं. ८)

॥ इति कृष्णाष्टम्युद्यापनविधिः ॥

॥ श्रीगणेशाय नमः ॥

स्वस्थानी-व्रतप्रतिष्ठा

अथ स्वस्थानी-व्रतप्रतिष्ठाविधिः

(कलशथाली स्थापना गरी पूजा गर्ने)

सर्वोद्यापनविधौ सर्वतोभद्रमण्डलैकदेशे कलशं संस्थाप्य सम्पूज्य च, तदुपरि ताम्रस्थालीं निधाय स्थाल्युपरि सुवर्णप्रतिमां तत्पूजाविधिना (श्रीस्वस्थानी-पूजाविधिना) सम्पूज्य रात्रौ जागरणं कुर्यात् – प्रातर्देव्याउत्तरपूजां विधाय ॐ देवीद्वरिण होमः १०८ ।

(१०८ पटक हवन गर्ने)

प्रार्थना

(नमस्कार गर्ने)

नमोऽस्तु ते महादेवि स्वस्थानि परमेश्वरि । त्रिलोकजननि नित्ये प्राणिनां पापहारिणि ॥
त्रिपुरघ्न महादेव भक्तवत्सल विश्वकृत् । नमस्करोमि देवेश ब्रह्ममाधववन्दित ॥
अन्यत्र शरणं नास्ति युवां वै शरणं मम । तस्मात्कारुण्यभावेन रक्षेतां परमेश्वरौ ॥

शष्कुली-ताम्बूल-पूगीफल-नानापुष्पाणां दानम् ।

पूर्णपात्रदानम् । प्रतिमादानम्

(सेलरोटी, पान सुपारी दान गर्ने र पूर्णपात्र गरी प्रतिमा दान गर्ने)

अद्येत्यादि श्रुति-स्मृति-पुराणोक्त-फलावाप्तिपूर्वक श्रीस्वस्थानीप्रीतये एतावत्कालपर्यन्तं कृतस्य स्वस्थानीव्रतस्योद्यापनाङ्गत्वेन सुपूजितां स्वर्णप्रतिमां श्रीस्वस्थानी प्रीतये अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना

(नमस्कार गर्ने)

ॐ नमस्तेऽस्तु जगन्मातःस्वस्थानि ! सर्वमङ्गले । तव प्रासादाद्देवेशि व्रतपूर्णं भवेन्मम ॥

दानप्रतिष्ठा

(दान प्रतिष्ठा गर्ने)

अद्य कृतैतत् सुपूजितस्वस्थानीप्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्

(गोदान गर्ने पेज नं. ८)

॥ इति श्रीस्वस्थानीव्रतप्रतिष्ठा ॥

॥ श्रीगणेशाय नमः ॥

शिवरात्रिव्रतप्रतिष्ठा

अथ शिवरात्रिव्रतप्रतिष्ठाविधिः

(कलश थाली स्थापना गरी पूजा गर्ने)

सर्वतोभद्रमण्डलैकदेशे कलशं संस्थाप्य सम्पूज्य च, तदुपरि ताम्रस्थालीं निधाय स्थाल्युपरि वृषभस्थितामुमामहेश्वरमूर्तिं तद्विधिना (शिवरात्रि-पूजाविधिना) सम्पूज्य रात्रौ जागरणं कुर्यात् । प्रातर्देवस्योत्तर पूजां विधाय, पायसतिलैः "नमः शम्भवाय" इति "अम्बेऽअम्बिके" इति मन्त्राभ्यां १०८ होमः । बिल्वपत्र-तिल-व्रीह्यादिभिरजैकपदादि १४ नाममन्त्रैर्होमः ।

(१०८ पटक हवन गर्ने)

प्रार्थना

(नमस्कार गर्ने)

नमः शिवाय शान्ताय पञ्चवक्त्राय शूलिने । नन्दिभृङ्गिमहाकालगणयुक्ताय शम्भवे ॥
शिवायै हरकान्तायै प्रकृत्यै सृष्टिहेतवे । शिवायै सर्वमाङ्गल्यै शिवरूपे जगन्मये ॥
संसारभयसन्तापात् त्राहि मां सिंहवाहिनि । येन कामेन देवेशि पूजितासि महेश्वरि ॥
राज्यसौभाग्यसम्पत्तिं देहि मामम्ब पार्वति ॥

चतुर्दशब्राह्मणेभ्यो यज्ञोपवीत–जलपूर्णं १४ घटदानम् ॥

(जनै, घडासहित शय्या दान गर्ने)

सम्भवे सति शय्यादानम् ।

पूर्णपात्रदानम् । प्रतिमादानम्

(पूर्णपात्र दान गरी प्रतिमा दान गर्ने)

अद्येत्यादि मम श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वकउमामहेश्वरप्रीतये एतावत्कालपर्यन्तं कृतस्य शिवरात्रिव्रत-स्योद्यापनाङ्गत्वेन सुपूजितां स्वर्णनिर्मितां सोपस्करां उमामहेश्वरप्रतिमां ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना

(नमस्कार गर्ने)

शम्भो ! प्रसीद देवेश ! सर्वलोकेश्वर प्रभो । तव रूपप्रदानेन प्रसन्नास्तु मनोरथाः ॥

दानप्रतिष्ठा

(दान प्रतिष्ठा गर्ने)

अद्य कृतैतत् सोपस्कर–सुपूजित–उमामहेश्वरप्रतिमा–दानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्देयं तद्दैवतं यथानाम–गोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्

(गोदान गर्ने पेज नं. ८)

॥ इति शिवरात्रिव्रतप्रतिष्ठा ॥

॥ श्रीगणेशाय नमः ॥

सोद्यापनं सोमवत्यमावास्याव्रतम्

अथ सोद्यापनं सोमवत्यमावास्याव्रतविधिः (व्रत उद्यापन गर्ने)

शङ्ख

अमासोमसमायोगो यत्र यत्र हि लभ्यते । तीर्थे कपिलधारं च गङ्गा च पुष्करं तथा ॥
दिव्यान्तरिक्षभौमानि यानि तीर्थानि सर्वशः । तानि तत्र वसिष्यन्ति दर्शे सोमदिनान्विते ॥
अमावस्या तु सोमेन सप्तमी भानुना सह । चतुर्थी भूमिपुत्रेण सोमपुत्रेण चाष्टमी ॥
चतस्रस्तिथयस्त्वेताः सूर्यग्रहणसन्निभा । स्नानं दानं तथा श्राद्धं सर्वं तत्राक्षयं भवेत् ॥
तिथिर्वासरयोर्योगो यथाकाले भवेद्यदि । भान्वन्तेऽवाथ मध्यान्हे पुण्यकालः स नान्यथा ॥

अत्रैवाश्वत्थमूले विष्णुपूजनम् । (विष्णु पूजा गर्ने)

व्रतराजस्य पूर्णता सिद्धये उद्यापनमावश्यकम् । (कलश थाली स्थापना गरी पूजा गर्ने)

अतः सर्वतोभद्रं निर्माय तन्मध्ये कलशं संस्थाप्य सुवर्णस्य वृक्षराजं पञ्चरत्नस्य वेदिकां च निर्माय लक्ष्मीनारायणस्य सौवर्णीं प्रतिमां संस्थाप्य अनेकैरुपचारैः पूजयेत् । रात्रौ जागरणं कृत्वा प्रभाते पैप्पलीभिः समिद्भिः पायसेन तिलैश्च इदं विष्णुरिति मन्त्रेण हुत्वा पूर्णाहुतिं चरेत् । पश्चादार्चार्यं पयस्विनीं गां च संपूज्य दद्यात् । द्वादश ऋत्विजो वस्त्राद्यैः संपूज्य तेभ्यो दक्षिणां दद्यात् । ततः भूमौ दण्डवत्प्रणम्य प्रार्थयित्वा च विसर्जयेत् । (नमस्कार गर्ने)

एवं द्वादशवर्षे वा मध्ये वादौ समाचरेत् । कृत्वा ह्युद्यापनं सम्यग्व्रतराजफलं लभेत् ॥ ॥इति॥

तत्र सङ्कल्प (सङ्कल्प गर्ने)

तिथ्यादि सङ्कीर्त्य अस्यां सोमवत्यमायां सकलपापक्षयार्थं पुत्रपौत्राद्यभिवृद्धयर्थं जन्मजन्मन्यवैधव्य-सन्ततिचिरजीवितपरमसौभाग्यप्राप्तिकामोऽहमश्वत्थमूले लक्ष्मीसहितविष्णुपूजां तदङ्गतया विहितमश्वत्थपूजनं दीपकलशगणेशादीनां पूजनमुद्यापनं च करिष्ये । इति सङ्कल्प्य, दीपादीन, संपूज्य, अश्वत्थमुदकसेचनपूर्वकं सूत्रेण वेष्टयित्वा तन्मूले विष्णुं पूजयेत् । (दियो, कलश, गणेश पूजा गर्ने)

तत्रादौ शान्ताकारमिति ध्यानम् ।

आवाहनम् (आवाहन गर्ने)

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमि ꣳ सर्वत्र स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥
विश्वव्यापक विश्वेश कृपया दीनवत्सल । मयोपपादितां पूजां गृहाणेमां हि माधव ॥

आसनम् (कुश राख्ने)

ॐ पुरुष एवेद ꣳ सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥
सूर्यकोटिप्रभानाथ सर्वव्यापिन् रमापते । आसनं कल्पितं भक्त्या गृहाण पुरुषोत्तम ॥

पाद्यम् (जल चढाउने)

ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

नारायण जगद्व्यापिञ्जगदानन्दकारक । विष्णुक्रान्तादिसंयुक्तं गृह्ण पाद्यं मयार्पितम् ॥

अर्घ्यम् (अर्घ्य चढाउने)

ॐ त्रिपाद्दूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत् पुनः । ततो विष्वङ् व्यक्रामत्साशनानशनेऽअभि ॥

फलगन्धाक्षतैर्युक्तं पुष्पपूगसमन्वितम् । अर्घ्यं गृहाण भगवन् विष्णो सर्वफलप्रद ॥

आचमनीयम् (जल चढाउने)

ॐ ततो विराडजायत विराजोऽअधि पूरुषः । स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥

कर्पूरैलालवङ्गाढ्यं शीतलं सलिलं प्रभो । रमारमणकृष्णत्वमाचाम्यं प्रतिगृहचताम् ॥

पञ्चामृतम् (पञ्चामृत चढाउने)

ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः । सरस्वती तु पञ्चधासो देशेभवत्सरित् ॥

पञ्चामृतं मयानीतं पयो दधि घृतं मधु । शर्करागुडसंयुक्तं स्नानार्थं प्रतिगृह्यताम् ॥

स्नानम् (जल चढाउने)

ॐ तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥

गङ्गा कृष्णा गौतमी च कावेरी च शतह्रदा । ताभ्य आनीतमुदकं स्नानार्थं प्रतिगृह्यताम् ॥

वस्त्रम् (कपडा चढाउने)

ॐ तस्माद्यज्ञात् सर्वहुतऽ ऋचः समानि जज्ञिरे । छन्दा ꣳ सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥

पीतवासस्त्वयि विभो मया यत्समुपाहृतम् । वासः प्रीत्या गृहाणेदं पुरुषोत्तम केशव ॥

उपवीतम् (जनै चढाउने)

ॐ तस्मादश्वाऽ अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥

उपवीतं सोत्तरीयं मया दत्तं सुशोभनम् । विश्वमूर्ते गृहाणेदं नारायण जगत्पते ॥

गन्धम् (चन्दन चढाउने)

ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातऽमग्रतः । तेन देवाऽ अयजन्त साध्याऽ ऋषयश्च ये ॥

मलयाचलसंभूतं घनसारं मनोहरम् । विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥

अक्षतान् (अक्षता चढाउने)

ॐ अक्षन्नमीमदन्त ह्यवप्रियाऽअधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विद्र ते हरी ॥

अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः । मया निवेदिता भक्त्या गृहाण परमेश्वर ॥

पुष्पाणि (फूल चढाउने)

ॐ श्रीश्च तेलक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण॥

तुलसीजातिकमलमल्लिकाचम्पकानि च। पुष्पाणि हर गोविन्द गृहाण परमेश्वर॥

अलङ्कारान् (गरगहना चढाउने)

ॐ अहिरिव भोगै... ।

भूषणानि महार्हाणि मुक्ताहारयुतानि च। ददामि हर मे पापं नारायण नमोऽस्तु ते॥

धूपम् (धूप वाल्ने)

ॐ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्या ँ शूद्रोऽअजायत॥

वनस्पतिरसोद्भूतो गन्धाढचो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

दीपम् (वत्ती वाल्ने)

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥

चक्षुर्दं सर्वदेवानां तिमिरस्य निवारणम्। आर्तिक्यं कल्पितं भक्त्या गृहाण जगदीश्वर।

नैवेद्यम् (नैवेद्य चढाउने)

ॐ नाभ्या ऽआसीदन्तरिक्ष ँ शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ ऽ अकल्पयन्॥

भक्ष्यभोज्यलेह्यपेय्यचोष्यखाद्यं महाहृतम्। प्रीतये परमेशस्य दत्तं मे स्वीकुरु प्रभो॥

धेनुमुद्रां च प्रदर्श्य, मध्ये पानीयम्। उत्तरापोशनम्। (धेनुमुद्रा देखाई जल चढाउने)

फलम् (फल चढाउने)

ॐ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः। वृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व ँ हसः॥

फलानि रसयुक्तानि ऋतुकालोद्भवानि च। निवेदितानि देवेश गृहाण पुरुषोत्तम॥

पूगीफलमिति ताम्बूलम्। हिरण्यगर्भेति दक्षिणाम्। (पान, सुपारी र द्रव्य चढाउने)

नीराजनम् (नीराजन बत्ती बालेर देखाउने)

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा। अग्निर्वर्चोज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा॥ ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा॥

त्वद्भासा भासते लोकः कोटिसूर्यसमप्रभ। नीराजयिष्ये त्वां विष्णो कृपां कुरु मम प्रभो॥

प्रदक्षिणाम् (प्रदक्षिणा गर्ने)

ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाऽअबद्ध्नन् पुरुषं पशुम्॥

मया कायेन मनसा वाचा जन्मशतार्जितम्। पापं प्रशमय श्रीश प्रदक्षिणपदेपदे॥

नमस्कारम् (नमस्कार गर्ने)

व्यक्ताव्यक्तस्वरुपाय सृष्टिस्थित्यन्तकारिणे। आदिमध्यान्तरहितविष्टरश्रवसो नमः॥

पुष्पाञ्जलिम्

(फूल लिएर नमस्कार गर्ने)

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। तेह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

आदिमध्यान्तरहित भक्तानामिष्टदायक। पुष्पाञ्जलिं मया दत्तं गृहाण सुरपूजित ॥

ततः – अमायै नमः। सोमायै नमः। इति नाममन्त्राभ्याममासोमयोः पूजेति शिष्टाचारः।

ततः

(सोम पूजा गर्ने)

अश्वत्थहुतभुग्वास गोविन्दस्य सदाप्रिय। अशेषं हर मे पापं वृक्षराज नमोऽस्तु ते ॥

इति मन्त्रेणाश्वत्थं संपूजयेत्।

अमासोमव्रतस्यास्य संपूर्णफलहेतवे। वायनं द्विजवर्याय सहिरण्यं ददाम्यहम् ॥

इति मन्त्रेण वायनं दत्वा प्रार्थयेत्।

(अर्घ्य दिने)

प्रार्थना मन्त्रः

(नमस्कार गर्ने)

यन्मया मनसा वाचा नियमात्पूजनं कृतम्। सर्वं सम्पूर्णतां यातु तद्विणोश्च प्रसादतः ॥

ततः

(सकेमा १०८ पटक र नसके ३ पटक प्रदक्षिणा गर्ने)

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे। अग्रतः शिवरूपाय अश्वत्थाय नमो नमः ॥

इति मन्त्रेण प्रतिप्रदक्षिणमेकैकफलाद्यर्पणपूर्वकमष्टोत्तरशतं (१०८) प्रदक्षिणाः कार्याः ॥ एवं पूजां समाप्य रात्रौ जागरणम्। प्रातर्देवस्योत्तरपूजां विधाय इदं विष्णुरिति मन्त्रेण अश्वत्थसमिद्भिः पायसतिलैश्च १०८ हुत्वा प्रार्थयेत्।

प्रार्थना

(नमस्कार गर्ने)

नारायणाय देवाय हरये परमात्मने। शरण्यायाप्रमेयाय गोविन्दाय नमो नमः ॥

देवदेवाय वन्द्याय पराय परमेष्ठिने। कर्त्रे विश्वस्य गोप्त्रे च तत्संहर्त्रे च ते नमः ॥

द्वादशब्राह्मणेभ्यो यज्ञोपवीत वस्त्र पायसभोजनदानम् ॥ (१२ जना ब्राह्मणलाई जनै, वस्त्र र पायस (खिर) को भोजन दान गर्ने)

पूर्णपात्रदानम्। प्रतिमादानम् च

(पूर्णपात्र गरी प्रतिमा दान गर्ने)

अद्येत्यादि अमुक-देव्यहं मम सकलपापक्षयपूर्वक पुत्रपौत्राद्यभिवृद्धये सुपूजितां सोपस्करां-स्वर्णनिर्मितलक्ष्मी-नारायणप्रतिमां श्रीलक्ष्मी-नारायणप्रीतये यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना

(नमस्कार गर्ने)

हरे ! प्रसीद देवेश ! सर्वलोकवरप्रद। तव मूर्तिप्रदादेन मम सन्तु मनोरथाः ॥

दानप्रतिष्ठा

अद्य कृतैतत् सोपस्कर-सुपूजित-स्वर्णनिर्मित-श्रीलक्ष्मीनारायण-प्रतिमादानप्रतिष्ठा साङ्गतासिद्धये यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्

(गोदान गर्ने पेज नं. ८)

॥ इति सोमवती-व्रतप्रतिष्ठा ॥

॥ श्रीगणेशाय नमः ॥

सोद्यापनं प्रदोषव्रतम् (तत्र शनिप्रदोषव्रतपूजाविधिः)

कार्तिके श्रावणे प्राप्ते मन्दवारे त्रयोदशी । सम्पूर्णा तु भवेद्या सा समग्रव्रतसिद्धये ॥
वृषभो राजतः कार्यः पृष्ठे तस्य सुपीठकम् । तस्योपरि न्यसेदेवमुमाकान्तं त्रिलोचनम् ।
पञ्चवक्त्रं दशभुजमर्धाङ्गे गिरिजां सतीम् । सौवर्णीं प्रतिमां कृत्वा ताम्रकुम्भं जलैर्युतम् ॥
पञ्चरत्नफलोपेतं पञ्चपल्लवशोभितम् । चन्दनेन सुगन्धेन मिश्रितं शोभितं तथा ॥
रौप्यपात्रं ततः कृत्वा कुम्भस्योपरि विन्यसेत् । अशक्तो मृण्मयं कुम्भं वंशपात्रमथापि वा ॥
पूर्णं शरावं संस्थाप्य सौवर्णीं प्रतिमां तथा । शक्त्या कृतां प्रतिष्ठाप्य वस्त्रमाल्यविभूषणैः ॥
पूजयित्वा विधानेन रात्रौ जागरणं चरेत् । पुष्पमण्डपिकामादौ कृत्वा श्रद्धासमन्वितः ॥
आवाहयेत्प्रथमतो मन्त्रेणानेन सुव्रत ॥ (कलश थाली स्थापना गरी उमा महेश्वरको प्रतिमा राख्ने)

प्रदोषव्रतोद्यापनेऽपि पूर्ववत् सर्वतो भद्रमण्डलं वा लिङ्गतोभद्रमण्डलं विधाय पूजा कार्या । तत्र रजतं वृषभं, सौवर्णी उमामहेश्वरप्रतिमा, ताम्रं कलशं, तस्योपरि रौप्यपात्रं ताम्रपात्रं वा तदुपरि उमामहेश्वरं संस्थाप्य पूजयेत् । तत्रादौ आचम्यप्राणानायम्य बद्धशिखी ललाटे तिलकं कृत्वा सङ्कल्पं कुर्यात् । (सङ्कल्प गर्ने)

अद्येहेत्यादि मासपक्षादीन् समुच्चार्य अद्येहामुकगोत्रामुकप्रवरामुकशर्माहं मम जन्मनि जन्मान्तरे वा विहितस्य सकलपापक्षयपूर्वकश्रीपरमेश्वरप्रीत्यर्थं प्रदोषव्रताङ्गत्वेन तदुद्यापनाङ्गत्वेन वा दीपकलश - गणेशपूजन-पूर्वकमुमामहेश्वरपूजनमहङ्करिष्ये । इति सङ्कल्प्य पूजाविधिना दीपादीन् संपूज्य अधोनिर्दिष्टपूजाविधिना उमामहेश्वरं पूजयेत् । (दियो, कलश, गणेश पूजा गरी उमामहेश्वरको पूजा गर्ने)

आवाहनम्

(जलले आवाहन गर्ने)

एह्येहि त्वमुमाकान्त स्थाने चात्र स्थिरो भव । यावद्व्रतं समाप्येत कृपया दीनवत्सल ॥

आसनम्

(कुश राख्ने)

आसनेऽस्मिन्नुमाकान्त सुखस्पर्शे सुनिर्मले । उपविश्य मृडेदानीं सर्वशान्तिप्रदो भव ॥

पाद्यम्

(जल चढाउने)

पाद्यं च ते मयादत्तं पुष्पगन्धसमन्वितम् । गृहाण देवदेवेश प्रसन्नो वरदो भव ॥

अर्घ्यम्

(अर्घ्य चढाउने)

ताम्रपात्रस्थितं तोयं फलगन्धादिसंयुतम् । अर्घ्यं गृहाण देवेश मया दत्तं हि भक्तितः ॥

आचमनीयम्

(जल चढाउने)

शीतलं निर्मलं तोयं कर्पूरेण सुवासितम् । आचम्यतां सुरश्रेष्ठ मया दत्तं हि भक्तितः ॥

पञ्चामृतस्नानम् (पञ्चामृत वनाउने)

पञ्चामृतेन स्नपनं तन्तन्मन्त्रैश्च कारयेत्–

दुग्धस्नानम् (दुध चढाउने)

गोक्षीरधामदेवेश गोक्षीरेण मया कृतम्। स्नपनं देवदेवश गृहाण परमेश्वर ॥

दधिस्नानम् (दही चढाउने)

दध्ना चैव मया देव स्नपनं क्रियते तव। गृहाण भक्त्या दत्तं मे सुप्रसन्नो भवाव्यय ॥

घृतस्नानम् (घिउ चढाउने)

सर्पिषा देवदेवेश स्नपनं क्रियते मया। उमाकान्त गृहाणेदं श्रद्धया सुरसत्तम ॥

मधुस्नानम् (मह चढाउने)

इदं मधु मया दत्तं तव तुष्ट्यर्थमेव च। गृहाण शम्भो त्वं भक्त्या मम शान्ति प्रदो भव ॥

शर्करास्नानम् (सखर चढाउने)

सितया देवदेवेश स्नपनं क्रियेत मया। गृहाण शम्भो मे भक्त्या सुप्रसन्नो भव प्रभो ॥

स्नानम् (जल चढाउने)

कावेरी नर्मदा वेणी तुङ्गभद्रा सरस्वती। गङ्गा च यमुना चैव ताभ्यः स्नानार्थमाहृतम् ॥
गृहाण त्वमुमाकान्त स्नानाय श्रद्धया जलम् ॥

वस्त्रम् (कपडा चढाउने)

एतद्वासो मया दत्तं सोत्तरीयं सुशोभनम्। गृहाण त्वं सुरश्रेष्ठ मम वासः प्रदो भव ॥

यज्ञोपवीतम् (जनै चढाउने)

यज्ञोपवीतं सौवर्णं मया दत्तं च शङ्कर। गृहाण परया तुष्ट्या पुष्टिदो भव सर्वदा ॥

चन्दनम् (चन्दन चढाउने)

सुगन्धं चन्दनं दिव्यं मया दत्तं तव प्रभो। भक्त्या परमया शम्भो सुभगं कुरु मां भव ॥

पुष्पम् (फूल चढाउने)

मालती चम्पकादीनि कुमुदान्युत्पलानि च। बिल्वपत्राणि पूजार्थं स्वीकुरु त्वमुमापते ॥

धूपम् (धूप बाल्ने)

धूपं विशिष्टं परमं सर्वोषधिविजृम्भितम्। गृहाण परमेशान ममोपरि दयां कुरु ॥

दीपम् (बत्ती बाल्ने)

दीपं च परमं शम्भो घृतवर्तिसुयोजितम्। दत्तं गृहाण देवेश मम ज्ञानप्रदोभव ॥

नैवेद्यम् (नैवेद्य चढाउने)

शाल्योदनं घृतयुतं पायसादिसमन्वितम्। नैवेद्यं विविधं दत्तं भक्त्या मे प्रतिगृह्यताम् ॥

मध्ये पानीयम् (जल चढाउने)

नैवेद्यमध्ये पानीयं मया दत्तं हि भक्तितः। स्वीकुरुष्व महादेव प्रसन्नो भव सर्वदा ॥

उत्तरापोशनम् (जल चढाउने)

उत्तरापोशनार्थं वा अनीतं जलमुत्तमम्। गृहाण त्वमुमाकान्त सर्वदुःखनिवारक ॥

ताम्बूलम् (पान सुपारी चढाउने)

कर्पूरैलालवङ्गादिपूगीफल समन्वितम्। ताम्बूलं कल्पितं भक्त्या गृहाण गिरिजाप्रिय ॥

फलम् (फल चढाउने)

इदं फलं मया देव स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

दक्षिणाम् (पैसा चढाउने)

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। दक्षिणा काञ्चनी देव स्थापिता मे तवाग्रतः ॥

आरर्तिक्यम् (आरती बाल्ने र घुमाउने)

दीपावली मया दत्ता सुवर्तिघृतसंयुता। आरार्तिकप्रदानेन मम तेजः प्रदो भव ॥

प्रदक्षिणाम् (प्रदक्षिणा गर्ने)

ॐ यानि कानि च पापानि जन्मान्तर कृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिणः पदेपदे ॥

नमस्कारान् (नमस्कार गर्ने)

मृत्युञ्जयाय रुद्राय नीलकण्ठाय शम्भवे। अमृतेशाय शर्वाय महादेवाय ते नमः ॥

मन्त्रपुष्पम् (फूल लिएर नमस्कार गर्ने)

सेवन्तिकाबकुलचम्पकपाटलाब्जैः पुन्नागजातिकरवीररसालपुष्पैः।
बिल्वप्रवालतुलसीदलमालतीभि स्त्वां पूजयामि जगदीश्वर मे प्रसीद ॥
निपत्य दण्डवद्भूमौ प्रणम्य च पुनः पुनः। क्षमापयित्वा देवेशं रात्रौ जागरणं चरेत् ॥
गीतवादित्रनृत्याद्यैर्गृहे वा देवतालये। वितानमण्डपं कुर्यान्नानावर्णैः समन्वितम् ॥
प्रभातायां तु शर्वर्यां नद्यादौ विमले जले। स्नात्वा पुनः समभ्यर्च्य जुहुयात्पायसेन च ॥
उमया सहितं रुद्रं पृथगष्टोत्तरं हुनेत्। गौरीर्मिमाय मन्त्रेण त्र्यम्बकेण च शङ्करम् ॥
आचार्यं च सपत्नीकं वस्त्रालङ्कारचन्दनैः। तोषयित्वा शुचिं दान्तं गां दद्याच्च पयस्विनीम् ॥
ब्राह्मणान्भोजयेत् पश्चाद्दक्षिणाभिः प्रतोषयेत्। दीनानाथांश्च संतर्प्य ह्यच्छिद्रं वाचयेत्ततः।

लब्धानुज्ञां ब्राह्मणेभ्यो बन्धुभिः सहितः शुचिः । हृदिं स्मरच्छिवं भक्त्या भुञ्जीत नियतो व्रती ॥
अनेनैव विधानेन कुर्यादुद्यापने विधिम् । एवं यः कुरुते भक्त्या प्रदोषव्रतमुत्तमम् ॥
शनिवारेण संयुक्तं सोद्यापनविधिं नरः । आयुरारोग्यमैश्वर्यपुत्रपौत्रसमन्वितः ॥
शत्रून् विजयते नित्यं प्रसादाच्छङ्करस्य च ।

प्रकारान्तरम् – मदनरत्ने, स्कान्दे च – केन विधानेनोत्तमम् प्रदोषव्रतम् नरैः स्त्रीभिश्च विधातव्यमिति पार्वत्या पृष्टः शङ्करोऽकथयत् यत् –

यदा त्रयोदशी शुक्ला मन्दवारेण संयुता । आरधव्यं व्रतं तत्र सन्तानफलसिद्धये ॥
ऋणनिर्मोचनार्थाय भौमवारेण संयुता । सौभाग्यस्त्रीसमृद्धचर्थं शुक्रवारेण संयुता ।
आयुरारोग्यसिद्धचर्थं भानुवारेण संयुता । एकवत्सरपर्यन्तं प्रतिपक्षं त्रयोदशी ॥
प्रदोषे शिवमभ्यर्च्य नक्तं भोक्ष्यामि शङ्कर । प्रातश्चानेन मन्त्रेण व्रतसङ्कल्पमाचरेत् ॥
ततस्तु लोहिते भानौ स्नात्वा सनियमो व्रती । पूजास्थानं ततो गत्वा प्रदोषे शिवमर्चयेत् ॥

पूजामन्त्रा

(पूजा गर्ने)

ॐ भवाय नमः । ॐ महादेवाय नमः । ॐ रुद्राय नमः । ॐ नीलकण्ठाय नमः । ॐ शशिमौलिने नमः । ॐ उग्राय नमः । ॐ उमाकान्ताय नमः । ॐ ईशानाय नमः । ॐ विश्वेश्वराय नमः । ॐ त्र्यम्बकाय नमः । ॐ त्रिपुरुषाय नमः । ॐ त्रिपुरान्तकाय नमः । ॐ त्रिकाग्निकाय नमः । ॐ कालाग्निरुद्राय नमः । ॐ नीलकण्ठाय नमः । ॐ सर्वेश्वराय नमः ।

ततः पञ्चामृतेन स्नपनमेभिर्मन्त्रैः प्रपूज्य दधिभक्तादि नैवेद्यं ताम्बूलं दक्षिणादिकं च दद्यात् ।
एवं त्रयोदशीव्रतं संवत्सरम् (वर्षदिनपर्यन्तम्) कुर्यात् । अथवा मन्दवारेण युक्तां
त्रयोदश्यामारभ्य चतुर्विंशतिं यावत् तावत् कुर्यादिति ॥ (पूर्णपात्र, दक्षिणा दान गरी विसर्जन गर्ने)



॥ इति सोद्यापनं प्रदोषव्रतम् ॥

॥ श्रीगणेशाय नमः ॥

अथ एकादशीव्रतोद्यापनविधिः

सर्वतोभद्रमध्ये

(कलश थाली स्थापना गर्ने)

कलशविधिना कलशं सम्पूज्य तदुपरि ताम्रस्थालीं निधाय तदुपरि शङ्ख-चक्र-गदा-पद्मयुत लक्ष्मीसहित नारायणप्रतिमां तत्पूजाविधिना (एकादशीव्रतपूजाविधिना) सम्पूज्य । तत्र विविधानि नैवेद्यादीनि समर्प्य रात्रौ जागरणादिकं कुर्यात् । प्रातः पूजापद्धत्युक्तदेवान् प्रत्येकं पायसतिलाज्यैर्हुत्वा देवं इदं विष्णुरिति मन्त्रेण पुरुषसूक्तेन वाष्टोत्तरशतं हुत्वा देवस्योत्तरपूजां विधाय प्रार्थयेत् –

(दियो, कलश, गणेश पूजा गरी नमस्कार गर्ने)

कृष्णाय वासुदेवाय जगतः परमात्मने । शरण्यायाप्रमेयाय गोविन्दाय नमो नमः ॥
नमः स्थूलाय सूक्ष्माय नमो व्यापकरूपिणे । अनन्ताय जगद्धात्रे ब्रह्मणेऽनन्तमूर्त्तये ॥
अव्यक्तायाऽखिलेशाय चिद्रूपाय गुणात्मने । नमो मूर्त्ताय सिद्धाय पराय परमात्मने ॥
देवदेवाय वन्द्याय पराय परमेष्ठिने । कर्त्रे विश्वस्य गोप्त्रे च तत्संहर्त्रे च ते नमः ॥
मयाऽद्यास्मिन् व्रते देव यदपूर्णं कृतं निभो ! सर्वं भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्दन ॥

द्वादशब्राह्मणेभ्यो पक्वान्नसहितद्वादशपूर्णघटान् दत्त्वा शय्यादानं कुर्यात् ॥ (१२ जना ब्राह्मणलाई भोजन गराउने)

अथ शय्यादानम्

(शय्या दान गर्ने)

कर्ता आचम्य ॐ अद्येत्यादि देशकालाद्युल्लेखनान्ते अमुकगोत्रोऽमुकशर्मा सपत्नीकोऽहं मम श्रुतिस्मृतिपुराणोक्त-फलावाप्तये यथाकालमारभ्यएतावत्कालपर्यन्तंकृतस्यामुकैकादशीव्रतस्योद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धये श्रीपरमेश्वरामुकदेवताप्रीतये अमुकगोत्रामुकनामानौ द्विजदम्पती यथामिलितोपचारैरहं पूजयिष्ये ।

ततः पादप्रक्षालनम् ।

(सङ्कल्प गरी ब्राह्मण-ब्राह्मणीको पाउ धुने)

अर्घ्यम्

(अर्घ्य दिने र पूजा गर्ने)

भूमिदेवाग्रजन्मासि केशवस्य प्रियः सदा । प्रत्यक्षदेवस्त्वं गृह्ण मत्तोऽर्घ्यं द्विजसत्तम ॥

आचमनीयम्, यज्ञोपवीतम्, आभूषणम्, तिलकम्, अक्षतान्, पुष्पम्, मालाम्, धूपम्, दीपम्, भाग-द्वयं नैवेद्यम्, फलम्, ताम्बूलम्, द्रव्यम्, नीराजनम्, दक्षिणां च कृत्वा प्रार्थयेत् –

(नमस्कार गर्ने)

पूजितस्त्वं यथाशक्त्या पूजितः परमेश्वरः । ऐहिकामुष्मिकीं देव ! कार्यसिद्धिं ददस्व मे ॥

नमस्कारः – ॐ द्विजदम्पतीभ्यां नमः ।

ततः सोपस्करशय्यायै नमः, इति गन्धादिना शय्यां सम्पूज्य वारिणाऽभिषिच्य कुश-तिल-जलान्यादाय । (सङ्कल्प गर्ने)

ॐ अद्येत्यादि अमुकगोत्रोऽमुकशर्मा सपत्नीकोऽहं मम श्री परमेश्वरामुकदेवताप्रीतये कृतस्याऽमुकव्रतस्योद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धयेऽमुकगोत्राय अमुकशर्मणे ब्राह्मणाय सपत्नीकाय सोपकरणशय्यादानत्वेन तुभ्यमहं सम्प्रददे ।

प्रार्थना (नमस्कार गर्ने)

यथा न कृष्णशयनं शून्यं सागरजातया । शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ॥
यस्मादशून्यं शयनं केशवस्य शिवस्य च । शय्या ममाप्यशून्यास्तु तस्माज्जन्मनि जन्मनि ॥

दक्षिणाद्रव्यमादाय (दक्षिणा सङ्कल्प गर्ने)

ॐ अद्यकृतैतत्सोपस्करशय्यादानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्राया-मुकशर्मणे ब्राह्मणाय सपत्नीकाय शय्यादानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे ॥

गोदानम् (गोदान गर्ने पेज नं. ८)

ततो परिधानीयवस्त्राण्यग्रे कृत्वा सम्पूज्य परिधानीयवस्त्रेभ्यो नमः । (वस्त्रलाई पूजा गर्ने)
इति कुश-जलेन सम्प्रोक्ष्य सङ्कल्पः – (वस्त्रलाई सङ्कल्प गर्ने)

ॐ अद्येत्यादि अमुकदेवताप्रीतये एतावत्कालपर्यन्तं कृतस्यामुकव्रतस्योद्यापनकर्मणः साङ्गतासिद्धये एतद्वस्त्रतन्तुसम्मितावच्छिन्नवैराजलोक– प्राप्तिपूर्वक शतकाद्यवच्छिन्नवैकुण्ठभवनप्राप्तिकामः श्रीपरमेश्वरप्रीतये इमानि श्वेत-कृष्ण-रक्त-पीत-हरितादिरङ्गपूतानि परिधानीयवस्त्राणि बृहस्पतिदैवतानि यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना, श्वेतस्य (नमस्कार गर्ने)

शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् । सुवेशधारि त्वं यस्मादतः शान्तिं प्रयच्छ मे ॥

रक्तस्य (नमस्कार गर्ने)

रक्तवस्त्रं शुभं यस्मादादित्यस्य प्रियं सदा । प्रदानादस्य मे सूर्यः प्रीतः शान्तिं प्रयच्छ मे ॥

कृष्णस्य (नमस्कार गर्ने)

धर्मराजेन विधृतं कृष्णवस्त्रं सुशोभनम् । सर्वपापप्रणाशोऽस्तु कृष्णवस्त्रप्रदानतः ॥

दानप्रतिष्ठा (दानप्रतिष्ठा गर्ने)

अथ कृतैतत्परिधानीयवस्त्रदानकर्मणः प्रतिष्ठासाङ्गतासिद्ध्यर्थं यद्द्रव्यं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

भूषणदानम् (गरगहनाहरू दान गर्ने)

कुश–जलेन 'आभरणेभ्यो नमः' इति सम्प्रोक्ष्य, सम्पूज्य सङ्कल्पः – (पूजा गरी सङ्कल्प गर्ने)

अद्येत्यादि मम सार्वदिक विरहकालानवस्थित्युत्तमरूपसौभाग्ययुतसुस्थित सप्तकुलाधिक सर्वगुणात्मीय विष्णुकुलजन्मकामः श्रीपरमेश्वरप्रीतये इमानि हेम-रौप्य-मुक्तामण्यादिमयाभरणानि विष्णुदैवतानि यथानामगोत्राय तुभ्यमहं सम्प्रददे ॥

प्रार्थना सुवर्णस्य (नमस्कार गर्ने)

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

रौप्यस्य (नमस्कार गर्ने)

शिवनेत्रोद्भवं पुण्यं रजतं पितृवस्त्रभम् । तस्मादस्य प्रदानेन रुद्रः सम्प्रीयतां मम ॥

अङ्गुलीयकस्य (औंठी) (नमस्कार गर्ने)

हिरण्यगर्भसम्भूतं सौवर्णं चाङ्गुलीयकम् । धर्मप्रदं प्रयच्छामि प्रीयतां कमलापतिः ॥

वलयस्य (वाला) (नमस्कार गर्ने)

काञ्चनं हस्तवलयं रूपकान्तिसुखप्रदम् । विभूषणं प्रयच्छामि प्रीयतां कमलापतिः ॥

कुण्डलस्य (कुण्डल) (नमस्कार गर्ने)

क्षीरोदमथने पूर्वमुद्धृतं कुण्डलद्वयम् । श्रिया सह समुद्भूतं ददे श्रीः प्रीयतामिति ॥

मुक्तायाः (मोति) (नमस्कार गर्ने)

ताम्रवर्णसमाभासा रत्नेष्वधिकमुत्तमाः । मुक्ताः समुद्भवाः सन्तु भुक्तिमुक्तिप्रदा मम ॥
रत्नेषु मणिषु चैव सर्वे देवा व्यवस्थिताः । तथा शान्तिं प्रयच्छन्तु मणिरत्नं ददाम्यहम् ॥

दानप्रतिष्ठा (दानप्रतिष्ठा गर्ने)

ॐ अद्य कृतैतद्धेम-रौप्य-ताम्र-मुक्तामयाभरणदानप्रतिष्ठार्थंयद्देयं तद्दैवतं यथानामगोत्राय तुभ्यमहं सम्प्रददे ॥

हेम-रौप्य-पित्तल-कांस्यादि भोजनपाकभाण्डादिदानम् – (भाँडाहरू दान गर्ने)

कुशवारिणा 'पाकभोजनपात्रेभ्यो नमः' इति सम्प्रोक्ष्य सम्पूज्य च संस्पृश्य – (पूजा गरी सङ्कल्प गर्ने)

ॐ अद्येत्यादि सौभाग्या-वैधव्यसर्वगुणोपेतभृत्य-मित्रादिनत्ययुत-तत्त्वसुखानुत्तमरूपावाप्तिकाम इमानि हेम-रौप्य-ताम्र-पित्तल-कांस्याऽयसादिघटितानि पानादिपात्राणि विष्णुदैवतानि यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

प्रार्थना (नमस्कार गर्ने)

आपाकब्रह्मरूपाःस्थ भाण्डनामानि जन्तवः । तत्प्रदानात् प्रजापुष्टिः सर्वत्रास्तु ममाज्ञया ॥
भाण्डरूपाणि यान्यत्र कल्पितानि मया किल । भूत्वा सत्त्वानुरूपाणि उपतिष्ठन्तु तानि वै ॥

स्वर्णपात्रस्य (नमस्कार गर्ने)

जन्मान्तरसहस्रेषु यत्कृतं दुरितं मया । स्वर्णपात्रप्रदानेन शान्तिरस्तु सदा मम ॥

पित्तलस्य (पित्तल) (नमस्कार गर्ने)

पापानि यान्यनेकानि कामाकामकृतानि च । पित्तलस्य प्रदानेन तानि नश्यन्तु मे सदा ॥

दानप्रतिष्ठा (दानप्रतिष्ठा गर्ने)

अद्यकृतैतद्धेम–रौप्य-ताम्रपित्तलायसकांस्यादिनाना भोजन-पाकादिपात्रदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्राया-मुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

अन्नदानम् (अन्न सङ्कल्प)

कुशजलेन 'सव्यञ्जनतण्डुलेभ्यो नमः' सम्प्रोक्ष्य, सम्पूज्य, संस्पृश्य – (पूजा गरी सङ्कल्प गर्ने)

ॐ अद्येत्यादि मम सर्वकामसमृद्धि-श्रीमत्सूर्यसङ्गशविमानारोहण-बहुगन्धर्वोपगीयमानबह्वप्सरोगण-सेव्यमान-तण्डुलसमसंख्या-सहस्रवर्षावच्छिन्नस्वर्गवासार्थं बहुपुरुषाहारपरिमितान् ससूपतण्डुलान् प्रजापतिदैवतान् यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना (नमस्कार गर्ने)

पावनाः सर्वयज्ञेषु प्रशस्ता होमकर्मणि । तस्मात्तण्डुलदानेन प्रीयतां विश्वदेवताः ॥

दानप्रतिष्ठा (दानप्रतिष्ठा गर्ने)

अद्य कृतैतत्सव्यञ्जनतण्डुलदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे तुभ्यमहं सम्प्रददे ॥

छत्रदानम् (छाता) (छाता दान गर्ने)

कुश-जलेन 'छत्राय नमः' सम्प्रोक्ष्य सम्पूज्य-अद्येत्यादि यमपथाधिकरणकतीक्ष्णभयघोरातपवारणार्थं इदं छत्रमुत्तानाङ्गिरोदैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना (नमस्कार गर्ने)

सर्वेषां चैव दानानां छत्रमातवारणम् । सुखदं मोक्षदं यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा (दानप्रतिष्ठा गर्ने)

अद्य कृतैतत् छत्रदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानाम गोत्रायामुकशर्मणे तुभ्यमहं सम्प्रददे ॥

उपानद्दानम् (जुत्ता) (जुत्ता दान गर्ने)

कुश-जलेन 'उपानद्भ्यां नमः' सम्प्रोक्ष्य, सम्पूज्य – (पूजा गरी सङ्कल्प गर्ने)

अद्य यमपथाधिकरणकदुर्गभूसन्तरणार्थं तप्तवालुकासिकण्टकाङ्कितसन्तरणोत्पन्न-सुखित्वकाम इमे उपानहौ उत्तानाङ्गिरो दैवते यथानामगोत्रायामुकशर्मणे तुभ्यमहं सम्प्रददे ॥

प्रार्थना (नमस्कार गर्ने)

उपानहौ प्रदास्यामि कण्टकादिनिवारणे । सर्वस्थानेषु सुखदं ताभ्यां शान्तिं प्रयच्छताम् ॥

दानप्रतिष्ठा (दानप्रतिष्ठा गर्ने)

अद्य कृतैतद् उपानद्दानप्रतिष्ठार्थं रजतं चन्द्रदैवतं यथानामगोत्रायामुकशर्मणे तुभ्यमहं सम्प्रददे ॥

यष्टिदानम्

(लौरो दान गर्ने)

कुश-जलेन 'यष्टयै नमः' सम्प्रोक्ष्य सम्पूज्य –

(पूजा गरी सङ्कल्प गर्ने)

अद्य नेत्रहीनदुर्बलानां सुखेन मार्गगमनार्थं दुष्टसत्वभयनिवारणार्थं इमां यष्टिं वनस्पतिदैवताकां यथानामगोत्रायामुकशर्मणे तुभ्यमहं सम्प्रददे ॥

प्रार्थना

(नमस्कार गर्ने)

यतिभ्यो वैणवं दण्डं द्विजेभ्यो हि खनित्रकम् । प्रदाय परलोकेऽसौ यमदण्डं न गच्छति ॥

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

अद्य कृतैतद् यदिष्टदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे तुभ्यमहं सम्प्रददे ॥

व्यजनदानम्

(पङ्खा दान गर्ने)

कुश-यव-जलेन 'व्यजनाय नमः' संप्रोक्ष्य, सम्पूज्य–

(पूजा गरी सङ्कल्प गर्ने)

अद्य मम घर्मकाले जनिष्यमाणशरीर-सुखार्थं इदं व्यजनं समीरदैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना

(नमस्कार गर्ने)

दुःखापहं सुखप्राप्तिर्दाहशान्तिकरं परम् । तस्माद् व्यजनदानाच्च तापाच्छान्तिं प्रयच्छतु ॥

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

अद्य कृतैतद् व्यजनदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे तुभ्यमहं सम्प्रददे ॥

पूर्णपात्र, प्रतिमादानम्

(पूर्णपात्र गरी प्रतिमा दान गर्ने)

अद्येह श्रुति-स्मृति-पुराणोक्तफलावाप्तिपूर्वकं श्रीमल्लक्ष्मीनारायणप्रीतये कृतस्यैकादशीव्रतस्योद्यापनाङ्गत्वेन सुपूजितां सोपस्करसौवर्णीमिमां लक्ष्मी-नारायणप्रतिमां लक्ष्मीनारायणप्रीतये अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

प्रार्थना

(नमस्कार गर्ने)

हर ! प्रसीद देवेश ! सर्वलोकवरप्रद ! तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु मे ॥

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

अद्य कृतैतत् सुपूजित-स्वर्णनिर्मितसोपस्करश्रीलक्ष्मी-नारायणप्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्

(गोदान गर्ने)

॥ इत्येकादश्युद्यापनम् ॥

॥ श्रीगणेशाय नमः ॥

गोदानाङ्ग गोपूजा

पूजनम् (गाईको पूजा गर्ने)

नमो गोभ्यः श्रीमतीभ्यः सौरभेयिभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमोनमः ॥
गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश । यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥
आसनम्, पाद्यं, अर्घ्यं आचमनीयम्, स्नानम्, चन्दनम्, अक्षतान्, पुष्पाणि समर्पयामि गवे नमः ।

आच्छादनम् (कपडा गाईको ढाडमा चढाइदिने)

आच्छादनं मया सम्यक् शुद्धं चैव सुनिर्मलम् । सुरभी-वस्त्र-दानेन प्रीयतां परमेश्वरी ॥

प्रार्थना (नमस्कार गर्ने)

गावो मे चाग्रतः सन्तु गावो मे सन्तु पृष्ठतः । गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥
पञ्चगावः समुत्पन्ना मध्यमाने महोदधौ । तासां मध्ये तथा श्रेष्ठा तस्यै धेन्वै नमोनमः ॥

पुष्पमालाम् (फूलको माला लगाइदिने)

पूजितासिवशिष्ठेन विश्वामित्रेण धीमता । सुरभि हर मे पापं यन्मया दृष्कृतं कृतम् ॥

अङ्गपूजा (चन्दन, अक्षता, फूलले गाईको अङ्ग-अङ्गमा पूजा गर्ने)

ॐ गोभ्यो नमः । पृष्ठे ब्रह्मणे नमः । गले विष्णवे नमः । मुखे रुद्राय नमः । रोमकूपेषु महर्षिभ्यो नमः । पुच्छे नागेभ्यो नमः । स्तनेषु चतुस्समुद्रेभ्यो नमः । खुराग्रे अष्टकुलपर्वतेभ्यो नमः । नेत्रयोः चन्द्रसूर्याभ्याम् नमः । श्रृंगयोर्मध्ये सर्वतीर्थेभ्यो नमः । मूत्रे गंगादि सर्वनदीभ्यो नमः । गोमये लक्ष्म्यै नमः । कर्णयोःअश्विनीकुमाराभ्यां नमः । जिह्वायां सरस्वत्यै नमः । नासापुटयोः सुमुखाय नमः । उदरे पृथिव्यै नमः । दक्षिणपार्श्वे कुबेराय नमः । वामपार्श्वे वरुणाय नमः । हुंकारे सर्वदेवेभ्यो नमः ।

धूपम् (धूप बाल्ने)

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्धमुत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

दीपम् (बत्ती बाल्ने)

त्वं ज्योतिः सर्वदेवानां तेजसां तेजमुत्तमः । आत्मज्योतिः परंधाम दीपोऽयं प्रतिगृह्यताम् ॥

नैवेद्यम् (नैवेद्य दिने)

सुरभि त्वं जगन्माता नित्यं विष्णुपदे स्थिता । मातः गृहाण मे दत्तं गोमातस्त्रातुमर्हसि ॥

प्रार्थना

(नमस्कार गर्ने)

पृष्ठे ब्रह्मा गले विष्णुर्मुखे रुद्रः प्रतिष्ठितः । मध्ये देवगणाः सर्वे रोमकूपे महर्षयः ॥
नागाः पुच्छे खुराग्रेषु ये चाष्टौ कुलपर्वताः । मूत्रे गंगादयो नद्यो नेत्रयोः शशिभास्करौ ।
एते यस्यास्तनौ देवः सा धेनुर्वरदाऽस्तु मे ॥

तर्पणम्

(गाईको पुच्छरले तर्पण गर्ने)

ॐ मनो मे तर्प्पयत व्वाचम्मे तर्प्पयत प्राणम्मे तर्प्पयत चक्षुर्मे तर्प्पयत श्रोत्रम्मे तर्प्पयतात्मानम्मे तर्प्पयत प्रजाम्मे तर्प्पयत पशून्मे तर्प्पयत गणान्मे तर्प्पयत गणान्मे मा व्वितृषन् ॥ (अपसव्य भएर पितृहरूलाई तर्पण गर्ने चलन छ)

सङ्कल्प

(गाईको पुच्छर समाई सङ्कल्प गर्ने)

हरि ॐ तत्सत् ३ विष्णुः ॐ अद्य श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणो द्वितीयपरार्द्धे श्री श्वेतवाराहकल्पे वैवस्वमन्वन्तरे अष्टाविंशतितमे युगे प्रह्लादाधिपत्ये मनौ सप्तमे सत्यत्रेताद्वापरान्ते बौद्धावतारे कलियुगस्य प्रथमचरणे भारतवर्षे भरतखण्डे जम्बूद्वीपे आर्यावर्तान्तर्गत अमुकदेशे भागीरथ्याः अमुकदिग्भागे अमुकक्षेत्रे इह पुण्यभूमौ षष्टि सम्वत्सराणां मध्ये अमुकनामसम्वतसरे श्रीसूर्ये उत्तरायणे वा दक्षिणायने अमुकर्तो मासोत्तमे मासे अमुकमासे अमुकपक्षे अमुकवासरे अमुकतिथौ अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ अमुकराशिस्थिते चन्द्रमसि अन्येषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं यथोक्तग्रहगुणविशेषेण विशिष्टायां अद्येय यथा नक्षत्रयोगकरणलग्नमुहूर्तवेलान्वितायां शुभपुण्यतिथौ अद्य अमुकगोत्रस्यामुकशर्मणो मम सर्वपापक्षयार्थम् इमां गां सोपस्करां रुद्रदैवतां सुवर्णादिदक्षिणायुताम् अमुक गोत्राय अमुकशर्मणे ब्राह्मणाय सुपूजिताय तुभ्यमहं सम्प्रददे न ममेति ॥

(गाईको पुच्छर ब्राह्मणलाई दिने)

प्रार्थना

(नमस्कार गर्ने)

यज्ञसाधनभूता या विश्वस्यान्नप्रदायिनी । विश्वरुपधरो देवः प्रीयतामनया गवा ॥

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

अद्य कृतैतत् गोदानकर्मणः साङ्गतासिद्ध्यर्थम् इदम् रजतं ।
चन्द्रदैवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे न मम ॥

प्रदक्षिणा

(ब्राह्मणसहित गाईलाई प्रदक्षिणा गर्ने)

यानि कानि च पापानि जन्मान्तर कृतानि च । तानि तानि प्रणश्यन्तु प्रदक्षिण पदे पदे ॥

अभिषेक

(दक्षिणा लिई गाईको पुच्छरले अभिषेक गर्ने)

ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥

॥ इति गोपूजा ॥

॥ श्रीगणेशाय नमः ॥

लक्षवर्तिकादीपदानविधिः

लक्षवर्तिकादीपदानविधिः (कर्मपात्र बनाई दियो बालेर ब्रह्मा, विष्णु, प्रजापति स्थापना गर्ने)

कर्त्ता शुचिराचान्तः । दीपं प्रज्वाल्य नमोऽस्त्वन्तायेति दीपं सम्पूज्य । अर्घ्यस्थापनं कुर्यात् । गंगे च यमुनेत्यादिना ।

अथ सङ्कल्प (अर्घ्य स्थापना गरेर प्रतिज्ञासङ्कल्प गर्ने)

अद्येत्यादि मम समस्तजन्म बाल्य यौवन वार्द्धक्यावस्थोपार्जित-कायिक वाचिक मानसिक-सकलपापक्षयपूर्वकै हेकानेकानेकविध निरवधिक-भोगानुभवानन्तरं श्रीपरमेश्वरप्रीतिद्वारा विष्णुसायुज्यपद- प्राप्तिकामो लक्षवर्त्तिका प्रज्वलनाङ्गभूत दीप कलश गणेश जप पूर्वकं ब्रह्मा-विष्णुमहेश्वरपूजनं प्रधानदेवतापूजनं चाहं करिष्ये ॥

दीपं सम्पूज्य कलश गणेश पूजनं कुर्यात् । (दियो, कलश, गणेश पूजा गर्ने)

अन्यकलशमध्ये इदं विष्णुरिति मन्त्रेण हैमं श्रिया सहितं विष्णुं पूजयेत् ॥ तद्दक्षिणे ब्रह्मयज्ञानमिति सावित्रीसहितं ब्रह्माणं पूजयेत् ॥ तदुत्तरे नमः । शंभवायेति मन्त्रेण उमासहितं शिवं पूजयेत् ॥ प्रधानदेवतां गङ्गां च षोडशोपचारैः सम्पूज्य ॥ (प्रतिमा राखेर ब्रह्मा-विष्णु-महेश्वरको पूजा गर्ने)

ततः मनोजूरिति मन्त्रेण प्राणं प्रतिष्ठाप्य ।

ॐ सहस्रशीर्षेति आसनम् ॥ ॐ पुरुषऽएवेत्युपवेशनम् । ॐ एतावानस्येति पाद्यम् ॥ ॐ त्रिपादूर्ध्वेतिअर्घ्यम् ॥ ॐ ततो विराडिति आचमनीयम् ॥ ॐ तस्माद्यज्ञादिति स्नानम् । ॐ तस्माद्यज्ञादिति आच्छादनम् ॥ ॐ तस्मादश्वेति यज्ञोपवीतम् ॥ ॐ तं यज्ञमिति चन्दनम् ॥ ॐ यत्पुरुषेणहविषा इति पुष्पम् ॥ ॐ बृहस्पते इति वस्त्रम् ॥ ॐ यवोसीति यवान् ॥ ॐ ब्राह्मणोस्येति धूपम् ॥ ॐ चन्द्रमा मनसोजात० इति दीपम् ॥ ॐ नाभ्याऽआसीदिति नैवेद्यम् ॥ ॐ यत्पुरुषमिति अञ्जलिकरणम् ॥ ॐ सप्तास्यासन्निति प्रदक्षिणा ॥ इति सम्पूज्य गरुडं, हसं, वृषभं च सम्पूज्य ॥

ततः अङ्गपूजा (चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ कालाय नमः शिरं पूजयामि ॥ ॐ विष्णवे नमः ललाटं पूजयामि ॥ ॐ बन्हे नमः । नेत्रम् पूजयामि । ॐ रवये नमः कर्णौ पूजयामि ॥ ॐ दीप्ताय नमः नासिकां पूजयामि ॥ ॐ निशाकराय नमः मुखं पूजयामि ॥ ॐ रुद्राय नमः कण्ठं पूजयामि ॥ ॐ शेषाय नमः स्कन्धं पूजयामि ॥ ॐ जगद्व्यापिने नमः बाहू पूजयामि ॥ ॐ तेजोरूपाय नमः स्तनौ पूजयामि ॥ ॐ महेश्वराय नमः नाभिं पूजयामि ॥ ॐ विश्वरूपाय नमः कटीं पूजयामि ॥ ॐ जगतः प्रभवे नमः गुदम् पूजयामि ॥ ॐ स्वप्रकाशाय नमः ऊरू पूजयामि ॥ ॐ स्वयंज्योतिषे

नमः जानुनी पूजयामि ॥ ॐ चतुर्व्यूहाय नमः गुल्फौ पूजयामि ॥ ॐ जनाधिपाय नमः पादौ पूजयामि ॥ ॐ परब्रह्मणे नमः सर्वाङ्ग पूजयामि ॥ ॐ धात्रे नमः पादौ पूजयामि ॥ ॐ विधात्रे नमः जंघे पू० ॥ ॐ स्रष्टे नमः ऊरू पूजयामि ॥ ॐ प्रजापतये नमः मेढ्रं पूजयामि ॥ ॐ परमेष्ठिने नमः कटिं पूज० ॥ ॐ अग्निरूपाय नमः नाभिं पूज० ॥ ॐ पद्मनाभाय नमः हृदयं पूज० ॥ ॐ वेधसे नमः बाहू पूजयामि ॥ ॐ दामोदराय नमः कण्ठं पूज० ॥ ॐ हिरण्यगर्भाय नमः मुखं पू० ॥ ॐ ब्रह्मणे नमः शिरं पूज० ॥ ॐ विष्णवे नमः सर्वाङ्गम् पूजयामि ॥ विशेषोपहारादिकं समर्प्य ॥

अथ दीपदान सङ्कल्प

(लाख वत्तीको दियो वालेर सङ्कल्प गर्ने)

ॐ अद्येहेत्यादि देशकालादीन् संकीर्त्य अमुकगोत्रायाः अमुकनाम्न्या देव्या मम समस्त जन्म-बाल्य-यौवन-वार्धक्यावस्थोपार्जित-कायिक-वाचिक-मानसिक-सांसर्गिक-सकलपापक्षयपूर्वकैहिकानेकविध निरवधिक भोगानु-भवानन्तरम् श्री परमेश्वर प्रीतये तिलतैलाक्तान् दीपान् घृताक्तान् वा सपादलक्षसंख्याकान् प्रज्वालितान् दीपान् श्रीविष्णवे समर्पयामि नमः । पृथक् देवताराधनपक्षे ब्रह्मणे, विष्णवे, ईश्वराय, देव्यै, गंगायै, तुलस्यै, सूर्याय, गणपतये समर्पयामीति विशेष वाक्यं नियोज्य समर्पयेत् । (बत्ती वालेर उखुले चलाउने चलन छ)

हवनम्


(यो मन्त्रले दशाम्स हवन, हवनको दशाम्स तर्पण र तर्पणको दशाम्स मार्जन गर्नुपर्दछ ।)

अग्नेनय सुपथा राये अस्मान विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ स्वाहा ॥

अथ कांस्यपात्र-रौप्यपात्रस्थ सुवर्ण वर्तिका दानमन्त्र

(पूर्णपात्र, दक्षिणा दान गरी विसर्जन गर्ने)

रौप्यपात्रस्थितं दीपं हेमवर्त्तिस-मन्वितम् । कांस्यपात्रेणसहितं ददामि व्रतपूर्त्तये । ततो गोदानम् । ततः पूर्णपात्रदानम् । ततो भूयसी दक्षिणादानम् । इदं व्रतम् मया देव कृतं प्रीत्यै तव प्रभो । न्यूनं सम्पूर्णतां यातु प्रसादात्तव केशव । गृहीतोऽस्मि व्रतं देव यद्यपूर्णोऽस्मि याम्यहम् । तन् मे भवतु सम्पूर्णं त्वत्प्रसादाजनार्दन । यस्य स्मृत्या च नामोक्त्या० । कायेन बाचेत्यादिना परमेश्वरं समर्प्य विसर्जनं कुर्यात् ।



॥ इति लक्षवर्तिका दीपदानविधिः समाप्त ॥

॥ श्रीगणेशाय नमः ॥

अथ पुरुषोत्तम पूजा-अपूपदानविधिः

आचम्य प्राणानायम्य कर्मपात्रं कृत्वा सङ्कल्पं कुर्यात् (कर्मपात्र बनाई सङ्कल्प गर्ने र दीप, कलश, गणेश पूजा गर्ने) तद्यथा- हरि ॐ तत्सत् देशकालादीन् संकीर्त्य..... मम श्री पुरुषोत्तम व्रताङ्गत्वेन दीप कलश गणेशपूजन पूर्वकं यथामिलितोपचारैः विष्णवादि श्रीपत्यन्तास्त्रयस्त्रिंशत् देवतापूजनपूर्वकं श्रीपुरुषोत्तमदेवतापूजनं चाहं करिष्ये । इति संकल्प्य दीपादीन् संपूज्य सुवर्णप्रतिमायां विष्णुपूजनं नामपूजनञ्च कुर्यात् । (विष्णु प्रतिमाको पूजा गर्ने)

ॐ विष्णवे नमः । ॐ जिष्णवे नमः । ॐ महाविष्णवे नमः । ॐ हरये नमः । ॐ कृष्णाय नमः । ॐ अधोक्षजाय नमः । ॐ केशवाय नमः । ॐ माधवाय नमः । ॐ रामाय नमः । ॐ अच्युताय नमः । ॐ पुरुषोत्तमाय नमः । ॐ गोविन्दाय नमः । ॐ वामनाय नमः । ॐ श्री संकर्षणाय नमः । ॐ श्रीकण्ठाय नमः । ॐ विश्वसाक्षिणे नमः । ॐ नारायणाय नमः । ॐ श्री मधुरिपवे नमः । ॐ श्री अनिरुद्धाय नमः । ॐ त्रिविक्रमाय नमः । ॐ वासुदेवाय नमः । ॐ श्री जगद्योनये नमः । ॐ श्री अनन्ताय नमः । ॐ श्री शेषशायिने नमः । ॐ संकर्षणाय नमः । ॐ श्री पद्युम्नाय नमः । ॐ श्री दैत्यारये नमः । ॐ श्री विश्वतोमुखाय नमः । ॐ जनार्दनाय नमः । ॐ श्रीधरावासाय नमः । ॐ श्री दामोदराय नमः । ॐ श्री मुरमर्दनाय नमः । ॐ श्री श्रीपतये नमः । इति सम्पूज्य धूपदीपनैवेद्यादिकं च कुर्यात् । (नैवेद्य चढाई धूपवत्ती गर्ने)

तत अपूपदान संकल्प

(थालमा मालपुवा राखी दान गर्ने)

पूर्व संकल्पसिद्धिस्तु अमुक गोत्र अमुक प्रवर अमुक वेदाध्यायी अमुक शर्माहं मम उत्तम फलावाप्ति विष्णवादि श्रीपत्यन्तास्त्रयस्त्रिंशत् देवता उद्दिश्य श्रीपुरुषोत्तम भास्कर प्रसन्नकामनया धर्मार्थिकाममोक्ष-चतुर्विध-पुरुषार्थ-सिद्धयर्थं सकलपृथ्वीदानजन्मफल- प्राप्यर्थं इदं आधारकांस्यपात्रं सोमदैवतं त्रयस्त्रिंशदपूपानि प्रजापतिदैवतानि घृतं समुद्रदैवतं सुवर्णं अग्नि दैवतं वस्त्रं वृहस्पतिदैवतं ताम्बूलं वनस्पति दैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय पुरुषोत्तमस्वरूपाय तुभ्यमहं सम्प्रददे ।

प्रार्थना

(नमस्कार गर्ने)

विष्णुरूप सहस्रांशु सर्वपापप्रणाशनः ॥ अपूपान्न प्रदानेन मम पापं व्यपोहतु ॥ नारायण जगद्बीप भास्करः प्रतिरूपकः ॥ दानेनाग्नेन पुत्राँश्च सम्पदश्चाभिवर्धय ॥ यस्य हस्ते गदाचक्रे गरुडो यस्य बाहनम् ॥ शंख करतले यस्य स मे विष्णुः प्रसीदतु ॥ कलाकाष्ठादिरूपेण निमेषघटिकादिना ॥ यः संहरति भूतानि तस्मै कालात्मने नमः ॥ कुरुक्षेत्रमयं देशः सूर्यपर्व द्विजो हरिः ॥ पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम ॥ मखानां च विशुद्धयर्थे पाप प्रशमनाय च ॥ पुत्रपौत्राभिबृद्धयर्थं प्रदत्तं तव भास्कर ! ॥ पुरुषोत्तमायः नमः । इति प्रार्थना ॥

भूयसी दक्षिणा

(दक्षिणा सङ्कल्प गर्ने र विसर्जन गर्ने)

अद्य श्रीपुरुषोत्तमप्रीत्यर्थं कृतस्य त्रयस्त्रिंशदपूपं-पूरितकांस्यपात्र घृत सूवर्ण-ताम्बूल-वस्त्रदानकर्मणः साङ्गतासिद्धयर्थं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय भूयसीदक्षिणात्वेन तुभ्यमहं सम्प्रददे ॥ इति दक्षिणां दत्वा समापयेत् ॥

॥ श्रीगणेशाय नमः ॥

अथ शिलान्यासविधिः

अथ कर्ता शुद्धासने उपविश्य दीपं प्रज्वाल्याऽऽचम्य सङ्कल्पं कुर्यात् (कर्मपात्र बनाई सङ्कल्प गर्ने)

ॐ अद्येत्यादि देशकालौ सङ्कीर्त्य अमुकगोत्र ... अहं अद्यकर्तव्य शिलान्यासकर्मणि दीपकलशगणेश-पूजनपूर्वकमेतद्गृहावासस्य स्थैर्य सिद्धये आयुरारोग्यपुत्रपौत्रद्विपदचतुष्पदधनधान्यादिसमृद्धये शिव प्राप्तये च नन्दादि पञ्चदेवताः पूजनं स्थापनं च करिष्ये। इति सङ्कल्प्य ब्राह्मणवरणं पुण्याहवाचनं च विधाय दीपं कलशं गणेशं च यथाविधि पूजयेत्। (दियो कलश, गणेशको पूजा गरी रक्षावन्धनको पूजा गर्ने)

ततो रक्षोहणमिति मन्त्रेण रक्षासूत्रमभिमन्त्र्य सम्पूज्य दिक्साधनं विधाय ईशानतः प्रादक्षिण्येन रक्षासूत्रेण संवेष्ट्य सुवर्णेन रेखां कृत्वा पञ्चशिलाः पञ्चइष्टका वा पञ्चताम्रकलशान् पञ्चदीपांश्च संस्थाप्य तत्र गृहमित चतुष्कोणेषु लोहकीलकं निदध्यात् अनेन मन्त्रेण – (पाँचओटा इँटा र कलश थाली ठिक पार्ने)

ॐ विशन्तु भूतले नागा लोकपालाश्च सर्वशः। अस्मिन् गृहेऽवतिष्ठन्तु आयुर्बलकराः सदा ॥

तत्रैव दध्यक्षतबलिं च दद्यात् (दही र अक्षताको वलि दिने)

ॐ अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः। बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ स्वाहा ॥

तत उत्खातभूमौ सर्षपान् विकिरेत् (सर्स्यूं छर्ने)

ॐ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा। स्थानं त्यक्त्वा तु तत्सर्वं यत्रत्यं तत्र गच्छतु ॥
ॐ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥
भूतप्रेतपिशाचाद्या अपक्रामन्तु रक्षसाः। स्थानादस्माद् व्रजन्त्वन्यत् स्वीकरोमि भुवं त्विमाम् ॥

इति भूतोत्सादनं कृत्वा, अर्घ्यं संस्थाप्य, तत आपो हिष्ठेति मन्त्रेण पञ्चगव्येन सर्वां भुवं प्रोक्षेत्–

(अर्घ्य स्थापना गरी पञ्चगव्य छर्कने)

ॐ आपो हिष्ठा मयोभुवस्ता नऽऊर्जे दधातन। महे रणाय चक्षसे। ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥ ॐ तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ। आपो जन यथा च नः ॥

तत उत्तरवृद्ध्या उपशिलासहिता (नन्दादि पाँच शिलाको पूजा गर्ने)

नन्दा भद्रा जया रिक्ता पूर्णा संज्ञकाः पञ्चशिलाः पञ्चगव्येन स्नापयित्वा कुशशय्यायां भद्रासने स्थापयित्वा कुङ्कुमचन्दनं लिप्त्वा, नन्दादिशिलासु क्रमेण ब्रह्मविष्णुरुद्रेशानसदाशिवानावाह्य (ॐ मनो जूतिरिति) प्रतिष्ठाप्य वस्त्रेणाच्छाद्य (सतिसम्भवे सप्तमृतिका, पञ्चकषाय, गोमूत्र, गोमय, समस्तपञ्चगव्य, व्यस्तपञ्चगव्य, व्यस्तपञ्चामृत, फल, रत्न, सुवर्ण, वृषशृङ्ग, तीर्थोदक, गन्धोदकयुतैः कलशोदकैः समन्त्रपाठ) नन्दाद्याः शिलाः

स्नापयेत्। ततो वस्त्रेण परिमार्ज्य सरलासने निवेश्य केसरादियुतेन सुगन्धिना चन्दनेनानुलिप्य सुवर्णादिशलाकया कुङ्कुमादिना नन्दाशिलायां पद्मं, भद्राशिलायां सिंहासनं, जयाशिलायां तोरणं छत्रं च, रिक्ताशिलायां कूर्मं, पूर्णाशिलायां चतुर्भुजं, विष्णुं च टङ्कोत्किरणमनुसृत्य लिखित्वा वस्त्रेणाच्छाद्याभिषिच्य नन्दाशिलायां ॐ भूर्भुवःस्वः ब्रह्मणे नमः। पूजार्थं त्वामावाहयामि स्थापयामि इत्यावाह्य ॐ ब्रह्मजज्ञानम्... । इति मन्त्रेण पाद्यादिभिरुपचारैः पूजयेत्। एवं क्रमेण भद्राशिलायां विष्णुमावाह्य ॐ इदं विष्णुः ... इति विष्णुं, जयाशिलायां रुद्रमावाह्य ॐ नमस्ते रुद्र... इति रुद्रम्, रिक्ताशिलायां ईश्वरमावाह्य ॐ तमीशानम् ... इति ईश्वरम्, पूर्णशिलायां सदाशिवमावाह्य ॐ नमः शम्भवाय इति सदाशिवं पूजयेत्। (पूर्वदेखि पूजा गर्ने)

ततः पूर्वादिक्रमेण इन्द्रादिदशदिक्पालानावाह्य ॐ त्रातारमिन्द्रम्... इत्यादि दिक्पालमन्त्रैः सम्पूज्य वलिं च दद्यात्।

बलिदानमन्त्रस्तु

(दहीअक्षता राखेर वत्ती वाल्ने)

ॐ इन्द्राय साङ्गाय सायुधाय सपरिवाराय सशक्तिकाय नमः, इमं सदीपबलिं समर्पयामि भो भो इन्द्र दिशं रक्ष रक्ष बलिं भक्ष भक्ष यजमानस्यायुष्कर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता वरदो भव। एवं क्रमेण अग्न्यादिदिक्पालेभ्यश्च बलिं दद्यात्।

तत उत्तरे क्षेत्रपालमावाह्य

(क्षेत्रपालको पूजा गर्ने)

ॐ क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि। मा त्वा हि ꣳसीन्मा माहि ꣳसीः।

इति मन्त्रेण सम्पूज्य बलिं दद्यात्। ततो नैर्ऋत्ये भूतादीन् सम्पूज्य बलिं दद्यात्।

ततो बास्तुभूमिं सम्पूज्य प्रार्थयेत्

(भूमिमा वास्तुको पूजा गर्ने)

ॐ विश्वं त्वं कमले भूते पृथिवि लोकधारिणि। यज्ञार्थे क्षोभिता देवि प्रसीद परमेश्वरि॥

ततो वास्तुपुरुषम्

(वास्तुपुरुषको पूजा गर्ने)

ॐ वास्तोष्पते प्रतिजानीहयस्मान्त्स्वावेशोऽअनमीवो भवा नः।
यत्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे॥

इति मन्त्रेण सम्पूज्य प्रार्थयेत्

(नमस्कार गर्ने)

ॐ वास्तोष्पते नमस्तेऽस्तु भूमिशय्यारत प्रभो। मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदा॥ (प्रत्येकलाई पूजा गर्ने)

ततः ॐ नन्दे इहागच्छ इह तिष्ठ। ॐ नन्दायै नमः। इति नन्दाशिलां सम्पूज्य एवमेव क्रमेण भद्राशिलां, जयाशिलां, रिक्ताशिलां, पूर्णाशिलामपि नाममन्त्रेण पूजयेत्। ततो नन्दादिशिलानामग्रे कलशस्थापनविधिना उत्तरोतरक्रमेण पञ्चकलशान् स्थापयित्वा तेषु सर्वेषु – आज्य, मधु, पारद, शैवालपञ्चरत्नानि प्रक्षिप्य – ॐ पद्माय नमः ॐ महापद्माय नमः। ॐ शङ्खाय नमः। ॐ विजयाय नमः। (ॐ मकराय नमः।) ॐ सर्वतोभद्राय नमः। इति नामन्त्रेणावाह्यय प्रतिष्ठापूर्वकं सम्पूज्य धूपदीपनैवेद्यादींश्च कृत्वा स्थाल्या कलशमुखं निदध्यात्।

(धूपबत्ती गरी नैवेद्य चढाउने)

अथ शिलान्यासः (शिलांको पूजा गर्ने)

तत्र ईशानादिक्रमेण पद्मादिकलशान् संस्थाप्य तेषामुपरि नन्दाद्या शिलाः न्यसेत् । तत्रक्रमः– प्रथमम् ईशाने आधारशिलां न्यस्य तस्या मध्यगर्ते अक्षतोपरि मध्वाज्यपारदपञ्चरत्नगर्भितं पिहितमुखं पद्मकलशं निधाय आधारशिलां सदाशिवरूपिणीं तेजोमयीं ध्यात्वा – (नमस्कार गर्ने)

ॐ एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञमव तेन यज्ञपतिं तेन मामव ॥ ॐ मनो जूतिर्जूषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमं दधातु । विश्वेदेवासऽइह मादयन्तामों ३ ॥ प्रतिष्ठ ॥ इति पठित्वा – (प्रतिष्ठा गर्ने)

ॐ भूर्भुवः स्वः आधारशिले सुप्रतिष्ठिता भव । इति प्रतिष्ठापयेत् । ततस्तां सम्पूज्य मृदा दृढीकृत्य तस्या वामे दीपं च विन्यसेत् । ततः पद्मकलशोपरि प्राक्शिरसं नन्दाशिलाम् – (वत्ती बाल्ने)

ॐ स्थिरो भव वीड्वङ्गऽआशुर्भव वाज्यर्वन् । पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहणः ॥ ॐ नाभिर्मे चितं विज्ञानं पायुर्मेपचितिर्भसत् । आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः ॥ जङ्घाभ्यां पद्भ्यां धर्मोस्मि विशि राजा प्रतिष्ठितः ॥ इति मन्त्राभ्यां संस्थाप्य गन्धादिभिः सम्पूज्य प्रार्थयेत् – (कलश राख्ने र नमस्कार गर्ने)

ॐ नन्दे त्वं नन्दिनीं पुंसां त्वामत्र स्थापयाम्यहम् । वेश्मनि त्विह सन्तिष्ठ यावच्चन्द्रार्कतारकाः ॥
आयुः कामं श्रियं देहि देववासिनि नन्दिनि । अस्मिन् रक्षा त्वया कार्या सदा वेश्मनि यत्नतः ॥

॥ इति नन्दाशिलास्थापनम् ॥

तत आग्नेयकोणे पूर्ववत् आधारशिलां विन्यस्य पिहितमुख महापद्मकलशं निधाय तदुपरि – (नमस्कार गर्ने)

ॐ भद्रङ्कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा ँ सस्तनूभिर्व्यशेमहि देवहितं यदायुः॥ ॐ वरुणस्योत्तम्भनमसि बरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽऋतसदन्यसि। वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ इति मन्त्रद्वयं पठित्वा भद्राशिलां स्थापयित्वा सम्पूज्य प्रार्थयेत् – (नमस्कार गर्ने)

ॐ भद्रे त्वं सर्वदा भद्रं लोकानां कुरु काश्यपि । आयुर्दा कामदा देवि सुखदा च सदा भव ॥

॥ इति भद्राशिलास्थापनम् ॥

ततो नैर्ऋत्यकोणे पूर्ववत् आधारशिलां स्थापयित्वा पिहितमुखं शङ्खकलशं निधाय तदुपरि– (नमस्कार गर्ने)

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ ॐ वरुणस्योत्तम्भनमसि ।

इति मन्त्रद्वयं पठित्वा जयाशिलां संस्थाप्य गन्धादिभिः सम्पूज्य प्रार्थयेत् – (नमस्कार गर्ने)

ॐ गर्गगोत्रसमुद्भूतां त्रिनेत्रां च चतुर्भुजाम् । गृहेऽस्मिन् स्थापयाम्यद्य जयां चारुविलोचनाम् ॥
नित्यं जयाय भूत्यै च स्वामिनो भव भार्गवि ॥ इति जयाशिलास्थापनम् ।

ततो वायव्यकोणे पूर्ववत् आधारशिलां विन्यस्य पिहितमुखं विजय (मकर) कलशं निधाय तदुपरि –

ॐ त्र्यम्बकं यजामहे । ॐ वरुणस्योतम्भनम् ... । इति मन्त्रद्वयं पठित्वा रिक्ताशिलां संस्थाप्य गन्धादिभिः सम्पूज्य प्रार्थयेत् – (नमस्कार गर्ने)

ॐ रिक्ते त्वं रिक्तदोषघ्ने सिद्धिभुक्तिप्रदे शुभे । सर्वदा सर्वदोषघ्नि तिष्ठास्मिंस्तत्र नन्दिनि ॥

॥ इति रिक्ताशिलास्थापनम् ॥

ततो वास्तुभूमेर्मध्ये पूर्ववत् आधारशिलां विन्यस्य पिहितमुखं सर्वतोभद्रकलशं निधाय तदुपरि –

ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहाऽइषमूर्ज ꣳशतक्रतो ॥

इति मन्त्रेण संस्थाप्य गन्धादिभिः सम्पूज्य प्रार्थयेत् – (नमस्कार गर्ने)

ॐ पूर्णे त्वं सर्वदा पूर्णं लोकानां कुरु काश्यपि । आयुर्दा कामदा देवि धनदा सुतदा तथा ॥
गृहाधारा वास्तुमयी वास्तुदीपेन संयुता । त्वामृते नास्ति जगतामाधारश्च जगत्प्रिये ॥

॥ इति पूर्णाशिलास्थापनम् ॥ (पञ्चकलश, थाली, शिला राखी माथिवाट पूजा गर्ने)

ततः पञ्चशिलासु अष्टधातुंश्च निक्षिप्य – ॐ नन्दायै नमः । इत्यादि क्रमेण पुनः पूजयेत् । ततः सदीपं पायसवलिं दध्यक्षतबलिं वा दत्वा हस्तौ पादौ प्रक्षाल्याचम्य शान्तिकाध्यायं पठित्वा आर्चायाय गां दद्यात् –

(पायसको या दही, अक्षताको बलि दिने र आचमन गरी गोदान गर्ने)

ॐ अद्येह ... गोत्र ... शर्माहं कृतैतत् ... शिलान्यासकर्मणः साङ्गतायै इमां गां (गोनिष्कयद्रव्यं वा) ... गोत्राय ... आचार्याय तुभ्यं संप्रददे ।

तथा अन्येभ्यो दक्षिणा दद्यात्

(दक्षिणासङ्कल्प गर्ने)

ॐ अद्येह ... गोत्रः ... शर्माहं कृतस्य शिलान्यासकर्मणो न्यूनातिरिक्तदोषपरिहारार्थम् इमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथाभागं विभज्य दातुं जले उत्सृजे ।

इति दक्षिणं दत्त्वा – (दक्षिणा दिने)

यान्तु देवेति देवान् विसृज्य कायेनवाचा इति कर्मेश्वरार्पणं कृत्वा यस्मस्मृत्येत्यादि प्रार्थयेत् ।



॥ इति शिलान्यासविधिः ॥

॥ श्रीगणेशाय नमः ॥

गृहप्रवेशविधिः

प्रधानगृहमध्ये धान्योपरि जलपूर्ण कलशं स्थापयेत् । ततो सुलग्ने-शुभमुहूर्ते सपुत्रपत्नीसहितो यजमानः नवनिर्मितगृहस्य प्राङ्गणे आसनोपरि समुपविश्य, आचम्य दीपं प्रज्वाल्य यद्देवेत्यादिना कर्मपात्रं कृत्वा सङ्कल्पं कुर्यात् -

(आचमन गरी कर्मपात्र बनाई सङ्कल्प गर्ने)

ॐ अद्येत्यादि देशकालौ सङ्कीर्त्य अमुक गोत्र ... प्रवरः ... अहं मम अद्य कर्तव्य गृहप्रवेश-कर्मणि दीपकलश-गणेशपूजनपूर्वकमेतद् गृहवासस्य स्थैर्यसिद्धये आयुरारोग्यपुत्र-पौत्रधनधान्यादिसमृद्धये शिवप्राप्तिकामनया नवनिर्मितगृहप्रवेशं करिष्ये, तदङ्गत्वेन ब्राह्मणवरणं पुण्याहवाचनं च करिष्ये । इति सङ्कल्प्य, अर्घ्यं संस्थाप्य पूजयेत् ।


(अर्घ्य स्थापना गरी दियो, कलश, गणेशको पूजा गर्ने र पुण्याहवाचन गर्ने)

ततो दीपं, कलशं, गणेशं च यथाविधि सम्पूज्य, ब्राह्मणवरणं पुण्याहवाचनादिकं विधाय ब्राह्मणं, कन्यां, गां पुरतः कृत्वा स्वेष्टदेवताप्रतिमां, दीपं, कलशं, गणेशं, नवफलपल्ल-वादियुतं सदुग्धजलपूर्णं कलशं हस्ताभ्यां समादाय धारां कुर्वन्नेकवारं गृहं प्रदक्षिणी च कृत्य स्वस्तिवाचनसहितमङ्गलगीतवादित्रतूर्यघोषादिकं कुर्वन् गृहं प्रविश्य स्थैर्यार्थं पुण्याहं शान्त्याध्यायं च वाचयित्वा ब्राह्मणादिभ्यः सम्पूज्य भोजयित्वा दक्षिणां दत्त्वाऽऽशिषो गृहीत्वा सुहृद्युक्तो भुञ्जीत ।

(कलश, दियो, गणेश, ब्राह्मण, कन्या र सधवा स्त्रीसहित स्वस्तिवाचन गरी गृह प्रदक्षिणा गरी भित्र पस्ने)

ततो गृहे यथाशुखं पञ्चरात्रं त्रिरात्रपर्यन्तं वा शयनाशनादि निरवच्छेदेन कर्तव्यम् ।


(अन्य पूजा पाठ गरी तीन दिन वस्नै पर्ने चलन छ)



॥ इति गृहप्रवेशविधिः ॥

अथ वास्तुपूजा

वास्तुमण्डपचक्र



इशानीमारभ्य पूजयेत् (ईशानदेखि पूजा गर्ने)

शिखिनमावाहयामि पूजयामि (रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियं जिन्व मवसे हूमये व्वयम्। पूषानोयथा व्वेद साम सद्वृधे रक्षिता पायुरदब्धः स्वस्तये। ॐ नमः शम्भवाय च मयो भवाय च नमः शङ्कराय च मयस्कराय च नमः। शिवाय च शिवतराय च ॥ ॐ भूर्भुवः स्वः शिखिन् इहागच्छ इहतिष्ठ यावत् मम पूजां करोमि तावत्तम् सुस्थिराभव सुप्रशन्नाभव वरदाभव पाद्यम्, अर्घ्यम्, आचमनीयम् पञ्चामृत स्नानम्, शुद्धोदक स्नानम्, इदं लेपनम् चन्दनम्, सिन्दूरम्, अक्षतान्, यवान् तिलान्, पुष्पाणि समर्पयामि ॐ भू शिखिने नमः रक्त ॥

पर्ज्जन्यमावाहयामि पूजयामि (पहेँलो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ शन्नोवातः पवता ꣳ शन्नस्तपतु सूर्ज्यः। शन्नः कनिक्रदद्देवः पर्ज्जन्यो अभिवर्षतु ॥ पर्जन्य इहागच्छ इहतिष्ठ मम पूजां गृहाण ..... ॐ भू पर्जन्याय नमः पीत।

जयन्तमावाहयामि पूजयामि (पहेँलो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ मर्म्माणि ते वर्म्मणाच्छादयामि सोमस्त्वा राजामृतेनानुवस्ताम्। उरोव्वरीयोव्वरुणस्ते कृणोतु जयन्तन्त्वानु देवा मदन्तु ॥ ॐ भूर्भुवः स्वः जयन्त इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू जयन्ताय नमः पीत।

कुलिशायुधमावाहयामि (पहेँलो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ महाँ ऽइन्दो व्वज्रहस्तः षोडशी शर्म्म यच्छतु हन्तु पाप्मानं योस्मान्द्वेष्टि। उपयाम गृहीतोसिमहेन्द्रायत्वैषते योनिर्महन्द्रायत्वा ॥ ॐ भूर्भुवः स्वः कुलिशायुध इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू कुलिशायुधाय नमः पीत।

सूर्य्यमावाहयामि (रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ बण्महाँ ऽअसि सूर्य्य बडादित्य महाँ असि। महस्ते सतो महिमापनस्य तेद्धादेवमहाँ ऽअसि। सूर्य इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू सूर्य्याय नमः रक्त।

सत्यमावाहयामि (सेतो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ व्रतेन दीक्षा माप्नोतिदीक्षयाप्नोतिदक्षिणाम् दक्षिणा श्रद्धामाप्नोतिश्रद्धया सत्यमाप्यते। ॐ भूर्भुवः स्वः सत्य इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू सत्याय नमः शुक्ल।

भृशमावाहयामि

(कालो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा ꣳ सस्तनुभिर्व्यशेमहि देवहितं यदायुः ॥ ॐ भूर्भुवः स्वः भृश इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू भृशाय नमः कृष्ण ।

आकाशम् आवाहयामि

(सेतो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ यावाङ्कशामधुमत्यश्विना सूतृतावती । तयायज्ञं मिमिक्षतम् ॥

ॐ भूर्भुवः स्वः आकाश इहागच्छ इहतिष्ठ मम पूजांगृहाण ... ॐ भूआकाशाय नमः शुक्ल ॥

वायोमावाहयामि

(ध्वासे अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ आनोनियुद्भिः शतिनीभिरध्वर ꣳ सदृस्रिणीभिरुपयाहियज्ञम् । व्वायोऽअस्मिन्त्सवने मादयस्व यूयं पातु स्वस्तिभिः सदानः ॥ ॐ भूर्भुवः स्वः वायो इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू वायवे नमः धूम्र ।

पूषाणमावाहयामि

(रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ पूषन्तव वते व्वयं नरिष्येम कदाचन । स्तोतारस्तऽइहस्पसि ॥ पुषन् इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ पुष्णे नमः रक्त ।

वितथमावाहयामि

(सेतो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ तत्सर्य्यस्य देवत्वन्त न्महित्त्वम्मद्धचा कर्तोर्व्वितत ꣳ सञ्जभार । यदेद युक्त हरितः सधस्था दाद्रात्री वासस्तनुते सिमस्मै ॥ ॐ भूर्भुवः स्वः वितथ इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू वितथाय नमः शुक्ल ।

गृहक्षतमावाहयामि

(पहेँलो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ अक्षन्नमी मदन्त ह्यव प्प्रियाऽअधूषत । अस्तोषत स्वभानवो व्विप्प्रान्नविष्ठया मती यो जान्विन्द्रते हरी ॥ ॐ भूर्भुवः स्वः गृहक्षत इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू गृहक्षताय नमः पीत ।

यमम्मावाहयामि

(कालो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ यमायत्वा मखायत्वा सूर्य्यस्यत्वा तपसे देवस्त्वा सविता मध्वानक्तु पृथिव्याः स ꣳ स्पृशस्पाहि । अर्चिरसि शोचिरसि तपोसि ॥ ॐ भूर्भुवः स्वः यम इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू यमाय नमः कृष्ण ।

गन्धर्वमावाहयामि

(रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ गन्धर्वस्त्वा व्विश्वावसुः परदधातु व्विश्वस्यारिष्टचै यजमानस्य परिधिरस्यग्नि रिडऽईडितः । मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्म्मणा व्विश्वस्यारिष्टचै यजमानस्य परिधिरस्यग्निरिडऽईडितः॥ ॐ भूर्भुवः स्वः गन्धर्व इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भूगन्धर्वाय नमः रक्त ।

भृङ्गारजंमावाहयामि

(कालो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ सौरी वलाका शार्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक्श्व विद्भौमी शार्दूलो वृकः पृदाकुस्त मत्र्यवे सरस्वते शुकः पुरुषवाक् ॥ ॐ भूर्भुवः स्वः भृङ्गराज इहागच्छ इहतिष्ठ मम पूजांगृहाण ... ॐ भू भृङ्गराजाय नमः कृष्ण ।

मृगमावाहयामि

(पहेँलो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ मृगोन भीमः कुचरो गिरिष्ठाः परावतऽआजगन्धा परस्याः । सृक ँस ँशाय पविमिन्द्रतिग्मं व्विशत्रूँ ताद्धि व्विमृधोनुदस्व ॥ ॐ भूर्भुवः स्वः मृग इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू मृगाय नमः पीत ।

पितृनावाहयामि

(रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन्पितरो मीमन्दतपितरो तीतृपन्त पितरः पितरः शुन्धध्वम् ॥ ॐ भूर्भुवः स्वः पितर इहागच्छत इहतिष्ठत मम पूजां गृहाण ... ॐ भू पितृभ्यो नमः रक्त ।

दौवारिकमावाहयामि

(रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ द्रविणोदाः पिपीषति जुहोत प्रचतिष्ठत । नेष्ट्रा दृतुभिरिष्यत ॥ ॐ भूर्भुवः स्वः दौवारिक इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू दौवारिकाय नमः रक्त ।

सुग्रीवमावाहयामि

(सेतो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ नीलग्रीवाः शितिकण्ठा दिव ँरुद्राऽउपश्रिताः । तेषा ँ सहस्रयोजनेवधन्वानितन्मसि ॥ ॐ भूर्भुवः स्वः सुग्रीव इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू सुग्रीवाय नमः शुक्ल ।

पुष्पदन्तमावाहयामि

(रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ नमोगणेभ्यो गणपतिभ्यश्चवो नमो नमो व्वातेभ्योव्व्रतपतिभ्यश्चवो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्चवो नमो नमो व्विरूपेभ्यो विश्वरूपेभ्यश्चवो नमो नमः ॥ ॐ भूर्भुवः स्वः पुष्पदन्त इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू पुष्पदन्ताय नमः रक्त ।

वरुणमावाहयामि (सेतो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ इमम्मे व्वरुणश्रुधी हव मद्या च मृडय । वामवस्युराचके ॥ ॐ भूर्भुवः स्वः वरुण इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू वरुणाय नमः शुक्ल ।

असुरमावाहयामि (पहेँलो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ ये रूपाणि प्रमितमुञ्चमानाऽअसुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो भरन्त्यग्निष्टाँल्लोका-त्प्रणुदात्त्यस्मात् ॥ ॐ भूर्भुवः स्वः असुर इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू असुराय नमः पीत ।

शेषमावाहयामि (कालो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ याऽइषवो यातुधानानां ये वा व्वनस्पतीरनु । येवा वटेषु शेरते तेभ्यः सर्प्पेभ्यो नमः ॥ ॐ भूर्भुवः स्वः शेष इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू शेषाय नमः कृष्ण ।

पापमावाहयामि (पहेँलो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ एतत्ते रुद्रा व्वसन्तेन परो मूजवतो तीहि । अवततधन्वा पिनाका वसः कृत्ति वासाऽअहि ꣳ सन्नः शिवोतीहि ॥ ॐ भूर्भुवः स्वः पाप इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू पापाय नमः पीत ।

रोगमावाहयामि (रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ द्रापेऽअन्धसस्पते दरद्र नील लोहित । आसाम्प्रजानाम्मेषाम्पशूनाम्माभेर्मारोङ् मोचनः किञ्चनाममत् ॥ ॐ भूर्भुवः स्वः रोग इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भूरोगाय नमः रक्त ।

अहिर्बुध्न्यमावाहयामि (रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ नमोस्तु सर्प्पेभ्यो ये केच पृथिवीमनु । येऽअन्तरिक्षे येदिवि तेभ्यः सर्प्पेभ्यो नमः ॥ ॐ भूर्भुवः स्वः अहिर्बुध्न्य इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ अहिर्बुध्न्याय नमः रक्त

मुख्यमावाहयामि (रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ अवतत्यधनुष्ट्व ꣳ सहस्राक्ष शतेषु धे । निशीर्यशल्यानाम्मुखा शिवोनः सुमना भव ॥

ॐ भूर्भुवः स्वः मुख्य इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू मुख्याय नमः रक्त ।

भल्लाटमावाहयामि (कालो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ इमारुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहेमतीः । यथाशमसद्विपदे चतुष्पदे व्विश्वं पुष्टं ग्रामेऽअस्मिन्ननातुरम् । ॐ भूर्भुवः स्वः भल्लाट इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू भल्लाटाय नमः कृष्ण ।

सोमायमावाह्यामि

(कालो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ सोम ँ राजानमवसेग्नि मन्वारभामहे । आदित्यान्विष्णु ँ सूर्य्य ब्राह्मणं च बृहस्पति ँ स्वाहा ॥ ॐ भूर्भुवः स्वः सोम इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू सोमाय नमः कृष्ण ।

सर्प्पान्मावाह्यामि

(कालो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ नमोस्तु सर्पेभ्यो ये केच पृथिवीमनु । येऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः ॥

ॐ भूर्भुवः स्वः सर्प्प इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू सर्प्पेभ्यो नमः कृष्ण ।

अदितिमावाह्यामि

(पहेँलो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता सपिता स पुत्रः । व्विश्वे देवाऽअदितिः पञ्चजनाँ-ऽअदितिर्ज्जातमदितिर्जनित्वम् ॥ ॐ भूर्भुवः स्वः अदिते इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू अदितये नमः पीत ।

दितिमावाह्यामि

(पहेँलो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ इडऽएह्यदितऽएहि काम्याऽएत ॥ मयिवः कामधरणं भूयात् ॥

ॐ भूर्भुवः स्वः दिते इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू दितये नमः पीत ।

आपः आवाह्यामि

(सेतो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेननो घृतप्वः पुनन्तु ॥ विश्व ँ हिरिप्पम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूतऽएमि ॥ ॐ भूर्भुवः स्वः आप इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू अद्भ्यो नमः शुक्ल ।

सावित्रं आवाह्यामि

(सेतो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ उपयामगृहीतोसि सवित्रोसि चनोधाश्चनोधाऽ असि चनो मयिधेहि । जिन्वयज्ञं जिन्व यज्ञपतिम्भगाय देवायत्वा सवित्रे ॥ ॐ भूर्भुवः स्वः सावित्रे इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू सावित्राय नमः शुक्ल ।

जयन्तं मावाह्यामि

(सेतो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ मर्म्माणिते व्वर्म्मणा च्छादयामि सोमस्त्वा राजा मृतेनानु वस्ताम् । उरोर्व्वरीयो व्वरुणस्ते कृणोतु जयन्तन्त्वानु देवामदन्तु ॥ ॐ भूर्भुवः स्वः जयन्त इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ जयन्ताय नमः शुक्ल ।

रुद्रमावाह्यामि

(सेतो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ नमस्ते रुद्रमन्यवऽ उतोत ऽइषवे नमः बाहुभ्यामुतते नमः ॥

ॐ भूर्भुवः स्वः रुद्र इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू रुद्राय नमः रक्त ।

अर्य्यमाणमावाहयामि (कालो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ यदद्य सूरऽउदितेनागा मित्रोऽर्य्यमा ॥ सुवाति सविता भगः ॥

ॐ भूर्भुवः स्वः अर्यमन् इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू अर्य्यमणे नमः कृष्ण ।

सावितारमावाहयामि (रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ व्विश्वानि देव सवितर्दुरितानि परासुव ॥ यद्भद्रन्तन्नऽआसुव ॥

ॐ भूर्भुवः स्वः सवितारं इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू सविताराय नमः रक्त ।

विवस्वतमावाहयामि (सेतो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ विवस्वन्नादित्यैषते सोम पीथस्तस्मिन्मत्स्व श्रदस्मै नरोव्वचसे दधातन यदाशीर्दा दम्पतिव्वाममश्नुतः । पुमान्नपुत्रो जायते व्विन्दते व्वस्वधा व्विश्वाहारपऽएधते गृहे ॥ ॐ भूर्भुवः स्वः विवस्वन्तम् इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू विवस्वते नमः शुक्ल ।

विवुधाधिपमावाहयामि (रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ सबोधि सूरि र्मधवा व्वसुपते व्वसुदावन् । युयोद्धयस्म द्वेष ꣳसि व्विश्वकर्म्मणे स्वाहा ॥

ॐ भूर्भुवः स्वः विवुधाधिप इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू विवुधाधिपाय नमः रक्त ।

मित्रमावाहयामि (सेतो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ तन्मित्रस्य व्वरुणस्याभिचक्षे सूर्य्योरूपं शृणुते द्योरुपस्थे। अनन्तमन्नयद्बृशदस्य पाजः कृष्णमन्नयद्धरितः सम्भरन्ति ॥ ॐ भूर्भुवः स्वः मित्र इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू मित्राय नमः श्वेत ।

राजयक्ष्माणमावाहयामि (रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ अभिगोत्राणि सहसा गाहमानो दयो व्वीरः शतमन्न्युरिन्द्रः । दुश्च्यवनः पृतनाषाढ युद्धयोस्माक ꣳ सेनाऽअवतुप्प्रयुत्सु ॥ ॐ भूर्भुवः स्वः राजयक्ष्मन् इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू राजयक्ष्मणे नमः रक्त ।

पृथिवीधरमावाहयामि (रातो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ स्योनापृथिवीनो भवान्नृक्षरा निवेशनि । यच्छानः शर्म्म सप्प्रथाः ॥

ॐ भूर्भुवः स्वः पृथ्वीधर इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू पृथ्वीधराय नमः रक्त ।

आपवत्समावाहयामि (सेतो अक्षता, फूल, चन्दनले पूजा गर्ने)

ॐ आते व्वत्सो मनो यमत्परमाच्चित्सधस्थात् ॥ अग्नेत्वां कामया गिरा ॥

ॐ भूर्भुवः स्वः आपवत्स इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू आपवत्साय नमः श्वेत ।

ब्रह्मन् आवाहयामि

(रातो चन्दन, अक्षता, फूलले पूजा गर्ने)

मध्ये – ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विशीमतः सुरुचोव्वेनऽआवः । सबुध्न्याऽउपमाऽअस्य व्विष्ठाः सतश्च योनिमसतश्च विवः ॥ ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू ब्रह्मणे नमः रक्त ।

वृषवास्तू पूजयेत्

(चन्दन, अक्षता, फूलले पूजा गर्ने)

ॐ वास्तोष्पते प्रतिजानीह्मस्मान्स्वावेशो अनमीवो भवानः । यत्वे महे प्रति तन्नो जुषस्व शन्नो भव द्विपदेशं चतुष्पदे । ॐ भूर्भुवः स्वः वास्तोस्पतये नमः ।

प्राणप्रतिष्ठा सङ्कल्प

(प्राणप्रतिष्ठा सङ्कल्प गर्ने)

हरिः ॐ तत्सत् पूर्व सङ्कल्प सिद्धिरस्तु अद्येह देशकालौ सङ्कीर्त्य अमुकगोत्रः अमुकशर्माहं (वर्मा, गुप्तो) अस्यां वास्तुमूर्तौ अवघातादिदोषपरिहारार्थं अग्न्युत्तारणं देवतासान्निध्यार्थं च प्राणप्रतिष्ठां करिष्ये ॥

प्राणप्रतिष्ठा

(प्राणप्रतिष्ठा गर्ने)

ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ क्षँ हँ सः सोऽहं अस्य वास्तेदेवस्य प्राणा इहप्राणाः । पुनः ॐ आँ ह्रीं सोऽहं अस्य वास्तेदेवस्य नीव इह स्थितः । पुनः ॐ आँ ह्रीं अस्य वास्तेदेवस्य वाङ्मनस्त्वक् चक्षुः श्रोत्रजिह्वा घ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥

इशानकोणे

(ईशान कोणमा पूजा गर्ने)

ॐ ईशावास्यमिद ꣳ सर्वंयत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मागृधः कस्यस्विद्धनम् ।

ॐ भूर्भुवः स्वः चरकि इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू चरक्यै नमः ।

आग्नेयकोणे

(आग्नेयकोणमा पूजा गर्ने)

ॐ अक्षराजायकितवं कृताया दिनव दर्शं त्रैतायै कल्पिनन्द्वापरायाधि कल्पिन मास्कन्दाय सभास्थाणुं मृत्यवे गोव्यच्छ मंतकाय गोघातं क्षुधे योगां विकृन्तं तं भिक्षमाणऽउपतिष्ठति दुष्कृताय चरकाचार्यं पाप्मने श्रृलगम् ॥ ॐ भूर्भुवः स्वः विदारिके इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू विदार्य्यै नमः ।

नैऋत्यकोणे

(नैर्ऋत्यकोणमा पूजा गर्ने)

ॐ नमः स्रुत्यायच पत्थ्यायच नमः काटचायच नीप्यायच नमः कूल्यायच सरस्यायच नमो नादेयायच वैशन्तायच ॥ ॐ भूर्भुवः स्वः पुतने इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू पुतनायै नमः ।

वायव्यकोणे

(वायव्यमा पूजा गर्ने)

ॐ यक्ष्यास्ते घोरऽआसं जुहोम्येषाम्वन्धानामव सर्जनाय । यांत्वा जनोभूमि रिति प्रमंदते निर्ऋतिं त्वाहं परिवेद विश्वतः ॥ ॐ भूर्भुवः स्वः पापराक्षसी इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू पापराक्षस्यै नमः ।

पूर्वे

(पूर्वमा स्कन्दको पूजा गर्ने)

ॐ यदक्रन्दः प्रथमं जायमानऽउद्यन्त्समुद्रादुतवा पुरीषत् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महिजातन्तेऽअर्व्वन् ॥ ॐ स्कन्द इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू स्कन्दाय नमः ।

दक्षिणे

(दक्षिणमा अर्य्यमाको पूजा गर्ने)

ॐ यदद्यसूरऽउदिते नागामित्रोऽअर्य्यमा । सुवाति सविता भगत्रा ॥ ॐ भूर्भुवः स्वः अर्य्यमन् इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू अर्य्यम्णे नमः ।

पश्चिमे

(पश्चिममा जृम्भको पूजा गर्ने)

ॐ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहा वक्रन्दाय स्वाहा प्रोक्षते स्वाहा प्रप्रोथाय स्वाहा गंधाय स्वाहा घ्राताय स्वाहा निविष्ठाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहा सीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजत स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृताय स्वाहा स ६ हानाय स्वाहो पस्थिताय स्वाहा यनाय स्वाहा प्राणाय स्वाहा ॥ ॐ जृम्भक इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू जृम्भकाय नमः ।

उत्तरे

(उत्तरमा पिलिपिच्छको पूजा गर्ने)

ॐ कास्विदासीत्पूर्व चित्तिः कि स्विदासीद्धहद्वयः । कास्विदासीत्पिलिप्पिला कास्विदासीत्पिशंगिला ॥ ॐ भूर्भुवः स्वः पिलिपिच्छ इहागच्छ इहतिष्ठ मम पूजां गृहाण ... ॐ भू पिलिपिच्छाय नमः ।

पूर्वादि क्रमेण षोडशोपचारै पूजयेत्

(पूर्वदेखि क्रमैले षोडशोपचारले पूजा गर्ने)

इन्द्र, अग्नि, यम, नैर्ऋत्य, वरुण, वायु, कुवेर, ईशान, ब्रह्मा, अनन्त, अष्ट दिक्पाल, वास्तुपुरुष षोडशोपचारै पुजयत् ।

ततोऽग्निस्थापनोक्तं उत्तराङ्गहोमं समाप्य

(फेरि वास्तुपुरुषको षोडशोपचारले पूजा गरी हवन गरेर अग्निस्थापना अनुसार गर्ने)

विश्वकर्मा पूजा

(कलश, दियो, गणेश पूजा गरेर प्राणप्रतिष्ठा गर्ने)

अङ्गन्यास

(अङ्गन्यास गर्ने)

ॐ वां हृदयाय नमः । ॐ वीं शिरसे स्वाहा । ॐ वूं शिखायै वषट् । ॐ वैं कवचाय हुम् । ॐ वौं नेत्रत्रयाय वौषट् । ॐ वः अस्त्राय फट् । ॐ वां अंगुष्ठाभ्यां नमः । ॐ वीं तर्जनीयां नमः । ॐ वूं मध्यमाभ्यां नमः । ॐ वैं अनामिकाभ्यां नमः । ॐ वौं कनिष्ठिकाभ्यां नमः । ॐ वः करतलकरपृष्ठाभ्यां फट् ।

तत्रादौ विनियोग

(विनियोग गर्ने)

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्माविष्णुमहेश्वरा ऋषयः, ऋग्यजुः सामाथर्वणः छन्दांसि, चैतन्यरूपा अपरा प्राणशक्तिर्देवता, आं बीजं, ह्रीं शक्तिः, क्रों कीलकम्, श्रीविश्वकर्मदेवस्य प्राणप्रतिष्ठापने विनियोगः ।

करन्यासः

(करन्यास गर्ने)

१- ॐ आं ह्रीं क्रों अं कं खं गं घं ङं क्रों ह्रीं आं पृथिव्यप्तेजोवाय्याकाशात्मने आं अंगुष्ठाभ्यां नमः । २ – ॐ आं ह्रीं क्रों इं चं छं जं झं ञं क्रों ह्रीं आं शब्दस्पर्शरस–गन्धात्मने ईं तर्जनीभ्यां नमः । ३– ॐ आं ह्रीं क्रों उं टं ठं डं ढं णं क्रों ह्रीं आं श्रोत्रत्वक्-चक्षुर्जिह्वा–प्राणात्मने ऊं मध्यमाभ्यां नमः । ४– ॐ आं ह्रीं क्रों एं तं थं दं धं नं क्रों ह्रीं आं वाकपाणिपादा पायूपस्थाने ऐं अनामिकाभ्यां नमः । ५- ॐ आं ह्रीं क्रों ओं पं फं वं भं मं क्रों ह्रीं आं वचनादानगति - विसर्गानिन्दात्मने औं कनिष्ठिकाभ्यां नमः । ६- ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं क्षं क्रों ह्रीं आं मनोऽहंकारचित्तविज्ञानात्मने अः करतलकरपृष्ठाभ्यां नमः ।

प्राणप्रतिष्ठा

(प्राणप्रतिष्ठा गर्ने)

ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं क्षं अं अः क्रों ह्रीं आं श्रीविश्वकर्मदेवस्य इह प्राणा इह प्राणाः ।
ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं क्षं अं अः क्रों ह्रीं आं श्रीविश्वकर्मदेवस्य जीव इह स्थितः ।
ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं क्षं अं अः क्रों ह्रीं आं श्रीविश्वकर्मदेवस्य सर्वेन्द्रियाणि वाङ–मनः त्वक्-चक्षुः श्रोत्र-जिह्वा-घ्राण-पाणिपादापायूपस्था इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।

ध्यानम्

(ध्यान गर्ने)

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः,
पाशंकोदण्डमिक्षूद्भवगुणमणि-मय्यंकुशं पञ्चबाणान् ।
बभ्राणस्रक्कपालं त्रिनयनलसितापीनवक्षेरुहाढ्यां,
देवीबालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परान्नः ॥

प्रतिष्ठा

(पुनः प्रतिष्ठा गर्ने)

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ँ समिमं दधातु । विश्वेदेवा स इह मादयन्तामों ३ प्रतिष्ठ ॥ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च । अस्यै देवत्वमर्चायै मामहेति च कश्चन स्वाहा । अस्मिन् कलशे (वेद्यां वा) श्रीविश्वकर्मन् ! सुप्रतिष्ठितो वरदो भव ।

ध्यानम्

(ध्यान गर्ने)

ॐ दशपाल महावीर ! सुचित्रकर्मकारक । विश्वकृत् विश्वधृक् च त्वं वसना मानदण्डधृक् ॥ भो विश्वकर्मन् ! इहागच्छ इह तिष्ठ, अत्राधिष्ठानं कुरु कुरु मम पूजां गृहाण ।

आवाहनम्

(आवाहन गर्ने)

आवाहयामि देवशं विश्वकर्माणमीश्वरम् । मूर्त्ताऽमूर्तकरं देवं सर्वकर्त्तारमद्भुतम् ॥
त्रैलोक्य-सूत्रकर्त्तारं द्विभुजं विश्वदर्शितम् । आगच्छ विश्वकर्मस्त्वं यज्ञेऽस्मिन् सन्निधो भव ॥

आसनम्

(कुश राख्ने)

सुवर्णरचितं देव ! दिव्यास्तरणशोभितम् । आसनं हि मया दत्तं गृहाणाङ्गिरसो सुत ! ॥

पाद्यम्

(जल चढाउने)

इदं पाद्यं मया दत्तं सर्वसौगन्धसंयुतम् । गृहीत्वा विश्वकर्मेश प्रसन्नो भव वास्तुज ! ॥
दिव्यौषधिरसोपेतं गन्ध-पुष्पाऽक्षतैः सह । गृहाणाऽर्घ्यं मया दत्तं विश्वकर्मन् कृपां कुरु ॥

आचमनीयम्

(जल चढाउने)

सुगन्धवासितं दिव्यं निर्मलं सलिलं विभो । गृहाणाऽऽचमनं सौम्ये ! विश्वकर्मन् ! कृपां कुरु ॥

मधुपर्कम्

(मह, दही, घ्यू मिसाएर चढाउने)

नमो देवाय भद्राय गृहनिर्माणशालिने ! । मधुपर्कं गृहाणेदं विश्वकर्मन् सुधोपमम् ॥

पञ्चामृतम्

(पञ्चामृत चढाउने)

पञ्चामृतं मयाऽऽनीतं पयो दधि घृतं मधु । शुद्धं शर्करया युक्तं विश्वकर्मन् ! प्रतिगृह्यताम् ॥

गंगाजलम्

(पञ्चामृत चढाउने)

गंगाजलं समानीतं सर्वपापहरं शुभम् । पूतं पयोऽथवा दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥

यज्ञोपवीतम् – वस्त्रम्

(जनै र कपडा चढाउने)

स्वदेशनिर्मितं वस्त्रं खद्दरं पावनं परम् । शरीराच्छादनार्थाय गृह्यतां सूत्रवर्द्धन ! ॥
नवभिस्तन्तुर्भियुक्तं त्रिगुणं देवतामयम् । उपवीतं मया दत्तं गृह्यतां धर्मनन्दन ! ॥

आभूषणानि

(गहनाहरू चढाउने)

शिरस्कं कुण्डलं हारं सोत्तरीयं तथैव च । अलंकारं प्रगृह्याऽत्र विश्वकर्मन् ! प्रसीद वै ॥
श्रीखण्डं चन्दनं दिव्यं गन्धाढचं सुमनोहरम् । विलेपनं विधानज्ञ ! गृह्यतां चन्दनं शुभम् ॥

अक्षता

(अक्षता चढाउने)

अक्षताश्च कलानाथ ! कुङ्कुमाक्ताः सुशोभिताः । मया निवेदिता भक्त्या गृहाण वास्तुनन्दन ! ॥

पुष्पमालाम्

(माला चढाउने)

मल्लिकादि सुगन्धीनि मालत्यादीनि वै विभो ! । मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ॥
सौरभाणि सुमाल्यानि सुपुष्प - रचितानि वै । मया निवेदितान्यत्र शिल्पाचार्य ! सुगृह्यताम् ॥

तुलसीपत्राणि, विल्वपत्राणि

(तुलसी, विल्वपत्र चढाउने)

कोमलानि सुगन्धीनि मञ्जरी – संयुतानि च । तुलस्याः सदलान्यद्य विश्वकर्मन् ! प्रगृह्यताम् ॥
त्रिदलैर्बिल्वपत्रैश्च कोमलैः शङ्करप्रियैः । तव पूजां करिष्यामि प्रसीद शिल्पिनाम्वर ! ॥

धूपम्

(धूप बाल्ने)

वनस्पति-रसोद्भूतं सुगन्धाढचं मनोहरम् । धूपं गृहाण कर्मेश ! द्रुतकर्म परायण ! ॥

दीपम्

(बत्ती बाल्ने)

घृतवर्ति-समायुक्तं कर्पूरादि-समन्वितम् । दीपं गृहाण देवेश ! ह्यन्धकार-विनाशकम् ॥

नैवेद्यम्

(नैवेद्य चढाउने)

पुप-मोदक-संयाव-पयः पक्वादिकं वरम् । निर्मितं बहुसत्कारैर्नैवेद्यं प्रतिगृह्यताम् ॥

शुद्धोदकेन

(शुद्ध जल चढाउने)

शीतलं स्वादु शुद्धं च तृषा-तृप्तिकरं जलम् । सर्वदैव स्वतृप्त्यर्थं विश्वकर्मन् ! प्रगृह्यताम् ॥
सर्वौषधिरसोपेतं पवित्र सरिता-जलम् । आचम्यं च मया दत्तं गृहाण देवताप्रिय ! ॥

फलम् नैवेद्यम्

(फलफूल नैवेद्य चढाउने)

इदं फलं मया देव ! स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

ताम्बूलम्

(पान मसला चढाउने)

ताम्बूलं पूगसंयुक्तं चूर्णं खादिर-संयुतम् । लवङ्गादियुतं देव ! गृह्यतां ब्रह्म-वंशजः ! ॥

दक्षिणा द्रव्यम्

(द्रव्य चढाउने)

हिरण्यगर्भ-गर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

हवनम्

(घ्यू हवन गर्ने)

ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम । ॐ इन्द्राय स्वाहा, इदं इन्द्राय न मम । ॐ अग्नये स्वाहा, इदमग्नये न मम । ॐ सोमाय स्वाहा, इदं सोमाय न मम । ॐ भूः स्वाहा, इदमग्नये न मम । ॐ भूवः स्वाहा, इदं वायवे न मम । ॐ स्वः स्वाहा, इदं सूर्याय न मम । एताः सप्त – महाव्याहृतयः (घृताहुतिः) ।

ततोऽअग्निस्थापनोक्तं उत्तराङ्ग होम समाप्य

(अग्निस्थापना अनुसार गर्ने)

चरु हवनम्

(चरु हवन गर्ने)

ॐ विश्वकर्मणे नमः स्वाहा । ॐ सूर्याय नमः स्वाहा, चन्द्रमसे नमः स्वाहा, भौमाय नमः स्वाहा, बुधाय नमः स्वाहा, गुरवे नमः स्वाहा, शुक्राय नमः स्वाहा, शनैश्चराय नमः स्वाहा, राहवे नमः स्वाहा, केतुभ्यो नमः स्वाहा, पञ्चलोकपालेभ्यो नमः स्वाहा, दशदिक्पालेभ्यो नमः स्वाहा, इष्टदेवेभ्यो नमः स्वाहा, कुलदेवेभ्यो नमः स्वाहा, ग्रामदेवेभ्यो नमः स्वाहा, सर्वेभ्यो देवेभ्यो नमः स्वाहा, सर्वाभ्यो देवीभ्यो नमः स्वाहा ।

पूर्णपात्रादिदानम् विसर्जनञ्च

(पूर्णपात्र, दक्षिणा दान गरी विसर्जन गर्ने)

ततः पूर्णपात्रं, ब्राह्मणेभ्यो दक्षिणां च दत्वा **यान्तुदेवेति** देवान् विसृज्य, **कायेन वाचेति** कर्मेश्वरार्पणं कृत्वा कर्म समापयेत् ।



॥ इति विश्वकर्म पूजा ॥

।। श्रीगणेशाय नमः ।।

अदुःख नवमीपूजाविधिः

(कर्मपात्र बनाई गोदान गरी दियो, कलश, गणेश पूजा गर्ने)

प्राणप्रतिष्ठा (थालीमा गौरीको प्रतिमा राखी प्राणप्रतिष्ठा गर्ने)

ॐ एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञ मवतेन यज्ञ पतिन्तेन मा मव ।
ॐ भुर्ब्भुवः स्वः गौरीमाता इहागच्छ इहतिष्ठ सुप्रतिष्ठिता वरदा भवः ॥
ओं आँ ह्रीं क्रों यँ रँ लँ वँ सँ षँ सँ हँ सँ सोहँ श्री गौरी प्राणाः सर्वेन्द्रियाणि च इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥
ॐ मनोजुतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳसमिमन्दधातु ।
विश्वेदेवासऽइह मादयन्तामों ३ प्रतिष्ठ ॥ इति मन्त्रेणा प्राणप्रतिष्ठां कुर्यात् ।

आवाहनम् (आवाहन गर्ने)

गौरीं दुःखहरां देवीं शिवस्यार्द्धाङ्गधारिणीम् । सुनीलवस्त्रसंयुक्तामुमामावाह्यम्यहम् ॥
गौरीमाता समागच्छ पद्मनाभ पदादिह । षोडशोपचार पूजेयं त्वदर्थे देवि संभृता ॥
आवाहनम् समर्पयामि ॐ गौर्यै नमः ।

ध्यानम् (फूल अक्षता लिई नमस्कार गर्ने)

दिव्यपात्रधरां देवीं विभूतिं च त्रिलोचनीम् । दुग्धान्नदाननिरतां गौरीं त्वां चिन्तयाम्यहम् ॥
शुभ्रवस्त्र परिधानां मुक्ता भरण भूषिताम् । पङ्कजासन संस्थानां स्मेरानन सरोरूहाम् ॥
ध्यानम् समर्पयामि ॐ गौर्यै नमः ।

आसनम् (कुश राख्ने)

कुशद्वयासनम् ॐ पुरुषऽएवेदꣳसर्व्वंयद्द्भूतँयच्चभाव्यम् । उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥
नानारत्नसमायुक्तं कार्तस्वरविभूषितम् । आसनं देवदेवेश गृहाण परमेश्वरी ॥
आसनं समर्पयामि गौर्यै नमः ॥

पीठपूजा (पूर्वदेखि क्रमैले पूजा गर्ने)

पूर्वे – ॐ ऐन्द्रयै नमः । आग्नेय – ॐ कौमार्यै नमः । दक्षिणे – ॐ ब्राह्म्यै नमः । नैर्ऋत्य – ॐ वाराह्यै नमः । पश्चिमे – ॐ चामुण्डायै नमः । वायव्ये – ॐ वैष्णव्यै नमः । उत्तरे – ॐ माहेश्वर्यै नमः । ईशाने – ॐ वैनायक्यै नमः ।

षोडशोपचारेण पूजनम् (बीचमा पूजा गर्ने)

ॐ मण्डूकाय नमः, ॐ आधारशक्तये नमः, ॐ कुर्माय नमः, ॐ वराहाय नमः, ॐ सुधासिन्धवे नमः,

ॐ कालाग्निरुद्राय नमः, ॐ प्रकृत्यै नमः, ॐ शेषाय नमः, ॐ पृथिव्यै नमः, ॐ रत्नद्वीपाय नमः, ॐ स्वर्णसिंहासनाय नमः, ॐ श्वेतचामराय नमः, ॐ ज्ञानाय नमः, ॐ ऐश्वर्याय नमः, ॐ अज्ञानाय नमः, ॐ सितच्छत्राय नमः, ॐ धर्माय नमः, ॐ वैराग्याय नमः, ॐ अधर्माय नमः, ॐ अवैराग्याय नमः, ॐ अनैश्वर्याय नमः, ॐ अनन्ताय नमः, ॐ संविन्नालेभ्यो नमः, ॐ विकृतिमय केशरेभ्यो नमः, ॐ पञ्चाशद्वर्ण बीजाढय कर्णिकायै नमः, ॐ सत्त्वाय नमः, ॐ तमसे नमः, ॐ आनन्द कन्दाय नमः, ॐ प्रकृतिमय पत्रेभ्यो नमः, ॐ रजसे नमः, ॐ अन्तरात्मने नमः, ॐ आँ आत्मने नमः, ॐ ह्रीँ ज्ञानात्मने नमः, ॐ पँ परमात्मने नमः, ॐ कँ कला तत्त्वाय नमः, ॐ माँ माया तत्त्वाय नमः, ॐ विँ विद्या तत्त्वाय नमः, शँ शक्तितत्त्वाय नमः, ॐ शिँ शिवतत्त्वाय नमः, ॐ सँ सदाशिवतत्त्वाय नमः, ॐ ईश्वर तत्त्वाय नमः, ॐ नमो भगवत्यै सकल शक्ति युतायै योग पीठात्मिकायै श्री परम देव्यै नमः ।

पूर्वादि क्रमेण पूजनम् (पूर्वदेखि क्रमैले पूजा गर्ने)

पूर्वे – ॐ श्रीं विभूत्यै नमः । आग्नेय – ॐ श्रीं उन्नत्यै नमः । दक्षिणे – ॐ श्रीं कान्त्यै नमः । नैर्ऋत्य – ॐ श्रीं सृष्टयै नमः । पश्चिमे – ॐ श्री कृत्यै नमः । वायव्ये – ॐ श्रीं सन्तत्यै नमः । उत्तरे – ॐ श्रीं पुष्टयै नमः । ईशाने – ॐ श्रीं उत्कृष्टयै नमः । मध्य – ॐ श्रीं ऋद्धयै नमः ।

पुनः आसनम् (फेरी कुश राख्ने)

प्रसन्नवदने मातर्नित्यं देवर्षिसंस्तुते । मया भावेन यद्दत्तं पीठं तत्प्रतिगृह्यताम् ॥

आसनं समर्पयामि श्री गौर्यै नमः ।

पाद्यम् (जल चढाउने)

ॐ गङ्गादि सलिला धार तीर्थ तोयाभि मन्त्रितम् । दूरयात्रा श्रमहरं पाद्यम्मे प्रति गृह्यताम् ।

पाद्यम् समर्पयामि श्री गौर्यै नमः ।

अर्घ्यम् (अर्घ चढाउने)

नमे जन्मनि दारिद्रचं दौर्भाग्यं नच जन्मनि । गौरीमाता नमस्तुभ्यम् अर्घ्यम्मे प्रतिगृह्यताम् ।

अर्घ्यं समर्पयामि श्री गौर्यै नमः ॥

आचमनीयम् (जल चढाउने)

आचम्य जगदाधारे सिद्धिलक्ष्मि जगत्प्रिये । चपले देवि दत्तं ते मुखमाचमनीयकम् ॥

आचमनीयमं समर्पयामि श्री गौर्यै नमः ॥

मधुपर्कम् (मह, घिउ र दही मिसाएर चढाउने)

ॐ दधि क्षौद्रमिदं शुभ्रं कपिलायाः सुशोभनम् । मधुपर्कं गृहाणेदं सुस्वादु सुचिरं शुभम् ॥

मधुपर्कं समर्पयामि श्री गौर्यै नमः ।

पुनराचमनीयम् (जल चढाउने)

ॐ शुचिर्वाप्यशुचिर्वाऽपि यस्य स्मरणमात्रतः । शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥

पुनराचमनीयं समर्पयामि श्री गौर्यै नमः ।

पञ्चामृतम् (पञ्चामृतमा पहिले दुध चढाउने)

तत्रादौ पयसा- ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः पयस्वतीः प्रदिशः सन्तु महचम्। देवाद्यैर्वन्दिता धेनुः सर्वपापप्रणाशिनी। त्वं क्षीरस्नापितो देव नित्यं शोकहरो भव ॥

पयःस्नानं समर्पयामि श्री गौर्यै नमः।

शुद्धोदकेन (शुद्ध जल चढाउने)

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। विश्व ꣳहि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि। दीक्षातपसोस्तनूरसि तान्त्वा शिवा ꣳसग्मांपरिदधे भद्रं वर्णं पुष्यन् ॥

शुद्धोदकस्नानं समर्पयामि श्री गौर्यै नमः।

दध्ना (दही चढाउने)

ॐ दधिक्राब्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखाकरत्प्रणऽआयु ꣳषि तारिषत् ॥

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्। दध्यर्पितं मया देव स्नानार्थं प्रतिगृह्यताम् ॥

दधिस्नानं समर्पयामि श्री गौर्यै नमः।

शुद्धोदकेन (शुद्ध जल चढाउने)

ॐ आपोऽअस्मानिति... शुद्धोदकम्।

शुद्धोदकस्नानं समर्पयामि श्री गौर्यै नमः।

घृतेन (घिउ चढाउने)

ॐ घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम।
अनुष्वध-मावह मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यम् ॥
रसानामुत्तमं त्वाज्यं देवानां च सदाप्रियम्। तेन त्वं स्नापितो देवी मम कान्तिप्रदो भव ॥

घृतस्नानं समर्पयामि श्री गौर्यै नमः।

जलेन (शुद्ध जल चढाउने)

ॐ आपोऽअस्मानिति... ।

शुद्धोदकस्नानं समर्पयामि श्री गौर्यै नमः।

मधुना (मह चढाउने)

ॐ मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳरजः। मधुद्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः ॥
यस्य धारणमात्रेण तृप्ति यान्ति पितामहाः। मधुना स्नापिता देवी नित्यं शोकहरो भव ॥

मधुस्नानं समर्पयामि श्री गौर्यै नमः।

शुद्धोदकेन (शुद्ध जल चढाउने)

ॐ आपोऽअस्मानिति.... । शुद्धोदकस्नानं समर्पयामि श्री गौर्यै नमः।

शर्करया (सखर चढाउने)

ॐ अपा ꣳ रसमुद्वयस ꣳ सूर्ये सन्त ꣳ समाहितम् । अपा ꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टङ् गृहणाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका । मलापहारिणी दिव्या स्नानाय प्रतिगृह्यताम् ।

शर्करास्नानं समर्पयामि श्री गौर्यै नमः ।

शुद्धोदकेन (शुद्ध जल चढाउने)

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्व ꣳहि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि । दीक्षातपसोस्तनूरसि तान्त्वा शिवा ꣳसग्मापरिदधे भद्रं वर्णं पुष्यन् ॥

शुद्धोदकस्नानं समर्पयामि श्री गौर्यै नमः ।

सुगन्ध तैलम् (तेलले स्नान गराउने)

अभ्यश्चार्थं मयानीतं तैलं पुष्पादि वासितम् । प्रयत्नेनार्जितं शुद्धं गौरीमाता प्रगृह्यताम् ॥

सुगन्ध तैल स्नानं समर्पयामि श्री गौर्यै नमः ।

करोद्धर्तनम् (कपुर मिसाएको जल चढाउने)

माताः सर्कणि तीर्थानि गङ्गाद्याश्च तथा नदाः । स्नानार्थं तव देवेशि मयानीताः सुशोभनाः ॥

करोर्द्धतनम् समर्पयामि श्री गौर्यै नमः ।

वस्त्रम् (कपडा चढाउने)

सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे । मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥

वस्त्रम् समर्पयामि श्री गौर्यै नमः ।

कञ्चुकीमुपवस्त्रं (वस्त्र, सौभाग्य चढाउने)

मुक्ता मणि गणोपेतां मनघ्र्यांच सुख प्रदाम् । कञ्चुकीमुप वस्त्रंते ददामि हरिवल्लभे ॥

कञ्चुकीमुपवस्त्रम् समर्पयामि श्री गौर्यै नमः ।

चन्दनम् (चन्दन चढाउने)

मलयाचल सम्भूतं नाना पन्नग रक्षितम् । शीतलं वहुला मोदं चन्दनं प्रतिगृह्यताम् ॥

चन्दनम् समर्पयामि श्री गौर्यै नमः ।

सिन्दूरम् (सिन्दूर चढाउने)

उद्यदादित्य संकाशं स्त्रीणां सीमन्त भूषणम् । वीरालङ्करणं दिव्यं सिन्दूरं प्रतिगृह्यताम् ॥

सिन्दूरम् समर्पयामि श्री गौर्यै नमः ।

अवीरकम् (अवीर चढाउने)

नाना परिमलद्रव्यै निर्मितं चूर्णमुत्तमम् । आरक्तनामकं दिव्यं सुगन्धि प्रतिगृह्यताम् ॥

अवीरकम् समर्पयामि श्री गौर्यै नमः ।

बिल्वपत्राणि (बेलपत्र चढाउने)

ॐ त्रिदलं त्रिगुणाकारं शिवसन्तोष कारकम्। विल्वपत्रं प्रयच्छामि प्रसीद परमेश्वरी ॥

विल्वपत्रं समर्पयामि श्री गौर्यै नमः।

पुष्पम् (विभिन्न किसिमका फूल चढाउने)

ॐ श्रीश्चते लक्ष्मीश्चपत्न्याबहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥

इमानि पुष्पाणि मनोहराणि सुरासुराणामपि दुर्लभानि।
कल्पद्रुमादि द्रुमजानि तानि पुष्पाञ्जलिर्मेऽस्तु सुखाय नित्यम् ॥

नानाविधानिपुष्पाणि समर्पयामि श्री गौर्यै नमः।

पुष्पमालाम् (माला चढाउने)

ॐ माल्यादीनि सुगन्धीनि ग्रंथितानि प्रयत्नतः। मयाहृतानि पूजार्थं गृहण परमेश्वरी ॥

पुस्पमालाम् समर्पयामि श्री गौर्यै नमः।

धूपम् (धूप वालेर घुमाउने)

ॐ ब्राह्मणोस्यमुखमासीद्द्बाहूराजन्न्य÷कृतः। ऊरूतदस्ययद्द्वैश्श्य÷पद्भ्या ँ शूद्द्रोऽअजायत ॥

कर्दमेनप्रजाभूता मयि संभव कर्दम। श्रीयं वासयमे कुले मातरम् पद्म मालिनीम् ॥

वनस्पतिरसोद्भूतो गन्धाढचो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

धूपमाघ्रापयामि श्री गौर्यै नमः।

दीपम् (बत्ती वालेर देखाउने र घुमाउने)

ॐ चन्द्रमामानसोजातश्च्चक्षोःसूर्योऽअजायत। श्रोत्राद्द्वायुश्च्चप्प्राणश्च्चमुखादग्निरजायत ॥

मार्तण्ड मण्डला खण्ड चन्द्र विम्बाग्नि तेजसम्। गृहाण देवी दीपंमे निर्मितम् तव भक्तितः ॥

घृतवर्ति- समायुक्तं वन्हिना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥

दीपं दर्शयामि श्री गौर्यै नमः।

नैवेद्यम् (नैवेद्य चढाउने)

ॐ नाब्म्याऽआसीदन्तरिक्ष ँ शीर्ष्णोद्द्यौःसमवर्त्तत। पद्द्भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालोकाँ ऽअकल्पयन् ॥

देवतालय पाताल भूतला धार धान्यजम्। षेडशाकार संभारं नैवेद्यं प्रतिगृह्यताम् ॥

नैवेद्यं गृह्यतां देवी भक्तिं मे ह्यचलां कुरु। ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥

नैवेद्यं समर्पयामि श्री गौर्यै नमः ॥

फलं नैवेद्यम् (फलफूल चढाउने)

दाडिमं वदरं धातृ फलाम्र पानसादिकम्। नारङ्गं कदलं द्राक्षां फलान्येतानि गृह्यताम् ॥

रसयुक्तानि स्वादूनि यथाकालोद्भवानि च। मयानीतानि देवेश फलानि प्रतिगृह्यताम् ॥

फलादिनैवेद्यं समर्पयामि श्री गौर्यै नमः।

उत्तरापोशनम् (जल चढाउने)

ॐ यत्त्पुरुषेणहविषादेवायज्ञमतन्न्वत । व्वसन्तोऽस्यासीदाज्ज्यङ्ग्रीष्म्मऽइद्ध्मःशरद्धविः ॥

उत्तरापोषणां कर्तुं तोय मुद्धृत मुज्वलम् । मया निवेदितं भक्त्या गृहाण कमले शुभे ॥

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् । आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥

उत्तरापोशनम् समर्पयामि श्री गौर्यै नमः ।

नारिकेलादिफलम् (नरिवल चढाउने)

ॐ इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

सुशोभनं फलं रम्यं खर्जुरीदल संयुतम् । भक्त्या मया प्रदत्तंमे पूजाँ च सफलं कुरु ॥

नारिकेलादिफलं समर्पयामि श्री गौर्यै नमः ।

ताम्बूलम् (पान मसला चढाउने)

ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । एलाचूर्णादिसहितं ताम्बूलं प्रतिगृह्यताम् ।

पाताल तल संभूतं वदनाम्भोज भूषणम् । नानागुण गणा कीर्णं ताम्बूलं प्रतिगृह्यताम् ॥

ताम्बूलं समर्पयामि श्री गौर्यै नमः ।

दक्षिणा (द्रव्य भेटी चढाउने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

सुवर्णं सर्व धातूनां श्रेष्ठंदेव प्रियं सदा । भक्त्या ददामि वरदे स्वर्ण बृद्धिं कुरुष्वमे ॥

दक्षिणां समर्पयामि श्री गौर्यै नमः ।

चामरम् (चामर डोलाउने)

ॐ शशाङ्ककरसंकाशं हिमडिंडिरपाण्डूरम् । प्रोत्सारयासु दुरितं चामरामरवल्लभ ॥

ॐ वर्हि वर्ह कृताकारं मध्यदण्ड सुशोभितम् । गृह्यतां व्यजनं देवी देह स्वेदानु पत्तये ॥

चामरं दोलयामि श्री गौर्यै नमः ।

व्यजनम् (पङ्खा डोलाउने)

ॐ शिखिपुङ्खसमायुक्तं शैत्यमानन्ददायकम् । व्यजनं दोलयामित्वामतः शान्तिं प्रयच्छ मे ॥

व्यजनं दोलयामि श्री गौर्यै नमः ।

आदर्शम् (ऐना देखाउने)

ॐ दर्शनेन त्वमादर्श नूनं मङ्गलदायकः । शौर्यसौभाग्यसत्कीर्तिर्निर्मलज्ञानदो भव ॥

आदर्शं दर्शयामि श्री गौर्यै नमः । ततो यथाशक्ति जपं कुर्यात् । (यथाशक्ति जप गर्ने)

नीराजनम् (नीराजन बत्ती बालेर आरती गर्ने)

ॐ पञ्चवर्तिसमायुक्तं घृतेन ज्वलितं मया । आरार्तिकप्रदानेन सन्तुष्टो भव सर्वदा ॥

अन्तस्तेजो बहिस्तेजः एकीकृत्या मित प्रभा । नीराजेन प्रदानेन सन्तुष्टा भव सर्वदा ॥
चन्द्रादित्यौ च धरणीविद्युदग्निस्तथैव च । त्वमेव सर्वज्योतीषिं तेन नीराजयाम्यहम् ॥
नीराजनं दर्शयामि श्री गौर्यै नमः ।
पुष्पाञ्जलि (फूल लिएर नमस्कार गर्ने)
ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
तेह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥
अन्यथा शरणं नास्तित्वमेव शरणं मम । तस्मात् कारुण्यभावेन रक्ष मां श्रीगौरीरेश्वरी ॥
वेशेषार्घ्यं दद्यात् (अर्घ्य दिने)
ॐ रक्ष रक्ष महागौरी रक्ष त्रैलोक्य रक्षक । भक्तानाम अभयङ्कर्ता त्राता भव भवार्णवात् ।
वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद । अनेन सफलार्घेण फलदोस्तु सदा मम ॥
(घोप्टो गरी पूजा गरेर उत्तानो गरी जल राख्ने चलन छ)
इत्यर्घ्यं निवेद्य शङ्खजलं निवेदयेत् (शङ्खको जल चढाउने)
ॐ यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलम् । निवेदितं च नैवेद्यं गृहाण चानुकम्पया ॥
मन्त्रहीनं क्रियाहीनं विधिहीनं सुरेश्वरी । यत्पूजितं मयादेवी परिपूर्णं तदस्तु मे ॥
साधु वासाधु वा कर्म यद्यदाचरितं मया । तत्सर्वं क्षम्यतां देवी गृहाण परमेश्वरी ॥
(शङ्खलाई उत्तानो गरी जल राख्ने र पूजा गर्ने)
इत्यर्घ्यं पराङ्मुखं कुत्वा- ॐ अर्घ्यपात्राय नमः । ॐ शंखपात्राय नमः । इति पूजनम् ।
अथ पूर्णपात्रदानम् (चन्दन, अक्षता, फूलले पूर्णपात्रलाई पूजा गर्ने)
रौप्यं ताम्रं मृण्मयं वा यत्संभवं पात्रं फलवस्त्रद्रव्यसहितं षट्पञ्चाशदधिकद्विशतमुष्टिपरिमितं (२५६)
बहुभोक्तृपुरुषाहारपरिमितं वा तण्डुलयुतं पूर्णपात्रमादाय पूर्णादर्वीति पूर्णपात्रं ब्राह्मणं च त्रिः सम्पूज्य ।
ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहाऽइषमूर्जꣳ शतक्रतो ।
(जल, कुश, तिल, जौ सहित पूर्णपात्र हातमा लिने)
ॐ अद्येहेत्यादि अस्मिन् कृतस्य श्री महागौरी प्रीतिद्वारा व्रत पूजन कृता कृतावेक्षणरूप ब्रह्मकर्म प्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापति दैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति सङ्कल्प्य पूर्णपात्रं ब्रह्मणे दद्यात् ।
ॐ स्वस्तीति ।
दक्षिणा सङ्कल्प (ब्राह्मणलाई दक्षिणा दिन दक्षिणाको पूजा गर्ने)
ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
इतिं देयम् ब्राह्मणं च त्रिः सम्पूज्य कुशादिसहितं दक्षिणाद्रव्यमादाय (कुश, जलसहित दक्षिणा सङ्कल्प गर्ने)
ॐ तत्सद्विष्णुरित्यादि पूर्वसङ्कल्पमुच्चार्य (अमुक) गोत्रः (अमुक) शर्माहं कृतस्य श्री महागौरी प्रीतिद्वारा व्रत पूजन

प्रतिष्ठा सिध्यर्थं दक्षिणा द्रव्यममुक दैवतं ....गोत्राय.... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

विसर्जनम् (विसर्जन गर्दा पूजा गर्ने)

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् । इष्टकामप्रसिद्धयर्थं पुनरागमनाय च ॥

गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वरी । यत्र ब्रह्मादयो देवास्तत्र गच्छ सुरेश्वरी ॥

आवाहनं न जानामि न जानामि विसर्जनम् । पूजां चैव न जानामि त्वं गतिः परमेश्वरी ॥

कर्मेश्वरार्पणम् (कुशको औंठी र अन्य कुश लिएर जल लिने)

ॐ कायेन वाचा मनसैन्द्रियैर्वा बुद्धयात्मना वानुसृतः स्वभावात् ।

करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥

प्रार्थना (नमस्कार गर्ने)

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥

ॐ अच्युताय नमः ३ । ॐ विष्णवे नमः ३ । कर्मेश्वरार्पणमस्तु ॥

अभिषेक (अभिषेक गर्ने)

ॐ द्यौः शान्ति... । तच्चक्षुर्देवहितम्... । ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवा... ।

इत्यादि मन्त्रैरभिषेकं कुर्यात् ।

प्रसादवितरणम् (कुलपितृलाई प्रसाद चढाई प्रसाद हातमा लिएर भन्ने)

यजमान टीकापुष्पादि हस्तेनादाय मन्त्रं पठेत्

बलिर्विभीषणो भीष्मः प्रल्हादो नारदो ध्रुवः । कपिलश्चान्तरिक्षश्च वसुर्वायुसुतस्तथा ॥

विश्वक्सेनोद्धवाक्रूरसनकाद्या महर्षयः । वासुदेवप्रसादोऽयं सर्वे गृह्णन्तु वैष्णवाः ॥

इति मन्त्रोच्चारणपूर्वक गौरीदेवीभक्तेभ्यः प्रसादादिक समर्पयेत् ।

यजमानाय प्रसादवितरणम्- (प्रसाद लगाइदिने र वितरण गर्ने)

आशिषमन्त्रपठनपूर्वकं प्रसादवितरणं कुर्यात्-

ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते । धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयोऽस्तु वः ॥

अव्याधिना शरीरेण मनसा च निराधिना । पूरयन्नर्थिनामाशास्त्वं जीव शरदां शतम् ॥

भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु । रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ॥

॥ इति अदुःख नवमीपूजाविधिः ॥

आरती

श्री गणेशजीको आरती

(कपुर, वत्ती वालेर आरती गर्दा भन्ने)

जय गणेश जय गणेश जय गणेश देव । माता जसकी पार्वती, पिता महादेव ॥
लड्डूको भोग लाग्छ, संत गर्छन् सेवा ॥ जय० ॥
एकदन्त दयावन्त चार भुजाधारी । शिर भरि सिन्दुर पोत्ने, मुसोको सवारी ॥ जय० ॥
अन्धालाई आँखा दिने, कोढीलाई काया । बाँझीलाई पुत्र दिने, निर्धनलाई माया ॥ जय० ॥
लड्डूको त भोग लगाई सन्त गर्छन् सेवा । हार चढ्छ फल चढ्छ चढ्छ अनि मेवा ॥ जय० ॥
दुःखीलाई सुख दिने शम्भूका हौ छोरा । इच्छा पूरा गरिदिन्छौ जो छन् मनका कुरा ॥ जय० ॥

विष्णु भगवान्को आरती

ॐ जय जगदीश हरे प्रभु जय जगदीश हरे । प्रभुका चरण उपासक कति कति पार तरे ॥ ॐ जय०
मनको थाल मनोहर प्रेम रूप बाती । भाव कपूर छ मंगल आरती सब भाँती ॥ ॐ जय०
नित्य निरञ्जन निर्मल कारण अविनाशी । शरणागत प्रतिपालक चिन्मय सुखराशि ॥ ॐ जय०
सृष्टि स्थिति लयकर्ता त्रिभुवनका स्वामी । भक्तिसुधा वर्षाऊ शरण पर्‍यौं हामी ॥ ॐ जय०
आसुरभावनिवारक–तारक–सुखदाता । गुणअनुरूप तिमी हौ हरिहर औ धाता ॥ ॐ जय०
युगयुग पावन गर्छौं अगणितरूप धरी । लीलामय रसविग्रह करणामूर्ति हरि ॥ ॐ जय०
समता शान्ति प्रदायक सज्जनहितकारी । चरणशरण अब पाँऔं प्रभु भवभय हारी ॥ ॐ जय०
भाव मनोहर देऊ साधक–फलदायी । जीवन धन्य बनोस् प्रभुपदसेवा पाई ॥ ॐ जय०
संयम सुरसरिताको अविरल धार वहोस् । जति जति जन्म भए पनि प्रभुमा प्रेम रहोस् ॥ ॐ जय०
प्रेमसहित धूप-आरती जसले नित्य गर्‍यो । दिनदिन निर्मल बन्दै त्यो भवसिन्धु तर्‍यो ॥ ॐ जय०

शिवको आरती

ॐ जय शिव ॐकार, हर जय शिव ॐकार । ब्रह्मा-विष्णु सदाशिव अर्द्धाङ्गी धारा ॥ जय शिव० ॥
एकानन चतुरानन पञ्चानन राजै । हंसासन गरूडासन वृषवाहन साथै ॥ जय शिव० ॥
दोय भुज चार चतुर्भुज दशभुज से सोहे । तीनो रूप निरखता त्रिभुवन जन मोहे ॥ जय शिव० ॥
अक्षमाला वनमाला मुण्डमाला धारी । चन्दन मृगमद चन्दा भोले शुभकारी ॥ जय शिव० ॥
श्वेताम्बर पीताम्बर बाघम्बर अङ्गे । सनकादिक प्रभुतादिक भुतादिक सँगे ॥ जय शिव० ॥
करके मध्य मण्डलु चक्र त्रिशूल धरता । जगकर्ता जगभर्ता जग संहार कर्ता ॥ जय शिव० ॥
ब्रह्मा विष्णु सदाशिव जानत अविवेका । प्रणव अक्षर मध्ये ये तीनों एका ॥ जय शिव० ॥
त्रिगुणस्वामीजी की आरती जो कोई नर गावै । भजत शिवानन्दस्वामी मन वाँछित फल पावै ॥ जै शिव० ॥

शिवको आरती ॐ हर हर हर महादेव

ॐ जय शिव शंकर शम्भो, जय गिरिजा धीश, शिव ।
जय जय करुणासागर – २ पशुपति जगदिश ॐ हर हर हर महादेव ॥
गिरि कैलाश निवास छ, गण छन् सहचारी, शिव ।
मुण्डमाला छ गलामा – २ रुप छ भयहारी ॐ हर ... ॥
डमरु त्रिशुल शुशोभित, प्रभुका दुई करमा शिव ।
भूषण नाग विराजित – २ वाघाम्वर तनमा ॐ हर ... ॥
तीन नयनमा थरिथरि, ज्योति छ दिव्य सदा शिव ।
वाहन वृषभ मनोहर –२ सङ्गमा छन् गिरिजा ॐ हर हर ... ॥
भस्म विलेपन सुन्दर, शिरमा चन्द्रकला, शिव ।
कल कल वग्दछिन् हर्दम – गङ्गा पुण्यजला ॐ हर हर ... ॥
ब्रह्मा विष्णु महेश्वर, प्रभुका रूप सवै शिव ।
सृष्टि स्थिति लय सव हुन् – २ शिव लीला प्रभुकै ॐ हर हर... ॥
वेद पुराण चकित छन्, प्रभुको वर्णनमा शिव ।
कण कण व्यापक प्रभुको – २ महिमा त्रिभुवनमा ॐ हर हर ... ॥
सुरनर मुनि सव प्रभुकै, निशदिन ध्यान गरी शिव ।
परमानन्द मगन भई – २ जान्छन् पार तरी ॐ हर हर ... ॥
सच्चिदानन्द परात्पर, सज्जन हितकारी, शिव ।
जय जय साम्व सदाशिव – २ जय जय त्रिपुरारि ॐ हर हर ... ॥




श्री अम्बाजीको आरती

जय अम्बे गौरी, मैया ! जय श्यामा गौरी ! तुमको निशिदिन ध्यावत हरि ब्रह्मा शिव री ॥ जय अम्बे ॥
माँग सिन्दूर विराजत टीको मृगमदको । उज्ज्वलसे दोउ नैना, चन्द्रवदन नीको ॥ जय अम्बे ॥
कनक समान कलेवर रक्ताम्बर राजै । रक्त पुष्प गल माला कण्ठन पर साजै ॥ जय अम्बे ॥
केशरि वाहन राजत, खड्ग खप्पर धारी । सुर–नर–मुनि–जन सेवत, तिनके दुःख हारी ॥ जय अम्बे ॥
कानन कुण्डल शोभित, नासाग्रे मोती । कोटिक चन्द्र दिवाकर राजत सम ज्योती ॥ जय अम्बे ॥
शुम्भ निशुम्भ विदारे, महिषासुर घाती । धूम्रविलोचन नैना निशिदिन मदमाती ॥ जय अम्बे ॥
चण्ड मुण्ड संहारे, शोणित बीज हरे । मधु कैटभ दोउ मारे, सुर भयहीन करे ॥ जय अम्बे ॥
ब्रह्माणी, रुद्राणी तुम कमलारानी । आगम-निगम-बखानी, तुम शिवपटरानी ॥ जय अम्बे ॥

चौंसठ योगिनी गावत, नृत्य करत भैरूँ। बाजत ताल मृदंगा औ बाजत डमरू ॥ जय अम्बे ॥
तुमही जगकी माता, तुम ही हो भरता। भक्तन की दुःख हरता सुख सम्पत्ति करता ॥ जय अम्बे ॥
भुजा चार अति शोभित, वर-मुद्राधारी। मन वांक्षित फल पावत, सेवत नर-नारी ॥ जय अम्बे ॥
कंचन थाल विराजत अगर कपूर बात्ती। (श्री) माल केतु में राजत कोटितरतन ज्योति ॥ जय अम्बे ॥
(श्री) अम्बेजीकी आरती जो कोई नर गावै। कहत शिवानन्द स्वामी, सुख सम्पत्ति पावे ॥ जय अम्बे ॥

निर्गुण भजन

भजमन नारायण रघुवर गोविन्दम्। भज मन नारायण रघुवर गोविन्दम् ॥
प्रथम अवतार प्रभु मत्स्यरूप धारणम्। सङ्ख चक्र गदा पद्म सङ्खासुर छेदनम् ॥ भ.१॥
द्वितीय अवतार प्रभु कुर्मरूप धारणम्। सुर असुर सरण परैं मंदराचल धारणम् ॥भ.२॥
तृतीय अवतार प्रभु वराहरूप धारणम्। दैंत्य हिरण्याक्ष मारी वेद पृथिवी पालनम् ॥भ.३॥
चतुर्थ अवतार प्रभु नृसंहरूप धारणम्। खम्बा फोर्दा प्रकट भई भक्त प्रह्लाद रक्षणम् ॥भ.४॥
पञ्चम अवतार प्रभु वामनरूप धारणम्। तीन पद पृथीवी लई भक्त वली तारणम् ॥भ.५॥
षष्ठ अवतार प्रभु परशुरामरूप धारणम्। पितृ वचन सत्य मानी दुष्ट सकल नाशनम् ॥भ.६॥
सप्तम अवतार प्रभु रामरूपधारणम्। गृह त्यागी वनमा गई रावणादि मारणम् ॥भ.७॥
अष्टम् अवतार प्रभु कृष्णरूप धारणम्। वाललिला रचि कंसासुर मारणम् ॥भ.८॥
नवम् अवतार प्रभु वुद्धरूप धारणम्। ज्ञान विवेक सबलाई दिई साधुसज्जन पालनम् ॥भ.९॥
दशम अवतार प्रभु कल्किरूप धारणम्। दुष्टहरू सबै नासी धर्म प्रतिपालनम् ॥भ.१०॥



॥ श्रीगणेशाय नमः ॥

पुष्पाञ्जलि

(फूल हातमा लिएर नमस्कार गर्ने)

गजाननं भूतगणाधिसेवितं कपित्थथजम्बूफलचारुभक्षणम् ।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम् ॥
ॐ विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥
हे राम पुरुषोत्तम नर हरे नारायण केशव । गोविन्द गरुडध्वज गुणनिधे दामोदर माधव ॥
हे कृष्ण कमलापते यदुपते सीतापते श्रीपते । वैकुण्ठाधिपतेः चराचरपते लक्ष्मीपते पाहिमाम् ॥
अदौ राम तपोवनादि गमनं हत्वा मृगं कांचनम् । वैदेही हरणं जटायु मरणं सुग्रीव सम्भाषणम् ॥
वालीनिर्दलनं समुद्रतरणं लङ्कापुरी दाहनम् । पश्चाद्रावण कुम्भकर्णहननं एतद्धि रामायणम् ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥
सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षःस्थलकौस्तुभसिश्रयं नमामि विष्णुं शिरसा चतुर्भुजम् ॥

रत्नैः कल्पितमासनं हिमजलैः स्नानञ्च दिव्याम्बरं नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जाती चम्पकविल्वपत्ररचितं पुष्पञ्च धूपंतथा दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥
सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसम् भक्ष्यं पञ्चविधिं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्वलं ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥
छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं वीणाभेरीमृदङ्गकाहलकला गीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत् समस्तं मया सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥

करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शम्भो ॥
वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणम् वन्दे पन्नगभूषणं मृगधरम् वन्दे पशुनाम्पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियम् वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥

देवी प्रपन्नार्तिहरे प्रसीद प्रसीदमातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरि देवि चराचरस्य ॥



नागेन्द्रहराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय तस्मै नकाराय नमः शिवाय ॥१॥
मन्दाकिनीसलिलचन्दनचर्चिताय नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजिताय तस्मै मकाराय नमः शिवाय ॥२॥
शिवाय गौरीवदनाब्जवृन्दसूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय तस्मै शिकाराय नमः शिवाय ॥३॥
वसिष्ठकुम्भोद्भवगौतमार्यमुनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनाय तस्मै वकाराय नमः शिवाय ॥४॥
यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय तस्मै यकाराय नमः शिवाय ॥५॥
पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥६॥

सर्वे भवन्तु सुखिनः सर्वेसन्तु निरामयाः सर्वे भद्राणी पश्यन्तु मा कश्चिद् दुःख भाग्भवेत् ।
कस्तो तत्त्व छ तिम्रो र कस्ता छौ यो म जान्दिनँ । जस्ता छौ परमेश्वर त्यस्तैलाई नमोनमः ॥
जो अक्षर पद भ्रष्ट भयो मात्रा छुट्यो हेर । क्षमा गरी त्यो सारा खुसी होऊ परमेश्वर ॥
ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्प्रथमान्न्यासन् ॥
तेहनाकम्महिमानः सचन्तयत्रपूर्व्वेसाद्धचा ꣳ सन्तिदेवा ꣳ ॥१॥

इमानि पुष्पाणि मनोहराणि सुरासुराणामपि दुर्लभानि ।
कल्पद्रुमादिद्रुमजानि तानि पुष्पाञ्जलिर्मेऽस्तु सुखाय नित्यम् ॥

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्धचात्मना वा प्रकृतेः स्वभावात् ।
करोमियद्यत्सकलं परस्मै नारायणायेति समर्पयेतत् ॥

नेपाली पुष्पाञ्जली

महै जस्ता मीठा अमृतमय वाणी रचयिता, तिमीलाई लाग्लान सुरगुरु गिरा नै पनि फिका ।
मत वाणी तिम्रा गुणकथनले पावन गरेँ, यही शोची शम्भो स्तुति विषयमा उद्यत भएँ ॥
अजन्मा कै होलान् अवयव हुने लोक सब यी, विना सत्ता तिम्रो भुवन रचना हुन्छ कसरी ?

लिई सामग्री के ? कुन् तिमी विना सृष्टि गरने ? अहो ! शङ्ग गर्छन् शिव ! शिव ! तिमीमा कुमतिले ॥
असत् भन्छन् कोही भुवन सब सत् भन्छ कुनै, असत् सत्मा बेग्लै विषय सब छन् भन्छन कुनै ।
सबै द्यौतालाई विभव सब दिन्छौ पशुपते, तिमी आत्मानन्दी विषय – सुखमा मुग्ध नहुने ॥


तिमी हावा पानी विधु – रवि र आगो पनि तिमी, तिमी आत्मा पृथ्वी गगन यति तिम्रो तनु भनी ।
पुरानाको बोली परिमित यसैमा हुन गयो, म सम्झन्छु शम्भो तिमी विना कुनै छैन सब यो ॥

नजीकैमा छौ हे वनचर ! तिमी दूर पनि छौ, अती सूक्ष्मै छौ हे स्मरहर अति स्थूल पनि छौ ।
सबै भन्दा वृद्ध अतियुवक वन्दे तिमीकन, तिमी त्यो यो सर्व प्रतिकृति तिमीमा छ नमन ॥

भव भुवनको गर्छौं, सृष्टि प्रकृष्ट रजस लिई, हर जगतको संमा,–रात्मा तमोगुणका तिमी ।
मृड भुवनको रक्षा, गर्छौं सुसत्व गुणी बनी, गुणरहित छौ ज्योति,–र्धामा भगवान् हे तिमी ॥

जलधिमय मस्यानी होस् मसी नील अद्रि, सुरतरुवरशाखा लेखनी पत्र पृथ्वी ।
प्रतिपल नबिसाई शारदा लेखिराखून्, तर पनि गुण तिम्रा के सबै लेख्न सक्छिन् ॥

कस्तो तत्त्व छ तिम्रो र कस्ता छौ यो म जान्दिनँ, जस्ता छौ परमेश्वर त्यस्तैलाई नमो नमः ।
जो अक्षर पदभ्रष्ट भयो मात्रा छुट्यो हेर, क्षमा गरी त्यो सारा खुसी होऊ परमेश्वर ॥



दानका देवता

वन्हि – हिरण्य (सुन),
वृहस्पति – वस्त्र,
समुद्र – नुन
वनस्पति वा सरस्वती – रुपैयाँ, प्रचलित द्रव्य
पार्वती – बेसार, सिँदूर
यम – घोडा, भैंसी
सोम – शखर
मित्र – चिनी
विष्णु – तिल, दतिवन, नैवेद्य, माला, मही, चस्मा, सङ्ख, चँदुवा, काइयो, समिधा, हीरा, खराउ, काँसो, मणि, घर, शालिग्राम, ऊखु, नाम छुटेका र नजानेका सबै।
गन्धर्व – कपुर, पान, सुगन्धित वस्तुहरू
प्रजापति – पकवान्न, दाल, अन्न
राहु – तेल
मृतुञ्जय – घ्यू
केतु – कपास
चद्र – चाँदी, दही
रुद्र – गाई, गोरु
लक्ष्मी – फूल
तारा – दुध
वरुण – कमण्डलु, गाग्री, पञ्चपात्र र अन्य जलपात्र।
उत्तनाङ्गिरस – शय्या, आसन, छाता, जुत्ता, लौरो, गाडा।
सरस्वती – पुस्तक, मसी, कलम।
विश्वकर्मा – भाँडा वर्तन
वराह – भूमि
नाम छुटे जति र नजानेकालाई विष्णुदेवता भन्नु।

केही थर गोत्र र प्रवरहरू

कौडिन्य - प्याकुर्याल, पनेरु, अचार्ज, आचार्य, गैरे, सापकोटा, सत्याल, मोरासैनी, पराजुली, बासकोटा, त्रीताल, न्यौपाने, लकाई खड्का (कमलकोठे) थापा (गाम्ले, बगाले) रावल। **प्रवर- कौडिण्य, वाशिष्ठ, मैत्रावरुणी**

अत्रि - चापागाईं, वस्ती, मिश्र, खतिवडा, मल्ल, ओझा, अधिकारी, (ठडराई) गौतम।

प्रवर - अत्रि : अर्चनानसः श्यावाश्व

आत्रय - दवाडी दुलाल, पौडेल, थापा (पुँवार, खुलाल, कालिकोटे, बगाले) पानी पोखरेल, कालिकोटे खड्का, अर्ज्याल, सिग्देल, गेलाल, घोण्डे गुरुङ, दुवाडी, माझी। **प्रवर-आत्रेय, अर्चननानस श्यावाश्य**

उपमन्यू - मैनाली, ढकाल, बर्तौला, द्वैनी, ओली, भट्ट (दूवाल) पाँडे **प्रवर - उपमन्यु कपिल, विरुज**

काश्यप - शाह, शाही, ठकुरी, रायमाझी, घिमिरे, गोदारथापा, गर्तौला, अधिकारी (भँडारे, खिलचिने र कौवाली) बोगटी, कठायत, बुढाथोकी (सोडारी), पाँडे (सिमलदिय, बडखोरा), बडाल, छतकुली, श्रेष्ठ, लिम्बु, राई, शेर्पा तथा गोत्र तथा थरको पत्ता नभएको र पशुपक्षिको **प्रवर-काश्यप, आवत्सार, नैधुव**

अगस्ति - **ढुङ्गेल प्रवर : आगस्त्य, दार्ढ्यच्युत, इद्मबाह**
(कतै कतै अगस्ति, जैमिनी, दधिचि भन्ने गरेको पनि पाइन्छ)

कौशिक - रेग्मी, खप्तरी (खड्का), विष्ट (खपतरी) खपतरी बुढाथोकी, बिडारी, फुँयाल, रिमाल लाम्छाने खँड्का, खपतरी खँड्का, ढुङ्गाना, धिताल, तिवारी माझी खप्तरी बस्नेत, लुँइटेल, पुडासैनी, बाँनिया, रघुवंशी, भँडारी, बस्ताकोटी, दशौलिया, पाठक, गौली, डाँगी ।

प्रवर - कौशिक, अधमर्षण, विश्वामित्र अथवा कौशिक, देवरात ओदल

गर्ग - बास्तोला, गजुरेल, भट्ट, रिसाल, लामिछाने (भट्ट), भुर्तेल, अचार्ज लाम्छानेथापा, भेटवाल, लामिछाने गुरुङ, रोकाहा, चुँडाल, जोशी (झिजार), पालपाली खड्का । **प्रवर- गर्ग, गार्ग्य, गौतम, विश्वामित्र, पाराशर**

गौतम - त्रिपाठी, तिवारी, चन्द, दङ्गार । **प्रवर- गौतम, गर्ग, शान्डिल्य**

घृतकौशिक- सुतारकार्की, बराल, पण्डित, खनाल, नेपाल, वरदेवा । **प्रवर घृतकौशिक, विश्वामित्र**

धनञ्जय - होमेगाइँ, हुमागाइँ, रिजाल, पडेनी, बसेल, कुकुरकाटे, गुरागाइँ, खुलाल वस्नेत, भुसाल, खुलाल बुढाथोकी, गैरीपिप्ली, धमला, पकुवाल । **प्रवर- धनञ्जय, विश्वामित्र, मधुच्छन्द**

भारद्वाज - चौलागाइँ, सुवेदी, थपलिया, वैदावार क्षेत्री, पन्थी, सिलुवाल, विष्ट (सिजापति), वाग्ले, लोहनी, पन्त, अधिकारी (थामी) दुधपोखरेल, शिवाकोटी देवकोटा, निरौला, जमरकटेल, खड्का (महाराजजी खड्का), राउत, कणेल, श्रीपालीबस्नेत, पाँडे (कुलेटा) जोशी (लटौला), घले गुरुङ, लामा गुरुङ, रजौरिया, चिमौरिया, बुर्लाकोटी, मजगैंया, सिटौला, बोहरा, सङ्ग्रौला, खनिगेलाल । **प्रवर - भारद्वाद, आङ्गिरस, वार्हस्पत्य**

पाराशर - मरहठ्ठा, लामाकार्की, आर्य, धिमाल, कट्टेल, पण्डित, नराल, कट्टेल । **प्रवर - पारासर, वशिष्ठ, शक्ति**

माण्डव्य - बजगाइँ, ज्ञवाली, कटुवाल, पन्थी, मास्केबजाई । **प्रवर -माण्डप, माण्डव्य, विश्वामित्र**

मौद्गल्य - कोइराला, कुइँकेल, थापा (कालीकोटे) कार्की (खुलाल, मुडुला, लामा) उप्रेती, सिंखडा, तिम्सिना, बेल्काणी, तिमल्सिना, बेलबासे । **प्रवर - मौद्गल्य, आङ्गिरस, भार्म्याश्व**

वत्स - राणा, लम्साल, कुँवर, दाहाल, रुपाखेती, चौहान, खराल । **प्रवर-वत्स और्व, च्यवन भार्गव, जामदग्नी**

कृष्णात्रि – खकुरेल ।

जैमिनी – घोडासैनी । **प्रवर – जैमिनी, उग्र, साँकृति**

सौनक – साही । **प्रवर – सौनक, विश्वामित्र, भार्म्याश्व**

वशिष्ठ - सूयल घर्ती, गैरे राउत, भट्टराई, सुयेल थापा, दवाडी, थान्सिङे भण्डारी, सुयल घर्ती, खरेल, चालिसे, मुडबरी, फलाकोटी, पाठक, केशरी, सोती । **प्रवर - वशिष्ठ इन्द्रप्रमद, आभरद्वसु**

शाण्डिल्य - काफ्ले, प्रसाई, महत, कटुवाल । **प्रवर-शाण्डिल्य, असित, देवल** (शाण्डिल्य, सावर्णी, इसावास्य, मैत्रै, वरुण, पञ्चैप्रवर भन्ने पनि चलन छ ।)

आङ्गिरस - जोशी (सिलाई), सेढाईं सौनक, साही । **प्रवर - शौनक, विश्वामित्र भार्म्याश्व**

विश्वामित्र- भट्ट (अलिना), दुवाडी, निरवंशी, रयाल, राई ।

कुष्णञ्जनी - विष्ट (कमलकोटे), कडेरिया ।

कपिल - वोहरा, खड्का (पुँवार), दानी क्षेत्री (विष्ट थापाखड्का)

भृगु - चौहान

सबै पूजाका लागि समग्र सामग्रीहरू:

अबिर, केशरी, तिल, जौ, कुश, फूलमाला, बेलपत्र, अगरबत्ती, फलफूल, नैवेद्य, रातो, सेतो, पहेँलो कपडा, जनै, सुपारी, नरिवल, कपुर, गाईको दुध, दही, घ्यू, गोबर, गहुँत, वर, पीपल, आँप, चाँपका पातहरू, दूवो, पहेँलो धागो, रेखी हाल्ने पिठो, धान, चामल, सौभाग्य, कपडा, सौभाग्य सामग्री, पूर्णपात्र, दक्षिणा, दुना, टपरी, सर्स्यू, सर्वोषधि, सप्तमृत्तिका, पञ्चरत्न, मिठाई, ब्राह्मण वरणको लागि कुर्था, सुरुवाल, धोती, टोपी, गञ्जी, रुमाल जति सकिन्छ। शङ्ख, घण्टा, पञ्चपात्र, आचमनी, पक्वान्न नैवेद्य, अर्घपात्र, फूल, आसन, चमर, पङ्खा, डमरु, तुलसीपत्र, ऐना, मह, सख्खर, पूजाको थाली, दियो, कलश, सिंगो नरिवल, पानको पात, पानमसला, धुपौरो, सिन्दूर, धूप, वत्ती, चिनी, श्रीखण्ड, चन्दन, अक्षता, कर्मपात्रे भाँडो।

सत्यनारायण पूजाका लागि थप सामग्रीहरू :- अपुङ्गो, लक्ष्मीनारायणको चित्राङ्कित प्रतिमा, सेलरोटी, अष्टदल लेख्ने थाली, कलश।

जन्मोत्सव पूजाको लागि थप सामग्रीहरू :- नीमपत्ता, गोरोचन, कुङकुम, अष्टचिरञ्जीवी पूजा गर्ने थाली।

हवनका लागि थप :– समिधा (दाउरा), घृतछायाको लागि काँसको कचौरा, सुरो, माना या कचौरामा घ्यू।

रुद्रीका लागि थप :– बेलपत्र, नरिवल १, सुकेको पानी भएको नरिवल १, शिवजीलाई कपडा, पार्वतीलाई सौभाग्य कपडा, वाबियोको तोरण डोरी, पहेँलो धागो १ डल्लो।

सप्ताहपुराणका लागि थप सामग्रीहरू

१. तामाको गाग्री थान– १
२. तामाको थाली (ठुलो) थान – १
३. राधाकृष्णको सुवर्ण प्रतिमा – १
४. ब्राह्मणवरणको सामान – धोती, गम्छा, गञ्जी, आसनी, पञ्चपात्रो, औंठी, चप्पल, दोसल्ला आदि।
५. ५×५ को चँदुवाझालर भएको थान– १
६. २×३ को पुस्तक राख्ने चौकी एक फिट अग्लो थान–२
७. सेतो कपडा ठुलो अरजको मिटर – ५
८. पिरा गोटा – ३ (१.५ x १.५ फिटको)
९. रातो र पहेँलो कपडा ५/५ मिटर
१०. पहेँलो रेशमी कपठा मिटर – ५
१०. कालो, हरियो, निलो, ध्वाँसे कपडा १/१ पाउ
११. तोरण डोरी (बाबियोको) – १५ मूठा
१३. माटोको कलश ठुलो – १०, सानो – २५
१४. अबिर रास्रो – ५ प्याकेट
१५. तिल – ६ किलो
१६. जौ – ७ के.जी
१७. जनै– ५० जोर
१८. सुपारी दाना – १ पाउ
१९. जटावाला नरिवल – ३ वटा

२०. सुकेको नरिवल गोटा – ११

२१. कपुर, अगरबत्ती, दैनिकपूजाको सामान, सर्स्यूं दूबो, फूल इत्यादि ।

२२. दैनिक पानको पत्ता – ५, नैवेद्य, फूलमाला

२४. पञ्चगव्य, पञ्चामृत, दही, गङ्गाजल, फल

२५. पूर्णपात्रका लागि तामाको आरी ठुलो थान – १

२६. घृतछ्यायाका लागि काँसको कचौरा थान– १

२७. हरियो, पहेँलो, कालो, रातो रङ्ग

२८. पहेँलो धागो – २ डल्लो

२९. सानो घन्टी – १, अर्घ दिने सानो शङ्ख–१, बजाउने ठुलो शङ्ख–१

३०. पङ्खा–१, चामर–१, ऐना–१

३१. केराको थाम–४, घरी बुङ्गो भएको–१, बाँसको लिङ्गो जम्मा–२७, अरु लामा–५ वटा, सानो घन्टी–१

३२. सानो ठाउँ भए लिङ्गहरू ५+५ मात्र

३३. ईटा–५० गोटा जति

३४. व्यासासनका लागि खाट – २, भगवान्का फोटाहरू

३५. साङ्गेलाई दाउरा (समिधा)

३६. श्रीमद्भागवत महापुराण सप्ताहज्ञान महायज्ञ लेखेको व्यानर थान – १

३७. सियोधागो, कैँची, काँटी, थमपिनआदि

३८. सायन पेन, माइक, पाण्डाल, माइक स्टेन्डहरू

३९. धान, चामल, दुना, टपरी आदि

४०. रुक्मिणी विवाहका लागि साडी, चोलो, शृङ्गारका सबै सामान

४१. दैनिक शृंगारको सामान एकसरो

४२. नन्दउत्सवको लागि : चकलेट, माखन मिस्री, बेलुन, खुद्रा पैसा, कृष्णको झाँकी बनाउन वस्त्र र मुकुट, फलफूल अरू व्यञ्जन मिठाइ समेत

४३. शुकदेव विदाइलाई दोसल्ला – १

४४. गरुड र हनुमान बनाएको ध्वजा थान – १

४५. व्यासमण्डपमा ओछ्याउने : गुन्द्री, कम्बल, तन्ना

४६. शय्यादान गर्नेहरूका लागि सुवर्णप्रतिमासहित थाली, कलश, शय्याका सामान सबै

४७. विष्णुलक्ष्मीको फोटो

४८. तुलसी या रुद्राक्षको माला – २

४९. लाखबत्तीका लागि थाली, कलश ३+३ = ६

५०. धुपौरो– १, लाखबत्ती बाल्ने पाला–५

५१. आरती गर्ने भाँडो – १

५२. धुन्दुकारी स्थापना गर्ने बाँस – १

५३. बाँसको महालिङ्गो –१

५४. ब्राह्मणहरूलाई वरण सामग्री

५५. भागवत पुस्तक – १

५६. दिउँसो खान काजु, पेस्ता, किसमिस आदि जे जति सकिन्छ

५७. तिलको तेल

५८. हवन गर्ने ठाउँमा यज्ञको सामग्री सबै

५९. केशरी – ५ प्याकेट

६०. श्रीखण्ड, चनौटो

६१. चन्दनखोरी

६२. पूजाको थाली – २

६३. रातो, सेतो अक्षता दैनिक

६४. बेलपत्र, अपुङ्गो, पञ्चामृत दैनिक

शुभ विवाहका लागि आवश्यक सामग्रीहरू

१. **समग्रमा मुख्य सामग्रीहरू** - पहेँलो कपडा ४ मिटर, रातो कपडा ४ मिटर, सेतो कपडा ४ मिटर, जनै ५० जोर, सुपारी १ पाउ, केसरी ३ बट्टा, सिन्दुर ३ बट्टा, अविर ५ बट्टा, जौ ४ किलो, तिल ३ किलो, धूप, बत्ती, पहेँलो धागो ३ डल्लो, रायो सर्स्यू, आँप, चाँप, वर, पीपल र डुम्रीका पातहरू, पञ्चपल्लव १०, पञ्चरत्न, सर्वौषधि, तामाको वा माटाको घैँटो ६ वटा, टपरी ५०, दुना ५०, वोहोता १५०, पञ्चामृत, दुध, दही, घ्यू, मह, चिनी, पान, मसला, काँसको कचौरा १, सुनको प्रतिमा, फलफूल, नैवेद्य रोटी (सेल) दण्ड, तरवार, झारी, कलश, उखु ।

२. **गणेशका लागि** - रातो धोती, रातो गन्जी, टोपि, आसनी, पञ्चपात्र, मुद्रिका

३. **पूर्वाङ्गको निमित्त** - अबिर, केशरी, दही, ऊखु, पेरुङ्गो, पालुङ्गोको साग-२ मूठा, दहिको ठेकी-२, जनै, सुपारी, गोवर, पहेँलो वस्त्र, रेखिको पिठो, पञ्चपल्लव, पञ्चरत्न, तामाको कलश, गङ्गाजल, फूल, दुवो ।

४. **बिस्कुन सुकाउन थप** - सगुन २ भाग, सानो मान्द्रो अथवा गुन्द्रि, सानो डालो-२ (चोयाको अथवा तामाको) जनै सुपारी, दही, अक्षता, कन्या २, कन्यालाई टीका, दक्षिणा, सेतो कपडा ।

५. **मण्डपको लागि थप** - लिङ्गो ५, केराथाम ५, पैयूँ ५, तोरण, पञ्चपल्लव, पहेँलो धागो ३ डल्लो, कोदाली, ईंटा, माटो, गोबर, पानी, उखु, बाबियोको तोरण (डोरी) १५ मुठ्ठा, आँप, चाँप, पीपल र वरको पात, चँदुवा, फूलहरू, पुट्टा, धजा-पत्ता ।

६. **ग्रहशान्तिको निमित्त थप सामग्री** - धान, सेतो, रातो, कालो, पहेँलो कपडा, दही, चामल, जटा नरिवल, छाता, जुत्ता, लौरो, जनै ९, सुपारी ९ ।

७. **चोखो माटो खन्न** - सुनको कोदालो, कन्या २, कन्यालाई वस्त्र ।

८. **वस्त्र छेक्ने** - छिटको धोती, धान १ पाथी, चामल १ टपरी, दियो, बत्ती ।

९. **स्वयम्वर निमन्त्रणा पठाउन** - निमन्त्रणा कार्ड, जनै, दुवोको माला १ थान, फूलको माला १ थान, टोपी, दक्षिणा, दही, अक्षता, फलफूल सगुन, थाली सबै जोडी जोडी ।

१०. **मातृका पूजाका लागि थप सामग्री** – पिर्का, गोवर, दुबो, पहेँलो कपडा, धोती, चोलो, चुरा, धागो, सालको पात, रङ्गीन सिन्का ।

११. **आभ्युदयिक श्राद्धलाई थप सामग्री** - १ भाग दियो, ब्राह्मणलाई ५ भाग, ६ भाग सिधा, सुपारी ६ वटा, जनै ६, वस्त्र, नैवेद्यहरू, तामाको भाँडो ।

१२. **साइपाटाको लागि थप सामग्री** – पत्र, छाप लगाउने कपडा, दही, उखु, पेरुङ्गो, पालुङ्गोको साग, फलफूल, काजु, किसमिस, पेस्ता, मिठाई ।

१३. **वाग्दानलाई थप** - धोती, उपर्ना, छाता, जुत्ता, जनै, सुपारी ।

१४. **वरणीका लागि थप सामग्री** - दियो, कलश, गणेश, कपुर, रायो, सर्स्यूं, लावा, पञ्चरत्न, पञ्चपल्लव, छेक्ने कपडा, पिर्का, ढाक्ने पहेँलो कपडा, शङ्ख, घन्टी, दुबो, जटानरिवल, आँप, चाँप, पीपलको पात, जनै, सुपारी, माला, पूजासामग्री, सिँगारिएको ठुलो टपरी, नैवेद्य ।

१५. **गोडा धुनलाई थप सामग्री-** खड्कुलो, गाग्री, करुवा, झारी, सानो लामो पिर्का ।

१६. **कन्यादानका लागि थप** - गाईदान, प्रायश्चित्त गाईदान, वस्त्र तथा भूषणादिहरू साथै दुलही र दुलाहालाई दिने सामानहरू ।

१७. **माहुर खुवाउनका लागि थप** - थाल, कचौरा, दही, घ्यू, मह ।

१८. **लाजा भुट्नका लागि थप** - लाजा, लाजा भुट्ने कपडा, चमर, खेल्ने सुपारी ।

१९. **शिलापूजाको लागि** - सिलौटो र लोहोरो ।

२०. **सिन्दुरहाल्नका लागि** - सिन्दुर, सिन्दुरे कपडा, चाँदीको बट्टा ।

२१. **धर्मगाँठोका लागि** - रुमाल, जनै, सुपारी, असर्फी या पैसा ।

दुर्गापूजाका लागि पहिलो दिनदेखि पाँचौं दिनसम्मलाई :– बेलपत्र, नौसुते बत्ती, बलिको निमित्त कुविण्डो, काँक्रो, मूला, बेल, जमरा राख्ने बालुवा वा माटो, जमरा राख्ने भाँडो, उम्रने खालको जौ, घटस्थापना गर्ने घडा, थाली, नरिवल, खड्ग, वस्त्र, सौभाग्य, गोबर, गहुँत ।

षष्ठीमा :- तेल, बेसार, खिचडी, दाल, चामल र बेल निमन्त्रणा गर्न पूजासामग्री ।

सप्तीमा : - पुस्तक, मसिदानी कलम, दारिम, केरा, धान, हलेदो, मानक, कचु, बेल, अशोक, जयन्ती आदि फूलपाती ।

अष्टमीमा :- केराको पात, सुपारी, हतियारहरू, पायस, होमको सामग्री सबै ।

नवमीमा :- १ वा ९ कन्याको लागि वस्त्र सौभाग्य ।

दशमीमा :- अपराजिता पूजाका लागि सामान्य पूजाका सामग्री सबै, टीकादानी, टीका, जमरा, दियो, कलश, गणेश ।

लक्ष्मीपूजाका लागि थप :- नरिवल, ओखर, कटुस, बिमिरो, लक्ष्मीको तस्बिर, सौभाग्य, पञ्चामृत, कमलको फूल रङ्गहरू ।

शिलान्यासका लागि थप सामग्री :- थाली - ५, ढुङ्गा-५, आधारशिला-५, ईंटा-५, पहेँलो धागो ३ डल्लो, सुनको प्रतिमा-११, सुनको तार-२, दीपपात्र-५, फलामको किला-४, तीर्थजल, पारो, पञ्चकषाय (डुम्री, बेल, पलाँस, वर-पीपलका पात), साँढेको सिङ पखालेको पानी, पानी सिमाली (पानीमा हुने भ्याउ) ।

ऋषिपञ्चमीपूजाका लागि थप :- सप्तर्षि थाप्ने थाली, दतिउन ३६०, बत्ती ३६०, जौ ३६०, तिल ३६० ।

लाखबत्तीका लागि थप :- थाली ३, कलश ३, प्रतिमा ३, ब्राह्मण र ब्राह्मणीलाई दिने सामान, नरिवल ३, सुनको सलेदो, चाँदीको दियो, तेल ९ लिटर, पाला, उखु ।

वास्तुका लागि थप :- सानो तामाको घडा, पञ्चरत्नसहित, वास्तुको चक्र लेख्नका लागि सेतो कपडा १ मिटर, वास्तुलाई चढाउने १ मिटर कपडा, हवन गर्न पायस (गाईको दुधमा पकाएको खिर), डुम्रीको किला -५, पान, मिठाई, सुपारी, नौ रंगका फूलमाला, नवग्रह हवन गर्ने सामानहरू ।

ग्रहसमिधामा - आँक, पलाँस, खयर, अपामार्ग, पीपल, डुम्री, शमी, दुबो, कुश ।

एकाह पुराणका लागि थप सामग्रीहरू

पूजा सामानहरू :- अबिर ५ प्याकेट, केशरी ५ प्याकेट र तिल ४ केजी, जौ ४ केजी, जनै ५० जोर, सुपारी १ पाउ, पञ्चपल्लव ७ वटा, पञ्चरत्न, सर्वोषधि, काँचो धागो, सर्स्यूं, कपुर, रातो वस्त्र ५ मिटर, सेतो वस्त्र ५ मिटर, पहेँले वस्त्र ५ मिटर, तिलको तेल ५ लिटर, आँप पीपलको पात, बोहोता दुना टपरी ।

ग्रहका लागि थप सामग्री :- छाता, जुत्ता, धोती, लठ्ठी जटा नरिवल, नौथरी वस्त्र ।

सर्वतोभद्रका लागि थप सामग्री :- रातो, सेतो, हरियो, पहेँलो रङ्गहरू वास्तुको लागि पनि ।

भगवान्को पूजाका लागि थप सामग्री :- विष्णु घडा, तामाको ठुलो गाग्री १, सानु १, तामाको थाली ठुलो १, सुनको लक्ष्मीनारायणको प्रतिमा ठुलो १, सानु ३, चाँदीको सिंहासन १, पान मसाला, चाँदीको मसीदानी १, चाँदीको कलम १, भागवतको पुस्तक १ बासा १, खटिया १ ।

लक्ष्मीनारायणलाई चढाउने :- धोती, चोलो, तिलहरी, सौभाग्य नारायणलाई धोती, गन्जी, गम्छा, वस्त्र, नरिवल ११ ।

शय्याको लागि थप :- पलङ्ग, कुर्सी, टेबुल, दराज, सिरक, डस्ना, तन्ना, सतरन्जा, दरी, तकिया, झूल ।

भाँडाहरू :- गाग्री, करुवा, कसौडी, कराई, डाडू, पन्यू, थाल, कचौरा, गिलास, चियादानी, सबै भाँडाका सेटहरू मिलाउने डालोमा १ भाग सिदा, चामल, दाल, नुन, बेसार, जिरा, मेथी, मसला, तेल, घ्यू, केराउ सानो र ठुलो, चिया, चिनी, आलु, तरकारी आदि जेजति सकिन्छ ।

लक्ष्मीनारायण तथा दम्पतीपूजाका लागि थप :-

कोट, मयलपोस, धोती, टोपी, छाता, जुत्ता, मोजा, औँठी, गहना सबै जम्मा गर्ने सारी, चोलो, पछ्यौरा, पेटीकोट, जुत्ता, मोजा, तिलहरी, गहना, औँठी, टप, सौभाग्य, सबै कुरा जेजति सकिन्छ जम्मा गर्ने ।

ब्राह्मणहरूका लागि :- धोती, कुर्ता, सुरुवाल, गन्जी, गम्छा, रुमाल, औठी, पञ्चपात्र २, आचमनी, थाली, आसनी, उपर्णा ।

गणेशका लागि :- रातो धोती, रातो गन्जी, टोपी आसनी, पञ्चपात्र, मुद्रिका ।

अरू ब्राम्हणहरूलाई :- धोती, गन्जी, गम्छा, टोपी, पञ्चपात्र, आचमनी, आसनी, मुद्रिका जे जति सकिन्छ ।

न्वारनका लागि थप :- पीपलका पात, भलायो, ढुटो, कनिका, पञ्चगव्य (दुध, दही, घ्यू, गहुँत, गोबर)

व्रतबन्धका लागि थप सामग्रीहरू :- पूर्वाङ्ग, मातृकापूजा, आभ्युदयिक श्राद्ध, मण्डपको पूजा सामग्री सबै, दुम्सीको काँडा, मृगको छाला, पलासको डन्डी, सुनथैला, मेखला, चाँदीको भिक्षापात्र, गुरुका लागि धोती, दोसल्ला वस्त्र, मन्त्रदानलाई आसनी, पञ्चपात्रो, आचमनी थाली, आठ घडा, नवग्रह समिधा, लगन लेख्ने कागज आदि ।

चौरासीपूजाका लागि थप सामग्रीहरू :- पूर्वाङ्ग, मातृका पूजा, अभ्युदयिक श्राद्ध मण्डप पूजाका सामग्री सबै, कलश ८४, थाली ८४, सुवर्णप्रतिमा ८४, वस्त्र ८४, भेटी ८४, जनै ८४, सुपारी ८४, ठुलो कलश १, चाँदीको चन्द्रमाको प्रतिमा १, ८४ ब्राह्मण पूजा, सिद्धतो भद्र १, शय्यादान, गाईदान ।

खण्ड (ख)

।। श्रीगणेशाय नमः ।।

अन्त्यकर्मपद्धति

दशदानविधिः (गाई, भूमि, तिल, सुन, घिउ, वस्त्र, धान, सख्खर, चाँदि, नुन दसदानका सामग्रीहरू हुन्)

गो–भूतिलहिरण्या-ऽऽज्यवासो धान्यं गुडानि च । रौप्यं लवणमित्याहुर्दशदानान्यनुक्रमात् ॥

१) गोदान । (२) भूमिदानम् । (३) तिलदानम् । (४) हिरण्यदानम् । (५) आज्यदानम् । (६) वस्त्रदानम् । (७) धान्यदानम । (८) गुडदानम् । (९) रजतदानम् । (१०) लवणदानम् ।

दशदानप्रयोगः (दसदान गर्न प्रायश्चित्त गोदान गर्ने)

तत्र प्रथमं ब्राह्मणानाहूय रोगिणः स्नानादिद्वारा शुद्धिं विधाय पुत्रादिः स्वयमपि स्नानादिकं विधाय शुद्धासने उपविश्याचम्य कर्मपात्रं कृत्वा सर्वप्रायश्चित्तानुकल्पं गोदानं कुर्यात् । (गोनिष्क्रयद्रव्यं वा दद्यात्) गां गोनिष्क्रयद्रव्यं ब्राह्मणं च गन्धादिभिः सम्पूज्य हस्ते कुशयवजलतिलान्यादय – (जौ, तिल, कुश लिई सङ्कल्प गर्ने)

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य मम (पितुः मातुर्वा) ज्ञाताज्ञातकामाकामदिसकृदसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टापृष्टभुक्ता–भुक्तपी तापीतसकलपातकानुपातकोपपातकलघुपातकसङ्करीकरणमलिनीकरणापात्रीकरण–जातिभ्रंश-करणप्रकीर्णकादिनानाविधपातकानां निरसेन देहावसानकाले देहशुद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थम् इमां सर्वप्रायश्चित्तप्रत्याम्नायभूतां यथाशक्त्यलङ्कृतां सवत्सां गां रुद्रदैवताम् (गोनिष्क्रयद्रव्यं अमुक दैवतं वा...) गोत्राय शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । ॐ तत्सन्न मम ।

प्रार्थना (नमस्कार गर्ने)

ॐ यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी । विश्वरूपधरो देवः प्रीयतामनया गवा ॥
प्रायश्चित्ते समुत्पन्ने निष्कृतिर्न कृता यदि । तस्य पापस्य शुद्धयर्थं धेनुमेतां ददामि ते ॥

निष्क्रयद्रव्यदाने तु (गोमूल्य भए नमस्कार गर्ने)

ॐ यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी । अस्या मूल्यप्रदानेन प्रीयतां विश्वरूपधृक् ॥
प्रायश्चित्ते समुत्पन्ने निष्कृतिर्न कृता यदि । तस्य पापस्य शुद्धयर्थं धेनुमूल्यं ददामि ते ॥

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्य कृतैतत् सर्वप्रायश्चित्तप्रत्याम्नायगोदान (गोनिष्क्रयद्रव्यदान) प्रतिष्ठासिद्धयर्थं .. द्रव्यं ... दैवतं ... गोत्राय ... शर्मणे ब्राह्मणाय दानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे । इति पठित्वा दद्यात् । इति सर्वप्रायश्चित्तं कृत्वा दशदानानि दद्यात् ।

गोदानम्

(दसदानको गाई दान गर्ने)

यथाशक्त्यलङ्कृतां गां (गोनिष्क्रयद्रव्यं वा) पुरतः स्थापयित्वा गन्धाक्षतादिभिर्गां ब्राह्मणं च सम्पूज्य कुशतिलजलादिकमादाय –

(जौ, तिल, कुश लिई सङ्कल्प गर्ने)

हरिः ॐ तत्सदित्यादि देशकालौ सङ्कीर्त्य मम अमुकस्य (पितुर्वा) (मातु) आजन्मोपार्जितसकलपरितोशमनार्थे श्रीपरमेश्वरप्रीतयेश्च दशदानान्तर्गतां इमां गां रुद्रदैवताम् (गोनिष्कयी भूतद्रव्यं वा) ... गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

प्रार्थना

(नमस्कार गर्ने)

ॐ यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी । विश्वरूपधरो देवः प्रीयतामनया गवा ॥
गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दशः । तस्मादस्याः प्रदानेन प्रीयतां मे जनार्दनः ॥

मूल्यदानपक्षे

(गोमूल्य भए प्रार्थना गर्ने)

अस्याः मूल्यप्रदानेन प्रीयतां मे जनार्दनः । इति विशेषः ।

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्य कृतैतद्दशदानान्तर्गत ... गोदानप्रतिष्ठासिद्धयर्थमिदं द्रव्यं ... ... दैवतं ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

भूमिदानम्

(जमीन (भूमि)दान गर्ने)

देयभूमिसम्बन्धिमृत्पिण्डं (भूमिमूल्यं वा) पुरतो निधाय गन्धादिभिः सम्पूज्य ब्राह्मणं च सम्पूज्य यव तिलकुशजलान्यादाय–

(पूजा गरी तिल जौ कुश जल लिएर छुने)

ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य ... ... गोत्रः ... ... मम अमुकस्य (पितुर्वा) (मातु) सर्वपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं दशदानान्तर्गतां (अमुकपरिमाणां) बहुसस्यप्रदां भूमि वराहदैवतां (भूमिमूल्यद्रव्यममुकदैवतं वा) ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

प्रार्थना

(नमस्कार गर्ने)

सर्वभूताश्रया भूमिर्वराहेण समुद्धृता । अनन्तसस्यफलदा अतः शान्तिं प्रयच्छ मे ॥
यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम् । दानान्यन्यानि मे शान्तिर्भूमिदानाद्भवन्त्विह ॥

मूल्यदानपक्षे

(मूल्य दान भए प्रार्थना गर्ने)

यतो भूमिप्रदानस्य कलां नार्हन्ति षोडशीम् । दानान्यन्यानि मे शान्तिर्भूयाद् भूमूल्यदानतः ॥ इति विशेषः ।

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्य कृतैतद् भूमिदानप्रतिष्ठासिद्धचर्थमिदं द्रव्यममुकदैवतम् ... गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

तिलदानम्

(तिल दान गर्ने)

तिलान् (तन्मूल्यं वा) पुरतो निधाय देयं ब्राह्मणं च गन्धादिभिः सम्पूज्य कुशतिलजलान्यादाय– (सङ्कल्प गर्ने)

ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य मम अमुकस्य (पितुर्वा) (मातु) आजन्मकृतैनसो निवर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं दशदानान्तर्गतानिमान्तिलान् प्रजापतिदैवतान् (तन्मूल्यद्रव्यं वा) ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

प्रार्थना

(नमस्कार गर्ने)

ॐ महर्षेर्गात्रसम्भूताः कश्यपस्य तिलाः स्मृताः । तस्मादेषां प्रदानेन मम पापं व्यपोहतु ॥

मूल्यदानपक्षे

(मूल्य दान भए प्रार्थना गर्ने)

एषां मूल्यप्रदानेन मम पापं व्यपोहतु । इति विशेषः ।

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्य कृतैतद्दशदानान्तर्गततिलदानप्रतिष्ठासिद्धचर्थमिदं द्रव्यममुकदैवतम् ... गोत्राय... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

हिरण्यदानम्

(सुन दान गर्ने)

सुवर्णं (तन्मूल्यद्रव्यं वा) पुरतः संस्थाप्य देयं ब्राह्मणं च गन्धादिभिः सम्पूज्य कुशादिकमादाय – (संकल्प गर्ने)

ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य मम अमुकस्य (पितुर्वा) (मातु) आजन्मकृतैनो निबर्हणद्वारा श्रीपरमेश्वरप्रीतये इदं दशदानान्तर्गतं सुवर्णं वन्हिदैवतं (तन्मूलद्रव्यां वा) ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

प्रार्थना

(नमस्कार गर्ने)

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्य कृतैतद्दशदानान्तर्गतसुवर्णदानप्रतिष्ठासिद्धयर्थमिदं दानप्रतिष्ठाद्रव्यमुकदैवतम् ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

आज्यदानम्

(घ्यू दान गर्ने)

आज्यं तन्मूल्यद्रव्यं वा पुरतो निधाय देयब्राह्मणौ गन्धादिभिः सम्पूज्य कुशातिलयवजलान्यादाय – (सङ्कल्प गर्ने)

ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य मम अमुकस्य (पितुर्वा) (मातु) सकलपापक्षयपूर्वकं कल्पोक्तफलावाप्तये श्रीपरमेश्वरप्रीतये दशदानान्तर्गतमिदमाज्यं मृत्युञ्जयदैवतं (तन्मूल्यद्रव्यममुकदैवतं वा) ... गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

प्रार्थना

(नमस्कार गर्ने)

ॐ कामधेनोः समुद्भूतं सर्वक्रतुषु संस्थितम् । देवानामाज्यमाहारस्ततः शान्तिं प्रयच्छ मे ॥

मूल्यदानपक्षे

(मूल्य दान भए प्रार्थना गर्ने)

देवानामाज्यमाहारो मूल्यदानात्सुखाय मे ॥ इति विशेषः ॥

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्य कृतैतद्दशदानान्तर्गत आज्यदानप्रतिष्ठासिद्धयर्थमिदं दानप्रतिष्ठाद्रव्यममुकदैवतम् ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

वस्त्रदानम्

(कपडा दान गर्ने)

वस्त्रं (तन्मूल्यद्रव्यं वा) पुरतो निधाय वस्त्रं ब्राह्मणं च गन्धादिना सम्पूज्य कुशादीन्यादाय –

ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य मम (पितुर्वा) (मातु) समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं दशदानान्तर्गतमिदं वस्त्रं बृहस्पतिदैवतं (तन्मूल्यद्रव्यममुकदैवतं वा) ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

प्रार्थना

(नमस्कार गर्ने)

ॐ शीतवातोष्णसंत्राणां लज्जाया रक्षणं परम् । देहालङ्करणं वस्त्रमतः शान्ति प्रयच्छ मे ॥

मूल्यदाने तु

(मूल्य दान भए प्रार्थना गर्ने)

देहालङ्कारणं वस्त्रं मूल्यदानात्सुखाय मे ॥ इति विशेषः ॥

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्य कृतैतद्दशदानान्तर्गतवस्त्रदानप्रतिष्ठासिद्धयर्थमिदंद्रव्यममुकदैवतम् ... ... गोत्राय ... शर्मणे ... ... ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

धान्यदानम्

(धान दान गर्ने)

धान्यं (तन्मूल्यद्रव्यं वा) पुरतो निधाय धान्यं ब्राह्मणं च गन्धादिभिः सम्पूज्य कुशादिकमादाय – (संकल्प गर्ने)

ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य मम (पितुर्वा) (मातु) समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थमिदं दशदानान्तर्गतमिदं धान्यं प्रजापतिदैवतं (तन्मूल्यद्रव्यममुकदैवतं वा) ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

प्रार्थना

(नमस्कार गर्ने)

ॐ सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् । प्राणिनां जीवनोपायमतः शान्तिं प्रयच्छ मे ॥

मूल्यदानपक्षे तु

(मूल्य दान भए प्रार्थना गर्ने)

प्राणिनां जीवनं मूल्यदानाच्छान्तिं प्रयच्छतु । इति विशेषः ।

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्य कृतैतद्दशदानान्तर्गतधान्यदानकर्मणः प्रतिष्ठासिद्धयर्थमिदं द्रव्यममुकदैवतम् ... ... गोत्राय ... शर्मणे ... ... ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

गुडदानम्

(सख्खर दान गर्ने)

गुडं (तन्मूल्यद्रव्यं वा) पुरतो निधाय गुडं ब्राह्मणं च गन्धादिना सम्पूज्य कुशादिकमादाय – (सङ्कल्प गर्ने)

ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य मम (पितुर्वा) (मातु) समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं दशदानान्तर्गतमिदं गुडं रसवर्यं सोमदैवतं (तन्मूल्यद्रव्यममुकदैवतं वा) ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

प्रार्थना

(नमस्कार गर्ने)

ॐ यथा देवेषु विश्वात्मा प्रवरश्व जनार्दन । सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ॥
प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा । तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥
मम तस्मात्परां शान्तिं ददस्व गुड सर्वदा ॥

मूल्यदानपक्षे तु (मूल्य दान भए प्रार्थना गर्ने)

मूल्यदानादतः शान्तिं ददस्व गुड सर्वदा । इति विशेषः ।

दानप्रतिष्ठा (दानप्रतिष्ठा गर्ने)

ॐ अद्य कृतैतद्दशदानान्तर्गतगुडदानकर्मणः प्रतिष्ठासिद्धयर्थमिदं द्रव्यममुकदैवतम् ... ... गोत्राय ... शर्मणे ... ... ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

रजतदानम् (चाँदी दान गर्ने)

रजतं (तन्मूल्यद्रव्यं वा) पुरतो निधाय देयं ब्राह्मणं च सम्पूज्य कुशादीन्यादाय – (सङ्कल्प गर्ने)

ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य मम अमुकस्य (पितुर्वा) (मातु) समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं दशदानान्तर्गतमिदं रजतं चन्द्रदैवतं (तन्मूल्यद्रव्यममुकदैवतं वा) ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

प्रार्थना (नमस्कार गर्ने)

ॐ प्रीतिर्यतः पितृणां च विष्णुशङ्करयोः सदा । शिवनेत्रोद्भवं रौप्यमतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा (दानप्रतिष्ठा गर्ने)

ॐ अद्यकृतैतद्दशदानान्तर्गतरजदानप्रतिष्ठासिद्धयर्थमिदं द्रव्यममुकदैवतम् ... ... गोत्राय ... शर्मणे ... ... ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

लवणदानम् (नुन दान गर्ने)

लवणं (लवणमूल्यद्रव्यं वा) पुरतो निधाय देयं ब्राह्मणं च गन्धादिभिः सम्पूज्य कुशादीन्यादाय –(सङ्कल्प गर्ने)

ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य मम अमुकस्य (पितुर्वा) (मातु) समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं दशदानान्तर्गतमिदं लवणं सर्वरसोत्कृष्टं सोमदैवतं (तन्मूल्यद्रव्यममुकदैवतं वा) ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

प्रार्थना (नमस्कार गर्ने)

ॐ यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना । शम्भोः प्रीतिकरं यस्मादतः शान्तिं प्रयच्छ मे ॥

मूल्यदाने तु (मूल्य दान भए प्रार्थना गर्ने)

शम्भोः प्रीतिकरं मूल्यदानाच्छान्तिं प्रयच्छतु ॥ इति विशेषः ।

दानप्रतिष्ठा (दानप्रतिष्ठा गर्ने)

ॐ अद्यकृतैतद्दशदानान्तर्गतलवणदानप्रतिष्ठासिद्धयर्थमिदं द्रव्यममुकदैवतम् ... ... गोत्राय ... शर्मणे ... ... ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

इति दशदानविधिः

अष्टमहादानानि

(तिल, फलाम, सुन, कपास, नुन, सप्तधान्य, भूमि र गाई दान गर्ने)

तिला लोहं हिरण्यञ्च कार्पासं लवणन्तथा । सप्तधान्यं मही गावः प्रत्येकं पावनं स्मृतम् ॥

दानवाक्यन्तु देशकालादीन्सङ्कीर्त्य अमुकगोत्र ... ... प्रवर ... ... अमुकवेद ... ... शरीरशुद्धये तिलान्पूषदेवताकान् अमुकगोत्रायेत्यादि वाक्यं संयोजयेत् ।

दानसंकल्प

(आठै वस्तुलाई पूजा गरी ब्राह्मणलाई टीका लगाई सङ्कल्प गर्ने)

ॐ तिलाद्यष्टवस्तुभ्यो नमः अद्य मम अमुकस्य (पितुर्वा) प्रतिनिधिभूतोहं तद्वद्देश्यन शास्त्रोक्त फलप्राप्तिद्वारा श्री परमेश्वरकृत्यर्थं तिलं प्रजापतिदैवतं लोहं महाभैरवदैवतं, स्वर्णम् अग्निदैवतं, कार्पासम् वनस्पतिदैवतं लवणं सोमदैवतं सप्तधान्यं प्रजापतिदैवतं भूमिं विष्णुदैवतम् गाम रुद्रदैवतं वराहदैवतं वा एतानि अष्टवस्तुनि ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय (गोत्रेभ्य शर्मेभ्यो ब्राह्मणेभ्यो विभज्य) सम्प्रददे (सम्प्रददामि)

अञ्जलिं बध्वा प्रार्थयेत्


(नमस्कार गर्ने)

तिलाः पुण्याः पवित्राश्च तिलाः सर्वकराः स्मृताः । शुक्ला वा यदि वा कृष्णा ऋषिगोत्रसमुद्भवाः ॥
यानि कानि च पापानि ब्रह्महत्यासमानि च । तिलपात्रप्रदानेन तानि नश्यन्तु सर्वदा ॥
महर्षेर्गोत्रसम्भूताः कश्यपस्य तिलाः स्मृताः । तस्मात्तेषां प्रदानेन मम पापं व्यपोहतु ॥
इति प्रार्थ्य दान प्रतिष्ठां कुर्यात् ।

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्यकृतैतत् अष्टमहादानप्रतिष्ठा सिद्धचर्थं दानप्रतिष्ठा ... ... गोत्रेभ्यो ... शर्मणेभ्यो ... ... ब्राह्मणेभ्यो तुभ्यमहं सम्प्रददे । इति दद्यात् ।



॥ इति अष्टमहादान ॥

पञ्चधेनुदानविधिः

ऋणधेनुदानम्

(पञ्चधेनुमा ऋणधेनुको पूजा गरी सङ्कल्प गर्ने)

गां (गोनिष्कयद्रव्यं वा) पुरतो निधाय गां ब्राह्मणं च सम्पूज्य कुशतिलजलान्यादाय –

ॐ विष्णुः ३ अद्येहेत्यादि पूर्वसङ्कल्पमुच्चार्य मम अमुकस्य (पितुर्वा) (मातु) ऐहिकामुष्मिकानेकजन्मार्जितदेवर्षिपितृ-मनुष्यादिसमस्तऋणपातकच्छेयद्वारा श्रीपरमेश्वरविष्णुप्रीतये इमां ऋणापनोदधेनुं रुद्रदैवतां (ऋणापनोदधेनुमूल्य ममुकदैवतं वा) अमुकगोत्रायामुक शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

प्रार्थना

(नमस्कार गर्ने)

ॐ ऐहीकामुष्मिकञ्चैव सप्तजन्मार्जितं मृणाम् । तत्सर्वं शुद्धिमायातु गामेकां ददतो मम ॥

मूल्यपक्षे

(मूल्य दान भए प्रार्थना गर्ने)

(गोमूल्यं ददतो मम) इति विशेषः अन्यत्समानम् ।

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्यकृतैतद् ऋणापनोदधेनुदानप्रतिष्ठासिद्धयर्थम्... । इति दद्यात् ।

पापापनोदधेनुदानम्

(पापापनोदधेनु दान गर्ने)

पूर्ववत् गां (गोनिष्कयद्रव्यं वा) पुरतो निधाय सम्पूज्य कुशजलान्यादाय – (सङ्कल्प गर्ने)

ॐ अद्येहेत्यादि देशकालौ सङ्कीर्त्य मम अमुकस्य (पितुर्वा) (मातु) ज्ञाताज्ञातमनोवाक्कायकृतसकलपापक्षद्वारा श्रीपरमेश्वरप्रीतये इमां पापापनोदधेनुं रुद्रदैवतां (तन्निष्कयद्रव्यममुकदैवतां वा) ... ... गोत्राय... ।

प्रार्थना

(नमस्कार गर्ने)

ॐ आजन्मोपार्जितं पापं मनोवाक्कायसम्भवम् । तत्सर्वं नाशमायातु गोप्रदानेन केशवः ॥

मूल्यदानपक्षे

(मूल्य दान भए प्रार्थना गर्ने)

गोमूल्यदानात्तत्सर्वं नाशमायातु केशवः इति विशेषः । अन्यत्समानम् ।

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्यकृतैतत् पापापनोदधेनुदानप्रतिष्ठासिद्धयर्थम्... । इति दद्यात् ।

मोक्षधेनुदानम्

(मोक्षधेनु दान गर्ने)

गां (गोनिष्कयद्रव्यं वा) पुरतो निधाय पूर्ववत् सम्पूज्य सङ्कल्पं कुर्यात् – (सङ्कल्प गर्ने)

ॐ अद्येत्यादि देशकालौ सङ्कीर्त्य मम अमुकस्य (पितुर्वा) (मातु) समस्तपापक्षयपूर्वक पापापहमहाविष्णुप्रीतये तत्प्रसादान्मोक्षप्राप्तये च इमां मोक्षधेनुं रुद्रदैवतां (तन्निष्क्रयंद्रव्यममुकदैवतं वा) ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

प्रार्थना

(नमस्कार गर्ने)

ॐ मोक्षं देहि हृषीकेश मोक्षं देहि जनार्दन । मोक्षधेनुप्रदानेन मुकुन्दः प्रीयतां मम ॥

मूल्यपक्षे

(मूल्य दान भए प्रार्थना गर्ने)

मोक्षधेनोर्मूल्यदानान्मुकुन्दः प्रीयतां मम । इति विशेषः अन्यत्समानम् ।

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्यकृतैतन् मोक्षधेनुदानप्रतिष्ठासिद्धयर्थम्० । इति दद्यात् ।

वैतरणीधेनुदानम्

(वैतरणीधेनु दान गर्ने)

कृष्णां गां (गोनिष्कयद्रव्यं वा) पुरतो निधाय गां ब्राह्मणं च गन्धादिभिः सम्पूज्य (पूजा गर्ने)

गां प्रार्थयेत्– (नमस्कार गर्ने)

ॐ धेनुके त्वं प्रतीक्षष्व यमद्वारे महाभये । उत्तितीर्षुरहं देवि वैतरण्यै नमोऽस्तुते ॥

ततो ब्राह्मणं प्रार्थयेत् – (ब्राह्मणलाई नमस्कार गर्ने)

ॐ विष्णुरूप द्विजश्रेष्ठ भूदेव पङ्क्तिपावन । ततुं वैतरणीं कृष्णां गामेकां प्रददाम्यहम् ॥

ततः कुशादिकमादाय गोपुच्छं गृहीत्वा – (भाँडामा जल राखी गाईको पुच्छरबाट धागो बाँधेर केरा वा उखुको नाउ राखी कुश जल लिई गाईको पुच्छरमा समाउने)

ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य मम अमुकस्य (पितुर्वा) (मातु) वैतरणीनदीसन्तरणार्थमिमां यथाशक्यलङ्कृतां गां रुद्रदैवतम् (तन्निष्क्रयंद्रव्यममुकदैवतं वा) ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

प्रार्थना

(नमस्कार गर्ने)

ॐ यमद्वारे महाघोरे कृष्णा वैतरणी नदी । तां तर्तुकामो यच्छामि कृष्णां वैतरणीं तु गाम् ।
या सा वैतरणी प्रोक्ता पूयशोणितवाहिनी । हेलया तर्तुकामस्तां कृष्णां गां विधिवद्ददे ॥

मूल्यपक्षे

(मूल्य दान भए प्रार्थना गर्ने)

यमद्वारे महाघोरे कृष्णां वैतरणी नदी । वैतरण्यास्तु गोमूल्यं तर्तुकामो ददामि ताम् ॥
भवसागरमग्नानां शोकतापोर्मिदुःखिनाम् । त्राता त्वं हि जगन्नाथ शरणागतवत्सल ॥

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्येकृतैतत् वैतरणीधेनुदानप्रतिष्ठासिद्धयर्थमिदं द्रव्यममुकदैवतं ... ... गोत्राय शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। इति दद्यात् ।

उत्क्रान्तिधेनुदानम्

(उत्क्रान्तिधेनु दान गर्ने)

गां (तन्निष्कयद्रव्यं वा) पुरतो निधाय देयब्रह्मणं सम्पूज्य कुशादीन्यादय – (सङ्कल्प गर्ने)

ॐ विष्णुः ३ अद्येत्यादिपूर्वसङ्कल्पमुच्चार्य मम अमुकस्य (पितुर्वा) (मातु) सुखेन प्राणोत्क्रमणसिद्धये इमां यथाशक्त्यलङ्कृतामुत्क्रान्तिसंज्ञकां गां रुद्रदैवताम् (तन्निष्कयंद्रव्यममुकदैवतम्) ... ... गोत्राय ... ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति दद्यात् ।

प्रार्थना

(नमस्कार गर्ने)

ॐ असूत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये । तुभ्यमेनां सम्प्रददे धेनुमुत्क्रान्तिसंज्ञिकाम् ॥

मूल्यदानपक्षे

(मूल्य दान भए प्रार्थना गर्ने)

धेनोरुत्क्रान्तिसंज्ञाया मूल्यं तुभ्यं ददाम्यहम् । इति विशेषः । अन्यसर्वम् समानम् ।

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्य कृतैतत् उत्क्रान्तिसंज्ञकगोदानप्रतिष्ठासिद्धयर्थमिदं द्रव्यममुकदैवतं ... ... गोत्राय... ...शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति पठित्वा ब्राह्मणाय दद्यात् ।



॥ इति पञ्चधेनुदानानि ॥

दाहसंस्कारः

शवसंस्कारः (श्रीखण्ड, चन्दन, तुलसी आदिको दाउरा राखेर चिता बनाई शव संस्कार गर्ने)

ततः प्रेतं च पुनः संस्नाप्य नूतनवस्त्रं परिधाप्य गोपीचन्दनश्रीखण्डकुङ्कुमादिभिः सर्वाङ्गं विलिप्य यथाचारंयज्ञोपवीतपुष्पमालातुलसीमालादिर्भिश्चालङ्कृत्य नूतनपट्टवस्त्रेण पादतलवर्जं शिरः प्रभृत्यङ्गुलिपर्यन्तं प्रेतमाच्छादयेत्।

चितायां शवस्थापनम् (उत्तर तर्फ शिर पारेर चितामा शव राख्ने चलन छ)

यथाविधिनिर्मितायां चितायां दक्षिणाशिरसमुत्तानदेहं प्रेतं स्थापयेत्।

शवस्य वक्षस्थलेऽन्नद्रव्यस्थापनम् (एकमाना चामल, द्रव्य छातीमा राख्ने)

ततः शवस्य मुखे सवर्णं दत्वा नूतनश्वेतवस्त्रखण्डे तण्डुलाद्यन्नं रूप्यकादिद्रव्यं च निधाय शवस्य वक्षस्थले स्थापयेत्।

सूतिकामरणे विशेषः (सुत्केरी र रजस्वलामा मरेकालाई पञ्चगव्यले शुद्ध गराई दाह गर्ने)

सूतिकायां मृतायां कुम्भे उदकं कृत्वा तत्र पञ्चगव्यं प्रक्षिप्य आपो हिष्ठा, इदमापः इत्यादिपुण्यर्ग्भिरभिमन्त्र्य ब्राह्मणानुज्ञया पञ्चदश प्राजापत्यान् हुत्वा तेन कुम्भोदकेन शतकृत्वस्तां स्नापयित्वा वस्त्रान्तरेण सवां वेष्टयित्वा दाहः कार्यः। रजस्वलामरणेऽप्येवम्। उदक्या सूतकी वा यं स्पृशति तस्याप्येष एव विधिः।

पञ्चकमरणदाहविधि (पञ्चक परेको भए पञ्चक पर्दाको विधि गर्ने)

पञ्चकमृतस्यतु दर्भमयीः पञ्चप्रतिमा कृत्वोर्णासूत्रेण वेष्टयित्वा जलयुतयवपिष्टेनानुलिप्य (सङ्कल्प गर्ने)

हस्ते कुशतिलजलान्यादाय अद्येत्यादि देशकालौ स्मृत्वा अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) पञ्चकमरणजनितव्रंशानिष्टपरिहारार्थं पञ्चकविधि करिष्ये। इति सङ्कल्प्य (पाँचओटा पुत्ला बनाउने)

१. प्रेतवाहाय नमः। २. प्रेतसखाय नमः। ३. प्रेतपाय नमः। ४. प्रेतभूमिपाय नमः। ५. प्रेतहर्त्रे नमः।

इति नामभिस्ताः प्रतिमा प्रेतवाहाद्यावाहनपूर्वकं गन्धादिभिः सम्पूज्य।

(पूजा गर्ने र शिर, आँखा, बायाँ कोखा, पेट र गोडामा राखेर दागबत्ती दिने)

दाहसमये प्रथमां प्रेतवाहं प्रतिमां प्रेतस्य शिरसि, द्वितीयाम् प्रेतसखप्रतिमां नेत्रयोः, तृतीयां प्रेतप्रतिमां वामकुक्षौ, चतुर्थीं प्रेतभूमिपप्रतिमां नाभौ, पञ्चमीं प्रेतहर्त्रीप्रतिमां पादयोर्निधाय पूर्वोक्तैरिव स्वाहान्तैनमिमन्त्रैः क्रमेण पञ्चघृताहुतीर्हुत्वा यमाय सोमं मधुमत्तयेषां ते नो गावः समवदन्तु हव्या। दूतं वो देवः स्वदयं सुमेषा ते नो रासतमुरुगायमद्य, यूयं यातः स्वस्तिभिः सदा नः ॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मु-

क्षीयमामृतात् ॥ इति मन्त्राभ्यां प्रतिमासु प्रत्येकं घृताहुतिर्जुहुयात्।
तत उदकधारां च दत्वा तदनन्तरमग्निं दद्यात्। इति पञ्चकमरणदाहविधिः।

अग्निदानम्

(अपसव्य हुने र दागवत्ती दिने)

ततः शवस्य कर्ताऽऽचम्याऽग्निं संस्कृत्य क्रव्यादाग्नये नमः इति गन्धादिभिः सम्पूज्य कृतापसव्यो दक्षिणाभिमुखो दक्षिणहस्तेऽग्निं वामहस्ते सप्तसमिधं गृहीत्वा – (तीनपटक प्रदक्षिणा गरी शिरमा अग्नि राखिदिने)

कृत्वा सुदुष्करं कर्म जानता वाप्यजानता। मृत्युकालवशं प्राप्तं नरं पञ्चत्वमागतम् ॥
धर्माधर्मसमायुक्तं लोभमोहसमावृतम्। दहेयं सर्वगात्राणि दिव्याँल्लोकान् स गच्छतु ॥ इति मन्त्रं पठित्वा चितां शीघ्र त्रिः प्रदक्षिणीकृत्य शिरोदेशे अग्निं दद्यात्। ततः सव्येन – (सव्य भई घ्यूको धारा लगाउने)

दक्षिणमुख एकां घृतधारां दद्यात्। स्त्रीदाहेऽप्यविकृत एव मन्त्रः पठनीयः पुंस्त्वाविवक्षणात्। नग्नो न दग्धव्यः दग्धशेषं किञ्चित्त्यजेत्। निः शेषस्तु नदग्धव्यः इति वचनात्।

अर्धहोमः

(अपसव्य भएर चितामा सात ओटा समिधा थपिदिने)

ततोऽर्धे दग्धे आचम्य कृतापसव्यो घृताक्तं समिधं जुहुयादनेन मन्त्रेण –
अस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनः। असौ स्वर्गाय लोकाय स्वाहा ज्वलतु पावकः ॥ इति।

अस्थिप्रक्षेपः

(सानो बाँकी रहेपछि रुमालमा वेरी जलमा क्षेपण गर्ने)

एवं शरीरं दाहयित्वा कपोतावशेषं शरीरं ज्ञात्वाऽवशिष्टभागमादाय नूतनवस्त्रेणावेष्टय क्रव्यादाय नमः इति मन्त्रेण जले प्रक्षिपेत्। अन्त्यकर्मदीपके **धर्माय नमः** इति ततः पुत्रादयः सर्वे वामहस्तस्यानामिकया अप नः शोशुचदघम् इति मन्त्रेणोदकमपनोद्य (अप्रदक्षिण्येनावर्त्य) तूष्णीं निमज्जेयुः।
ततः **असावेतत्त उदकम्** इति पारस्करवचनात् (असौ इत्यस्य स्थाने प्रेतस्य प्रथमान्तनामग्रहणम्।
कुशतिलजलान्यादायापसव्येनैव – (सङ्कल्प गर्ने र अपसव्य नै भएर अस्तु क्षेपण गर्ने)

अद्येहामुकगोत्रामुकप्रेत चितादाहजनिततापतृड्डुपशमाय एष तिलकुशतोयाञ्जलिर्मद्दत्तस्तवोपतिष्ठताम्। इत्युक्त्वा भूमौ सकृदुदकं सर्वे प्रक्षिपेयुः।

चितापिण्डदानम्

(मृत्युस्थाने शव, चत्वरस्थाने पन्था, चतुष्पथस्थाने खेचर, विश्रामस्थाने भूत, काष्ठसञ्चयनस्थाने प्रेत, चितास्थाने साधक नामले पृथक पृथक वा ६ ओटा पिण्ड दिन अपसव्य नै हुने)

ततश्चितां प्रक्षाल्य स्नानं विधाय पयसा सहितेन यवपिष्टेन तण्डुलेन वा षट् पिण्डान्निर्मायापसव्येनैव दक्षिणाभिमुखः पातितवामजानुः कुशतिलजलान्यादाय – (सम्भव नभए ६ वटै पिण्ड चितामै दिन कुश, तिल जल लिने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) प्रथमपिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्। एवं द्वितीयपिण्डस्थाने तृतीयपिण्डस्थाने इति क्रमेण षट् पिण्डासनानि दद्यात्। (क्रमैले ६ ओटा पिण्ड दिने ठाउँमा कुश राख्ने)

ततः कुशतिलजलसहितं पिण्डमादाय – (क्रमैले पिण्ड दिने)

१. अद्यामुकगोत्रामुकप्रेतमृत्युस्थाने शव नामैष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ।

२. अद्यामुकगोत्रामुकप्रेतचत्वरस्थाने पान्थ नामैष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ।

३. अद्यामुकगोत्रामुकप्रेतचतुष्पस्थाने खेचर नामैष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ।

४. अद्यामुकगोत्रामुकप्रेतविश्रामस्थाने भूत नामैष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ।

५. अद्यामुकगोत्रामुकप्रेत काष्ठसञ्चयस्थाने प्रेत नामैष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ।

६. अद्यामुकगोत्रामुकप्रेतचितास्थाने साधक नामैष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ॥

इति क्रमेण षट् पिण्डान् दद्यात् । ततः प्रत्यवनेजनं दद्यात् – (६ पटक प्रत्यवनेजन गर्ने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) इदं प्रथमपिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम् । एवमेव द्वितीयादि पञ्चपिण्डेषु क्रमेण प्रत्यवनेजनं दद्यात् ।

उदकदानम्

(नुहाएर अपसव्य नै भई कर्ता र मलामी सबैले अञ्जुली दिने)

ततः प्रेतदाहानन्तरं सर्वे शवस्पृशाः शवानुगमनकर्तारश्च चितामवलोकयन्तः – अहरहर्नीयमानो गामश्वं पुरुषं पशुम् । वैवस्वतो न तृप्येत सुराय इव दुर्मतिः ॥ इति यमगाथां गायन्तो बालपुरः सराः स्त्रियश्चाग्रे कृत्वा नदीजलाशयान्तरं पङ्क्तिक्रमेण गच्छेयुः । ततः श्यालकमन्यं ब्राह्मणं वा (उदकं करिष्यामहे) इत्युदकं प्रार्थयेयुः । ततः (कुरुध्वम्) इति प्रत्युक्तिः । तत्र यदि शतवर्षान्न्यूनः प्रेतस्तदा (कुरुध्वम् मा चैवं पुनः) इति प्रतिवचनम् । ततः कृतापसव्येनैव – (आगो छुने, काँढामा ढुङ्गा राखेर कुल्चेर स्त्री र बालबालिकाहरूलाई अघि लगाई घर आउने) दक्षिणाभिमुखा एकवस्त्रधरा (अप नः शोशुचदघम्) इति जले प्रविश्य वामकरस्यानामिकया (अपनोद्य) दक्षिणतो जलं नीत्वा तूष्णीं निमज्जेयुः । अङ्गं च न निघर्षेयुः । (कर्कादि भाष्यकाराणां मतेऽपनोदे मन्त्रः । देवयाज्ञिकमते निमज्जने ।) ततो द्विवासा आचम्य कृतापसव्या दक्षिणाभिमुखाः हस्ते कुशजलतिलान् गृहीत्वा –

(सव्य भई आचमन गरी अपसव्य हुने र जल दिने)

ॐ अद्येहामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) एष तिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठताम् ।

इत्युक्त्वा प्रेताय भूमौ एकैकमञ्जलिं सर्वेऽपि दद्युः । स्त्रीप्रेतायां तु – (स्त्री प्रेतहरूका लागि गोत्रे, प्रेते भन्ने)

अद्येहामुकगोत्रेऽमुकप्रेते एष तिलतोमाञ्जलिस्ते मया दीयते तवोप्रतिष्ठताम् । इति विशेषः ।

एवं तिलतोयाञ्जलिः सपिण्डैर्विषमदिने सगोत्रैश्च प्रत्यहं दशदिनपर्यन्तं देयः । इति दाहसंस्कारः ।

दशगात्रविधिः

तत्र प्रथमदिनकृत्यम् (दस दिनसम्मको विधि)

अथ कर्ता जलाशयसमीपे शुद्धां भूमिं दक्षिणाप्रवणां सम्पाद्य तत्र दक्षिणाप्रवणां वेदीं निर्माण गोमयेनोपलिप्य सर्वां पिण्डदानसामग्रीं सम्पाद्य – (स्नान गर्न कुश, तिल, जल लिई सङ्कल्प गरी शिरमा राख्ने)

अपसव्यं कृत्वा दक्षिणाभिमुखो भूत्वा हस्ते कुशतिलजलान्यादाय कर्म कुर्यात् – अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रथमदिननिमित्तक पिण्डदानार्थमादौ सचैलस्नानमहं करिष्ये । (इति सङ्कल्प्य स्तूष्णीं) स्नात्वा एकस्मिन्पाषाणे सूत्रं बद्ध्वा यत्र कुत्रापि कोणे संस्थाप्य– (अपसव्य भई दैनिक हुङ्गामा अञ्जुली दिने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) प्रथमदिनसम्बन्धि एष बर्धमानतिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठताम् ।

इति पठित्वा पाषाणोपरि वर्धमानतिलतोयाञ्जलिं दद्यात् । एवं द्वितीय तृतीय दिनेऽपि एते सतिलतोयाञ्जलयस्ते मया दीयन्ते तवोपतिष्ठन्ताम् । इत्यादि रूपेण दद्यात् । ततः श्राद्धदेशमागत्य पाकं संपाद्य क्रियामारभेत ।

प्रथमदिने प्रयोगः (दक्षिण फर्किएको ढिकुरो बनाई दियो बाली दक्षिण फर्किएर दियो र ऋषिको पूजा गर्ने)

कर्ता कुशहस्तः सोत्तरीयः आचम्य गौरसर्षपान् विकीर्य दीपं प्रज्वाल्या दीपं कुशवटुं च सम्पूज्य कृतापसव्यो दक्षिणाभिमुखः पातितवामजानुर्वेदिकायां दक्षिणाग्रान्कुशानास्तीर्य कुशतिलजलान्यादाय – (अपसव्य नै भई सङ्कल्प गर्ने)

अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) रौरवनाम नरकोत्तारणाय मूर्धावयवसंभूत्यै प्रथमदिननिमित्तकं शिरः पूरकपिण्डदानमहं करिष्ये । इति प्रतिज्ञासङ्कल्पं कृत्वा, पुनः कुशतिलजलान्यादाय– (पुनः कुश, जल, तिल लिने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) प्रथमदिनसम्बन्धि प्रथमपिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम् । इत्यास्तृतकुशोपरि पितृतीर्थेनावनेजनं दद्यात् ॥ (अवनेजन पिण्ड आसन दिने)

ततस्तिलघृतमधुयुतं पिण्डं कुशतिलजलसहितमादाय (कुश तिल जल पिण्ड लिने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) रौरवनामनरकोत्तारणाय प्रथमदिनसम्बन्धि एष शिरः पूरकः प्रथमपिण्डस्ते मया दीयते तवोपतिष्ठताम् । इत्यवनेजनोपरि पिण्डं दद्यात् । (पिण्ड वेदीमा राख्ने)

तत कुशतिलजलान्यादाय (कुश तिल जल लिने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम् ।

इति पिण्डोपरि प्रत्यवनेजनं दद्यात् । (प्रत्यवनेजनं जल पिण्डमा राख्ने)

तत पिण्डं पूजयेत् (चन्दन, अक्षता, भृङ्गिराजको फूल, उसिर, सुपारी, ऊन आदि चढाई धूपबत्ती गर्ने)

प्रेतमुद्दिश्य तूष्णीमेवोशीरचन्दनोर्णासूत्रभृङ्गिराजपूगीफलपुष्पाक्षतधूपदीपनैवेद्यैः पिण्डमभ्यर्च्य ।

कुशतिलजलान्यादाय (कुश, तिल, जल लिने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) प्रथमदिनसम्बन्धि प्रथमपिण्डे एतानि पिण्डस्थोशीरचन्दनोर्णासूत्रभृङ्गिराजपूगीफल-पुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्ताम् । इत्युत्सृजेत् ।

ततस्तिलतोयाञ्जलिं दद्यात् (खोची राखी तिल र जलको अञ्जुली दिने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) एष तिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठताम्। इत्येकं तिलतोयाञ्जलिं पिण्डोपरि दद्यात्।

ततः सतिलतोयपूर्णपुटपात्रमादाय (माटोको घडामा तिल जल भरी पिण्डको छेउमा राख्ने, प्रत्येक दिनको बढाएर अञ्जुलि दिने चलन पनि छ)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) इदं सतिलतोयपूर्णपात्रं ते मया दीयते तवोपतिष्ठताम्। इति पिण्डसमीपे उत्सृजेत्। (प्रथमादिदिनेषु प्रतिदिनमेकैकं वर्धयित्वेदमेवजलदानं वर्धमाना जलिदानत्वेन च क्वचिद् व्यवह्रियते।)

ततस्त्रिकाष्ठिकास्थितयोः पुटपात्रयोर्नीरक्षीरञ्चादाय (त्रिकाष्ठिमा दुध र पानी राखी सङ्कल्प गरेर चढाउने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) इमे त्रिकाष्ठिकास्थिते नीरक्षीरयुतपुटपात्रे ते मया दीयेते तवोपतिष्ठेताम्। इत्युत्सृज्य – श्मशानानलदग्धोऽसि परित्यक्तोऽसि बान्धवैः। इदं नीरमिदं क्षीरमत्र स्नाहि इदं पिब॥ इति पठेत्।

ततः सुशीतलजलपूर्णघटमग्रे कृत्वा (त्रिकाष्ठिमा ढिकुरोमाथि घडामा जल राख्ने)

अद्यामुकगोत्रामुकप्रेतैष (गोत्रे, प्रेते) सतिलसुशीतलजलोपेतो घटस्ते मया दीयते तवोपतिष्ठताम्। इत्युत्सृज्य – सुशीतलजलोपेतः सर्वोपस्करसंयुतः। एष घटो मया दत्तः प्रेताय उपतिष्ठताम्॥ इति पठेत्।

ततः सव्येनाञ्जलिं बध्वा पठेत् (सव्य भएर नमस्कार गर्ने))

अनादिनिधनो देवः शङ्खचक्रगदाधारः। अक्षयः पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव॥ इति।

ततस्तिलजलसहितां लौहदक्षिणामादाय (तिल, जल, कुश लिई फलामको दक्षिणा दिने)

अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) कृतैतच्छ्रिरः पूरकप्रथमपिण्डदानप्रतिष्ठार्थमिदं लौहं पलपरिमितं दक्षिणात्वेन दातुमहमुत्सृजे। इत्युत्सृज्य तत्सर्वं जले क्षिपेत्। ततः पिण्डदानानन्तरमाचारप्राप्तं स्नानं कुर्यात्। अनेनैव प्रकारेण दशपिण्डा देयाः॥ प्रथमदिनादेव पिण्डदानानन्तरं दशदिनपर्यन्तं पिप्पलवृक्षे जलपूर्णघटमघश्छिद्रं कृत्वा शिक्ये धारयेत्। कुशतिलजलान्यादय – (अपसव्य भएर पीपलको वृक्षमा झुन्ड्याएको घडामा जल राख्ने)

अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) पापशान्त्यध्वश्रमविनाशार्थमिदमाकाशाधिकरणकजलमद्यादि–दशरात्रं यावत्ते मया दीयते तवोपतिष्ठताम्। इत्युत्सृजेत्। एवं दशदिनपर्यन्तं प्रत्यहं कुर्यात्।

कर्ता भोजनसमये पुटकादौ सघृतमन्नं कृत्वा

अपसव्येनैव हस्ते जलं गृहीत्वा काकबलिं दद्यादनेन मन्त्रेण – (अपसव्य नै भएर पातमा काकबलि दिने)

काकोऽसि यमदूतोऽसि गृहाण बलिमुत्तमम्। यमद्वारे महाघोरे त्वमाप्यायितुमर्हसि॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च। दक्षिणां दिशमाश्रित्य प्रेतान्नं बलिमाहर॥ इति।

सव्यं कृत्वा लवणादि विनैव घृतशर्करार्द्रकसहितमन्नं स्वयं भुञ्जीत। (सव्य भएर भोजन गर्ने)

सायंकालविधिः (साँझमा सुत्ने ठाउँ नजिकै सप्तधान्यमाथि जलपूर्ण घडा राखी वत्ती वाल्ने)

कर्तृशयनस्थानसमीपे सप्तधान्योपरि जलपूर्णघटं संस्थाप्य तदुपरि तिलतैलेन घृतेन वा दशदिनपर्यन्तमहर्निशं दीपं प्रज्वालयेत् –

अन्धकारो महाघोरो रविर्यत्र न भासते । तस्य सन्तरणार्थाय दीपं दद्याद्दशान्हिकम् ॥ इति वचनात् ।

ततो दक्षिणाभिमुखाऽपसव्यं कृत्वा कुशतिलजलान्यादाय – (अपसव्य भएर दोवाटो या वलैंसीमा तीनओटा त्रिकाष्ठीमा दीप, जल, पुष्प खोचीमा राखेर सङ्कल्प गर्ने)

अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) यमदुर्गमार्गमहाघोरान्धतमः सन्तरणार्थम् अद्यादि दशदिन-पर्यन्तमहर्निशं सप्तधान्योपरिस्थापितजलपूर्णघटोपरि एष दीपस्ते मया दीयते तवोपतिष्ठताम्, इत्युत्सृजेत् । ततः सायङ्काले प्राङ्गणे गोमयोपलिप्ते त्रिकाष्ठिकोपरि पुटकादौ दीपं, पानीयं, पुष्पं संस्थाप्य आशौचान्तं यावत् प्रत्यहं दद्यात् ।

तत्र क्रमः तिलकुशजलान्यादायापसव्येनैकैकं स्पृष्ट्वा – (अपसव्य नै भएर सङ्कल्प गर्ने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) एष दीपस्ते मया दीयते तवोपतिष्ठताम् । (दीपमा जल, कुश छोड्ने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) इदं पानीयं ते मया दीयते तवोपतिष्ठताम । (जलमा छोड्ने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) इदं पुष्पं ते मया दीयते तवोपतिष्ठताम । अनेन पश्य । इदं पिब । इदं परिधेहि । इति वदेत् । (फूलमा छोड्ने, छुने र सव्य हुने)

(इति प्रथमदिनकृत्यम्)

द्वितीयदिने अन्यत्सर्वं प्रथमदिनवत् (दोस्रो दिन पहिलो दिनको जस्तै गर्ने)

जातिपुष्करनामनरकोत्तारणाय, कर्णक्षिनासिकावयवसंभूत्यै

तृतीयदिने (तेस्रो दिन पहिलो दिनको जस्तै गर्ने)

हाहाकारनामनरकोत्तारणाय गलांसभुजवक्षः पूरक

चतुर्थदिने (चौथो दिन पहिलो दिनको जस्तै गर्ने र अस्थिसञ्चय श्राद्ध गर्ने)

तामिस्रनामरनरकोत्तारणाय नाभिलिङ्ग (योनी) गुदपूरक

पञ्चमदिने (पाँचौं दिन पहिलो दिनको जस्तै गर्ने)

अन्धतामिस्रनामनरकोत्तारणाय जानुजङ्घापादपूरकः

षष्ठदिने (छैटौं दिन पहिलो दिनको जस्तै गर्ने)

जातिसंस्रवनामनरकोत्तारणाय सर्वमर्मपूरकः

सप्तमदिने (सातौं दिन पहिलो दिनको जस्तै गर्ने)

अमेध्यकृमिनामनरकोत्तारणाय सर्वनाडीपूरकः

अष्टमदिने (आठौँ दिन पहिलो दिनको जस्तै गर्ने)

पुरीषभक्षनामनरकोत्तारणाय दन्तलोमादिपूरकः

नवमदिने वासः प्रक्षालनं (नवौँ दिन पहिलो दिनको जस्तै सबै गर्ने र कपडा धुने चलन रहेको छ)

स्वमांसभक्षनामनरकोत्तारणाय वीर्यपूरकः (नवौँ वा दसौँ दिनमा पाथेय श्राद्ध गर्ने)

दशमदिने (दसौँ दिन पिण्डको काम सकी ढिकुरो फुटाएर सुनचाँदीले खनजोत गरी सप्तधान्य छर्ने)

कुम्भीपाकनामनरकोत्तारणाय पूर्णतातृप्तता क्षुद्विपर्ययहेतुको दशमः पिण्डः । पञ्चाशत्तिलतोयाञ्जलयः दशतिलतोयपूर्णपुटपात्राणि । एवं पञ्चाशत्तिलतोयाञ्जलयः । तावन्ति तिलतोयपूर्णपुटपात्राणि संयुक्तानि तैः सहेति ब्राह्मपुराणवचनात् । (कर्ता र दाजुभाइ सबैले केश मुण्डन गरी स्नान गरेर पञ्चगव्य खाने)

दशमेऽहनि पिण्डं समाप्य अरण्यं गत्वा कृतश्मश्रुकर्मणः स्पृष्टान्युत्सृज्य तिलकल्कगौरसर्षपैः शिरः स्नात्वा अहतवासा शुक्लवाससो वा गोहिरण्यादीनालभ्य प्रविशेरन् । अस्मिन् ब्रह्मणनां पञ्चगव्यप्राशनमिति ॥

(इति दशगात्रविधिः)

अस्थिसञ्चयनश्राद्धविधिः

(चौथो दिनमा गर्ने श्राद्ध)

अथ प्रयोगः कर्ता स्नानं विधाय श्राद्धभूमिं सर्षपैस्तिलैश्चावकीर्य रक्षादीपं संस्थाप्य सकलदेयानि वस्तून्यासाद्याचम्य पूर्वाभिमुख उपविश्य कर्मपात्रं कुर्यात् । (दियो र ऋषि थापेर दियो बाली पूजा गरी कर्मपात्र बनाउने)

अपवित्रः पवित्रो वेति पठित्वा (पुण्डरीकाक्षः पुनात्विति) श्राद्धीयद्रव्याणि आत्मानञ्च सिञ्चेत् । (जलले सेचन गर्ने)

प्रतिज्ञासङ्कल्प **ततः कुशतिलजलान्यादय –** (नीवी सिउरिने र कुश तिल जल लिई प्रतिज्ञासङ्कल्प गर्ने)

अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) अस्थिसञ्चयननिमित्तकश्राद्धमेकोद्दिष्टविधनाऽहं करिष्ये इति प्रतिज्ञासंकल्पं कुर्यात् । ततः देवताभ्यः इति त्रि पठेत् । (नमस्कार गर्ने)

अपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः कुशादीन्यादाय । (अपसव्य भई कुश जल लिने)

अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) अस्थिसञ्चयननिमित्तकश्राद्धे इदमासनं ते मया दीयते । तवो पतिष्ठतामिति आसनं दद्यात् ।

हस्तार्घ

(हस्तार्घ बनाउने)

ततः पुटके प्रादेशमात्रं कुशपत्रद्वयात्मकं पवित्रं पवित्रेस्य इति मन्त्रेण दक्षिणाग्रं धृत्वा शन्नोदेवीरिति जलं, तिलोसीति तिलान्, गन्धद्वारामिति गन्धम्, श्रीश्चतेति पुष्पं क्षिपेत् । (दुनामा पवित्र, जल, तिल, चन्दन, फूल राख्ने)

ततस्तदर्घ्यपात्रं वामहस्ते कृत्वा पवित्रं सपुष्पमन्नोपरि नमो नारायणाय – (पवित्र र फूल ब्राह्मणमा अर्पण गर्ने)

इति मन्त्रेण – अन्नराग्रं धृत्वा या दिव्या इति (दुना ढाक्ने)

अर्घ्यपात्रस्थजलमभिमन्त्र्य कुशादीन्यादाय – (कुश जल लिने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) अस्थिसञ्चयननिमित्तकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम् । इति अर्घ्यजलं पवित्रोपरि उत्सृजेत् । पवित्रसहितमर्घ्यपात्रमासनवामपार्श्वे– (पहिले चढाएको पवित्र र फूल दुनामा राख्ने)

प्रेताय स्थानमसीति उत्तानमेव स्थापयेत् । (ब्राह्मण पछाडि दुना उत्तानै राख्ने)

ततोऽभ्यर्च्य कुशादीन्यादाय – (ब्राह्मण पूजा गरी कुश जल लिने)

अद्यामुकगोत्रामुकप्रेतैतानि गन्धपुष्पाक्षतधूपदीपनैवेद्य पुगीफल वासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम् । इति गन्धादिकमुत्सृजेत् । ततश्चतुष्कोणमण्डलं विधाय – (चतुष्कोण बनाई एक भाग सिदा राख्ने)

श्राद्धीयान्नाग्रभागं घृततिलमधुजलयुतमादाय इदमन्न सजलमेतद् भूस्वामी पितृभ्यो नमः इत्युत्सृजेत् ।

अथान्नसङ्कल्पः

(अर्को भाग सिदा राख्ने र हातले ढाक्ने)

सोपस्करतिलघृतमधुजलयुतमन्नमुपनीय मधुनाभिघार्य पात्रालम्भनाऽवगाहनं विना पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा । इदं विष्णु इति पठित्वा अपहताऽअसुरा रक्षा ꣳ सिवेदिषदः, इति अन्नोपरि तिलान् विकीर्य (सिदाको वरिपरि तिल छर्ने)

कुशादीन्यादय

(कुश जल लिने)

अद्येहामुकगोत्रायामुकप्रेताय (गोत्रायै, प्रेतायै) अस्थिसञ्चयनश्राद्धे इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठताम् । इत्युत्सृजेत् । ततः सव्येन मधुवातेति ऋचां पाठः । मधु मधु मध्विति । (सव्य भई नमस्कार गर्ने)

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु श्रीभास्करस्य प्रसादतः ॥

नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥

वेदि निर्माणं

(अपसव्य भई वेदी निर्माण गर्ने)

इति पठित्वा अपसव्येनान्नपात्रसमीपे पिण्डदानार्थं मृत्पिण्डिकां विधाय –

रेखोल्मुकभ्रामणं विना छिन्नमूलकुशानास्तीर्य कुशजलान्यादाय । (वेदीमा रेखा कोरी कुश जल लिने)

अद्येहामुकगोत्रामुकप्रेता (गोत्रे, प्रेते) अस्थिसञ्चयनश्राद्धे पिण्डस्थाने इदमवनेजनं चे मया दीयते तवोपतिष्ठताम् । इति । ततो घृतमधुतिलयुक्तेनान्नेन पिण्डं निर्माण जलतिलकुशसहितं पिण्डमादाय ।

पिण्ड निर्माणं

(पिण्ड निर्माण गरी सङ्कल्प गर्ने र दिने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) अस्थिसञ्चयनश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् । इत्यवनेजनस्थाने पिण्डं दद्यात् । आस्तृतकुशमूलेन करं प्रोक्ष्य पिण्डशेषान्नं पिण्डसमीपे विकिरेत् । (कुशले हात पुछ्ने र पिण्ड शेष राख्ने)

सव्यं कृत्वाऽऽचम्यापसव्यं कृत्वा तूष्णीं भास्करमूर्तिं प्रेतं चिन्तयेत् । (सव्य भई आचमन गर्ने र अपसव्य हुने)

ततः कुशादीन्यादाय – (पिण्डलाई ढोग्ने र कुश जल लिने)

अद्यामुकगोत्रामुकप्रेते (गोत्रे, प्रेते) इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपष्ठितामिति प्रत्यवनेजनं पिण्डोपरि दद्यात्।

ततो नीवीं विस्रंस्य सव्यं कृत्वाऽऽचम्य अपसव्यं कृत्वा वामहस्ते सूत्रमादाय – (सव्य भई आचमन गर्ने र अपसव्य हुने)

प्रेतैतत्ते वास इति पिण्डोपरि सूत्रं धृत्वा गन्धपुष्पादिना पिण्डं सम्पूज्य। (पिण्डमा धागो चढाउने र पूजा गर्ने)

कुशादीन्यादाय – (कुश लिई सङ्कल्प गर्ने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) अस्थिसञ्चयनश्राद्धपिण्डे एतानि सूत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्ताम्। इत्युत्सृजेत्। ततः (ब्राह्मणमा जल फूल अक्षता चढाउने)

शिवा आपः सन्तु इति जलम्। सौमनस्यमस्तु इति पुष्पम्। अक्षतञ्चारिष्टमस्तु इति तण्डुलान् अन्नपात्रोपरि क्षिपेत्।

अक्षय्योदकम् कुशादीन्यादाय – (दुनामा जल राख्ने र सङ्कल्प गर्ने)

अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) अस्थिसञ्चयनश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं दत्त्वा सव्यं कृत्वा दक्षिणां दिशं पश्यन – (सव्य भई जलको धारा लगाउने)

अघोरः प्रेतोस्तु इति पूर्वाग्रां जलधारां दद्यात्।

पयोधारा (अपसव्य भई दुधको धारा लगाउने)

ततोऽपसव्यं कृत्वा सपवित्रान् कुशानास्तीर्य पुटकस्थजलादिना इदमूर्जं ते मया दीयते।

तवोपतिष्ठताम् इति पिण्डोपरि दक्षिणाग्रां पयोधारां दद्यात्। ततः पिण्डमाघ्रायोत्थापयेत्। (पिण्ड ढोग्ने)

छिन्नमूलकुशानग्नौ क्षिपेत्। अर्घपात्रं सञ्चाल्य – (अर्घ्यपात्र चलाउने)

सव्येन दक्षिणाद्रव्यमादाय – (सव्य भई दक्षिणा सङ्कल्प गर्ने)

अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) अस्थिसञ्चयनश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं तन्निष्कयं द्रव्यं वा यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे। इति दक्षिणां दद्यात्।

दीपाच्छादनम् (अपसव्य भई दियो ढाक्ने, हातपाउ धुने र सव्य भई आचमन गर्ने)

अपसव्यं कृत्वा दीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्याऽऽचम्येति पठेत्।

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषुच। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥

इति पठित्वा विष्णुस्मरणम्। (विष्णु स्मरण गर्ने)

श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत् जले वा क्षिपेत्। स्त्रिया अपि सर्वं पुरुषैकोद्दिष्टवद्भवति। परन्तु प्रतिज्ञाऽऽसनदक्षिणादानेषु तु (गोत्रायाः प्रेतायाः) इति अन्नसङ्कल्पेतु अमुक(गोत्रायै) अमुक(प्रेतायै) इति। अन्यत्र अमुकगोत्रेऽमुकप्रेते इति।

पाथेयश्राद्धविधिः

अथ प्रयोगः (नौ दिनमा या दस दिनमा गर्ने श्राद्ध)

कर्ता स्नानं विधाय श्राद्धभूमिं सर्षपैस्तिलैश्चावकीर्य रक्षादीपं संस्थाप्य – (दियो र ऋषि थापी दियो बालेर कर्मपात्र बनाउने)

श्राद्धे देयानि वस्तून्यासाद्य आचम्य पूर्वाभिमुखोपविश्य अपवित्रः पवित्रो वेति पुण्डरीकाक्षः पुनातु इति श्राद्धीयद्रव्याणि आत्मानञ्च सिञ्चेत्। (जलले सेचन गर्ने)

प्रतिज्ञासङ्कल्प तत्कुशजलान्यादाय – (नीवी सिउरिने र कुश, जल लिने)

अद्येत्यादि देशकालौ स्मृत्वा – अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) मनुष्यलोकात्प्रेतलोकगमनार्थं पाथेय श्राद्धमेकोद्दिष्टविधिनाऽहं करिष्ये। इति सङ्कल्प्य देवताभ्यः। इति त्रिः पठेत्। (नमस्कार गर्ने)

अपसव्येन दक्षिणाभिमुखः पातितवामजानुः कुशादिकमादाय। (अपसव्य भई सङ्कल्प गर्ने)

अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) ईदमासनं ते मया दीयते तवोपतिष्ठताम्। इति कुशरूपमासनमुत्सृजेत्। (ब्राह्मणमा राख्ने)

हस्तार्घपात्र निर्माणम् (हस्तार्घपात्र बनाउने)

ततः पुटके प्रादेशमात्रं कुशपत्रद्वयात्मकं पवित्रं पवित्रेस्थ इति दक्षिणाग्रं धृत्वा शन्नोदेवीरिति, जलं, तिलोऽसीति तिलान् गन्धाद्वारामिति गन्धं, श्रीश्चते इति पुष्पं क्षिप्त्वा। (दुनामा पवित्र जल तिल चन्दन र फूल राख्ने)

तदर्घ्यपात्रं वामहस्ते कृत्वा सपुष्पपवित्रमन्नपात्रोपरि नमो नारायणायेति मन्त्रेणोत्तराग्रं धृत्वा। (पवित्र र फूल चढाउने)

या दिव्या इति अर्घपात्रस्थजलमभिमन्त्र्य कुशादीन्यादाय – (कुश जल लिने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) पाथेयश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्। इति पवित्रोपरि अर्घ्यजलमुत्सृजेत्। (ब्राह्मणको पवित्र र फूल हस्तार्घपात्रमा राखी उत्तानै राख्ने

पवित्रसहितमर्घपात्रमासनस्य वामपार्श्वे प्रेताय स्थानमसीत्युत्तानममेव स्थापयेत्।

ततो गन्धादिभिरभ्यर्च्य कुशादिकमादाय – (ब्राह्मण पूजा गरी सङ्कल्प गर्ने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) पाथेयश्राद्धे एतानि गन्धपुष्पाक्षतधूपदीपनैवेद्यपूँगीफलवासांसि ते मया दीयन्ते तवोपतिठन्तामिति गन्धादिकमुत्सृजेत्। ततश्चतुष्कोणमण्डलं विधाय श्राद्धीयान्नाग्रभागं – (चतुष्कोण बनाउने)

घृतलितमधुजलयुतमादाय – (एक भाग सिदा राख्ने र सङ्कल्प गर्ने)

इदमन्नं सजलमेतद् भूस्वामिपितृभ्यो नमः। इत्युत्सृजेत्। –

ततो व्यञ्जनमधुघृतजलयुतमन्नमुपनीयपात्रालम्भनाङ्गुष्ठावगाहनं विना। (अर्को भाग सिदा राखी दुवै हातले ढाक्ने)

पृथिवी ते पात्रं०, इदं विष्णुरिति सुरेत्यन्तं च पठित्वा अपहता असुरारक्षा ꣳसि वेदिषदः इति तिलान्नोपरि क्षिप्त्वा कुशादिकमादाय। (तिल छर्की कुश जल लिई छुने)

अद्यामुकगोत्रायामुकप्रेताय (गोत्रायै, प्रेतायै) पाथेयश्राद्धे इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठतामित्युत्सृजेत्।

सव्येन मधुवाता० मधु मधु मध्विति च पठेत्। (सव्य भई हात जोड्ने)

अन्नहीनं क्रियाहीनं विधिहनिं च यद्भवेत्। तत्सर्वमच्छिद्रमस्तु श्रीभास्करस्य प्रसादतः॥

नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः । इति ।
अत्र विकिरनिषेधः । अपसव्येनान्नपात्रसमीपे पिण्डदानार्थं पिण्डिकां निर्माय – (अपसव्य भई वेदी निर्माण गर्ने)
तत्र रेखोल्मुकभ्रामणं विना छिन्नमूलकुशानास्तीर्य । कुशादीन्यादाय – (सङ्कल्प गर्ने)
अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) पाथेयश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठतामित्या-
स्तृतकुशोपरि अवनेजनं दद्यात् । (पिण्डसहित कुश, तिल र जल लिने)
मधुघृततिलयुक्तेनान्नेन पिण्डं निर्माण कुशतिलजलसहितं पिण्डमादाय –
अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) पाथेयश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठतामित्यवनेजनोपरि पिण्डं दद्यात् ।
आस्तृतकुशमूलेन करं प्रोक्ष्य पिण्डशेषान्नं पिण्डसमीपे विकिरेत् । (कुशले हात पुछ्ने र पिण्ड शेष राख्ने)
सव्यं कृत्वाऽऽचम्य अपसव्यं कृत्वा तूष्णीं भास्वरमूर्तिं प्रेतं चिन्तयेत् । (सव्य भई आचमन गरी अपसव्य हुने)
ततः कुशादीन्यादाय – (पिण्डतिर निहुरी कुश जल लिने)
अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठतामिति प्रत्यवनेजनं दद्यात् ।
ततो नीवीं विस्रंस्य सव्यं कृत्वाऽऽचम्य अपसव्यं कृत्वा – (सिउरेको कुश फालेर सव्य भई आचमन
गरी अपसव्य हुने र धागो चढाउने)
वामहस्तेन सूत्रमादाय कराभ्यां गृहीत्वा प्रेतैतत्ते वासः इति पिण्डोपरि कृत्वा गन्धादि पिण्डं सम्पूज्य –
कुशादीन्यादाय – (पूजा गरी सङ्कल्प गर्ने)
अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) पाथेयश्राद्धपिण्डे एतानि सूत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यानि ते मया दीयन्ते
तवोपतिष्ठन्तामिति गन्धादिकमुत्सृजेत् । ततः शिवा आपः सन्तु इति जलम् । सौमनस्यमस्तु इति पुष्पम् ।
अक्षतञ्चारिष्टमस्तु इति तण्डुलानन्नपात्रोपरि क्षिप्त्वा । (ब्राह्मणमा जल फूल अक्षता चढाउने)
कुशादीन्यादाय – (कुश जल लिने)
अदामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) पाथेयश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं दद्यात् ।
ततः सव्यं कृत्वा दक्षिणां दिशं पश्यन् अघोर प्रेतोऽस्तु इति पूर्वाग्रां जलधारां दद्यात् । (सव्य भई जल चढाउने)
अपसव्यं कृत्वा पुटकस्थजलादिना – (अपसव्य भई दुध चढाउने)
इदमुर्जं ते मया दीयते तवोपतिष्ठताम् इति दक्षिणाग्रां पयोधारां दद्यात् । पिण्डमाघ्रायोत्थापयेत् ।
छिन्नमूलकुशानग्नौ दहेत् । अर्घ्यपात्रं सञ्चाल्य – (पिण्डतिर निहुरिएर पिण्ड उठाई अर्घपात्र चलाउने)
सव्येन दक्षिणाद्रव्यमादाय – (सव्य भई दक्षिणा सङ्कल्प गर्ने र दिने)
अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) मनुष्यलोकात्प्रेतलोकगमनार्थं पाथेयश्राद्धप्रतिष्ठा साङ्गतासिद्धयर्थं दक्षिणां
रजतं चन्द्रदैवतं तन्निष्कयं द्रव्यं वा यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय० । (अपसव्य भई दियो ढाक्ने)
अपसव्यं कृत्वा दीपमाच्छाद्य सव्येन हस्तौ पादौ प्रक्षाल्याऽऽचम्य – (हातपाउ धुने र सव्य भई आचमन गर्ने)
प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च । स्मरणादेव तद्विष्णोः सम्पूर्ण स्यादिति श्रुतिः ॥
इति विष्णुं स्मृत्वा । श्राद्धीयवस्तूनि ब्राह्मणाय दद्यात् जले वा क्षिपेत् ॥ (विष्णु स्मरण गर्ने)

॥ इति पाथेयश्राद्धविधिः ॥


नारायणबलिप्रयोगः



ब्राह्मण आसन


हवनवेदी





रुक्मिणी सहित
अष्ट शक्ति

सत्यश कलश



अथ नारायणबलिप्रयोगः

(नारायणबलि गर्ने)

प्रथमं गोदानम्

कुशादीन्यादाय – (आचमन गरेर पवित्र धारण गरी गोदान गर्ने)

ॐ विष्णुर्विष्णुर्विष्णुः नमः परमात्मने पुरुषोत्तमाय ॐ तत्सत् अद्यैतस्य विष्णोराज्ञया जगत्सृष्टिकर्मणि प्रवर्तमानस्य ब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलि प्रथम-चरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे ... क्षेत्रे बौद्धावतारे ... संवत्सरे उत्तरायणे (दक्षिणायने) ..... ऋतौ ..... मासे ..... पक्षे .... तिथौ .... वासरे .... गोत्रः .... शर्मा (वर्मा, गुप्तोऽहम्) गोत्रस्य, प्रेतस्य, (गोत्रायाः प्रेतायाः) और्ध्वदैहिकसम्प्रदानयोग्यताप्राप्त्यर्थं क्रियमाणनारायणबलिकर्माधिकारसिद्धयर्थं गोनिष्क्रयभूतद्रव्यम् ... शर्मणे ब्राह्मणाय भवते सम्प्रददे 'दातुमुत्सृज्ये'

ततो दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

ॐ अद्ययथोक्तगुणविशिष्टतिथ्यादौ .... गोत्रः .... शर्मा (वर्मा, गुप्तोऽहम्) कृतस्य गोनिष्क्रयद्रव्यदानकर्मणः साङ्गतासिद्धचर्थं तत् सम्पूर्णफलप्राप्त्यर्थमिदं दक्षिणाद्रव्यं .... शर्मणे ब्राह्मणाय भवते सम्प्रददे दातुमुत्सृज्ये ।

प्रतिज्ञासङ्कल्प

कुशादीन्यादाय – – (प्रतिज्ञा संकल्प गर्ने)

ॐ विष्णुर्विष्णुर्विष्णुः नमः परमात्मने पुरुषोत्तमाय ॐ तत्सत् अद्यैतस्य विष्णोराज्ञया जगत्सृष्टिकर्मणि प्रवर्तमानस्य ब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलि प्रथम-चरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे ... क्षेत्रे बौद्धावतारे ... संवत्सरे उत्तरायणे (दक्षिणायने) ..... ऋतौ ..... मासे ..... पक्षे .... तिथौ .... वासरे .... गोत्रः .... शर्मा (वर्मा, गुप्तोऽहम्) गोत्रस्य, प्रेतस्य, (गोत्रायाः प्रेतायाः) शास्त्रोक्तदुर्मरणदोषाणांमध्ये सम्भावितदोषपरिहारपूर्वकमौर्ध्वदैहिकसम्प्रदानयोग्यताप्राप्त्यर्थमुत्तम-लोकप्रात्यर्थं च नारायणबलिकर्म अहं करिष्ये ।

विष्णुस्मरणं

(विष्णुको ध्यान गर्ने)

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

ब्राह्मणवरणं

कुशादीन्यादाय – (ब्राह्मण वरण गर्ने)

ॐ अद्य यथोक्तगुणविशिष्टतिथ्यादौ ... गोत्रः ... शर्मा (वर्मा, गुप्तोऽहम्) ... गोत्रस्य, प्रेतस्य (गोत्रायाः प्रेतायाः)

दुर्मरणदोषनिवृत्तिपूर्वकमौर्ध्वदैहिकसम्प्रदानयोग्यताप्राप्त्यर्थंक्रियमाणनारायणबलिकर्मणि विविधसूक्तपाठकरणार्थं विविधमन्त्रजपकरणार्थं वा होमादिकर्मकर्तुं च एभिर्वरणद्रव्यैः ... गोत्रान् ... शर्मणः ब्राह्मणान् युष्मान् वृणे। वृत्ताः स्म।

अष्टशक्तिसहित सत्येश स्थापनं (रुक्मिणीसहित आठ शक्ति र सत्येशको (विष्णु) को स्थापना गर्ने)

ॐ रुक्मिण्यै नमः, रुक्मिणीमावाहयामि, स्थापयामि। ॐ सत्यभामायै नमः, सत्यभामामावाहयामि, स्थापयामि, ॐ जाम्बवत्यै नमः, जाम्बवतीमावाहयामि, स्थापयामि। ॐ नाग्नजित्यै नमः, नाग्नजितीमावाहयामि, स्थापयामि ॐ कालिन्द्यै नमः, कालिन्दीमावाहयामि, स्थापयामि। ॐ मित्रविन्दायै नमः, मित्रविन्दामावाहयामि, स्थापयामि, ॐ लक्ष्मणायै नमः, लक्ष्मणामावाहयामि, स्थापयामि। ॐ भद्रायै नमः, भद्रामावाहयामि, स्थापयामि।

अष्टदललोपरि कलशं स्थापयत् (अष्टदल वरिपरि आठ शक्तिको आवाहन गरी वीचमा कलश स्थापना गर्ने)

भूरसितिभूमिसोधनम्

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छ पृथिवीन्दृ ँहपृथिवीं मा हि ँसीः॥ धान्यमसीति धान्यं स्थापयेत्– (धानमा छुने)

ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा। दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोऽसि॥

आ जिघ्रकलशमिति धन्योपरि अब्रणं कलशं स्थापयेत् (कलशलाई छुने र स्थापना गर्ने)

ॐ आ जिघ्र कलशं महचा त्वा विशन्त्विन्दवः।
पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः॥

प्रत्येक मन्त्रेण स्थापयेत् – (प्रत्येक मन्त्रले कलश स्थापना गर्ने)

कलशोपरि पवित्रं क्षिपेत् (कलश स्थापना गरी पवित्र राख्ने)

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥

कलशोपरि पूर्णपात्रं (कलशमा पूर्णपात्र राख्ने)

ॐ पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत। वस्नेव विक्रीणावहाऽइषमूर्ज ँशतक्रतो॥

प्राणप्रतिष्ठा सङ्कल्प (सङ्कल्प गर्ने)

ॐ अद्य पूर्वोच्चारित ग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ ... गोत्रः ... शर्मा (वर्मा, गुप्तोऽहम्) अस्यां सत्येशमूर्तौ अवघातादिदोषपरिहारार्थमग्न्युत्तराणं प्राण प्रतिष्ठां च करिष्ये।

ॐ विष्ण्वादयो देवाः सुप्रतिष्ठिता वरदा भवन्तु।

प्राणप्रतिष्ठा

(सत्येश (विष्णु भगवान्) को सुनको प्रतिमा राखेर प्राणप्रतिष्ठा गर्ने)

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमं दधातु । विश्वे देवासऽइह मादयन्तामों३प्रतिष्ठ ॥ ॐ अपां पतये वरुणाय नमः ।

अग्न्युत्तारण विधि

(प्रतिमामा घ्यू लगाई स्नान गराउने)

ॐ समुद्रस्य त्वाऽवकयाग्ने परि व्ययामसि । पावको अस्मभ्य ँ शिवो भव ॥
ॐ हिमस्य त्वा जरायुणाऽग्ने परि व्ययामसि । पावको अस्मभ्य ँ शिवो भव ॥
ॐ उप ज्मन्नुप वेतसेऽव तर नदीष्वा । अग्ने पित्तमपामसि मण्डूकि तार्भिरा गहि ॥
सेमं नो यज्ञं पावकवर्ण ँ शिवं कृधि ॥ ॐ अपामिदं न्ययन ँ समुद्रस्य निवेशनम् ।
अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्य ँ शिवो भव ॥
ॐ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् वक्षि यक्षि च ॥
ॐ स नः पावक दीदिवोऽग्ने देवाँ२ इहा वह । उप यज्ञ ँ हविश्च नः ॥
ॐ पावकया यश्चितयन्त्या कृपा क्षामन् रुरुच उषसो न भानुना ।
तुर्वन न यामन्नेतशस्य नू रण आयो घृणे न ततृषाणो अजरः ॥
ॐ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ॥
अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्य ँ शिवो भव ॥
ॐ नृषदे वेडप्सुषदे वेड् बर्हिषदे वेड् वनसदे वेट् स्वर्विदे वेट् ॥
ॐ ये देवा देवानां यज्ञिया यज्ञियाना ँ संवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य ॥
ये देवा देवेस्वधि देवत्वमायन् ये ब्रह्मणः पुर एतारो अस्य ।
येभ्यो न ऋते पवते धाम किञ्चन ते दिवो न पृथिव्या अधि स्नुषु ॥
ॐ प्राणदा अपानदा व्यानदा वर्चेदा वरिवोदाः । अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्य ँ शिवो भव ॥

अथ प्रतिष्ठा

(फूल अक्षता लिई छुने)

ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ ठँ क्षँ हँ सः सोऽहम् अस्याः सत्येशमूर्तेः प्राणा इह प्राणाः ॥
ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ ठँ क्षँ हँ सः सोऽहम् अस्याः सत्येशमूर्तेः जीव इह स्थितः ॥
ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ ठँ क्षँ हँ सः सोऽहम् अस्याः सत्येशमूर्तेः सर्वाणिः
इन्द्रियाणि वाङ्मनस्त्वक्चक्षुः श्रोत्रजिव्हाघ्राणपाणिपादपायूपस्थानि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥
ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमं दधातु । विश्वे देवासऽइह

मादयन्तामोंश्प्रतिष्ठ ॥ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च । अस्यै देवत्वमर्चायै मामहेति च कश्चन ॥
अष्टशक्तिसहिताय सत्येशाय नमः । आवाहयामि, स्थापयामि, पूजयामि ।

अष्टशक्तिसहित सत्येश पूजनम्

(रुक्मिणी सहित आठ शक्ति र सत्येश (विष्णु) को पूजा गर्ने)

ध्यानम्

(फूल अक्षता लिई नमस्कार गर्ने)

ॐ उर्व्यां क्षीरसमुद्रेऽस्मिन् व्योम्नि सत्येशसंस्थिता । अत्र त्वं सत्यया सार्द्धं सत्येश भव सन्निधौ ॥
अष्टशक्तिसहिताय सत्येशाय नमः । ध्यानार्थं पुष्पं समर्पयामि ।

आसनम्

(कुश राख्ने)

ॐ सोमसूर्याग्निसंकाशं पद्ममष्टदलान्वितम् । आसनं गृह्ण सत्येश त्रैलोक्यस्थितिकारण ॥
अष्टशक्तिसहिताय सत्येशाय नमः । आसनम् समर्पयामि ।

पाद्यम्

(जल चढाउने)

अष्टशक्तिसहिताय सत्येशाय नमः । पाद्यं समर्पयामि ।

अर्घ्यम्

(अर्घ चढाउने)

ॐ सत्येश सुखभूयिष्ठ सत्येश सुखदायक । सत्येश सत्ययायुक्त गृहाणाऽर्घ्यं नमोऽस्तु ते ॥
अष्टशक्तिसहिताय सत्येशाय नमः । अर्घ्यं समर्पयामि ।

आचमनीयम्

(जल चढाउने)

अष्टशक्तिसहिताय सत्येशाय नमः । आचमनं समर्पयामि ।

स्नानीयम्

(जल चढाउने)

अष्टशक्तिसहिताय सत्येशाय नमः । स्नानं समर्पयामि ।

पञ्चामृतम्

(पञ्चामृत चढाउने)

ॐ पञ्चामृतं मयानीतं पयो दधि घृतं मधु । शर्करया समायुक्तं स्नानार्थं प्रतिगृह्यताम् ॥
अष्टशक्तिसहिताय सत्येशाय नमः । पञ्चामृतेन स्नापयामि ।

शुद्धोदकेन

(शुद्ध जल चढाउने)

अष्टशक्तिसहिताय सत्येशाय नमः । शुद्धोदकेन स्नापयामि ।

वस्त्रम्

(वस्त्र चढाउने)

अष्टशक्तिसहिताय सत्येशाय नमः । वस्त्रोपवस्त्रं समर्पयामि ।

यज्ञोपवीतम्

(जनै चढाउने)

अष्टशक्तिसहिताय सत्येशाय नमः । यज्ञोपवीतं समर्पयामि ।

गन्धम्

(चन्दन चढाउने)

ॐ श्रीखण्डं चन्दनं दिव्यं गन्धाढचं सुमनोहरम् । विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥

अष्टशक्तिसहिताय सत्येशाय नमः । चन्दनं समर्पयामि ।

तुलसीदलम्

(तुलसी मञ्जरी चढाउने)

अष्टशक्तिसहिताय सत्येशाय नमः । तुलसीदलं समर्पयामि ।

पुष्पमालाम्

(फूल र माला चढाउने)

ॐ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो । मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥

अष्टशक्तिसहिताय सत्येशाय नमः । पुष्पं पुष्पमालां च समर्पयामि ।

दुर्वा

(दुबो चढाउने)

अष्टशक्तिसहिताय सत्येशाय नमः । दुर्वांकुरान् समर्पयामि ।

द्रव्यम्

(द्रव्य चढाउने)

अष्टशक्तिसहिताय सत्येशाय नमः । नानापरिमलद्रव्याणि समर्पयामि ।

धूपम्

(धूप बालेर घुमाउने)

ॐ वनस्पतिरसोद्भूतो गन्धाढचो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

अष्टशक्तिसहिताय सत्येशाय नमः । धूपमाघ्रापयामि ।

दीपम्

(बत्ती बालेर देखाउने)

अष्टशक्तिसहिताय सत्येशाय नमः । दीपं दर्शयामि ।

नैवेद्यम्

(नैवेद्य चढाउने)

ॐ त्राता त्वमेव सत्येश सत्यया सह चिन्त्यसे । गृहाण देवदेवेश मम नैवेद्यमुत्तमम् ॥

अष्टशक्तिसहिताय सत्येशाय नमः । नैवेद्यं निवेदयामि । नैवेद्यान्ते आचमनीयं जलं समर्पयामि । (जल चढाउने)

ताम्बूलम्

(पान मसला चढाउने)

ॐ पुगीफलं महाद्दिव्यं नागवल्लीदलैर्युतम् । एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

अष्टशक्तिसहिताय सत्येशाय नमः । ताम्बूलं समर्पयामि ।

दक्षिणा

(द्रव्य, भेटी चढाउने)

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

अष्टशक्तिसहिताय सत्येशाय नमः । दक्षिणां समर्पयामि ।

प्रदक्षिणा

(फूल लिएर घुम्ने)

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणा पदे पदे ॥

अष्टशक्तिसहिताय सत्येशाय नमः । प्रदक्षिणां समर्पयामि ।

नीराजनम्

(वत्ती वालेर अर्पण गर्ने)

ॐ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च । त्वमेव सर्वज्योतींषि आरार्तिक्यं प्रतिगृह्यताम् ॥

अष्टशक्तिसहिताय सत्येशाय नमः । आरार्तिक्यं समर्पयामि ।

पुष्पाञ्जलि

(फूल, अक्षता लिएर नमस्कार गर्ने)

ॐ नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च । पुष्पांजलिर्मया दत्तो गृहाण परमेश्वर ॥

अष्टशक्तिसहिताय सत्येशाय नमः । पुष्पांजलिं समर्पयामि ।

प्रार्थना

(फूल लिएर नमस्कार गर्ने)

ॐ अग्ने रुद्रेश गोविन्द विष्णो चक्रिन् नमोऽस्तु ते । पूजां गृहाण देवेश प्रीयतां गरुडध्वज ॥

अष्टशक्तिसहिताय सत्येशाय नमः । प्रार्थनां समर्पयामि ।

क्षमा–प्रार्थना

(दुवै हात जोडेर क्षमा माग्ने)

अपराधसहस्राणि लक्षकोटियुतानि च । नश्यन्ति तत्क्षणात् पापं सत्येशस्य च पूजनात् ॥

अष्टशक्तिसहिताय सत्येशाय नमः । क्षमाप्रार्थनां समर्पयामि ।

विशेषार्घ्य

(अर्घ दिने)

ॐ यज्ञेशाऽच्युत देवेश सत्यरूप सनातन । अनेनाऽर्घ्यप्रदानेन सर्वपापादिमोचय ॥

अष्टशक्तिसहिताय सत्येशाय नमः । विशेषार्घ्यं समर्पयामि ।

अग्निस्थापनम्

(अग्निस्थापना विधि अनुसार सबै गर्ने)

सङ्कल्प

कुशादीन्यादाय –

(कुश जल लिएर सङ्कल्प गर्ने)

ॐ अद्य पूर्वोच्चारितग्रहगुणगणविशेषेणविशिष्टायां शुभपुण्यतिथौ ... गोत्रः शर्मा (वर्मा, गुप्तोऽहम्) अस्मिन् नारायणबलिहवनकर्मणि पञ्चभूसंस्कारपूर्वकमग्निस्थापनं करिष्ये ।

पञ्चम कलश स्थापनम्

(पाँचओटा कलशहरू स्थापना गर्ने)

सौवर्णं कारयेद् विष्णुं ब्रह्माणं रौप्यकं तथा । रुद्रस्ताम्रमयः कायो यमो लोहमयः खग ॥
पश्चिमे विष्णुकलशं गङ्गोदकमन्वितम् । तस्योपरि न्यसेद्विष्णुं पीतवस्त्रेण वेष्टितम् ॥
पूर्वे तु ब्रह्मकलशं क्षीरोदकसमन्वितम् । ब्रह्माणं स्थापयेत् तत्र श्वेतवस्त्रेण वेष्टितम् । ॥
उत्तरस्यां रुद्रकुम्भं पूरितं मधुसर्पिषा । श्रीरुद्रं स्थापयेत् तत्र रक्तवस्त्रेण वेष्टितम् ॥
दक्षिणस्यां यमघटमिन्द्रोदकमसमन्वितम् । कृष्णवस्त्रेण संवेष्टच तस्योपरि यमं न्यसेत् ॥
ब्रह्मा रौप्यमयो देवो विष्णुः स्वर्णमयः स्मृतः । रुद्रस्ताम्रमयो देवो यमो लोहमयः स्मृतः ॥
प्रेतस्यपुमयः शुभ्रोऽथवा लोहमयः स्मृतः । यद्वा कुशमया ह्येते स्थाप्याश्चैव पृथक् पृथक् ॥

(पाँच प्रतिमा)
ब्रह्मा – चाँदी
विष्णु – सुन
रुद्र – तामा
यम – फलाम
प्रेत – फलाम

प्राणप्रतिष्ठा

(पाँच कलशमा पाँचै प्रतिमाको प्राणप्रतिष्ठा गर्ने)

सङ्कल्प

कुशादीन्यादाय –

(कुश जल लिने)

ॐ अद्य पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ ... गोत्रः शर्मा (वर्मा, गुप्तोऽहम्) आसु ब्रह्मविष्णुरुद्रयमप्रेतप्रतिमासु अवघातादिदोषपरिहारार्थमग्न्युत्तारणपूर्वकप्राणप्रतिष्ठांकरिष्ये ।

अग्न्युत्तारण विधि

(पाँचै प्रतिमालाई घ्यू लगाई स्नान गराउने)

(पेज नं. ४०७ मा हेर्नुहोस्)

पूजनम्

(पाँचै कलशमा पाँचैओटा प्रतिमा राखेर ब्रह्मा, विष्णु, रुद्रको पूजा गर्ने र अपसव्य भएर यम र प्रेतको पूजा गर्ने)

(पेज नं. ४०८ मा हेर्नुहोस्)

आज्य हवनम्

(घ्यू हवन गर्ने)

ॐ प्रजापतय स्वाहा इदं प्रजापतय न मम ।
ॐ इन्द्राये स्वाहा, इदम् इन्द्रायै न मम । ॐ अग्नये स्वाहा, इदमग्नये न मम ।
ॐ सोमाय स्वाहा, इदं सोमाय न मम प्रोक्षणीपात्रेऽपि

(सुरोको टुप्पो प्रोक्षणीमा चोब्ने)

अस्मिन् होमकर्मणि

(हातमा जल लिएर छोडिदिने)

अस्मिन् होमकर्मणि या या यक्षमाणदेवता ताभ्यस्ताभ्य इदं हवनीयद्रव्यं मया परित्यक्तं तत्सद्यथादैवतमस्तु न मम ।

प्रधान होम

(हवन गर्ने)

ॐ युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्महो देवस्य सवितुः परिष्टुतिः स्वाहा ॥ इदं विष्णवे न मम ।

ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पा ꣳ सुरे स्वाहा ॥ इदं विष्णवे न मम।
ॐ इरावती धेनुमती हि भूत ꣳ सूयवसिनी मनवे दशस्या।
व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ॥ इदं विष्णवे न मम।
ॐ देवश्रुतौ देवेष्वा घोषतं प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम्।
स्वं गोष्ठमा वदतं देवी दुर्ये आयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टमत्र रमेथां वर्ष्मन् पृथिव्याः ॥
स्वाहा ॥ इदं विष्णवे न मम।
ॐ विष्णोर्नुकं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजा ꣳ सि।
यो अस्कभायदुत्तर ꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥ स्वाहा ॥ इदं विष्णवे न मम।
ॐ दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण उरोरनतरिक्षात्।
उभा हि हसता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वा ॥ स्वाहा ॥ इदं विष्णवे न मम।
ॐ प्र तद्विष्णु स्तवते वीर्येण मृणाो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ स्वाहा ॥ इदं विष्णवे न मम।
ॐ विष्णो रराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि।
वैष्णवमसि विष्णवे त्वा ॥ स्वाहा ॥ इदं विष्णवे न मम ॥
ॐ लोमभ्यः स्वाहा। ॐ लोमभ्य स्वाहा ॥ ॐ त्वचे स्वाहा। ॐ त्वचे स्वाहा ॥
ॐ लोहिताय स्वाहा। ॐ लोहिताय स्वाहा ॥ ॐ मेदोभ्यः स्वाहा। ॐ मेदोभ्यः स्वाहा ॥
ॐ मासेभ्यः स्वाहा। ॐ मासेभ्यः स्वाहा ॥ ॐ स्नावभ्यः स्वाहा। ॐ स्नावभ्यः स्वाहा ॥
ॐ ऽस्थभ्यः स्वाहा। ॐ ऽस्थभ्यः स्वाहा ॥ ॐ मज्जभ्यः स्वाहा। ॐ मज्जभ्यः स्वाहा ॥
ॐ रेतसे स्वाहा। ॐ पायवे स्वाहा। ॐ आयासाय स्वाहा। ॐ प्रायासाय स्वाहा।
ॐ संयासाय स्वाहा। ॐ वियासाय स्वाहा। ॐ उद्यासाय स्वाहा। ॐ शुचे स्वाहा।
ॐ शोचते स्वाहा। ॐ शोचमानाय स्वाहा। ॐ शोकाय स्वाहा। ॐ तपसे स्वाहा।
ॐ तप्यते स्वाहा। ॐ तप्यमानाय स्वाहा। ॐ तप्ताय स्वाहा। ॐ घर्माय स्वाहा।
ॐ निष्कृत्यै स्वाहा। ॐ प्रायश्चित्त्यै स्वाहा। ॐ भेषजाय स्वाहा। ॐ यमाय स्वाहा।
ॐ अन्तकाय स्वाहा। ॐ मृत्यवे स्वाहा। ॐ ब्रह्मणे स्वाहा। ॐ ब्रह्महत्यायै स्वाहा।
ॐ विश्वेभ्यो देवेभ्यः स्वाहा। ॐ द्यावापृथिवीभ्या ꣳ स्वाहा।
ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमि ꣳ सर्वत्र स्पृत्वात्यतिष्ठद्दशाङ्गुलम्। स्वाहा ॥
ॐ पुरुष एवेद ꣳ सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ स्वाहा ॥
ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ स्वाहा ॥
ॐ त्रिपाद्दूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत् पुनः। ततो विष्वङ् व्यक्रामत्साशनानशनेऽअभि ॥ स्वाहा ॥
ॐ ततो विराडजायत विराजोऽअधि पूरुषः। स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ स्वाहा ॥

ॐ तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ स्वाहा ॥
ॐ तस्माद्यज्ञात् सर्वहुतऽ ऋचः सामानि जज्ञिरे। छन्दा ꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ स्वाहा ॥
ॐ तस्मादश्वाऽ अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ स्वाहा ॥
ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातऽमग्रतः। तेन देवाऽ अयजन्त साध्याऽ ऋषयश्च ये ॥ स्वाहा ॥
ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्यासीत् किं बाहू किमूरू पादाऽ उच्येते ॥ स्वाहा ॥
ॐ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्या ꣳ शूद्रोऽअजायत ॥ स्वाहा ॥
ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ स्वाहा ॥
ॐ नाभ्याऽआसीदन्तरिक्ष ꣳ शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ ऽ अकल्पयन् ॥ स्वाहा ॥
ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्मऽइद्ध्मः शरद्धविः ॥ स्वाहा ॥
ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाऽअबद्ध्नन् पुरुषं पशुम् ॥ स्वाहा ॥
ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ स्वाहा ॥
ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पा ꣳ सुरे ॥ स्वाहा ॥
ॐ आपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः।
याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ स्वाहा ॥
ॐ प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः।
ता आऽववृत्रन्नधरागुदक्ता अहिं बुध्न्यमनु रीयमाणाः।
विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ॥ स्वाहा ॥
ॐ विष्णोर्नुकं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजा ꣳ सि।
यो अस्कभायदुत्तर ꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥ स्वाहा ॥
ॐ दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण उरोरन्तरिक्षात्।
उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वा ॥ स्वाहा ॥
ॐ प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ स्वाहा ॥
ॐ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि।
वैष्णवमसि विष्णवे त्वा ॥ स्वाहा ॥
ॐ तद्विप्रासो विपन्यवो जागृवा ꣳ सः समिन्धते। विष्णोर्यत्परमं पदम् ॥ स्वाहा ॥
ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ॥ स्वाहा ॥
ॐ तद्विष्णोः परमं पद ꣳ सदा पश्यन्ति सूरयः दिवीव चक्षुराततम् ॥ स्वाहा ॥
ॐ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे।

तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ स्वाहा ॥
ॐ वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेयनाय ॥ स्वाहा ॥
ॐ प्रजापतिश्चरति गर्भेऽअन्तरजायमानो बहुधा वि जायते ।
तस्य योनिं परि पशयन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा ॥ स्वाहा ॥
ॐ यो देवेभ्यऽआतपति यो देवानां पुरोहितः । पूर्वो यो देवेव्भ्यो जातो नमो रुचाय ब्राह्मये ॥ स्वाहा ॥
ॐ रुचं ब्राह्मं जनयन्तो देवाऽ अग्रे तदब्रुवन् ।
यस्त्वैवंब्राह्मणो विद्द्यात्तस्य देवाऽअसन् वशे ॥ स्वाहा ॥
ॐ श्रीश्चते लक्ष्मीश्च पत्क्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुं मऽइषाण सर्वलोकं मऽइषाण ॥ स्वाहा ॥

होम

(चरु सहित घ्यू १०८ पटक हवन गर्ने)

ॐ तद्विप्रासो विपन्यवो जागृवा ꣳ सः समिन्धते । विष्णोर्यत्परमं पदम् ॥ स्वाहा ॥ इदं विष्णवे न मम ।

आज्यहवन

(घ्यू हवन गर्ने)

ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते न मम । ॐ भूः स्वाहा, इदमग्नये न मम । ॐ भुवः स्वाहा, इदं वायवे न मम । ॐ स्वः स्वाहा, इदं सूर्याय न मम ।
ॐ त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ꣳ सि प्र मुमुग्ध्यस्मत् ॥ स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ।
ॐ स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुण ꣳ रराणो वीहि मृडीक ꣳ सुहवो न एधि ॥ स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ।
ॐ अयाश्चाऽग्नेऽस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि ।
अया नो यज्ञं वहास्यया नो धेहि भेषज ꣳ ॥ स्वाहा ॥ इदमग्नये न मम ।
ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा विततता महान्तः ।
तेभिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः ॥ स्वाहा ॥
॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च, न मम ।
ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यम ꣳ श्रथाय ।
अथा व्वयमादित्य व्रते तवानागसो अदितये स्याम ॥ स्वाहा ॥ इदं वरुणायऽऽदित्यायाऽदितये न मम ।
ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम ।

पूर्णाहुति

(उठेर पूर्ण आहुति गर्ने)

ॐ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम्। कवि ꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ ॐ स्वाहा प्राणेभ्यः साधिपतिकेभ्यः। पृथिव्यै स्वाहाऽग्नये स्वाहाऽन्तरिक्षाय ॥ स्वाहा वायवे स्वाहा। दिवे स्वाहा सूर्याय स्वाहा ॥ ॐ दिग्भ्यः स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाऽद्भ्यः स्वाहा। वरुणाय स्वाहा। नाभ्यै स्वाहा पूताय स्वाहा ॥ ॐ वाचे स्वाहा प्राणाय स्वाहा प्राणाय स्वाहा। चक्षुषे स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा श्रोत्राय स्वाहा ॥ ॐ पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत। वस्नेव विक्रीणावहा इषमूर्ज ꣳ शतक्रतो ॥ स्वाहा ॥ इदं मृडाग्नये न मम।

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ स्वाहा ॥ इदमग्नये न मम।

तिलकं

(तिलक लगाइदिने)

ॐ त्र्यायुषं जमदग्नेरिति ललाटे, ॐ कश्यपस्य त्र्यायुषमिति कण्ठे, ॐ यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले, ॐ तन्नोऽस्तु त्र्यायुषमिति हृदये।

संस्रव-प्राशनम्

(सुरोको घ्यू ओठमा लगाई आचमन गर्ने)

पूर्णपात्रदानम्

(पूर्णपात्र दान गर्ने)

कुशादीन्यादाय – ॐ अद्य यथोक्तग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ ... गोत्रः ... शर्मा (वर्मा, गुप्तोऽहम्) कृतस्य नारायणबलिकर्मांगभूतहोमकर्मणः प्रतिष्ठार्थमिदं वृषनिष्कयद्रव्यदक्षिणासहितपूर्णपात्रं ... गोत्राय ... शर्मणे ब्राह्मणे भवते सम्प्रददे।

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु।

प्रणीताविमोकः

(प्रणीताको जलले सेचन गरी दुना घोप्ट्याउने)

ॐ सुमित्रिया न आप ओषधयः सन्तु। दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥
ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥

पक्वान्न अमान्न दानम्

(भोजन, सिदा दान गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः पेतायाः) सम्भावितदुर्मरणनिमित्तक नारायणबलिकर्मांगभूत हवनकर्मणः प्रतिष्ठार्थं यथोपपन्नेन अन्नेन यथासंख्याकान् ब्राह्मणान् भोजयिष्य श्रीमहाविष्णुः प्रीयताम्।

नमस्कारम्

(फूल लिएर नमस्कार गर्ने)

नारायणबलिहवनकर्मणि न्युनातिरिक्तं कर्म विष्णुप्रसादात् परिपूर्णमस्तु।

विष्णुतर्पणम्

(एउटा भाँडोमा विष्णुको प्रतिमा राखी सङ्खवाट तर्पण गर्ने)

कुशादीन्यादाय – ॐ अद्य पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ ... गोत्रः ... शर्मा (वर्मा, गुप्तोहम्) ... गोत्रस्य ... प्रेतस्य ... (गोत्रायाः प्रेतायाः) सम्भावितदुर्मरणनिमित्तकनारायणबल्यङ्गभूतं परलोके महातृषानिवारणार्थं विष्णु-सूक्तेन पुराणश्लोकचतुष्टयेन च विष्णोरुपरि विष्णुतर्पणं करिष्ये ।

ॐ अनादिनिधनो देवः शङ्खचक्रगदाधरः । अक्षय्यः पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव ॥ विष्णुं तर्पयामि ॥

अतसीपुष्पसंकाशं पीतवाससमच्युतम् । ये नमस्यन्ति गोविन्दं न स तेषां विद्यते भयम् ॥ विष्णुं तर्पयामि ॥

कृष्ण कृष्ण कृपालो त्वमगतीनां गतिर्भव । संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ॥ विष्णुं तर्पयामि ॥

नारायण सुरश्रेष्ठ लक्ष्मीकान्त वरप्रद । अनेन तर्पणेनाथ प्रेतमोक्षप्रदो भव ॥ विष्णुं तर्पयामि ॥

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमि ँ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ विष्णुं तर्पयामि ॥

ॐ पुरुष एवेद ँ सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ विष्णुं तर्पयामि ॥

ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ विष्णुं तर्पयामि ॥

ॐ त्रिपाद्दूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत् पुनः । ततो विष्वङ् व्यक्रामत्साशनानशने ऽअभि ॥ विष्णुं तर्पयामि ॥

ॐ ततो विराडजायत विराजोऽअधि पूरुषः । स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ विष्णुं तर्पयामि ॥

ॐ तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ विष्णुं तर्पयामि ॥

ॐ तस्माद्यज्ञात् सर्वहुतऽ ऋचः समानि जज्ञिरे । छन्दा ँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ विष्णुं तर्पयामि ॥

ॐ तस्मादश्वाऽ अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ विष्णुं तर्पयामि ॥

ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातऽमग्रतः । तेन देवाऽ अयजन्त साध्याऽ ऋषयश्च ये ॥ विष्णुं तर्पयामि ॥

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत् किं बाहू किमूरू पादाऽ उच्येते ॥ विष्णुं तर्पयामि ॥

ॐ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्या ँ शूद्रोऽअजायत ॥ विष्णुं तर्पयामि ॥

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ विष्णुं तर्पयामि ॥

ॐ नाभ्याऽआसीदन्तरिक्ष ँ शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँऽअकल्पयन् ॥ विष्णुं तर्पयामि ॥

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्मऽइद्ध्मः शरद्धविः ॥ विष्णुं तर्पयामि ॥

ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाऽअबद्ध्नन् पुरुषं पशुम् ॥ विष्णुं तर्पयामि ॥

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ विष्णुं तर्पयामि ॥

ॐ अनादिनिधनो देवः शङ्खचक्रगदाधरः । अक्षय्यः पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव ॥ विष्णुं तर्पयामि ॥

अतसीपुष्पसंकाशं पीतवाससमच्युतम् । ये नमस्यन्ति गोविन्दं न चेषां विद्यते भयम् ॥ विष्णुं तर्पयामि ॥

कृष्ण कृष्ण कृपालो त्वमगतीनां गतिर्भव । संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ॥ विष्णुं तर्पयामि ॥

नारायण सुरश्रेष्ठ लक्ष्मकिान्त वरप्रद। अनेन तर्पणेनाथ प्रेतमोक्षप्रदो भव ॥ विष्णुं तर्पयामि ॥

ॐ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्ततााग्रे।
तस्य त्वष्टा विदधद्रूपमेति तत्मर्त्यस्य देवत्वमाजानमग्रे ॥ विष्णुं तर्पयामि ॥
ॐ वेदाहममेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ विष्णुं तर्पयामि ॥
ॐ प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि जायते।
तस्य योनिं परि पशयन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा ॥ विष्णुं तर्पयामि ॥
ॐ यो देवेभ्यऽ आतपति यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ विष्णुं तर्पयामि ॥
ॐ रुचं ब्राह्मं जनयन्तो देवाऽ अग्रे तदब्रुवन्।
यस्त्वैवंब्राह्मणो विद्द्यात्तस्य देवाऽअसन् वशे ॥ विष्णुं तर्पयामि ॥
ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणामुं मऽइषाण सर्वलोकं मऽइषाण ॥ विष्णुं तर्पयामि ॥

ॐ अनादिनिधनो देवः शङ्खचक्रगदाधरः। अक्षय्यः पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव ॥ विष्णुं तर्पयामि ॥
अतसीपुष्पसंकाशं पीतवाससमच्युतम्। ये नमस्यन्ति गोविन्दं न चेषां विद्यते भयम् ॥ विष्णुं तर्पयामि ॥
कृष्ण कृष्ण कृपालो त्वमगतीनां गतिर्भव। संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ॥ विष्णुं तर्पयामि ॥
नारायण सुरश्रेष्ठ लक्ष्मकिान्त वरप्रद। अनेन तर्पणेनाथ प्रेतमोक्षप्रदो भव ॥ विष्णुं तर्पयामि ॥

ॐ युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः स्वाहा ॥ विष्णुं तर्पयामि ॥
ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पा ꣳ सुरे स्वाहा ॥ विष्णुं तर्पयामि ॥
ॐ इरावती धेनुमती हि भूत ꣳ सूयवसिनी मनवे दशस्या।
व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ॥ विष्णुं तर्पयामि ॥
ॐ देवश्रुतौ देवेष्वा घोषतं प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम्।
स्वं गोष्ठमा वदतं देवी दुर्ये आयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टमत्र रमेथां वर्ष्मन् पृथिव्याः ॥ विष्णुं तर्पयामि ॥
ॐ विष्णोर्नुकं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजा ꣳ सि।
यो अस्कभायदुत्तर ꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥ विष्णुं तर्पयामि ॥
ॐ दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण उरोरन्तरिक्षात्।
उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वा ॥ विष्णुं तर्पयामि ॥
ॐ प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ विष्णुं तर्पयामि ॥

ॐ विष्णो ररांटमसि विष्णोः श्नप्वेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि ।
वैष्णवमसि विष्णवे त्वा ॥ विष्णुं तर्पयामि ॥

ॐ अनादिनिधनो देवः शङ्खचक्रगदाधरः । अक्षय्यः पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव ॥ विष्णुं तर्पयामि ॥
अतसीपुष्पसंकाशं पीतवाससमच्युतम् । ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥ विष्णुं तर्पयामि ॥
कृष्ण कृष्ण कृपालो त्वमगतीनां गतिर्भव । संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ॥ विष्णुं तर्पयामि ॥
नारायण सुरश्रेष्ठ लक्ष्मीकान्त वरप्रद । अनेन तर्पणेनाथ प्रेतमोक्षप्रदो भव ॥ विष्णुं तर्पयामि ॥
ॐ युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥ विष्णुं तर्पयामि ॥
ॐ यस्य प्रयाणमन्वद्यन्य इयुर्देवा देवस्य महिमानमोजसा ।
यः पार्थिवानि विममे स एतशो रजा ꣳ देवः सविता महित्वना ॥ विष्णुं तर्पयामि ॥
ॐ देव सवितः प्र सुव यज्ञं प्र सुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूरः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ विष्णुं तर्पयामि ॥
ॐ इमं नो देव सवितर्यज्ञं प्रणय देवाव्य ꣳ सि सखिविद ꣳ सत्राजितं धनजित ꣳ स्वर्जितम् ॥
ऋचा स्तोम ꣳ समर्धय गायत्रेण रथन्तरं बृहद्गायत्रवर्तनि स्वाहा ॥ विष्णुं तर्पयामि ॥
ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आ ददे गायत्रेण छन्दसाऽङ्गिरस्वत्पृथिव्याः
सधस्थादग्निं पुरीष्यमङ्गिरस्वदा भर त्रैष्टुभेन छन्दसाऽङ्गिरस्वत् ॥ विष्णुं तर्पयामि ॥
ॐ अग्निरसि नार्यसि त्वया वयमग्नि ꣳ शकेम खनितु ꣳ सधस्थ आ ।
जागतेन छन्दसाऽङ्गिरस्वत् ॥ विष्णुं तर्पयामि ॥
ॐ हस्त आधाय सविता बिभ्रदग्नि ꣳ हिरण्ययीम् ।
अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याऽभरदानुष्टुभेन छन्दसाऽङ्गिरस्वत् ॥ विष्णुं तर्पयामि ॥
ॐ विष्णोः कर्माणि पश्यत यतो व्रताति पस्पशे । इन्द्रस्य युज्यः सखा ॥ विष्णुं तर्पयामि ॥
ॐ तद्विष्णोः परमं पद ꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ विष्णुं तर्पयामि ॥

ॐ अनादिनिधनो देवः शङ्खचक्रगदाधरः । अक्षय्यः पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव ॥ विष्णुं तर्पयामि ॥
अतसीपुष्पसंकाशं पीतवासमच्युतम् । ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥ विष्णुं तर्पयामि ॥
कृष्ण कृष्ण कृपालो त्वमगतीनां गतिर्भव । संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ॥ विष्णुं तर्पयामि ॥
नारायण सुरश्रेष्ठ लक्ष्मीकान्त वरप्रद । अनेन तर्पणेनाथ प्रेतमोक्षप्रदो भव ॥ विष्णुं तर्पयामि ॥

ॐ रक्षोहणं वलगहनं वैष्णवीमिदमहन्तं वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखानेदमहन्तं वलग-
मुत्किरामि यं मे समानो यमसमानो निचखानेदमहन्तं वलगमुत्किरामि यं मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं
गलगमुत्किरामि यं मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥ विष्णुं तर्पयामि ॥

ॐ स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्य मित्रहा ॥ विष्णुं तर्पयामि ॥
ॐ दिवि विष्णुर्व्यक्र ꣳस्त जागतेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽन्तरिक्षे विष्णुर्व्यक्र ꣳस्तत्रैष्टुभेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः पृथिव्यां विष्णुर्व्यक्र ꣳस्त गायत्रेण छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मो ऽस्मादन्नादस्यै प्रतिष्ठाया अगन्म स्वः सं ज्योतिषाभूम ॥ विष्णुं तर्पयामि ॥
ॐ प्रेता जयता नरऽइन्द्रो वः शर्म यच्छतु । उग्रा वः सन्तु बाहवोनाधृष्या यथाऽसथ ॥ विष्णुं तर्पयामि ॥
ॐ अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीव आग्नेयो ररा टे पुरस्तात्सारस्वती मेष्यधस्ताद्धन्वो-राश्विनावधोरामौ ब्राह्मोः सौमापौष्णः श्यामो नाभ्या ꣳ सौर्ययामौ श्वेतश्च कृष्णश्च पार्श्वयोस्त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छ इन्द्राय स्वपस्याय वेहद्वैष्णवो वामनः ॥ विष्णुं तर्पयामि ॥
ॐ विष्णोः क्रमोऽसि सपत्नहा गायत्रं छन्द आरोह पृथिवीमनु वि क्रमस्व विष्णोः क्रमोऽस्यभिमातिहा त्रैष्टु भं छन्द आरोहान्तरिक्षमनु विक्रमस्व विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आरोह दिवमनु विक्रमस्व विष्णोः क्रमोऽसि शत्रूयतो हन्ताऽऽनुष्टुभं छन्द आरोह दिशोऽनु वि क्रमस्व ॥ विष्णुं तर्पयामि ॥
ॐ सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः ।
इन्द्रस्य त्वा भाग ꣳ सोमेनातनच्मि विष्णो हव्य ꣳ रक्ष ॥ विष्णुं तर्पयामि ॥
ॐ अहुतमसि हविर्धानं दृ ꣳ हस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ।
विष्णुस्त्वा क्रमतामुरु वातायापहत ꣳ रक्षो यच्छन्तां पञ्च ॥ विष्णुं तर्पयामि ॥
ॐ मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्षऽआयुधं निधाय कृत्तिं वसानऽआचर पिनाकं बिभ्रदा गहि ॥ विष्णुं तर्पयामि ॥
ॐ त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥ विष्णुं तर्पयामि ॥
ॐ तद्विप्रासो विपन्यवो जागृवा ꣳ सः समिन्धते विष्णोर्यत्परमं पदम् ॥ विष्णुं तर्पयामि ॥
ॐ विश्वे देवास आगत श्रृणुता म इम ꣳ हवम् । एदं बर्हिर्निषीदत ॥ विष्णुं तर्पयामि ॥
ॐ उपयामगृहीतोऽस्यादित्येभ्यस्त्वा । विष्ण उरुगायैष ते सोमस्त ꣳ रक्षस्व मा त्वा दभन् ॥ विष्णुं तर्पयामि ॥
ॐ उरु विष्णो वि क्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ॥ विष्णुं तर्पयामि ॥

ॐ अनादिनिधनो देवः शङ्खचक्रगदाधरः । अक्षय्यः पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव ॥ विष्णुं तर्पयामि ॥
अतसीपुष्पसंकाशं पीतवाससमच्युतम् । ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥ विष्णुं तर्पयामि ॥
कृष्ण कृष्ण कृपालो त्वमगतीनां गतिर्भव । संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ॥ विष्णुं तर्पयामि ॥
नारायण सुरश्रेष्ठ लक्ष्मीकान्त वरप्रद । अनेन तर्पणेनाथ प्रेतमोक्षप्रदो भव ॥ विष्णुं तर्पयामि ॥

अपसव्येन

(अपसव्य भएर प्रेतलाई पितृतीर्थबाट जल दिने)

कुशादीन्यादाय – ॐ अद्य .... गोत्र ... प्रेत (गोत्रे प्रेते) परलोके महातृषानिवृत्त्यर्थमिदमुदकमुपतिष्ठतु ।

सव्येन आचम्य

(सव्य भएर आचमन गरी भोजन सिदा सङ्कल्प गर्ने)

पक्वान अमान्न दानम्

(कुश लिई सिदा दान गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रः ... शर्मा (वर्मा, गुप्तोऽहम्) ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) परलोके महाक्षुधानिवारणार्थं विष्णुतर्पणकर्मणः साङ्गतासिद्धयर्थं श्रीमहाविष्णुप्रीत्यर्थं च यथोपपनेन अन्नेन तृप्तिपर्याप्तेन यथासंख्याकान् ब्राह्मणान् (एवं वा) भोजयिष्ये अनेन तर्पणकर्मणा श्रीमहाविष्णुः प्रीयतां न मम। विष्णुतर्पणकर्मणि न्यूनातिरिक्तं सर्वं परिपूर्णमस्तु।

प्रार्थना

(फूल अक्षता लिई हात जोड्ने)

प्रमादात् कुर्वतां कर्म प्रत्यवेताध्वरेषु च। स्मरणादेव तद्विष्णोः सम्पूर्ण स्यादिति श्रुतिः ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
यत्पादपङ्कजस्मरणाद् यस्य नामजपादपि। न्यूनं कर्म भवेत् पूर्णं तं वन्दे साम्बमीश्वरम् ॥

॥ ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः ॥
ॐ साम्बसदाशिवाय नमः। ॐ साम्बसदाशिवाय नमः। ॐ साम्बसदाशिवाय नमः।

अथ नारायणबलिश्राद्धम्

(१६ वटा ऋषि थापी दियो बालेर नारायणबलि श्राद्ध सुरु गर्ने)

पवित्र धारणम्

(पवित्र धारण गर्ने)

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥

आचमनम्

(आचमन गर्ने)

ॐ केशवाय नमः। ॐ नारायणाय नमः। ॐ माधवाय नमः। ॐ हृषीकेशाय नमः।

दीपपूजा

(दियो पूजा गर्ने)

भो दीप ब्रह्मरुपस्त्वं कर्मसाक्षी ह्यविघ्नकृत्। यावत् कर्मसमाप्तिः स्यात् तावत् त्वं सुस्थिरो भव ॥

गदाधर प्रार्थना

(फूल लिई गदाधर भगवान्को ध्यान गर्ने)

श्राद्धारम्भे गयां ध्यात्वा ध्यात्वा देवं गदाधरम्। स्वपितॄन् मनसा ध्यात्वा ततः श्राद्धं समाचरेत् ॥

ॐ गयायै नमः। ॐ गदाधराय नमः। ॐ श्राद्धभूम्यै नमः

भूमिसहिता विष्णु-पूजनम्

(भूमिसहित विष्णुको ध्यान गर्ने)

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिर्भिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

ॐ भूमिपत्नीसहिताय विष्णवे नमः

कर्मपात्र निर्माणम्

(कर्मपात्र बनाई नीवीवन्धन गर्ने)

प्रतिज्ञा-सङ्कल्प

(जल कुश लिई सङ्कल्प गर्ने)

कुशादीन्यादाय – अद्य .. गोत्रः ... शर्मा (वर्मा, गुप्तोहं) ... गोत्रस्य .... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्त्यर्थं शास्त्रोक्तदुर्मरणदोषाणां मध्ये सम्भावितदोषनिवृत्तिपूर्वकसद्गत्यक्षयविष्णुलोकप्राप्त्यर्थं नारायणबलिकर्माङ्गभूतं विष्णवादि तत्पुरुषान्तदेवानां प्रेतस्य च एकोद्दिष्ट विधिना षोडशश्राद्धानि करिष्ये ।

नमस्कारम्

(तीनपटक भन्दै ढोग्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

आसन सङ्कल्प

(कुश, जौ, जल लिएर पहिले विष्णु, शिव, यम, सोमराज, हव्यवाहन, कव्यवाहन, काल, रुद्र, पुरुषादि नौ देवतालाई आसन दिने)

कुशादीन्यादाय –

ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित षोडशश्राद्धान्तर्गतविष्णवादि-पुरुषान्तदेवानामिमानि नवासनानि विभज्य वो नमः ।

आवाहनम्

(जौले आवाहन गर्ने)

ॐ यवोऽसि यवयास्मद् द्वेषो ।

प्रेत आसनम् अपसव्येन

(अपसव्य भएर तिल, कुश, जल लिई प्रेतलाई आसन दिने)

कुशादीन्यादाय –

ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित षोडशश्राद्धान्तर्गतदशमे प्रेतस्य इदमासनं ते मया दीयते, तवोपतिष्ठताम् ।

आवाहनम्

(तिलले आवाहन गर्ने)

ॐ अपहता असुरा रक्षा ꣳ सि वेदिषदः ॥

आसनम् सव्येन

(सव्य भएर जौ, कुश, जल लिएर विष्णु, ब्रह्मा, विष्णु, शिव, यम र तत्पुरुषादि बाँकी ६ देवताहरूलाई आसन दिने)

कुशादीन्यादाय –

ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित षोडशश्राद्धान्तर्गत विष्णवादितत पुरुषान्तदेवानामिमानि षडासनानि विभज्य वो नमः ।

आवाहनम्

(जौले आवाहन गर्ने)

ॐ यवो सि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा ।
शुन्धन्ताँल्लोकाः पितृषदनः पितृषदनमसि ॥

हस्तार्घः (विष्णु, शिव, यम, सोमराज, हव्यवाहन, कव्यवाहन, काल, रुद्र पुरुषादि ९ देवतालाई हस्तार्घ गर्ने)

हस्तार्घः अभिमन्त्रण

(पवित्र र फूल पालैसँग ब्राह्मणमा राख्ने र दुनालाई ढाक्ने)

ॐ नमो नारायणाय नमः
ॐ या दिव्या आपः पयसासम्बभुबूर्याऽअन्तरिक्षाऽउत पार्थवीर्याः । हिरण्यवर्णा यज्ञियास्ता नऽआपः शिवाः स ꣳ स्यानो सुहवा भवन्तु ॥

कुशादीन्यादाय –

(कुश जल लिने)

१) ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित षोडशश्राद्धान्तर्गत विष्णुश्राद्धे विष्णो एषोऽर्घस्ते नमः
२) शिवश्राद्धे शिव एषोऽर्घस्ते नमः
३) यम श्राद्धे यम एषोऽर्घस्ते नमः
४) सोमराज श्राद्धे सोमराज एषोऽर्घस्ते नमः
५) हव्यवाहन श्राद्धे हव्यवाहन एषोऽर्घस्ते नमः
६) कव्यवाहन श्राद्धे काव्यवाहन एषोऽर्घस्ते नमः
७) कालश्राद्धे काल एषोऽर्घस्ते नमः
८) रुद्र श्राद्धे रुद्र एषोऽर्घस्ते नमः
९) पुरुष श्राद्धे पुरुष एषोऽर्घस्ते नमः

अपसव्येन

(अपसव्य भएर प्रेतलाई हस्तार्घ गर्ने)

१०) कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतदशमे प्रेतश्राद्धे प्रेत एषोऽर्घस्ते मया दीयते, तवोपतिष्ठताम् ।

सव्येन

(सव्य भएर हस्तार्घ गर्ने)

११) कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित षोडशश्राद्धान्तर्गत विष्णुश्राद्धे विष्णो एषोऽर्घस्ते नमः
१२) ब्रह्माश्राद्धे ब्रह्मण एषोऽर्घस्ते नमः
१३) विष्णुश्राद्धे विष्णो एषोऽर्घस्ते नमः

१४) शिवश्राद्धे शिव एषोऽर्घस्ते नमः

१५) यमश्राद्धे यम एषोऽर्घस्ते नमः

१६) तत्पुरुषश्राद्धे तत्पुरुष एषोऽर्घस्ते नमः (तत्पुरुष प्रेत नभई परमात्मा भएकाले सव्य नै भएर कार्य गर्ने चलन छ)

विष्णुवादि अर्चनम्

(विष्णुदेखि पुरुषसम्मका ९ देवतालाई पूजा गर्ने र धूपवत्ती नैवेद्य चढाउने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतविष्ण्वादिपुरुषान्तश्राद्धे विष्ण्वादिपुरुषान्तदेवा एतान्यर्चनानि युष्पभ्यं नमः ।

अपसव्येन प्रेतार्चनम्

(अपसव्य भएर प्रेत ऋषिलाई पूजा गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतदशमे प्रेतश्राद्धे प्रेत एतान्यर्चनानि ते मया दीयन्ते, तवोपतिष्ठन्ताम् ।

सव्येन विष्णवादितत्पुरुषार्चनम्

(सव्य भएर विष्णुदेखि तत्पुरुषसम्मलाई पूजा गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतविष्ण्वादिपुरुषान्तश्राद्धे विष्ण्वादितत्पुरुषान्तदेवा एतान्यर्चनानि युष्पभ्यं नमः ।

चतुष्कोण निर्माणम् अपसव्येन

(अपसव्य भएर चतुष्कोण बनाउने)

ॐ यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति । एवं मण्डलतोयं तु सर्वभूतानि रक्षतु ॥

तत्रादौ भूस्वामी

(भूस्वामी सिदा गर्ने)

ॐ इदमन्नमेतद् भूस्वामिपितृभ्यो नमः

अन्न सङ्कल्पः मधु-प्रक्षेप

(सिदा राख्ने र सिदामा मह छर्कने)

ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ मधु नक्तमुतोषसो मधुमत् पार्थिव ꣳ रजः । मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ ॐ मधु मधु मधु ॥

पात्रालम्भनम् सव्येन

(सव्ये भएर सिदामा दुवै हातले ढाक्ने)

ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ।

ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य पा ꣳ सुरे स्वाहा । ॐ कृष्ण हव्यमिदं रक्ष मदीयम् ।

(बूढी औंलाले अन्न, जल, घ्यू देखाउने)

इदमन्नम् इमा आपः इदमाज्यम् इदं हव्यम् ॐ यवोऽसि यवयास्मद् द्वेषो यवयारातीः । (जौ छर्ने)

हव्यदान सङ्कल्प

(नौवटा सिदा राखी छुट्टाछुट्टै सङ्कल्प गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडशश्राद्धान्तर्गतविष्णुश्राद्धे विष्णवे इदमन्नं सोपस्करममृतस्वरूपं हव्यं स्वाहा सम्पद्यताम्, न मम ।

कव्यदान सङ्कल्प अपसव्येन

(अपसव्ये भएर प्रेतको सिदा सङ्कल्प गर्ने)

ॐ अपहता असुरा रक्षा ꣳसि वेदिषदः । तिलान् विकीर्य

(तिल छर्कने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडशश्राद्धान्तर्गतप्रेतश्राद्धे प्रेताय इदमन्नं सोपस्करममृतस्वरूपं कव्यं ते मया दीयते तवोपतिष्ठताम् ।

पुनः हव्यदान सङ्कल्प सव्येन

(सव्ये भएर ६ वटा सिदा राखी छुट्टाछुट्टै सङ्कल्प गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडशश्राद्धान्तर्गतविष्णुश्राद्धे विष्णवे इदमन्नं सोपस्करममृतस्वरूपं हव्यं स्वाहा सम्पद्यताम्, न मम ।

प्रार्थना

(फूल अक्षता लिएर नमस्कार गर्ने)

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । अच्छिद्रमस्तु तत्सर्वं पित्रादीनां प्रसादतः ॥

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ।

ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ ॐ इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽआप्यायध्व मघ्न्याऽ इन्द्राय भागं प्रजावतीरनमीवाऽ अयक्ष्मा मा व स्तेनऽईशत माघशꣳसो ध्रुवाऽ अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि । ॐ अग्नऽ आ याहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥ ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभि स्रवन्तु नः ॥

ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

विकिरासनम् अपसव्येन

(अपसव्ये भई विकरलाई आसन राख्ने)

असंस्कृतप्रमीतानां त्यागिनां कुलभागिनाम् । उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ॥

विकिरदानम्

(विकरलाई आसनमा घोप्ट्याउने)

अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम । भूमौ दत्तेन तुप्यन्तु तृप्ता यान्तु परां गतिम् ॥

पिण्डवेदिनिर्माणं

(सव्ये भई नौ अपसव्येले प्रेतको र सव्यले ६ बालुवाको वेदी बनाउने)

ॐ अपहता असुरा रक्षा ꣳसि वेदिषदः ।

(नौ र छ मा रेखा कोर्ने)

उल्मुकं स्थापनम्

(धूप घुमाउने)

ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति ।
परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥

(विष्णु, शिव, यम, सोमराज, हव्यवाहन, कव्यवाहन, काल, रुद्र, पुरुष सबैलाई

अवनेजनम् सङ्कल्प

दुनामा जल राखी सङ्कल्प गर्ने र नौ वटा छुट्टाछुट्टै कुश वेदीमा राख्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतविष्णुश्राद्धपिण्डस्थाने विष्णो अत्रावनेनिक्ष्व ते नमः ।

प्रेत अवनेजनम् सङ्कल्प

(अपसव्य भएर प्रेतको पिण्ड दिने ठाउँमा कुश राख्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतप्रेतश्राद्धपिण्डस्थाने प्रेत अत्रावनेनिक्ष्व ते मया दीयते, तवोपतिष्ठताम् ।

पुनः अवनेजनम् सव्येन

(सव्ये भएर विष्णु, ब्रह्मा, विष्णु, शिव, यम, तत्पुरुषलाई ६ वटा कुश वेदीमा राख्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतविष्णुश्राद्धपिण्डस्थाने विष्णो अत्रावनेनिक्ष्व ते नमः ।

पिण्डदानम्

(विष्णु, शिव, यम, सोमराज, हव्यवाहन, कव्यवाहन, काल, रुद्र, पुरुष सबै नौ देवतालाई नौ पिण्ड दिने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतविष्णुश्राद्धे विष्णो एष पिण्डस्ते नमः ।

प्रेतपिण्डदानम् अपसव्येन

(अपसव्ये भएर प्रेतलाई पिण्ड दिने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतप्रेतश्राद्धे प्रेत एष पिण्डस्ते मया दीयते, तवोपतिष्ठताम् ।

पुनः पिण्डदानम् सव्येन

(सव्ये भएर विष्णु, ब्रह्मा, विष्णु, शिव, यम, तत्पुरुषसमेत ६ देवतालाई ६ पिण्ड दिने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडशश्राद्धान्तर्गत-विष्णुश्राद्धे विष्णो एष पिण्डस्ते नमः । लेपभागनिषेधः करं प्रोक्ष्य, आचम्य हरिं स्मरेत् । (आचमन गरेर हरिः हरिः भन्ने)

प्रत्यवनेजनम्

(दुनामा जल राखेर पहिलेको नौ पिण्डमा प्रत्यवनेजनं गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडशश्राद्धान्तर्गतविष्णुपिण्डे विष्णो अत्र प्रत्यवनेनिक्ष्व ते नमः ।

प्रेतपिण्डोपरि प्रत्यवनेजनम् अपसव्येन (अपसव्ये भएर प्रेतपिण्डमा प्रत्यवनेजनम् गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडशश्राद्धान्त र्गतप्रेतपिण्डे प्रेत अत्र प्रत्यवनेनिक्ष्व ते मया दीयते, तवोपतिष्ठताम्।

पुनः प्रत्यवनेजनम् सव्येन (सव्ये भएर बाँकी ६ पिण्डमा प्रत्यवनेजनम् गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडशश्राद्धा-न्तर्गतविष्णुपिण्डे विष्णो अत्र प्रत्यवनेनिक्ष्व ते नमः। – ततो नीवीं विस्रंस्य। (कटिको नीवी भुईमा खसालिदिने)

पिण्डपूजनम् (पहिलेको नौ पिण्डहरूलाई पूजा गर्ने र सङ्कल्प गर्ने)

गन्धापुष्पादिभिः पिण्डं संपूज्य, कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तक-नारायणबलिविहितषोडशश्राद्धान्तर्गतविष्ण्वादिपुरुषान्तदेवाः पिण्डेषु एतान्यर्चनानि युष्मभ्यं नमः।

प्रेतपिण्डपूजनम् अपसव्येन (अपसव्ये भएर प्रेतपिण्ड पूजा गरी सङ्कल्प गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतप्रेत श्राद्धपिण्डे प्रेत एतान्यर्चनानि ते मया दीयन्ते, तवोपतिष्ठन्ताम्।

पुनः पिण्डपूजनम् सव्येन (सव्ये भएर बाँकी ६ पिण्ड पूजा गरी जौ, कुश, जल लिएर सङ्कल्प गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडशश्राद्ध-न्तर्गतविष्ण्वादितत्पुरुषान्तदेवाः पिण्डेषु एतान्यर्चनानि युष्मभ्यं नमः।

सद्गतिकामना (सद्गतिको कामना गर्ने)

एभिः पिण्डदानैः ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्तिर्दुर्मरणप्रयुक्तदोषनिवित्तिरुत्तम-लोकप्राप्तिश्च भवन्तु।

ततो विप्रकरे (सव्ये, अपसव्ये र सव्ये भएर ९+१+६=१६ ऋषिमै जल अक्षता फूल चढाउने)

ॐ शिवा आपः सन्तु इति जलम्। ॐ सौमनस्यमस्तु इति पुष्पम्। ॐ अक्षतं चारिष्टं चास्तु इति तण्डुलान् दद्यात्।

अक्षय्योदकम्

(सव्ये, अपसव्ये र सव्ये भएर अक्षय्योदक जल ९+१+६=१६ पिण्डमै चढाउने)

१) ॐ विष्णोर्दत्तैतदन्नपानादिकमक्षय्यमस्तु। २) ॐ शिवस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु।
३) ॐ यमस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु। ४) ॐ सोमराजस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु।
५) ॐ हव्यवाहनस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु। ६) ॐ कव्यवाहनस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु।
७) ॐ कालस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु। ८) ॐ रुद्रस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु।
९) ॐ पुरुषस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु।

अपसव्येन

(अपसव्ये भएर प्रेतपिण्डमा जल चढाउने)

१०) ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) उत्तमलोकप्राप्त्यर्थं प्रेतस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु।

सव्येन

(सव्ये भएर चढाउने)

११) ॐ विष्णोर्दत्तैतदन्नपानादिकमक्षय्यमस्तु। १२) ॐ ब्रह्मणो दत्तैतदन्नपानादिकमक्षय्यमस्तु।
१३) ॐ विष्णोर्दत्तैतदन्नपानादिकमक्षय्यमस्तु। १४) ॐ शिवस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु।
१५) ॐ यमस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु। १६) ॐ तत्पुरुषस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु।

जलधारां दद्यात्

(सव्ये, अपसव्ये र सव्ये भएर ९+१+६=१६ सबै पिण्डहरूमा जल चढाउने)

ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) परलोके महातृषानिवारणार्थं दुर्मरणनिमित्तकनारायणबलिविहितषोडशपिण्डेषु एकैकमन्त्रेण द्विर्द्विरञ्जलिदानं वा विष्णवादितत्पुरुषान्त देवा एषा जलधारा युष्मभ्यं नमः।

जलधारा

(पिण्डमा जल चढाउने)

ॐ अघोराः पितरः सन्तु।

आशीषाप्रार्थना

(यजमानले भन्ने)

ॐ गोत्रं नो वर्धतां दातारो नोऽभिवर्धन्ताम्। वेदाः वर्धताम् सन्तति वर्धताम्। श्रद्धा च नो मा व्यगमद्। बहुदेयं च नोऽस्तु। अन्नं च नो बहु भवेत्। अतिथींश्च लभेमहि। याचितारश्च नः सन्तु। मा याचिष्म कञ्चन। एताः सत्या आशिषः सन्तु॥ ॐ सन्तु।

(ब्राह्मणले भन्ने)

पयोधारा अपसव्येन

(अपसव्ये भएर पिण्डमा दुध चढाउने)

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधा स्थ तर्पयत मे पितॄन्॥

सव्येन नम्रीभूय पिण्डमाघ्राय उत्थापयेत् (सव्ये भएर पन्ध्र पिण्ड र अपसव्येले प्रेत पिण्ड उठाउने)

अर्घपात्र सञ्चालनम् (सव्ये, अपसव्ये र सव्ये भएर ९+१+६=१६ सबै अर्घपात्र चलाउने)

दक्षिणासङ्कल्प

(दक्षिणा सङ्कल्प गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितविष्ण्वादि-तत्पुरुषान्तश्राद्धसाङ्गतासिद्धचर्थीमिमानि हिरण्यादिद्रव्याणि तत्तद्देवताप्रीतये ... गोत्रेभ्यो ब्राह्मणेभ्यो दातुमुत्सृज्ये।

देवताभ्य त्रिः पठेत्

(तीनपटक पढ्ने र नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥

अपसव्येन दीपाच्छादनं (अपसव्ये भएर दियो ढाकिदिने)

सव्येनऽऽचामेत् प्रार्थना

(सव्ये भएर आचमन गरी नमस्कार गर्ने)

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥

यत्पादपङ्कजस्मरणाद् यस्य नामजपादपि। न्यूनं कर्म भवेत् पूर्णं तं वन्दे साम्बमीश्वरम्॥

ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः। (तीनपटक भन्ने)

ॐ साम्बसदाशिवाय नमः। ॐ साम्बसदाशिवाय नमः। ॐ साम्बसदाशिवाय नमः। (तीनपटक भन्ने)




॥ नारायणबलि–श्राद्धप्रयोग सम्पूर्ण ॥

अथ मध्यमषोडशीश्राद्धम्

(१६ वटा ऋषि थापी दियो बालेर मध्यमषोडशी श्राद्ध सुरु गर्ने)

मध्यमषोडशी श्राद्ध स्वरुपम्



पवित्र धारणम्

(पवित्र धारण गर्ने)

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥

आचमनम्

(आचमन गर्ने)

ॐ केशवाय नमः । ॐ नारायणाय नमः । ॐ माधवाय नमः । ॐ हृषीकेशाय नमः ।

दीपपूजा

(दियो पूजा गर्ने)

भो दीप ब्रह्मरुपस्त्वं कर्मसाक्षी ह्यविघ्नकृत् । यावत् कर्मसमाप्तिः स्यात् तावत् त्वं सुस्थिरो भव ॥

गदाधर प्रार्थना

(फूल लिई गदाधर भगवान्को ध्यान गर्ने)

श्राद्धारम्भे गयां ध्यात्वा ध्यात्वा देवं गदाधरम् । स्वपितॄन् मनसा ध्यात्वा ततः श्राद्धं समाचरेत् ॥

ॐ गयायै नमः । ॐ गदाधराय नमः । ॐ श्राद्धभूम्यै नमः

भूमिसहिता विष्णु-पूजनम्

(भूमिसहित विष्णु भगवान्को ध्यान गर्ने)

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिर्भिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ ॐ भूमिपत्नीसहिताय विष्णवे नमः

कर्मपात्र निर्माणम्

(कर्मपात्र बनाई नीवीबन्धन गर्ने)

प्रतिज्ञा-सङ्कल्प

(जल कुश लिई सङ्कल्प गर्ने)

कुशादीन्यादाय – अद्य .: गोत्रः ... शर्मा (वर्मा, गुप्तोहं) ... गोत्रस्य .... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्ति पूर्वकविष्णुलोकाद्युत्तमलोकप्राप्त्यर्थं पितृपङ्क्तिप्रवेशार्थं च विष्ण्वादितत्पुरुषान्तदेवानां प्रेतस्य च एकोद्दिष्ट विधिना मध्यमषोडशश्राद्धानि महं करिष्ये।

नमस्कारम्

(तीनपटक भन्दै ढोग्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥

आसन सङ्कल्प

(कुश, जौ, जल लिएर पहिले विष्णु, शिव, यम, सोमराज, हव्यवाहन, कव्यवाहन, काल, रुद्र, पुरुषादि नौ देवतालाई आसन दिने)

कुशादीन्यादाय –

ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशाधिकारसिद्धयर्थं क्रियमाणे मध्यमषोडशश्राद्धे विष्णवादिपुरुषान्तदेवानामिमानि नवासनानि विभज्य वो नमः।

आवाहनम्

(जौले आवाहन गर्ने)

ॐ यवो सि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा।
शुन्धन्ताँल्लोकाः पितृषदनः पितृषदनमसि॥

प्रेत आसनम् अपसव्येन

कुशादीन्यादाय –

(अपसव्ये भएर तिल, कुश, जल लिई प्रेतलाई आसन दिने)

ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशाधिकारसिद्धयर्थं क्रियमाणे मध्यमषोडशश्राद्धे प्रेतस्य इदमासनं ते मया दीयते, तवोपतिष्ठताम्।

आवाहनम्

(तिलले आवाहन गर्ने)

ॐ अपहता असुरा रक्षा ꣳ सि वेदिषदः॥

आसनम् सव्येन

(सव्ये भएर जौ, कुश, जल लिएर विष्णु, ब्रह्मा, विष्णु, शिव, यम र तत्पुरुषादि बाँकी ६ देवताहरूलाई आसन दिने)

कुशादीन्यादाय –

ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशाधिकारसिद्धयर्थं क्रियमाणे मध्यमषोडशश्राद्धे विष्णवादितत्पुरुषान्तदेवानामिमानि षडासनानि विभज्य वो नमः।

आवाहनम्

(जौले आवाहन गर्ने)

ॐ यवो सि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा।
शुन्धन्ताँल्लोकाः पितृषदनः पितृषदनमसि॥

हस्तार्घः (विष्णु, शिव, यम, सोमराज, हव्यवाहन, कव्यवाहन, काल, रुद्र पुरुषादि नौ देवतालाई हस्तार्घ गर्ने)

हस्तार्घः अभिमन्त्रण (पवित्र र फूल पालैसँग ब्राह्मणमा राख्ने र दुनालाई ढाक्ने)

ॐ नमो नारायणाय नमः

ॐ या दिव्याऽआपः पयसा सम्बभूवुर्याऽअन्तरिक्षाऽउत पार्थवीर्याः ।
हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः स ँ स्योना सुहवा भवन्तु ॥

कुशादीन्यादाय – (कुश जल लिने)

१) ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशाधिकारसिद्धयर्थं क्रियमाणे मध्यमषोडशश्राद्धान्तर्गत विष्णुश्राद्धे विष्णो एषोऽर्घस्ते नमः

२) शिवश्राद्धे शिव एषोऽर्घस्ते नमः

३) यम श्राद्धे यम एषोऽर्घस्ते नमः

४) सोमराज श्राद्धे सोमराज एषोऽर्घस्ते नमः

५) हव्यवाहन श्राद्धे हव्यवाहन एषोऽर्घस्ते नमः

६) कव्यवाहन श्राद्धे काव्यवाहन एषोऽर्घस्ते नमः

७) कालश्राद्धे काल एषोऽर्घस्ते नमः

८) रुद्र श्राद्धे रुद्र एषोऽर्घस्ते नमः

९) पुरुष श्राद्धे पुरुष एषोऽर्घस्ते नमः

अपसव्येन (अपसव्ये भएर प्रेतलाई हस्तार्घ गर्ने)

१०) कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशाधिकार सिद्धयर्थं क्रियमाणे मध्यमषोडशश्राद्धान्तर्गत प्रेतश्राद्धे प्रेत एषोऽर्घस्ते मया दीयते, तवोपतिष्ठताम् ।

सव्येन (सव्ये भएर हस्तार्घ गर्ने)

११) कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशाधिकार सिद्धयर्थं क्रियमाणे मध्यमषोडशश्राद्धान्तर्गत विष्णुश्राद्धे विष्णो एषोऽर्घस्ते नमः ।

१२) ब्रह्माश्राद्धे ब्रह्मण एषोऽर्घस्ते नमः

१३) विष्णुश्राद्धे विष्णो एषोऽर्घस्ते नमः

१४) शिवश्राद्धे शिव एषोऽर्घस्ते नमः

१५) यमश्राद्धे यम एषोऽर्घस्ते नमः

१६) तत्पुरुषश्राद्धे तत्पुरुष एषोऽर्घस्ते नमः (तत्पुरुष प्रेत नभई परमात्मा भएकाले सव्ये नै भएर कार्य गर्ने चलन छ)

विष्णुवादि अर्चनम्

(विष्णुदेखि पुरुषसम्मका नौ देवतालाई पूजा गर्ने र धूप, वत्ती, नैवेद्य चढाउने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशार्थं क्रियमाणे मध्यमषोडशश्राद्धान्तर्गत विष्ण्वादिपुरुषान्तदेवा एतान्यर्चनानि युष्पभ्यं नमः ।

अपसव्येन प्रेतार्चनम्

(अपसव्ये भएर प्रेत ऋषिलाई पूजा गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशार्थं क्रियमाणे मध्यमषोडशश्राद्धान्तर्गते दशमे प्रेतश्राद्धे प्रेत एतान्यर्चनानि ते मया दीयन्ते, तवोपतिष्ठन्ताम् ।

सव्येन विष्णवादितत्पुरुषार्चनम्

(सव्ये भएर विष्णुदेखि तत्पुरुषसम्मलाई पूजा गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशार्थं क्रियमाणे मध्यमषोडशश्राद्धान्तर्गते विष्ण्वादितत्पुरुषान्तदेवा एतान्यर्चनानि युष्मभ्यं नमः ।

चतुष्कोण निर्माणम् अपसव्येन

(अपसव्ये भएर चतुष्कोण वनाउने)

ॐ यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति । एवं मण्डलतोयं तु सर्वभूतानि रक्षतु ॥

तत्रादौ भूस्वामी

(भूस्वामी सिदा गर्ने)

ॐ इदमन्नमेतद् भूस्वामिपितृभ्यो नमः

अन्न सङ्कल्पः मधु-प्रक्षेप

(सिदा राख्ने र सिदामा मह छर्कने)

ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ मधु नक्तमुतोषसो मधुमत् पार्थिव ꣳ रजः । मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँ२ँ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ ॐ मधु मधु मधु ॥

पात्रालम्भनम् सव्येन

(सव्ये भएर सिदामा दुवै हातले ढाक्ने)

ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ।

ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य पा ꣳ सुरे स्वाहा । ॐ कृष्ण हव्यमिदं रक्ष मदीयम् ।

(बूढी औंलाले अन्न, जल, घ्यू देखाउने)

इदमन्नम् इमा आपः इदमाज्यम् इदं हव्यम् ॐ यवोऽसि यवयास्मद् द्वेषो यवयारातीः । (जौ छर्ने)

हव्यदान सङ्कल्प

(नौवटा सिदा राखी छुट्टाछुट्टै सङ्कल्प गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः)प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशार्थं क्रियमाणे मध्यमषोडशश्राद्धान्तर्गत विष्णुश्राद्धे विष्णवे इदमन्नं सोपस्करममृतस्वरूपं हव्यं स्वाहा सम्पद्यताम्, न मम ।

कव्यदान सङ्कल्प अपसव्येन (अपसव्ये भएर प्रेतको सिदा सङ्कल्प गर्ने)

ॐ अपहता असुरा रक्षा ꣳसि वेदिषदः । तिलान् विकीर्य (तिल छर्कने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशार्थं क्रियमाणे मध्यमषोडशश्राद्धान्तर्गते दशमे प्रेतश्राद्धे हइदमन्नं सोपस्करममृतस्वरूपं कव्यं प्रेताय ते मया दीयते तवोपतिष्ठताम्।

पुनः हव्यदान सङ्कल्प सव्येन (सव्ये भएर ६ वटा सिदा राखी छुट्टाछुट्टै सङ्कल्प गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशार्थं क्रियमाणे मध्यमषोडशश्राद्धान्तर्गतविष्णुश्राद्धे विष्णवे इदमन्नं सोपस्करममृतस्वरूपं हव्यं स्वाहा सम्पद्यताम्, न मम।

प्रार्थना (फूल अक्षता लिएर नमस्कार गर्ने)

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत्। अच्छिद्रमस्तु तत्सर्वं पित्रादीनां प्रसादतः ॥

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः।

ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥ ॐ इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽआप्यायध्व मघ्न्याऽ इन्द्राय भागं प्रजावतीरनमीवाऽ अयक्ष्मा मा व स्तेनऽईशत माघशꣳसो ध्रुवाऽ अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि। ॐ अग्नऽ आ याहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि ॥ ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः ॥

ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमम्। देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

विकिरासनम् अपसव्येन (अपसव्ये भई विकरलाई आसन राख्ने)

असंस्कृतप्रमीतानां त्यागिनां कुलभागिनाम्। उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ॥

विकिरदानम् (विकरलाई आसनमा घोप्ट्याउने)

अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम। भूमौ दत्तेन तुप्यन्तु तृप्ता यान्तु परां गतिम् ॥

पिण्डवेदिनिर्माणं (सव्ये भई नौ अपसव्येले प्रेतको र सव्यले ६ बालुवाको वेदी बनाउने)

ॐ अपहता असुरा रक्षा ꣳसि वेदिषदः । (नौ र छ मा रेखा कोर्ने)

उल्मुकं स्थापनम् (धूप घुमाउने)

ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति।
परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥

(विष्णु, शिव, यम, सोमराज, हव्यवाहन, कव्यवाहन, काल, रुद्र, पुरुष सबैलाई

अवनेजनम् सङ्कल्प दुनामा जल राखी सङ्कल्प गर्ने र नौ वटा छुट्टाछुट्टै कुश वेदीमा राख्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्त्यर्थं क्रियमाण मध्यमषोडश-श्राद्धान्तर्गतविष्णुश्राद्धे पिण्डस्थाने विष्णो अत्रावनेनिक्ष्व ते नमः ।

प्रेत अवनेजनम् सङ्कल्प (अपसव्ये भएर प्रेतको पिण्ड दिने ठाउँमा कुश राख्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्त्यर्थं क्रियमाण मध्यमषोडशश्राद्धान्तर्गत प्रेतश्राद्धे पिण्डस्थाने प्रेत अत्रावनेनिक्ष्व ते मया दीयते, तवोपतिष्ठताम् ।

पुनः अवनेजनम् सव्येन (सव्ये भएर विष्णु, ब्रह्मन्, विष्णु, शिव, यम, तत्पुरुषलाई ६ वटा कुश वेदीमा राख्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्त्यर्थं क्रियमाण मध्यमषोडशश्राद्धान्तर्गत विष्णुश्राद्धे पिण्डस्थाने विष्णो अत्रावनेनिक्ष्व ते नमः ।

पिण्डदानम् (विष्णु, शिव, यम, सोमराज, हव्यवाहन, कव्यवाहन, काल, रुद्र, पुरुष सबै नौ देवतालाई नौ पिण्ड दिने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्त्यर्थं क्रियमाण मध्यमषोडशश्राद्धान्तर्गत विष्णुश्राद्धे विष्णो एष पिण्डस्ते नमः ।

प्रेतपिण्डदानम् अपसव्येन (अपसव्ये भएर प्रेतलाई पिण्ड दिने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकपितृपङ्क्तिप्रवेशार्थं क्रियमाण मध्यमषोडशश्राद्धान्तर्गतप्रेतश्राद्धे प्रेत एष पिण्डस्ते मया दीयते, तवोपतिष्ठताम् ।

पुनः पिण्डदानम् सव्येन (सव्ये भएर विष्णु, ब्रह्मन्, विष्णु, शिव, यम, तत्पुरुषलाई ६ देवतालाई ६ पिण्ड दिने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्त्यं क्रियमाण मध्यमषोडशश्राद्धान्तर्गत-विष्णुश्राद्धे विष्णो एष पिण्डस्ते नमः । लेपभागनिषेधः करं प्रोक्ष्य, आचम्य हरिं स्मरेत् । (आचमन गरेर हरिः हरिः भन्ने)

प्रत्यवनेजनम् (दुनामा जल राखेर पहिलेको नौ पिण्डमा प्रत्यवनेजनं गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्त्यं क्रियमाण मध्यमषोडशश्राद्धान्तर्गत विष्णुपिण्डे विष्णो अत्र प्रत्यवनेनिक्ष्व ते नमः ।

प्रेतपिण्डोपरि प्रत्यवनेजनम् अपसव्येन (अपसव्ये भएर प्रेतपिण्डमा प्रत्यवनेजनम् गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्त्यं क्रियमाण मध्यमषोडशश्राद्धान्तर्गत प्रेतपिण्डे प्रेत अत्र प्रत्यवनेनिक्ष्व ते मया दीयते, तवोपतिष्ठताम् ।

पुनः प्रत्यवनेजनम् सव्येन (सव्ये भएर बाँकी ६ पिण्डमा प्रत्यवनेजनम् गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्त्यं क्रियमाणे मध्यमषोडशश्राद्धान्तर्गत विष्णुपिण्डे विष्णो अत्र प्रत्यवनेनिक्ष्व ते नमः । – ततो नीवीं विस्रंस्य । (कटिको नीवी भुईमा खसालिदिने)

पिण्डपूजनम्

(पहिलेको नौ पिण्डहरूलाई पूजा गर्ने र सङ्कल्प गर्ने)

गन्धापुष्पादिभिः पिण्डं संपूज्य, कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्त्यं क्रियमाण मध्यमषोडशश्राद्धान्तर्गतविष्ण्वादिपुरुषान्तदेवाः पिण्डेषु एतान्यर्चनानि युष्मभ्यं नमः ।

प्रेतपिण्डपूजनम् अपसव्येन

(अपसव्ये भएर प्रेतपिण्ड पूजा गरी सङ्कल्प गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्त्यं क्रियमाण मध्यमषोडशश्राद्धान्तर्गतप्रेत श्राद्धपिण्डे प्रेत एतान्यर्चनानि ते मया दीयन्ते, तवोपतिष्ठन्ताम् ।

पुनः पिण्डपूजनम् सव्येन

(सव्ये भएर बाँकी ६ पिण्ड पूजा गरी जौ, कुश, जल लिएर सङ्कल्प गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवर्त्त्यं क्रियमाण मध्यमषोडशश्राद्धान्तर्गत विष्ण्वादितत्पुरुषान्तदेवाः पिण्डेषु एतान्यर्चनानि युष्मभ्यं नमः ।

सद्गतिकामना

(सद्गतिको कामना गर्ने)

एभिः पिण्डदानैः ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिः सद्गतिप्राप्तिश्च भवताम् ।

ततो विप्रकरे

(सव्ये नै , अपसव्ये र सव्ये भएर ९+१+६=१६ ऋषिमै जल अक्षता फूल चढाउने)

ॐ शिवा आपः सन्तु इति जलम् । ॐ सौमनस्यमस्तु इति पुष्पम् । ॐ अक्षतं चारिष्टं चास्तु इति तण्डुलान् दद्यात् ।

अक्षय्योदकम्

(सव्ये नै, अपसव्ये र सव्ये भएर अक्षय्योदक जल ९+१+६=१६ पिण्डमै चढाउने)

१) ॐ विष्णोर्दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
२) ॐ शिवस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
३) ॐ यमस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
४) ॐ सोमराजस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
५) ॐ हव्यवाहनस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
६) ॐ कव्यवाहनस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
७) ॐ कालस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
८) ॐ रुद्रस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
९) ॐ पुरुषस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ।

अपसव्येन

(अपसव्ये भएर प्रेतपिण्डमा जल चढाउने)

१०) ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्त्यर्थं मध्यमषोडशश्राद्धान्तर्गत दशम प्रेतश्राद्धे प्रेतदत्तैतदन्नपानादिकमक्षय्यमस्तु ।

सव्येन

(सव्ये भएर चढाउने)

११) ॐ विष्णोर्दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
१२) ॐ ब्रह्मणो दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
१३) ॐ विष्णोर्दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
१४) ॐ शिवस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
१५) ॐ यमस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ।
१६) ॐ तत्पुरुषस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ।

जलधारां दद्यात्

(सव्ये नै, अपसव्ये र सव्ये भएर ९+१+६=१६ सबै पिण्डहरूमा जल चढाउने)

ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृङ्ग्यर्थं क्रियमाण मध्यमषोडशश्राद्धान्तर्गतविष्णवादि-तत्पुरुषान्तदेवाः एषा जलधारा युष्मभ्यं नमः। विष्ण्वादयस्तत्पुरुषान्तदेवाः प्रीयन्ताम् न मम।

जलधारा

(पिण्डमा जल चढाउने)

ॐ अघोराः पितरः सन्तु।

आशीषप्रार्थना

(यजमानले भन्ने)

ॐ गोत्रं नो वर्धताम्। दातारो नोऽभिवर्धन्ताम्। वेदाः वर्धताम्। सन्तति वर्धताम्। श्रद्धा च नो मा व्यगमद्। बहुदेयं च नोऽस्तु। अन्नं च नो बहु भवेत्। अतिथींश्च लभेमहि। याचितारश्च नः सन्तु मा च याचिष्म कञ्चन। एताः सत्या आशिषः सन्तु॥ ॐ सन्तु।

(ब्राह्मणले भन्ने)

पयोधारा अपसव्येन

(अपसव्ये भएर पिण्डमा दुध चढाउने)

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधा स्थ तर्पयत मे पितॄन्॥

सव्येन नम्रीभूय पिण्डमाघ्राय उत्थापयेत्

(सव्ये भएर पन्ध्र पिण्ड र अपसव्येले प्रेत पिण्ड उठाउने)

अर्घपात्र सञ्चालनम्

(सव्ये, अपसव्ये र सव्ये भएर ९+१+६=१६ सबै अर्घपात्र चलाउने)

दक्षिणासङ्कल्प

(दक्षिणा सङ्कल्प गर्ने)

कुशादीन्यादाय – ॐ अद्य ... गोत्रस्य ... प्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकवैकुण्ठाद्युत्तमलोकप्राप्तिकामनया मध्यमषोडशश्राद्धानं प्रतिष्ठार्थं हिरण्यं (निष्कयद्रव्यं वा) ब्राह्मणेभ्यः सम्प्रददे।

देवताभ्य त्रिः पठेत्

(तीनपटक पढ्ने र नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥

अपसव्येन दीपाच्छादनं

(अपसव्ये भएर दियो ढाकिदिने)

सव्येनऽऽचामेत् प्रार्थना

(सव्ये भएर आचमन गरी नमस्कार गर्ने)

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
यत्पादपङ्कजस्मरणाद् यस्य नामजपादपि। न्यूनं कर्म भवेत् पूर्णं तं वन्दे साम्बमीश्वरम्॥

ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः।

(तीनपटक भन्ने)

ॐ साम्बसदाशिवाय नमः। ॐ साम्बसदाशिवाय नमः। ॐ साम्बसदाशिवाय नमः।

(तीनपटक भन्ने)

॥ मध्यमषोडशीश्राद्धम् सम्पूर्णम्॥

एकादशाहे क्रियाक्रमः (वृषोत्सर्गविधिः)

(एघार दिनमा खोला, पीपलको फेद, पंधेरो या कुनै अनुकूल ठाउँमा कर्म गर्ने)

अथ प्रातर्नदीं जलाशयान्तरं वा गत्वा पात्रब्राह्मणस्य श्मश्रुकर्म नखच्छेदनं च कारयित्वा ताम्रपात्रेण स्नानोपकरणं तैलोद्वर्तनं च दत्त्वा स्वयं च स्नात्वा श्वेतवस्त्रं परिधाय जलाशयसमीपे गृहे वा श्राद्धभूमिं प्रकल्प्य तां संशोध्य गौरमृत्तिकयाऽऽच्छाद्य गोमयेनोपलिप्य पञ्चगव्येनाभ्युक्ष्य तिलान् सर्षपांश्च विकिरेत्। आस्तृतपाकस्थाने तिलान् विकीर्य तत्र सपिण्डनद्वारानूतनमृण्मयभाण्डे ताम्रपात्रादिभिर्वा पाकं कारयितुमारभ्योदङ्मुखाय ब्राह्मणाय शय्यां दद्यात्।

शय्यादानम्

(सव्य नै भएर शय्या दान गर्ने)

कर्त्ता आचान्तः पूर्वाभिमुखः सव्येन सोपकरणशय्यायै नमः, ब्राह्मणाय नमः, इति शय्या ब्राह्मणं च त्रिः संपूज्य वारिणा शय्यामभिषिच्य कुशतिलजलान्यादाय-अद्याशौचान्तद्वितीयेऽह्नि अमुक गोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) स्वर्गप्राप्तिकाम इमां सोपकरणशय्यां विष्णुदैवताममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।

प्रार्थना

(नमस्कार गर्ने)

यस्मादशून्यं शयनं केशवस्य शिवस्य च। शय्या अस्याप्यशून्यास्तु तस्माज्जन्मनि जन्मनि॥

इत्युक्त्वा दद्यात्। स्वस्तीति प्रतिवचनम्।

दानप्रतिष्ठा

(दानप्रतिष्ठा गर्ने)

कुशतिलजलसहितं दक्षिणाद्रव्यमादाय –

अद्य कृतैतस्सोपकरणशय्यादानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं सम्प्रददे। इति दक्षिणां दद्यात्। प्रतिग्रहीता स्वस्तीत्युक्त्वा शय्यां स्पृशेत्।

काञ्चनपुरूषदानम्

(फलवस्त्रसहित काञ्चनपुरुष (सुनको प्रतिमा) दान गर्न पूजा गर्ने)

आचम्य फलवस्त्रसमन्वितकाञ्चनपुरुषाय नमः। ब्राह्मणाय नमः।

प्रार्थना

(नमस्कार गर्ने)

सुवर्णनिर्मितम् दिव्यम् पुरुषोत्तमरुपिणम्। काञ्चनम् पुरुषम् नाम ददामि सर्वशुद्धय॥

इति देयं ब्राह्मणं च त्रिः सम्पूज्य कुशादीन्यादाय – (कुश, जल लिई सङ्कल्प गर्ने)

अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्यामुकप्रेतस्य स्वर्गप्राप्तिकाम इमं फलवस्त्रसमन्वितं काञ्चनपुरुषं विष्णुदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे। स्वस्तीति प्रतिवचनम्।

ततो दक्षिणाद्रव्यादिकमादाय

(दक्षिणा सङ्कल्प गर्ने)

अद्यकृतैतत्फलवस्त्रसमन्वितकाञ्चनपुरुषदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्राया –

मुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे। इति दक्षिणां दद्यात्।

प्रतिग्रहीता स्वस्तीत्युक्त्वा काञ्चनपुरुषं स्पृशेत्॥

द्विजदम्पतिपूजनम्

(ब्राह्मण ब्राह्मणी पूजा गर्ने)

आचम्य कुशतिलजलान्यादाय – अद्याशौचान्तद्वितीयेऽन्हिन अमुकगोत्रस्यामुकप्रेतस्य स्वर्गप्राप्तिकामो द्विजदम्पती अहं पूजयिष्ये । इति संकल्प्य, द्विजदम्पती पूजयेत् । तत्र क्रमः –

एषोऽर्घो द्विजदम्पतीभ्यां नमः, इदं पुष्पं द्विजदम्पतीभ्यां नमः, एते अक्षताः द्विजदम्पतीभ्यां नमः, एवं धूपदीपनैवेद्यपुगीफलसिन्दूरभूषणवासांसि द्विजदम्पतीभ्यां नमः इति दद्यात् ॥ ततो नमस्कुर्यात् । प्रतिमां पूजयित्वा ब्राह्मणाय दद्यात् । एतच्च द्विजदम्पतीपूजनं प्रधानत्वाद्वृषोत्सर्गाकरणेऽपि कर्तव्यं शय्यादानवदिति । शय्यादानादिकमन्वारोहणेऽपि कर्त्तव्यम् । तत्रामुकगोत्राय अमुकप्रेताय इति वाक्यं कुर्यात् ।

वृषोत्सर्गविधिः

(वाच्छो वाच्छी ठीक पार्ने)

पतिपुत्रवती नारी भर्त्तुरग्रे मृता यदि । वृषोत्सर्गं न कुर्वीत गां च दद्यात् पयस्विनीम् ॥

इति वचनात् सधवायाः प्रेतत्वे वृषोत्सर्गो न विधेयः । वृषोत्सर्गं च कुर्वीतेतिवचनादेकादशाहे मुख्यकाले मातृस्थापनपूजाभ्युदयिक – श्राद्धरहितवृषोत्सर्गः कर्तव्यः ।

वृषोत्सर्गप्रयोगः

(सव्य नै रहेर आचमन गरी सङ्कल्प गर्ने)

आचान्तः पूर्वाभिमुख उपविश्य सव्येन कुशतिलजलान्यादाय –

प्रतिज्ञासंकल्पः

(प्रतिज्ञा सङ्कल्प गर्ने)

अद्याशौचान्तद्वितीयेऽन्हिन अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्तिस्वर्गलोकगमनार्थं वत्सतरी–सहितवृषोत्सर्गमहं करिष्ये । इति संकल्पं कुर्यात् । तत उत्तराभिमुखं ब्राह्मणमुपवेशयेत् ।

ब्राह्मणवरणम्

(ब्राह्मणवरण गर्ने)

अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) कर्त्तव्यवृषोत्सर्गाङ्गभूतहोमकर्मणि कृताकृतावेक्षणरूपब्रह्म कर्मकर्तुम-मुकगोत्रममुकशर्माणां ब्राह्मणमेभिः पुष्पचन्दनताम्बूलपूगीफलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे। इति ब्राह्मणं वृणुयात् । वृतोऽस्मि - प्रतिवचनम् । यथा विहितं कर्म कुरु, करवाणि इति प्रतिवचनम् । ततः –

अद्यामुकगोत्रस्यामुकप्रेतस्य कर्त्तव्यवृषोत्सर्गाङ्गभूतहोमकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलपूगीफलवासोभिर्होतृत्वेन त्वामहं वृणे । इति होतृब्राह्मणं वृणुयात् । वृतोऽस्मीति प्रतिवचनम् । यथाविहितं कर्म कुरु । करवाणि प्रतिवचनम् ।

हवनवेदिनिर्माणम् संस्कारश्च

(हवनवेदी निर्माण गरी संस्कार गर्ने)

ततो होता आचान्तः प्राङ्मुखोपविष्टो गोमयेनोपलिप्ते प्रागुदक्प्रवणे देशे कुशैर्हस्तमात्रां चतुरस्रभूमिं परिसमूह्य कुशानैशान्यां क्षिप्त्वा गोमयोदकेनोपलिप्य मध्ये प्रादेशमात्रमुत्तरोत्तरक्रमेण स्रुवमूलेन त्रिरुल्लिख्योल्लेखनक्रमेण रेखारजो दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां सङ्गताभ्यामुद्धृत्य ऐशान्यां तत् क्षिप्त्वा तं देशं जलेनाभ्युक्ष्य तत्र

दक्षिणहस्तास्थकांस्यपात्रेण अग्निस्थापयेत् । अग्नेर्दक्षिणतः परिस्तरणभूमिमतिक्रम्य शुद्ध मासनमुपकलप्य तत्र प्रागग्रकुशैः स्तरणं विधाय ब्राह्मणमग्नेर्वायव्याः प्रदक्षिणमानीय कल्पितासने बर्हिर्हस्तमुपवेशयेत्। ततोऽग्नेरुत्तरतः स्तरणभूमिमतिक्रम्य कुशत्रयमास्तीर्य्य तत्र प्रणीतापात्रमध्ये पिष्टादिना व्यवधानं कृत्वा मूलदेशे पय इतरत्र जलं प्रक्षिप्य आसने निधाय उपमूलसकृल्लूनबर्हिषां मुष्टिचतुर्भागे आग्नेयादीशानान्तं प्राच्यां ब्रह्मणोऽग्निपर्यन्तं दक्षिणस्यां नैर्ऋत्याद्वायव्यान्तं पश्चिमायामग्नितः प्रणीतापर्यन्तमुत्तरस्यां स्तरणं कुर्यात्। ततोऽग्नेरुत्तरतः पश्चिमे वा प्राकसंस्थमुदक्संस्थं वा उपयोक्षमाणानामासादनम् – तद्यथा– पवित्रछेदनार्थं कुशपत्रत्रयं पवित्रार्थमनन्तर्गर्भिणं साग्रं कुशपत्रद्वयं प्रोक्ष्यण्यर्थं मृत्पात्रं आज्यार्थं ताम्रस्थालीं पायसचर्वर्थं मृत्स्थालीं स्रुवसंमार्जनार्थं कुशपत्रत्रयं उपग्रहार्थं वेणीरूपकुशत्रयं प्रादेशमितपलाशसमित्त्रयं स्रुवः आज्यं तण्डुलाः दुग्धम् एवमासाद्य तदुत्तरतः सिद्धमेव पिष्टं ब्रह्मदक्षिणार्थं पूर्णपात्रं होतृदक्षिणार्थं वस्त्रयुग्मं सुवर्णकांस्यान्युपकल्पयेत्। ततः आसादितकुशपत्रद्वयमादाय पवित्रछेदनकुशैः प्रादेशमात्रं छित्त्वा पवित्रेस्थ इतितानपास्य पवित्रेण पवित्रं कृत्वा प्रणीतोदकं प्रोक्षण्यां निधाय उदगग्रपवित्रव्यस्तहस्तयोरङ्गुष्ठानामिकाभ्यामन्तरादाय तन्मध्येन प्रोक्षण्युदकं त्रिरुर्ध्वं क्षिप्त्वा पवित्रे प्रोक्षण्यां निधाय तत्पात्रं दक्षिणहस्तेनादाय वामे निधाय दक्षिणहस्ताङ्गुष्ठानामिकाभ्यां तज्जलं किंचिदूर्ध्वं प्रक्षिप्य प्रणीताजलेन प्रोक्षणीरभिषिच्य तज्जलेन यथासादितं द्रव्यं प्रत्येकं सकृत् प्रोक्ष्य पवित्रशेषजलसहितं पात्रं प्रणीताग्न्योरन्तरे निधाय, आज्यस्थाल्यामाज्यं निरूप्य चरुस्थाल्यां प्रणीतोदकं प्रक्षिप्य, एकत्र प्रदेशे रुद्रहोमार्थं दुग्धं निक्षिप्य प्रणीतोदकेन त्रिः प्रक्षालिततण्डुलान् चरुस्थाल्यां निक्षिपेत्। स्वयं चरुं ब्रह्मा चाज्यां गृहीत्वा प्रदक्षिणीकृत्य अग्निं पूर्वेण नीत्वा दक्षिणतः आज्यम् उत्तरतः पायसचरुं श्रपणार्थं युगपदग्नौ निधाय ज्वलत्तृणमादाज्यचर्वोरुपरि प्रदक्षिणं भ्रामयित्वा अग्नौ क्षिपेत्, स्रुवस्य प्रागग्रस्यावाङ्मुखस्याग्नौ प्रतपनं सम्मार्जनकुशैः सम्मार्ज्जनं प्रणीताजलेन स्रुवस्य प्रोक्षणं पुनः प्रतपनम् आस्तृतवर्हिषी स्वपुरतः प्रागग्रस्थापनं विधाय पाके वृत्ते स्वयं चरुं ब्रह्मा चाज्यमुद्वास्य अग्नेः पश्चिमेन नीत्वाज्यमुत्तरतः पायसचरुं निदध्यात्। प्रोक्षणीतः पवित्रे समानीयाज्यं प्रोक्षणीवदुत्पूय पवित्रे प्रोक्षण्यां निधाय आज्यमवेक्ष सत्यपद्रव्ये तन्निरस्य पुनः प्रोक्षण्युत्पवनं विधाय पायसचरोरुत्तरतः पूर्वसिद्धपिष्टचरुं निधाय होमसमाप्तिपर्यन्तमुपग्रहार्थं कुशैर्वामहस्ते उपग्रहं विधाय प्रजापति चिन्तयन्नुत्तिष्ठन् पवित्रे प्रणीतासु निधाय प्रोक्षणीपात्रं स्वस्थाने निदध्यात्। अथ दक्षिणं जानुं पातयित्वा आज्यं जुहोति स्थाने उपतिष्ठन् प्राङ्मुखोऽन्वारब्धः स्रुवेण षडाज्याहुतीर्दद्यात्। नो कुर्याद्धोममन्त्राणां पृथगादिषु कुत्रचित्। अन्येषां चावकृष्टानां कार्यमाचमनादिना ॥ परिशिष्टवचनात्। ॐ काररहिता षडाज्याहुतीर्दद्यात्। तद्यथा ब्राह्मणाऽन्वारब्धः स्रुवं गृहीत्वा दक्षिणं जानु नमयित्वा संस्रवं विनैवाज्येन षडाहुतीर्जुहुयात्। स्वाहान्ते होमः।

हवनम्

(हवन गर्ने)

ॐ अग्नये स्वाहा, इदमग्नये न मम। इति त्यागः। इह रति स्वाहा, इदमग्नये०। इहरमध्व ऽ स्वाहा, इदमग्नये न मम। इह धृतिः स्वाहा, इदमग्नये०। इह स्वधृतिः स्वाहा, इदमग्नये०। उपसृजं धरुणं मात्रे धरुणो मातरन्धयन् स्वाहा, इद मग्नये०। रायस्पोषमस्मासु दीधरत् स्वाहा, इदमग्नये०। ततो

ब्रह्मणान्वारब्धो जुहोति । अग्नेर्दक्षिणभागे मनसा – ॐ प्रजापतये स्वाहा, इदं प्रजापतये ।
अग्नेरुत्तरभागे – ॐ इन्द्राय स्वाहा, इदमिन्द्राय ।
ततः उत्तरार्द्धे – ॐ अग्नये स्वाहा, इदमग्नये ।
दक्षिणपूर्वार्द्धे – ॐ सोमाय स्वाहा, इदं सोमाय । इत्याघारावाज्यभागौ हुत्वा समिद्धतमेग्नौ संस्रवं विनैव पायसेन नवाहुतयो दातव्याः । तद्यथा – ॐ अग्नये स्वाहा, इदमग्नये । ॐ रुद्राय स्वाहा, इदं रुद्राय । ॐ शर्वाय स्वाहा, इदं शर्वाय । ॐ पशुपतये स्वाहा, इदं पशुपतये । ॐ उग्राय स्वाहा, इदमुग्राय । ॐ अशनये स्वाहा, इदमशनये । ॐ भवाय स्वाहा, इदं भवाय । ॐ महादेवाय स्वाहा, इदं महादेवाय । ॐ ईशानाय स्वाहा, इदमीशानाय । प्रत्याहुत्युदकस्पर्श इति हुत्वा पिष्टकेन जुहुयात् –
ॐ पूषा गा अन्वेतु नः पूषा रक्षत्ववर्वतः । पूषा वाज ँ सनोतु नः स्वाहा इदं पूष्णे ॥
ततः आज्येनाग्नेर्मध्यभागे – ॐ भूः स्वाहा इदमग्नये । ॐ भुवः स्वाहा इदं वायवे ।
ॐ स्वः स्वाहा इदं सूर्याय ।
ॐ त्वन्नोऽअग्नेवरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः ।
यजिष्ठो वह्निनतमः शोशुचानो व्विश्वा द्वेषा ँ सि प्रमुमुग्ध्यस्मत् ॥ स्वाहा इदमग्नीवरुणाभ्याम् ।
ॐ स त्वन्नोऽअग्ने वमोभवोतीनेदिष्ठो अस्याऽउषसो व्युष्टौ ।
अवयक्ष्वनो वरुण ँ रराणो वीहिमृडीक ँ सुहवो नऽएधि स्वाहा ॥ इदमग्नीवरुणाभ्याम् ।
ॐ २ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्यमित्त्वमयाऽअसि ।
अयानो यज्ञं वहास्ययानो धेहि भेषज ँ स्वाहा ॥ इदमग्नये ।
ॐ येते शतं वरुणं ये सहस्रं यज्ञियाः पाशा विततता महान्तः ।
तेभिर्नोऽअद्य सवितोतविष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यःस्वर्केभ्यः ॥
ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यम ँ श्रथाय ।
अथावयमादित्यव्रते तवानागसोऽअदितये स्याम स्वाहा ॥ इदं वरुणाय ।
ॐ प्रजापतये स्वाहा । इदम् प्रजापतये इति मनसा । एवं हुत्वा पवित्राभ्यां शिरः समार्ज्जनं कुर्यात् ।
ततः पायसपिष्टकाभ्याम् – ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते ।
ततः आज्येनाग्नेर्मध्यभागे – ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते ।

प्रणीताविमोकः

(प्रणीताको जलले सेचन गर्ने)

ॐ सुमित्रिया नऽआपऽओषधयः सन्तु । इति । ततो दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ इति मन्त्रेणैशान्यां प्रणीताविमोकः । ततः फलपुष्पान्वितेन घृतेन –

पूर्णाहुतिः

(सुपारीको पूर्णाहुति हवन गर्ने)

ॐ मूर्धानन्दिवोऽ अरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम्। कवि ꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः स्वाहा। इदमग्नये। इति यजमानसहितो होता पूर्णाहुतिं कुर्यात्।

बर्हिहोमः

(अग्निमा ओछ्याएको कुश हवन गर्ने)

ततः स्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य ॐ देवा गातुविदो गातुं वित्त्वा गातुमित। मनसस्पत इमं देवयज्ञ ꣳ स्वाहा वातेधाः॥ इदमग्नये इति वर्हिर्होमं कुर्यात्।

पूर्णपात्रदानम्

(पूर्णपात्र सङ्कल्प गर्ने र दिने)

ततो यजमानः कुशतिलजलान्यादाय – अद्येत्यादिवृषोत्सर्गाङ्गतया कृतैतद्योमकर्मणि कृताकृतावेक्षणरूपब्रह्म कर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे। इति ब्राह्मणाय पूर्णपात्रं दद्यात्। स्वस्तीति प्रतिवचनम्।

दक्षिणादानम्

(दक्षिणा सङ्कल्प गर्ने)

ततो वस्त्रयुगसुवर्णकांस्यान्युपनीय, कुशादीन्यादाय – अद्यकृतैतद्वृषोत्सर्गाङ्गभूतहोमकर्मप्रतिष्ठार्थमेतानि वस्त्रयुगसुवर्णकांस्यानि बृहस्पतिवन्हिचन्द्रदैवतान्यमुकगोत्रायामुकशर्मणे ब्राह्मणाय होतृदक्षिणां तुभ्यमहं संप्रददे। इति होत्रे दक्षिणां दद्यात्। स्वस्तीति प्रतिवचनम्। ततो द्विहायनमेकहायनं वा जीवत्सायाः पयस्विन्याः पुत्रं नीलादिवर्णम् वृषभमङ्कयित्वा उत्सृजेत्।

वृषलक्षणम्

(बाच्छो पूजा गर्ने)

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः। श्वेतः खुर, विषाणाभ्यां स नीलो वृष उच्यते॥ इति लक्षणलक्षितं यथालाभं वा आनीय ततश्चतस्रः द्वे एकां वा एकवर्षाधिकां वत्सतरीमानीय अग्निसमीपे सुशिक्षितगोपालेनानीतं वृषभं संवेशयेत्। ततो रुद्राध्यायं पठन् वृषसमीपं गत्वा।

वृषभस्य पार्श्वभागे त्रिशूलचक्रांकनम्

(बाच्छोलाई चन्दनले त्रिशूल र चक्रको छाप लगाउने)

ॐ मानस्तोके तनये मानऽआयुषिमानो गोषुमानोऽअश्वेषुररिषः। मानोवीरान्त्रुद्रभामिनोव्वधीर्ह विष्मन्तः सदमित्त्वाहवामहे॥ इति मन्त्रेण वृषभस्याग्रपाददक्षिणपार्श्वे कुंकुमलाक्षारसचन्दनादिना त्रिशूलं लिखेत्। वृषाह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमानः स्वर्दिशमिति मन्त्रेण पश्चिमपादवामपार्श्वे चक्रं लिखेत् वृषभस्य। तथा छन्दोगपरिशिष्टम् –

ततोऽनेनैव गन्धेन मानस्तोकेति ईरयन्। वृषभस्य दक्षिणे पार्श्वे त्रिशूलाङ्ग समालिखेत्॥ वृषो ह्यसीति सव्ये च चक्राङ्गमपि दर्शयेत्। तप्तेन पश्चादयसारुस्पष्टव्यौ ते च कारयेत॥

अयसा वृषभमंकनम्

(बाच्छाबाच्छीलाई मालाहरू लगाई पूजा गर्ने)

अयसा लोहेन । ततो लोहकारमाहूय – वृषभमङ्केयेति ब्रूयात् । ततोऽग्निसंतप्तलोहेन शूलं चक्रं च स्पष्टे कारयित्वा तमुत्थाप्य वत्सतरीसहितं वृषभं वक्ष्यमाण मन्त्रैःस्नापयेत् ।

वत्सतरीसहितं वृषभस्नानम्

(बाच्छाबाच्छीलाई वस्त्र र जल चढाउने)

तत्र मन्त्राः – ॐ हिरण्यवर्णाः शुचयः पावका या सुतः कस्यपो यास्विन्द्रः । अग्निं या गर्भं दधिरे विरूपास्ता नऽआपः श ँ स्योना सुहवा भवन्तु ॥ यासां राजा वरुणो याति मध्ये सत्यानृतेऽअवपश्यञ्जनानाम् । याऽअग्नि गर्भं दधिरे सुवर्णास्ता नऽआपः श ँ स्योना सहुवा भवन्तु ॥ यासां देवा दिवि कृण्वन्ति भक्ष्यं याऽअन्तरिक्षे बहुधा भवन्तु । शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचम्मे ॥ घृतश्च्युतः शुचयो या पावकास्ता नऽआपः श ँ स्योना सुहवा भवन्तु । शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥ इति ।

वत्सतरीसहितं वृषभालंकरणम्

(बाच्छाबाच्छीलाई कपडाहरू चढाउने)

ततो लोहघण्टिकानूपुरकनकपट्टिकाश्वेतवस्त्रादिभिर्वत्सतरीसहितं वृषभमलंकृत्य सावित्रीमघर्षणरुद्रान् पुरुषसूक्तं च पठेत् । ॐ यद्देवा देवहेडनन्देवासश्चकृमा व्वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्व ँ हसः ॥ ॐ यदि दिवा यदि नक्तमेना ँ सि चकृमा व्ययम् । व्वायुर्म्मा तस्मादेनसो व्विश्वान् मुञ्चत्व ँ हसः ॥ यदि जाग्रद्यदि स्वप्नऽ एना ँ सि चकृमा व्वयम् । सूर्य्यो मा तस्मादेनसो विश्वान्मुञ्चत्व ँ हसः ॥ इति कूष्माण्डीश्च जपेत् ।

वृषभस्य दक्षिणकर्णे मन्त्रपठनम्

(मन्त्र पाठ गर्ने)

ततो वृषभस्य दक्षिणकर्णे – पिता – वत्साना ँ पतिरघ्न्या नाथो पिता महतां गर्गराणाम् । वत्सो जरायुः प्रतिधुक्पीयूषमामिक्षा घृतं तह्स्यै रेतः ॥ वृषो हि भगवान्धर्मश्चतुष्पादः प्रकीर्तितः । वृणोमि तमहं भक्त्या स मां रक्षतु सर्वतः ॥ इति मन्त्रद्वयं पठित्वा वत्सतरीसहितं वृषभं पूजयेत् ।

वत्सतरीसहितंवृषभपूजनम्

(पूजा गर्ने)

एषोऽर्घो वत्सतरीसहितवृषभाय नमः । इदमनुलेपनं वत्सतरीसहितवृषभाय नमः । एतानि धूपदीपनैवेद्यानि वत्सतरीसहितवृषभाय नमः । ततः कुशतिलजलान्यादाय ।

उत्सर्जनम्

(बाच्छाबाच्छी छोड्न सङ्कल्प गर्ने)

सव्येन – अद्याऽशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिपूर्वकाक्षयस्वर्गप्राप्तिकामो रुद्रदैवतमेतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण मानः साप्त जनुषाऽसुभगा रायस्पोषेण समिषा मदेम । इत्युत्सृजेत् । नीलवृषे नीलपदप्रक्षेपः ॥ एतयैवोत्सृजेरन्निति पारस्करवचनात् अनयैव ऋचोत्सर्गः । ततः ऐशानीं दिशं वत्सतरीसहितं वृषभं चालयेत् ।

वत्सतरीसहितं वृषभाभिमन्त्रणम्

(बाच्छाबाच्छीलाई पूजा गर्ने)

वत्सतरीमध्यगतं वृषभमभिमन्त्रयेत् – तत्र मन्त्राः – मयोभूरभिमावाहि स्वाहा मारुतोऽसिमरुताङ्गणः । शम्भूर्मयोभूरभिमावाहि स्वाहा ॥ वस्यूरसि दुवस्वान्छम्भूर्मयोभूरभिमावाहि स्वाहा । यास्तेऽअग्ने सूर्ये रुचोदिवमातन्वन्ति रश्मिभिः ॥ ताभिर्न्नोऽअद्य सर्वाभीरुचे जनाय नस्कृधि ॥ या वो देवाः सुर्ये रुचो गोष्वश्वेषु या रुचः । इन्द्राग्नी ताभिः सर्वाभीरुचन्नो धत्त वृहस्पते ॥ रुचन्नो धेहि ब्राह्मणेषु रुच ꣳ राजसु नस्कृधि । रुचं विश्येषु शूद्रेषु मयि धेहि रुचारुचम् ॥ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह वो घ्युरुश ꣳ स मा नऽआयुः प्रमोषीः ॥ स्वर्णघर्म्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्योतिःस्वाहा स्वर्णसूर्यः स्वाहा इति ॥ ततः कृतापसव्यो दक्षिणाभिमुखो वामजानु पातयित्वा वृषभपुच्छसहिततिलकुशान्यादाय ताम्रपात्रस्थजलेन मन्त्रस्थफलमुदृश्याञ्जलित्रयेण तर्पयेदेभिर्मन्त्रैः –

तर्पणम्

(अपसव्य भएर तर्पण गर्ने)

स्वधा पितृभ्यो मातृभ्यो बन्धुभ्यश्चापि तृप्तये । मातृपक्षाश्च ये केचिद् ये चान्ये पितृपक्षजाः ॥ गुरुश्वशुरवन्धूनां ये कुलेषु समुद्भवाः । ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः ॥ वृषोत्सर्गेण ते सर्वे लभतां तृप्तिमुत्तमाम् । इति । ततो लोहकारमाहूय अभिमतं वेतनं तस्मै दद्यात् ॥ उत्सृष्टं ब्राह्मणान् श्रावयेत् ।

उत्सृष्टायाः वत्सतर्याः गोमयादि निषेधः

(यी गाईको गोबर शुभ कर्ममा निषेध हुन्छ)

उत्सृष्टान्नोपयुञ्जीत स्वामी चान्योऽपि मानवः । नैवान्यं न च तत् क्षीरं पातव्यं केन कुत्रचित् ॥ न वाह्योऽसौ वृषश्चैषामृते गोमूत्रगोमये । इति । पातव्यं केनचित् क्वचिदिति । ततो रुद्राग्रे बहुसर्पिष्कं पायसं ब्राह्मणान् भोजयेत् ।

कपिलादानम्–कपिलासमीपं गत्वा

(गोदान गर्ने)

नमो गोभ्यः श्रीमतीभ्यः सोरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥ इति मन्त्रेण कपिलां पुष्पचन्दनधूपदीपनैवेद्यादिभिः सम्पूज्य कुशजलेन गामभ्युक्ष्य, कुशादीन्यादाय–

(सङ्कल्प गर्ने)

अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) स्वर्गप्राप्तिकाम इमां कपिलां गां सवत्सां हेमशृङ्गीं रौप्यखुरां ताम्रपृष्ठीं वस्त्रयुगच्छन्नां प्रवाललाङ्गूलभूषितांरुद्रदैवताममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । कपिले सर्वदेवानां पूजनीयासि रोहिणी । तीर्थदेवमयी यस्मादतः शान्ति प्रयच्छ मे ॥ इत्युक्त्वा दद्यात् । स्वस्तीति प्रतिवचनम् । ततो दक्षिणाद्रव्यादिकमादाय –

(गोदान प्रतिष्ठा गर्ने)

अद्यकृतैतत्सोपकरणसवत्सकपिलागोदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । इति दक्षिणां दद्यात् । ततः प्रतिग्रहीता –

(अभिषेक गर्ने)

ॐ कोदात्कस्माऽअदात् कामोदात्कामायादात् । कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥ इति कामस्तुतिं पठन् गोपुच्छग्रहणं कुर्यात् । यथोक्तकपिलाभावे केवलामपि दद्यात् ॥ ततः सचैलं स्नायात् ॥

॥ इति वृषोत्सर्गविधिः ॥

एकादशाहे आद्यमासिकश्राद्धप्रयोगः

(स्नान गरेर एघारौं दिनमा गरिने मासिक श्राद्ध गर्ने)

कर्ता शुचिराचान्तः शुक्लद्विवासा भूम्यै नमः। इति पुष्पाक्षतपूजितायां भूमौ दर्भेषु तिष्ठन् यजमानसवर्णेनाहूतमाचान्तं ब्राह्मणं स्वागतमिति पृच्छेत्। सुस्वागतमिति तेनोक्ते उभावुपविशतः। (ऋषि र दियो थापेर दियो वाली पूजा गर्ने)

ब्राह्मणनिमन्त्रणम्

(अपसव्य भएर ऋषिलाई निमन्त्रणा गर्ने)

ततः श्राद्धकर्तापसव्येन पुष्पचन्दनपूगीफलानि ब्राह्मणाय दत्त्वा ब्राह्मणदक्षिणजानु स्पृष्ट्वा– अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रे, प्रेते) आद्यमासिक श्राद्धकरणाय भवन्तं ब्राह्मणमहमामन्त्रये।

आमन्त्रितोऽस्मीति प्रतिवचनम्।

प्रार्थना

(नमस्कार गर्ने)

ॐ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः। भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा॥
सर्वायासविनिर्मुक्तै कामक्रोधविवर्जितैः। भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि॥

पादार्घः

(ऋषि अगाडि दुना राखेर जल, फूल, कुश राख्ने र ऋषिलाई जल सेचन गर्ने)

पात्रब्राह्मणं नियमान् श्रावयेत्॥ भवितव्यमिति तेनोक्ते अर्घपात्रं वामहस्ते कृत्वा गन्धपुष्पादिनाभ्यर्च्य कुशं गृहीत्वा-

(सङ्कल्प गर्ने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) आद्यमासिकश्राद्धे एष पादार्घस्ते मया दीयते तवोपतिष्ठताम्। इति पादार्घं दद्यात्। ततस्तिलतैलेन विप्रपादौ आजानु अभ्यञ्जयेत्।

(आचमन गर्ने)

ततः स्वयमाचम्य पात्रब्राह्मणमप्याचाम्याग्रे कृत्वा श्राद्धदेशमागत्योपविश्यान्नाभिप्रायेण सिद्धमिति पृच्छेत्॥

ब्राह्मणोपवेशनम्

(ब्राह्मणलाई उत्तर फर्काएर राख्ने)

ततो दक्षिणाग्रं कुशसहितनेपालकम्बलाद्यात्मकमासनमुपकल्प्यासनं स्पृशन्, अत्र देवराजाभ्यनुज्ञातो विश्रम्यतां द्विजवर्यानुग्रहात्। प्रसादये त्वा समगृह्यपूतज्ञानाग्निपूतेन करेण विप्र॥ इति मन्त्रं पठित्वा पात्रब्राह्मणं दक्षिणहस्ते धृत्वोदङ्मुखमुपवेशयेत्। ततः पात्रब्राह्मणस्य पादस्थले दक्षिणाग्रकुशत्रयं दद्यात्।

कर्मपात्रनिर्माणम्

(कर्मपात्र बनाउने)

आसनसमीपे च तिलतैलेन घृतेन वा श्राद्धसमाप्तिपर्यन्तस्थापितदीपं दद्यात्। तद्रक्षा च पात्रब्राह्मणेन कार्या। रक्षोघ्नान्गौरसर्षपान् तिलांश्च श्राद्धदेशे विकिरेत्।

(तिल, सर्स्यू छर्ने)

ततः पूर्वाभिमुखः सव्यं कृत्वा कुशोदकेन- (सव्य भएर जल सेचन गर्ने)

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥

इति पठित्वा पुण्डरीकाक्षः पुनात्विति पुण्डरीकाक्षं स्मृत्वा श्राद्धीयद्रव्याण्यात्मानं च सिञ्चेत् ।

प्रतिज्ञासङ्कल्प

(प्रतिज्ञासङ्कल्प गर्ने)

ततः कुशतिलजलान्यादाय-

अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिकामो यथाकालमाद्यादिषोडश-श्राद्धान्यहं करिष्ये । इति संकल्प्य, तस्मिन् वर्षे मरणदिनमारभ्य द्वादशमासेषु मध्ये अधिकमासपतिते षोडशपदस्याने सप्तदशपदं योज्यम् । (मरण भएको वर्ष अधिकमास परेमा १६ को ठाउँमा १७ ओटा मासिक श्राद्ध गर्नुपर्दछ ।)

पुनः कुशतिलजलान्यादाय

(सङ्कल्प गर्ने)

अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिहेतुः षोडशश्राद्धान्तगताद्यमासिक-श्राद्धमहं करिष्ये । इति संकल्प्य, कुरुष्वेति ब्राह्मणप्रतिवचनं गृहीत्वा सव्येन- (सव्य भएर नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिवारं पठेत् । (तीनपल्ट पढ्ने)

आसनम्

(अपसव्य भएर कुश लिई सङ्कल्प गर्ने)

ततोऽपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः कुशादिकमादाय- अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्यमासिकश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठताम् । इति दक्षिणाग्रमुत्सृजेत् । (ब्राह्मणमा राख्ने)

छत्रदानम्

(सव्य भई छाता पूजा गर्ने)

ततः सव्यं कृत्वा प्राङ्मुखोपविष्टः, छत्राय नमः । ब्राह्मणाय नमः ।

इति देयब्राह्मणौ त्रिः, संपूज्य, छत्रमभिषिच्य कुशादीन्यादाय- (छातालाई सङ्कल्प गर्ने)

अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) यमपथाधिकरणकघोरातपवारणार्थमिदं छत्रमुत्तानागिरोदैवतम-मुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ।

प्रार्थना

(नमस्कार गर्ने)

सर्वेषामेव दानानां छत्रमातपवारणम् । सुखदं मोक्षदं यस्मात्तस्माच्छान्तिं प्रयच्छतु ॥

इत्युक्त्वा विप्रहस्ते जलं दद्यात् । स्वस्तीति च विप्रः प्रतिब्रूयात् ।

ततः कुशतिलजलदक्षिणामादाय- (दानप्रतिष्ठा सङ्कल्प गर्ने)

अद्यकृतैतच्छत्रदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणा तुभ्यमहं संप्रददे । इति दक्षिणां दद्यात् । प्रतिग्रहीता स्वस्तीत्युक्त्वा छत्रदण्डं धारयेत् ।

उपानद्दानम्

(जुत्ता पूजा गर्ने)

उपानद्भ्यां नमः । ब्राह्मणाय नमः । इति देयब्राह्मणौ त्रिः संपूज्य उपानहावभिषिच्य कुशादीन्यादाय- (सङ्कल्प गर्ने) अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) संतप्तबालुकाऽसिकण्टकितभूदुर्गसन्तरणार्थमिमे उपानहावुत्तानाङ्गिरोदैवते अमुकगोत्राया-ऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ।

प्रार्थना

(नमस्कार गर्ने)

उपानहौ प्रदास्यामि कण्टकादिनिवारणे । सर्वस्थानेषु सुखदे ह्यतः शान्तिं प्रयच्छतः ॥

इति दद्यात्, स्वस्तीति प्रतिवचनम् ।

कुशादीनि दक्षिणां चादाय

(दानप्रतिष्ठा गर्ने)

अद्य कृतैतदुपानद्दानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्राय अमुकशर्मणे ब्राह्माणाय तुभ्यमहं संप्रददे । इति दक्षिणां दद्यात् । प्रतिग्रहीता स्वस्तीत्युक्त्वा उपानहावारोहयेत् ।

अश्वदानम्

(घोडा दान गर्ने)

देयब्राह्मणौ त्रिः संपूज्य देयमभिषिच्य कुशादीन्यादाय- अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) अतिविषमदुर्गसन्तरणार्थमश्वं यमदैवतं सपर्याणममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमह संप्रददे ।

प्रार्थना

(नमस्कार गर्ने)

विष्णुस्त्वमश्वरुपेण यस्मादमृतसंभवः । चन्द्रार्कवाहनं नित्यमतः शान्तिं प्रयच्छ मे ॥ इति दद्यात् ।

ततः कुशादीनि दक्षिणां चादाय-

(दानप्रतिष्ठा सङ्कल्प गर्ने)

अद्यकृतैतदश्वदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । इति दक्षिणां दद्यात् । ततः प्रतिग्रहीता स्वस्तीत्युक्त्वा अश्वस्य दक्षिणकर्णं स्पृशेत् ।

शिबिकादानम्

(शिविका पूजा गर्ने)

देयब्राह्मणौ त्रिः संपूज्य देयं चाभ्युक्ष्य कुशादीन्यादाय-

(सङ्कल्प गर्ने)

अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) उच्चावचविषमभूसन्तरणार्थमिमां शिबिकामुत्तानाङ्गिरोदैवताममुक-गोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ।

प्रार्थना

(नमस्कार गर्ने)

देवदेव जगन्नाथ विश्वात्मन् दत्तयाऽनया । प्रभो शिबिकया देव प्रीतो भव जनार्दन । इति दद्यात् ।

ततः कुशादीनि दक्षिणां चादाय-

(दानप्रतिष्ठा गर्ने)

अद्यकृतैतच्छिबिकादानप्रतिष्ठार्थं हिरण्यमग्निदैवतममुक- गोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ।

इति दक्षिणां दद्यात्। ततः प्रतिग्रहीता स्वस्तीत्युक्त्वा शिबिकां स्पृशेत्।

ततः आचम्यापसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानु- (सव्यले नै आचमन गरी अपसव्य हुने र तिल छर्ने)

ॐ अपहताऽअसुरा रक्षा ꣳसि वेदिषदः। इति श्राद्धदेशे वामावर्तेन तिलान् विकिरेत्॥

हस्तार्घः

(ब्राह्मण अगाडि दुना राख्ने)

ततो हस्तार्घपात्रोपरि- (दुनामा पवित्र राख्ने)

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः। इति दक्षिणाग्रं पवित्रं धृत्वा- (जल राख्ने)

ॐ शं नो देवीरभिष्टयऽआपो भवन्तु पीतये। शंय्योरभिस्रवन्तु नः॥ इति जलं दत्त्वा- (तिल राख्ने)

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान्प्रीणाहि नः स्वाहा। इति तिलान् क्षिप्त्वा- (फूल राख्ने)

ॐ श्रीश्च ते लक्ष्मीश्च पन्त्यावहोरात्रे पार्श्वे नक्षत्राणि रुपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकं मऽइषाण॥ इति पुष्पं दत्त्वा- (चन्दन राख्ने)

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ इति गन्धं दद्यात्।

हस्तार्घपात्रं संपन्नमिति पात्रब्राह्मणं पृष्ट्वा सुसंपन्नमिति तेनोक्ते हस्तार्घपात्रं वामहस्ते धृत्वा- ॐ नमो नारायणायेति पुष्पसहितं पवित्रं विप्रहस्ते उत्तराग्रं धृत्वा- (पुष्प सहित पवित्र ब्राह्मणमा चढाउने र छोप्ने)

या दिव्याऽआपः पयसा संबभूवुर्य्याऽअन्तरिक्षाऽउतपार्थवीर्य्याः। हिरण्यवर्णा यज्ञियास्ता नऽआपः शिवाः शꣳस्योनाः सुहवा भवन्तु॥ इत्यनेन हस्तार्घपात्रस्थजलमभिमन्त्र्य कुशमादाय- (जल चढाउने र सङ्कल्प गर्ने)

अद्यामुकसगोत्रामुकप्रेताद्यमासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्। (हस्तार्घपात्रको जल चढाउने)

इति विप्रकरे पवित्रोपरि अर्घजलं दददुत्सृजेत्। पात्रब्राह्मणवामपार्श्वे प्रेताय स्थानमसि उत्तानमेव हस्तार्घपात्रं स्थापयेत्। तदुपरि कुशान् दद्यात् तच्च दक्षिणापर्य्यन्तं न चालयेत्। (ब्राह्मणको बायाँपट्टि हस्तार्घपात्र उत्तानै राख्ने)

ब्राह्मणपूजनम्

(ब्राह्मण पूजा गर्ने)

ततः पात्रब्राह्मणं गन्धपुष्पादिभिः संपूज्य कुशादीन्यादाय- (कुश जल लिई सङ्कल्प गर्ने)

अद्यामुकसगोत्रामुकप्रेता (गोत्रे, प्रेते) अद्यमासिकश्राद्धे एतानि चन्दनपुष्पाक्षतधूपदीपयज्ञोपवीतवासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम्। इत्युत्सृजेत्। (सव्य भई आचमन गर्ने र अपसव्य हुने)

ततः सव्यं कृत्वा प्रेतस्य (गोत्रायाः प्रेतायाः) भुक्तशय्यासंनादीन् गन्धपुष्पैरभ्यर्च्य श्राद्धभोक्त्रे प्रतिपादयेत ततः आचम्यापसव्यं कृत्वा- अर्चनविधेः सर्वं परिपूर्णमस्तु। इत्युक्ते अस्त्विति ब्राह्मणः प्रतिब्रूयात्। ततो गौरमृत्तिकया नीवारचूर्णेन जलेन वा ब्राह्मणं वेष्टयित्वा चतुरस्रं मण्डलं कुर्यात्। (ब्राह्मणलाई जल चढाउने)

भूस्वामी

(एक भाग सिदा राख्ने र मह छर्किने)

परकीयभूमौ श्राद्धकरणे श्राद्धीयवस्तुषु किंचित्किंचिदुद्धृत्य- (कुश जल लिई सङ्कल्प गर्ने)

तिलघृतजलयुतमन्नमिदमेतद्भूस्वामिपितृभ्यो नमः । इति दद्यात् ।

अन्नसङ्कल्प

(अर्को भाग सिदा राख्ने)

तत उष्णमन्नं ताम्रपात्रेण कराभ्यामादाय मनाकस्थित्वा पुरुषतृप्तिक्षममन्नं परिविष्यात् । तत इदं मधुरम् इदमम्लमित्यादिव्यञ्जनगुणान् कीर्त्तयन् सर्वाणि व्यंजनानि भूयिष्ठपात्रान्तेषु परिविष्य घृतं शीतलजलं चोपनीय अन्नं मधुनाभिघारयेत् । (सिदामा मह, घ्यू छर्कने)

ततः पात्रालम्भनाङ्गुष्ठागाहनं विनैव-

(सिदा दान गर्ने)

ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽ अमृते अमृतं जुहोमि स्वाहा ।

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपा ꣓ सुरे ॥ इति पठित्वा- (सिदा वरिपरि तिल छर्ने)

ॐ अपहता असुरा रक्षा ꣓ सिवेदिषदः । इत्यन्नोपरि तिलान् । विकीर्य्य अमृतरुपतया अन्नं विचिन्त्य कुशादीन्यादाय- (कुश, जल लिई सङ्कल्प गर्ने)

अद्यामुकसगोत्रायाऽमुकप्रेताय (गोत्रायै, प्रेतायै) आद्यमासिकश्राद्धे इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठताम्। इत्युत्सृजेत् । ततो भवान् प्राशयतु इत्यपोशानं दत्त्वा यथासुखं जुषस्वेति ब्राह्मणं ब्रूयात् । ब्राह्मणश्च वामेन पाणिनान्नपात्रं स्पृशन् भुञ्जीत संज्ञया च भक्ष्यप्रार्थनं कुर्यात् ॥

प्रार्थना

(सव्य भएर नमस्कार गर्ने)

ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ꣓ रजः । मधुद्यौरस्तुनः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ ॐ मधु-३ ।

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥ नमस्तुभ्यं विरुपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ (अपसव्य हुने र ऋषिमा जल चढाउने)

वीणादिभिर्ब्राह्मणं हर्षयन् व्यञ्जनगुणान् कीर्त्तयन् तस्य यत्रयत्रेच्छोपलभ्यते तत्तदुपनयन् मन्द मन्दं भोजयेत् । अत्र विकरनिषेधः । ततो ब्राह्मणं तृप्तं ज्ञात्वा तस्मै जलगण्डूषमिदं ते इति प्रत्यपोशानं दद्यात् । अत्र स्वदितप्रश्नाभावः । ततः पिण्डदानमहं करिष्ये इति पृच्छेत् । कुरुष्व ब्राह्मणेनोक्ते तदुच्छिष्टसमीपे चतुरस्रहस्तैकप्रमाणं दक्षिणप्लवं चतुरङ्गुलोच्छ्रितं पिण्डस्थानं निर्मिमीत । तत्र रेखाकरणमुल्मुकभ्रामणं च न भवति ।

अवनेजनम्

(दुनामा जल राखी संकल्प गर्ने)

ततः छिन्नमूलान् कुशान् दक्षिणाग्रान् तत्रास्तीर्य्य पवित्रपुटकादिकं तिलजलगन्धपुष्पयुतं वामहस्ते कृत्वा दक्षिणहस्तेन कुशादिकमादाय- (कुश जल लिई सङ्कल्प गर्ने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) आद्यमासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्। इति कुशोपरि अवनेजनं दद्यात्।

पिण्डदानम्

(वेदी निर्माण गर्ने र फूल ओछ्याउने)

ततः श्राद्धशेषमन्नं तिलघृतमधुयुतमेकीकृत्य तेन कपित्थप्रमाणं पिण्डं निर्माय दक्षिणहस्तेनादाय जलतिलकुशादिकं दत्त्वा- (जल, तिल, कुश, पिण्ड लिई संकल्प गर्ने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) आद्यमासिकश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्। इत्यवनेजनस्थाने पिण्डं दद्यात्। आस्तृतकुशमूलेन करं प्रोक्ष्य सव्यं कृत्वा आचम्य हरिं स्मृत्वाऽपसव्यं कृत्वा मन्त्रपाठनिषेधात्तूष्णीमेव भास्वर-मूर्तिं प्रेतं चिन्तयेत्। (सव्य भएर आचमन गर्ने, हरि हरि भन्ने र अपसव्य भएर सास नफेरी अनुहार सम्झने)

प्रत्यवनेजनम्

(दुनामा जल राखी सङ्कल्प गर्ने)

अवनेजनावशिष्टजलयुतपात्रं वामहस्ते कृत्वा दक्षिणहस्तेन कुशादिकमादाय अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) आद्यमासिकश्राद्धपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्। इति प्रत्यवनेजनं दद्यात्।

सूत्रदानम्

(सव्यले आचमन गरी अपसव्यले धागो चढाउने)

ततो नीवीं विस्रंस्य सव्यं कृत्वाऽचम्यापसव्य वामेन पाणिना धृतं सूत्रं दक्षिणहस्तेन गृहीत्वा- प्रेतैतत्ते वासः, इति पिण्डोपरि धृत्वा-

पिण्डपूजनम्

(पिण्ड पूजा गर्ने)

गन्धपुष्पादिभिः पिण्डं संपूज्य, कुशादीन्यादाय- अद्याऽमुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) आद्यमासिकश्राद्धपिण्डेएतानि सूत्रगन्धपुष्पधूपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्ताम्। इत्युत्सृजेत्। पिण्डशेषान्न पिण्डसमीपे विकिरेत्।

ततः आचान्तो ब्राह्मणस्यकरे

(पिण्ड शेष राख्ने र ऋषिमा जल, फूल, अक्षता चढाउने)

शिवा आपः सन्तु, इति जलम्। सौमनस्यमस्त्विति पुष्पम्। अक्षतं चारिष्टमस्त्विति तण्डुलान् दद्यात्। सन्तु इति प्रतिवचनम्।

ततः सव्येन। पुटकादिपात्रे शान्त्युदकं परिकल्प्य मेदिनीं शिरसाभिवन्द्य पठेत् – (सव्य भएर नमस्कार गर्ने)

नमो नमो मेदिनि लोकधात्रि ऊर्व्वि महि शैलधारिणि धरणि नमः।
धरणि काश्यपि जगत्प्रतिष्ठे वसुधे नमो नमोऽस्तु ते॥

अक्षय्योदकम्

(दुनामा जल राखी सङ्कल्प गर्ने)

ततः कुशादीन्यादाय - (जल चढाई सव्य नै भएर फेरि जल चढाउने)

अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्यमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठताम् । इत्यक्षय्योदकं विप्रहस्ते दत्त्वा उपतिष्ठतामिति प्रतिवचनं गृहीत्वा, सव्यं कृत्वा दक्षिणां दिशं पश्यन्- अघोरः प्रेतोऽस्तु इति पूर्वाग्रां जलधारां पिण्डोपरि दद्यात् । गोत्रन्नो वर्द्धतामित्याद्याशीः प्रार्थनानिषेधः । (आशीष प्रार्थना निषेध या नगर्ने) ततोऽपसव्यं कृत्वा सपवित्रकुशत्रयं पिण्डोपरि दक्षिणाग्रं धृत्वा- नमो वाचयिष्ये इति पृच्छेत् । वाच्यतामित्यनुज्ञातः- प्रेताय नमः इत्युच्यतामिति वदेत् । अस्तु नमः इत्युच्यमाने पुटकादिस्थलजलादिना मन्त्रपाठं विना- (अपसव्य हुने)

जलधारादानम्

(जलको धारा लगाउने)

इदमूर्ज्जं ते मया दीयते तवोपतिष्ठताम् । इति दक्षिणाग्रां जलधारां सपवित्रकुशोपरि दद्यात् । ततो नम्रीभूय पिण्डमाघ्रायोत्थापयेत् । छिन्नमूलकुशान् बन्हौ क्षिपेत् ।

दक्षिणादानम्

(अर्घ्यपात्र चलाउने)

अर्घपात्रं संचाल्य सव्यं कृत्वा कुशादिसहितं दक्षिणाद्रव्यमादाय- (सव्य भएर दक्षिणा सङ्कल्प गर्ने)

अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्यमासिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतममुक-गोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे । दक्षिणां दद्यात् । स्वस्तीति प्रतिवचनम् । अत्र प्रदक्षिणीकरणम् अनुव्रजनं च न भवति । (अपसव्य हुने र ऋषि उठाउने)

ततोऽपसव्येन स्वस्त्यस्तु इत्युक्त्वा ब्राह्मणमुत्थाप्य शय्यायामुपवेशयेत् । ब्राह्मणचरणौ संवाह्य तं नमस्कुर्यात् । ततोऽञ्जनं कङ्कतिकां च ब्राह्मणायार्पयेत् । स चाञ्जनं कङ्कतिकां चादाय शय्यायां मुहूर्त्त विश्रामं कुर्यात् ।

ततः कर्ता सव्यं कृत्वा

(सव्य भएर नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

इति त्रिर्जपित्वा अपसव्यं कृत्वा श्राद्धीयदीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्य सव्येनाचमनं कुर्यात् । ततः श्राद्धसंपूर्णताकामः (अपसव्य भएर दियो छोप्ने, हात पाउ धुने र सव्य भएर आचमन गर्ने)

कर्मसमर्पणम्, विष्णोः स्मरणञ्च

(नमस्कार गर्ने र विष्णु स्मरण गर्ने)

ॐ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु च ।
स्मरणादेव तद्विष्णोः संपूर्ण स्यादिति श्रुतिः ॥

इति पठित्वा विष्णुस्मरणं कुर्यात् ।

इति षोडशश्राद्धमध्ये आद्यमासिकस्य एकादशेऽन्हचेव विधानादाद्यमासिकस्य सपात्रप्रयोगः ।

आद्याब्दिकश्राद्धम्

(स्नान गरी अर्को श्राद्ध गर्न वस्ने)

प्रथममासिकश्राद्धानन्तरं स्नानादिकं विधाय आद्याब्दिकश्राद्धं कुर्यात्।
आद्याब्दिकस्य एकादशेऽन्हचेव विधानात्। तच्च सिद्धान्नेनैव विधेयम्। (दियो बाली पूजा गरी तिल छर्कने)
तत्र क्रमः कर्त्ता स्नातः शुचिराचान्तः पूर्वोपकल्पितप्रज्वालितदीपं स्थापितगौरसर्षपं तिलादिरक्षेघ्नं श्राद्धदेशमागत्य
पूर्वाभिमुख उपविश्य कुशजलेन- (जल सेचन गर्ने)
ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥
ॐ पुण्डरीकाक्षः पुनातु, इत्युच्चार्य्य श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत्।

प्रतिज्ञासङ्कल्प

(दियो, ऋषि थापी दियो वालेर पूजा गर्ने र प्रतिज्ञा सङ्कल्प गर्ने)
अद्येत्यादिदेशकालौ स्मृत्वा-अद्यामुकसगोत्रस्याऽमुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्याब्दिकश्राद्धमहं करिष्ये।
ॐदेवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ (नमस्कार गर्ने)
ततोऽपसव्येन कुशादिकमादाय- (अपसव्य भई कुश जल लिने)
अद्यामुकसगोत्रस्याऽमुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्याब्दिकश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठताम्।
इति कुशरुपमासनमुत्यृजेत्।
ततः अपहताऽअसुरा रक्षा ꣳसि वेदिषदः। वामावर्त्तेन तिलान् श्राद्धदेशे विकिरेत्। (तिल छर्कने)

हस्तार्घ

(ब्राह्मण अगाडि दुना राख्ने)
ततः पुटकादौ- (पवित्र राख्ने)
ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वःप्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः॥
इति दक्षिणाग्रं पवित्रं धृत्वा- (जल राख्ने)
शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये। शंय्योरभिस्रवन्तुनः॥ इति जलम्।
तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः – (तिल राख्ने)
प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् पृणाहिनः स्वाहा। इति तिलान्।
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। (चन्दन राख्ने)
ईश्वरीं सर्वभूतानां तामिहोपव्हये श्रियम्॥ इति गन्धम्। (फूल राख्ने)
श्रीश्चते लक्ष्मीश्च पन्त्यावहोरात्रे पार्श्वे नक्षत्राणि रुपमश्विनौ व्यात्तम्।
इष्णन्निषाणाऽमुम्मऽइषाण सर्वलोकम्मऽइषाण॥ इति पुष्पम् क्षिपेत्।

(हस्तार्घपात्र देब्रे हातमा राख्ने र दाहिने हातले पवित्र र फूल ऋषिमा चढाउने)

ततस्तदर्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रम् विप्रकरे- ॐ नमो नारायणाय ।

इति मन्त्रेण उत्तराग्रं पवित्रं विप्रकरे धृत्वा- (ऋषिमा पवित्र फूल चढाई दुना ढाक्ने)

ॐ या दिव्याऽआपः पयसा सम्बभूवुर्याऽअन्तरिक्षाऽउत पार्थवीर्याः ।
हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः स ँस्योना सुहवा भवन्तु ॥

इति हस्तार्घपात्रस्थलजलमभिमन्त्र्य कुशादीन्यादाय- (जल चढाई सङ्कल्प गर्ने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) आद्याब्दिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम् । इति पवित्रोपरि अर्घजलं ददुत्सृजेत् । (चढाएको पवित्र र फूल त्यही दुनामा राख्ने र ऋषिको देब्रेपट्टि उत्तानो राख्ने)

ततः पवित्रसहितमर्घपात्रमासनवामपार्श्वे प्रेताय स्थानमसीत्युत्तानमेव स्थापयेत् ।

ब्राह्मणपूजा

(ब्राह्मण पूजा गर्ने)

ततो गन्धादिना संपूज्य कुशादीन्यादाय- (कुश जल लिई सङ्कल्प गर्ने)

अद्यामुकसगोत्रामुकप्रेताद्याब्दिकश्राद्धे एतानि गन्धपुष्पधूपदीपनैवेद्यवासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम् । इति गन्धादिकमुत्सृजेत् । ततः आसनस्यान्नपात्रसहितस्य चतुर्दिक्षु चतुरस्रं मण्डलं कृत्वा श्रादीयान्नाग्रभागं घृततिलजलयुतं पुटकादौ कृत्वा- (चतुष्कोण वनाई सिदा राखी जल, तिल, घ्यू छर्कने)

भूस्वामी

(कुश जल लिई सङ्कल्प गर्ने)

इदमन्नमेतद्भूस्वामिपितृभ्यो नमः । इत्युत्सृजेत् ।

अन्नसंकल्पः

(अर्को सिदा राखी दायाँ हात बायाँ र बायाँ हात दायाँतिर गरी सिदालाई छुने)

ततः पुरुषतृप्तिक्षममन्नं सोपस्करमुपनीय सतिलजलं चोपनीय अन्नं मधुनाभिघार्य पालम्भनागुष्ठावगाहनं विना-
ॐ पृथिवी ते पात्रं द्यौरपिधानमित्यादि स्वाहान्तम् । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपा ँसुरे ॥ अपहता असुरा रक्षा ँसि वेदिषदः ॥

इति तिलानन्नोपरिविकीर्य्य कुशादिकमादाय- (वरिपरि तिल छर्की सङ्कल्प गर्ने)

अद्यामुकसगोत्रायामुकप्रेताय (गोत्रायै, प्रेतायै) आद्याब्दिकश्राद्धे इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठताम् । इत्यन्नमुत्सृजेत् ।

ॐ मधुव्वाता ऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत् पार्थिव ँ रजः । मधुद्यौरस्तु नः पिता ॥ मधुमान्नोवनस्पतिर्म्मधुमाँऽअस्तु सूर्य्यः । माध्वीर्गावो भवन्तु नः ॥

ॐ मधु- ३ वदेत् । (कर्ताले ३ पल्ट ॐ मधु भन्ने र हात जोड्ने)

अन्नहीनं क्रियाहीनं विधिहीनं च यद् भवेत् । तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥
नमस्तुभ्यं विरुपाक्ष नमस्तेऽनेकचक्षुषे ॥ नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥

अत्र विकररेखाकरणमुल्मुकभ्रामणं च न भवति ।

(पिण्डको लागि वेदी निर्माण गर्ने र फूल ओछ्याउने)

सव्यं कृत्वाऽऽ चम्यापसव्यं कृत्वा पिण्डस्थानोपरि छिन्नमूलकुशान् दक्षिणाग्रानास्तीर्य तिलजलगन्धयुतपुटकं वामहस्ते कृत्वा कुशादिकमादाय- (सव्य भई आचमन गरी अपसव्य हुने)

अवनेजनम्

(दुनामा जल राखी पिण्ड दिने ठाउँमा कुश राख्न कुश, जल लिई सङ्कल्प गर्ने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) आद्याब्दिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्। इत्यवनेजनं छिन्नमूलकुशोपरिदद्यात्।

पिण्डदानम्

(जल, कुश, पिण्ड लिने र पिण्ड सङ्कल्प गर्ने)

ततस्तिलघृतमधुयुक्तेनान्नेन कपित्थप्रमाणं पिण्डं कृत्वा कुशादिकमादाय- अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) आद्याब्दिकश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्। इत्यवनेजनस्थाने पिण्डं दद्यात्। (हात कुशले पुछ्ने)

ततो दर्भमूलेन करं प्रोक्ष्य सव्यं कृत्वाऽऽचम्य हरिं स्मृत्वाऽपसव्यं कृत्वा मन्त्रपाठं विना तूष्णीं भास्वरमूर्तिं प्रेतं चिन्तयेत्। (सव्य भई आचमन गरी हरि सम्झने, अपसव्य भई आफ्नो पितृको अनुहार सम्झने)

प्रत्यवनेजनम्

(दुनामा जल राखी कुश जल लिई संकल्प गर्ने)ततोऽवनेजनपात्रं वामहस्ते कृत्वा कुशादिकं गृहीत्वा- अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) आद्याब्दिकश्राद्धपिण्डे इदं प्रत्येवनेजनं ते मया दीयते तवोपतिष्ठताम्। इति प्रत्यवनेजनं पिण्डोपरि दद्यात्। (पिण्डमा कुश, जल चढाउने)

ततो नीवीं विस्रंस्य सव्यं कृत्वाऽऽचम्यापसव्यं कृत्वा, वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय उभाभ्यां हस्ताभ्यां पिण्डोपरि- (सव्य भई आचमन गरी अपसव्य हुने)

सूत्रदानम्

(पिण्डमा धागो चढाउने)

प्रेतैतत्ते वास इति सूत्रं दत्त्वा-

पिण्डपूजनम्

(पिण्ड पूजा गरी धूप, बत्ती समेत गरेर सङ्कल्प गर्ने)

पिण्डमभ्यर्च्य कुशादीन्यादाय- अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) आद्याब्दिकश्राद्धपिण्डे एतानि सूत्रगन्धपुष्पधूपदीप-नैवेद्यानि ते मया दीयन्ते, तवोपतिष्ठन्ताम्। इत्युत्सृजेत्। (पिण्डमा जल चढाउने र शेष पिण्ड छेउमा राख्ने)

ततः पिण्डशेषान्नं पिण्डसमीपे विकीर्य- ॐ शिवा आपः सन्तु, इतिजलम्। ॐ सौमनस्यमस्तु, इति पुष्पम्। ॐ अक्षतं चारिष्टमस्तु। इति तण्डुलान् अन्नपात्रोपरिक्षिपेत्। (ऋषिमा जल, फूल, अक्षता चढाउने)

अक्षय्योदकदानम्

(गङ्गाजल सङ्कल्प गरी चढाउने)

ततः कुशादीन्यादाय- अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्याब्दिकश्राद्धे दत्तैतदन्नपानादिक-मक्षय्यमुपतिष्ठताम्। इत्यक्षय्योदकं दत्त्वा सव्यं कृत्वा- अघोरः प्रेतोऽस्तु इति दक्षिणां दिशं पश्यन् पिण्डोपरि पूर्वाग्रां जलधारां दद्यात्। अत्राशीः प्रार्थनं न भवति।

ततः पिण्डोपरि सपवित्रान् कुशान् धृत्वा, पुटकादिस्थजलादिना मन्त्रपाठं विना।

जलधारादानम्

(सव्य भई पिण्डमा जल धारा लगाउने)

ॐ इदमूर्ज्जन्ते मया दीयते तवोपतिष्ठताम् । इति सपवित्रकुशोपरि दक्षिणाग्रां जलधारां दद्यात् । ततः पिण्डमाघ्रायोत्थापयेत् । पिण्डाधारकुशान् बन्हौ क्षिपेत् ।

(पिण्डतिर ढोग्ने)

दक्षिणादानम्

(अपसव्यले अर्घपात्र चलाई सव्य भई दक्षिणा सङ्कल्प गर्ने)

अर्घपात्रं संचाल्य, सव्यं कृत्वा कुशादीन्यादाय- अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्याब्दिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे । इति दक्षिणां दद्यात् । ततः -

प्रार्थना

(तीनपटक नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः । त्रिः पठेत् । ततोऽपसव्यं कृत्वा दीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्य सव्येनाचम्य-

(अपसव्य भई दियो छोप्ने र हातपाउ धोएर सव्य भई आचमन गर्ने)

विष्णोः स्मरणम्

(विष्णु स्मरण गर्ने)

ॐ प्रमादात् कुर्वतां कर्म प्रच्यवेताऽध्वरेषु च । स्मरणादेव तद्विष्णोः संपूर्ण स्यादिति श्रुतिः ॥ ॐ विष्णुः विष्णुः विष्णुः । श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत् । सद्धान्नं जले क्षिपेत् । इत्याद्याब्दिकश्राद्धप्रयोगः । अत्र दिने विहितमपि पञ्चगव्यप्राशनं शिष्टा नाचरन्तीति न लिखितम् ।

(पञ्चगव्य खाने)

अथ उदककुम्भदानम्

(अपसव्य भई जल कुम्भ दान गर्न ठीक पार्ने)

अथ प्रयोगः

(माटाको ३ सय ६० घडा वा दुधिलो, काभ्रो वा पीपलको पातको खोचीमा सर्वत भरी पीपलको बोटको फेदमा अथवा कुनै वृक्षको फेदमा राख्ने)

एकादशेऽन्हि कर्त्ता शुचिराचान्तःप्राङ्मुख उपविश्य सव्येन कुशतिलजलान्यादाय-

(आसनमा बस्ने)

प्रतिज्ञासंकल्प

(सव्य भएर ऋषि, दियो ठीक पार्ने र दियो बालेर पूजा गरेपछि प्रतिज्ञासङ्कल्प गर्ने)

अद्य पितृगताहरहरन्नोपस्थितिश्वगताश्वमेधयज्ञजन्यसमफलप्राप्तिकामोऽद्यादि पितृमरणदिनावधिकाशौचावच्छिन्न दिनोनवत्सरं यावत्प्रत्यहममुकगोत्रायामुकप्रेताय (गोत्रायै, प्रेतायै) सान्नोदककुम्भदानमहं करिष्ये । इति सङ्कल्प्यापसव्यं कृत्वा कुशादीन्यादाय-

आसनम्

(अपसव्य भई कुश जल लिने र ऋषिमा राख्ने)

अद्यामुकगोत्रस्याऽमुकप्रेतस्य (गोत्रायाः प्रेतायाः) इदमासनं ते मया दीयते तवोपतिष्ठताम् । इत्यासनमुत्सृज्य-

ब्राह्मणार्चनम् (ब्राह्मणलाई पूजा गरी धूपबत्ती समेत गरेर सङ्कल्प गर्ने)

गन्धपुष्पादिना पूजां विधाय कुशादीन्यादाय- अद्यामुकप्रेतैतानि गन्धपुष्पधूपदीपवासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम्। इत्युत्सृज्य-

कुम्भदानम् (कुम्भ दान गर्न कुश, जल लिई कुम्भमा छुने)

सोपस्करमन्नं नवजलपूर्णकुम्भं चोपनीय कुशादीन्यादाय –

अद्यामुकगोत्रायामुकप्रेताय अयं सान्नोदककुम्भस्ते मया दीयते तवोपतिष्ठताम्।

इत्युत्सृजेत्। वर्षाभ्यन्तरे सपिण्डनकृते तु – अद्यामुकगोत्रस्य पितु (मातु) अमुकशर्मण इदमासनं तुभ्यं स्वधा। अद्यामुकगोत्र पितरमुकशर्मन् (वर्मन्, गुप्त) एतानि गन्धपुष्प धूपदीपवासांसि तुभ्यं स्वधा। अद्यामुकगोत्राय पित्रे (मात्रे) अमुकशर्मणे अयं सान्नोदककुम्भस्तुभ्यं स्वधा। इत्यादीनि वचनानि प्रयोक्तव्यानि।

दक्षिणादानम् ततः कुशादीन्यादाय – (कुश, जल लिई सङ्कल्प गर्ने)

अद्यकृतैतत्सान्नोदककुम्भदानप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे। इति दक्षिणामुत्सृज्य, दक्षिणां तदुभयं च ब्राह्मणाय दद्यात्। एवं वर्षपर्यन्तं प्रत्यहं सान्नोदककुम्भं दत्त्वा दक्षिणां दद्यात्। अशक्तौ प्रतिमासम्। तत्र तु संकल्प वाक्यम् – अद्यपितृगताहरहरन्नोदककुम्भोपस्थितिश्वगताश्वमेधयज्ञजन्यफलप्राप्तिकामोऽद्य सान्नोदककुम्भदानमहं करिष्ये। सव्येन वाक्यं कृत्वा अपसव्येन आसनादिवाक्यं पूर्ववत् विधाय आशौचान्तदिनोनान् वत्सरदिनसंख्याकान् सान्नोदककुम्भानुपनीय अद्यामुकगोत्रायामुकप्रेताय (गोत्रायै, प्रेतायै) मरणादिनावधिकाशौचावच्छिन्नदिनोनवत्सरं यावद्दिनसंख्याकाः एते सान्नोदककुम्भास्ते मया दीयन्ते तवोपतिष्ठन्ताम्। दक्षिणावाक्यं पूर्ववत्कृत्वा सर्वं ब्राह्मणाय दद्यात्। इत्युदककुम्भदानविधिः॥

ऊनमासिकादिपञ्चदशश्राद्धानि

(ऋषि र दियो थापी दियो बाली पूजा गर्ने)

ऊनमासिकादिपञ्चदशश्राद्धानि च एकादशाहे द्वादशाहे वा सिद्धान्नेन आमान्नेन वा कार्याणि। आमपक्षे यवचूर्णेन पिण्डाः कार्याः तानि च शिष्टा अपात्रकान्येव कुर्वन्तीति। कर्त्ता स्नातः शुचिराचान्तः पूर्वोपकल्पितप्रज्वलितदीपं स्थापितगौरसर्षपतिलादिरक्षोघ्नं श्राद्धदेशमागत्य पूर्वाभिमुख उपविश्य, कुशजलेन – (तिल छरी जल सेचन गर्ने)

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरःशुचिः॥

ॐ पुण्डरीकाक्षः पुनातु। इति श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत्।

सङ्कल्पः (सङ्कल्प गरी नमस्कार गर्ने)

अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रतत्वविमुक्त्युत्तमलोकप्राप्तिहेतुषोडशश्राद्धान्तर्गतो उनमासिक-श्राद्धमहं करिष्ये। ततः – (नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ इति ३॥

आसनम्

(अपसव्य भई आसनको लागि कुश जल लिने)

ततोऽपसव्येन कुशादीन्यादाय –

अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) ऊनमासिकश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठताम्।

इति कुशरूपमासनमुत्सृजेत्।

ततः – अपहताऽअसुरा रक्षा ँ सिव्वेदिषदः। वामावर्त्तेन तिलान् श्राद्धदेशे विकिरेत्॥ (तिल वरिपरि छर्ने)

हस्तार्घः

(ऋषि अगाडि दुना राख्ने)

ततः पुटकादौ – (दुनामा पवित्र राख्ने)

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः। इति दक्षिणाग्रं पवित्रं धृत्वा-

ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये। शंय्योरभिस्रवन्तु नः॥ इति जलं दत्त्वा- (जल राख्ने)

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः।

प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान्पृणाहि नः स्वाहा॥ इति तिलान् क्षिप्वा- (तिल राख्ने)

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ इति गन्धं दद्यात्। (चन्दन राख्ने)

ॐ श्रीश्च ते लक्ष्मीश्च पन्त्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।

इष्णन्निषाणामुम्मऽइषाण सर्वलोकं मऽइषाण॥ इति पुष्पं दत्त्वा- (फूल राख्ने)

ततस्तदर्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं ॐ नमो नारायणाय।

इति मन्त्रेणान्नपात्रोपरि उत्तराग्रं धृत्वा। (फूलसहित पवित्र ऋषिमा चढाउने)

अभिमन्त्रणम्

(दुनालाई हातले छोप्ने)

ॐ या दिव्याऽआपः पयसा संबभूवुर्य्याऽअन्तरिक्षाऽउतपार्थवीर्य्याः। हिरण्यवर्णा यज्ञियास्ता नऽआपः शिवाः शꣳस्योनाः सुहवा भवन्तु॥ इत्यर्घपात्रस्थं जलमभिमन्त्र्य कुशदीन्यादाय - (जल चढाउने र सङ्कल्प गर्ने)

अद्यामुकसगोत्रामुकप्रेत ऊनमासिकाश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्। (हस्तार्घपात्रको जल चढाउने)

इति पवित्रोपरि अर्घजलं ददद्युत्सृजेत्। ततः पवित्रादिसहितमर्घपात्रम् आसनवामपार्श्वे प्रेताय स्थानमसीत्युत्तानमेव स्थापयेत्। (ऋषिको बायाँपट्टि हस्तार्घपात्र उत्तानै राख्ने)

ब्राह्मणपूजा

(ऋषि पूजा गर्ने)

ततो गन्धादिना संपूज्य कुशादीन्यादाय- (कुश जल लिई सङ्कल्प गर्ने)

अद्यामुकसगोत्र अमुकप्रेत (गोत्रे, प्रेते) ऊनमासिकश्राद्धे एतानि गन्धपुष्पाक्षतधूपदीपनैवेद्यवासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम्। इति गन्धादिकमुत्सृजेत्। (चतुष्कोण बनाई सिदा राखी जल, तिल, घ्यू छर्कने)

भूस्वामी (एक भाग सिदा राख्ने)

ततः आसनस्यान्नपात्रसहितस्य चतुर्दिक्षु चतुरस्रं मण्डलं कृत्वा श्राद्धीयान्नाग्रभागं घृततिलजलयुतं पुटकादौ कृत्वा- (सिदामा घ्यू, तिल, जल छर्की संकल्प गर्ने)

इदमन्नमेतद् भूस्वामिपितृभ्यो नमः इत्युत्सृजेत्।

अन्नसंकल्प (अर्को भाग सिदा राखी दायाँ हात बायाँ र बायाँ हात दायाँतिर गरी सिदालाई छुने)

ततः पुरुषतृप्तिक्षमं सोपस्करं सतिलं चान्नमुपनीय मधुनाभिघार्य्य पात्रालम्भनाङ्गुष्ठावगाहर्न विना- पृथिवी ते पात्रं द्यौरपिधानम् इत्यादि स्वाहान्तम्। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपा ꣳ सुरे ॥ अपहताऽअसुरारक्षा ꣳसिवेदिषद- इति तिलानन्नोपरि विकीर्य। (वरिपरि तिल छर्ने)

कुशादिकमादाय- (कुश जल लिई सङ्कल्प गर्ने)

अद्यामुकसगोत्राऽमुकप्रेत (गोत्रे, प्रेते) ऊनमासिकश्राद्धे इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठताम्। इत्यन्नमुत्सृजेत्।

प्रार्थना सव्येन (सव्य भएर नमस्कार गर्ने)

ॐ मधु व्वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः ॥

ॐ मधुनक्तमुतोषसोमधुमत्पार्थिव ꣳरजः। मधुद्यौरस्तु नः पिता।

ॐ मधुमान्नो व्वनस्पतिर्म्मधुमाँऽअस्तु सूर्य्यः। माध्वीर्गावो भवन्तु नः ॥ ॐ मधु-३।

अन्नहीनं क्रियाहीनं विधिहीनं च यद् भवेत्। तत् सर्वमछिद्रमस्तु भास्करस्य प्रसादतः ॥

नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे। नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥

अत्र विकिरदानम् रेखाकरणम्, उल्मुकभ्रामणं च न भवति। (आचमन गर्ने, अपसव्य हुने र वेदी निर्माण गर्ने)

सव्यं कृत्वाऽऽचम्यापसव्यं कृत्वा पिण्डदानवेदीं निर्मायाम्युक्ष्य च पिण्डस्थानोपरि छिन्नमूलकुशान् दक्षिणाग्रानास्तीर्य्य तिलजलगन्धयुतं पुटकं वामहस्ते कृत्वा कुशादिकमादाय-

अवनेजनम् (दुनामा जल राखी कुश जल लिने र कुश वेदीमा राख्ने)

अद्यामुकसगोत्राऽमुकप्रेत (गोत्रे, प्रेते) ऊनमासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्। इत्यवनेजनं छिन्नमूलकुशोपरि दद्यात्।

पिण्डदानम् (कुश जल सहित पिण्ड लिने, पिण्ड दिने र कुशले हात पुछ्ने)

ततस्तिलघृतमधुयुतेनान्नेन नारिकेलप्रमाणं पिण्डं कृत्वा कुशादिसहितपिण्डमादाय- अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) ऊनमासिकश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् इत्यवनेजनस्थाने पिण्डं दद्यात्।

ततो दर्भमूलेन करं प्रोक्ष्य सव्यं कृत्वाऽऽचम्याऽपसव्यं कृत्वा मन्त्रपाठं विना तूष्णीं भास्वरमूर्तिं प्रेतं ध्यायेत्।

प्रत्यवनेजनम्

(सव्य भई आचमन गरी अपसव्य हुने र पितृको अनुहार सम्झने)

ततोऽवनेजनपात्रं वामहस्ते कृत्वा कुशादिकं गृहीत्वा- (दुनामा जल राखी कुश, जल लिने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) ऊनमासिकश्राद्धपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्। इति प्रत्यवनेजनं पिण्डोपरि दद्यात्। (पिण्डमा जल चढाउने र पछाडि सिउरिएको कुश फूल निकाल्ने)

ततो नीवीं विस्रंस्य, सव्यं कृत्वाऽऽचम्याऽपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय उभाभ्यां हस्ताभ्यां पिण्डोपरि- (सव्य भई आचमन गरी अपसव्य हुने र पिण्डमा धागो चढाउने)

सूत्रदानम् प्रेतैतत्ते वासः। इति सूत्रं दद्यात्।

पिण्डपूजा

(पिण्ड पूजा गरी धूप, बत्ती समेत गरेर सङ्कल्प गर्ने)

गन्धादिभिः पिण्डं समभ्यर्च्य कुशादिकमादाय- अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) ऊनमासिकश्राद्धपिण्डे एतानि सूत्रगन्धपुष्पाक्षत-धूपदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्ताम्। इत्युत्सृजेत्।

ततः पिण्डशेषान्नं पिण्डसमीपे विकीर्य 'ॐ शिवा आपः सन्तु' इति जलम्। सौमनस्यमस्तु, इति पुष्पम्। अक्षतं चारिष्टमस्तु। इति तण्डुलान् अन्नपात्रोपरि क्षिपेत्- (ब्राह्मणमा जल, फूल र अक्षता चढाउने)

अक्षय्योदकदानम्

कुशादीकमादाय- (दुनामा जल राखी सङ्कल्प गर्ने)

अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) ऊनमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठताम्। इति अक्षय्योदकं दत्त्वा सव्यं कृत्वा- अघोरः प्रेतोऽस्तु, इति दक्षिणां दिशं पश्यन् पिण्डोपरि पूर्वाग्रां जलधारां दद्यात्। अत्राशीः प्रार्थनं न भवति। (सव्य भई जल चढाएर पिण्डलाई नमस्कार गरी अपसव्य भएर उठ्ने)

ततः पिण्डोपरि सपवित्रान् कुशान् धृत्वा, पुटकस्थजलादिना मन्त्रपाठं विना- इदमूर्ज्जं ते मया दीयते तवोपतिष्ठताम्। इति सपवित्रकुशोपरि दक्षिणाग्रां जलधारां दद्यात्। ततः पिण्डमाघ्रायोत्थापयेत्। पिण्डाधारकुशान् वन्हौ क्षिपेत्।

(अर्घपात्र चलाउने)

दक्षिणादानम्

(सव्य भएर दक्षिणा सङ्कल्प गर्ने)

अर्घपात्रं सञ्चाल्य, सव्यं कृत्वा कुशादिकमादाय- अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) कृतैतदून-मासिकश्राद्धप्रतिष्ठार्थमिदं रजतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे।

इति दक्षिणां दद्यात्। (नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ इति त्रिः।

अपसव्यं कृत्वा दीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्य सव्येनाचम्य-

(अपसव्य भएर दियो छोप्ने, हात पाउ धुने र सव्य भएर आचमन गर्ने)

विष्णोः स्मरणम्

(विष्णु स्मरण गर्ने)

ॐ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु च। स्मरणादेव तद्विष्णोः सम्पूर्ण स्यादिति श्रुतिः॥

अथ तन्त्रेणोनादिपञ्चदशमासिकश्राद्धप्रयोगः

तत्र क्रम (कपडामा ऋषिहरू थापेर दियो बाली पूजा गर्ने र कर्मपात्र निर्माण गर्ने)

श्राद्धदेशे श्राद्धीयवस्तून्यासाद्य दीपं प्रज्वाल्य कर्ता पूर्वाभिमुख उपविश्य- कर्मपात्रं निर्माय तत्रस्थ कुशजलेन- ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं सबाह्याऽभ्यन्तरः शुचिः॥ ॐ पुण्डरीकाक्षः पुनातु। इति श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत्।

सङ्कल्प ततः कुशादिकमादाय – (कुश, जल लिने र सङ्कल्प गर्ने)

अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिहेतुषोडशश्राद्धान्तर्गत ऊन द्वितीय त्रैपाक्षिकतृतीयचतुर्थपञ्चमषष्ठोनषाट्सप्तमाष्टमनवमदशमैकादशद्वादशोनाब्दिकमासिकश्राद्धानि तन्त्रेणैकोद्दिष्टविधिना एकादशाहे (द्वादशाहे वा) अहं करिष्ये। इति सङ्कल्पं कुर्यात्। अधिकमासपाते षोडशपदस्थाने सप्तदशपदं प्रयोज्यम्। अधिकमासिकेति पदं प्रक्षिप्य वाक्यं कर्त्तव्यम्।

ततः (नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ इति त्रिः पठेत्-

आसनम् अपसव्येन

कुशातिलजलान्यादाय- (अपसव्य हुने र आसनको लागि कुश जल लिने)

अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) ऊनद्वितीयत्रैपाक्षिकतृतीयचतुर्थपञ्चमषष्ठऊनषाट्सप्तमाष्टम नवमदशमैकादशद्वादशोनाब्दिकमासिकश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठताम् क्लृप्तासनेषु सर्वपश्चिमभागे कुशरुपमासनमुत्सृज्य एवमेव तत्पूर्वपूर्वभागेषु क्लृप्तासनेषु क्रमेण तत्तत्पदप्रक्षेपेण वाक्यं कृत्वा कुशरुपाण्यासनानि दद्यात्। ततः अपहताऽसुरा रक्षा ꣳ सिवेदिषदः। इति वामावर्त्तेन तिलान् श्राद्धदेशे विकिरेत्।

हस्तार्घ (ऋषि अगाडि दुना राख्ने)

ततः क्रमेण पुटकादीनि संस्थाप्य (पवित्र राख्ने)

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः॥

इति दक्षिणाग्रं पवित्रम् - (जल राख्ने)

ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः। इति जलम्-

ॐ तिलोसि सोमदैवत्यो गोसवो देव निर्मितः। (तिल राख्ने)

प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् पृणाहि नः स्वाहा। इति तिलान्-

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥

इति गन्धम्- (चन्दन राख्ने)

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ इति पुष्पाणि क्षिपेत्। (फूल राख्नें

तत ऊनमासिकार्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं नमो नारायणाय

इति मन्त्रेण उत्तराग्रं पवित्रं विप्रकरे धृत्वा- (पवित्र र फूल ऋषिमा चढाउने र दुना ढाक्ने)

ॐ यादिव्याऽआपः पयसा सम्बभूवुर्याऽअन्तरिक्षाऽउत पार्थवीर्याः। हिरण्यवर्णा यज्ञियास्ता नऽआपः शिवाः स ꣳस्योना सुहवा भवन्तु ॥ अर्घपात्रस्थजलमभिमन्त्र्य, कुशादिकमादाय- (सङ्कल्प गर्ने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) ऊनमासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्। पवित्रोपरि अर्घजलं ददुत्सृजेत्। एवमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेण हस्तार्घमुत्सृजेत्। ततः पवित्रादिसहितान्यर्घपात्राणि क्रमेण प्रत्येकमासनवामपार्श्वे प्रेताय स्थानमसीति उत्तानमेव स्थापयित्वा तदुपरि कुशान दद्यात्। (हस्तार्घपात्र उत्तानै राख्ने)

ब्राह्मणपूजा

(ब्राह्मणको पूजा गर्ने र धूप वत्ती गर्ने)

ततो गन्धपुष्पादिक्रमेण प्रत्येकं ब्राह्मणं सम्पूज्य कुशादिकमादाय- (कुश जल लिने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षष्ठ-ऊनषाण्मासिक- सप्तमाष्टम-नवम-दशमैकादश-द्वादश-ऊनाब्दिकमासिकश्राद्धेषु एतानि गन्धपुष्पधूपदीप- वासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम्। इति गन्धादिकमुत्सृजेत्। ततः क्रमेण प्रत्येकं आसनसहितानामन्नपात्राणं चतुर्दिक्षु चतुरस्राणि मण्डलानि कृत्वा श्राद्धीयान्नाग्रभागं घृततिलजलयुतपुटकादौ एकत्रैव कृत्वा-

भूस्वामी

(एक भाग सिदा राख्ने र सङ्कल्प गर्ने)

इदमन्नमेतद्भूस्वामिपितृभ्यो नमः। इति उत्सृजेत्-

अन्नसंकल्प

(अरू सिदा राख्ने)

ततः पुरुषतृप्तिक्षमं सोपस्करमन्नं तिलजलं च क्रमेण प्रत्येकमुपनीय अन्नं मधुनाभिघार्य पात्रालम्भनाङ्गुष्ठा-वगाहनं विना- (दायाँ हात बायाँ र बायाँ हात दायाँतिर गरी सिदालाई छुने)

ॐ पृथिवी ते पात्रं द्यौरपिधानमित्यादि स्वाहान्तम्०। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपा ꣳ सुरे ॥ अपहताऽअसुरा रक्षा ꣳसि वेदिषदः। (सिदामा तिल छर्कने)

इति तिलानन्नोपरि विकीर्य्य कुशादिकमादाय- (तिल, जल कुश लिने)

अद्यामुकगोत्रायामुकप्रेताय (गोत्रायै, प्रेतायै) ऊनद्वितीयत्रैपाक्षिकतृतीयचतुर्थपञ्चमषष्ठोनषाण्मासिक सप्तमाष्टम-नवमदशमैकादश- द्वादशोनाब्दिकादिमासिकश्राद्धेषु इदमन्नं सोपस्करं ते मया दीयते नवोपतिष्ठताम्। इत्यन्नमुत्सृज्य, एवं क्रमेण प्रत्येकं तत्तत्पदप्रेक्षेपेणाऽन्नान्युत्सृजेत्- (छुट्टाछुट्टै कुश राख्ने)

ततः (नमस्कार गर्ने)

ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳ रजः । मधुद्यौरस्तुनः पिता ॥ मधुमान्नोव्वनस्पतिर्मधुमाँऽअस्तु सूर्य्यः । माध्वीर्गावो भवन्तु नः । ॐ मधु ३ ॥ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्समछिद्रमस्तु भास्करस्य प्रसादतः ॥ नमस्तुभ्यं विरुपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ (सव्य भई आचमन गरी अपसव्य हुने)

अत्र विकिरदानरेखाकरणमुल्मुकभ्रामणं च न भवति । सव्यं कृत्वाऽऽ चम्याऽपसव्यं कृत्वा पश्चिमतः क्रमेण प्रत्येकं पिण्डस्थानोपरि छिन्नमूलान् कुशान् दक्षिणाग्रानास्तीर्य तिलजलगन्धयुतं पुटकादिकं वामहस्ते कृत्वा कुशादिकमादाय- (वेदी निर्माण गरी फूल ओछ्याउने)

अवनेजनम्

(दुनामा जल राखी कुश जल लिने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) ऊनद्वितीयत्रैपाक्षिकतृतीयचतुर्थपञ्चमषष्ठोनषाड्सप्तमाष्टमनवमदशमैकादशद्वादशोनाब्दिकमासिकश्राद्धेषु इमानि अवनेजनानि ते मया दीयन्ते तवोपतिष्ठन्ताम्। इत्यवनेजनं सर्वपश्चमास्तृतकुशोपरि दत्त्वा एवमेव क्रमेण प्रत्येकं तत्त्वपदप्रक्षेपेणावनेजनानि दद्यात् । ततस्तिलघृतमधुयुतेनान्नेन नारिकेलप्रमाणान् पिण्डान् कृत्वा कुशादिसहित-प्रथमपिण्डमादाय- (भिन्नाभिन्नै कुश राख्ने)

पिण्डदानम्

(पिण्ड कुश जल भिन्नाभिन्नै लिने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) ऊनमासिकश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्। सर्वपश्चिमावनेजनस्थाने पिण्डं दत्त्वा एवमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेण द्वितीयादि पिण्डान् दद्यात् । ततो दर्भमूलेन करं प्रोक्ष्य सव्यं कृत्वाऽऽचम्य हरिं स्मृत्वाऽपसव्यं कृत्वा कुशादिकं गृहीत्वा- (कुशले हात पुछ्ने र सव्य भई आचमन गरी अपसव्य हुने)

प्रत्यवनेजनम्

(दुनामा जल राखी कुश जल लिने र पिण्डमा चढाउने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) उनद्वितीयत्रैपाक्षिक-तृतीयचतुर्थपञ्चमषष्टोनषाड्सप्तमाष्टमनवमदशमैकादश- द्वादशोनाब्दिकमासिक श्राद्धपिण्डेषु इमानि प्रत्यवनेजनानि ते मया दीयन्ते तवोपतिष्ठन्ताम् । इति प्रत्यवनेजनं दद्यात् । (सव्य भएर आचमन गर्ने र अपसव्य हुने)

ततो नीवींविस्रंस्य सव्यंकृत्वाऽऽचम्याऽपसव्यंकृत्वा वामेन पाणिना धृतंसूत्रंदक्षिणेनादाय उभाभ्यांहस्ताभ्यांप्रथमपिण्डोपरि- प्रेतैतत्ते वासः, इति सूत्रं दत्त्वा एवं द्वितीयादि पिण्डेष्वपि प्रत्येकं सूत्रं दद्यात् । (पिण्डमा धागो चढाउने)

पिण्डपूजनम्

(पिण्डमा पूजा गर्ने र धूप बत्ती गर्ने)

गन्धादिना क्रमेण पिण्डानभ्यर्च्य कुशादिकमादाय- (जल कुश लिने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे प्रेते) ऊनमासिकद्वितीयमासिकत्रैपाक्षिकमासिकतृतीयमासिकचतुर्थमासिकपञ्चममासिकषष्ठमासिकोनषाण्मासिकसप्तममासिकाष्टममासिकनवममासिक दशममासिकैकादशमासिक द्वादशमासिकोनाब्दिकश्राद्धपिण्डेषु एतानि गन्धपुष्पधूपदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्ताम् । इत्युत्सृजेत् ।

ततः पिण्डशेषान्नं पिण्डसमीपे विकीर्य्य- (पिण्ड शेष पिण्डको छेउमा राख्ने)

ॐशिवा आपः सन्तु इति जलम्, ॐ सौमनस्यमस्तु । इति पुष्पम् ॐ अक्षतं चारिष्टमस्तु । इति तण्डुलान् क्रमेण प्रत्येकं विप्रकरे क्षिपेत् । (ब्राह्मणमा जल, फूल, अक्षता चढाउने)

अक्षय्योदकम्

(दुनामा जल राख्ने)

ततः कुशादिकमादाय- (कुश जल लिने)

अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) ऊनद्वितीयत्रैपाक्षिकतृतीयचतुर्थपञ्चमषष्ठोनषाड्सप्तमाष्टमनवमदशमैकादश- द्वादशोनाब्दिकमासिकश्राद्धेषु दत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठताम् । इत्यक्षय्योदकं दत्त्वा एवमेव सर्वत्र क्रमेण तत्तत्पदप्रक्षेपेणाक्षय्योदकं दद्यात् । सव्यं कृत्वा- अघोरः प्रेतोऽस्तु दक्षिणां दिशं पश्यन् सर्वेषु पिण्डेषु पूर्वाग्रामेकां जलधारां दद्यात् । अत्राशीः प्रार्थनानिषेधः । (सव्य हुने र जल चढाउने)

ततः सर्वेषु पिण्डेषु क्रमेण सपवित्रान् कुशान् धृत्वा पुटकादिस्थजलादिना मन्त्रपाठं विना- (दुध चढाउने)

इदमूर्ज्जं ते मया दीयते तवोपतिष्ठताम् । पिण्डस्थसपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दत्त्वा ततः सव्येन पिण्डानाघ्राय अपसव्येनोत्थापयेत् । पिण्डाधारकुशान् वन्हौ क्षिपेत् । अर्घपात्राणि संचाल्य सव्यं कृत्वाऽऽचम्य दक्षिणाद्रव्यसहितकुशादिकमादाय- (पितृ सम्झने, अपसव्य हुने, पिण्ड उठाउने, अर्घपात्र चलाउने र सव्य भई आचमन गर्ने)

दक्षिणादानम्

(दक्षिणा सङ्कल्प गर्ने)

अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) कृतैतदूनद्वितीय० त्रैपाक्षिक० तृतीय० चतुर्थ० पञ्चम० षष्ठ० ऊनषाड्० सप्तम० अष्टम० नवम० दशम० एकादश० द्वादश० ऊनाब्दिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथायथानामगोत्रेभ्यो ब्राह्मणेभ्यो दक्षिणां दातुमहमुत्सृजे । इति दक्षिणां दद्यात्- (ऋषिमा दक्षिणा राख्ने)

प्रार्थना :

(नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

त्रिवारं पठेत् । (अपसव्य हुने, दियो छोप्ने, हात पाउ धुने र सव्य भएर आचमन गर्ने)

ततोऽपसव्यं कृत्वा दीपाच्छादनं विधाय हस्तौ पादौ प्रक्षाल्याचम्य श्राद्धसम्पूर्णतायै-

विष्णोः स्मरणम्

(विष्णु स्मरण गर्ने)

ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताऽध्वरेषु च । स्मरणादेव तद्विष्णोः सम्पूर्ण स्यादिति श्रुतिः ॥

इति विष्णुं स्मरेत्-

श्राद्धीयवस्तूनि ब्राह्मणेभ्यः प्रतिपादयेत् ।

इति षोडशश्राद्धान्तर्गतोनादिमासिकादीनां पञ्चदशानां श्राद्धानां तन्त्रेणैकपात्रप्रयोगः ।

अथ सपिण्डीकरणश्राद्धप्रयोगः

(सपिण्डी श्राद्ध बाह्रौं दिनमा गर्ने कर्म)

सपिण्डीकरणे बहुधा अपात्रकमेवाचरन्तीति अपात्रकप्रयोगः (सर्स्यूं छर्केर दुई ओटा दियो वाली पूजा गर्ने)

तत्र मध्यान्हे कर्त्ता स्नातः शुचिराचान्तः पूर्वोपकल्पितस्थापितगौरसर्षपादिरक्षोघ्नं श्राद्धदेशं गत्वा पूर्वाभिमुख उपविश्य, रक्षोघ्नदीपं प्रज्वाल्य सम्पूज्य कर्मपात्रं कुर्यात्।

ततः कुशत्रयसहितं कर्मपात्रोदकमादाय- (कर्मपात्र बनाउने, जलले सेचन गर्ने र फूल, मोटक कम्मरमा सिउरिने)

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु। इति श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत्।

प्रतिज्ञासंकल्प

(पाँच ओटा ऋषि थापेर प्रतिज्ञासङ्कल्प गर्ने)

अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपितृलोकप्राप्त्यर्थममुकसगोत्रैरस्मत्पितामहप्रपितामहवृद्ध-प्रपितामहैरमुकामुकमुकशर्मभिः वसुरुद्रादित्यस्वरूपैः सह कालकामविश्वेदेवपूर्वकं सपिण्डीकरणं मृताहाद्द्वादशाहे पार्वणैकोद्दिष्टविधिनाहं करिष्ये। इति संकल्प कुर्यात्।

मातुः सपिण्डीकरणे तु- (माताहरूका लागि)

अद्यामुकसगोत्राया मातुरमुकप्रेतायाः प्रेतत्वनिवृत्तिपितृलोकप्राप्त्यर्थममुकसगोत्राभिरस्मत्पिता- महीप्रपितामही वृद्धप्रपितामहीभिर- मुकामुकामुकदेवीभिर्वसुरुद्रादित्यस्वरुपाभिः सह इत्यादि बचनम् ग्राह्यम्।

भ्रात्रादीनां सपिण्डीकरणे-

अद्यामुकसगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्तिपूर्वकपितृलोकप्राप्त्यर्थममुकगोत्रैः स्वपितृपितामह- प्रपितामहैरमुका-मुकामुकशर्मभिर्वसुरूद्रादित्यस्वरुपैः सहेत्यादि पूर्ववत्।

सहगमने तु- (दाजुभाइहरूका लागि)

अद्यामुकसगोत्राया मातुरमुकप्रेतायाः प्रेतत्वनिवृत्तिपितृलोकप्राप्त्यर्थम-मुकसगोत्रेण स्वभर्त्रा सह सपिण्डीकरणं मृताहाद्द्वादशाहेऽहं करिष्ये। इति विशेषः।

ततः - त्रिः प्रणवव्याहृतिसहितां गायत्रीं जपेत्। (गायत्री जप्ने र नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ इति त्रिः।

ततो देवश्राद्धार्थोपकल्पितासनादिदेशमागत्य सतिलकुशत्रयमादाय- (तीनवटा कुश, तिल लिने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकामुकसगोत्रपितामहप्रपितामह-वृद्धप्रपितामहानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां कालकामविश्वेषां देवानामिदमासनं वो नमः।

पूर्वाग्रहकुशरुपमासनं यवजलप्रोक्षितमुत्सृजेत्। (विश्वेदेवा ब्राह्मणमा कुश राख्ने)

ॐ विश्वान् देवानावाहयिष्ये। ॐ विश्वे देवास इति मन्त्रेणावाह्य-

ॐ यवोसि यवया स्मद्वेषो यवयारातीः । इति मन्त्रेण श्राद्धदेशे यवान् विकीर्य- (जौ छर्कने)

ॐ विश्वेदेवाः शृणुतेमꣳहवम्मे येऽअन्तरिक्षे यऽउपद्यविष्ठ। येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन् बर्हिषिमादयध्वम् ॥ ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः । ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥

हस्तार्घ

(ब्राह्मण अगाडि दुनामा पवित्र जल, जौ, चन्दन, फूल राख्ने)

ततः स्वमन्त्रेण पवित्रं पुटकादौ पूर्वाग्रं धृत्वा जलयवगन्धपुष्पाणि स्वस्वमन्त्रैः क्षिपेत् । ततोऽर्घपात्रं वामहस्ते कृत्वापुष्प सहितं पवित्रं ॐ नमो नारायणाय, इत्यनेन ब्राह्मणकरे अन्नपात्रे पूर्वाग्रे धृत्वा- (पवित्र र फूल चढाउने)

ॐ या दिव्याऽआपः पयसा सम्बभूबुर्याऽअन्तरिक्षाऽउत पार्थवीर्याः । (दुना हातले ढाक्ने)

हिरण्यवर्णा यज्ञियास्ता नऽआपः शिवाः शꣳस्योनाः सुहवा भवन्तु ॥

अर्घपात्रस्थजलमभिमन्त्र्य कुशयवजलान्यादाय- (जल चढाई सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकामुकसगोत्रपितामहप्रपितामहवृद्ध-प्रपितामहामुकामुकामुक- शर्म्मवसुरूद्रादित्यस्वरुपश्राद्धसम्बन्धिनः कालकामविश्वेदेवा एष हस्तार्घो वो नमः। इति पवित्रोपरि अर्घजलं ददद्युत्सृजेत् । (दुनामा पवित्र र फूल राखी जल चढाएर ब्राह्मणको बायाँपट्टि उत्तानै राख्ने)

ततः पवित्रसहितमर्घपात्रमासनदक्षिणपार्श्वे कालकामविश्वेभ्यो देवेभ्यः स्थानमसीति देवार्घपात्रमुत्तानं स्थापयेत् ।

ब्राह्मणपूजा

(ब्राह्मणको पूजा गर्ने, धूप बत्ती गर्ने र सङ्कल्प गर्ने)

ततो गन्धादिभिः संपूज्य कुशादिकमादाय-

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकामुकसगोत्र पितामहप्रपितामह-वृद्धप्रपितामहामुकामुकामुकाकुकशर्मवसुरूद्रादित्यस्वरुपश्राद्धसम्बन्धिनः कालकामविश्वेदेवा एतानि गन्धपुष्प-धूपदीपवासांसि वो नमः । इति गन्धादिकमुत्सृजेत् ।

भूस्वामी

(अपसव्य भई एक भाग सिदा राख्ने)

ततोऽपसव्येन तिलघृतजलयुतमन्नं मोटकादिसहितमादाय दक्षिणाभिमुखः - (मोटक लिई सङ्कल्प गर्ने)

ॐ इदमन्नमेतद्भूस्वामिपितृभ्यो नमः । इत्युत्सृजेत् ।

अन्नसंकल्प

(सव्य भएर अर्को भाग सिदा राख्ने)

ततः सव्यं कृत्वा आसनसहितस्यान्नपात्रस्य चतुर्दिक्षु चतुःकोणमण्डलं विधाय देवान् ध्यायन् सोपस्कर-तिलजलयुतमन्नमुपनीय मधुनाभिघार्य ऋजुहस्ताभ्यामन्नपात्रमालभ्य-

(दायाँ हात बायाँ र बायाँ हात दायाँतिर गरी सिदालाई छुने)

ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा । ॐ इदं विष्णुर्वि चक्रमे त्रेधा निदधे पदम् ॥ समूढमस्यपाꣳसुरे स्वाहा । ॐ इदमन्नमित्यन्ने । ॐ इमा आप इति जले । ॐ

इदमाज्यमिति घृते । ॐ इदं हविरिति पुनरन्ने । दक्षिणकराङ्गुष्ठं निवेश्य- (सिदालाई बूढी औंलाले देखाउने)
ॐ यवोसि यवयास्मद्वेषो यवयारातीः । यवानन्नोपरि प्रक्षिप्य कुशयवजलान्यादाय- (जौ वरिपरि छरी सङ्कल्प गर्ने)
ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकामुकसगोत्रपितामहप्रपितामह- वृद्धप्रपितामहामुकामुकामुकशर्मवसुरूद्रादित्यस्वरुपश्राद्धसम्बन्धिभ्यः कालकामविश्वेभ्यो देवेभ्य एतद्वोऽन्नं सोपस्करं नमः । इत्युत्सृजेत् । एवं देवकाण्डं निर्वर्त्य हस्तौ पादौ प्रक्षाल्याचम्य प्रेतश्राद्धदेशमागत्योपविश्य कृतापसव्यो दक्षिणाभिमुखः कुशादीन्यादाय – (हात पाउ धुने, आचमन गर्ने र अपसव्य भई प्रेतपट्टिको कोठामा जाने)

आसनम्

(प्रेत पट्टिको दियो वाली पूजा गरेर सङ्कल्प गर्ने)
अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठत्ताम् । कुशरुपमासनमुत्सृजेत् । इति प्रेताय- ततो मोटकादिकमादाय- (कुश जल लिई सङ्कल्प गर्ने)
ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्रस्य (गोत्रायाः पितामह्याः) पितामहस्यामुकशर्मणो वसुस्वरूपस्येदमासनं ते स्वधा । मोटकरूपमासनमुत्सृजेत् । एवमेव इतरयोरपि दद्यात् ।
पुनर्मोटकादिकमादाय- (पुनः मोटक जल लिई सङ्कल्प गर्ने)
ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्रस्य (गोत्रायाः प्रपितामह्याः) प्रपितामहस्यामुकशर्मणो रूद्रस्वरूपस्य इदमासनं स्वधा पुनर्मोटकादिकमादाय- (पुनः मोटक जल लिई सङ्कल्प गर्ने)
ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्रस्य (गोत्रायाः वृद्धप्रपितामह्याः) वृद्धप्रपितामहस्यामुकशर्मण आदित्यस्वरूपस्य इदमासनं स्वधा ।

आवाहनम्

(प्रेत ऋषिलाई आवाहन गर्ने)
ततः प्रेतवर्जं पितामहादीनुद्दिश्य पितृनावाहयिष्ये इति यजमानोक्ते- ॐ आवाहय । इति प्रतिवचनान्तरम् –
ॐ उशन्तत्वानिधीमह्युशन्तः समिधीमहि । उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे ॥ (पितृ ऋषिलाई आवाहन गर्ने)
इति पितामहादीनावाह्य- (तिल छर्ने)
ॐ अपहता असुरा रक्षा ँसि वेदिषदः । इत्यनेन श्राद्धस्थाने तिलान् विकीर्य-
ॐ आयन्तु न पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ।
अस्मिन् यज्ञे स्वधया मदन्तोधिब्रुवन्तु तेवन्त्वस्मान् ॥

हस्तार्घ

(प्रेत ऋषि अगाडि एउटा दुना राख्ने र पितृ ऋषिहरू अगाडि पनि एक एक गरी दुना राख्ने)
ततोऽर्घार्थं पूर्वभागे एकं पुटकमासाद्य तत्पश्चिमभागे दक्षिणसंस्थं पुटकपात्रत्रयमासाद्य तेषु चतुर्षु अपि पुटकेषु- (दुनामा पवित्र, जल, तिल, चन्दन, फूल राख्ने)
ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः ॥ इति मन्त्रेण प्रत्येकं दक्षिणाग्राणि पवित्राणि धृत्वा जलतिलगन्धपुष्पाणि तत्तमन्मन्त्रैः प्रत्येकं तेषु क्षिपेत् । (पवित्र फूल चढाउने)

ततः प्रेतार्घपात्रं वामहस्ते कृत्वा- ॐ नमो नारायणाय, इत्यनेन अन्नपात्रोपरि पवित्रं उत्तराग्रं धृत्वा-

ॐ यादिव्याऽआपः पयसा सम्बभूवुर्याऽअन्तरिक्षाऽउतपार्थवीर्याः । (दुनालाई हातले ढाक्ने)

हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः स ँ स्योना सुहवा भवन्तु ॥

अर्घपात्रस्थजलं दक्षिणहस्तेनाच्छादितमभिभन्त्र्य कुशादिकमादाय- (कुश जल लिई सङ्कल्प गर्ने)

अद्यामुकगोत्रामुकप्रेत (गोत्रे, प्रेते) सपिण्डीकरणनिमित्तकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम् । पवित्रोपरि चतुर्भागजलं ददद्युत्सृजेत् ।

प्रेत्रार्घपात्रस्थजलसंयोजनसंकल्प

(संयोजन गर्न सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) अर्घपात्रोदकम् अमुकसगोत्राणां पितामहप्रपितामहवृद्धप्रपितामहा- नाममु कामुकामुकशर्मणामर्घपात्रोदकेन संयोजयिष्ये । पितामहादिपात्रत्रये प्रेतार्घपात्रजलस्य भागत्रयं कृत्वा एकैकं भागं वक्ष्यमाणमन्त्रैः संयोजयेत् । प्रेतार्घपात्रजलविभागे-

प्रेतार्घपात्रस्थजलविभाजनम्

(तीन भाग लगाउने)

ॐ ये समानाः समनसः पितरो यमराज्ये । तेषांल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥ ये समानाः समनसो जीवा जीवेषु मामकाः । तेषा ँ श्रीर्मयि कल्पतामस्मिल्लोके शत ँ समाः इति ॥ निरूप्य चतुरः पिण्डान् श्राद्धदः प्रतिनामतः । येसमाना इति द्वाभ्यामाद्यं तु विभजेत् त्रिधा ॥ एष एव विधिः प्रोक्त अर्घपात्रचतुष्टये । मिताक्षरायां स्मृत्यर्थसारे च । प्रेतार्घपात्रेजलमादौ पितामहार्घपात्रे संयोज्यावशिष्टजलेन प्रेतार्घं दद्यात् । यथा च वचनम् तत्र क्रमः - (सव्य भई आचमन गर्ने र अपसव्य हुने)

सव्यं कृत्वाऽऽचम्याऽपसव्यं कृत्वा अन्यत् पुटकत्रयं धृत्वा प्रेतार्घपात्रं गृहीत्वा-

ये समानाः समनसः पितरो यमराज्ये । तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्प्पताम् ॥ ये समाना समनसो जीवा जीवेषु मामकाः । तेषा ँ श्रीर्मयि कल्पतामस्मिल्लोके शत ँ समाः ॥ इति मन्त्रद्वेन-

अपरतृतीयभागं पुटकान्तरे धृत्वा पुनरपि मन्त्रद्वयं पठित्वा प्रतार्घपात्रावशिष्टतृतीयभागजलं पुटकान्तरे धृत्वा प्रथमपुटकस्थविभक्तजलतृतीयभागं प्रेतार्घपात्रे कृत्वा पवित्रपुष्पसहितं प्रेतार्घमादाय- (पवित्र पुष्पसहित हस्तार्घ लिने)

प्रेतार्घपात्रस्थजलमेलनम्

(प्रेतार्घपात्र पितृब्राह्मणको तिनै दुनामा मिसाउने)

ॐ ये समानाः समनसः पितरो यमराज्ये ॥ तेषांल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥१॥ ॐ ये समानाः समनसो जीवा जीवेषु मामकाः ॥ तेषा ँ श्रीर्मयि कल्पतामस्मिल्लोके शत ँ समाः ॥२॥ संसृजन्तु त्वा पृथिवी वायुरग्निः प्रजापतिः ॥ संसृजध्वं पूर्वोश्चः पितृभिः सह ॥३॥ संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ॥ देवाभागं यथा पूर्वे संजानानामुपासते ॥४॥ समानो मन्त्रः समितिः समानी समानं मनः सहचित्तमेषाम् ॥ समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ॥५॥ समानीव आकूतिः समाना हृदयानि वः ॥ समानमस्तु वो मनो यथा वः सुसहासति ॥६॥

मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳ रजः । मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्य्यः । माध्वीर्गावो भवन्तु नः ॥ ऋचमपि च पठेत् इति केचित् ॥

प्रेतार्घपात्रस्थतृतीयभागजलं पितामहार्घपात्रजले मेलयेत् । (द्वितीय तृतीय भाग प्रपितामह, वृद्धप्रपितामहमा मिसाउने)

एवमपरं पुटकद्वयस्थितार्घपात्रजलं तृतीयभागद्वयं क्रमेण प्रत्येकं मन्त्रान् पठित्वा प्रपितामहार्घपात्रजले च क्रमेण मेलयेत् । ततः (तिनै दुनामा मिसाएर सङ्कल्प गर्ने)

ॐ अमुकसगोत्रामुकप्रेता (गोत्रे, प्रेते) (अमुकसगोत्रैः) स्वपितृपितामहप्रपितामहैरमुकामुकामुकशर्मभिर्वसु रुद्रादित्य-स्वरुपैः सह सायुज्यं गच्छ ।

अर्घपात्रस्थजलाभिमन्त्रणम् अर्घदानञ्च (पितामहको अर्घपात्रको पवित्र र फूल ऋषिमा चढाउने)

पितामहार्घपात्रं वामहस्ते कृत्वा ॐ नमो नारायणाय । इति पवित्रं विप्रपाणौ धृत्वा- (हातले ढाक्ने)

ॐ या दिव्याऽ आपः पयसा सम्बभूवुर्याऽअन्तरिक्षाऽउत पार्थवीर्याः । हिरण्यवर्णा यज्ञियास्ता नऽआपः शिवा स ꣳ स्यानो सुहवा भवन्तु ॥ इत्यर्घपात्रस्थजलमभिमन्त्र्य मोटकादिकमादाय- (मोटक लिई सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्रपितामहामुकशर्मन् वसुस्वरूपैष तेऽर्घः स्वधा । इति पवित्रोपरि अर्घजलं ददुत्सृजेत् । पवित्रपुष्पसहितमर्घपात्रमग्रे धारयेत् ॥

(पवित्र र फूल दुनामै राख्ने)

ततः प्रपितामहार्घपात्रं वामहस्ते कृत्वा ॐ नमो नारायणाय इति विप्रपाणौ धृत्वा- (पवित्र र फूल अर्को ऋषिमा चढाउने)

ॐ या दिव्या आपः पयसासम्बभुबूर्याऽअन्तरिक्षाऽउत पार्थवीर्याः । हिरण्यवर्णा यज्ञियास्ता नऽआपः शिवाः स ꣳ स्यानो सुहवा भवन्तु ॥ (जल चढाउने)

अर्घपात्रस्थं जलमभिमन्त्र्य मोटकादिकमादाय- (मोटक लिई सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणश्राद्धे अमुकसगोत्रप्रपितामहाऽमुकशर्मन् रूद्रस्वरूप एष तेऽर्घः स्वधा । इति पूर्ववदुत्सृजेत् । पवित्रपुष्पसहितमर्घपात्रमग्रे स्थापयेत् ॥ (फेरि अर्को दुनाको पवित्र फूल ऋषिमा राख्ने)

तृतीयार्घपात्रं वामहस्ते कृत्वा ॐ नमो नारायणाय इति पवित्रंविप्रपाणौ धृत्वा- (दुना ढाक्ने)

ॐ या दिव्याऽआपः पयसा सम्बभूवुर्याऽअन्तरिक्षाऽउतपार्थवीर्याः । हिरण्यवर्णा यज्ञियास्ता नऽआपः शिवा स ꣳ स्योना सुहवा भवन्तु ।

इत्यर्घपात्रस्थं जलमभिमन्त्र्य मोटकादिकमादाय- (मोटक लिई सङ्कल्प गर्ने)

अद्यामुक सगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्रवृद्धप्रपितामहामुक-शर्मन्नादित्यस्वरूप एष तेऽर्घःस्वधा ।

इति पूर्ववदर्घं उत्सृजेत् - (पवित्र र फूल दुनामा राखी दुना एकत्र गरेर ऋषिको पछाडि घोप्ट्याएर राख्ने)

पवित्रपुष्पसहितमर्घपात्रमग्रे स्थापयेत् । ततः प्रेतार्घपात्रं प्रेतासनवामपार्श्वे प्रेताय स्थानमसीत्युत्तानमेव

स्थापयित्वा तदुपरि कुशान् दद्यात् । वृद्धप्रपितामहार्घपात्रस्थजलादिकं प्रपितामहार्घपात्रे कृत्वा तत्सर्वं पितामहार्घपात्रे कृत्वा पितामहार्घपात्रं प्रपितामहार्घपात्रोपरि धृत्वा तद्द्वयम् उत्ताने वृद्धप्रपितामहार्घपात्रोपरि धृत्वा पात्रत्रयमेकदैव पितामहासनवामपार्श्वे **पितामहादिभ्यः स्थानमसीति** न्युब्जं कृत्वा तदुपरि कुशत्रयं दद्यात् । एवं स्थापितमर्घपात्रचतुष्टयं दक्षिणापर्यन्तं न चालयेत् ॥ (तीनओटा कुशका टुक्रा दुनामाथि राख्ने)

ब्राह्मणपूजा

(प्रेतब्राह्मण पूजा गर्ने र धूप, बत्ती, नैवेद्य अर्पण गर्ने)

क्रमेण प्रेतमारभ्य गन्धादिभिः सर्वान् संपूज्य कुशादिकमादाय- (कुश जल लिने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) सपिण्डीकरणश्राद्धे एतानि गन्धपुष्पधूपदीपवासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम् । इति प्रेतब्राह्मणाय गन्धादिकमुत्सृजेत् ।

एवं पितामहादीन् सम्पूज्य मोटकादिकमादाय- (पितामहादि ब्राह्मणको पूजा गर्ने र धूप, बत्ती, नैवेद्य अर्पण गरी सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्राः पितामह-प्रपितामहवृद्धप्रपितामहा अमुकामुकामुकशर्माणो (वर्मणो, गुप्तायाः) वसुरूद्रादित्यस्वरूपा एतानि गन्धपुष्पधूपदीपवासांसि युष्मभ्यं स्वधा । पितामहादिभ्यो गन्धादिकमुत्सृजेत् । (चतुष्कोण वनाउने)

ततः प्रेतासनस्य **चतुर्दिक्षु चतुष्कोणमण्डलं विधाय** अपरं पितामहादित्रिकार्थं मण्डलं कुर्यात् ।

अग्नौकरणम्

(सव्य भएर दुनामा आहुति दिने र अपसव्य हुने)

ततः सव्यं कृत्वा प्राङ्मुख उपवीति पातितदक्षिणजानुः पुटकादौ सघृतमन्नं कृत्वा पुटकादिजले-

ॐ अग्नये कव्यवाहनाय स्वाहा, इदमग्नये कव्यवाहनाय ।

ॐ सोमाय पितृमते स्वाहा, इदं सोमाय पितृमते । इति आहुतिद्वयं तदन्नाग्रं जुहुयात् ।

अपसव्यं कृत्वा अवशिष्टमन्नं पितामहादिपात्रे किञ्चित् दद्यात् ।

अथान्नदानम्

(प्रेतब्राह्मणमा सिदा राख्ने)

ततः क्रमेण प्रत्येकं सोपस्करमन्नमुपनीय पृथक्-पृथक् पुटकस्थितसतिलजलं चोपनीय प्रेतपात्रादिस्थितान्नेषु दद्यात् ।

ततः पात्रालम्भनांङ्गुष्ठावगाहनं विना- (दायाँ हात बायाँ र बायाँ हात दायाँतिर गरी सिदालाई छुने)

ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा । अपहता असुरा रक्षा ँसि वेदिषदः ।

इत्यन्नोपरि प्रचुरतिलान् प्रक्षिप्य कुशादीन्यादाय- (कुश जल लिई सङ्कल्प गर्ने)

अद्यामुकसगोत्रायामुकप्रेताय (गोत्रायै, प्रेतायै) सपिण्डीकरणश्राद्धे इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठताम्। प्रेतायान्नमुत्सृजेत् । (अर्को भाग सिदा राख्ने)

ततः पितामहान्नपात्रं व्यस्ताभ्यां हस्ताभ्यां न्युब्जाभ्यामालभ्य- (दायाँ हात बायाँ र बायाँ हात दायाँतिर गरी सिदालाई छुने)

ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽ अमृतेऽ अमृतं जुहोमि स्वाहा । ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपा ँसुरे ॥ (बूढी औंलाले सिदालाई देखाउने र तिल छर्ने)

ॐ इमा आपः । ॐ इदमाज्यं । ॐ इदं हविः । क्रमेणान्नजलघृतादिषु दक्षिणांगुष्ठं निवेश्य-

ॐ अपहताऽअसुरा रक्षा ꣳसि वेदिषदः । इत्यन्नोपरि तिलान् प्रक्षिप्य मोटकादीन्यादाय- (मोटक लिई सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्राय पितामहायामुकशर्मणे वसुस्वरुपायैतदन्नं सोपस्करं स्वधा । पितामहायान्नमुत्सृजेत् । (अर्को भाग सिदा राख्ने)

ततः प्रपितामहान्नपात्रमालभ्य पूर्ववत्- (दायाँ हात बायाँ र बायाँ हात दायाँतिर गरी सिदालाई छुने)

ॐ पृथवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽ अमृतेऽ अमृतं जुहोमि स्वाहा । ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा ꣳ सुरे । इत्यादिकृत्वा मोटकादीन्यादाय- (मोटक लिई सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्राय प्रपितामहायामुकशर्मणे रुद्रस्वरुपायैतदन्नं सोपस्करं स्वधा ।

इति प्रपितामहायान्नमुत्सृजेत् । ततो वृद्धप्रपितामहान्नपात्रमालभ्य पूर्ववत् पृथिवी ते इत्यादिकं सर्वं कृत्वा मोटकादीन्यादाय – (माथिको जस्तै दायाँ हात बायाँ र बायाँ हात दायाँतिर गरी सिदालाई छुने र मोटक लिई सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्राय वृद्धप्रपितामहायामुकशर्मणे आदित्यस्वरुपायैतदन्न सोपस्करं स्वधा ।

इति वृद्धप्रपितामहयान्नमुत्सृजेत् । ततः सव्येन । (सव्य भएर नमस्कार गर्ने)

ॐ मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ ॐ मधुनक्तमुतोषसो मधुमत् पार्थिव ꣳ रजः मधु द्यौरस्तु नः पिता ॥ ॐ मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्य्यः । माध्वीर्गावो भवन्तु नः ॥ ॐ मधु-३ । (तीन पटक ॐ मधु भन्ने)

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥ (हात जोड्ने)

नमस्तुभ्यं विरुपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥

विकिरदानम्

(अपसव्य भएर ऋषि नजिकै तीन टुक्रा कुश र फूल राख्ने)

ततः पितामहान्नपात्रसन्निधौ आस्तृतदक्षिणाग्रकुशत्रयायां भूमौ विकिरासनं दद्यात् । (मोटकको विकिरासन राख्ने)

असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् । उच्छिष्टभागदेयानां दर्भेषु विकिरासनम् ॥

सतिलघृतमन्नमादाय जलेनाप्लाव्य मोटकं चादाय- (विकरको निमित्त पायस या चामल तिल घ्यू मह हाल्ने र जल राखी मोटक पानी लिई दुनालाई उठाउने)

अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम । भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥

(विकरासन राखेको ठाउँमा घोप्ट्याउने)

आस्तृतकुशोपरि तदन्नं विकिरेत् । (औंठी त्यहीं राख्ने)

पिण्डवेदिनिर्माणम्, संस्कारश्च

(सव्य भएर आचमन गर्ने, हरिः ३ सम्झने, अपसव्य भएर बालुवा ओछ्याउने)

ततः सव्यं कृत्वा द्विराचम्य हरिं स्मृत्वा अपसव्यं कृत्वा प्रेतपिण्डदानार्थमेकां पितामहादिकपिण्डदानार्थमपरां

हस्तमितां चतुरङ्गुलोच्छ्रितां सैकतादिकां दक्षिणप्लवां पिण्डिकां निर्माय प्रेतपिण्डिकायां रेखाकरणोल्मुकभ्रामणं विनैव छिन्नमूलकुशानास्तीर्य अपरपिण्डिकामध्ये वामेन पाणिना दर्भपिञ्जुलीं गृहीत्वा दक्षिणहस्ते कृत्वा तन्मूले नापसव्योपगृहीतदक्षिणपाणिना- (तीन वटा कुशको टुक्राले तीनवटा रेखा कोर्ने)

ॐ अपहताऽअसुरा रक्षा ꣳसि वेदिषदः। इति दक्षिणाग्रां प्रादेशप्रमाणं सकृदुल्लिख्य दर्भपिञ्जुलीमुत्तरस्यां क्षिपेत्। ततो रेखोपरि- (आगो, कुश वेदीमा घुमाई दक्षिणतर्फ छोड्ने र वेदीमा फूल ओछ्याउने)

ॐ ये रुपाणि प्रतिमुञ्चमानाऽअसुराः सन्तः स्वधया चरन्ति। परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात्॥ अङ्गारं भ्रामयित्वा दक्षिणतः क्षिपेत्। ततो रेखायां छिन्नमूलकुशानास्तृणुयात्। ततः सव्यं कृत्वाऽऽचम्य- (सव्य भएर आचमन गरी नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः। इति त्रिः।

अवनेजनम्

(अपसव्य हुने, कुशको टुक्रा, चन्दन फूल तिल लिने)

अपसव्यं कृत्वा पुटकद्वये गन्धपुष्पतिलजलानि कृत्वा एकं पुटकं वामहस्ते कृत्वा कुशादिकमादाय- (कुश जल लिने)

ॐ अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) सपिण्डीकरणश्राद्धपिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्। इति पूर्वपिण्डिकायां छिन्नमूलकुशोपरि अवनेजनं दद्यात्। (प्रेत पिण्ड दिन कुश राख्ने)

ततोऽपरपुटकं वामहस्ते कृत्वा मोटकादिकान्यादाय- (पितामहपट्टि मोटक राख्ने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धपिण्डस्थाने अमुकसगोत्र पितामहामुकशर्मन् (वर्मन्, गुप्त) वसुस्वरूपात्रावने निक्ष्व ते स्वधा। इति द्वितीयपिण्डिकायामास्तृतकुशमूलसन्निधाने पितामहायावनेजनं दद्यात्।

पुनर्मोटकादीन्यादाय- (प्रपितामहपट्टि मोटक राख्ने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धपिण्डस्थाने अमुकसगोत्रप्रपितामहामुकशर्मन् रूद्रस्वरूपात्रावने निक्ष्व ते स्वधा। आस्तृतकुशमध्ये प्रपितामहायावनेजनं दद्यात्।

पुनर्मोटकादीन्यादाय- (वृद्धप्रपितामहपट्टि मोटक राख्ने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धपिण्डस्थाने अमुकसगोत्र वृद्धप्रपितामहामुकशर्मन्नादित्यस्वरूपात्रावने निक्ष्व ते स्वधा। आस्तृतकुशाग्रे वृद्धप्रपितामहायावनेजनं दद्यात्।

पिण्डदानम्

(पिण्डदान गर्न प्रेत कोठामा जाने)

ततः कपित्थप्रमाणान् चतुरः पिण्डान् निर्माय प्रथमपिण्डं कुशतिलसहितमादाय- (प्रेत पिण्ड लिने)

ॐ अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) सपिण्डीकरणश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्। पूर्वपिण्डिकायां कुशोपरि प्रेतपिण्डं दद्यात्। (प्रेतपिण्ड कुशमाथि राखिदिने)

ततो मोटकादीनि पिण्डंचादाय- (पितामहको पिण्ड मोटक जलसहित लिने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्र पितामहामुक-शर्मन् (वर्मन्, गुप्त) वसुस्वरूपैष ते पिण्डः स्वधा । पश्चिमपिडिकायां प्रथमावनेजनस्थाने पितामहाय पिण्डं दद्यात् । (पिण्ड राख्ने)

पुनर्मोटकादीनि पिण्डंचादाय- (प्रपितामहको पिण्ड मोटक जलसहित लिने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्रप्रपितामहामुक-शर्मन् रूद्रस्वरूपैष ते पिण्डः स्वधा । द्वितीयावनेजनस्थाने प्रपितामहाय पिण्डं दद्यात् । (पिण्ड राख्ने)

पुनर्मोटकादीनि पिण्डं चादाय- (वृद्धप्रपितामहको पिण्ड मोटक जलसहित लिने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्र वृद्धप्रपितामहामुक-शर्मन्नादित्यस्वरूपैष ते पिण्डः स्वधा ।

तृतीयावनेजनस्थाने वृद्धप्रपितामहाय पिण्डं दद्यात् । (पिण्ड राख्ने र ओछ्याएको कुशले हात पुछ्ने)

ततः पितामहादिपिण्डास्तरणकुशमूलेन **लेपभागभुजस्तृप्यन्तु**

इति करं प्रोक्ष्य सव्यं कृत्वाऽऽचम्य हरिं स्मरेत् । (सव्य भएर आचमन गर्ने, हरि हरि भन्ने, अपसव्य हुने र ध्यान गर्ने)

ततोऽपसव्यं कृत्वा दक्षिणाभिमुखो मन्त्रपाठं विना प्रेतं भास्वरमूर्तिं चिन्तयेत् ।

ततः पितामहादीनुद्दिश्य दक्षिणाभिमुखः पुष्पादिकं गृहीत्वा- (फूल, चन्दन लिने)

ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् ।

उत्तराभिमुखो भूत्वा श्वासं नियम्य भास्वरमूर्तीपितामहादिकं ध्यायन्- (सास नफेरि अनुहार सम्झेर चन्दन फूल राख्ने)

ॐ अमीमदन्त पितरो यथा भागमावृषायिषत । इति पिण्डेषु क्षिपेत् ।

प्रत्यवनेजनम्

(खोचीमा जल राख्ने)

ततः प्रतावनेजनपात्रं वामहस्ते कृत्वा कुशादीन्यादाय- (कुश लिई सङ्कल्प गर्ने)

अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) सपिण्डीकरणश्राद्धपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम् ।

इति प्रेताय प्रत्येवनेजनं दत्त्वा पितामहाद्यवनेजनपात्रं वामहस्ते कृत्वा मोटकादीन्यादाय-

(पितामहको पिण्डमा चढाउन मोटक जल लिने)

ॐ अद्यामुकसगोत्रास्यमुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुकसगोत्र पितामहा-मुकशर्मन् वसुस्वरूपेदं प्रत्यवनेजनं ते स्वधा ।

इति पितामहाय प्रत्यवनेजनं दत्त्वा, पुनर्मोटकमादाय- (प्रपितामहको पिण्डमा चढाउन मोटक जल लिने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुकसगोत्रप्रपितामहामुकशर्मन् रूद्रस्वरूपेदं प्रत्यवनेजनं ते स्वधा । प्रपितामहाय प्रत्यवनेजनं दत्त्वा ।

पुनर्मोटकमादाय- (वृद्धप्रपितामहको पिण्डमा चढाउन मोटक जल लिने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अुमकसगोत्रवृद्धप्रपिता महामुक

शर्मन् (वर्मन्, गुप्त) आदित्यस्वरूपेदं प्रत्यवनेजनं ते स्वधा । इति वृद्धप्रपितामहाय प्रत्यवनेजनं दद्यात् । (सव्य भएर आचमन गर्ने र अपसव्य हुने)

ततो नीवीं विस्रंस्य सव्यं कृत्वाऽऽचम्य अपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय मन्त्रपाठं विना-

सूत्रदानम्

(काँचो धागो पहँलो बनाएर चढाउने)

प्रेतैतत्ते बासः इति उमाभ्यां हस्ताभ्यां पिण्डोपरि सूत्रं धारयेत् । पूर्ववत् सूत्रमादाय –

ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वःपितरो द्वेष्मैतद्वः पितरो वासः । इति प्रत्येकं पिण्डोपरि सूत्रं धारयेत् । (प्रत्येक पिण्डमा चढाउने)

पिण्डपूजा

(पिण्ड पूजा गर्ने)

ततः प्रत्येकं गन्धादिभिः पिण्डान् सम्पूज्य कुशादिकमादाय- (सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) सपिण्डीकरणनिमित्तकश्राद्धपिण्डे एतानि गन्धपुष्पधूपदीपनैवेद्यादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम् । इति प्रेताय गन्धादिकमुत्सृजेत् ।

मोटकादीन्यादाय- (पितामह, प्रपितामह, वृद्धप्रपितामहको पिण्डमा पूजा गरी मोटक र जल लिने)

ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुकसगोत्राः पितामहप्रपितामहवृद्धप्रपितामहा अमुकामुकामुकशर्माणो वसुरूद्रादित्यस्वरूपा एतानि सूत्रगन्धपुष्पधूपदीपैक्षवादि नैवेद्यानि युष्मभ्यं स्वधा । इति पितामहादिभ्यो गन्धादिकमुत्सृजेत् ।

ततः पिण्डसमीपे तत्तत्पिण्डशेषान्नं विकिरेत् । (पिण्डको शेष पिण्डको छेउमा राख्ने)

ततः सव्येन (सव्य भएर विश्वेदेवा ब्राह्मणमा जल, फूल, अक्षता चढाउने)

ॐ शिवा आपः सन्तु, इति जलम् । ॐ सौमनस्यमस्तु, इति पुष्पम् । ॐ अक्षतञ्चारिष्टमस्तु इति तण्डुलान् । विश्वेदेवान्नपात्रोपरि क्षिपेत् । ततोऽपसव्यं कृत्वा- (अपसव्य हुने र प्रेतब्राह्मणमा जल फूल अक्षता चढाउने)

ॐ शिवा आपः सन्तु इति जलम् । ॐ सौमनस्यमस्तु इति पुष्पम् । ॐ अक्षतञ्चारिष्टमस्तु इति तण्डुलान् । प्रेतान्नपात्रोपरि क्षिपेत् ।

अक्षय्योदकदानम्

(दुनामा जल राख्ने, सङ्कल्प गर्ने र सव्य भई पिण्डमा जलको धारा लगाउने)

कुशादीकमादाय – ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे दत्तैतदन्नपानादिकं अक्षय्यम् उपतिष्ठताम् । इत्यक्षय्योदकं दत्त्वा सव्यं कृत्वा अघोरः प्रेतोऽस्तु इति दक्षिणां दिशं पश्यन् पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् ।

पयोधारादानम् (सव्य नै भई पिण्डमा दुधको धारा लगाउने)

ततः सपवित्रान् कुशान् पिण्डोपरि धृत्वा मन्त्रपाठं विना पुटकादिस्थजलादिना- **इदमूर्ज्जं ते मया दीयते तवोपतिष्ठताम्** सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात्। दक्षिणादानं विसर्जनं चान्ते सहैव भवति।

पिण्डमेलनम् (अपसव्य भई सुनको तार वा कुशले प्रेतपिण्ड तीन भाग लगाउने)

सुवर्णरूप्यदर्भैस्तु तस्मिन् पिण्डे ततस्त्रिधा।
कृत्वा पितामहादिभ्यः पितृभ्यश्चैनमर्पयेत्॥ इति ब्रह्मपुराणम्। अपसव्यन्।

सुवर्णरुप्यदर्भैः पिण्डविभागः कर्त्तव्यः। ततः पिण्डे सूत्रादिकमपनीय- ॐ अद्यामुकसगोत्रस्यामुकप्रेतस्य पिण्डं पितामहादिपिण्डैः सह संयोजयिष्ये। सुवर्णरजतकुशान् हस्तद्वयेनादाय- (पिण्ड बराबर तीन भाग लगाउने)

ॐ ये समानाः समनसः पितरो यमराज्ये। तेषांलोकः स्वधा नमो यज्ञो देवेषु कल्पताम्॥
ये समानाः समनसो जीवाजीवेषु मामकाः। तेषा ँ श्रीर्मयिकल्पतामस्मिंल्लोके शत ँ समाः॥

इति प्रेतपिण्डं त्रिधाविभजेत्। प्रतिविभागं मन्त्रद्वयं पठेत्।

विभाजितपिण्डप्रथमभागस्य, पितामहपिण्डेनसंयोजनम्- (पञ्चगव्य प्राशन गरी प्रेतपिण्ड देब्रे हातमा लिने)

ततः प्रथमपिण्डभागमादाय (दाहिने हातमा पितृकोठाको पितामहलाई दिएको पिण्ड लिने र देब्रे हातको प्रेतपिण्डको भागलाई विस्तारै माथि बढाउँदै जाने)

ॐ ये समानाः समनसः पितरो यमराज्ये। तेषाल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम्॥ ॐ ये समानाः समनसो जीवा जीवेषुमामकाः। तेषा ँ श्रीर्मयि कल्पतामस्मिंल्लोके शत ँ समाः॥ संसृजन्तु त्वा पृथिवी वायुरग्निः प्रजापतिः। संसृजध्वं च पूर्वैस्त्रिभिश्च पितृभिः सह॥ संगच्छध्वं सं वदध्वं सं वो मनांसि जानताम्। देवा भागं यथा पूर्वे संजानानामुपासते॥ समानो मन्त्रः समितिः समानी समानं मनः सहचित्तमेषाम्। समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि॥ समानी व आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति॥ मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः॥ मधुनक्तमुतोषसो मधुमत् पार्थिव ँ रजः। मधुद्यौरस्तु नः पिता॥ मधुमान्नो व्वनस्पतिर्म्मधुमाँऽअस्तु सूर्य्यः। माध्वीर्गावो भवन्तु नः॥ (पिण्डको बीचमा दही, मह मिसाउने र मिलाउने)

अमुकसगोत्रामुकप्रेता (गोत्रे, प्रेते) अमुकसगोत्रेण स्वपितामहेनामुकशर्मणा वसुस्वरूपेण सहसंसृजस्व। इति पितामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात्। (पितामहको पिण्ड दिएको ठाउँमा राख्ने)

द्वितीयभागस्य प्रपितामहपिण्डेन सह सँयोजनम् – (द्वितीय प्रेतपिण्ड लिने र प्रपितामहलाई दिएको पिण्ड दाहिने हातमा राख्ने)

एवं द्वितीयपिण्डभागमादाय पूर्वोक्तान् सर्वमन्त्रान् पठित्वा- अमुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) अमुकसगोत्रेण स्वप्रपितामहेनामुकशर्म्मणा रूद्रस्वरूपेण संसृजस्व। इति प्रपितामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात्। (दही र मह राखी विस्तारै प्रपितामहको पिण्ड पनि मिलाउने)

तृतीयभागस्य वृद्धप्रपितामहपिण्डेन सहसंयोजनम्- (प्रेतपिण्ड तेस्रो भाग लिने र वृद्धप्रपितामहलाई दिएको पिण्ड लिने)
एवमेव तृतीयपिण्डभागमादाय पूर्वोक्तसर्वमन्त्रान् पठित्वा- अमुकसगोत्रामुकप्रेत (गोत्रे, प्रेते) अमुकसगोत्रेण स्ववृद्धप्रपितामहेनामुमशर्मणा आदित्यस्वरुपेण सहसंसृजस्व । इति वृद्धप्रपितामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् । ततः पिण्डमेलनानन्तरम्- (विस्तारै पिण्ड मिलाउने र राख्ने)
सहगमने तु पित्रेकोद्दिष्टवन्मात्रकोद्दिष्टं सहैव विधाय पित्रर्घपात्रं पितामहार्घपात्रे मेलयित्वा- (स्त्रीहरूको लागि पनि यसै गरी मेलन गर्ने र माथिको विधिअनुसार सबै गर्ने, दाजुभाइको लागि पनि यसै अनुसार गर्ने)

ॐ अद्यामुकसगोत्रायास्मन् मातुरमुकप्रेताया अर्घपात्रोदकम् अमुकसगोत्रस्य स्वभर्तुरर्घपात्रोदकेन संयोजयिष्ये । इति मात्र्यर्घपात्रं गृहीत्वा पूर्वोक्तान् मन्त्रान् पठित्वा पित्रर्घपात्रस्थतृतीयभागजलं गन्धयुक्तपितामहार्घपात्रस्थजले मेलयित्वा अमुकसगोत्रे मातरमुकप्रेते अमुकगोत्रेण स्वभर्त्रा सह सायुज्यं गच्छ । एवं पितृपिण्डसंयोजनानन्तरम्-
ॐ अद्यामुकसगोत्राया मातुरमुकप्रेतायः पिण्डं स्वभर्तुः पिण्डेन संयोजयिष्ये ।
ॐ मातृपिण्डमादाय सर्वत्र मन्त्रपाठान्ते- (माताको लागि यसप्रकार सङ्कल्प गर्ने)
ॐ अमुकसगोत्रे मातरमुकप्रेते अमुकसगोत्रेण स्वभर्त्रामुकशर्मणा संसृजस्वेति वदन् पितृपिण्डप्रथमभागयुक्ते पितामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् । मातृश्राद्धे दक्षिणावाक्यं पृथक् कुर्यात् ।
तत्रैव सव्येन कुशतिलसहितदक्षिणाद्रव्याण्यादाय- (सव्य नै भएर दक्षिणा सङ्कल्प गर्ने)
ॐ अद्यामुकसगोत्राया अस्मन्मातुरमुकदेव्याः कृतैतत्सपिण्डीकरणश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहं उत्सृजे । (माताहरूका लागि क्रमशः पितामही, प्रपितामही, वृद्धप्रपितामही भन्ने)
सहगमनाभावे मातृसपिण्डीकरणे पितामह्यादिपिण्डत्रये मातृपिण्डं संयोजयेत् । मृतमातृको मात्रादिपिण्डत्रये पत्न्याः पिण्डं संयोजयेत् । अमृतमातृकस्तु पितामह्यादिपिण्डत्रये पत्न्याः पिण्डं संयोजयेत् ।

प्रार्थना

(नमस्कार गर्ने)

एष वोऽनुगतःप्रेतः पितृभागमवाप्तवान् । शुभं भवतु शेषाणां जायतां चिरजीविनः ॥
ततः पितृपूर्वकं पितामहादीनुद्दिश्य गन्धपुष्पधूपदीपनैवेद्यादिभिः पिण्डत्रयमर्चयेत् ।
(सव्य भएर आचमन गरी गहुत खाने र अपसव्य हुने)

पुनः पिण्डपूजा

ततो मोटकादिकान्यादाय- (पितृपितामहादिलाई सम्झेर पिण्डमा पूजा गर्ने र सङ्कल्प गर्ने)
ॐ अद्यामुकसगोत्रस्यास्मत्पितुरमुकशर्मणः (वर्मणः गुप्तस्य) सपिण्डीकरणश्राद्धपिण्डे अमुकसगोत्राः पितामह प्रपितामहवृद्धप्रपितामहा अमुकामुकामुकशर्माणो (वर्माणो, गुप्त) वसुरूद्रादित्यस्वरूपा एतानि गन्धपुष्पधूप-दीपनैवेद्यानि युष्मभ्यं स्वधा । (मोटक राख्ने)
इति गन्धादिकमुत्सृजेत् । (केचित्तु प्रेतपिण्डावयवत्रयेण संयोजितांस्त्रीन् पिण्डानिदानींतनमृतमारभ्य पुरुषत्रयाय

पार्वणे पुनरपि नामगोत्राद्युच्चार्य दद्यादित्याहुः)।

ततः पितामहाद्यन्नपात्रेषु क्रमेण प्रत्येकं- (पितामह प्रपितामह वृद्धप्रपितामह ऋषिहरूलाई जल फूल अक्षता चढाउने)

ॐ शिवा आपः सन्तु इति जलम्। ॐ सौमनस्यमस्तु, इति पुष्पम्। ॐ अक्षतं चारिष्टमस्तु, इति तण्डुलान् दद्यात्। (सव्य भएर कर्मपात्रको जलले आफ्नो शिरमा सेचन गर्ने)

ततः सव्यं कृत्वा कर्मपात्रोदकं कुशैः प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत्-

ॐ अस्मत्कुले दीर्घमायुरस्तु। ॐ शान्तिरस्तु। ॐ पुष्टिरस्तु। ॐ वृद्धिरस्तु। ॐ यच्छ्रेयस्तदस्तु। ॐ यत्पापं तत् प्रतिहतमस्तु। इति भूमौ। ॐ द्विपदे चतुष्पदेभ्यः शान्तिर्भवतु।

ततोऽपसव्यं कृत्वा मोटकादिकान्यादाय- (अपसव्य हुने)

अक्षय्योदकदानम् (दुनामा तीर्थजल राखी मोटक लिई सङ्कल्प गर्ने र पिण्डमा चढाउने)

ॐ अद्यामुकसगोत्रस्यास्मत्पितुरमुकशर्मणः (वर्मणः, गुप्तस्य) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्रस्यास्मत्पितामहस्यामुकशर्मणो वसुस्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु।

इति पितामहायाक्षय्योदकं दत्त्वा- (दुनामा जल राखी मोटक लिई सङ्कल्प गर्ने र चढाउने)

ॐ अद्यामुकसगोत्रस्यास्मत्पितुरमुकशर्मणः (वर्मणः, गुप्तस्य) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्रस्यास्मत्प्रपितामहस्यामुकशर्म्मणो रूद्रस्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु।

(दुनामा जल राखी मोटक लिई सङ्कल्प गर्ने र चढाउने)

ॐ अद्यामुकसगोत्रस्यास्मत्पितुरमुकशर्मणः (वर्मणः, गुप्तस्य) सपिण्डीकरणनिमित्तकश्राद्धे अमुकसगोत्रस्यास्मद् वृद्धप्रपितामहस्यामुकशर्मणआदित्यस्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु। (सव्य भएर जलको धारा लगाउने)

इति वृद्धप्रपितामहायाक्षय्योदकं दत्त्वा सव्यं कृत्वा कृताञ्जलिर्दक्षिणां दिशमवलोकयन्- ॐ अघोराः पितरः सन्तु, इति पितामहादिपिण्डत्रयोपरि पूर्वाग्रां जलधारां दद्यात्।

आशिषः प्रार्थना (सव्य नै भएर ब्राह्मणले भन्ने र पछि यजमानले भन्ने र ब्राह्मणले भन्ने)

ततः सव्येनैव प्राङ्मुख आशिषः प्रार्थयेत्-

ॐ गोत्रन्नो वर्धताम्। ॐ वर्धताम्। ॐ दातारो नोऽभिवर्धन्ताम्। ॐ वर्धन्ताम्। ॐ वेदाः वर्धन्ताम्। ॐ वर्धन्ताम्। ॐ सन्ततिर्वर्धताम्। ॐ वर्धताम्। ॐ श्रद्धा च नो माव्यगमत्। ॐ मा गात्। ॐ बहुदेयं च नोऽस्तु। ॐ अस्तु। ॐअन्नं च नो बहु भवेत्। ॐ भवतु। ॐ अतिथींश्च लभेमहि। ॐ लभध्वम्। ॐ याचितारश्च नः सन्तु। ॐ सन्तु। ॐ मा याचिष्म कञ्चन। ॐ मा याचेथा। ॐ एताः सत्याआशिषः सन्तु। ॐ सन्तु।

ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात्। (यजमानलाई गोदान गराएर मात्रै चन्दन लगाइदिने चलन छ।)

पयोधारादानम्

(अपसव्य भएर पिण्डमा दुधको धारा लगाउने)

अपसव्यं कृत्वा पिण्डोपरि सपवित्रकुशानास्तीर्य जलादिसहितंपयः पुटकं वामहस्ते कृत्वा-

ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिश्रुतम्। स्वधास्थ तर्प्पयत मे पितॄन्॥

इति सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात्।

(नम्र भएर पिण्डलाई ढोग्ने र टपरीमा उठाउने र पिण्डको कुश आगोमा हाल्ने)

ततो नम्रीभूय पिण्डानाघ्रायोत्थापयेत्। पिण्डाधारकुशानुल्मुकांश्च वन्हौ क्षिपेत्। सव्येन पिण्डिकायां शंखं चक्रं च संलिख्य- (सव्य भएर शङ्ख चक्र (७४) लेख्ने र पूजा गर्ने, अपसव्य भएर पिण्ड पहिलेकै ठाउँमा राख्ने)

ॐ शङ्खाय नमः। ॐ चक्राय नमः। इति गन्धादिभिः शङ्खचक्रपूजां विधाय अपसव्यं कृत्वा तूष्णीमेव पिण्डान् पिण्डिकोपरि निधाय सव्येन पूजयेदेभिर्मन्त्रैः।

वसन्तपूजा

(सव्य भएर अरूले पनि पूजा गर्ने र कपूर, वत्ती बाल्ने)

ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः। वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः॥
हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च। माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः॥

ततः सव्यनैव विश्वेदेवार्घपात्रं संचाल्य अपसव्येन पितामहाद्यर्घपात्राण्युत्तानीकृत्य दक्षिणां दद्यात्।

(विश्वेदेवा ब्राह्मणपछाडिको दुना चलाउने, अपसव्य हुने र पितृब्राह्मणको अर्घपात्रलाई उत्तानो पार्ने)

दक्षिणादानम्

ततः सव्येन कुशयवजलदक्षिणाद्रव्याण्यादाय – (दक्षिणा सङ्कल्प गर्ने सव्य भएर कुश जल लिई छुने)

ॐ अद्यामुकसगोत्रस्यास्मत् पितुरमुकशर्मणः (वर्मणः, गुप्तस्य) सपिण्डीकरणनिमित्तकामुकसगोत्रपितामह-प्रपितामहवृद्धप्रपितामहामुकामुकामुकशर्मवसुरुद्रादित्यस्वरुपश्राद्धसम्बन्धिनां कालकामविश्वेषां देवानां कृतैत-च्छ्राद्धप्रतिष्ठार्थं हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे। विश्वेदेवश्राद्धं सर्वकर्मापसव्येन दक्षिणादानवर्ज्जितः इति जमदग्निः – (विश्वेदेवा ब्राह्मणलाई दक्षिणा चढाउने)

पित्र्यादिदक्षिणावाक्यं सव्येनैव कुशातिलजलसहितदक्षिणाद्रव्याण्यादाय – (सव्य नै भएर दक्षिणा सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रस्यास्मत् पितुरमुकशर्मणः कृतैतत्सपिण्डीकरणश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे। (प्रेत ब्राह्मणलाई पनि चढाउने)

इति पितृश्राद्धे दक्षिणां दत्त्वा पुनः कुशतिलजलदक्षिणाद्रव्याण्यादाय –

(पुनः पितृ ब्राह्मणहरूलाई दक्षिणा सङ्कल्प गर्ने र राखिदिने)

ॐ अद्यामुकसगोत्रायास्मत् पितुरमुकशर्मणः (वर्मणः गुप्तस्य) कुतैतत् सपिण्डीकरणनिमित्तकश्राद्धे अमुकस गोत्रपितामहप्रपितामहवृद्धप्रपितामहानाममुकामुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणां श्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दक्षिणां दातुमहम् उत्सृजे। इति पितामहादिश्राद्धे दक्षिणां दद्यात्।

विश्वेदेवविसर्जनम्

(विश्वेदेवा ब्राह्मणलाई विसर्जन गर्ने)

ततःसव्येनैव ॐ कालकामविश्वेदेवाः प्रियन्ताम्। इति विश्वेदेवविसर्जनं कृत्वा –

पितृविसर्जनम्

(अपसव्य भएर पितृब्राह्मणहरूलाई विसर्जन गर्ने)

अपसव्येन ॐ स्वस्ति इति पितृविसर्जनं कृत्वा –

ॐ वाजे वाजे वत व्वाजिनो नो धनेषु विप्राऽअमृताऽऋतज्ञाः।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥

इति पितामहादीन् विसर्जयेत्। ततः सव्येन।

प्रार्थना

(सव्य भएर नमस्कार गर्ने र ढोग्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ इति त्रिः संप्रार्थ्य –

दीपाच्छादनम् विष्णोः स्मरणञ्च

(अपसव्य भएर दियो छोप्ने र हात गोडा (पाउ) मा जल छर्कने, सव्य हुने र आचमन गर्ने)

अपसव्येन रक्षोघ्नदीपाच्छादनं विधाय सव्येन हस्तौ पादौ प्रक्षाल्याचम्य विष्णोःस्मरणं कुर्यात्। ततः –

(नमस्कार गर्ने र विष्णु स्मरण गर्ने)

ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च। स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः॥

तत्फलकामो विष्णुस्मरणं कृत्वा श्राद्धीयवस्तूनि ब्राह्मणाय दद्यात्। पिण्डाञ्जले प्रतिपादयेत्।

॥ इति सपिण्डीकरणप्रयोगः॥

अथ गणेशपूजा

(सपिण्डी श्राद्ध सकेपछि गणेश पूजा गर्ने चलन छ)

गणेशंस्थापनम् पूजनञ्च

ॐ गणानान्त्वा गणपति ꣳ हवामहे प्रियाणान्त्वा प्प्रियपति ꣳ हवामहे निधीनान्त्वा निधिपति ꣳ हवामहे वसोमम। आहमजानि गर्भधमा त्वमजासि गर्भधम्॥ इति गणेशं संपूज्य-

प्रार्थना

(नमस्कार गर्ने)

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ। अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा। इति प्रार्थयेत्-

सपिण्डोत्तरपाथेयश्राद्धम्

(सपिण्डीपछि उत्तरपाथेय श्राद्ध गर्ने, दियो र ऋषि थाप्ने)

तच्च सपिण्डीकरणानन्तरं द्वादशेऽन्हि त्रयोदशेऽन्हि वा पुनः पाथेयश्राद्धं कुर्यात् । तच्च पार्वणमेकोद्दिष्टं वा यथाचारेण सिद्धान्नेनामान्नेन वा कुर्यात् । तत्र क्रमः (आचमन गरी दियो वाल्ने, वरिपरि तिल छर्नेर नीवी सिउरिने)

कर्ता स्नातः शुचिराचान्तः पूर्वोपकल्पितप्रज्वालितदीपं स्थापयित्वा गौरसर्षपतिलादिरक्षोघ्नश्राद्धदेशमागत्य पूर्वाभिमुखम् उपविश्य, कर्मपात्रनिर्माणं कुर्यात् । तद्यथा-

कर्मपात्रनिर्माणम्

(माथिको विधिले कर्मपात्र वनाउने र

कर्मपात्रस्थजलेन सेचनम्- कर्मपात्रको जलले वरिपरि सेचन गर्ने)

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा । यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

ॐ पुण्डरीकाक्षः पुनातु, इति श्राद्धदेशे द्रव्याण्यात्मानं च सिञ्चेत् ।

सङ्कल्प

(सङ्कल्प गर्ने)

ततः कुशादिकान्यादाय –

ॐ अद्येहेत्यादि देशकालौ स्मृत्वा अद्यामुकसगोत्रस्य (गोत्रायाः) अस्मत्पितुरमुकशर्मणः (वर्मणः, गुप्तस्य) प्रेतलोकात् पितृलोकगमने सुखसिद्धचर्थं पाथेयश्राद्धं सांवत्सरिकैकोद्दिष्टश्राद्धविधिना अहं करिष्ये । तत्र वाक्ये पाथेयपदप्रक्षेप इति विशेषः । ततः -

प्रार्थना

(नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिः ।

आसनम्

(अपसव्य भई मोटकको आसन ऋषिलाई दिन सङ्कल्प गर्ने)

दक्षिणाभिमुखः पातितवामजानु मोटकादीन्यादाय-

ॐ अद्यामुकसगोत्रस्य (गोत्रायाः) अस्मत्पितुरमुकशर्मणः (वर्मणः गुप्तस्य) पाथेयश्राद्धे इदमासनं ते स्वधा ।

हस्तार्घ

(ब्राह्मण ऋषि अगाडि दुना राख्ने)

ततः पुटके प्रादेशमात्रं पवित्रम्- (पवित्र राख्ने)

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्यरश्मिभिः ॥

दक्षिणाग्रं पवित्रम् धृत्वा-

जलम्

(जल राख्ने)

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तुपीतये । शं योरभिस्रवन्तु नः ॥

तिलान् (तिल राख्ने)

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः । प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् पृणाहि नः स्वाहा ॥

चन्दनम् (चन्दन राख्ने)

ॐ गन्धद्वारां दुराधर्षा नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपहव्ये श्रियम् ॥

पुष्पम् (फूल राख्ने)

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ इति क्षिपेत् ।

ततस्तदर्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं ब्राह्मणकरे - (पुष्प र पवित्र ब्राह्मणमा राख्ने)

ॐ नमो नारायणाय इति मन्त्रेणोत्तराग्रं धृत्वा दक्षिणहस्तेन तन्मुखमाच्छाद्य- (दुना हातले छोप्ने)

ॐ या दिव्याऽआपः पयसा सम्बभूवुर्याऽअन्तरिक्षाऽउत पार्थवीर्याः ।
हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः स ꣳ स्योना सुहवा भवन्तु ॥

इति अर्घपात्रस्थजलमभिमन्त्र्य मोटकादीन्यादाय- (मोटक लिई सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रास्मत्पितर अमुकशर्मन् (वर्मन्, गुप्त) उत्तरपाथेयश्राद्धे एष हस्तार्घस्ते स्वधा । इति पवित्रोपरि अर्घजलं ददुत्सृजेत् । ततः पवित्रसहितमर्घपात्रमासनवामपार्श्वे **पित्रे स्थानमसीति** न्युब्जं कृत्वा तदुपरि कुशत्रयं दद्यात् । (फूल, पवित्र दुनामै राखी दुना ब्राह्मणको पछाडि घोप्ट्याउने)

ब्राह्मणपूजा (ब्राह्मण पूजा गर्ने र धूप, बत्ती, नैवेद्य अर्पण गरी मोटक लिई सङ्कल्प गर्ने)

ततो गन्धादिना सम्पूज्य मोटकादीन्यादाय-

ॐ अद्यामुकसगोत्र अस्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) उत्तरपाथेयश्राद्धे एतानि गन्धपुष्पाक्षतधूपदीपपूगीफल-द्रव्यवासांसि ते स्वधा । इति गन्धादिकमुत्सृजेत् । तत आसनसहितस्यान्नपात्रस्य चतुर्दिक्षु चतुरस्रं मण्डलं विधाय श्राद्धीयान्नाग्रभागं तिलघृतमधुजलयुतमादाय मोटकादीन्यादाय- (चतुष्कोण बनाई मह छर्की मोटक लिई सिदामा छुने)

भूस्वामी (एक भाग सिदा राख्ने)

इदमन्नं सजलमेतद्भूस्वामिपितृभ्यो नमः । इति उत्सृजेत्-

अन्नसङ्कल्प (अर्को भाग सिदा राख्ने र दुबै हातले ढाक्ने)

ततो व्यञ्जनसहिततिलघृतमधुजलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्न-पात्रमालभ्य - ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपा ꣳ सुरे । ॐ अपहताऽअसुरा रक्षा ꣳ सिव्वेदिषदः । तिलानन्नोपरि-क्षिप्त्वा- ॐइदमन्नम्, ॐ इमा आपः, ॐ इदमाज्यम्, ॐ इदं हविः । पुनरन्ने एतान्युपकरणानीति क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुठं निवेश्य – (बूढी औँलाले सिदालाई देखाउने)

मोटकादीन्यादाय वामहस्ताङ्गुलिभिः क्रमेणान्नपश्च स्पृष्ट्वा- (मोटक लिई सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रायास्मत्पित्रेऽमुकशर्मणे (वर्मणे, गुप्ताय) इदमन्नं सजलं सोपस्करं ते स्वधा। इति उत्सृजेत्

प्रार्थना ततः सव्यं कृत्वा- (सव्य भएर नमस्कार गर्ने)

ॐ मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः॥ ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः। मधुद्यौरस्तु नः पिता॥ ॐ मधुमान्नोव्वनस्पतिर्म्मधुमाँऽअस्तुसूर्य्यः। माध्वीर्गावो भवन्तु नः॥ ॐ मधु ३।

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत्। तत्सर्वमछिद्रमस्तु भास्करस्य प्रसादतः॥

ततोऽन्नपात्रसमीपे दक्षिणस्यां भूमौ कुशानास्तीर्य विकिरासनं दद्यात्। अपसव्येन।

विकिरासनम् (अपसव्य भई विकरको लागि कुश ओछ्याई फूल, मोटक राख्ने)

मोटकादीन्यादाय- असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्। उच्छिष्टभागधेयानां दर्भेषु विकिरासनम्॥

विकिरदानम् (दुनामा तिल, घ्यू, मह, जल, चामल राखी मोटक लिई हातमा लिने र ओछ्याएको

सतिलघृतमधुजलयुतमन्नमादाय जलेनाप्लाव्य मोटकादीन्यादाय- कुशमाथि घोप्ट्याई औंठी राखिदिने)

अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥ इति उत्सृजेत्।

कुशान् परित्यज्य सव्येन हस्तौ पादौ प्रक्षाल्याचम्य विष्णुं स्मरेत्- (सव्य भएर हात पाउ धोई विष्णु स्मरण गर्ने)

ॐ मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः॥
मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳ रजः। मधुद्यौरस्तु नः पिता॥
मधुमान्नो व्वनस्पतिर्म्मधुमाँऽअस्तुसूर्य्यः। माध्वीर्गावो भवन्तु नः॥ गायत्रीं स्मरेत्- (गायत्री मन्त्र जप्ने)

पिण्डवेदिनिर्माणम् संस्कारश्च (अपसव्य भएर पिण्ड दिन वेदी निर्माण गर्ने)

ततोऽपसव्येन अन्नपात्रसमीपे पिण्डदानार्थं मृत्पिण्डिकां विधाय तत्र दर्भपिञ्जुलीं गृहीत्वा- (कुशले रेखा कोर्ने)

ॐ अपहताऽअसुरा रक्षा ꣳ सिव्वेदिषदः। इति दक्षिणाग्रां रेखां कृत्वा उत्तरस्यां क्षिपेत्।

ततो रेखोपरि (वेदीमा आगो घुमाउने)

ॐ ये रुपाणि प्रतिमुञ्चमानाऽअसुराः सन्तः स्वधया चरन्ति। परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लो कात्प्रणुदात्यस्मात्। इति अङ्गारं भ्रामयित्वा दक्षिणस्यां क्षिपेत्।

ततो वेदिकायां छिन्नमूलकुशानास्तीर्य सव्येन- (सव्य भएर नमस्कार गर्ने र फूल ओछ्याउने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ इति त्रिः।

अवनेजनम् (अपसव्य भएर दुनामा जल राखी मोटक लिई सङ्कल्प गर्ने)

अपसव्यं कृत्वा मोटकादीन्यादाय- ॐ अद्यामुकसगोत्रास्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) उत्तरपाथेयश्राद्धे पिण्डस्थाने इदमवनेजनं ते स्वधा। इति कुशोपरि आसनं दद्यात्॥ (मोटक वेदीमाथि राख्ने)

पिण्डदानम्

(पिण्ड बनाई जल, तिल, मोटकसहित लिने र वेदीमा राख्ने)

ततस्तिलघृतमधुयुक्तेनान्नेन पिण्डं निर्माय जलतिलमोटकसहितपिण्डमादाय-

ॐ अद्यामुकगोत्राऽस्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) उत्तरपाथेयश्राद्धे एष पिण्डोऽमृतस्वरुपोऽक्षय्यतृप्तिहेतोस्ते स्वधा। इति अवनेजनोपरि पिण्डं दद्यात्। आस्तृतकुशमूलेन लेपभागभुजस्तृप्यन्तु। (कुशले हात पुछ्ने)

इति करं प्रोक्ष्य सव्यं कृत्वाऽऽचम्य गन्धपुष्पादीन्यादाय पितरमुद्दिश्य- (सव्य भई आचमन गर्ने)

पितृध्यानम्

(चन्दन फूल लिने र पितृ सम्झने)

ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्। उत्तराभिमुखो भूत्वा स्वासं नियम्य भास्करमूर्तिं पितरं ध्यायन् अपसव्यं कृत्वा तेनैव परावर्तमान- (अपसव्य भएर चन्दन फूल पिण्डमा चढाउने)

ॐ अमीमदन्तपितरो यथाभागमावृषायिषत ॥ इति पुष्पादीनि पिण्डे निःक्षिपेत्।

प्रत्यवनेजनम्

(दुनामा जल राख्ने)

ततो मोटकादीन्यादाय- (मोटक लिई सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्राऽस्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) उत्तरपाथेयश्राद्धपिण्डे इदं प्रत्येवनेजनं ते स्वधा। इति प्रत्यवनेजनं पिण्डोपरि दद्यात्। ततो **नीवीं विस्रंस्य** सव्यं कृत्वाऽऽचम्यापसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय-

सूत्रदानम्

(नीवी खसाली सव्य भएर आचमन गर्ने, अपसव्य हुने र धागो पहेलो बनाई पिण्डमा चढाउने)

ॐ नमो वः पितरो रसाय नमोवः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्न्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरोदेष्मैतद्वः पितरो वासः ॥

पिण्डपूजनम्

(जनै, सुपारी, कपडासहित पिण्ड पूजा गर्ने र मोटक लिई सङ्कल्प गर्ने)

गन्धपुष्पादिभिः पिण्डं सम्पूज्य धूपदीपौ च कारयेत्। ततो मोटकादीन्यादाय-

ॐ अद्यामुकसगोत्रास्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) उत्तरपाथेयश्राद्धपिण्डे एतानि सूत्रगन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानि ते स्वधा। इति गन्धादिकमुत्सृजेत्। ततः - (ब्राह्मणमा जल, फूल अक्षता चढाउने)

ॐ शिवा आपः सन्तु, इति जलम्। ॐ सौमनस्यमस्तु, इति पुष्पम्। ॐ अक्षतञ्चारिष्टमस्तु, इति तण्डुलान्। अन्नपात्रोपरि क्षिपेत्।

अभिषेचनम्

(सव्य भएर आफ्नो शिरमा जल सेचन गर्ने)

सव्यं कृत्वा कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत्-

ॐ अस्मत्कुले दीर्घमायुरस्तु। ॐ शान्तिरस्तु। ॐ पुष्टिरस्तु। ॐ वृद्धिरस्तु। ॐ यच्छ्रेयस्तदस्तु। ॐ यत्पापं तत्प्रतिहतमस्तु। इतिं भूमौ। ॐ द्विपदे चतुष्पदेभ्यः शान्तिर्भवतु।

अक्षय्योदकदानम्

(दुनामा जल राख्ने र अपसव्य भएर मोटक लिई सङ्कल्प गर्ने)

ततोऽपसव्येन मोटकादीन्यादाय- ॐ अद्यामुकसगोत्रस्याऽस्मत्पितुरमुकशर्मण (वर्मणः गुप्तस्य) उत्तरपाथेयश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु। इति अक्षय्योदकं दत्त्वा सव्यं कृत्वा दक्षिणां दिशं पश्यन्- अघोरः पिताऽस्तु। इति पूर्वाग्रां जलधारां दद्यात्-

(जल धारा पिण्डमा लगाउने)

आशिषः प्रार्थना

(सव्य नै भएर ब्राह्मणले र पछि यजमानले भन्ने अनि फेरि ब्राह्मणले भन्ने)

ततः सव्येनैव प्राङ्मुखो भूत्वाऽऽशिषः प्रार्थयेत्-

ॐ गोत्रन्नो वर्धताम्। ॐ वर्द्धताम्, प्रतिवचनम्। ॐ दातारो नोऽभिवर्द्धन्ताम्। ॐ वर्द्धन्ताम्, प्रतिवचनम्। ॐ वेदाः वर्धताम्। सन्तु, प्रतिवचनम्। ॐ सन्तति वर्धताम्। श्रद्धा च नो माव्यगमत्। मागात् प्रतिवचनम्। ॐ वहुदेयं च नोऽस्तु। ॐ वर्धताम्। ॐ अस्तु प्रतिवचनम्। ॐ अन्नं च नो बहु भवेत्। ॐ भवतु। ॐ अतिथींश्च लभेमहि। ॐ लभध्वम्। ॐ याचितारश्च नः सन्तु। ॐ सन्तु, प्रतिवचनम्। ॐ मा याचिष्म कञ्चन। ॐ मा याचेथा, प्रतिवचनम्। ॐ एताः सत्याआशिषः सन्तु। ॐ सन्तु, प्रतिवचनम्। ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात्। (यजमानलाई चन्दन लगाइदिने)

पयोधारादानम्

(अपसव्य भएर पिण्डमा दुधको धारा लगाउने)

ततोअपसव्यं कृत्वा पिण्डोपरि सपवित्रान् कुशानास्तीर्य जलादिसहितं पुटकं वामहस्ते कृत्वा- ॐ ऊर्ज्जं वहन्तीरमृत घृतम्पयः कीलालम्परिस्रुतम्। स्वधास्थ तर्पयत मे पितॄन्॥ इति दक्षिणाग्रां पयोधारां पिण्डोपरि दद्यात्।

आघ्राणपूर्वकं पिण्डमुत्थापनम्

(नम्र भएर पिण्ड ढोग्ने, पितृ सम्झने र पिण्ड उठाउने)

ततो नम्रीभूय पिण्डमाघ्रायोत्थापयेत्। पिण्डाधारकुशानुल्मुकं च वन्हौ क्षिपेत्। (पिण्डमा ओछ्याएको कुश आगोमा हाल्ने)

शङ्खचक्रपूजनम्

(सव्य भएर वेदीमा शङ्ख चक्र (७४) लेख्ने र पूजा गर्ने)

ततः सव्येन पिण्डिकायां शङ्खं चक्रं च लिखेत्।

ॐ शङ्खाय नमः ॐ चक्राय नम :। ॐ शङ्खचक्राभ्यां नमः।

(अपसव्य हुने र घोप्ट्याएको दुनाको पवित्र, फूल पिण्डमा चढाउने)

इति यवैः शङ्खचक्रपूजां विधाय अपसव्यं कृत्वा तूष्णीमेव पिण्डं पिण्डिकोपरि निधाय सव्येन।

वसन्तादिपूजा

(सव्य भएर अरूले पनि पूजा गर्ने)

ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः। वर्षाभ्यश्य शरत्संज्ञऋतवे च नमो नमः॥

हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च। माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः॥ इति पूजयेत् ततो अपसव्येनार्घपात्रमुत्तानीकृत्य सव्येन दक्षिणाद्रव्यं कुशादिकमादाय - (अपसव्य भएर दुना उत्तानो पार्ने र सव्य हुने)

दक्षिणादानम्

(दक्षिणा सङ्कल्प गर्ने र ऋषिमा चढाउने)

ॐ अद्यामुकसगोत्रस्यास्मत्पितुरमुकशर्मणः कृतैतदुत्तरपाथेयश्राद्धप्रतिष्ठार्थं इदं रजतं चन्द्रैवतं तन्निष्कयद्रव्यं वा यथानामदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे । इति दक्षिणां दद्यात् ।

पितृविसर्जनम्

(अपसव्य हुने र पितृ विसर्जन गर्ने)

ततोऽपसव्येन -

ॐ वाजे वाजे व्वत व्वाजिनो धनेषु विप्राऽअमृताऽऋतज्ञाऽ अस्य मद्ध्वः पिबत मादयध्वं तृप्ता यातपथिभिर्देवयानैः । इति पितृविर्सनम् । ततः सव्येन -

प्रार्थना

(सव्य भएर तीन पटक नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

इति त्रिः । अपसव्येन दीपाच्छादनं विधाय सव्येन हस्तौ पादौ प्रक्षाल्याऽऽचम्य -

(अपसव्य भएर दियो छोप्ने, सव्य हुने, हातपाउ धुने र आचमन गर्ने)

विष्णोःस्मरणम्

(विष्णुको स्मरण गर्ने)

ॐ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु च । स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

ॐ विष्णुः विष्णुः विष्णु । श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत् ।

॥ इत्युत्तरपाथेयश्राद्धं सम्पूर्णम् ॥

पददानविधिः

(पददान गर्ने)

छत्रोपानहवस्त्राणि मुद्रिका च कमण्डलुः । आसनं पञ्चपात्राणि पदं पञ्चविधं स्मृतम् ॥
दण्डेन ताम्रपात्रेण ध्यामान्नैर्भोजनैरपि । अर्थ यक्षोपवीतैश्च पदं संपूर्णतां व्रजेत् ॥

पदपूजा

छाता, जुत्ता, वस्त्र, औंठी, कमण्डलु, आसनी, पञ्चपात्र, लठ्ठी, ताम्रपात्र (तामाको भाँडो), सिदा, भोजन सामग्री, जनै, दक्षिणा आदि पददानका सामग्रीहरू पूजा गर्ने)

छत्रादि समस्तवस्तुभ्यो नमः ।

पददान सङ्कल्प

(संकल्प गर्ने र ब्राह्मणहरूलाई बाँडिदिने)

ॐ अद्य... गोत्र शर्मा, वर्मा, गुप्तोऽहम् ...शर्माणः (वर्मणः, गुप्तस्य) (...देव्याः) द्वादशाहे दिवंगतजीवस्य यममार्ग्रे अक्षयसुख प्राप्त्यार्थं शास्त्रोक्ताफलप्राप्त्यर्थं साङ्गताद्रव्यसहितानि त्रयोदशपदानि तत् तत् दैवतानि नानानामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दातुमुत्सृज्ये ।

पृथक् पृथक् नामोच्चारण सङ्कल्प

(पृथक् पृथक् नाम उच्चारण गरेर गरुड भन्ने पण्डितलाई दिने पनि चलन छ)

ॐ अद्य... गोत्र शर्मा (वर्मा, गुप्तोऽहम्) ...शर्माणः (वर्मणः, गुप्तस्य) (...देव्याः) द्वादशाहे दिवंगतजीवस्य यममार्ग्रे अक्षयसुख प्राप्त्यार्थं यम पथि वहु धर्म जन्यातपादि दुःख निवारणार्थ पददानान्तर्गतम् इदं छत्रं उत्तानाङ्गिरो दैवताम्,

सन्तप्तवालुका सिकण्टकादिजन्य दुःखनिवारणार्थं इमे उपानहो उत्तनाङ्गिरो दैवते, लज्जा निवारणार्थं यदम् वस्त्रम् वृहस्पति दैवतम्, यमदूतानां भयनिवारणार्थं, इमां सुवर्णमुद्रिका वन्हि दैवतम्, तृषादि दुःख निवारणार्थं, इदं कमण्डलु स्थितम् जलं वरुण दैवतम् कमण्डलुम् विश्वकर्म दैवतम्, दुर्वलं दुःख निवारणार्थं, इमां यष्ठिम् उत्तानाङ्गिरो दैवतम्, तृषादि दुःख निवारणार्थं, पञ्चपात्रस्य जलं वरुण दैवतम्, पञ्चपात्रं विश्वकर्म दैवतम्, आसनम्, उत्तानाङ्गिरो दैवतं क्षुदादि दुःख निवारणार्थं आमानं प्रक्षापति दैवतम्, सिद्धानं प्रजापति दैवतम् पक्वान्न प्रजापति दैवत् ताम्रपात्रं विश्वकर्म दैवतम्, यज्ञोपवीतं ब्रह्मा दैवतम्, रोप्य द्रव्य प्रचलित द्रव्यं, वनस्पति वा सरस्वती दैवतं ... गोत्राय ... शर्मणे ब्राह्मणाय सुपूजिताय पददानत्वेन तुभ्य महं संप्रददे। दानप्रतिष्ठा (दानप्रतिष्ठा गर्ने)

गरुड पुराणपूजा

(गरुडपुराण पूजा गर्ने)

दक्षिणा सङ्कल्प

(गरुडपुराण भन्ने पण्डितलाई सिदा, वस्त्र दक्षिणा दिने सङ्कल्प)

कुशादीकमादाय – अद्य ...गोत्र शर्मा (वर्मा, गुप्तोऽहम) ...गोत्रस्य (गोत्रायाः) शर्मणः (वर्मणः गुप्तस्य) (देव्याः) द्वादशाहे गरुडपुराण श्रवणजन्मण्डलप्राप्त्यर्थं श्रुतस्य गरुडपुराणपारायणस्य साङ्गतासिद्यर्थामिमां वस्त्रादियुतां दक्षिणा ...गोत्राय वाचकाय ...शर्मणे ब्राह्मणाय भवते सम्प्रददे।

प्रार्थना

(फूल लिएर नमस्कार गर्ने र ढोग्ने)

यत्यादयङ्गजस्मरणाद् यस्य नामजपादपि। न्यूनं कर्म भवेत् पूर्णं तं वन्दे साम्वमीश्वरम्॥
अनादिनिधनो देवः शङ्खचक्रगदाधरः अक्षय्य पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव॥

हवनम्

(ॐ नमो भगवते वासुदेवाय स्वाहा भनेर गरुडपुराणको १०८ हवन गर्ने चलन पनि छ)

मासिकश्राद्धविधिः

(जल, कुम्भ, ऋषि र दियो थापेर गोदान गरी दियो वाली पूजा गर्ने)

गोमयोपलिप्तायां भूमौ दीपं प्रज्वाल्य कर्ता शुचिराचान्तः प्राङ्मुख उपविश्य प्रायश्चित्तगोदानं कुर्यात्। ॐ ब्राह्मणाय नमः। इति ब्राह्मणं त्रिः संपूज्य गोदानं कृत्वा दीपं सम्पूज्य च ब्राह्मणं निमन्त्रयेत्।

ब्राह्मणनिमन्त्रणम् अपसव्येन

(अपसव्य भई ऋषि निमन्त्रणा गर्ने)

तद्यथा - ॐ अद्यामुकसगोत्रस्य (गोत्रायाः) अस्मत्पितुरमुकशर्मणः (वर्मणः, गुप्तस्य) अद्य कर्तव्यामुकमासिकश्राद्धे अनेन ताम्बूलगन्धपुष्पाक्षतेन त्वं मया निमन्त्रितः। ॐ निमन्त्रितोऽस्मि। इति प्रतिवचनम्।

प्रार्थना

(नमस्कार गर्ने)

ॐ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः। भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा॥
सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः। भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि॥ इति। ततः

ब्राह्मणचरणप्रक्षालनम् (पादार्घ)

(ऋषि अगाडि दुना राखी जल र फूल राख्ने)

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥

(ऋषिलाई जल सेचन गर्ने)

यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे । तत्फलं पाण्डव श्रेष्ठ विप्राणां पादशौचने ॥

ततः पाद्यपात्रं वामहस्ते कृत्वा मोटकादिकमादाय -

(दुनामा मोटक जल लिने र ऋषिमा छोडिदिने)

ॐ अद्यामुकसगोत्रास्मत्पितरमुकशर्मन्नेष पादार्घस्ते स्वधा । सव्येनाचम्य गृहं प्रवेशयेत् ।

(सव्य भई आचमन गर्ने र अपसव्य भई ऋषिको स्वागत गर्ने)

अपसव्येन- ॐ आगता यूयं । ॐ सुस्वागता वयं । ॐ इदमासनमास्यताम् । ॐ आस्यते ।
इति प्रतिवचनम् । इति ब्राह्मणमुदङ्मुखमुपवेशयेत् । ॐ कर्मपात्रमहं करिष्ये । ॐ कुरुष्व प्रतिवचनम् ।

कर्मपात्रनिर्माणम्

(सव्य भई माथिको विधिअनुसार कर्मपात्र निर्माण गर्ने)

सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय -

(जलले सेचन गर्ने)

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥
ॐ पुण्डरीकाक्षःपुनातु । इति श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत् ।

प्रतिज्ञासङ्कल्पः

(कुश जल लिने)

तत्कुशादिकमादाय -

ॐ अद्येत्यादिपूर्वसङ्कल्पसिद्धिरस्तु अमुकमासिकसान्नोदककुम्भोपस्थितिस्वर्गताऽश्वमेधयज्ञ जन्यसमफलप्राप्ति-कामोऽमुकसगोत्रस्यास्मत्पितुरमुकशर्मणः (वर्मणः, गुप्तस्य) सान्नोदककुम्भोत्सर्गान्न सङ्कल्पादिकामुकमासिक-श्राद्धमेभिर्द्रव्यैरहं करिष्ये । इति प्रतिज्ञां कृत्वा -

(नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिः ।

आसनम्

(अपसव्य भई कुश, जल लिने र ऋषिमा राखिदिने)

ततोऽपसव्यं कृत्वा दक्षिणाभिमुखो भूत्वा सान्नोदकमुम्भमग्रतः कृत्वा कुशादीन्यादाय -
ॐ अद्यामुकसगोत्रस्यास्मत्पितु (मातुः) अमुकशर्मणोऽमुकमासिकश्राद्धे इदमासनं तुभ्यं स्वधा ।
इति कुम्भासनसमीपे समुत्सृजेत् ।

ब्राह्मणपूजा

(घडा पूजा गरेर ब्राह्मण पूजा गर्ने र मोटक जल लिने)

ततो गन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यद्रव्यवस्त्रादिभिः ब्राह्मणं कुम्भं च सम्पूज्य मोटकादिकमादाय -
ॐ अद्यामुकसगोत्रास्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) एतानि गन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यताम्बूल-वस्त्रद्रव्यपूगीफल-यज्ञोपवीतादीनि तुभ्यं स्वधा । इति कुम्भसमीपे समुत्सृजेत् ।

ब्राह्मणायतिलकदानम्

(ब्राह्मणलाई तिलक, चन्दन लगाइदिने)

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् ॥ इति ब्राह्मणय तिलकं कुर्यात् ।

कुम्भदानम्

(सर्वतघडा दान गर्न मोटक जल लिई छुने)

ततो मोटकादिकमादाय सान्नोदककुम्भं स्पृशेत् -

ॐ अद्यामुकसगोत्रायास्मत्पित्रे (मात्रे) अमुकशर्मणे (वर्मणे, गुप्ताय) अयं सान्नोदककुम्भस्तुभ्यं स्वधा । इति ब्राह्मणकरे कुम्भमुत्सृजेत् ।

भूस्वामी

(एक भाग सिदा राख्ने)

तिलघृतमधुजलयुतमन्नं मोटकादिसहितमादाय-

(मोटक जल लिई छुने)

ॐ इदमन्नं सजलमेतद्भूस्वामिपितृभ्यो नमः ।

अन्नसङ्कल्पः

(अर्को भाग सिदा राख्ने र दुवै हातले ढाक्ने)

सोपस्करतिलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य-

ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृतेऽअमृतं जुहोमि स्वाहा ।
ॐ इदंविष्णुर्विचक्रमे त्रेधानिदधे पदम् । समूढमस्यपा ꣳ सुरे स्वाहा ॥
ॐ इदमन्नम् । इमा आपः । इदमाज्यम् । इदं हविः । एतान्युपकरणानि ।

अन्नजलादिषु विप्रदक्षिणाङ्गुष्ठं निवेश्य -

(बूढी औंलाले सिदा देखाउने र तिल छर्कने)

ॐ अपहताअसुरारक्षा ꣳसि वेदिषदः । इत्यन्नोपरि तिलान् विकीर्य ।

मोटकादिकमादाय -

(मोटक जल लिने र सिदामा छोड्ने)

ॐ अद्यामुकसगोत्रायास्मत्पित्रे (मात्रे) अमुकशर्मणे (वर्मणे, गुप्ताय) इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणमक्षय्यतृप्तिहेतोस्ते स्वधा । इत्यन्नमुत्सृजेत् । ॐ अन्नसङ्कल्पसिद्धिरस्तु, भवान् प्राशयतु । इति अपोशानं दत्त्वा । सव्येनाञ्जलिं बध्वा -

(ब्राह्मणलाई जल चढाउने)

प्रार्थना

(सव्य भई नमस्कार गर्ने)

सप्तव्याधादशार्णेषु मृगाः कालञ्जरे गिरौ । चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः । प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥
ॐ मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसोमधुमत्पार्थिव ꣳ रजः । मधुद्यौरस्तुनः पिता । मधुमान्नोवनस्पतिर्म्मधुमाँऽअस्तु सूर्य्यः । माध्वीर्गावोभवन्तुनः ॥
ॐ मधु ३ । अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥
नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥

जलपुष्पादिदानम्

ततोऽपसव्येन ब्राह्मणकरे – (अपसव्य हुने र ब्राह्मणलाई जल फूल अक्षता चढाउने)

ॐ शिवा आपः सन्तु, इति जलम्। ॐ सौमनस्यमस्तु, इति पुष्पम्। ॐ अक्षतं चारिष्टमस्तु, इति तण्डुलान् दद्यात्। सव्यं कृत्वा पूर्वाभिमुखः –

अञ्जलिबद्ध्वा प्रार्थयेत् (सव्य भई नमस्कार गर्ने)

ॐ अपां मध्ये स्थिता देवाः सर्वमप्सुप्रतिष्ठितम्। ब्राह्मणस्य करे न्यस्ता शिवा आपो भवन्तु मे ॥
लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे। लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे ॥
अक्षतञ्चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा। यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥

ततः कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत् - (कर्मपात्रको जलले शिरमा सेचन गर्ने)

ॐ अस्मत्कुले दीर्घमायुरस्तु। ॐ शान्तिरस्तु। ॐ पुष्टिरस्तु। ॐ वृद्धिरस्तु। ॐ यच्छ्रेयस्तदस्तु। ॐ यत्पापं तत्प्रतिहतमस्तु। इति भूमौ।

ॐ द्विपदे चतुष्पदेभ्यः शान्तिर्भवतु। ॐ यं कामं कामयते सोऽस्मै कामः समृद्धचताम्।

इति ब्राह्मण हस्तेन तिलकं कृत्वा ततो दक्षिणां दद्यात्। (ब्राह्मणले चन्दन लगाइदिने)

दक्षिणादानम् तिलकुशयवजलद्रव्यमादाय - (दक्षिणा सङ्कल्प गर्ने र दिने)

ॐ अद्यामुकसगोत्रस्यास्मत्पितु (मातु) अमुकशर्मणः (वर्मणः, गुप्तस्य) कृतैतत्सान्नोदककुम्भोत्सर्गान्निसङ्कल्पादि करुपममुकमासिक श्राद्धप्रतिष्ठा सांगतासिध्यर्थीमिमां दक्षिणां रजतं चन्द्रदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं सम्प्रददे। ॐ स्वस्तिप्रतिवचनम्। ततोऽपसव्येन **दीपाच्छादनं विधाय**।

(अपसव्य हुने र दियो छोप्ने)

सव्येन हस्तौ पादौ प्रक्षाल्याऽऽचम्य - (सव्य हुने, हातपाउ धुने र आचमन गर्ने)

ॐ यत्कृतं तत्सुकृतमस्तु यन्न कृतं तद्विष्णोः प्रसादाद् ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु ॥ ॐ अस्तु परिपूर्णम्।

विष्णोः स्मरणम् कर्मसमर्पणञ्च (विष्णु सम्झने)

ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ ततः विष्णुस्मरणम्।

ब्राह्मणविसर्जनम्। स्वस्ति, (ब्राह्मण विसर्जन गरी औठी लिई पानी समाउने र छोडिदिने)

कायेन वाचा मनसेन्द्रियैर्वा बुद्धचात्मना वा प्रकृतिः स्वभावात् ॥
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयेतत् ॥

ततो मन्त्राशिषं गृहीत्वा ब्राह्मणान् भोजयेत्।

॥ इति मासिकश्राद्धविधिः ॥

अस्थिक्षेपविधिः

(अस्तुलाई सेलाउन तयार हुने)

प्रेतस्थाने बलिं दत्त्वा क्षीरेणाभ्युक्ष्य वाग्यतः । प्रेतस्यास्थीनि गृह्वीयात् प्रधानाङ्गाद्भवानि च ॥
पञ्चगव्येन संस्नाप्य क्षौमवस्त्रेण वेष्टयेत् । प्रक्षिप्य मृण्मये भाण्डे नवे साच्छादने शुभे ॥
अरण्ये वृक्षमूले वा शुद्धे संस्थापयेदथ । सूक्ष्मान्यस्थीनि तद्भस्म नीत्वा तोये विनिक्षिपेत् ॥
ततः संमार्जनं भूमौ कर्तव्यं गोमयाम्बुभिः । पूजां च पुष्पधूपाद्यैर्बलिभिः पूर्ववच्चरेत् ॥
तत्स्थानाच्छनकैर्नीत्वा तीर्थे वा जाह्नवीजले । कश्चिच्च प्रक्षिपेत्पुत्रो दौहित्रो वा सहोदरः ॥
मातुःकुलं पितृकुलं वर्जयित्वा नराधमम् । अस्थीन्यन्यकुलस्थस्य नीत्वा चान्द्रायणं चरेत् ॥
सवेष्ठनास्थिसमुच्चययुतं ताम्रसंपुटमादाय तीर्थं गच्छेत् ।

तत्र नियमाः - (आचमन गर्ने)

मूत्रपुरीषोत्सर्गकाले आचमनकाले च नास्थीनि धारयेत् । शूद्रजातिकान् न स्पृशेदिति ।

अस्थिक्षेपप्रयोगः

(अपसव्य भएर अस्तु सेलाई सव्य भएर नुहाउने)


ततस्तीर्थं प्राप्य तीर्थप्राप्तिनिमित्तकं स्नानादिविधायास्थीनि स्नापयित्वा,

सङ्कल्पः

(सङ्कल्प गर्ने)

अद्येह अमुकगोत्रस्य (गोत्रायाः) अमुकशर्मणो (वर्मणो, गुप्तायाः) ब्रह्मलोकादिप्राप्तये अमुकतीर्थेऽस्थिप्रक्षेपमहं करिष्ये । इति सङ्कल्प्य पलाशपर्णपुटे पञ्चगव्येनास्थीन्यासिच्य हिरण्यशकलमाल्यघृतिलमिश्रिता- स्थीनि मृत्पिण्डे निधाय दक्षिणां दिशमवेक्षमाणो नमोऽस्तु धर्मायेति वदन् तीर्थे प्रविश्य नाभिमात्रजले स्थित्वा स मे प्रीतोऽस्तु । इति तीर्थे क्षिपेत् ।

ततः स्नात्वा जलाद्बहिरागत्य सूर्यं दृष्ट्वा हरिं स्मृत्वा विप्राय यथाशक्ति रजतं दक्षिणां दद्यात् ।



दक्षिणादानम् तत्र सङ्कल्पः

(दक्षिणा सङ्कल्प गर्ने)

अमुकस्यास्थिक्षेपः कृतस्तत्साङ्गता सिद्धयर्थं रजतमिदं तुभ्यं सम्प्रददे ।

॥ इत्यस्थिक्षेपप्रकारः ॥

तर्पणविधिः

प्रतिज्ञासङ्कल्पः (कर्मपात्र बनाई माथिको विधिले गोदान गर्ने र पञ्चामृत मिसाई तर्पण दिने जलमा सङ्कल्प गरी तर्पण दिने भाँडोमा त्रिकोण लेखेर पूजा गर्ने)

कुशातिलजलान्यादाय - (महालय श्राद्ध भए यो सङ्कल्प भन्ने)

हरि ॐ तत्सत् ३ ॐ विष्णुः ३ अद्येहेत्यादि पूर्वसङ्कल्पमुच्चार्य अमुकगोत्रः अमुकप्रवरः अमुकशाखाध्यायी अमुकशर्माहं (वर्माहं, गुप्तोऽहं) अमुकसगोत्राणामस्मत्पितृपितामह प्रपितामहानामुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानांवसुरुद्रादित्यस्वरूपाणां तथा च अमुक सगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरूद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धाङ्गत्वेन श्रीमत्परमेश्वरप्रीतये देवर्षीणां मनुष्याणां दिव्यपितृणां स्वपितृणां च तर्पणमहं करिष्ये ॥ आवां करिष्यावहे, वयं करिष्यामहे)

(एकोद्दिष्ट या अरू कुनै श्राद्धको तर्पण भए यो सङ्कल्प भन्ने)

अमुक गोत्रस्य (गोत्रायाः) अस्मत्पितुः (मातुः) अमुकशर्मणो (वर्माणो, गुप्तायाः) (अमुकनाम्नी देव्याः) वसुस्वरूपस्य (वसुस्वरूपायाः) नित्यतर्पणाङ्गत्वेन (एकोद्दिष्टश्राद्धङ्गत्वेन, एकपार्वणश्राद्धाङ्गत्वेन) श्रीमत्परमेश्वरप्रीतये देवर्षीणां मनुष्याणां दिव्यपितृणां स्वपितृणां च तर्पणमहं करिष्ये ॥ ॥ इति सङ्कल्प्य ॥

देवर्षितर्पणम् (तर्पण गर्ने भाँडोमा त्रिकोण लेखी पूजा गरी माझी औंलातर्फबाट तर्पण गर्ने)

उपवीति प्राङ्मुखः कुशपाणिर्देवतीर्थवर्तिना यवकुशोदकेन विश्वान् देवानावाह्य तर्पयेत्।

ॐ विश्वेदेवासऽआगत शृणुतामऽइम ꣳ हवम्। एदं बर्हिर्निषीदत। ॐ विश्वेदेवाः शृणुतेम ꣳ हवम्मे येऽअन्तरिक्षे यऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवा यजत्राऽआसद्यास्मिन् बर्हिषि मादयध्वम् ॥

इति मन्त्रद्वयं पठित्वा -

ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इहागच्छन्तु इहतिष्ठन्तु गृह्णन्त्वेताञ्जलाञ्जलीन्। (तर्पण दिइरहने)

ॐ ब्रह्मा तृप्यताम्। ॐ विष्णुस्तृप्यताम्। ॐ रुद्रस्तृप्यताम्। ॐ प्रजापतिस्तृप्यताम्। ॐ देवास्तृप्यन्ताम्। ॐ छन्दांसि तृप्यन्ताम्। ॐ वेदास्तृप्यन्ताम्। ॐ ऋषयस्तृप्यन्ताम्॥ ॐ पुराणाचार्यास्तृप्यन्ताम्। ॐ गन्धर्वास्तृप्यन्ताम्। ॐ इतराचार्यास्तृप्यताम्। ॐ संवत्सरसावयवस्तृप्यताम्। ॐ देव्यस्तृप्यन्ताम्। ॐ अप्सरसस्तृप्यन्ताम्। ॐ देवानुगास्तृप्यन्ताम्। ॐ नागास्तृप्यन्ताम्। ॐ सागरास्तृप्यन्ताम्। ॐ पर्वतास्तृप्यन्ताम्। ॐ सरितस्तृप्यन्ताम्। ॐ मनुष्यास्तृप्यन्ताम्। ॐ यक्षास्तृप्यन्ताम्। ॐ रक्षांसितृप्यन्ताम्। ॐ पिशाचास्तृप्यन्ताम्। ॐ सुपर्णास्तृप्यन्ताम्। ॐ भूतानितृप्यन्ताम्। ॐ पशवस्तृप्यन्ताम्। ॐ वनस्पतयस्तृप्यन्ताम्। ॐ ओषधयस्तृप्यन्ताम्। ॐ भूतग्रामचतुर्विधस्तृप्यताम्। ॐ मरीचिस्तृप्यताम्। ॐ अत्रिस्तृप्यताम्। ॐ अङ्गिरास्तृप्यताम्। ॐ पुलस्त्यस्तृप्यताम्। ॐ पुलहस्तृप्यताम्। ॐ क्रतुस्तृप्यताम्। ॐ प्रचेतास्तृप्यताम्। ॐ वशिष्ठस्तृप्यताम्। ॐ भृगुस्तृप्यताम्। ॐ नारदस्तृप्यताम्।

॥ इति देवर्षितर्पणम् ॥

मनुष्यतर्पणम् (जनैलाई माला लगाएजस्तो बनाई कान्छी औंलातर्फबाट दुई दुई पटक तर्पण गर्ने)

ततः कण्ठे सूत्रं कृत्वा निवीती उदङ्मुखः कायतीर्थवर्तिना सकुशोदकेनाञ्जलौ तिरश्चः कुशान् कृत्वा मनुष्यांस्तर्पयेत् -

ॐ भूर्भुवः स्वः सनकादयः सप्तमनुष्या इहागच्छन्तिह तिष्ठन्तु गृह्णन्त्वेताञ्जलाञ्जलीन्।

ॐ सनकस्तृप्यताम् २। ॐ सनन्दनस्तृप्यताम् २। ॐ सनातनस्तृप्यताम् २। ॐ कपिलस्तृप्यताम् २।

ॐ आसुरिस्तृप्यताम् २। ॐ वोढुस्तृप्यताम् २। ॐ पञ्चशिखस्तृप्यताम् २।

॥ इति मनुष्यतर्पणम् ॥

दिव्यपितृतर्पणम् (खगौतो लिने अनि अपसव्य भएर चोरी औंला र बूढी औंलाको बीचबाट तीन तीन पटक तर्पण गर्ने)

ततोऽपसव्येन प्राचीनावीती दक्षिणाभिमुखः पातितवामजानुर्मोटितकुशतिलाञ्जलित्रयेण पितृतीर्थेन खड्गपात्रेण च दिव्यपितृनावाह्य तर्पयत्- (आवाहन गर्ने)

ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि । उशन्नुशतऽआवह पितॄन् हविषेऽअत्तवे ॥

ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान् ॥ इति मन्त्रद्वयं पठित्वा-

ॐ कव्यवाडनलादयो दिव्यपितर इहागच्छन्त्विह तिष्ठन्तु गृह्णन्त्वेताञ्जलाञ्जलीन्।

ॐ कव्यवाडनलस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३। ॐ सोमस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३।

ॐ यमस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३। ॐ अर्यमा तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३।

ॐ अग्निष्वात्तास्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वाधा नमः ३। ॐ सोमपास्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वाधा नमः ३। ॐ बर्हिषदस्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वाधा नमः ३। ॐ यमाय नमः ३।

ॐ धर्मराजाय नमः ३। ॐ मृत्यवे नमः ३। ॐ अन्तकाय नमः ३। ॐ वैवस्वताय नमः ३।

ॐ कालाय नमः ३। ॐ सर्वभूतक्षयाय नमः ३। ॐ औदुम्बराय नमः ३। ॐ दध्नाय नमः ३।

ॐ नीलाय नमः ३। ॐ परमेष्ठिने नमः ३। ॐ वृकोदराय नमः ३। ॐ चित्राय नमः ३।

ॐ चित्रगुप्ताय नमः ३।

॥ इति दिव्यपितृतर्पणम् ॥

स्वपितृतर्पणम् (आफ्ना पितृहरूलाई तर्पण गर्ने)

तत आगच्छन्तु मे पितर इमान् गृह्णन्त्वेताञ्जलाञ्जलीनिति स्वपितृनावाह्य तर्पयेत् -

ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः । असुं यऽईयुरवृकाऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ ॐ अद्येहामुकसगोत्रोऽस्मत्पिताऽमुकशर्मा (वर्मा, गुप्त) वसुस्वरुपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा। इति प्रथमाञ्जलिं पित्रे दद्यात्। (पितालाई पहिलो पटक तर्पण गर्ने)

ॐ अङ्गिरसो नः पितरोनवग्वाऽअथर्वाणो भृगवः सोम्यासः। तेषां वय ꣳ सुमतौ यज्ञियानामपिभद्रे सौमनसे स्याम ॥ अनेन मन्त्रेण पूर्ववद् द्वितीयाञ्जलिं पित्रे दद्यात्। (दोस्रो पटक तर्पण गर्ने)

ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान्। अनेन मन्त्रेण पूर्ववत् तृतीयाञ्जलिं पित्रे दद्यात्। (तेस्रो पटक तर्पण गर्ने)

ॐ ऊर्जं वहन्तीरमृतं घृतम्पयः कीलालं परिस्रुतम्। स्वधास्थ तर्पयत मे पितॄन्॥

ॐ अद्येहामुकसगोत्रोऽस्मत्पितामहोऽमुकशर्मा रूद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा।

इति पितामहाय प्रथमाञ्जलिं दद्यात्। (पितामहलाई प्रथम पटक तर्पण गर्ने)

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन्निपतरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम्॥

अनेन मन्त्रेण पितामहाय पूर्ववद् द्वितीयाञ्जलिं दद्यात्। (दोस्रो पटक तर्पण गर्ने)

ॐ ये चेह पितरो ये च नेह यांश्च विद्म याँ २ऽउ च न प्रविद्म। त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञ ꣳ सुकृतञ्जुषस्व ॥ अनेन मन्त्रेण पितामहाय पूर्ववत्तृतीयाञ्जलिं दद्यात्। (तेस्रो पटक तर्पण गर्ने)

ॐ मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः॥

ॐ अद्येहामुकसगोत्रोऽस्मत् प्रपितामहोऽमुकशर्मा (वर्मा, गुप्त) आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा।

इति प्रपितामहाय प्रथमाञ्जलिं दद्यात्। (प्रपितामहलाई प्रथम पटक तर्पण गर्ने)

ॐ मधु नक्तमुतोषसो मधुमत्पार्थिव ꣳ रजः मधु द्यौरस्तु नः पिता॥

अनेन मन्त्रेण प्रपितामहाय द्वितीयाञ्जलिं दद्यात्। (दोस्रो पटक तर्पण गर्ने)

ॐ मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः॥

अनेन मन्त्रेण प्रपितामहाय पूर्ववत्तृतीयाञ्जलिं दद्यात्। (तेस्रो पटक तर्पण गर्ने)

ॐ आमा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरुपे। आ मा गन्तां पितरामातरा चामा सोमोऽअमृतत्त्वेन गम्यात्॥ इति मन्त्रं पठित्वा - (आमालाई तीन पटक तर्पण गर्ने)

ॐ अद्येहामुकसगोत्रास्मन्माता (अमुकी) देवी वसुस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा।

इति अञ्जलित्रयं दद्यात्। (पितामहीलाई तीन पटक तर्पण गर्ने)

ॐ अद्येहामुकसगोत्रास्मत्पितामही (अमुकी) देवी रूद्रस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा। इति त्रिः।

(प्रपितामहीलाई तीन पटक तर्पण गर्ने)

ॐ अद्येहामुकसगोत्रास्मत्प्रपितामही (अमुकी) देवी आदित्यस्वरुपा तृप्यतामिदं तिलोदकं तस्यै स्वधा। इति त्रिः।

ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वासः। (प्रथम पटक आमाको बुबालाई तर्पण गर्ने)

ॐ अद्येहामुकसगोत्रोऽस्मन्मातामहोऽमुकशर्मा (वर्मा, गुप्त) वसुस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा। इति प्रथमाञ्जलिं मातामहाय दद्यात्।

एवं 'ॐ नमो वः' इति मन्त्रेण द्वितीयतृतीयाञ्जली मातामहाय दद्यात्। (दोस्रो पटक आमाको बुवालाई तर्पण गर्ने)

पुनः 'ॐ नमो वः' इति मन्त्रं पठित्वा - (तेस्रो पटक आमाको बुवालाई तर्पण गर्ने)

ॐ अद्येहामुकसगोत्रोऽस्मत्प्रमातामहोऽमुकशर्मा रूद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा।

इति प्रमातामहाय प्रथमद्वितीयतृतीयाञ्जलीन् दद्यात्। (आमाको बाजेलाई तीन पटक तर्पण गर्ने)

पुनः 'ॐ नमो वः' इति मन्त्रं पठित्वा - (आमाको बराजुलाई तीन पटक तर्पण गर्ने)

ॐ अद्येहामुकसगोत्रोऽस्मद्वृद्धप्रमातामहोऽमुकशर्मा (वर्मा, गुप्त) आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा। इति वृद्धप्रमातामहाय प्रथमद्वितीयतृतीयाञ्जलीन् दद्यात्। (मातामही, प्रमातामही, वृद्धप्रमातामहीहरूलाई तीन-तीन पटक तर्पण गर्ने)

ॐ अद्येहामुकसगोत्रास्मन्मातामही (अमुकी) देवी वसुस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा। इति त्रिः।

ॐ अद्येहामुकसगोत्रास्मत्प्रमातामही (अमुकी) देवी रूद्रस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा। इति त्रिः।

ॐ अद्येहामुकसगोत्रास्मद् वृद्धप्रमातामही (अमुकी) देवी आदित्यस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा। इति त्रिः।

ततः श्लोकानुसारेण ज्येष्ठकनिष्ठादीन्सपत्नीकांश्च तर्पयेत् - (श्लोकअनुसार पितृहरूलाई तर्पण गर्ने)

ताताम्बात्रितयं सपत्नजननी मातामहादित्रयं। सस्त्रि-स्त्री-तनयादि तातजननीस्वभ्रातरः सस्त्रियः॥
ताताम्बात्मभगिन्यपत्यधवयुग् जायापिता सद्गुरुः। शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे॥

तत अखण्डजलधारया तर्पयेत् - (नटुटाई जलधारा गरी तर्पण गर्ने)

ॐ आब्रह्मस्तम्बपर्यन्तं देवर्षीपितृमानवाः। तृप्यन्तु पितरः सर्वे मातृमातामहादयः॥
पितृवंशे मृता ये च मातृवंशे तथैव च। गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः॥
ते तृप्तिमखिला यान्तु ये चास्मत्तोयकाङ्क्षिणः। ये बान्धवाबान्धवा येऽन्यजन्मनि बान्धवाः॥
ते सर्वे तृप्तिमायान्तु मद्दत्तेनाम्बुनाखिलाः। देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः॥
पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः। जलेचरा भूमिचरा वाय्वाहाराश्च जन्तवः॥
ते तृप्तिमखिला यान्तु मद्दत्तेनाम्बुनाखिलाः। नरकेषु समस्तेषु यातनासु च ये स्थिताः॥
तेषामाप्यायनायैतद्दीयते सलिलं मया। अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्॥
आब्रह्मभुवनाँल्लोकानिदमस्तु तिलोदकम्। यत्र क्वचनसंस्थानां क्षुत्तृष्णोपहतात्मनाम्॥
इदमक्षय्यमेवास्तु मया दत्तं तिलोदकम्॥

वस्त्रनिष्पीडनम्

(जनै वा वस्त्र जलमा चोबी बायाँतर्फ भुइँमा निचोर्ने)

ॐ ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः। ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकम्॥

ततः सव्यं कृत्वाऽऽचम्य पूर्वाभिमुखो भूत्वा जले षट्कोणं विलिख्य ब्रह्मादीन्पूजयेत्।

ब्रह्मादिदेवानां पूजनम् (सव्य भएर आचमन गर्ने र तर्पण गरेको जलमा षट्कोण लेखी पूर्वदेखि ब्रह्मादिको पूजा गर्ने)

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेनऽआवः । (पूर्वमा ब्रह्माको पूजा गर्ने)
सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ ॐ ब्रह्मणे नमः ।

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपा ꣳ सुरे स्वाहा ॥ (विष्णुको पूजा गर्ने)
ॐ विष्णवे नमः ।

ॐ नमस्ते रुद्रमन्यवऽउतोतऽइषवे नमः । बाहुभ्यामुत ते नमः ॥ ॐ रुद्राय नमः । (रुद्रको पूजा गर्ने)

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ (सावित्रीको पूजा गर्ने)
ॐ सवित्रे नमः ।

ॐ मित्रस्य चर्षणी धृतो वो देवस्य सानसि । द्युम्नं चित्रश्रवस्तमम् । ॐ मित्राय नमः । (मित्रको पूजा गर्ने)

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि (वरुणको पूजा गर्ने)
वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ ॐ वरुणाय नमः ।

सूर्यार्घ्यदानम् (उठेर सूर्यलाई पूर्वतर्फ त्यही जलमा अर्घ दिने)

ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते । अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ॥
अनेन मन्त्रेण सूर्यायार्घ्यं दद्यात् । (पूर्व फर्केर दुवै हात उठाएर सूर्यको उपासना गर्ने)

ॐ अदृश्रमस्य केतवो विरश्मयो जनाँ२ ऽअनु । भ्राजन्तोऽअग्नयो यथा । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय ॥ सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासम् ॥ ॐ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतं बृहत् ॥ इति मन्त्राभ्यां सूर्यमुपस्थाय प्रदक्षिणीकृत्य दिशः दिग्देवताश्च प्रणमेत् ।

दिशांदिग्देवानाञ्च प्रणामनम् (उठेरै पूर्व दिशादेखि नमस्कार गर्ने)

ॐ प्राच्यैदिशे नमः । ॐ इन्द्राय नमः । ॐ आग्नेयै दिशे नमः । ॐ अग्नये नमः ।
ॐ दक्षिणायै दिशे नमः । ॐ यमाय नमः । ॐ नैर्ऋत्यै दिशे नमः । ॐ निर्ऋतये नमः ।
ॐ प्रतीच्यैदिशे नमः । ॐ वरुणाय नमः । ॐ वायव्यै दिशे नमः । ॐ वायवे नमः ।
ॐ उदिच्यै दिशे नमः । ॐ कुबेराय नमः । ॐ ऐशान्यै दिशे नमः । ॐ ईशानाय नमः ।
ॐ ऊर्ध्वायै दिशे नमः । ॐ ब्रह्मणे नमः । ॐ अधोदिशे नमः । ॐ अनन्ताय नमः ।

तत उपविश्य नमेत् - (बसेर नमस्कार गर्ने)

ॐ ब्रह्मणे नमः । ॐ अग्नये नमः । ॐ पृथिव्यै नमः । ॐ ओषधीभ्यो नमः ।
ॐ वाचे नमः । ॐ वाचस्पतये नमः । ॐ विष्णवे नमः । ॐ महद्भ्यो नमः ।
ॐ अद्भ्यो नमः । ॐ अपां पतये नमः । ॐ वरुणाय नमः ।

मुखाभिमर्शनम्

(जलले मुख पुछने)

ॐ संवर्चसा पयसा सन्तनूभिरगन्महि मनसा स ँशिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥ इति मन्त्रेण मुखमभिमृश्य -

चक्षुः स्पर्शः

(जल दुवै आँखामा लगाउने)

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शत ँशृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥
इति मन्त्रेणानामिकाङ्गुष्ठाभ्यां जलं स्पृष्ट्वा चक्षुः स्पर्शः कार्यः ।

पितृविसर्जनम्

(जल लिएर तर्पण दिएको भाँडोमा छोडिदिने)

ॐ देवागातुविदो गातुं वित्त्वा गातुमित । मनसस्पतऽइमन्देव यज्ञ ँस्वाहा वाते धाः ॥
इति मन्त्रेण पितृन विसर्जयेत् ।

कर्मेश्वरार्पणम्

(कुश जल लिने र कर्मपात्रमा छोडिदिने)

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्धयात्मना वानुसृतः स्वभावात् ।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयेतत् ॥ तर्पणविधिः समर्पयामि ।



॥ इति तर्पणविधिः ॥

एकोद्दिष्टश्राद्धम्

(तीनपुस्ताको एकोद्दिष्टश्राद्ध गरेर मात्र माहालय श्राद्ध गर्नुपर्छ भनिएको भए तापनि पिताकै श्राद्धमा तीनै पुस्तालाई तर्पण दिएको हुनाले दोष लाग्दैन भन्ने बुझ्नुपर्दछ ।)

दीपपूजनम्

(दियो र ऋषि थापेर आचमन गरी दियो बाल्ने र दियो पूजा गर्ने)

आचम्य प्राणानायम्य गोमयोपलिप्ते प्राङ्गणे दीपं प्रज्वाल्य पूजयेत्- ।

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॐ रक्षोघ्नदीपाय नमः, इति दीपं सम्पूज्य -

ब्राह्मण निमन्त्रणम्

(अपसव्य हुने र पितृब्राह्मणलाई फूल अक्षता, पान, जनै, सुपारी लिई छुने)

ततोऽपसव्यं कृत्वा ताम्बूलादिकं विप्रहस्ते दत्त्वा दक्षिणाभिमुखो भूत्वा उदङ्मुखस्य पितृब्राह्मणस्य वामजानु स्ववामहस्तेन स्पृट्वा स्ववामजानु च पातयित्वा निमन्त्रयेत् –

(फूल अक्षता लिई सङ्कल्प गर्ने)

ॐ अद्येत्यादि (अमुक) गोत्रस्य (गोत्रायाः) अस्मत्पितु (मातु) अमुकशर्मणो (वर्मणो, गुप्तायाः) वसुस्वरूप-स्याद्यकर्तव्यसांवत्सरीकैकोद्दिष्टश्राद्धे अनेन ताम्बूल गन्धपुष्पाक्षतेन त्वं मया निमन्त्रितः । ॐ निमन्त्रितोऽस्मि, इति प्रतिवचनम् । ततो बद्धाञ्जलिः पठेत् –

प्रार्थना

(नमस्कार गर्ने)

अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः । भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥
सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः । भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि ॥
ॐ भवितव्यम् इति प्रतिवचनम् ।

पादार्घः

ततो ब्राह्मणचरणौ प्रक्षलयेदनेन मन्त्रेण –

(दुनामा जल राखेर ऋषिलाई जल सेचन गर्ने)

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥
यत्फलं कपिलादाने कार्त्तिक्यां ज्येष्ठपुष्करे । तत्फलं पाण्डवाश्रेष्ठ विप्राणं पादशौचने ॥

ततो मोटकमादाय-

(सङ्कल्प गर्ने)

ॐ अद्यामुकगोत्रोऽस्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) वसुस्वरूपाद्यकर्तव्यसांवत्सरीकैकोद्दिष्टश्राद्धे एष पादार्घस्ते स्वधा । ततः सव्येनाऽऽचम्य गृहं प्रवेशयेत् । अपसव्येन, ॐ आगता यूयम् । ॐ सुस्वागता वयम् । ॐ इदमासनमास्यताम् । ॐ आसे इति प्रतिवचनम् । ब्राह्मणमुदङ्मुखमुपवेशयेत् ।

(सव्य भई आचमन गर्ने र अपसव्य भई ऋषिलाई स्वागत गर्ने)

कर्मपात्रनिर्माणम्

(पुनः कर्मपात्र निर्माण गर्ने)

ॐ कर्मपात्रमहं करिष्ये, ॐ कुरुष्व । इत्यनुज्ञातः सन् यद्देवा देवहेडनमिति कण्डिकात्रयेण पवित्रं गन्धादिकं च स्वस्वमन्त्रेण क्षिप्त्वा कर्मपात्रं कुर्यात् । तत्र मन्त्राः –

ॐ यद्देवादेवहेडनन्देवासश्चकृमावयम् । अग्निर्मातस्मादेनसो विश्वान्मुञ्चत्व ꣳ हसः ॥

ॐ यदि दिवा यदि नक्तमेना ꣳसि चकृमा व्वयम् । व्वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्व ꣳहसः ॥

ॐ यदि जाग्रद्यदि स्वप्नऽएना ꣳसि चकृमा व्वयम् । सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्व ꣳहसः ॥

इति कण्डिकात्रयेण देवानावाह्य –

(पवित्र राख्ने)

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥ इति मन्त्रेण पवित्रं क्षिपेत् -

ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ॥ इति जलम्

(जल राख्ने)

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः ।

प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रिणाहि नः स्वाहा ॥ इति तिलान् ।

(तिल राख्ने)

ॐ श्रीश्चते लक्ष्मीश्च पत्क्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।

इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ इति पुष्पम् ।

(फूल राख्ने)

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ इति चन्दनम्-

ॐ अक्षन्नमीमदन्त हयवप्रियाऽअधूषत ।

अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी ॥ इत्यक्षतान् ।

(अक्षता राख्ने)

ततः सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय-

(सव्य हुने र सवैतिर सेचन गर्ने)

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा । यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

ॐ पुण्डरीकाक्षः पुनातु, इत्युक्त्वा श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत् । तत्कुशादिकमादाय –

प्रतिज्ञासङ्कल्प

(सङ्कल्प गर्ने)

ॐ अद्येहेत्यादि पूर्वसङ्कल्पमुच्चार्य (अमुक) गोत्रस्य (गोत्रायाः) अस्मत्पितुरमुकशर्मणो (वर्मणो, गुप्तायाः) वसुस्वरुपस्याद्यकर्तव्य सांवत्सरीकै-कोद्दिष्टश्राद्धमेभिर्द्रव्यैरहं करिष्ये । इति सङ्कल्प्य –

प्रार्थना

(तीन पटक नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिः

सप्तव्याधा दशार्णेषु मृगाः कालाञ्जरे गिरौ । चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे ॥

(फेरि नमस्कार गर्ने)

तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः । प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥

ये विप्रमुख्याः कुरुजाङ्गलेषु जातास्तथा दासकुले मृगाश्च ।
कालाञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्र सिद्धाः ॥
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः । यत्र यत्र स्मरेद् विद्वान् पितृणां दत्तमक्षयम् ॥
श्राद्धभूमौ गयां ध्यात्वा तथा देवं गदाधरम् । ताभ्यां चैव नमस्कृत्य ततः श्राद्धं समारभेत् ॥
गयागयो गयादित्यो गायत्री च गदाधरः । गया गयासुरश्चैव षड्गया मुक्तिदायकाः ॥
ईशानविष्णु-कमलासन-कार्तिकेय-वन्हि-त्रयार्क-रजनीश-गणेश्वराणाम् ।
क्रौञ्चामरेन्द्रकमलोद्भवकश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॥
ॐ गयायै नमः । ॐ गदाधराय नमः । इति च पठेत् ।

दिग्बन्धनम् नीविबन्धनं च

(अपसव्य भएर तिल र मोटक लिई पूर्वदेखि सबै दिशामा तिल छर्ने)

तत अपसव्येन दिग्बन्धनं कुर्यात् । तिलसहितमोटकमादाय तिलान् पूर्वादिक्रमेण वक्ष्यमाणमन्त्रैर्विकिरेत्-
ॐअग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् । ॐ अपहताऽअसुरा रक्षा ꣳसि व्वेदिषदः ।
ॐ तया बर्हिषदः पान्तु याम्यां मे पितरः स्थिताः ॥ ॐ अपहता० । ॐ प्रतीचीमाज्यपास्तद्वत् ।
ॐ अपहता० । ॐ उदीचीमपि सोमपाः । ॐ अपहता० । ॐ उर्ध्वतत्वर्यया० ।
ॐ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः । सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥ इति भूमौ ।
इति सर्वतो विकीर्य पुष्पसहितं मोटकं वामकट्यां धारयेदनेन मन्त्रेण ।

नीविबन्धनम्

(फूल मोटक बायाँ कटीमा सिउरिने)

ॐ निहन्मि सर्वं यदमेध्यवद् भवेद् हताश्च सर्वेऽसुरदानवा मया ।
रक्षांसि यक्षाः सपिशाचगुह्यका हता मया यातुधानाश्च सर्वे ॥ इति दिग्बन्धननीविबन्धने ।

पुनः कुशखण्डत्रयसहिततिलानादाय- (तीन वटा कुशका टुक्रा तिलसँग लिई दक्षिणतर्फ अर्पण गरिदिने)

प्रयान्तु दूरतः सर्वे दैतेया दानवास्तथा सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशाँस्तिलान् ॥ इति दक्षिणस्यां क्षिपेत् ।

अथासनम्

अपसव्येन मोटकमादाय- (अपसव्य नै भएर मोटक लिई सङ्कल्प गर्ने र ऋषिमा राख्ने)

ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणो (वर्मणो, गुप्तायाः) वसुस्वरूपस्याद्यकर्तव्यसांवत्सरीकैकोद्दिष्टश्राद्धे इदं मोटकरूपमासनं ते स्वधा । इति ब्राह्मणाय मोटकरूपमासनं दद्यात् ।

हस्तार्घः

(ऋषि अगाडि दुना राख्ने)

ॐ हस्तार्घपात्रमहं करिष्ये, इति पृच्छेत् । ॐ कुरुष्व इत्यनुज्ञातः सन् पुटकमेकमग्रे कृत्वा तत –
ॐ पवित्रे स्थः इति मन्त्रेण उत्तराग्रं पवित्रं क्षिपेत् । (पवित्र राख्ने)
शन्नोदेवीः० इति मन्त्रेण जलं क्षिपेत् । (जल राख्ने)

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः ।
प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रिणाहि नः स्वाहा ॥ इति मन्त्रेण तिलान् क्षिपेत् । (दुनामा तिल राख्ने)
ॐ श्रीश्चते ... । इति पुष्पम् । ॐ गन्धद्वाराम् ... । इति गन्धं प्रक्षिपेत् । (फूल र चन्दन राख्ने)
ततः ॐ हस्तार्घपात्रं संपन्नम् इति ब्राह्मणं पृच्छेत्, ॐ सुसंपन्नम्, इति तेनोक्ते – (हस्तार्घपात्र उठाउने)
ॐ हस्तार्घपात्रं उत्थापयामि, इति पृच्छेत् । ॐ उत्थापयस्व इत्यनुज्ञातः हस्तार्घपात्रं वामहस्ते कृत्वा –
ॐ नमो नारायणाय इति मन्त्रेण पुष्पसहितं पवित्रं दक्षिणाग्रां विप्रकरे धृत्वा वामहस्तस्थं (ऋषिलाई पवित्र फूल चढाउने)
हस्तार्घपात्रमुत्तानस्वदक्षिणकरेणपिधाय – (दुनालाई ढाक्ने)
ॐ या दिव्या आपः पयसा सम्बभूवूर्याऽअन्तरिक्षाऽउतपार्थवीर्याः ॥
हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः स ꣳस्योना सुहवा भवन्तु ॥
इति मन्त्रेणार्घपात्रस्थ जलमभिमन्त्र्य जलतिलमोटकमादाय - (जल ब्राह्मणमा चढाई मोटक तिल लिने)
ॐ अद्येहामुकगोत्रास्मत्पितरमुकशर्मन् (वर्मन, गुप्त) वसुस्वरूपाद्यकर्तव्यसांवत्सरीकैकोद्दिष्टश्राद्धे एष हस्तार्घस्ते स्वधा । इति ब्राह्मणकरे अर्घ्यं दद्यात् । (पवित्र र फूल दुनामा राख्ने)
ॐ अर्घे पुनः प्रत्यर्घ्यमस्तु इति । पुष्पपवित्रसहितं तदर्घपात्रं भूमौ धृत्वा सव्यं कृत्वा तत्रस्थजलेन –
ॐ तच्चक्षुरिति मन्त्रेण चक्षुः स्पर्शः कार्यः । (सव्य भएर जल आँखामा लगाउने)
ततोऽपसव्येनार्घपात्रं गृहीत्वा ब्राह्मणस्य वामपार्श्वे – (अपसव्य हुने र ऋषिको बायापट्टि हस्तार्घ्यपात्र घोप्ट्याउने)
ॐ पित्रे स्थानमसि इति न्युब्जं कुर्यात् । त्वा तदुपरि कुशत्रयं दद्यात् । (तीनवटा कुशका टुक्रा राख्ने)

ब्राह्मणपूजा (जनै, सुपारी, वस्त्र, धुप, बत्ती नैवेद्यले ब्राह्मण पूजा गर्ने)

ततः ॐ अर्चयिष्ये इति ब्राह्मणं पृच्छेत् । ॐ अर्चय इत्युक्ते जलचन्दनपुष्पाक्षत ताम्बूलयज्ञोपवीतद्रव्यवस्त्रादिभिः समभ्यर्च्य धूपदीपौ नैवेद्यं च कृत्वा मोटकमादाय – (मोटक जल लिने र सङ्कल्प गरेर छोडिदिने)
ॐ अद्येहामुकगोत्रास्मत्पितरमुकशर्मन् (वर्मण, गुप्त) वसुस्वरूपाद्यकर्तव्यसांवत्सरीकैकोद्दिष्टश्राद्धे एतान्यर्चनानि अत्र गन्धपुष्पाक्षतताम्बूलयज्ञोपवीतधूपदीपनैवेद्यद्रव्यवासांसि ते स्वधा ।
ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु इति विप्रकरे जलं दद्यात् । ॐ अस्तु । इति प्रतिवचनम् ।

अथान्नसङ्कल्पः तत्रादौ (भूस्वामी)

ततः सव्येनाचम्य अपसव्येन – (सव्य भएर आचमन गरी अपसव्य हुने)
यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति । एवं मण्डलभस्मैतत्सर्वभूतानि रक्षतु ॥
इति मन्त्रेण वामावर्तेन चतुष्कोणमण्डलं विधाय – (ऋषि अगाडि चार कोण बनाउने)
तिलघृतमधुजलयुतमन्नं मोटकादिसहितमादाय – (एक भाग सिदा राख्ने, मोटक जल लिई छुने र छोडिदिने)
ॐ इदमन्नं सजलमेतत्भूस्वामिपितृभ्यो नमः । इत्युत्सृजेत् ।

अथान्नसङ्कल्पः (अर्को भाग सिदा राख्ने र दायाँ हात बायाँ र बायाँ हात दायाँ गरी सिदालाई छुने)

सोपस्करं तिलजलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य –

ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा ॥ इत्यालभ्य,

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पा ꣳ सुरे ॥ इत्यन्तं पठित्वा –

ॐ विष्णोकव्यमिदं रक्ष मदीयम् इति च पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा –(बूढी औंलाले सिदामा देखाउने)

ॐ इदमन्नमित्यन्ने। ॐ इमा आप इति जले। ॐ इदमाज्यमिति घृते। ॐ इदं हविरिति पुनरन्ने।

एतान्युपकरणानि। इति क्रमेणान्नजलघृतादिषु दक्षिणाङ्गुष्ठं निवेश्य- (तिल छर्ने र मोटक लिई सिदालाई छुने)

ॐ अपहताऽअसुरा रक्षा ꣳसि व्वेदिषदः। इति पठित्वा वामावर्तेन श्राद्धदेशे तिलान् विकीर्य मोटकादीन्यादाय

वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेणान्नमापश्च स्पृष्ट्वा-

ॐ अद्येहामुकगोत्रायास्मत्पित्रेऽमुकशर्मणे (वर्मणो, गुप्ताय) वसुस्वरूपायाद्यकर्तव्यसांवत्सरीकैकोद्दिष्टश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणं अक्षय्यतृप्तिहेतोस्ते स्वधा। इति भूमामेवमोटकादिकमुत्सृजेत्।

(भुइँमा मोटक छोड्ने)

ॐ अन्नसङ्कल्पसिद्धिरस्तु। ॐ भवान् प्राशयतु। इति विप्रकरे जलं दद्यात्। (ब्राह्मणमा जल चढाउने)

ततः श्राद्धकर्ता कुशोपरि विशन् सव्येन सव्याहृतिकां गायत्रीं जपित्वा मधुवातेति पठेत् –

(सव्य भएर आफूमुनि कुश ओछ्याई गायत्री जप्ने)

ॐ मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः ॥

मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳ रजः। मधुद्यौरस्तु नः पिता ॥ (तीनपटक ॐ मधु भन्ने)

मधुमान्नो व्वनस्पतिर्म्मधुमाँऽअस्तुसूर्य्यः। माध्वीर्गावो भवन्तु नः ॥ ॐ मधु मधु मधु।

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत्। तत्सर्वमच्छिद्रमस्तु श्री भास्करस्य प्रसादतः ॥

ॐ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे। नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति पठित्वा।

ॐ यथासुखं जुषस्व इति वचनानन्तरं पितृसूक्तं च पठेत्। (पितृसूक्त पाठ गर्दै पिण्ड बनाउने)

ॐ अग्नये कव्यवाहनायेति षट् ६। ॐ तदेव षोडश १६।

ॐ कृणुष्व पाज इति पञ्च ५। ॐ सुरावन्तमित्यादि अपां फेनेनेत्यन्तम्। ३९।

ॐ सहस्रशीर्षेति षोडश १६। ॐ नमस्ते इति षट्षष्टिः ६६। (पितृलाई भोजन चढाउने)

ब्राह्मणस्य यत्र यत्रेच्छोपलभ्यते तत्तप्रयच्छन् मन्दं मन्दं भोजयेत्। ततो ब्राह्मणं तृप्तं ज्ञात्वा अपसव्येन।

विकिरदानम् (ब्राह्मणको दक्षिणतर्फ तीन टुक्रा कुश, फूल भूमिमा विकिरासनको लागि राख्ने)

ततोऽन्नपात्रसन्निधौ गत्वाऽऽस्तृतदक्षिणाग्रकुशत्रयायां भूमौ विकिरासनं दद्यात्।

अपसव्येन मोटकमादाय – (अपसव्य भएर मोटक जल लिने)

असंस्कृतप्रमीतानां त्यागीनां कुलयोषिताम्। उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ॥

इति मोटकरूपमासनमास्तृतकुशोपरि उत्सृजेत्। (ओछ्याएको कुश र फूलमाथि मोटक राखिदिने)

ततः समधुतिलघृतयुतमन्नं जलेनाप्लाव्य मोटकादिकं चादाय – (दुनामा मह, तिल, घ्यू, अन्न या पायस राख्ने)

अग्निदग्धाश्च ये जीवा येऽप्यदग्धा कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥

इति मन्त्रेणास्तृतकुशोपरि तदन्नं विकिरेत।

अत्र ओङ्कारहितः कार्यः। (दुना घोप्ट्याइदिने, औंठीले थिच्ने र हात पाउ धुने)

ततः कुशान् परित्यज्य हस्तौ पादौ प्रक्षाल्य सव्येन द्विराचम्य हरिं स्मरेत्। ततः सप्रणवव्याहृतिपूर्वां गायत्रीं जपित्वा मधुव्वाताऽऋतायते। इतित्यृचं, ॐ मधु ३, इति च जपेत्। (सव्य भएर आचमन गरी गायत्री मन्त्र जप्ने)

ॐ जलगण्डूषमिदं ते इति ब्राह्मणाय प्रत्यपोशानं दद्यात्। अत्र वाग्विसर्गः।

ततोऽपसव्येनाञ्जलिं बध्वा ब्राह्मणं पृच्छेत् – (ऋषिमा जल चढाउने, अपसव्य हुने र नमस्कार गर्ने)

ॐ स्वदितम्। ॐ सुस्वदितमिति प्रतिवचनम्। ॐ शेषमन्नं किं क्रियताम्। ॐ इष्टैः सह भुज्यताम्। इति प्रतिवचनम्। ॐ पिण्डदानमहं करिष्ये। ॐ कुरुष्व। इति प्रतिवचनम्।

पिण्डवेदिनिर्माणम् संस्कारश्च (बालुवा वा तुलसीको मोठको माटोले दक्षिण ओरालो पारी चार कुनाको वेदी बनाउने)

ततः पिण्डदानार्थं हस्तमितां चतुरङ्गुलोच्छ्रितां सैकतादिकां दक्षिणप्लवां पिण्डिकां निर्माय पिण्डिकामध्ये वामेन पाणिना दर्भपिञ्जुलीं गृहीत्वा दक्षिणहस्ते कृत्वा सव्योपगृहीतदक्षिणपाणिना- (तीनवटा कुशले रेखा कोर्ने)

ॐ अपहता असुरा रक्षा ꣳसि व्वेदिषद्ः।

इति मन्त्रेण दक्षिणाग्रां रेखां कृत्वा दर्भपिञ्जुलीमुत्तरस्यां क्षिपेत्। तदुपरि – **ये रूपाणि ...** इति मन्त्रेणाङ्गारं भ्रामयित्वा दक्षिणस्यां क्षिपेत्। (वेदीमा धूप वा आगो कुशले सवैतिर घुमाएर दक्षिणतिर फाल्ने)

ॐ ये रूपाणि प्रतिमुञ्चमानाऽअसुराः सन्तः स्वधया चरन्ति।

परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात्॥ ततो जलेन –

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शं योरभिस्रवन्तु नः।

इति मन्त्रेण पिण्डिकासेचनम्। तदनु छिन्नमूलकुशान् दक्षिणाग्रान् पिण्डिकायां दद्यात्।

ततः सव्येन- (सव्य भएर तीन पटक नमस्कार गर्ने र वेदीमा फूल ओछ्याउने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च।

नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ इति त्रिः पठेत्।

अवनेजनम् (दुनामा जल राख्ने)

अपसव्यं विधाय एकं पुटकं वामहस्ते कृत्वा मोटकादिकमादाय – (अपसव्य भएर मोटक जल लिने र फूलमाथि मोटक राख्ने)

ॐ अद्येहामुकगोत्रास्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) वसुस्वरूपाद्यकर्तव्यसांवत्सरीकैकोद्दिष्ट श्राद्धे पिण्ड-स्थानेऽत्रावनेजनं निक्ष्व ते स्वधा। इति अवनेजनं दद्यात्।

पिण्डदानम्

ततो मोटकादीनि पिण्डं चादाय वामहस्ते पुटकादिस्थजलमादाय – (पिण्डसहित मोटक जल लिने र राखिदिने)

ॐ अद्येहामुकगोत्रास्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) वसुस्वरूपाद्यकर्तव्यसांवत्सरीकैकोद्दिष्टश्राद्धे एष पिण्डोऽमृतस्वरूपोऽक्षय्यतृप्तिहेतोस्ते स्वधा । इति अवनेजनोपरि पिण्डं दद्यात् । (जल चढाउने)

अत्र लेपभागनिषेधः करं प्रोक्ष्य कुशान् परित्यज्य सव्येन द्विराचम्य हरिं स्मरेत् । (सव्य भएर आचमन गर्ने र हरि हरि भन्ने)

ततः सव्येनैव गन्धपुष्पादीन्यादाय पितरमुद्दिश्य – (सव्य नै भएर चन्दन र फूल लिने)

ॐ अत्रपितरो मादयध्वं यथाभागमा वृषायध्वम् । इति मन्त्रं पठित्वा वामावर्तेनोत्तराभिमुखो भूत्वा श्वासं नियम्य भास्करमूर्तिं पितरं ध्यायन् – (पितृको ध्यान गरी अपसव्य भएर पिण्डमा चढाउने)

अपसव्यं कृत्वा दक्षिणावर्तेन दक्षिणाभिमुखो भूत्वा –

ॐ अमीमदन्त पितरो यथाभागमावृषायिषत । इति मन्त्रेण गन्धपुष्पादीनि पिण्डोपरिक्षिपेत् ।

प्रत्यवनेजनम्

(जल दुनामा राख्ने र सङ्कल्प गरी मोटक लिई चढाउने)

ततोऽवनेजनपात्रं वामहस्ते कृत्वा मोटकादिकमादाय- ॐ अद्यामुकसगोत्रास्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) वसुस्वरूपाद्यकर्तव्यसांवत्सरीकैकोद्दिष्टश्राद्धे इदं पिण्डप्रत्यवनेजनं ते स्वधा इति । पिण्डे प्रत्यवनेजनं दद्यात् । ततो नीवीं विस्रंस्य सव्य कृत्वाऽऽचम्य हरिं स्मरेत् । (पछाडिको मोटक र फूल झार्ने र सव्य भएर आचमन गरी हरि सम्झने)

सूत्रदानम्

ततोऽपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय – (अपसव्य भएर धागोलाई पहेँलो बनाई चढाउने)

ॐ नमो वः पितरो रसाय, नमो वः पितरः शोषाय, नमो वः पितरो जीवाय, नमो वः पितरः स्वधायै, नमो वः पितरो घोराय, नमो वः पितरो मन्न्यवे, नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मै तद्वः पितो व्यासः ॥ इति मन्त्रं पठित्वा पिण्डोपरि सूत्रं दद्यात् ।

पिण्डपूजनम्

(जनै, सुपारी, भेटी, वस्त्र, धुप, बत्ती, नैवेद्यले पिण्ड पूजा गर्ने)

ततः पिण्डं गन्धादिभिः संपूज्य धूपदीपौ च कृत्वा मोटकमादाय- (मोटक लिई सङ्कल्प गर्ने)

ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) वसुस्वरूपाद्यकर्तव्यसांवत्सरीकैकोद्दिष्टश्राद्धे एतानि पिण्डार्चनानि अत्र सूत्रगन्धपुष्पाक्षतधूपदीपैक्षवादि नैवेद्याताम्बूलयज्ञोपवीतद्रव्यवासांसि ते स्वधा । इति गन्धादिकमुत्सृजेत् । ततो विप्रकरे – (ब्राह्मणमा जल, फूल, अक्षता चढाउने)

ॐ शिवा आपः सन्तु, इति जलम् । ॐ सौमनस्यमस्तु, इति पुष्पम् । ॐ अक्षतं चारिष्टमस्तु, इति तण्डुलान् दद्यात् । ततः सव्येन पूर्वाभिमुखो भूत्वा वक्ष्यमाणमन्त्रान् पठेत् ।

प्रार्थना

(सव्य भएर नमस्कार गर्ने)

ॐ अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्। ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे॥
लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे। लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे॥
अक्षतं चाऽस्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा। यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम॥

कर्मपात्रोदकेनाभिषेकः

(कर्मपात्रको जलले आफ्नो शिरमा सेचन गर्ने)

ततः कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत्-
ॐ अस्मत्कुले दीर्घमायुरस्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ यच्छ्रेयस्तदस्तु। ॐ यत्पापं तत्प्रतिहतमस्तु, इति भूमौ॥ ॐ द्विपदेचतुष्पदेभ्यः शान्तिर्भवतु। इति।
ततोऽपसव्येन पिण्डशेषान्नं पिण्डसमीपे विकिरेत्। (अपसव्य भएर पिण्डको शेष पिण्ड नजिकै राख्ने)

अक्षय्योदकदानम्

(दुनामा तीर्थको जल राख्ने र मोटक लिई सङ्कल्प गर्ने)

वामहस्ते पुटकादिस्थजलं कृत्वा मोटकादिकमादाय – ॐ अद्येहामुकगोत्रस्यास्मत्पितुरमुकर्शणो (वर्मणो, गुप्तायाः) वसुस्वरूपस्याद्य कर्तव्यसांवत्सरीकैकोद्दिष्टश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठताम्। इति पिण्डेऽक्षय्योदकं दद्यात्।
ततः सव्येन कृताञ्जलिर्दक्षिणां दिशमवलोकयन् – (सव्य भएर जल चढाउने)
ॐ अघोरः पितास्तु। इति पूर्वाग्रां जलधारां दद्यात्।

आशिषः प्रार्थना

(पूर्व फर्की नमस्कार गरी आशीषका लागि प्रार्थना गर्ने)

ततः प्राङ्मुखो भूत्वाऽञ्जलिं बध्वाऽऽशिषःप्रार्थयेत्- (पहिले ब्राह्मणले, पछि यजमानले भन्ने र फेरि ब्राह्मणले भन्ने)
ॐ गोत्रन्नो वर्धताम्, ॐ वर्धताम् इति प्रतिवचनम्। ॐ दातारो नोऽभिवर्धन्ताम्, ॐ वर्धन्ताम् इति प्रतिवचनम्। ॐ वेदाः वर्धन्ताम्, ॐ वर्धन्ताम् इति प्र०। ॐ सन्ततिर्वर्धताम्, ॐ वर्धताम् इति प्रतिवचनम्। ॐ श्रद्धा च नो मा व्यगमत्, ॐ मा गात् इति प्रतिवचनम्। ॐ बहुदेयं च नोऽस्तु, ॐ अस्तु इति प्रतिवचनम्। ॐ अन्नं च नो बहु भवेत्, ॐ भवतु इति प्रति। ॐ अतिथींश्च लभेमहि, ॐ लभध्वम् इति प्रतिवचनम्। ॐ याचितारश्च नः सन्तु। ॐ सन्तु इति प्रतिवचनम्। ॐ मा याचिष्म कञ्चन, ॐ मा याचेथाः। इति प्रतिवचनम्। ॐ एताः सत्या आशिषः सन्तु, ॐ सन्तु इति प्रतिवचनम्।

तिलकदानम्

(ब्राह्मणले श्राद्धकर्तालाई चन्दन लगाइदिने)

ततो ब्राह्मणहस्तेन तिलकं कुर्यात्- अपसव्य भएर घोप्ट्याएको दुनाको
ॐ यं कामं कामयते सोऽस्मैकामः समृद्ध्यताम् इति मन्त्रेण। फूल, पवित्र पिण्डमा चढाउने)
ततोऽपसव्येन सपवित्रान् कुशान् न्युब्जपात्रात् समादाय पिण्डोपरि निक्षिप्य-

स्वधा उच्चारणम्

(कर्तालि नमस्कार गर्ने)

ॐ स्वधां वाचयिष्ये । ॐ वाच्यताम् । इति प्रतिवचनान्तरं रिक्ताञ्जलिना-

ॐ अद्येहामुकगोत्रायास्मत्पित्रेऽमुकशर्मणे (वर्मणे, गुप्ताय) वसुस्वरूपायाद्यकर्तव्यसांवत्सरीकैकोद्दिष्टश्राद्धे स्वधोच्यताम् । ॐ अस्तु स्वधा ।

पयोधारा

(सव्य भएर पिण्डमा दुध चढाउने)

ततः पयसादि सहितं पुटकं वामहस्ते कृत्वा, सव्येन -

ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् । स्वधास्थ तर्पयत मे पितॄन् ॥

इति मन्त्रं पठित्वा सपवित्रकुशोपरि दक्षिणाग्रं पयोधारां दद्यात् ।

ततः- ॐ पिण्डः संपन्नः ॐ सुसम्पन्नः ॐ पिण्डमुत्थापयामि । ॐ उत्थापयस्व । इत्यनुज्ञातः सन् नम्रीभूय सव्येन पिण्डानाघ्राय अपसव्येन उत्थापयेत् । पिण्डाधारकुशानुल्मुकं च वन्हौं क्षिपेत् ।

(पिण्डलाई ढोग्ने र अपसव्य भएर उठाउने, ओछ्याएको कुश आगोमा हाल्ने)

शङ्खचक्र पूजा

(सव्य भएर शङ्खचक्र (७४) लेख्ने र जौले पूजा गर्ने)

सव्येन पिण्डिकायां शङ्खं चक्रं च लिखित्वा– ॐ शङ्खाय नमः । ॐ चक्राय नमः । शङ्खचक्राभ्यां नमः ।

इति यवैः शङ्खचक्रपूजां विधाय अपसव्यं कृत्वा - (अपसव्य भएर पिण्ड काँधमा लिने र पाँच पाइला हिँड्ने)

ॐ गयायां पितृरुपेण स्वयमेव जनार्दनः । तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ॥

इति मन्त्रेण पिण्डं पिण्डिकोपरि निदध्यात् । (पिण्ड उही ठाउँमा राख्ने)

वसन्तादिपूजा सव्येन-

(सव्य भएर सबैले पिण्ड पूजा गर्ने)

ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः । वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः ॥

हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च । माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ॥ (कपुर बाल्ने)

ततः (कर्पूरदीपं दत्वा) अपसव्येनार्घपात्रमुत्तानीकृत्यसव्येनदक्षिणाद्रव्यमादाय –

दक्षिणासङ्कल्प

(अपसव्य भएर पितृअर्घपात्र उत्तानो पार्ने)

सव्येन दक्षिणां दद्यात्, कुशतिलजलयुतदक्षिणाद्रव्यमादाय - (सव्य भएर ऋषिदक्षिणा सङ्कल्प गर्ने)

ॐ अद्येहेत्यादि (अमुक) गोत्रस्यास्मत्पितुरमुकशर्मणो (वर्मणो, गुप्तायाः) वसुस्वरूपस्याद्यकृतैतत्सांवत्सरीकैकोद्दिष्टश्राद्धकर्मणः साङ्गतासिद्धचर्थमिमां दक्षिणां रजतं चन्द्रदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । इति विप्रकरे दद्यात् ।

पुनः कुशादिसहितं भूयसीदक्षिणाद्रव्यमादाय – (भूयसीदक्षिणा सङ्कल्प गर्ने र दिने)

ॐ अद्येहेत्यादि पूर्वसङ्कल्पमुच्चार्य (अमुक) गोत्रस्यास्मत्पितुरमुकशर्मणो (वर्मणो, गुप्तायाः) वसुस्वरूपस्याद्य-कृतैतत्सांवत्सरीकैकोद्दिष्टश्राद्धकर्मणो न्यूनातिरिक्तपरिपूरणार्थमिमां भूयसीदक्षिणां रजतखण्डं चन्द्रदैवतं (ताम्रखण्डं

सूर्यदैवतं वा) यद्देयमन्नपानादिकं द्रव्यं च यथानामदैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य यथाकाले दातुमहं जले उत्सृजे। इति जले उत्सृजेत्।

ब्राह्मणविसर्जनम्

(अपसव्य भएर ब्राह्मण विसर्जन गर्ने)

ततोऽपसव्येन, ॐ अभिरम्यताम् ॐ अभिरताः स्मः। इति प्रतिवचनान्ते ब्राह्मणस्य दक्षिणङ्गुष्ठं गृहीत्वोत्थाप्य –

(ऋषि (ब्राह्मण)लाई घ्यू लगाउने)

ॐ आ मा वाजस्य प्रसवो जगम्यादेमे द्यावोपृथिवी विश्वरूपे।
आ मा गन्तां पितरामातरा चामा सोमोऽअमृतत्त्वेन गम्यात्॥

इति त्रिर्वारिधारयाऽऽवेष्ट्य विसर्जयेत्। ततः सव्येन –

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च।

(सव्य भएर तीनपटक नमस्कार गर्ने)

नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ इति त्रिः पठेत्।

अथ दीपाच्छादनम्

(अपसव्य भएर दियो छोप्ने, सव्य हुने, हातपाउ धुने र आचमन गर्ने)

अपसव्येन दीपाच्छादनं विधाय हस्तौ पादौ प्रक्षल्य सव्येनाऽऽचामेत्।

प्रार्थना

ततोऽञ्जलिं बध्वा प्रार्थयेत्।

(नमस्कार गर्ने)

ॐ यत्कृतं तत्सुकृतमस्तु, यन्न कृतंतद्विष्णोः प्रसादाद् ब्राह्मणवचनाच्च सर्वं परिपूर्णमस्तु॥ ॐ अस्तु परिपूर्णम्। ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥
आयुः प्रजां धनं विद्यां स्वर्ग-मोक्ष-सुखानि च। प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः॥

कर्मसमर्पणम्

(पवित्र, बाँकी कुश लिई पानी समाउने)

ततः कर्मपात्रावशिष्टकुशादिकमादाय –

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वाऽनुसृतः स्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत्। इति कुशादिकं भूमौ त्यजेद्।
ततो यस्य स्मृत्येति अच्युतं नमस्कुर्यात्।
ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं समपूर्णतां याति सद्यो बन्दे तमच्युतम्॥
ॐ अच्युताय नमः ३। ततश्चतुर्भिश्चेति विष्णुं स्मरेत्।

(अच्युताय नमः ३, विष्णवे नमः ३ पटक भन्ने)

ॐ चतुर्भिश्च चतुर्भिश्च दाभ्यां पञ्चभिरेव च। हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु॥ इति

आशिर्मन्त्रपाठः

(आशीर्मन्त्र पाठ गर्ने)

हरि ॐ शतमिन्नु शरदोऽअन्तिदेवा यत्रानश्चक्राजरसन्तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्यारीरिषतायुर्गन्तोः॥१॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः।

विश्वेदावाऽअदितिः पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्वम् ॥२॥ स्वादुष ꣳसदः पितरो व्वयोधाः कृच्छ्रेश्रिताः शक्तिवन्तो गभीराः । चित्रसेनाऽइषुबलाऽअमृधाः सतोवीराऽउरवोव्व्रातसाहाः ॥३॥ ब्राह्मणासः पितरः सोम्यासः शिवेनो द्यावापृथिवी अनेहसा । पूषानः पातु दुरितादृतावृधो रक्षा मा कीर्नो अघश ꣳ सऽईशत ॥४॥ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमःप्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ॥ अक्षन्पितरोऽतीतृपन्त पितरः पितरः शुन्धद्ध्वम् ॥५॥ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतयुषा पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतयुषा व्विश्वमायुर्व्यष्णवै ॥६॥

प्रसादग्रहणम्

(टीका लगाई प्रसाद वितरण गर्ने)

ॐ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षसुखानि च । प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः ॥



॥ इति एकोद्दिष्टश्राद्धविधिः ॥

अथ पार्वणश्राद्धविधिः

(चारओटा ऋषि र दियो थापेर कर्मपात्र बनाई गोदान गरेर तर्पण गरी दियो बाली पूजा गर्ने)

(महिला कर्ता हुँदा ३+३ =६ ऋषि थाप्नुपर्दछ)

कर्ता शुचिराचान्तः गोमयोपलिप्ते प्राङ्गणे दींप प्रज्वाल्याऽऽचम्य प्रत्यङ्मुखः प्रथमं विश्वेदेवब्राह्मणौ निमन्त्रयेत्।

ब्राह्मणनिमन्त्रणम्

(विश्वदेव ऋषिलाई निमन्त्रणा गर्ने)

स्ववामपाणिना विप्रदक्षिणजानुं स्पृष्टवा स्वदक्षिणजानुं च पातयित्वा स्वदक्षिणहस्तेनाधोमुखेन ताम्बूलादिकं विप्रहस्ते दत्त्वा - (पान, जनै, सुपारी, फूल, अक्षता, चन्दन लिएर छुने र राखिदिने)

ॐ अद्येत्यादि अमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरूद्रादित्य-स्वरूपाणां श्राद्धसम्बन्धिनां विश्वेषां देवानां पुरुरवार्द्रवना- म्नामद्यकर्तव्य-महालयापरपक्षान्तर्गतपार्वणश्राद्धे अनेन ताम्बूलगन्धपुष्पाक्षतेन त्वं मया निमन्त्रितः।

पुनस्तत्सर्व पूर्ववद् विधाय - (मावलीपट्टि छुने र राख्ने)

ॐ अद्येत्यादि अमुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां श्राद्धसंबन्धिनां विश्वेषां देवानां पुरुरवार्द्रवनाम्नामद्यर्त्तव्यमहालया-परपक्षान्तर्गतपार्वणश्राद्धेऽनेन ताम्बूलगन्धपुष्पाक्षतेन त्वं मया निमन्त्रितः । ॐ निमन्त्रितोऽस्मि इति प्रतिवचनम्। (अपसव्य हुने)

ततोऽपसव्यं कृत्वा दक्षिणाभिमुखो भूत्वा स्ववामजानु पातयित्वा वामहस्तेन उदङ्मुखस्य पितृब्राह्मणस्य वामजानु स्पृष्ट्वा उत्तानेन स्वदक्षिणकरेण ताम्बूलादिकं विप्रहस्ते दत्त्वा - (पितृब्राह्मणमा छुने र राख्ने)

ॐ अद्येत्यादि अमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नी-कानां वसुरूद्रादित्यस्वरूपाणां अद्यकर्तमहालयापरपक्षान्तर्गतपार्वणश्राद्धे अनेन ताम्बूलगन्धपुष्पाक्षतेन त्वं मया निमन्त्रितः। ॐ निमन्त्रितोऽस्मि इति प्रतिवचनम्। (मावलीपट्टि छुने र राख्ने)

पुनः पूर्ववत् –

ॐ अद्येत्यादि अमुकसगोत्राणामस्मन्मातामह-प्रमातामह-बृद्धप्रमातामहाना ममुकामुकामुकशर्मणां सपत्नीकानां वसुरूद्रादित्यस्वरूपाणामद्यकर्तव्य महालयापरक्षान्तर्गत पार्वणश्राद्धे अनेन ताम्बूलगन्धपुष्पाक्षतेन त्वं मया निमन्त्रितः। ॐ निमन्त्रितोऽस्मि इति प्रतिवचनम्। (नमस्कार गर्ने)

ॐ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः। भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥१॥
सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः। भवितव्यं भवद्भिर्नोऽद्यतनेश्राद्धकर्मणि ॥२॥

ॐ भवितव्यम् इति प्रतिवचनम्। ततः सव्येन विश्वेदेवब्राह्मणयोश्चरणान् प्रक्षालयेत्।

पादार्घः (सव्य भएर विश्वेदेवा ब्राह्मणको पाउ धुने, दुईवटा दुना राख्ने र जल छर्कने)

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥
ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

पाद्यपात्रं वामहस्ते कृत्वा शन्नोदेवीरिति मन्त्रं पठित्वा कुशादिकमादाय - (घरपट्टिको दुनामा संकल्प गर्ने)

ॐ अद्याऽमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरूद्रादित्यस्वरूपाणाम-द्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरुरवार्द्रवनामानः एष पादार्घो वः स्वाहा ।

पुनः पूर्ववत् कृत्वा कुशादिकमादाय - (मावलीपट्टिको दुनामा कुश जल लिने)

ॐ अद्याऽमुकसगोत्राणमस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकाममुकशर्मणां सपत्नीकानां (वर्माणां, गुप्तानां) वसुरूद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्ध- सम्बन्धिनो विश्वेदेवाः पुरुरवार्द्रवनामानः एष पादार्घो वः स्वाहा ।

ततोऽपसव्येन पितृब्राह्मणयोश्चरणान् प्रक्षालयेत् । (अपसव्य भएर पितृब्राह्मण अगाडि दुना राख्ने र जल राखेर छर्कने)

ॐ नमोऽस्त्वनन्ताय० इति ।

यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे । तत्फलं पाण्डवश्रेष्ठ ! विप्राणां पादशौचने ॥

ततः पाद्यपात्रं वामहस्ते कृत्वा शन्नो देवीरिति मन्त्रं पठित्वा मोटकमादाय - (जलले सेचन गरी मोटक जल लिने)

ॐ अद्याऽमुकसगोत्राः अस्मत्पितृपितामहप्रपितामहाः अमुकाऽमुकाऽमुकशर्माणः सपत्नीकाः वसुरूद्रादित्यस्वरूपाः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एषपादार्घस्त्रेधा विभज्य युष्मभ्यं स्वधा ।

पुनः पूर्ववत् कृत्वा मोटकमादाय – (फेरि जलले सेचन गरी मावलीपट्टिको दुनामा मोटक, जल लिने)

ॐ अद्याऽमुकसगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकामुकशर्माणः (वर्माणः, गुप्तस्य) सपत्नीकाः वसुरूद्रादित्यस्वरूपाः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एष पादार्घस्त्रेधा विभज्य युष्मभ्यं स्वधा । ततः सव्येनाचम्य विश्वदेवब्राह्मणौ गृहं प्रवेशयेत् । (सव्य भएर आचमन गर्ने)

ब्राह्मणानां गृहप्रवेशनम् (विश्वेदेवाऋषिलाई निमन्त्रणा गर्ने र स्वागत गरी पूर्व फर्काउने)

ॐ आगता यूयम् । ॐ सुस्वागता वयम् । ॐ इदमासनमास्यताम् । ॐ आस्यते इति प्रतिवचनम् ।
ॐ भूर्भुवः स्वः इति मन्त्रेण विश्वदेवब्राह्मणौ पूर्वाभिमुखौ उपवेशयेत् ॥ ततोऽपसव्येन –

(अपसव्य हुने, पितृब्राह्मणलाई उत्तर फर्काउने)

ॐ आगता यूयम्, ॐ सुस्वागता वयम् । ॐ इदमासनमास्यताम् । ॐ आस्यते इति प्रतिवचनम् ।
ॐ भूर्भुवः स्वः इति मन्त्रेण पितृब्राह्मणौ उदङ्मुखौ उपवेशयेत् । सर्वत्र प्रश्नेषु पंक्तिमूर्धन्यं पृच्छेत् ।

कर्मपात्रनिर्माणम्

(पुनः कर्मपात्र वनाउन सव्य हुने र वनाउने)

ततः सव्येन ॐ कर्मपात्रमहं करिष्ये, ॐ कुरुष्व इत्यनुज्ञातः सन्,

ॐ यद्देवा देवहेडनम् इति मन्त्रत्रयेण देवकर्मपात्रं कुर्यात् -

ॐ यद्देवा देवहेडनं देवासश्चकृमा व्वयम्। अग्निर्म्मा तस्मादेनसो विश्वान्मुञ्चत्व ँहसः ॥

ॐ यदि दिवा यदि नक्तमेना ँसि च कृमा व्वयम्। वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्व ँहसः ॥

ॐ यदि जाग्रद्यदि स्वप्नमेना ँसि च कृमा व्वयम्। सूर्योमा तस्मादेनसो विश्वान्मुञ्चत्व ँहसः ॥

इति देवान् आवाह्य -

(पवित्र, जल, फूल, जौ, चन्दन राख्ने)

ॐ पवित्रेस्थ इति मन्त्रेण पवित्रं क्षिपेत्। ॐ शन्नो देवीरिति मन्त्रेण जलम्। ॐ श्रीश्चते इति मन्त्रेण पुष्पम्। ॐ यवोऽसीति मन्त्रेण यवान्। ॐ गन्धद्वारामिति गन्धम्। ततः अपसव्यं कृत्वा ॐ कर्ममात्रमहं करिष्ये। ॐ कुरुष्व इत्यनुज्ञातः सन्।

(अपसव्य भई पितृपट्टिको कर्मपात्र वनाउने)

ॐ यद्देवा देवहेडनम् इति मन्त्रत्रयेण पितृकर्मपात्रं कुर्यात्। ॐ पवित्रेस्थ इति मन्त्रेण पवित्राणि क्षिपेत्॥

ॐ शन्नो देवीरिति जलम्। ॐ तिलोसीति मन्त्रेण मन्त्रेण तिलान्। ॐ श्रीश्चते इति मन्त्रेण पुष्पम्।

ॐ गन्धद्वारामिति गन्धम्।

ततः सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय -

(सव्य भई जल सेचन गर्ने)

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु इत्युक्त्वा श्राद्धदेशे द्रव्याण्यात्मानं च सिञ्चेत्। तत्कुशादिकमादाय -

प्रतिज्ञासंकल्पः

(प्रतिज्ञा संकल्प गर्ने)

अद्येत्यादि अमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नी-कानां वसुरूद्रादित्यस्वरूपाणां तथामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां पुरूरवार्द्रवनाम्नां विश्वेदेवपूर्वकाणामद्यकर्त्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धमेभिर्द्रव्यै रहं करिष्ये। इति प्रतिज्ञां कुर्यात्।

प्रार्थना

(नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ इति त्रिः।

ॐ सप्त व्याधा दशार्णेषु मृगाः कालाञ्जरे गिरौ। चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे॥

तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः। प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ॥

ये विप्रमुख्याः कुरुजाङ्गलेषु जातास्तथा दासकुले मृगाश्च।

कालाञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्र सिद्धाः॥

पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः॥ यत्र यत्र स्मरेद् विद्वान् पितृणां दत्तमक्षयम्॥

श्राद्धभूमौ गयां ध्यात्वा तथा देवं गदाधरम्। उभाभ्यां च नमस्कृत्य ततः श्राद्धं समारभेत्॥
गयागयो गयादित्यो गायत्री च गदाधरः। गया गयासुरश्चैव षड्गया मुक्तिदायकाः॥
ईशानविष्णुकमलासनकार्तिकेयवन्हित्रयार्करजनीशगणेश्वराणाम्।
क्रौञ्चामरेन्द्रकलशोद्भवकश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः॥
ॐ गयायै नमः। ॐ गदाधराय नमः इति च पठेत्।

दिग्बन्धनम्

(अपसव्य हुने)

ततोऽपसव्येन दिग्बन्धनं कुर्यात् - (मोटक र तिल लिई तिल पूर्वदेखि क्रमैले छर्कने)

तिलसहितमोटकमादाय तिलान् पूर्वादिक्रमेण वक्ष्यमाणमन्त्रैर्विकिरेत् -

ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम्। अपहताऽसुरा रक्षा ꣳसि व्वेदिषदः॥
ॐ तथा बर्हिषदः पान्तु याम्यां ये पितरः स्थिताः। अपहताऽसुरा रक्षा ꣳसि व्वेदिषदः॥
ॐ प्रतीचीमाज्यपास्तद्वत्। अपहताऽसुरा रक्षाऽसि व्वेदिषदः॥
उदीचीमपि सोमपाः। अपहताऽसुरा रक्षा ꣳसि व्वेदिषदः॥
ॐ उद्ध्वतस्त्वर्यमा रक्षेत्कव्यवाडनलोऽप्यधः। रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः॥
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे॥ ततः -

नीविबन्धनम्

(मोटक र फूल पछाडि कटीमा सिउरिने)

निहन्मि सर्वं यदमेध्यवद्भवेद्धताश्च सर्वेऽसुरदानवा मया।
रक्षांसि यक्षाः सपिशाचगुह्यका हता मया यातुधानाश्च सर्वे॥
इति मोटकं कट्यां धारयेत्। तिलसहितकुशखण्डत्रयं गृहीत्वा -

भूतोत्सादनम्

(तीनवटा कुशका टुक्रा र तिल दक्षिणतिर अर्पण गर्ने)

ॐ प्रयान्तु दूरतः सर्वे दैत्येया दानवास्तथा। सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशांस्तिलान्॥
इति दक्षिणस्यां क्षिपेत्। ततः सव्येन - (सव्य हुने)

विष्णोः स्मरणम्

(विष्णु स्मरण गर्ने)

ॐ नमो नमस्ते गोविन्द पुराणपुरुषोत्तम।
इदं श्राद्धं हृषीकेश रक्षतां सर्वतो दिशः॥ इति रक्षार्थं विष्णुस्मरणम्।

आसनम्

(सव्य नै भएर घरपट्टिको विश्वेदेवा ब्राह्मणमा कुश राख्ने)

सव्येनैव कुशमादाय -

ॐ अद्यामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां

वसुरूद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां विश्वेषां देवानां पुरुरवार्द्रवनाम्नामिदं कौशमासनं वः स्वाहा ।

पुनः कुशमादाय - (मावलीपट्टिको विश्वेदेवा ब्राह्मणमा कुश राख्ने)

ॐ अद्यामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां विश्वेषां देवानां पुरूरवार्द्रवनाम्नामिदं कौशमासनं वः स्वाहा । इति देवब्राह्मणाय कुशरुपमासनं दद्यात् ।

ततोऽपसव्यं कृत्वा मोटकमादाय - (अपसव्य भई पितृब्राह्मणमा मोटक राख्ने)

ॐ अद्यामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसु-रूद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदं मोटकरुपमासनं त्रेधा विभज्य युष्मभ्यं स्वधा ।

पुनर्मोटकमादाय - (मावलीपट्टिको पितृब्राह्मणमा मोटक राख्ने)

ॐ अद्यामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्य-स्वरुपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदं मोटकरुपमासनं त्रेधा विभज्य युष्मभ्यं स्वधा ।

ततः सव्येन अञ्जलिं बद्ध्वा विश्वान्देवानावाहयेत् ।

आवाहनम्

(सव्य भई विश्वेदेवा ब्राह्मणलाई जल, कुश र जौले आवाहन गर्ने)

ॐ अद्यामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां तथा अमुकसगोत्राणामस्मन्मातामहप्रमातामह- वृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्य महालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वान् देवान् पुरूरवार्द्रव नाम्नः आवाहयिष्ये । ॥ ॐ आवाहय इति प्रतिवचनम् ॥

ॐ विश्वेदेवासऽआगत श्रृणुतामऽइम ꣳ हवम् । एदं बर्हिर्निषीदत ॥ इति मन्त्रेणाऽऽवाह्य -

ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीः ॥ इति मन्त्रेण श्राद्धदेशे यवान् विकीर्य - (जौ छर्कने)

ॐ विश्वेदेवाः श्रृणुतेम ꣳ हवम्मे येऽअन्तरिक्षे यऽउपद्यविष्ठ ।
येऽअग्निजिह्वाऽउत वा यजत्राऽआसद्यास्मिन्बर्हिषिमादयध्वम् ॥ इति मन्त्रं पठित्वा -

ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः । ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥ इति पठेत् ।

ततोऽपसव्येनाञ्जलिं बद्ध्वा पितृनावाहयेत् - (अपसव्य भई पितृब्राह्मणलाई जल, कुश र तिलले आवाहन गर्ने)

ॐअद्यामुकसगोत्रानस्मत्पितृपितामहप्रपितामहान्अमुकामुकामुकशर्मणः(वर्माणः,गुप्तस्य)सपत्नीकान्वसुरूद्रादित्यस्वरूपान् तथाऽमुकसगोत्रानस्मन्मातामहप्रमातामहवृद्धप्रमातामहान् अमुकामुकामुकशर्मणः सपत्नीकान् वसुरूद्रादित्य-स्वरूपान् अद्यकर्तव्यमहालया परपक्षान्तर्गतपार्वणश्राद्धे आवाहयिष्ये । ॐ आवाहय इति प्रतिवचनम् ।

ॐ उशन्तस्त्वा निधीमह्यु शन्तः समिधीमहि ।
उशन्नुशतऽआवह पितृन्हविषेऽअत्तवे ॥ इति मन्त्रेणावाह्य । (तिल छर्कने)

ॐ अपहताऽअसुरा रक्षा ꣳसि व्वेदिषदः । इति मन्त्रेण श्राद्धदेशे तिलान् विकीर्य ।

ॐ आयन्तु नः पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः ।
अस्मिन् यज्ञे स्वधया मदन्तोधि ब्रुवन्तु तेवन्त्वस्मान् ॥ इति मन्त्रं पठेत् ।

हस्तार्घः (सव्ये हुने र विश्वेदेवा ब्राह्मण अगाडि दुईवटा दुना राख्ने)

ततः सव्येन विश्वेदेवब्राह्मणौ पृच्छेत् ।

ॐ हस्तार्घपात्रम् अहं करिष्ये । ॐ कुरुष्व इत्यनुज्ञातः सन् पुटकद्वयमग्रे कृत्वा । (पवित्र राख्ने)

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।

इति मन्त्रेण पुटकद्वये पूर्वाग्रे द्वे पवित्रे धारयेत् ।

ॐ शन्नो देवीरिति मन्त्रेण पुटकद्वये जलं क्षिपेत् । (जल राख्ने)

ॐ यवोसि० इति मन्त्रेण यवान् क्षिपेत् । (जौ राख्ने)

ॐ श्रीश्चते लक्ष्मीरिति मन्त्रेण पुष्पाणि क्षिपेत् । (फूल राख्ने)

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । (चन्दन राख्ने)

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ इति मन्त्रेण गन्धं क्षिपेत् ।

ॐ हस्तार्घपात्रं संपन्नम्, इति देवब्राह्मणं पृच्छेत् । (ब्राह्मणले सोध्ने)

ॐ सुसंपन्नम्, इति तेनोक्ते । (कर्तालै भन्ने)

ॐ हस्तार्घपात्रम् उत्थापयामि, ॐ उत्थापयस्व,

इति वचनानन्तरम् हस्तार्घपात्रं वामहस्ते कृत्वा– (हस्तार्घपात्र उठाउने)

ॐ नमो नारायणाय, इति मन्त्रेण पुष्पसहितं पूर्वाग्रहं पवित्रं विप्रकरे धृत्वा अधोमुखेन दक्षिणकरेण वामकर-

स्थपुटकमुखं पिधाय – (फूल र पवित्र चढाई हात उत्तानो पारी ढाक्ने)

ॐ या दिव्या आपः पयसा सम्बभूवुर्याऽअन्तरिक्षाऽउत पार्थिवीर्याः ।

हिरण्यवर्णा यज्ञियास्ता नऽआपः शिवाः स ꣳ स्योना सुहवा भवन्तु ॥

इति मन्त्रेणार्घपात्रस्थजलमभिमन्त्र्य कुशयवजलान्यादाय - (कुश, जौ, जल लिने)

ॐ अद्यामुकसगोत्राणामस्मपितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (शर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरक्षान्तर्गतपार्वणश्राद्धेश्राद्धसम्बन्धिनोविश्वेदेवाःपुरूरवार्द्रवनामानःएष हस्तार्घो वः स्वाहा ॥ (मावलीपट्टिको विश्वेदेवाब्राह्मणतर्फ जल चढाउने र पवित्र फूल राख्ने र दुना ढाक्ने)

इति देवब्राह्मणकरे अर्घं दद्यात् । अर्घे पुनः प्रत्यर्घमस्तु इति सपुष्पं पवित्रमर्घपात्रे प्रत्यानीय पवित्रसहितं तदर्घपात्रं भूमौ धृत्वा अपरार्घपात्रं वामहस्ते कृत्वा, सर्वं पूर्ववदेव विधाय यवजलकुशानादाय - (मावलीपट्टि कुश जौ लिने)

ॐ अद्यामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां (शर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवार्द्रवनामानः एष हस्तार्घो वः स्वाहा । (पवित्र र फूल त्यही दुनामा राख्ने)

इति देवब्राह्मणकरे अर्घं दद्यात् । अर्घे पुनः प्रत्यर्घमस्तु, इति पूर्ववत्कृत्वा तदर्घपात्रमपि भूमौ धृत्वा ततः अर्घपात्रद्वयस्थजलेन - (जल आँखामा लगाउने)

ॐ तच्चक्षुरिति मन्त्रेण चक्षुः स्पर्शः कार्यः । तदनन्तरं पवित्रसहिते देवार्घपात्रे - (दुना ब्राह्मणको दक्षिणपट्टि राख्ने)

ॐ विश्वेभ्यो देवेभ्यः स्थानमसि, इति वाक्येन स्वस्वविश्वेदेवदक्षिणपार्श्वे उत्ताने स्थापयेत् ।

ततोऽपसव्येन हस्तार्घपात्राण्यहं करिष्ये इति पितृब्राह्मणं पृच्छेत्। (अपसव्य भई ३+३=६ दुना पितृऋषिअगाडि राख्ने)

ॐ कुरुष्व- इत्यनुज्ञातः सन् पित्रादिमातामहाद्यर्घपात्रार्थं स्वाग्रमेकमेकं पुटकं संस्थाप्य तयोः पुटकयोर्दक्षिणे द्वौ द्वौ पुटकौ निधाय तेषु पुटकेषु षट्सु - (हस्तार्घपात्र बनाउन दुनामा पवित्र राख्ने)

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः। इति मन्त्रेण उत्तराग्राणि पवित्राणि धारयेत्। ॐ शन्नोदेवीरिति मन्त्रेण तत्र जलं क्षिपेत्। (जल राख्ने)

ॐ तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान्पृणाहि नः स्वाहा॥ इति मन्त्रेण तिलान् क्षिपेत्। (तिल राख्ने र फूल र चन्दन चढाउने)

ॐ श्रीश्चते लक्ष्मीरिति मन्त्रेण पुष्पाणि क्षिपेत्। ॐ गन्धद्वारामिति मन्त्रेण चन्दनं क्षिपेत्।

ॐ हस्तार्घपात्राणि संपन्नानि इति पितृब्राह्मणं पृच्छेत्। (ब्राह्मणले सोध्ने)

ॐ हस्तार्घपात्राणि सुसंपन्नानि इति नोक्ते- (कर्तालेभन्ने)

ॐ हस्तार्घपात्रमुत्थापयामि ॐ उत्थापयस्व इति वचनानन्तरम् (हस्तार्घपात्र उठाउने)

प्रथमं पित्र्यर्घपात्रं दक्षिणेनादाय वामे कृत्वा ॐ नमो नारायणाय इति मन्त्रेण सपुष्पं पवित्रं पितृतीर्थेन विप्रकरे धृत्वा वामकरस्थहस्तार्घपात्रमुखमुत्तानदक्षिणकरेण पिधाय - (पवित्र र फूल घुमाएर चढाई दुना ढाक्ने)

ॐ या दिव्या आपः पयसा सम्बभूवुर्याऽअन्तरिक्षा उतऽ पार्थिवीर्याः।
हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः स ऽ स्योना सुहवा भवन्तु॥

इति मन्त्रेणार्घपात्रस्थजलमभिमन्त्र्य तिलजलमोटकमादाय - (तिल, जल, मोटक लिने)

ॐ अद्यामुकसगोत्रास्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) सपत्नीकवसुस्वरुपाद्यकर्तव्य महालयापरपक्षान्तर्गत पार्वणश्राद्धे एष हस्तार्घस्ते स्वधा। इति ब्राह्मणकरे दद्यात्। (जल चढाई पवित्र र फूल त्यही दुनामा राख्ने)

ॐ अर्घे पुनः प्रत्यघमस्तु, इति सपुष्पं पवित्रमर्घपात्रे प्रत्यानीय, पुष्पपवित्रसहितं तर्दघपात्रं भूमौ धृत्वा एवं यथाक्रमेण पितामहादिभ्यः पञ्चभ्यो दद्यात्। (माथिकै अनुसार पितामह प्रपितामहको पनि हस्तार्घ गर्ने)

ततः प्रपितामहार्घपात्रस्थजलादिकं पितामहार्घपात्रे कृत्वा तत्सर्वं पित्रर्घपात्रे कृत्वा पित्रर्घ पात्रमुत्तानं पितामहार्घपात्रोपरि धृत्वा तदुभयपात्रमुत्तानं प्रपितामहार्घपात्रोपरि धृत्वा एवं मातामहार्घपात्राणि अपि कृत्वा, सव्येन तत्रस्थजलेन। (सव्य भई जल आँखामा लगाउने)

ॐ तच्चक्षुरिति मन्त्रेण चक्षुः स्पर्शः कार्यः॥

ततोऽपसव्येन एकत्रकृतं पित्रर्घपात्रं गृहीत्वा पितृद्विजस्याऽऽसनवामभागे- (अपसव्य भएर हस्तार्घपात्र एकत्र पारी घोप्ट्याउने)

ॐ पितृभ्यः स्थानमसीति न्युब्जं कुर्यात्, तदुपरि कुशत्रयं दद्यात्। एवमेकत्रकृतं मातामहाद्यर्घपात्रं गृहीत्वा मातामहद्विजस्याऽऽसन वामभागे- (मातामह प्रमातामह वृद्धप्रमातामहलाई माथिको जस्तै गर्ने)

ॐ मातामहेभ्यः स्थानमसीति न्युब्जं कुर्यात्। तदुपरि कुशत्रयं दद्यात्। (एकत्र गरी दुना घोप्ट्याउने)

अर्चनम् अर्पणञ्च

(सव्य भई विश्वेदेवाब्राह्मणमा पूजा गर्ने)

ततः सव्येन- ॐ अर्चयिष्ये इति देवब्राह्मणौ ब्रूयात् - (कुश जल लिने)

ॐ अर्चय इत्युक्ते गन्धपुष्पाक्षततताम्बूलयज्ञोपवीतवस्त्रादिभिः समभ्यर्च्य धूपदीपौ च कृत्वा, कुशादिकमादाय - ॐ अद्याऽमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसु-रूद्रादित्यस्वरूपाणां अद्य कर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवार्द्रवनामानः एतान्यर्चनानि अत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतद्रव्यवासांसि वः स्वाहा । इत्युत्सृजेत् ।

(विश्वेदेवाब्राह्मणमा कुश राख्ने)

पुनः कुशादिकमादाय - (पुनः कुश जल लिने)

ॐ अद्यामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवार्द्रवनामानः एतान्यर्चनानि अत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतद्रव्यवासांसि वः स्वाहा । इत्युत्सृजेत् ॥

(अर्को ब्राह्मणमा कुश राख्ने)

ततोऽपसव्येन -

ॐ अर्चयिष्ये इति पितृब्राह्मणौ पृच्छेत् । (अपसव्य हुने र पितृब्राह्मणमा पूजा गर्ने)

ॐ अर्चय इत्युक्ते गन्धादिभिरभ्यर्च्य मोटकादिकमादाय - (मोटक जल लिने र ऋषिमा राख्ने)

ॐ अद्यामुकसगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणः (वर्माणः, गुप्त) सपत्नीका वसुरूद्रादित्यस्वरूपा अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एतान्यर्चनान्यत्र गन्धपुष्पाक्षत- धूपदीपनैवेद्यताम्बूलयज्ञोपवीतद्रव्यवासांसि त्रेधा विभज्य युष्मभ्यं स्वधा । पुनर्मोटकमादाय - (पुनः मोटक जल, लिने र ऋषिमा राख्ने)

ॐ अद्यामुकसगोत्रा अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकामुकशर्माणः (वर्माणः, गुप्त) सपत्नीका वसुरुद्रादित्यस्वरूपा अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एतान्यर्चनान्यत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतद्रव्यवासांसि त्रेधा विभज्य युष्मभ्यं स्वधा ।

सव्येन विश्वेदेवब्राह्मणहस्तयोः । (सव्य भई विश्वेदेवा ब्राह्मणमा जल चढाउने)

ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु । इति जलं दद्यात् । ॐ अस्तु । इति प्रतिवचनम् ।

अपसव्येन पितृब्राह्मणहस्तयो - (अपसव्य भई पितृब्राह्मणमा जल चढाउने)

ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु । इति जलं दद्यात् । ॐ अस्तु । इति प्रतिवचनम् ।

चतुष्कोणमण्डलनिर्माणम् सव्येन - (सव्य भएर चतुष्कोण बनाउने)

ॐ यथा चक्रायुधोविष्णुस्त्रैलोक्यं परिरक्षति । एवं मण्डलभस्मैतत् सर्वभूतानि रक्षतु ॥

इति दक्षिणावर्तेनदेवब्राह्मणयोर्भोजनस्थाने चतुर्दिक्ष्वासनसहितं चतुष्कोणमण्डलं कुर्यात् ।

अपसव्येन पूर्वोक्तमन्त्रेण पितृब्राह्मणयोर्भोजनस्थाने वामावर्तेन चतुर्दिक्ष्वासनसहितं –

चतुष्कोणमण्डलं कुर्यात् । (अपसव्य भएर पितृब्राह्मण अगाडि पनि चतुष्कोण बनाउने)

अग्नौकरणम्

(अपसव्य नै भएर एउटा दुना राख्ने)

अपसव्येनैवाग्नौकरणं दक्षिणाभिमुखः प्राचीनावीती पातितवामजानुः पुटकादौ सघृतमन्नं कृत्वा-

ॐ अग्नौकरणमहं करिष्ये इति पितृब्राह्मणं पृच्छेत् ।

ॐ कुरुष्व इत्यनुज्ञातः सन् पितृब्राह्मणकरे जलपात्रे वा जुहुयात् - (दुनामा कुशको टुक्रालै घ्यू अन्न खसाल्ने)

ॐ अग्नये कव्यवाहनाय स्वाहा, इदमग्नये कव्यवाहनाय । (सव्य भई विश्वेदेवा र अपसव्य भई पितृपट्टिको सिदामा पनि घ्यू अन्न खसाल्ने)

ॐ सोमाय पितृमते स्वाहा, इदं सोमाय पितृमते इत्याहुतिद्वयं जुहुयात् । हुतशेषान्नं सव्येन विश्वेदेवब्राह्मणपात्रोपरि क्षिपेत् । अपसव्येन पितृब्राह्मणपात्रेषु क्षिपेत् ।

भूस्वामी

(अपसव्य नै भएर एक भाग सिदा राख्ने)

ततोऽपसव्येनैव तिलघृतमधुजलयुतमोटकादिसहितमन्नमादाय दक्षिणाभिमुखो भूत्वा - (सङ्कल्प गर्ने)

ॐ इदमन्नं सजलमेतद्भूस्वामिपितृभ्यो नमः । इत्युत्सृजेत् ।

अन्नसङ्कल्पः

(सव्य भई विश्वेदेवा ब्राह्मण अगाडि दुईवटा सिदा राख्ने)

सव्येन तत्र विश्वान् देवान् ध्यायन्सोपस्करयवजलयुतमन्नमुपनीय मधुनाभिघार्य

ऋजुहस्ताभ्यामन्नपात्रमालभ्य - (दायाँ हात वायाँ र वायाँ हात दायाँ पारी सिदालाई ढाक्ने)

ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा ।

ॐ इदं विष्णुरित्यादि सुरे इत्यन्तं कृष्ण कव्यमिदं रक्ष मदीयमिति च पठित्वा (वूढी औंलाले सिदा सामग्री देखाउने)

विप्रदक्षिणाङ्गुष्ठं गृहीत्वा - ॐ इदमन्नमित्यन्ने, ॐ इमाआपः इति जले, ॐ इदमाज्यमिति घृते, ॐ इदं हविरिति पुनरन्ने, ॐ एतान्युपकरणानि इति क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य । (जौ छर्ने)

ॐ यवोसिऽ इति मन्त्रेण यवानन्नोपरि विकीर्य कुशयवजलान्यादाय वामहस्ताङ्गुल्यङ्गुष्ठैः क्रमेणान्नमपश्च स्पृष्ट्वा - (सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिभ्यो विश्वेभ्यो देवेभ्यःपुरुरवार्द्रवनामभ्यः अद्यकर्तव्यमहालयापरपक्षान्तर्गत-पार्वणश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणमक्षय्यतृप्तिहेतोर्वः स्वाहा । इति कुशादिकमुत्सृजेत् ।

(कुश भूमिमा राख्ने)

श्राद्धान्नस्य च संकल्पो भूमावेव प्रदीयते । हस्तेषु दीयमानं तत्पितृभ्यो नोपतिष्ठते ॥

पुनः सर्वं पूर्ववत् विधाय कुशादिकमादाय – (पुनः कुश लिई सङ्कल्प गर्ने र कुश ब्राह्मणमा राख्ने)

ॐ अद्यामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसु-रूद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिभ्यो विश्वेभ्यो देवेभ्यः पुहरवार्द्रव नामभ्यः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणमक्षय्तृप्तिहेतोर्वः स्वाहा । इति कुशादिकमुत्सृजेत् ।

ततोऽपसव्येन सोपस्करं तिलजलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य-

(अपसव्य भई दुईवटा सिदा पितृब्राह्मण अगाडि राख्ने र हातले ढाक्ने)

ॐ पृथिवी ते पात्रं द्यौरपिधानं० इत्यादि स्वाहान्तं पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा- (वूढी औंलाले देखाउने)
ॐ इदमन्नम्, ॐ इमा आपः, ॐ इदमाज्यम्, ॐ इदं हविरिति ।
ॐ एतान्युपकरणानीति क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य - (तिल छर्ने)
ॐ अपहताऽअसुरा रक्षा ꣳसि व्वेदिषदः, इति अन्नोपरि तिलान् विकीर्य मोटकादीन्यादाय वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेणान्नमापश्च स्पृष्ट्वा - (मोटक लिई सङ्कल्प गर्ने)
ॐ अद्यामुकसगोत्रायास्मत्पित्रेऽमुकशर्मणे (वर्मणे, गुप्ताय) सपत्नीकाय वसुस्वरूपाय अद्यकर्तव्यमहालया-परपक्षान्तर्गतपार्वणश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणमक्षय्यतृप्तिहेतोस्ते स्वधा । इति पितृब्राह्मणसमीपे भूमौ एव मोटकादिकमुत्सृजेत् । एवं पितामहादिभ्यः पञ्चभ्यो दद्यात् ।

(पितामह, प्रपितामह, मातामहादिको पनि यसै अनुसार गर्ने)
(महालय श्राद्धमा ५ ओटा सिदा गर्ने चलन छ तर विधिअनुसार नौ ओटा गर्नुपर्ने हुन्छ)

अपोशानम्

(सव्य भई विश्वेदेवा ब्राह्मणमा जल चढाउने)
ततः सव्येन देवब्राह्मणकरयो - ॐ भवन्तौ प्राशयेताम् । इत्यपोशानं दद्यात् ।
अपसव्येन पितृब्राह्मणकरेषु - (अपसव्य भई पितृब्राह्मणमा जल चढाउने)
ॐ भवन्तः प्राशयन्तु इत्यपोशानं दत्त्वा सव्येन श्राद्धकर्ता कुशोपरि विशन् -

प्रार्थना

(सव्य भई आफूमुनि कुश ओछ्याएर नमस्कार गर्ने)
ॐ मधुव्वाता० । ॐ मधुनक्त० । ॐ मधुमान्नः० । इति पठित्वा, मधु ३ ।
ॐ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु श्रीभास्करस्य प्रसादतः ॥
ॐ नमस्तुभ्यं विरुपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति पठेत् ॥

ब्राह्मणभोजनम्

(पितृलाई भोजन चढाउने र ब्राह्मणलाई भोजन गराउने)
यथासुखं जुषध्वम् इति वचनानन्तरं ते ब्राह्मणा मौनिनो भूत्वा भुञ्जीरन् संज्ञया च भक्ष्यं प्रार्थयेयु : । तत सव्येन सव्याहृतिकां गात्रयीं जपित्वा, मधुव्वातेति ऋचः पठित्वा पितृसूक्तं च पठेत् । (सव्य भई गायत्री जप्ने)
ब्राह्मणानां यत्र यत्रेच्छोपलभ्यते तत्तत् प्रयच्छन् मन्दं मन्दं भोजयेत् । (ऋषिलाई जल चढाउने)
ततो ब्राह्मणान् तृप्तान् ज्ञात्वा, ॐ जलगण्डूषमिदं ते इति उभाभ्यां विश्वेदेवब्राह्मणाभ्यां प्रत्येकं प्रत्यपोशानं दद्यात् । ततः पितामहान्नपात्रसन्निधौ आस्तृत दक्षिणाग्रकुशत्रयायां भूमौ अपसव्येन मोटकादिकमादाय विकिरासनं दद्यात् । (अपसव्य हुने)

विकिरासनम्

(विकरको आसनको निमित्त मोटक लिने र कुश माथि राख्ने)
असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् । उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ॥
इति मन्त्रेण मोटकरूपमासनमास्तृतकुशोपरि उत्सृजेत् । सतिलघृतमन्नमादाय जलेनाप्लाव्य मोटकादिकं चादाय-

विकिरदानम्

(तिल, घ्यू, अन्न या पायस, मोटक, जल सहित दुनालाई घोप्ट्याई औंठी फुकाली थिच्ने)

अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम । भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥

इति मन्त्रेणास्तृतकुशोपरि अन्नं विकिरेत् । (सव्य भएर आचमनी गरी गायत्री जप्ने)

ततः कुशान् परित्यज्य, हस्तौ पादौ प्रक्षाल्य, सव्येन द्विराचम्य, गायत्रीं जपित्वा, मधुव्वाता० इत्यादि पठेत् ।

सव्येनैवाञ्जलिं बध्वा विश्वेदेवब्राह्मणौ प्रति प्रश्नः- (सव्य नै भएर विश्वेदेवाब्राह्मणलाई प्रश्न गर्ने)

ॐ तृप्ताः स्थः । ॐ तृप्ताः स्म इति प्रतिवचनम् । ॐ शेषमन्नं किं क्रियताम् इति प्रश्नः । ॐ इष्टैः सह भुज्यताम् इति प्रतिवचनम् । अपसव्येन – (अपसव्य भई पितृब्राह्मणहरूलाई प्रश्न गर्ने)

ॐ जलगण्डूषमिदं ते, इति पितृब्राह्मणाभ्यां प्रत्येकं प्रत्यपोशानं दद्यात् । अपसव्येनैव पितृब्राह्मणौ प्रति प्रश्नः, ॐ तृप्ताः स्थ ? ॐ तृप्ताः स्म इति प्रतिवचनम् । ॐ शेषमन्नं किं क्रियताम् ? इष्टैः सह भुज्यताम् इति प्रतिवचनम् । ॐ पिण्डदानमहं करिष्ये, इति उभयत्र पृच्छेत् । ॐ कुरुष्व इत्यनुज्ञातः सन् ।

पिण्डवेदिनिर्माणम् संस्कारश्च

(दक्षिणतिर थोरै ओरालो पारी बालुवाको वेदी निर्माण गर्ने)

पिण्डदानार्थं हस्तैकपरिमितां चतुरस्रां चतुरङ्गुलोच्छ्रितां सैकतादिकां दक्षिणप्लवां पिण्डिकां निर्माय पिण्डिकामध्ये वामेन पाणिना दर्भपिञ्जुलीं गृहीत्वा, दक्षिणहस्ते कृत्वा सव्योपगृहीतदक्षिणपाणिना -(वेदीमा कुशले रेखा कोर्ने)

ॐ अपहताऽअसुरा रक्षा ꣳसि व्वेदिषदः

इति मन्त्रेण दक्षिणाग्रं रेखाद्वयं कृत्वा दर्भपिञ्जुलीमुत्तरस्यां क्षिपेत् । तदुपरि - (वेदीमा धूप वा कोइला घुमाउने)

ॐ ये रुपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति ।
परा पुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकान् प्रणुदात्यस्मात् ॥

इति मन्त्रेणाङ्गारं भ्रामयित्वा, तदङ्गारं दक्षिणस्यां क्षिपेत् । (जल छर्की फूल ओछ्याउने)

ततो जलेन शन्नोदेवीरिति पिण्डिकासेचनम्, तदनु छिन्नमूलकुशान् दक्षिणाग्रान् पिण्डिकायां आस्तीर्य सव्येन-

ॐ देवताभ्यः० इति पठेत् । (सव्य भई नमस्कार गर्ने)

अवनेजनम्

(अपसव्य हुने)

अपसव्यं विधाय एकं पुटकं वामहस्ते कृत्वा मोटकादिकमादाय - (दुनामा जल राखी मोटक लिई सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्र अस्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) सपत्नीकवसुस्वरुपाद्यकर्तव्य महालयापरपक्षान्तर्गत-पार्वणश्राद्धे पिण्डस्थानेऽत्रावने निक्ष्व ते स्वधा। इति छिन्नमूलकुशोपरि अवनेजनं दद्यात्। एवं पितामहादिभ्यः पञ्चभ्यो दद्यात् । तदर्थं तत्तत्पिण्डार्थमवनेजनं च देयम् । (मोटक वेदीमाथि राख्ने र अरू पिण्डलाई पनि आसन दिने)

पिण्डदानम्

(महालयश्राद्धमा कतै १६ र कतै तर्पण दिइएका सबै पितृहरूलाई पिण्ड दिने चलन छ। तर विधिअनुसार ६ ओटा पिण्ड दिनुपर्ने हुन्छ।) (अब पहिले पिताको पिण्ड लिने)

ततःपिण्डान्निर्मायमोटकादीनिप्रथमपिण्डंचादायवामहस्तेपुटकादिस्थजलमादाय-ॐअद्यामुकसगोत्रअस्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) सपत्नीक वसुस्वरूप अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एष पिण्डोऽमृतस्वरूपोऽक्षय्य-तृप्तिहेतोस्ते स्वधा। इत्यवनेजनोपरि पिण्डं दद्यात्। (पितामह, प्रपितामह, मातामह, प्रमातामह, वृद्धप्रमातामहहरूको पिण्ड माथिको अनुसार नै दिने)

एवं पितामहादिभ्यः पञ्चभ्यः अवनेजनोपरि पिण्डं दद्यात्। (कुशले हात पुछ्ने र सव्य भई ६ पटक आचमन गर्ने)

ततः आस्तृतकुशमूलेन लेपभागभुजस्तृप्यन्तु इति करं प्रोक्ष्य सव्यं कृत्वा द्विराचम्य हरिं स्मरेत्।

पितृध्यानम्

(हरि हरि भन्दै सव्य नै भएर पितृको ध्यान गर्न फूल, अक्षता र चन्दन लिने)

ततः सव्येनैव पुष्पादीन्यादाय पित्रादीनुद्दिश्य -

ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्। इति वामावर्तेन वेद्या दक्षिणस्यां दिशि उत्तराभिमुखो भूत्वा श्वासं नियम्य भास्करमूर्तीन् पितॄन् ध्यायन्। (अपसव्य भई फूल र चन्दन पिण्डमा चढाउने)

अपसव्यं कृत्वा दक्षिणावर्तेन आसने समागत्य दक्षिणाभिमुखो भूत्वा - ॐ अमीमदन्तपितरो यथाभागमावृषायिषत। इति मन्त्रेण पुष्पादिकं पिण्डेषु क्षिपेत्।

प्रत्यवनेजनम्

(दुनामा जल राख्ने)

ततोऽप्रत्यवनेजनपात्रं वामहस्ते कृत्वा मोटकादिकमादाय - (मोटक लिई सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्रास्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) सपत्नीक वसुस्वरुप अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदं पिण्डप्रत्यवनेजनं ते स्वधा। इति पितृपिण्डे प्रत्यवनेजनं दद्यात्। (प्रत्येक पिण्डमा जल चढाउने)

एवं पितामहादिपञ्चपिण्डेषु प्रत्यवनेजनं दद्यात्। (कम्मरमा सिउरेको मोटक फूल खसाल्ने र सव्य भई आचमन गर्ने)

ततो नीवीं विस्रंस्य सव्यं कृत्वा आचम्य हरिं स्मरेत्। (हरि हरि जप्ने)

सूत्रदानम्

(अपसव्य भई धागो पहेँलो बनाई पिण्डमा चढाउने)

ततः अपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय -

ॐ नमो वः पितरो रसाय १, नमो वः पितरः शोषाय २, नमो वः पितरो जीवाय ३, नमो वः पितरः स्वधायै ४, नमो वः पितरो घोराय ५, नमो वः पितरो मन्यवे ६, नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वः पितरो देष्मै तद्वः पितरो व्वासः आधत्त॥

इति मन्त्रेण षट्कृत्वो नमस्कारं कुर्वन् प्रत्येकं पिण्डोपरि सूत्रं दद्यात्।

पिण्डपूजनम् अर्पणञ्च

(सबै पूजा सामग्रीले पिण्ड पूजा गर्ने)

ततः क्रमेण प्रत्येकं पिण्डान् गन्धादिभिः संपूज्य धूपदीपौ च कारयेत् । मोटकादिकमादाय- ॐ अद्यामुकसगोत्राः अस्मत्पितृपितामहाप्रपितामहाः अमुकामुकामुकशर्माणः सपत्नीकाः वसुरूद्रादित्यस्वरुपाः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एतानि पिण्डार्चनानि अत्रसूत्रगन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानि त्रेधा विभज्य युष्मभ्यं स्वधा। इति पित्रादिभ्यो गन्धादिकमुत्सृजेत् । पुनरपि मोटकादिकमादाय - (मोटक जल लिने र र पिण्डमा राख्ने)

ॐ अद्यामुकसगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकामुकशर्माणः सपत्नीकाः वसुरूद्रादित्यस्वरूपाः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एतानि पिण्डार्चनानि अत्रसूत्रगन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानि त्रेधा विभज्य युष्मभ्यं स्वधा । इति मातामहादिभ्यो गन्धादिकमुत्सृजेत् ।

जलपुष्पतण्डुलादिदानम्

(सव्य भएर विश्वेदेवा ब्राह्मणमा जल, फूल, अक्षता चढाउने)

ततः सव्येन विश्वेदेवब्राह्मणकरयोः ॐ शिवा आपः सन्तु इति जलम् । ॐ सौमनस्यमस्तु इति पुष्पम् । ॐ अक्षतं चारिष्टमस्तु इति तण्डुलान् । प्रत्येकं दद्यात् । (अपसव्य भई पितृब्राह्मणमा चढाउने)

अपसव्येन पितृब्राह्मणकरयोः ॐ शिवा आपः सन्तु इति जलम् । ॐ सौमनस्यमस्तु इति पुष्पम् । ॐ अक्षतं चारिष्टमस्तु इति तण्डुलान् । प्रत्येकं दद्यात् । सव्येनाञ्जलिं बद्ध्वा पूर्वाभिमुखो भूत्वा इति पठेत् ।

प्रार्थना

(सव्य भएर नमस्कार गर्ने)

ॐ अपां मध्ये स्थिता देवाः सर्वमप्सुप्रतिष्ठितम् । ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ॥ लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे । लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे ॥ अक्षयं चास्तुमे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा । यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥

अभिषेचनम्

(यजमानले आफ्नो शिरमा अभिषेक गर्ने)

ततः कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत्-

ॐ अस्मत्कुले दीर्घमायुरस्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ यच्छ्रेयस्तदस्तु । ॐ यत् पापं तत् प्रतिहतमस्तु इति भूमौ, ॐ द्विपदे चतुष्पदेभ्यः शान्तिर्भवतु । ततोऽपसव्येन पिण्डशेषान्नं पिण्डसमीपे विकिरेत् । (अपसव्य भई पिण्डको शेष पिण्डकै छेउमा राख्ने)

अक्षय्योदकदानम्

(दुनामा तीर्थजल राख्ने र मोटक, जल लिई छुने)

वामहस्ते पुटकादिस्थजलं गृहीत्वा मोटकादिकमादाय -

ॐ अद्यामुकसगोत्रस्यास्मत्पितुरमुकशर्मणः (वर्मणः, गुप्तस्य) सपत्नीकस्य वसुस्वरूपस्य अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु । (पिण्डमा तीर्थजल चढाउने)

इति पितृपिण्डोपरि अक्षय्योदकं दद्यात् । एवं पितामहादिपञ्चभ्यो दद्यात् । ततः सव्येन कृताञ्जलिर्दक्षिणां दिशमवलोकयन् - (सव्य भएर पिण्डमा फेरि जल चढाउने)

ॐ अघोराः पितरः सन्तु इति पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् ।

आशिषः प्रार्थना

(सव्य नै भएर आशीषको लागि नमस्कार गर्ने)

(पहिले ब्राह्मणले भन्ने, पछि यजमानले भन्ने र फेरि ब्राह्मणले भन्ने)

सव्येनैव प्राङ्मुखोऽञ्जलिं बद्ध्वा आशिषः प्रार्थयेत्- ॐ गोत्रन्नो वर्धताम्, ॐ वर्धताम् इति प्रतिवचनम्। ॐ दातारो नोऽभिवर्धन्ताम् - ॐ वर्धन्ताम् इति प्रतिवचनम्। ॐ वेदाः वर्धन्ताम्, ॐ वर्धन्ताम् इति प्रतिवचनम्। ॐ सन्ततिर्वर्धताम्। ॐ वर्धताम् इति प्रतिवचनम्। ॐ श्रद्धा च नो माव्यगमत्, ॐ मागात् इति प्रतिवचनम्। ॐ बहुदेयं च नोऽस्तु, ॐ अस्तु इति प्रतिवचनम्। ॐ अन्नं च नो बहु भवेत्, ॐ भवतु इति प्रतिवचनम्। ॐ अतिथींश्च लभेमहि, ॐ लभध्वम् इति प्रतिवचनम्। ॐ याचितारश्च नः सन्तु, ॐ सन्तु इति प्रतिवचनम् ॐ मा याचिष्म कञ्चन, ॐ मा याचेथाः इति प्रतिवचनम्। ॐ एता सत्या आशिषः सन्तु। ॐ सन्तु इति प्रतिवचनम्॥

तिलककरणम्

(श्राद्धकर्तालाई ब्राह्मणले टीका लगाइदिने)

ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात्। ॐ यं कामं कामयते सोऽस्मै कामः समृध्यतामिति मन्त्रेण।

ततः अपसव्येन सपवित्रान् कुशान्न्युब्जपात्राधः स्थितान् पिण्डोपरि निक्षिप्य -

(अपसव्य भई घोप्टिएको दुनाको फूल, पवित्र पिण्डमा चढाउने)

स्वधावाचनम्

ॐ स्वधां वाचयिष्ये, ॐ वाच्यताम् इति प्रतिवचनानन्तरं रिक्ताञ्जलिना - (हात जोड्ने)

ॐ अद्यामुकसगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्योऽमुकामुकामुकशर्मभ्यः (वर्मभ्यः, गुप्तस्य) सपत्नीकेभ्यो - वसुरूद्रादित्यस्वरूपेभ्यस्तथाऽमुकसगोत्रेभ्योऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्योऽमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरूद्रादित्यस्वरूपेभ्यः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे स्वधोच्यताम्। ॐ अस्तु स्वधा। इति प्रतिवचनम्।

पयोधारादानम्

(दुध, जल, तिल पिण्डमा धारा लगाउने)

ततः पयसादिसहितं पुटकं वामहस्ते कृत्वा -

ॐ ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधास्थ तर्पयत मे पितॄन्॥

इति मन्त्रेण सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात्। ततः ॐ पिण्डाः सम्पन्नाः।

ॐ सुसम्पन्ना इति प्रतिवचनम्।

ॐ पिण्डानुत्थापयामि ॐ उत्थापयस्व इत्यजुज्ञातः सन् सव्येन पिण्डानाघ्राय (सव्य भएर पिण्डतिर निहुरिने)

अपसव्येन पिण्डानुत्थापयेत्। पिण्डाधारकुशानुल्मुकाँश्च वह्नौ क्षिपेत्। (अपसव्य भएर पिण्ड उठाउने)

पिण्डिकायां शंखचक्रलेखनम् पूजनञ्च (सव्य भएर वेदीमा शङ्ख चक्र (७४) लेख्ने र जौले पूजा गर्ने)

सव्येन पिण्डिकायां शंखं चक्रं च लिखेत्। ॐ शंखाय नमः, ॐ चक्राय नमः, शंखचक्राभ्यां नमः।

इति यवैः शंखचक्रपूजां विधाय -

गयागमनम् स्मरणञ्च (अपसव्य भएर पिण्ड लिई उठ्ने र पाँच पाइला सार्ने)

अपसव्यं कृत्वा उत्थाय -

ॐ गयायां पितृरुपेण स्वयमेव जनार्दनः। तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात्।

इति मन्त्रेण पिण्डान् पिण्डिकोपरि निधाय सव्येन पूजयेदेभिर्मन्त्रैः - (पिण्ड उही ठाउँमा ल्याएर राख्ने)

पिण्डपूजनम् कर्पूरदीपदानञ्च (सव्य भएर सबैले पिण्डको पूजा गर्ने)

ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः। वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः॥
हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च। माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः॥

कर्पूरदीपं दत्त्वा, ततः सव्येनैव विश्वेदवार्घपात्रं सञ्चाल्य, अपसव्येन (कपूर, वत्ती बाल्ने र विश्वेदेवा अर्घपात्र चलाउने)

पित्रर्घपात्राण्युत्तानीकृत्य, सव्येन दक्षिणां दद्यात्। (अपसव्य भएर पितृब्राह्मण अर्घपात्र उत्तानो पार्ने)

दक्षिणादानम् (सव्य भएर विश्वेदेवा ब्राह्मणलाई दक्षिणा सङ्कल्प गर्ने)

कुशयवजलदक्षिणाद्रव्याण्यादाय - ॐ अद्यामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुक-शर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां पुरूरवार्द्रवनामविश्वेदेवपूर्वकाणामद्यकृतैतन्महालया-परपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिवैश्वदेविकश्राद्धप्रतिष्ठासिद्ध्यर्थं इमां दक्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं द्रव्यं यथादैवतममुकगोत्राय अमुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे, इति ब्राह्मणकरे उत्सृजेत्।

पुनर्दक्षिणासहितकुशादिकमादाय - ॐ अमुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुक-शर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां पुरूरवार्द्रवनाम्नामद्यकृतैतन्महालयापरपक्षान्तर्गत-पार्वणश्राद्धसम्बन्धिवैश्वदेविकश्राद्धप्रतिष्ठासिद्ध्यर्थ दक्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं द्रव्यं यथानामदैवतममुक गोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे, इति ब्राह्मणकरे उत्सृजेत्।

कुशतिलजलदक्षिणाद्रव्याण्यादाय - (पितृब्राह्मणलाई दक्षिणा सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्राणामस्मत्पितृपितामहप्रपितामाहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरूद्रादित्य-स्वरूपाणाम् अद्यकृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धप्रतिष्ठासिद्ध्यर्थं दक्षिणां रजतं चन्द्रदैवतं तन्मूल्योपकल्पितं द्रव्यं यथानामदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे।

पुनः कुशतिलजलदक्षिणाद्रव्याण्यादाय । ॐ अद्यामुकसगोत्राणामस्मन्मातामह प्रमातामहवृद्धप्रमातामहानाममुका-मुकामुकशर्मणां सपत्नीकानां वसुरूद्रादित्यस्वरूपाणाम् अद्यकृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धप्रतिष्ठा सिद्ध्यर्थं दक्षिणां रजतं चन्द्रदैवतं तन्मूल्योपकल्पितं द्रव्यं यथानामदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति ब्राह्मणकरे उत्सृजेत् ।

भूयसीदक्षिणादानम्

पुनः कुशतिलजलभूयसीदक्षिणाद्रव्याण्यादाय - (भूयसी दक्षिणा सङ्कल्प गर्ने र दिने)

ॐ अद्यामुकसगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां तथा अमुकसगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुक-शर्मणां सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां विश्वेदेवपूर्वकाणाम् अद्य कृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धे न्यूनातिरिक्तपरिपूर्णार्थं यद्देयम् अन्नादिकं दक्षिणाद्रव्यं यथानामदैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यः कन्याकुमारेभ्यश्च यथाभागं विभज्य यथाकाले दातुमहमुत्सृजे इत्युत्सृजेत् ।

पितृविसर्जनम् अपसव्येन - (अपसव्य भएर पितृहरू विसर्जन गर्ने)

ॐ व्वाजेवाजेऽवत व्वाजिनो नो धनेषु व्विप्राऽअमृताऽऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्तायात पथिभिर्देवयानैः ॥ इति मन्त्रेण पित्रादीन् विसर्जयेत् ॥

विश्वेदेवविसर्जनम् ततः सव्यं कृत्वा- (सव्य भई विश्वेदेवा ब्राह्मण विसर्जन गर्ने)

पुरुरवो माद्रवो नामानो विश्वेदेवाः प्रीयन्तामिति विश्वेदेवविसर्जनम् ॥

ततः - (तीन पटक नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिः पठेत् ।

दीपाच्छादनम् (अपसव्य भएर दियो ढाक्ने, सव्य भएर हातपाउ धुने र आचमन गर्ने)

अपसव्येन दीपाच्छादनं विधाय, सव्येन हस्तौ पादौ प्रक्ष्याल्याचम्य इति पठेत् ।

कर्मसमर्पणम् अच्युतस्मरणञ्च (अच्युताय नमः ३, विष्णवे नमः ३ पटक स्मरण गर्ने)

ॐ यत्कृतं तत् सुकृतमस्तु, यन्न कृतं तद्विष्णोः प्रसादात् । ब्राह्मणवचनाच्च सर्वं परिपूर्णमस्तु ॥
ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च । स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

आयुः प्रजां धनं विद्यां स्वर्ग-मोक्ष-सुखानि च । प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः ॥
ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये तत् ॥ (बाँकी रहेका कुश र जल लिने र छोड्ने)
यस्य स्मृत्या० । चतुर्भिश्च० । ॐ अच्युताय नमः । ॐ अच्युताय नमः । ॐ अच्युताय नमः ।

आशिर्मन्त्रपाठः

(आशीर्मन्त्र पाठ गर्ने)

हरि ॐ शतमिन्नु शरदोऽअन्तिदेवा यत्रानश्चक्राजरसन्तनुनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्यारीरिषतायुर्गन्तोः ॥१॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता०... ।

प्रसादग्रहणम्

(टीका लगाई प्रसाद वितरण गर्ने)

ॐ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षसुखानि च । प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः ॥



॥ इति पार्वणश्राद्धविधिः ॥

अथ तीर्थश्राद्धविधिः

(कर्मपात्र बनाई दियो वाल्ने र गोदान गर्ने)

अत्र स्मृति- आसनं पिण्डदानं च पुनः प्रत्यवनेजनम्। दक्षिणा चान्नसंकल्पः सर्वतीर्थेष्वयं विधिः॥

कर्मपात्रनिर्माणम्

(कर्मपात्रे भाँडोमा सबै थोकले पूजा गर्ने)

हस्तौ पादौ प्रक्षाल्य, आचम्य, यद्देवादेवहेडनमित्यादि कण्डिकात्रयेण कर्मपात्रं विधाय कुशत्रयसहितं कर्मपात्रोदकमादाय -

(कर्मपात्रको जलले सेचन गर्ने)

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ विष्णुः पुण्डरीकाक्षः पुनातु इत्यनेन श्राद्धीयवस्तूनि आत्मानमपि सिञ्चेत्।

प्रार्थना

(नमस्कार गर्ने)

ततः करौ संपुटीकृत्य विष्णुं मनसा ध्यात्वा पूर्वाभिमुखः प्रार्थयेत् -

ॐ नमो नमस्ते गोविन्द पुराणपुरुषोत्तम। इदं श्राद्धं हृषीकेश रक्षतां सर्वतो दिशः॥

ततः तीर्थश्राद्धनिमित्तं सङ्कल्पं कुर्यात्।

संकल्पः

(सङ्कल्प गर्ने)

तद्यथा -

ॐ तत्सदद्यामुकमासेऽमुकपक्षेऽमुकतिथावमुकवासरेऽमुकतीर्थे मम आत्मनः समस्तपितृणां समुद्धारणार्थं मातृपितृगुरुस्वस्रादिपितृणामक्षय्यतृप्तिहेतवे समस्ततीर्थश्राद्धजन्यफलप्राप्त्यर्थम् अमुकतीर्थे तीर्थश्राद्धं पिण्डदानं चाहं करिष्ये।

वेदिनिर्माणम्

(अपसव्य भएर पिण्ड दिन बालुवाको वेदी बनाउने)

ततो दक्षिणाभिमुखः प्राचीनावीतिरपसव्यं विधाय पातितवामजानु दक्षिणप्लवां वेदिं निर्माय पञ्चगव्येनाभिषिच्य परितः तिलगौरसर्षपपुष्पचन्दनानि विकिरेत्।

आसनस्थापनम्

(फूल ओछ्याई प्रत्येक पिण्ड दिने ठाउँमा मोटकको आसन दिने)

वेद्यां मोटकरूपाणि आसनानि प्रत्येकं स्थापयेत्॥

अनेन मन्त्रेण -

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका। पुरी द्वारावती चैव सप्तैता मोक्षदायकाः॥

ॐ कव्यवाडनलः सोमो यमश्चैवार्यमा तथा। अग्निष्वात्ता बर्हिषदः सोमपाः पितरस्तथा॥

अवनेजनम्

(दुनामा जल राखी कुश लिई सङ्कल्प गर्ने)

ततः आसनोपरि तिलजलपुष्पगन्धादीनि पात्रे कृत्वा कुशदिकमादाय -

ॐ अद्यामुकसगोत्राणां मम पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां

तथाऽमुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां यथायथागोत्राणामन्येषां च पितृणां आसनोपरि अवनेजनमहं सम्प्रददे । इत्यनेनासनोपरि पात्रस्थं जलमर्द्धं दद्यात् । अर्घं जलम् अवशेषयेत् ।

पिण्डदानम्

ततः पिण्डमादाय - (पिण्ड बनाई पिताको पिण्ड लिने र वेदीमा राख्ने)

ॐ अद्यामुकसगोत्रस्यास्मत्पितुरमुकनाम्नः अक्षय्यतृप्त्यर्थमिदं हविष्यान्नमयम् अमृतरूपं मधुतिलजलादिप्रोक्षितं पिण्डं तस्मै स्वधा । (पितामहको पिण्ड लिने र वेदीमा राख्ने)

ॐ अद्यामुकसगोत्रोऽस्मत्पितामहः अमुकनामा तस्याक्षय्यतृप्त्यर्थमिदं हविष्यान्नमयम् अमृतरूपं तिलमधुजलप्रोक्षितं पिण्डं तस्मै स्वधा । (प्रपितामहको पिण्ड लिने र वेदीमा राख्ने)

ॐ अद्यामुकसगोत्रोऽस्मत्प्रपितामहोऽमुकनामा तस्य अक्षय्यतृप्त्यर्थमिदं हविष्यान्नमयम् अमृतरूपं तिलमधुजलप्रोक्षितं पिण्डं तस्मै स्वधा । (माताको पिण्ड लिने र वेदीमा राख्ने)

ॐ अद्यामुकसगोत्रा अस्मन् माताअमुक नाम्नी देवी तस्या अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयम् अमृतरूपं मधुतिलजलप्रोक्षितं पिण्डं तस्यै स्वधा । (पितामहीको पिण्ड लिने र वेदीमा राख्ने)

ॐ अद्य अमुकसगोत्रा अस्मत् पितामही अमुक नाम्नी देवी तस्या अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयम् अमृतरूपं मधुतिलजलप्रोक्षितं पिण्डं तस्यै स्वधा । (प्रपितामहीको पिण्ड लिने र वेदीमा राख्ने)

ॐ अद्यामुकसगोत्राअस्मत् प्रपितामही अमुकनाम्नी देवी तस्या अक्षय्यतृप्त्यर्थम् इदम् हविष्यान्नमयममृतरूपं मधुतिलजलप्रोक्षितं पिण्डं तस्यै स्वधा । (मातामहको पिण्ड लने र वेदीमा राख्ने)

ॐ अद्यामुकसगोत्रोऽस्मन्मातामहोऽमुकनामा तस्य अक्षय्यतृप्त्यर्थम् इदम् हविष्यान्नमयम् अमृतरूपं मधुतिलजलप्रोक्षितं पिण्डं तस्मै स्वधा । (प्रमातामहको पिण्ड लिने र वेदीमा राख्ने)

ॐ अद्यामुकसगोत्रोऽस्मत्प्रमातामहोऽमुकनामा तस्य अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयम् अमृतरूपं मधुतिलजलादिप्रोक्षितं पिण्डं तस्मै स्वधा । (वृद्धप्रमातामहको पिण्ड लिने र वेदीमा राख्ने)

ॐ अद्यामुकसगोत्रोऽस्मद्वृद्धप्रमातामहोऽमुकनामा तस्य अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयम् अमृतरूपं मधुतिलजलादिप्रोक्षितं पिण्डं तस्मै स्वधा । (मातामहीको पिण्ड लिने र वेदीमा राख्ने)

ॐ अद्यामुकसगोत्रा अस्मन्मातामही अमुकनाम्नी देवी तस्या अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयम् अमृतरूपं मधुतिलजलादिप्रोक्षितं पिण्डं तस्यै स्वधा । (प्रमातामहीको पिण्ड लिने र वेदीमा राख्ने)

ॐ अद्यामुकसगोत्रास्मत्प्रमातामही अमुकनाम्नी देवी तस्या अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयं मधुतिलजलादिप्रोक्षितं पिण्डं तस्यै स्वधा । (वृद्धप्रमातामहीको पिण्ड लिने र वेदीमा राख्ने)

ॐ अद्यामुकसगोत्रा अस्मद्वृद्धप्रमातामही अमुकनाम्नी देवी तस्या अक्षय्यतृप्त्यर्थम् इदं हविष्यान्नमयं मधुतिलजलादिप्रोक्षितं पिण्डं तस्यै स्वधा । (तर्पण दिनुपर्नेजति सबैलाई पिण्ड दिने)

एवं सपत्नजननी - पत्नीपुत्रकन्यापितृव्य - मातुल - भ्रात - पितृस्वसृ - मातृस्वस्रात्मभविगनीपितृव्यपुत्र जामातृभागिने- यश्वशुर-श्वश्वाचार्योपाध्याय-गुरु-मित्र-शिष्याणामेतेषां पुरुषविषये सपत्नीकानां

स्त्रीविषये सभर्तृकसापत्यानां नाम गोत्रोच्चारणपूर्वकं स्वरुपोच्चारणं कृत्वा पिण्डान् दद्यात् ।
ॐ आब्रह्मणो ये पितृवंशजाता मातुस्तथा वंशभवा मदीयाः ।
वंशद्वये ये मम दासभूता भृत्यास्तथा वाऽऽश्रितसेवकाश्च ॥
मित्राणि शिष्याः पशवश्च वृक्षा दृष्टाश्च स्पृष्टाश्च कृतोपकाराः ।
जन्मान्तरे ये मम सङ्गताश्च तेभ्यः स्वधा पिण्डमहं ददामि ॥१॥
ये केचित्प्रेतरूपेण वर्तन्ते पितरो मम । ते सर्वे तृप्तिमायान्तु पिण्डदानेन शाश्वतीम् ॥२॥
ये बान्धवाऽबान्धवा ये येऽन्यजन्मनि बान्धवाः । तेभ्यः पिण्डो मया दत्तः अक्षय्यमुपतिष्ठतु ॥३॥
पितृवंशे मृता ये च मातृवंशे तथैव च । गुरुश्वशुरबन्धूनां ये चाऽन्ये बान्धवा मृताः ॥४॥
ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः । तेभ्यः पिण्डो मया दत्तः अक्षय्यमुपतिष्ठतु ॥५॥

प्रत्यवनेजनम्

(दुनामा जल राखी सङ्कल्प गर्ने)

ॐ अद्यामुकसगोत्राणां मम पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) तथा मातृपितामही प्रपितामहीनाममुकामुकामुकदेवीनां पिण्डोपरि प्रत्यवनेजनं सम्प्रददे । एवं मातामह-प्रमातामह वृद्धप्रमातामहानां सपत्नीकानां पिण्डोपरि प्रत्यवनेजनं सम्प्रददे । इति इत्यनेन पिण्डोपरि अर्घशेषजलं दद्यात् ।

(पिण्डमा कुश राखी जल चढाउने)

ततः पिण्डपूजनम्

(सबै पूजासामग्रीले पिण्ड पूजा गर्ने)

गन्धपुष्पधूपदीपनैवेद्यताम्बूलपूगीफलैलालवङ्गयज्ञोपवीतवस्त्रतुलसीदलादिकं दत्त्वा पूजयेत् ।

तर्पणम्

(अब सबै पितृहरूको नाम उच्चारण गरी तर्पण दिने)

जलेन नामगोत्रोच्चारणं कृत्वा तर्पणं कुर्यात् । ततः सव्यं कृत्वा आचमनम् । (सव्य भएर आचमन गर्ने)

विष्णोः स्मरणम्

(विष्णु स्मरण गर्ने)

ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ इति विष्णुस्मरणं कुर्यात् ।

सूर्यायार्घ्यदानम्

(सूर्यलाई अर्घ्य दिने)

ततः - एहि सूर्य सहस्रांशो तेजोराशे जगत्पते । अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ।
इति सूर्याय अर्घ्यं दत्त्वा नमस्कारं च कृत्वा यथाशक्त्या ब्राह्मणपूजनं भोजनदक्षिणादानं च कुर्यात् ।

दक्षिणादानम्

(दक्षिणा सङ्कल्प गर्ने र दिने)

ॐ अद्यकृतैतत्तीर्थश्राद्धसांगतासिद्ध्यर्थं मम समस्तपितृणाम् अक्षय्ययतृप्त्यर्थम् आत्मना सह सर्वेषामुद्धरणाय न्यूनातिरिक्तदोषपरिहारार्थम् इंद रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणात्वेन तुभ्यमहं सम्प्रददे ।
ॐ स्वस्तीति प्रतिवचनम् ।

विसर्जनम्

(पिण्डतिर निहुरिएर पिण्ड उठाउने)

ॐ नमो वः ० । ततोऽभिगम्यतामिति विसर्जनम् ।

पिण्डानाघ्रायोत्थाय जले गवे वा दद्यात् । शेषं कुशादिकं जले निक्षिपेत् ।

गोग्रासम्

(गाईलाई खान दिने)

सुरभिर्वैष्णवी माता नित्यं विष्णुपदे स्थिता ।

गोग्रासं च मया दत्तं त्वं गृहाणानुकम्पया ॥ इति गोग्रासम् ।

श्वानबलिः

(कुकुरलाई खान दिने)

द्वौ श्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ ।

ताभ्यामन्नं प्रयच्छामि स्यातामेतावहिंसकौ ॥ इति श्वानबलिः ॥

काकबलिः

(कागलाई खान दिने)

काकोऽसि यमदूतोऽसि वायसोऽसि महाबल ।

तुभ्यं बलिं प्रदास्यामि गृहाण यमकिङ्कर ॥ इति काकबलिः ॥

ब्राह्मणपादप्राक्षलनम्

(ऋषिको पाउ धुने)

यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे । तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने ॥

इत्यनेन विप्रदक्षिणपादप्रक्षालनम् । विप्रपादोदकं पीत्वा यावत्तिष्ठति मेदिनी ।

तावत्पुष्करतीर्थेऽपि पिबन्ति पितरो जलम् ॥ इत्यनेन वामपादप्रक्षालनम् ।

तिलककरणम्

(यजमानलाई चन्दन लगाइदिने)

चन्दनं वर्धते नित्यं पवित्रं पापनाशनम् । आपदो हरते नित्यं लक्ष्मीर्वसतु सर्वदा ॥

इत्यनेन तिलककरणम् ।

मन्त्रपाठः

(मन्त्र पाठ गर्ने र टीका लगाई प्रसाद वितरण गर्ने))

हरि ॐ शतमिन्नु शरदोऽअन्तिदेवा यत्रानश्चक्राजरसन्तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्यारीरिषतायुर्गन्तोः ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः । विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्वम् ॥ स्वादुष ꣳसदः पितरो व्वयोधाः कृच्छ्रेश्रिताः शक्तिवन्तो गभीराः । चित्रसेनाऽइषुबलाऽअमृधाः सतोवीराऽउरवोव्व्रातसाहाः ॥ ब्राह्मणासः पितरः सोम्यासः शिवेनो द्यावापृथिवी अनेहसा । पूषानः पातु दुरितादृतावृधो रक्षा मा कीर्नो अघश ꣳसऽईशत ॥ पितृभ्यः० । अक्षन्पितरो० । पुनन्तु० । पवित्रेण शतयुषा पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतयुषा व्विश्वमायुर्व्यष्णवै ॥

॥ इति तीर्थश्राद्धविधिः ॥

अथ एकपार्वणश्राद्धविधिः

(दियो १, ऋषि २, पिण्ड ३, सिदा ३)

श्रीगणेशाय नमः ॥ अत्र त्रयः पिण्डा एको विश्वेदेवब्राह्मणः । अन्यः पितृ ब्राह्मणः । आचम्य प्राणानायम्य गोमयोपलिप्ते प्राङ्गणे दीपं प्रज्वाल्य पूजयेत् ।

दीपपूजनम् (कर्मपात्र बनाई गोदान गरी दुईवटा ऋषि र दियो थापी तर्पण दिएर दियो बाली पूजा गर्ने)

ॐ रक्षोघ्नदीपाय नमः, इति दीपं सम्पूज्य -

ॐ पवित्रेस्थो वैष्णव्यौ, इति मन्त्रेण ब्राह्मणं पवित्रं कृत्वा -

सव्येन ताम्बूलादिकं विप्रहस्ते दत्त्वा पूर्वाभिमुखो विश्वेदेवब्राह्मणस्य वामहस्तेन दक्षिणजानुं स्पृष्ट्वा स्वदक्षिणजानु च पातयित्वा अधोमुखेन स्वदक्षिणहस्तेन ताम्बूलादिकम् उत्तानं विप्रकरं गृहित्वा निमन्त्रयेत् ।

ब्राह्मण निमन्त्रणम् (विश्वेदेवाब्राह्मणलाई फूल, अक्षता, पान, सुपारी लिई छुने र राखिदिने)

ॐ अद्येत्यादि अमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां विश्वेषां देवानां पुरुरवार्द्रवनाम्ना- मद्यकर्तव्यसांवत्सरिकैकपार्वणश्राद्धे एभिश्चन्दनपुष्पाक्षतपूगीफलयज्ञोपवीतवासोभिस्त्वं मया निमन्त्रितः ।

ॐ निमन्त्रितोस्मीति प्रतिवचनम् ॥ (अपसव्य हुने र ऋषि निमन्त्रणा गर्ने)

ततोऽपसव्यं कृत्वा ताम्बूलादिकं विप्रहस्ते दत्त्वा दक्षिणाभिमुखो वामहस्तेन पितृब्राह्मणस्य वामजानु स्पृष्ट्वा स्ववामजानु च पातयित्वा उत्तानेन स्वदक्षिणकरेण सताम्बूलादिकं विप्रकरं गृहित्वा निमन्त्रयेत् -

(फूल अक्षता लिई सङ्कल्प गर्ने र पितृऋषिमा राखिदिने)

ॐ अद्येत्यादि अमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणाम् अद्यकर्तव्यसांवत्सरिकैकपार्वणश्राद्धे एभिश्चन्दनपुष्पाक्षतपूगीफल-यज्ञोपवीतवासोभिस्त्वं मया निमन्त्रितः ॥ ॐ निमन्त्रितोऽस्मि, इति प्रतिवचनम् ।

प्रार्थना (नमस्कार गर्ने)

अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः । भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥
सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः । भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि ॥

ॐ भवितव्यम् इति प्रतिवचनम् ।

पादार्घः

ततः सव्येन विश्वेदेवब्राह्मणस्य चरणौ प्रक्षालयेत् - (सव्य भएर विश्वेदेवाब्राह्मणको पाउ धुने)

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥ ततः पाद्यपात्रं वामहस्ते कृत्वा - (दुनामा जल, फूल राखी जलले सेचन गराउने)

ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ॥ इति मन्त्रं पठित्वा ।

कुशादिकमादाय -

ॐ अद्येहाऽमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवार्द्रव नामानः एष पादार्घो वः स्वाहा ॥

ततोऽपसव्येन पितृब्राह्मणस्य चरणै प्रक्षालयेत् - (अपसव्य भएर पितृब्राह्मणको पाउ धुने)

ॐ नमोस्त्वनन्ताय० इत्यादिना ॥

यत्फलं कपिलादाने कार्त्तिक्यां ज्येष्ठपुष्करे । तत्फलं पाण्डवश्रेष्ठ विप्राणं पादशौचने ॥

विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी । तावत्पुष्करपात्रेषु पिबन्ति पितरो जलम् ।

इति पठित्वा पाद्यपात्रं वामहस्ते कृत्वा शन्नोदेवीरितिमन्त्रान्ते मोटकमादाय- (मोटक लिई सङ्कल्प गर्ने)

ॐ अद्येहामुकसगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणः (वर्माणा, गुप्त) सपत्नीकाः वसुरूद्रादित्यस्वरूपा अद्यकर्त्तव्यसांवत्सरिकैकपार्वणश्राद्धे एष पादार्घस्त्रेधां विभज्य युष्मभ्यं स्वधा ॥

ततः सव्येनाऽऽचम्य गृहं प्रवेशयेत् । (सव्य भएर आचमन गर्ने)

स्वागतमुपवेशनञ्च

(ऋषिलाई घरभित्र आउनुहोस्, स्वागत छ भन्ने र पूर्व फर्काउने)

ॐ आगता यूयम् । ॐ सुस्वागता वयम् ॥ ॐ इदमासनम् आस्यताम् ॥ ॐ आस्यते ।

इति प्रतिवचनम् ॥ ॐ भूर्भुवः स्वरितिमन्त्रेण विश्वेदेवब्राह्मणं पूर्वाभिमुखमुपवेशयेत् । ततोऽपसव्येन-

(अपसव्य हुने र स्वागत गर्दै पितृऋषिलाई उत्तर फर्काउने)

ॐ आगता यूयम् । ॐ सुस्वागता वयम् । ॐ इदमासनमास्यताम् । ॐ आस्यते । इति प्रतिवचनम् ।

भूर्भुवः स्वरितिमन्त्रेण पितृब्राह्मणमुदङ्मुखमुपवेशयेत् ।

कर्मपात्रनिर्माणम्

(सव्य हुने र पुनः विश्वेदेवापट्टि कर्मपात्र निर्माण गर्ने)

ततः सव्येन – ॐ कर्मपात्रमहं करिष्ये, इति पृच्छेत् । कुरुष्व इत्यनुज्ञातः सन्-

ॐ यद्देवादेवहेडनं देवासश्चकृमा व्वयम् । अग्निर्मातस्मादेनसो विश्वाञ्मुञ्चत्व ऽ हसः ॥

ॐ यदि दिवा यदि नक्तमेना ꣳसि चकृमा व्वयम् । व्वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्व ऽहसः ॥

ॐ यदि जाग्रद्यदि स्वप्नमेना ꣳसि च कृमा व्वयम् । सूर्योमा तस्मादेनसो विश्वान्मुञ्चत्व ऽहसः ॥

कर्मपात्रार्थं पात्रं पुरतो निधाय- (पवित्र राख्ने)

ॐ पवित्रेस्थो वैष्णव्यौ०- इति मन्त्रेण कर्मपात्रे पवित्रं प्रक्षिप्य-

ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ॥ इति जलेनाऽपूर्य (जल राख्ने)

ॐ यवोऽसि यवयास्मद् द्वेषो यवयारातीः ॥ इति यवान्- (जौ राख्ने)

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्गरीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ इति गन्धम्-

ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।

इष्णन्निषाणामुममऽइषाण सर्वलोकम्मऽइषाण ॥ इति पुष्पं च प्रक्षिप्य- (चन्दन र फूल राख्ने)

अपसव्यं कृत्वा- (अपसव्य हुने र पितृब्राह्मणपट्टि कर्मपात्र बनाउदा जौको ठाउँमा तिल राख्ने)

ॐ कर्मपात्रमहङ्करिष्ये, इति पितृब्राह्मणं पृच्छेत् । ॐ कुरुष्व इत्यनुज्ञातः सन् पूर्वोक्तप्रकारेण कर्मपात्रं कुर्यात् । यवप्रक्षेपस्थाने- ॐ तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः । प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् पृणाहि नः स्वाहा । इति तिलान् प्रक्षिपेत् । एतावानेव विशेषः । अन्यत्सर्वं पूर्ववद्विधाय सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय- (सव्य हुने र सेचन गर्ने)

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा । यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

ॐ पुण्डरीकाक्षः पुनातु , इत्युक्त्वा श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत् ।

प्रतिज्ञासंकल्प

(सङ्कल्प गर्ने)

ततः सङ्कल्पं कुर्यात्-

ॐ तत्सत् ३ ॐ विष्णुः ३ अद्येत्यादि देशकालौ संकीर्त्य अमुकसगोत्राणामस्मत्पितृपितामह प्रपितामहानाममुका-मुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां पुरूरवार्द्रव नाम्नां विश्वेदेवपूर्वकाणा-मद्यकर्त्तव्यसांवत्सरिकैकपार्वणश्राद्धम् एभिर्द्रव्यैरहं करिष्ये । इति प्रतिज्ञां कृत्वा ।

प्रार्थना

(तीनपटक नमस्कार गर्ने)

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिः पठित्वा-

सप्तव्याधा दशार्णेषु मृगाः कालाञ्जरे गिरौ । चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे ॥ तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः । प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥ ये विप्रमुख्याः कुरुजाङ्गलेषु जातास्तथा दासकुले मृगाश्च । कालाञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्र सिद्धाः ॥ पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः । यत्र यत्र स्मरेद् विद्वान् पितॄणां दत्तमक्षयम् ॥ श्राद्धभूमौ गयां धयात्वा तथा देवं गदाधरम् । ताभ्यां चैव नमस्कृत्य ततः श्राद्धं समारभेत् ॥ गयागजो गयादित्यो गायत्री च गदाधरः । गया गयासुरश्चैव षड्गया मुक्तिदायकाः ॥ ईशानविष्णु-कमलासन-कार्तिकेय-वन्हि-त्रयाकं-रजनीश-गणेश्वराणाम् । क्रौञ्चामरेन्द्रकलशोद्भवकश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॥ ॐ गयायै नमः । ॐ गदाधराय नमः । इति पठित्वा ।

ततोऽपसव्येन दिग्बन्धनं कुर्यात् । (अपसव्य हुने)

दिग्बन्धनम्

(तिल र मोटक लिई पूर्वदेखि सबै दिशामा क्रमशः छर्ने)

तिलसहितमोटकमादाय तिलान् पूर्वादिक्रमेण वक्ष्यमाणमन्त्रैर्विकिरेत्-

ॐअग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् । ॐ अपहताऽसुरा रक्षा ꣳसि व्वेदिषदः । ॐ तथा बर्हिषदः पान्तु याम्यां मे पितरः स्थिताः ॥ ॐ अपहता० । ॐ प्रतीचीमाज्यपास्तद्वत् ।

ॐ अपहता० । ॐ उदीचीमपि सोमपाः । ॐ अपहता० । ॐ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः । सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥ इति सर्वतो विकीर्य पुष्पसहितं मोटकं वामकट्यां धारयेदनेन मन्त्रेण।

नीविबन्धनम् (फूल मोटक कटीमा सिउरिने।

ॐ निहन्मि सर्वं यदमेध्यवद् भवेद् हताश्च सर्वेऽसुरदानवा मया ।
रक्षांसि यक्षाः सपिशाचगुह्यका हता मया यातुधानाश्च सर्वे ॥

दानवादीनामपसारणम् (तीन वटा कुशका टुक्रा तिलसँग लिई दक्षिणतर्फ राखिदिने।

पुनः कुशखण्डत्रयसहिततिलानादाय- प्रयान्तु दूरतः सर्वे दैतेया दानवास्तथासर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशाँस्तिलान् ॥ इति दक्षिणस्यां क्षिपेत् ।

विष्णोःस्मरणम् (सव्य भएर ३ पटक विष्णुलाई सम्झने।

ततः सव्येन विष्णुस्मरणम्-

ॐ नमो नमस्ते गोविन्द पुराण पुरुषोत्तम । इदं श्राद्धं हृषीकेश रक्षतां सर्वतो दिशः ॥

इति रक्षार्थं विष्णुस्मरणम् ।

अथासनम् (विश्वेदेव ब्राह्मणको निमित्त कुश लिई सङ्कल्प गर्ने र राखिदिने।

कुशादीन्यादाय-

ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरुद्रादित्यस्वरुपाणां श्राद्धसम्बन्धिनां विश्वेषां देवानां पुरूरवार्द्रव नाम्नामद्यकर्त्तव्य- सांवत्सरिकैकपार्वणश्राद्धे इदं कौशमासनं वः स्वाहा ।

ततोऽपसव्यं कृत्वा मोटकमादाय- (अपसव्य भएर मोटक लिई सङ्कल्प गर्ने र पितृ ऋषिमा राख्ने।

ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरूद्रादित्य-स्वरूपाणामद्यकर्त्तव्यसांवत्सरिकैकपार्वणश्राद्धे इदं मोटकरुपमासनं त्रेधा विभज्य युष्मभ्यं स्वधा ॥

आवाहनम् (सव्य भएर नमस्कार गर्ने र विश्वेदेवा ब्राह्मणलाई आवाहन गर्ने।

ततः सव्येनाञ्जलिं बद्ध्वा विश्वान्देवानावाहयेत् ।

यवाँश्चादाय (विश्वेदेवा ऋषिलाई जौ लिई संकल्प गर्ने र जौले पूजा गर्ने।

ॐ अद्येहामुकसगोत्राणामस्मत्पितृ- पितामह- प्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्य-स्वरूपाणां अद्यकर्तव्यसांवत्सरिकैकपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वान्देवान् पुरूरवार्द्रवनाम्नः आवाहयिष्ये ।

ॐ आवाहय इत्यनुज्ञाते- ॐ विश्वेदेवा:० इति मन्त्रं पठित्वा ।

ॐ आगच्छन्तु महाभागा विश्वेदेवाः महाबलाः । ये यत्र विहिता श्राद्धे सावधाना भवन्तु मे ॥

इति पठन्नावाहयेत्।

ततोऽपसव्येनाञ्जलिं बद्ध्वा पितृनावाहयेत्- (अपसव्य भएर पितृहरूलाई तिलले आवाहन गर्ने)

ॐ अद्येहामुकसगोत्रान् अस्मत्पितृपितामहप्रपितामहान् अमुकामुकामुकशर्मणः (वर्मणः, गुप्तस्य) सपत्नीकान् वसुरूद्रादित्यस्वरूपानद्यकर्तव्यसांवत्सरिकैकपार्वणश्राद्धे आवाहयिष्ये । ॐ आवाहय, इत्यनुज्ञाते, ॐ उशन्तस्त्वा० इति मन्त्रेणावाह्य- ॐ अपहताऽअसुरा रक्षा ꣳसि व्वेदिषदः ॥ इति मन्त्रेण तिलान् विकीर्य-

ॐ आयन्तु नः० इति मन्त्रं पठेत्।

हस्तार्घः

सव्येन विश्वेदेवब्राह्मणं पृच्छेत्- (सव्य भएर विश्वेदेवाब्राह्मण अगाडि दुना राख्ने)

ॐ हस्तार्घपात्रमहं करिष्ये, ॐ कुरुष्व इत्यनुज्ञातः सन् पुटकमेकमग्रे कृत्वा- ॐ पवित्रेस्थ० इति मन्त्रेण पवित्रं पूर्वाग्रं स्थापयेत्। शन्नोदेवीरिति जलम्। ॐ यवोसीति यवान्। श्रीश्चते इति पुष्पम्। गन्धद्वारामितिगन्धं प्रक्षिप्य। (पवित्र, जल, जौ, फूल र चन्दन दुनामा राख्ने)

ॐ हस्तार्घपात्रं सम्पन्नम् इति पृच्छेत्। ॐ सुसम्पन्नम् इत्युक्ते- (हस्तार्घपात्र हातमा लिने)

हस्तार्घपात्रमुत्थापयामि, ॐ उत्थापयस्व इत्यनुज्ञातः सन् हस्तार्घपात्रं वामहस्ते कृत्वा

पुष्पसहितं पवित्रं गृहीत्वा- (पवित्र र फूल घुमाएर ऋषिमा राख्ने)

ॐ नमो नारायणाय इति मन्त्रेण विप्रकरे पुष्पसहितं पूर्वाग्रं पवित्रं धृत्वा

दक्षिणकरेण पुटकमुखं पिधाय- (दुनालाई ढाक्ने)

ॐ या दिव्या आपः पयसा सम्बभूवुर्याऽअन्तरिक्षाऽउतपार्थिवीर्याः ॥
हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः स ꣳस्योना सुहवा भवन्तु ॥

इति मन्त्रेणार्घपात्रस्थं जलमभिमन्त्र्य कुशयवजलान्यादाय- (जल ब्राह्मणमा चढाई कुश जौ जल लिने)

ॐ अद्येहामुकसगोत्राणामस्मत्पितृ-पितामह-प्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनो विश्वेदेवाः पुरुरवार्द्रव नामानः अद्यकर्त्तव्यसांवत्सरिकैकपार्वणश्राद्धे एष हस्तार्घो वः स्वाहा।

इति ब्राह्मणकरेऽर्घं दद्यात्। अर्घे पुनः प्रत्यर्घमस्तु इति। (जल ब्राह्मणमा चढाई पवित्र र फूल दुनामा राख्ने)

विप्रकरस्थं सपुष्पं पवित्रमर्घपात्रे धृत्वा तदर्घपात्रं भूमौ धृत्वा। (जल आँखामा लगाउने)

अर्घपात्रस्थजलेन तच्चक्षुरिति चक्षुःस्पर्शः कार्यः ॥ (विश्वेदेवाब्राह्मणको दक्षिणपट्टि दुना उत्तानै राख्ने)

ततो विश्वेभ्यो देवेभ्यः स्थानमसीति विश्वेदेवदक्षिणपार्श्वे उत्तानं स्थापयेत्। ततोऽपसव्येन। (अपसव्य हुने)

ॐ हस्तार्घपात्राण्यहं करिष्ये इति ब्राह्मणं पृच्छेत्।

ॐ कुरुष्व इत्युक्ते पित्रादित्रिभ्यः स्वाऽग्रे पुटकत्रयमासाद्य तेषु- (पितृब्राह्मणअगाडि तीन वटा दुना राख्ने)

ॐ पवित्रेस्थ इति दक्षिणाग्राणि पवित्राणि धृत्वा- (पवित्र, जल, चन्दन, तिल, फूल राख्ने)
ॐ शन्नोदेवीरित जलम्, ॐ तिलोसीति तिलान्, ॐ गन्धद्वारामिति गन्धम्, ॐ श्रीश्चते० इति पुष्पं प्रक्षिप्य। ततः ॐ हस्तार्घपात्राणि सम्पन्नानि इति पितृब्राह्मणं पृच्छेत्, ॐ सुसम्पन्नानि इति प्रत्युक्ते- ॐ हस्तार्घपात्राण्युत्थापयामि इति पृच्छेत्, उत्थापयस्वेति प्रत्युक्ते। (हस्तार्घपात्र लिई फूल पवित्र घुमाएर चढाउने)
प्रथमं पित्रर्घपात्रं वामहस्ते धृत्वा- ॐ नमो नारायणाय इति पितृतीर्थेन विप्रकरे उत्तराऽग्रं पवित्रं धृत्वा अधोमुखेन दक्षिणकरेण हस्तार्घपात्रमुखं पिधाय, ॐ या दिव्या० इति (दुना ढाक्ने)
तज्जलमभिमन्त्र्य तिलजलमोटकमादाय- (ब्राह्मणलाई जल चढाई तिल, जल, मोटक लिने)
ॐ अद्येहामुकसगोत्राऽस्मत्पितरमुकशर्मन् सपत्नीकवसुस्वरुपाद्यकर्तव्यसांवत्सरिकैकपार्वण- श्राद्धे एष हस्तार्घस्ते स्वधा। इति ब्राह्मणकरे अर्घं दद्यात्। अर्घे पुनः प्रत्यर्घमस्तु इति। (पवित्र र फूल दुनामा राख्ने)
ब्राह्मणकरस्थं पवित्रमर्घपात्रे निधाय तं भूमौ स्थापयेत्। एवं पितामहप्रपितामहाभ्यामपि दत्त्वा ततः प्रपितामहपात्रस्थजलादिकं पितामहार्घपात्रे कृत्वा। (पितामहप्रपितामहब्राह्मणको पनि माथिको जस्तै गर्ने)
तदुभयं पित्रर्घपात्रे कृत्वा पुनः पित्र्यर्घपात्रं पितामहार्घपात्रे कृत्वा तदुभयं प्रपितामहार्घपात्रोपरि धृत्वा सव्यं कृत्वा तत्रस्थजलेन- ॐ तच्चक्षुरिति चक्षुः स्पर्शः। (सव्य भई दुनाको जल आँखामा लगाउने)
ततोऽपसव्येन पितृद्विजस्य वामभागे- (अपसव्य भई फूल, पवित्र, दुना एकत्र गरी ऋषिको बायाँपट्टि दुना घोप्ट्याउने)
ॐ पितृभ्यः स्थानमसीति न्युब्जं कृत्वा तदुपरि कुशत्रयं दद्यात्। (तीनवटा कुशका टुक्रा दुनामाथि राख्ने)

अर्चनमर्पणञ्च (सव्य भएर विश्वेदेवाऋषिलाई सबै सामग्रीले पूजा गर्ने)

सव्येन- ॐ अर्चयिष्ये इति विश्वेदेवब्राह्मणं पृच्छेत्। ॐ अर्चय इत्युक्ते अत्रगन्ध-पुष्पाक्षत-धूप-दीप-द्रव्यताम्बूल-यज्ञोपवीतवस्त्रादिभिरभ्यर्च्य ब्राह्मणाय तिलकं दत्त्वा धूपदीपौ च कारयेत्। (धूपबत्ती गरी नैवेद्य चढाउने)
ततः कुशादिकमादाय- (कुश र जल लिने र राखिदिने)
ॐ अद्येहामुकसगोत्राणामस्मत्पितृ-पितामह-प्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवार्द्रव नामान एतान्यर्चनानि अत्र गन्धपुष्पाक्षतधूपदीप नैवेद्यताम्बूलयज्ञोपवीतद्रव्यवासांसि वः स्वाहा ॥ इत्युत्सृजेत्।
ततोऽपसव्येन पितृब्राह्मणं पृच्छेत्- (अपसव्य हुने र पितृब्राह्मणलाई सबै सामग्रीले पूजा गर्ने)
ॐ अर्चयिष्ये, ॐ अर्चय इत्युक्ते गन्धादिभिरभ्यर्च्य ब्राह्मणाय तिलकं दत्त्वा धूपदीपौ च कारयेत्।
मोटकादिकमादाय- (मोटक जल लिने र राखिदिने)
ॐ अद्येहामुकसगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणः (वर्माणाः, गुप्तस्य) सपत्नीकाः वसुरूद्रादित्यस्वरूपा एतान्यर्चनानि अत्र गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतोपायनवासांसि त्रेधा विभज्य युष्मभ्यं स्वधा ॥ इति उत्सृजेत्।
सव्येन विश्वेदेवब्राह्मणहस्ते – (सव्य भएर विश्वेदेवाब्राह्मणमा जल चढाउने)
ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु इति जलं दद्यात्। अस्त्वित्युक्ते सव्येनैव विश्वेदेवब्राह्मणभोजनस्थाने चतुर्दिक्षु चतुष्कोणमण्डलं कुर्यात्।

चतुष्कोणमण्डलनिर्माणम्

(सव्य नै भएर विश्वेदेवाब्राह्मण अगाडि चार कोण बनाउने)

यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति । एवं मण्डलभस्मैतत्सर्वभूतानि रक्षतु ॥

इति मन्त्रेण जलेन आसनसहितं चतुष्कोणं मण्डलं विधाय अपसव्येन पितृब्राह्मणहस्ते –

ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु । इति जलं दद्यात् । (अपसव्य भएर पितृब्राह्मणमा जल चढाउने)

ॐ अस्तु इति प्रतिवचनम् ॥ पितृब्राह्मणभोजनस्थाने चतुर्दिक्षु आसनसहितं चतुष्कोणमण्डलं पूर्वोक्तमन्त्रेण कुर्यात् । (अपसव्य नै भएर पितृब्राह्मण अगाडि चार कोण बनाउने)

अग्नौकरणम्

(अपसव्य नै भएर दुनामा जल राख्ने, घ्यू र अक्षता खसाल्ने)

अपसव्येनैवाग्नौकरणम् । दक्षिणाभिमुखो भूत्वा वामजानु पातयित्वा पुटकादौ सघृतमन्नं कृत्वा-

ॐ अग्नौकरणमहं करिष्ये इति पितृब्राह्मणं पृच्छेत् । ॐ कुरुष्व, इत्यनुज्ञातः सन् पितृब्राह्मणकरे जलपात्रे वा जुहुयात् । ॐ अग्नये कव्यवाहनाय स्वाहा, इदमग्नये कव्यवाहनाय । इति त्यागः ॐ सोमाय पितृमते स्वाहा, इदं सोमाय पितृमते । हुतशेषान्नं सव्येन विश्वेदेवान्नपात्रे क्षिपेत् – (सव्य भई विश्वेदेवाब्राह्मणमा खसाल्ने)

अपसव्येन पितृब्राह्मणभोजनपात्रे प्रक्षिपेत् । (अपसव्य हुने र पितृब्राह्मणको सिदामा खसाल्ने)

अथ भूस्वामी

(एक भाग सिदा राख्ने)

तिलघृतमधुजलयुतमन्नं मोटकादिसहितमादाय दक्षिणाभिमुखो भूत्वा- (मोटक, जल लिने र छोडिदिने)

ॐ इदमन्नं सजलमेतत्भूस्वामिपितृभ्यो नमः । इत्युत्सृजेत् ।

अन्नसंकल्प

(अर्को एक भाग सिदा राख्ने)

ततः सव्यं कृत्वा विश्वान् देवान् ध्यायन् सोपस्करं यवजलयुतमन्नमुपनीय मधुनाभिघार्य ऋजुहस्ताभ्या-

मन्नपात्रमालभ्य- (दायाँ हात बायाँ र बायाँ हात दायाँ गरी सिदालाई ढाक्ने)

ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा ॥

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा ꣳ सुरे स्वाहा ॥ इति ॥

ॐ कृष्णकव्यमिदं रक्ष मदीयमिति पठित्वा । (बूढी औंलाले सिदाको सामग्री देखाउने)

ॐ इदमन्नम् । ॐ इमा आपः । ॐ इदमाज्यम् । ॐ इदं हविः । ॐ एतान्युपकरणानि । इति क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य- (जौ छर्कने)

ॐ यवोऽसीति मन्त्रेण यवान् अन्नस्योपरि विकीर्य कुशयवजलान्यादाय वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेणान्नमपश्च स्पृष्ट्वा- (कुश, जल लिने र ऋषिमा छोडिदिने)

ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिभ्यो विश्वेभ्यो देवेभ्यः पुरूरवार्द्र नामभ्यः अद्यकर्तव्यसांवत्सरिकैकपार्वण-श्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणं चाक्षय्यतृप्तिहेतोर्वः स्वाहा । इति भूमौ कुशादिकमुत्सृजेत् । (अपसव्य हुने)

ततोऽपसव्येन सोपस्करं तिलजलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्न-पात्रमालभ्य- (अरू भाग सिदा पितृब्राह्मण अगाडि राख्ने)

ॐ पृथिवीते० इत्यादि जुहोमीत्यन्तम्, ॐ इदं विष्णु रित्यादि सुरे इत्यन्तं पठित्वा-

(दायाँ हात बायाँ र बायाँ हात दायाँ गरी सिदालाई ढाक्ने)

ॐ इदमन्नम्, ॐ इमा आपः, ॐ इदमाज्यम्, ॐ इदं हविः, एतान्युपकरणानि इति क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य- ॐ अपहताऽअसुरा रक्षा ꣳ सि व्वेदिषदः । इत्यन्नस्योपरि तिलान् विकीर्य मोटकादीन्यादाय वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेणान्नमपश्च स्पृष्ट्वा- (तिल छर्ने र मोटक लिई सिदालाई छुने)

ॐ अद्येहामुकसगोत्रेभ्यो ऽस्मत्पितृपितामहप्रपितामहेभ्योऽमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरूद्रादित्यस्वरूपेभ्यः इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणं चाक्षय्यतृप्तिहेतोस्त्रेधा विभज्य युष्मभ्यं स्वधा । इति ब्राह्मणसमीपे भूमौ मोटकादिकमुत्सृजेत् । (ब्राह्मणमा मोटक राखिदिने)

अपोशानम् कुशोपरिविशनञ्च

(सव्य भएर विश्वेदेवाब्राह्मणमा जल चढाउने)

ततः सव्येन देवब्राह्मणकरयोः ॐ भवान् प्राशयतु इत्यपोशानं दत्त्वा । (अपसव्य भएर पितृब्राह्मणमा पनि चढाउने)

अपसव्येन पितृब्राह्मणकरयोः ॐ भवन्तः प्राशयन्तु इत्यपोशानं दत्त्वा सव्येन श्राद्धकर्ता कुशोपरि विशन् इति पठेत् । (सव्य भएर आफूमुनि कुश ओछ्याई नमस्कार गर्ने)

प्रार्थना

(पितृलाई भोजन चढाउने)

ॐ मधुव्वाता इत्यृचं पठेत् ॥ ॐ मधु ३ ॥ (नमस्कार गर्ने)

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥

ॐ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति पठेत् ।

यथासुखं जुषध्वम् इति वचनानन्तरं ते ब्राह्मणा मौनिनो भूत्वा भुञ्जीरन्, हस्तसंज्ञया च भक्ष्यं प्रार्थयेतुः ।

गायत्रीजपम् पितृसूक्तपठनञ्च

(सव्य नै भई गायत्री जप्ने)

ततः सव्याहृतिकां गायत्रीं जपित्वा मधुव्वाता० इति ऋचश्च पठित्वा पितृसूक्तं च पठेत् ब्राह्मणाय यत्र यत्र इच्छोपलभ्यते तत्तत्प्रयच्छन् मन्दं मन्दं भोजयेत् ।

विकिरासनम्

(ब्राह्मणको दक्षिणतर्फ तीन टुक्रा कुश र फूल भूमिमा विकिरासनको लागि राख्ने)

ततः पितामहान्नपात्रसन्निधौ आस्तृतदक्षिणाग्रकुशत्रयायां भूमौ विकिरासनम् ।

अपसव्येन मोटकादीन्यादाय- (अपसव्य भएर मोटक जल लिने)

असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् । उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ॥

इति आस्तृतकुशोपरि मोटकमुत्सृजेत् । (ओछ्याएको कुश र फूलमाथि मोटक राखिदिने)

विकिरदानम्

सतिलघृतमन्नमादाय जलेनाप्लाव्य मोटकञ्चादाय- (एउटा दुनामा तिल, घ्यू, पिण्डको अन्न राख्ने, मोटक पनि लिने)

अग्निदग्धाश्च ये जीवा येऽप्यदग्धा कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥

इति मन्त्रेणास्तृतकुशोपरि तदन्नं विकिरेत्। (कुश मोटक राखेको ठाउँमा घोप्ट्याई दिने र औंठीले थिच्ने)

ततः कुशान् परित्यज्य हस्तौ पादौ प्रक्षाल्य सव्येन द्विराचम्य गायत्रीं जपित्वा

मधुव्वाता० इति ऋचां पाठः। (सव्य भएर आचमन गरी गायत्री जप्ने)

प्रत्यपोशानम्

(विश्वेदेवाब्राह्मणलाई जल चढाउने)

ब्राह्मणान् तृप्तान् ज्ञात्वा- **ॐ जलगण्डूषमिदं ते इति विश्वेदेवब्राह्मणाय प्रत्यपोशानं दद्यात्।**

ब्राह्मणं प्रतिप्रश्नः

(विश्वेदेवाब्राह्मणतर्फ प्रश्न गर्ने)

विश्वेदेवब्राह्मणं प्रति प्रश्नः ॐ तृप्ताःस्थ, ॐ तृप्ताः स्म इति प्रतिवचनम् शेषमन्नं किं क्रियताम् ॐ इष्टैः सह भुज्यतामिति प्रतिवचनम्।

अपसव्येन- **ॐ जलगण्डूषमिदं ते इति पितृब्राह्मणाय प्रत्यपोशानं दद्यात्॥** (अपसव्य भई पितृऋषिमा जल चढाउने)

अञ्जलिंबद्ध्वा पितृब्राह्मणं प्रति प्रश्न- ॐ तृप्ताः स्थ ? ॐ तृप्ताः स्म इति। शेषमन्नं किं क्रियताम् ॐ इष्टैः सह भुज्यताम् इति प्रतिवचनम्। (नमस्कार गरेर पितृब्राह्मणलाई प्रश्न गर्ने)

ॐ पिण्डदानमहं करिष्ये, इति पृच्छेत्। ॐ कुरुष्व इति प्रतिवचनम्।

पिण्डिकानिर्माणम् संस्कारश्च (दक्षिणतिर ओरालो पारी बालुवा वा तुलसीको मठको माटोले चार कुनाको वेदी बनाउने)

ततः पिण्डदानार्थं हस्तमितां चतुरङ्गुलोच्छ्रितां सैकतादिकां दक्षिणप्लवां पिण्डिकां निर्माय पिण्डिकामध्ये वामेन पाणिना दर्भपिञ्जुलीं गृहीत्वा दक्षिणहस्ते कृत्वा सव्योपगृहीतदक्षिणपाणिना- (तीनवटा कुशले रेखा काट्ने)

ॐ अपहता असुरा रक्षा ꣳसि व्वेदिषदः।

इति मन्त्रेण दक्षिणाग्ररेखाद्वयं कृत्वा दर्भपिञ्जुलीमुत्तरस्यां क्षिपेत्।

ततो वेदिकायां परितः- (वेदीको वरिपरि सबैतिर कुशले धूप वा आगो घुमाउने)

ॐ ये रुपाणि प्रतिमुञ्चमाना० इति ज्वलदङ्गारं भ्रामयित्वा दक्षिणस्यां क्षिपेत्।

अवनेजनम्

(जलले वेदीमा सेचन गर्ने)

ततो जलेन शन्नोदेवीरिति मन्त्रेण पिण्डिकासेचनं तदनु छिन्नमूलकुशान् पिण्डिकायां दद्यात्।

ततः सव्येन- ॐ देवताभ्य० इति त्रिः पठेत्। (सव्य भएर नमस्कार गर्ने र फूल ओछ्याउने)

अपसव्यं कृत्वा एकं पुटकं वामहस्ते कृत्वा –

मोटकमादाय (अपसव्य भएर पिण्ड आसन दिन दुनामा जल राखी मोटक लिई संकल्प गर्ने)

ॐ अद्येहामुकसगोत्रास्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) वसुस्वरूपाद्यकर्तव्यैकपार्वणश्राद्धे पिण्डस्थानेऽत्रावने निक्ष्व ते स्वधेति छिन्न मूलकुशोपरि अवनेजनं दद्यात्। एवं पितामहप्रपितामहाभ्यां दद्यात्। (पितामहप्रपितामहको पिण्डलाई पनि आसन दिने)

पिण्डदानम्

(तीनवटा पिण्ड बनाई पहिलो पिण्ड लिने र पितालाई दिने)

ततः पिण्डान् निर्माय मोटकादीनि प्रथमपिण्डं चादाय वामहस्तेन पुटकादिस्थजलमादाय- ॐ अद्येहामुकसगोत्रास्मत्पितरमुकशर्मन् (वर्मन्, गुप्त) एषपिण्डोऽमृतस्वरूपोऽक्षय्यतृप्तिहेतोस्ते स्वधा। इति अवनेजनोपरि पिण्डं दद्यात्। एवं पितामहप्रपितामहाभ्यां दद्यात्। (पितामह, प्रपितामहलाई पनि पिण्ड दिने)

ततः आस्तृतकुशमूलेन- ॐ लेपभागभुजस्तृप्यन्तु। इति करं प्रोक्ष्य सव्यं कृत्वा द्विराचम्य हरिं स्मरेत्।

पितृध्यानम्

(सव्य भएर चन्दन, अक्षता, फूल लिने र उठ्ने)

ततः सव्येनैव पुष्पादीन्यादाय पित्रादीनुद्दिश्य- ॐ अत्रपितरो मादयध्वं यथाभागमावृषायिषत। इति वामावर्तेन पिण्डकाया दक्षिणतो गत्वा उत्तराभिमुखो भूत्वा श्वासं नियम्य भास्करमूर्तिंपितॄन् ध्यायन् अपसव्यं कृत्वा दक्षिणावर्तेन स्वासने गत्वा दक्षिणाभिमुखो भूत्वा- (पितृको ध्यान गरी अपसव्य भई पिण्डमा चढाउने)

ॐ अमीमदन्त पितरो यथाभागमावृषायिषत। इति मन्त्रेण पुष्पादिकानि पिण्डेषु निक्षिपेत्।

प्रत्यवनेजनम्

(जल दुनामा राख्ने र मोटक लिई संकल्प गर्ने)

ततोऽवनेजनपात्रं वामहस्ते कृत्वा मोटकमादाय- ॐ अद्यामुकसगोत्रास्मत्पितरमुकशर्मन् अद्य कर्तव्य एकपार्वणश्राद्धे इदं पिण्डप्रत्यवनेजनं ते स्वधा इति। एवं पिण्डेषु त्रयेषु प्रत्यवनेजनं दद्यात्। ततो नीवीं विस्रंस्य सव्य कृत्वाऽऽचम्य हरिं स्मरेत्। (पछाडिको पवित्र र फूल झार्ने र सव्य भएर आचमन गरी हरि सम्झने)

सूत्रदानम्

(अपसव्य भएर कपासको धागोलाई पहँलो रङले रङ्गाई पिण्डमा चढाउने)

ततः अपसव्यं कृत्वा षट्कृत्वो मनसा नमस्कुर्वन् वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय- ॐ नमो वः पितरो रसाय, नमो वः पितरः शोषाय, नमो वः पितरो जीवाय, नमो वः पितरः स्वधायै, नमो वः पितरो घोराय, नमो वः पितरो मन्न्यवे, नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मै तद्वः पितरो व्वासः आधत्त॥ इति मन्त्रं पठित्वा प्रत्येकं पिण्डोपरि सूत्रं दद्यात्।

पिण्डपूजनमर्पणञ्च

(पिण्ड पूजा गरी धूप बत्ती गर्ने)

ततः क्रमेण पिण्डान् गन्धादिभिः संपूज्य धूपदीपौ च कारयेत्। ततोमोटकमादाय- (मोटक लिई सङ्कल्प गर्ने)

ॐ अद्येहामुकसगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरूद्रादित्यस्वरूपा अद्य कर्तव्य एकपार्वणश्राद्धे एतानि पिण्डार्चनानि अत्र सूत्रगन्धपुष्पाक्षत धूपदीपैक्षवादिनैवेद्यानि त्रेधा विभज्य युष्मभ्यं स्वधा। इति गन्धादिकम् उत्सृजेत्।

जलपुष्पादिदानम्

(सव्य भएर विश्वेदेवाब्राह्मणमा जल, फूल, अक्षता चढाउने)

ततः सव्येन विश्वेदेवब्राह्मणकरयोः ॐ शिवा आपः सन्तु, इति जलम्, ॐ सौमनस्यमस्तु, इति पुष्पम, ॐ अक्षतं चारिष्टमस्तु इति तण्डुलान् प्रत्येकं दद्यात्।

अपसव्येन पितृब्राह्मणकरयोः – (अपसव्य भएर पितृब्राह्मणमा जल, फूल, अक्षता चढाउने)

ॐ शिवा आपः सन्तु, इति जलम्। ॐ सौमनस्यमस्तु, इति पुष्पम्। ॐ अक्षतं चारिष्टमस्तु, इति तण्डुलान् प्रत्येकं दद्यात्। सव्येन पूर्वाभिमुखो भूत्वाऽञ्जलि बद्ध्वा प्रार्थयेत्।

प्रार्थना

(सव्य हुने र नमस्कार गर्ने)

ॐ अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्। ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ॥
लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे। लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे ॥
अक्षतं चाऽस्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा। यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥

अभिषेचनम्

(कर्मपात्रको जलले आफ्नो शिरमा सेचन गर्ने)

ततः कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत्-

ॐ अस्मत्कुले दीर्घमायुरस्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ यच्छ्रेयस्तदस्तु। ॐ यत्पापं तत्प्रतिहतमस्तु, इति भूमौ ॥ ॐ द्विपदेचतुष्पदेभ्यः शान्तिर्भवतु।

ततोऽपसव्येन पिण्डशेषान्नं पिण्डसमीपे विकिरेत्। (अपसव्य भएर पिण्डको शेष पिण्ड नजिकै राख्ने)

अक्षय्योदकदानम्

(दुनामा तीर्थको जल राख्ने र मोटक लिई संकल्प गर्ने)

गङ्गाजलं वामहस्ते पुटकादौ गृहीत्वा मोटकमादाय- ॐ अद्यामुकसगोत्रस्यास्मत्पितुरमुकर्शणम् (वर्मन्, गुप्त) अत्र एकपार्वणश्राद्धे दत्रैतदन्नपानादिकमक्षय्यमस्तु इति पिण्डेऽक्षय्योदकं दद्यात्। (सव्य भएर पिण्डमा जल चढाउने)

सव्येन कृताञ्जलिर्भूत्वा- ॐ अघोराः पितरः सन्तु इति पिण्डोपरि पूर्वाग्रां जलधारां दद्यात्।

आशिषः प्रार्थना

(सव्य नै भएर पूर्व फर्की नमस्कार गरी आशीषका लागि प्रार्थना गर्ने)

सव्येनैव प्राङ्मुखोऽञ्जलिं बद्ध्वाऽऽशिषं प्रार्थयेत्- (पहिले ब्राह्मणले, पछि यजमानले र फेरि ब्राह्मणले भन्ने)

ॐ गोत्रन्नो वर्धताम्, ॐ वर्धताम् इति प्रतिवचनम्। ॐ दातारो नोऽभिवर्धन्ताम्, ॐ वर्धताम् इति प्रतिवचनम्। ॐ वेदाः वर्धन्ताम्, ॐ वर्धन्ताम् इति प्र०। ॐ सन्ततिर्वर्धताम्, ॐ वर्धताम् इति प्रतिवचनम्। ॐ श्रद्धा च नो मा व्यगमत्, ॐ मा गात् इति प्रतिवचनम्। ॐ बहुदेयं च नोऽस्तु, ॐ अस्तु इति प्रतिवचनम्। ॐ अन्नं च नो बहु भवेत्, ॐ भवतु इति प्रति। ॐ अतिथींश्च लभेमहि, ॐ लभध्वम् इति प्रतिवचनम्। ॐ याचितारश्च नः सन्तु। ॐ सन्तु इति प्रतिवचनम्। ॐ मा याचिष्म कञ्चन, ॐ मा याचेथाः। इति प्रतिवचनम्। ॐ एताः सत्या आशिषः सन्तु, ॐ सन्तु इति प्रतिवचनम्।

तिलककरणम्

(ब्राह्मणले श्राद्धकर्तालाई चन्दन लगाइदिने)

ततः श्राद्धकर्त्ता ब्राह्मणहस्तेन तिलकं कुर्यात्-

ॐ यं कामं कामयते सोऽस्मैकामः समृद्ध्यताम् इति मन्त्रेण। ततोऽपसव्येन सपवित्रान् कुशान् न्युब्जपात्रात् समादाय पिण्डोपरि निक्षप्य- (अपसव्य भई घोप्टिएको अर्घपात्रको फूल, पवित्र पिण्डमा चढाउने)

स्वधा उच्चारणम्

(कर्तालि नमस्कार गर्ने)

ॐ स्वधां वाचयिष्ये । ॐ वाच्यतामिति प्रतिवचनान्तरं रिक्ताञ्जलिना-

ॐ अद्यामुकसगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्योऽमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरूद्रादित्य स्वरूपेभ्यः अद्य कर्तव्य एकपार्वणश्राद्धे ॐ स्वधा उच्यताम् ३ । ॐ अस्तु स्वधा इति प्रतिवचनम् ।

जलधारा पयोधारादानम् च

(पिण्डमा पानी र दुधको धारा लगाउने)

ततो जलादिसहितं पुटकं वामहस्ते कृत्वा-

ॐ ऊर्ज्जं वहन्ती० इति मन्त्रेण सपवित्रकुशोपरि दक्षिणाग्रां जलधारां दद्यात् । तदनु आचारात् पयोधारां च दद्यात् ।

ब्राह्मणं प्रतिप्रश्नः पिण्डानुत्थापनं च

(पिण्डतिर निहुरिएर अपसव्य भई पिण्ड उठाउने)

ततः- ॐ पिण्डाः संपन्ना इति ब्राह्मणं पृच्छेत्, ॐ सुसम्पन्नाः इति प्रतिवचनम् । ॐ पिण्डान् उत्थापयामि, ॐ उत्थापयस्व इत्यनुज्ञातः सन् सव्येन नम्रीभूय पिण्डानाघ्राय –

अपसव्येन उत्थापयेत् । पिण्डाधारकुशानुल्मुकांश्च वन्हौ क्षिपेत् । (ओछ्याएको कुश आगोमा हाल्ने)

पिण्डिकायां शंखचक्रलेखनम् पूजनञ्च

(सव्य भएर वेदीमा शङ्खचक्र (७४) लेख्ने र जौले पूजा गर्ने)

सव्येन पिण्डिकायां शङ्खचक्रं च लिखेत् । ॐ शङ्खाय नमः । ॐ चक्राय नमः । शङ्खचक्राभ्यां नमः ।

इति यवैः शङ्खचक्रपूजां विधाय अपसव्यं कृत्वा -

(अपसव्य भएर पिण्ड उठाउने र पाँच पाइला चाली फर्किएर उसै ठाउँमा राख्ने)

ॐ गयायां पितृरूपेण स्वयमेव जनार्दनः । तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ॥

इति मन्त्रेण पिण्डं पिण्डिकोपरि निधाय एभिर्मन्त्रैः पूजयेत् । सव्येन- (सव्य भएर सबैले पिण्ड पूजा गर्ने)

ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः । वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः ॥

हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च । माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ॥ (कपुर, वत्ती बाल्ने)

सव्येनैव विश्वेदेवार्घपात्रं संचाल्य – (सव्य भएर विश्वेदेवार्घपात्र चलाउने)

अपसव्येन पित्र्यर्घपात्राण्युत्तानीकृत्य सव्येन दक्षिणां दद्यात् । (अपसव्य भएर पितृअर्घपात्र उत्तानो पार्ने)

दक्षिणादानम्

कुशयवजलदक्षिणाद्रव्याण्यादाय- (सव्य भएर विश्वेदेवा ब्राह्मणलाई दक्षिणा सङ्कल्प गर्ने र राखिदिने)

ॐ अद्यामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्माणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां पुरूरवार्द्रवनामविश्वेदेवपूर्वकाणामद्य कृतैतदेकपार्वणश्राद्धे वैश्वदैविकश्राद्ध प्रतिष्ठासिद्धयर्थं दक्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं द्रव्यं वा यथा दैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । इति ब्राह्मणकरे उत्सृजेत् ।

सव्येनैव कुशतिलजलदक्षिणाद्रव्यमादाय- (पितृब्राह्मणलाई दक्षिणा सङ्कल्प गर्ने र दिने)

ॐ अद्यामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां कृतैतत्सांवत्सरिकैकपार्वणश्राद्धप्रतिष्ठासिद्ध्यर्थं दक्षिणां रजतं चन्द्रदैवतं तन्मूल्योपकल्पितं द्रव्यं यथादैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। इति उत्सृजेत्।

पुनर्भूयसी दक्षिणाद्रव्यमादाय- (भूयसी दक्षिणा सङ्कल्प गर्ने र दिने)

ॐ अद्यामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (वर्मणां, गुप्तानां) सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां विश्वेदेवपूर्वकाणां कृतैतत्सांवत्सरिकैकपार्वणश्राद्धप्रतिष्ठार्थं न्यूनाति-रिक्तपरिपूर्णार्थं यद्देयमन्नपानादिकं द्रव्यं यथानामदैवतं नानानामगोत्रेभ्यो ब्राह्मणेभ्यः कन्याकुमारेभ्यो ब्राह्मणीभ्यश्च यथाभागं विभज्य यथाकाले दातुमहमुत्सृजे। पितृविसर्जनम् अपसव्येन- (अपसव्य भएर पितृब्राह्मण विसर्जन गर्ने)

ॐ व्वाजे व्वाजे० इति पित्रादीन् विसर्जयेत्॥ ॐ आमावाजस्य० इति पठेत्। (ऋषिलाई घ्यू लगाउने)

विश्वेदेवविसर्जनम् ततः सव्येन- (सव्य भएर विश्वेदेवाब्राह्मण विसर्जन गर्ने)

ॐ पुरूरवार्द्रव नामानो विश्वेदेवाः प्रीयन्तामिति विश्वेदेवविसर्जनं कुर्यात्।

ततो देवताभ्यः० इति त्रिः पठेत्॥ (नमस्कार गर्ने)

दीपाच्छादनम् प्रार्थना

(अपसव्य भएर दियो ढाक्ने, सव्य हुने, हातपाउ धुने र नमस्कार गर्ने)

अपसव्येन दीपाच्छादनं विधाय सव्येन हस्तौ पादौ प्रक्षल्याऽऽचम्य- ॐयत्कृतं तत्सुकृतमस्तु।

यन्न कृतंतद्विष्णोः प्रसादाद् ब्राह्मणवचनात् सर्वं परिपूर्णमस्तु॥ अस्तु परिपूर्णम्। इति प्रतिवचनम्।

ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥

आयुः प्रजां धनं विद्यां स्वर्ग-मोक्ष-सुखानि च। प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः॥

कर्मसमर्पणम्

(बाँकी रहेको कुश लिई भूमिमा छोडिदिने)

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्धचात्मना वा प्रकृतेः स्वभावात्।

करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये तत्॥

अच्युतस्मरणञ्च

(नमस्कार गर्ने र विष्णवे नमः ३, अच्युताय नमः ३ पटक भन्ने र ढोग्ने)

यस्यस्मृत्या०, चतुर्भिश्च० इत्यादि पठित्वा ॐ अच्युताय नमः ३ इति पठेत्॥

आशिर्मन्त्रपाठः

(आशीर्मन्त्र पाठ गर्ने)

हरि ॐ शतमिन्नु शरदोऽअन्तिदेवा यत्रानश्चक्राजरसन्तनुनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्यारीरिषतायुर्गन्तोः॥१॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता०...।

प्रसादग्रहणम्

(टीका लगाई प्रसाद वितरण गर्ने)

ॐ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षसुखानि च। प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः॥

॥ इति एकपार्वणश्राद्धविधिः॥

पितृसूक्तम्

हरिः ॐ अग्नये कव्यवाहनाय स्वाहा । सोमाय पितृमते स्वाहा । अपहताऽअसुरा रक्षा ꣳ सि व्वेदिषदः ॥१॥ ये रुपाणि प्रतिमुञ्चमानाऽ असुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भर न्त्यग्निष्टाँल्लोकान्प्रणुदात्यस्मात् ॥२॥ अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् । अमीमदन्त पितरो यथाभागमावृषायिषत ॥३॥ नमोवः पितरोरसाय नमोवः पितरः शोषाय नमोवः पितरोजीवाय नमोवः पितर स्वधायै नमोवः पितरोघोराय नमोवः पितरो मन्यवे नमोवः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्धः पितरो वासऽआधत्त ॥४॥ आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथेह पुरुषोसत् ॥५॥ उर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् । स्वधा स्थ तर्पयत मे पितॄन् ॥६॥

हरिः ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः । तदेव शुक्रं तद्ब्रह्म ताऽ आपः स प्रजापतिः ॥१॥ सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि नैनमूर्ध्वं न तिर्यञ्च न मध्ये परिजग्रभत् ॥२॥ न तस्य प्रतिमाऽअस्ति यस्य नाम महद्यशः । हिरण्यगर्भऽ इत्येष मा मा हि ꣳ सीदित्येषा यस्मान्न जातऽ इत्येषः ॥३॥ एषो ह देवाः प्रदिशोनु सर्वाः पूर्वो ह जातः सऽ उ गर्भेऽ अन्तः । सऽ एव जातः स जनिष्यमाणः प्रत्यङ जनास्तिष्ठति सर्वतोमुखः ॥४॥ यस्माज्जातं न पुरा किञ्च नैव यऽ आवभूव भूवनानि विश्वा । प्रजापतिः प्रजया स ꣳ रराणस्त्रीणि ज्योती ꣳ सि सचते स षोडशी ॥५॥ येन द्यौरुग्रा पृथिवी च दृढा येन स्वस्तभित. येन नाकः । योऽ अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥६॥ यङ्क्रन्दसी अवसा तस्तभानेऽ अभ्यैक्षेतां मनसा रेजमाने । यत्राधि सूरऽ उदितो विभाति कस्मै देवाय हविषा विधेम । आपो हयद्बृहतीर्यश्चिदापः ॥७॥ व्वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् । तस्मिनिनद ꣳ सं च वि चैति सर्व ꣳ सऽओतः प्रोतश्च विभूः प्रजासु ॥८॥ प्रतद्वोचेदमृतं नु विद्वान्गन्धर्वो धाम विभृतं गुहा सत् । त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पिता सत् ॥९॥ सनोवन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा । यत्र देवाऽअमृतमानसानास्तृतीये धामन्नध्यैरयन्त ॥१०॥ परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च । उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि संविवेश ॥११॥ परिद्यावापृथिवी सद्य इत्वा परि लोकान् परि दिशः परि स्वः । ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत् ॥१२॥ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिष ꣳ स्वाहा ॥१३॥ याम्मेधां देवगणा पितरश्चोपासते । तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥१४॥ मेधां मे बरुणो ददातु मेधामग्निः प्रजापतिः । मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥१५॥ इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् । मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥१६॥

हरिः ॐ कृणुष्व पाजः प्रसितिं न पृथ्वी याहि राजेवामवाँ२॥ इभेन । तृष्वीमनु प्रसितिं द्रूणानोस्तासि विध्य रक्षसस्तपिष्ठैः ॥१॥ तव भ्रमासऽ आशुया पतन्त्यनुस्पृश धृषता शोशुचानः । तपू ꣳ ष्यग्ने जुह्वा पतङ्गानसन्दितो

विसृज विष्वगुल्काः ॥२॥ प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशोऽ अस्या अदब्धः । यो नो दूरेऽ अघश ँ सो योऽ अन्त्यग्ने मा किष्टे व्यथिरादधर्षीत् ॥३॥ उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ२॥ ओषतात्तिग्महेते । यो नोऽ अराति ँ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥४॥ उर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने । अवस्थिरा तनुहि यातुजूनां जामिमजामि प्रमृणीहि शत्रून् । अग्नेष्ट्वा तेजसा सादयामि ॥५॥

हरिः ॐ सुरावन्तं बर्हिषद ँ सुवीरं यज्ञ ँ हिन्वन्ति महिषा नमोभिः । दधानाः सोमं दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः ॥१॥ यस्ते रसः सस्भृतऽओषधीषु सोमस्य शुष्मः सुरया सुतस्य । तेन जिन्व यजमानं मदेन सरस्वतीमश्विनाविन्द्रमग्निम् ॥२॥ यमश्विनां नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय । इमं त ँ शुक्रं मधुमन्तमिन्दु ँ सोम ँ राजामनमिह भक्षयामि ॥३॥ यदत्र रिप्त ँ रसिनः सुतस्य यदिन्द्रोऽ अपिबच्छचीभिः । अहं तदस्य मनसा शिवेन सोम ँ राजानमिह भक्षयामि ॥४॥ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्य स्वधानमः । अक्षन्नपितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्धध्वम् ॥५॥ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा । पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा । पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा विश्वमायुर्व्यष्णवै ॥६॥ अग्नऽआयु ँ षि पवसऽ आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥७॥ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥८॥ पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतुँ२॥ रनु ॥९॥ यत्ते पवित्रमर्चिष्यग्ने वितततमन्तरा । ब्रह्म तेन पुनातु मा ॥१०॥ पवमानः सोऽ अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥११॥ उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥१२॥ वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्वयस्तन्वो वीतपृष्ठाः । तया मदन्तः सधमादेषु वय ँ स्याम पतयो रयीणाम् ॥१३॥ ये समानाः समनसः पितरो यमराज्ये । तेषाँज्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥१४॥ ये समानाः समनसो जीवा जीवेषु मामकाः । तेषा ँ श्रीर्मयि कल्पतामस्मिँल्लोके शत ँ समाः ॥१५॥ द्वे सृतीऽ असृणवं पितृणामहं देवानामुत मर्त्यानाम् । ताभ्यामिदं विश्वमेजत्समेति यदनतरा पितरं मातरञ्च ॥१६॥ इद ँ हविः प्रजननं मेऽ अस्तु दशवीर ँ सर्वगण ँ स्वस्तये । आत्मसनि प्रजासनि पशुपसनि लोकसन्यभयसनि । अग्निः प्रजां वहुलां मे करोत्वन्नं पयो रेतोऽ अस्मासु धत्त ॥१७॥ उदीरतामवरऽ उत्परासऽ उन्मध्यमाः पितरः सोम्यासः । असुं यऽ ईयुरवृकाऽ ऋतज्ञास्ते नोवन्तु पितरो हवेषु ॥१८॥ अङ्गिरसो नः पितरो नवग्वाऽ अथर्वाणे भृगवः सोम्यासः । तेषां वय ँ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥१९॥ ये नः पूर्वे पितरः सोम्यासोनूहिरे सोमपथं वसिष्ठाः । तेभिर्यमः स ँ ररणो हवी ँ ष्युशन्नुशद्भिः प्रतिकाममत्तु ॥२०॥ त्व ँ सोम प्रचिकितो मनीषा त्व ँ रजिष्ठमनुनेषि पन्थाम् । तव प्रणीती पितरो नं इन्द्रो देवेषु रत्नमभजन्त धीराः ॥२१॥ त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः । वन्वन्नवातः परिधीँ२॥ र पोर्णु वीरेभिरश्वैर्मघवा भवानः ॥२२॥ त्व ँ सोम पितृभिः


संविदानोनु द्यावापृथिवीऽ अततन्थ । तस्मै तऽ इन्दो हविषा विधेम वय ꣳ स्याम पतयो रढीणाम् ॥२३॥ बर्हिषदः पितरऽ ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् । तऽ आवतावसा शान्तमेनाथा नः शंयोररपो दधात ॥२४॥ आह. पितृन्त्सुविदत्राँ२॥ अवित्सि नपातं च विक्रमणं च विष्णोः । बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्तऽ इहागमिष्ठाः ॥२५॥ उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु । तऽ आगमन्त तऽ आगमन्तु तऽइह श्रुवन्त्वधिब्रुवन्तु तेवन्त्वस्मान् ॥२६॥ आयन्तु नः पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन् यज्ञे स्वधया मदन्तोधिब्रुवन्तु तेवन्त्वस्मान् ॥२७॥ अग्निष्वात्ताः पितरऽ एह गच्छत सदः सदः सदत सुप्रणीतयः अत्ता हवि ꣳ षि प्रयतानि बर्हिष्यथा सयि ꣳ सर्ववीर दधातन ॥२८॥ येऽ अग्निष्वात्ता येऽ अनग्निष्वाता मध्ये दिवः स्वधया मादयन्ते । तेभ्यः स्वराडसुनीतिमेतां यथावशं तन्वं कल्पयाति ॥२९॥ अग्निष्वात्तानृतुमतो हवामहे नाराश ꣳ से सोमपीथं यऽ आशुः । ते नो विप्रासः सुहवा भवन्तु वय ꣳ स्याम पतयो रयीणम् ॥३०॥ आच्या जानु दक्षिणतो निषद्येमं यज्ञमभिगृणीत विश्वे । मा हि ꣳ सिष्ट पितरः केनचिन्नो यद्वऽ आगः पुरुषता कराम ॥३१॥ आसीनासोऽ आरुणीनामुपस्थे रयिं धत्तदाशुषे मर्त्याय । पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छत तऽ इहोर्जं दधात ॥३२॥ यमग्ने कव्यवाहनत्वं चिनमन्यसे रयिम् । तन्नो गोर्भिः श्रावाय्यं देवत्रा पनया युजम् ॥३३॥ योऽ अग्निः कव्यवाहनः पितृन्यक्षदृतावृधः । प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्यऽ आ ॥३४॥ त्वमग्नऽईडितः कव्यवाहनावाड्ढव्यानि सुरभीणि कृत्वी । प्रादाः पितृभ्यः स्वधया तेऽ अक्षन्नद्धि त्वं देव प्रयता हवी ꣳ षि ॥३५॥ ये चेह पितरो ये च नेह याँश्च विद्म याँ२ ॥ उ च न प्रविद्म । त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञ ꣳ सुकृतञ्जुषस्व ॥३६॥ इदं पितृभ्यो नमोऽ अस्त्वद्य ये पूर्वासो यऽ उपरासऽईयुः । ये पार्थिवे रजस्या निषत्ता ये वा नून ꣳ सुवृजनासु विक्षु ॥३७॥ अधा यथा नः पितरः परासः प्रत्नासोऽआग्न ऋतमाशुषाणाः । शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तोऽअरुणीर पवन् ॥३८॥ उशन्तस्त्वा निधीमह्यु शान्तः समिधीमहि । उशन्नुशतऽ अवह पितॄन्हविषेऽ अत्तवे ॥३९॥ अपां फेनेन नमुचेः शिरऽ इन्द्रोदवर्तयः । विश्वा यदजयस्पृधः ॥४०॥

हरिः ॐ सहस्रशीर्षापुरुषः सहस्राक्ष÷सहस्रपात । सभूमि ꣳ सर्व्वतस्पृष्त्वात्त्यदिष्ठद्दशाङ्गुलम् ॥१॥ पुरुषऽएवेद ꣳसर्व्वय्यद्द्भूतँय्यच्चभाव्यम् । उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥२॥ एतावानस्यमहिमातोज्जायाँश्चपूरुषः । पादोस्यव्विश्वाभूतानित्रिपादस्यामृतन्दिवि ॥३॥ त्रिपादूद्ध्वऽउदैत्पुरुषः पादोस्येहा-भवत्पुन÷ ॥ ततोव्विष्व-ङ्व्यक्रामत्साशनानशनेऽअभि ॥४॥ ततोव्विराडजायतव्विराजोऽअधिपूरुषः । सजातोऽअत्यरिच्यतपश्चाद्द्-भूमिमथोपुर÷ ॥५॥ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्यम् । पशूँस्ताश्चक्रेव्वायव्यानारण्याग्ग्राम्या-श्चये ॥६॥ तस्माद्यज्ञात्सर्व्वहुतऽऋचः सामानिजज्ञिरे । छन्दा ꣳसि जज्ञिरेतस्माद्यजुस्तस्मादजायत ॥७॥ तस्माद-श्वाऽजायन्तयेकेचोभयादतः । गावोहजज्ञि- रेतस्मात्तस्मा- ज्जाताऽअजावय÷ ॥८॥ तँय्यज्ञम्बर्हिषि-प्प्रौक्षन्न्पुरुषञ्जातऽमग्ग्रत÷ । तेनदेवाऽअयजन्तसाद्धयाऽऋषयश्चये ॥९॥ यत्पुरुषंव्व्यदधुःकतिधाव्व्यकल्पयन् ।

मुखङ्किमस्यासीत्तिकम्बाहूकिमूरूपादाऽउच्च्येते ॥१०॥ ब्राह्म्मणोस्यमुखमासीद्दबाहूराजन्न्य÷कृत÷ ॥ ऊरूत-दस्ययद्द्वैश्शय÷पद्भ्या ॐ शूद्द्रोऽअजायत ॥११॥ चन्द्रमामनसोजातश्च्चक्क्षोःसूर्योऽअजायत । श्रोत्राद्द्वायुश्च्च-प्प्राणश्च्चमुखादग्ग्निरजायत ॥१२॥ नाब्म्याऽआसीदन्तरिक्षशीष्ण्र्णोद्द्यौ÷समवर्त्तत । पद्द्भ्याम्भूमिर्द्दिशःश्रोत्रात्त थालोकाँ २॥ ऽअकल्प्पयन् ॥१३॥ यत्त्पुरुषेणहविषादेवायज्ञमतन्न्वत ॥ व्वसन्तोऽस्यासीदाज्ज्यङ्ग्रीष्म्मऽइद्द्ध्यम÷ शरद्धवि÷॥१४॥सप्त्तास्यासन्नपरिधयस्त्रि÷सप्त्तसमिध÷कृता÷।देवायद्द्यज्ञन्तन्न्वानाऽअबद्ध्नन्न्पुरुषम्पशुम्॥१५॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्प्रथमान्न्यासन् ॥ तेहनाकम्महिमान÷सचन्तयत्रपूर्व्वेसाद्धया÷सन्ति-देवा÷ ॥१६॥

ॐ नमस्तेरुद्द्रमन्न्यवऽउतोतऽइषवेनम÷ । बाहुब्म्यामुततेनम÷ ॥ (६६ मन्त्रसम्म) पेज नं. ६३–७१

ॐ आशुःशिशानोव्वृषभोनभीमोघनाघनः शोभणश्च्चर्षणीनाम् । (१७ मन्त्रसम्म) ..... पेज नं. ५९–६०



॥ इति पितृसुक्तम् सम्पूर्णम् ॥

ॐ

श्रीपरमात्मने नमः
श्रीरामगीता

श्रीगणेशाय नमः । श्रीमहादेव उवाच । ततो जगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् । चचार पूर्वाचरितं रघुत्तमो राजर्षिवर्यैरभिसेवितं यथा ॥१॥ सौमित्रिणा पृष्ट उदारबुद्धिना रामः कथाः प्राह पुरातनीः शुभाः । राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमयाह राघवः ॥२॥ कदाचिदेकान्त उपस्थितं प्रभुं रामं रमालालितपादपङ्कजम् । सौमित्रिरासादितशुद्धभावनः प्रणम्य भक्त्या विनयान्वितोऽब्रवीत् ॥३॥ सौमित्रिरुवाच । त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निराकृतिः स्वयम् । प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसङ्गिनाम् ॥४॥ अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् । यथाऽञ्जसाऽज्ञानमपारवारिधिं सुखं तरिष्यामि तथानुशाधि माम् ॥५॥ श्रुत्वाऽथ सौमित्रिवचोऽखिलं तदा प्राह प्रपन्नार्तिहरः प्रसन्नधीः । विज्ञानमज्ञानतमःप्रशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥६॥ श्रीराम उवाच । आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः । समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये ॥७॥ क्रिया शरीरोद्भवहेतुरादृता प्रियाप्रियौ तौ भवतः सुरागिणः । धर्मेतरौ तत्र पुनः शरीरकं पुनः क्रिया चक्रवदीर्यते भवः ॥८॥ अज्ञानमेवास्य हि मूलकारणं तद्धानमेवात्र विधौ विधीयते । विद्यैव तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितम् ॥९॥ नाज्ञानहानिर्न च रागसंक्षयो भवेत्ततः कर्म सदोषमुद्भवेत् । ततः पुनः संसृतिरप्यवारिता तस्माद् बुधो ज्ञानविचारवान्भवेत् ॥१०॥ ननु क्रिया वेदमुखेन चोदिता तथैव विद्या पुरुषार्थसाधनम् । कर्तव्यता प्राणभृतः प्रचोदिता विद्या सहायत्वमुपैति सा पुनः ॥११॥ कर्माकृतौ दोषमपि श्रुतिर्जगौ तस्मात्सदाकार्यमिदं ममुक्षुणा । ननु स्वतन्त्रा ध्रुवकार्यकारिणी विद्या न किञ्चिन्मनसाप्यपेक्षते ॥१२॥ न सत्यकार्येऽपि हि यद्वदध्वरः प्रकाङ्क्षतेऽन्यानपि कारकादिकान् । तथैव विद्या विधितः प्रकाशितैर्विशिष्यते कर्मभिरेव मुक्तये ॥१३॥ केचिद्वदन्तीति वितर्कवादिनस्तदप्यसद्दृष्टविरोध-कारणात् । देहाभिमानादभिवर्धते क्रिया विद्या गताऽहङ्कृतितः प्रसिद्धयति ॥१४॥ विशुद्धविज्ञानविरोचनाञ्चिता विद्याऽऽत्मवृत्तिश्चरमेति भण्यते । उदेति कर्माखिलकारकादिभिर्निहन्ति विद्याऽखिलकारकादिकम् ॥१५॥ तस्मात्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्न समुच्चयो भवेत् । आत्मानुसन्धानपरायणः सदा निवृत्तसर्वेन्द्रिय-वृत्तिगोचरः ॥१६॥ यावच्छरीरादिषु मायायाऽऽत्मधीस्तावद्विधेयो विधिवादकर्मणाम् । नेतीति वाक्यैरखिलं निषिध्य तज्ज्ञात्वा परात्मानमथ त्यजेत्क्रियाः ॥१७॥ यदा परात्मात्मविभेदभेदकं विज्ञानमात्मन्यवभाति भास्वरम् । तदैव माया प्रविलीयतेऽञ्जसा सकारका कारणमात्मसंसृतेः ॥१८॥ श्रुतिप्रमाणाभिविनाशिता च सा कथं भविष्यत्यपि कार्यकारिणी । विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्या न पुनर्भविष्यति ॥१९॥ यदि स्म नष्टा न पुनः प्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् । तस्मात्स्तन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥२०॥ सा

तैत्तिरीयश्रुतिराह सादरं न्यासं प्रशस्ताखिलकर्मणां स्फुटम् । एतावदित्याह च वाजिनां श्रुतिर्ज्ञानं विमोक्षाय न कर्म साधनम् ॥२१॥ विद्यासमत्वेन तु दर्शितस्त्वया क्रतुर्न दृष्टान्त उदाहृतः समः । फलैः पृथक्त्वाद्बहु-कारकैः क्रतुः संसाध्यते ज्ञानमतो विपर्ययम् ॥२२॥ सप्रत्यवायो ह्यहमित्यनात्मधीरज्ञप्रसिद्धा न तु तत्त्वदर्शिनः । तस्माद् बुधैस्त्याज्यमविक्रियात्मभिर्विधानतः कर्म विधिप्रकाशितम् ॥२३॥ श्रद्धान्वितस्तत्त्वमसीति वाक्यतो गुरोः प्रसादादपि शुद्धमानसः । विज्ञाय चैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः ॥२४॥ आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः । तत्त्वम्पदार्थौ परमात्मजीवकावसीति चैकात्म्यमथानयोर्भवेत् ॥२५॥ प्रत्यक्परोक्षा-दि विरोधमात्मनोर्विहाय संगृह्यतयोश्चिदात्मताम् । संशोधितां ल क्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत् ॥२६॥ एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः । सोऽयं पदार्थाविव भागलक्षणा युज्येत तत्त्वं पदयोरदोषतः ॥२७॥ रसादिपञ्चीकृतभूतसम्भवं भोगालयं दुःखसुखादिकर्मणाम् । शरीरमाद्यन्तवदादिकर्मजं मायामयं स्थूलमुपाधिमात्मनः ॥२८॥ सूक्ष्मं मनो बुद्धिदशेन्द्रियैर्युतं प्राणैपरपञ्चीकृतभूतसम्भवम् । भोक्तुः सुखादेरनुसाधनं भवेच्छरीरमन्यद्विदुरात्मनो बुधाः ॥२९॥ अनाद्यनिर्वाच्यमपीह कारणं मायाप्रधानं तु परं शरीरकम् । उपाधिभेदात्तु यतः पृथक् स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥३०॥ कोशेष्वयं तेषु तु तत्तदाकृतिर्विभाति सङ्गात्स्फटिकोपलो यथा । असङ्गरुपोऽयमजो यतोऽद्वयो विज्ञायतेऽस्मिन्परितो विचारिते ॥३१॥ बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादिभेदेन गुणत्रयात्मनः । अन्योन्यतोऽस्मिन्व्यभिचारतो मृषा नित्ये परे ब्रह्मणि केवले शिवे ॥३२॥ देहेन्द्रियप्राणमनश्चिदात्मनां सङ्घादजस्त्रं परिवर्तते धियः । वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः ॥३३॥ नेतिप्रमाणेन निराकृताखिलो हृदा समास्वादितचिद्घनामृतः । त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥३४॥ कदाचिदात्मा न मृतो न जायते न क्षीयते नापि विवर्धतेऽनवः । निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ॥३५॥ एवंविधे ज्ञानमये सुखात्मके कथं भवो दुःखमयः प्रतीयते । अज्ञानतोऽध्यासवशात्प्रकाशते ज्ञाने विलीयेत विरोधतः क्षणात् ॥३६॥ यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः । असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत् ॥३७॥ विकल्पमायारहिते चिदात्मकेऽहङ्कार एष प्रथमः प्रकल्पितः । अभ्यास एवात्मनि सर्वकारणे निरामये ब्रह्मणि केवले परे ॥३८॥ इच्छादिरागादिसुखादिधर्मिकाः सदा धियः संसृतिहेतवः परे । यस्मात्प्रसुप्तौ तदभावतः परः सुखस्वरूपेण विभाव्यते हि नः ॥३९॥ अनाद्यविद्योद्भवबुद्धिबिम्बितो जीवः प्रकाशोऽयमितीर्यते चितः । आत्मा धियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः स एव हि ॥४०॥ चिद्बिम्बसाक्ष्यात्मधियां प्रसङ्गतस्त्वेकत्र वासादनलाक्तलोहवत् । अन्योन्यमध्यासवशात्प्रतीयते जडाजडत्वं च चिदात्मचेतसोः ॥४१॥ गुरोः सकाशादपि वेदवाक्यतः सञ्जातविद्यानुभवो निरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥४२॥ प्रकाशरुपोऽहमजोऽहमद्वयो-ऽसकृद्विभातोऽहमतीव निर्मलः । विशुद्धविज्ञानघनो निरामयः सम्पूर्ण आनन्दमयोऽहमक्रियः ॥४३॥ सदैव मुक्तोऽह मचिन्त्यशक्तिमानतीद्रियज्ञानमविक्रियात्मकः । अनन्तपरारोऽहमहर्निशं बुधैर्विभावितोऽहं हृदि वेदवादिभिः ॥४४॥ एवं सदात्मानमखण्डितात्मना विचारमाणस्य विशुद्धभावना । हन्यादविद्यामचिरेण कारकै रसायनं यद्वदुपासितं रुजः ॥४५॥ विविक्त आसीन उपारतेन्द्रियो विनिर्जितात्मा विमलान्तराशयः । विभावयेदेकमनन्यसाधनो विज्ञानदृक्केवल

आत्मसंस्थितः ॥४६॥ विश्वं यदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे। पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्तरम् ॥४७॥ पूर्वं समाधेरखिलं विचिन्तयेदोङ्कारमात्रं सचराचरं जगत्। तदेव वाच्यं प्रणवो हि वाचको विभाव्यतेऽज्ञानवशान्न बोधतः ॥४८॥ अकारसंज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात्। प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधिपूर्वं न तु तत्त्वतो भवेत् ॥४९॥ विश्वं त्वकारं पुरुषं विलापयेदुकारमध्ये बहुधा व्यवस्थितम्। ततो मकारे प्रविलाप्य तैजसं द्वितीयवर्ण प्रणवस्य चान्तिमे ॥५०॥ मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम्॥ सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥५१॥ एवं सदा जातपरात्मभावनः स्वानन्दतुष्टः परिविस्मृताखिलः। आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारि-सिन्धुवत् ॥५२॥ एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि। विनिर्जिताशेषरिपोरहं सदादृश्यो भवेयं जितषड्गुणात्मनः ॥५३॥ ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः। प्रारब्धमश्नन्नभिमानवर्जितो मय्येव साक्षत्प्रविलीयते ततः ॥५४॥ आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोककारणम्। हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मानमथाखिलात्मनाम् ॥५५॥ आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयात्मना तदा। यथा जलं वारिनिधौ यथा पयः क्षीरे वियद्वद्योम्न्यनिले यथानिलः ॥५६॥ इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेति विभावयन्मुनिः। निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥५७॥ यावन्न पश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत्। श्रद्धालुरत्यूर्जितभक्तिलक्षणो यस्तस्य दृश्योऽहमहर्निशं हृदि ॥५८॥ रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय। यस्त्वेतदालोचयतीह बुद्धिमान् स मुच्यते पातकराशिभिः क्षणात् ॥५९॥ भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा। मद्भावनाभावितशुद्धमानसः सुखीभवानन्दमयो निरामयः ॥६०॥ यः सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम्। सोऽहं स्वपादाञ्चितरेणुभिः स्पृशन् पुनाति लोकत्रितयं यथा रविः ॥६१॥ विज्ञानमेतदखिलं श्रुतिसारमेकं वेदान्तवेद्यचरणेन मयैव गीतम्। यः श्रद्धया परिपठेद् गुरुभक्तियुक्तो मद्रुपमेति यदि मद्वचनेषु भक्तिः ॥६२॥



॥ इति श्रीमद्ध्यात्मरामायणे उत्तरकाण्डे
रामगीता सम्पूर्णम्॥
कृष्णार्पणमस्तु

आशौचमा पहिलो दिनदेखि चाहिने सामग्रीहरू

दसौं दिनसम्मका लागि सामग्रीहरू :– सुनको फाली, पातीको पात, उसिर, चाँदीको कोदालो, भृङ्गीराज, फलाम, दुध, खोची, सालको पात, सिन्का, सिदा - १, पाला, पञ्चगव्य (गहुँत), सप्तधान्य, काँचो माटोको हाँडी, जनै, सुपारी, धोती, गञ्जी, चामल, मह, दुध, घ्यू, माटाको घडा, सेतो वस्त्र, तसला, जौको पिठो, पैसा, कुश, श्रीखण्ड, चनौटो, गरुडपुराणको लागि पिर्का, पहेँले कपडा, धूप, फलफूल, उन, परालको चप्पल, सानो डालो १ ।

एघारौं दिनका लागि :– पञ्चगव्य (गहुँत), दियो, धुप, बत्ती, सेतो वस्त्र, कुश, तिल, जौ, केशरी, पकवान, नैवेद्य, फलफूल, जनै सुपारी, सिदा, दत्तिवन -३६०, गोल्फु वा सानो घडा ३६०, कर्मपात्रे भाँडो, दुध, दही, घ्यू, मह, चिनी, भेटी पैसा आदि, दुना टपरी (एकसरो) ७०, सर्वत, छाता, जुत्ता, धोती, चामल, गाई-गोरुको प्रतिमा या बाछावाछी ।

बाह्र र तेह्र दिनका लागि :– दियो, धूप, बत्ती, केशरी, सेतो वस्त्र, कुश, तिल, जौ, पकवान, फलफूल, नैवेद्य, जनै, सुपारी, सिदा, चामल, नुन, कालो दाल, वेसार, घ्यू, अदुवा, चिनी, मसला, मिस्री, जल, आलु, तरकारी, दुध, दही, मह, घ्यू, चिनी, समिधा (दाउरा), पहेँलो धागो १ डल्लो (रक्षाबन्धन), नरिवल - २ सुकेको, दुना, टपरी (६० वटा) दोहोरो कर्मपात्रो भाँडो, ब्राह्मणका लागि धोती, टोपी, गञ्जी, कलश (५ वटा) माटोको, फूल माला, गहुँत, सर्स्यू, खाट, झुल, गुन्द्री, राडी, डसना, तकिया, सिरक, तन्ना, सुनको तार (पिण्ड काट्ने), गो दान (गाई), सतरञ्जी ।

ब्राह्मण परिधान :– धोती, कमिज, सुरुवाल, ज्वारीकोट, इस्टकोट, कोट, दौरा, सुरुवाल, टोपी, गम्छा, रुमाल, लौरो, औँठी, जुत्ता, छाता आदि जेजति सकिन्छ ।

ब्राह्मणी परिधान :– धोती, चोलो, पछ्यौरा, शृङ्गार- सिन्दूर, टीका, गाजल, चुरा, गहनाहरू, पोते, छाता, जुत्ता, मोजा, रुमाल, दराज, टेवल, ऐना आदि जेजति सकिन्छ ।

हवनका लागि :– यथाशक्ति चामल, दाल, तरकारी, घ्यू, तेल, मसला, आलु, नुन, जल, चिनी, मिस्री, डालो (३ वटा), कुर्सी, वहान, पकाउने भाँडो, डाडु, पन्यू, थाल, कचौरा, गिलास, कराइ, चुलो, गाग्री, कोपारा, चम्चा, काँटा आदि ।

पूजाभाँडा :– पञ्चपात्र, आचमनी, लोहोटा, अम्खरा, घण्टी, खोपिल्टे थाली, चन्दन खोरी, अर्घौंतो, आरती, धुपौरो, तामाको कर्मपात्र, तामाको थाली, माला (तुलसी वा रुद्राक्ष) विष्णुलक्ष्मीको तस्बिर, चित्राङ्कित प्रतिमा ।

पददान :– छाता, जुत्ता, वस्त्र, औँठी, कमण्डलु, आसनी, पञ्चपात्र, लठ्ठी, ताम्रपात्र (तामाको भाँडो), सिदा, भोजनसामग्री, जनै, दक्षिणा (पैसा) ।

दशदानका लागि चाहिने सामग्रीहरू

गाई, भूमि, तिल, सुन, घ्यू, कपडा, धान, सखर, चाँदी, नुन

श्राद्धका लागि चाहिने सामग्रीहरू

श्रीखण्ड, केशरी, चामल, तिल, जौ, आसनी, सेतो पहेँलो फूल, दुबो, तुलसीपत्र, तर्पण दिने भाँडो, दुध, दही, घ्यू, सिदासामग्री, मह, चिनी, जनै, सुपारी, सेतो कपडा, खगौतो, अर्घौतो, विष्णुपादुका थाली, कर्मपात्रे भाँडो, अम्खरा/करूवा, पञ्चपात्रो, आचमनी, बालुवा, पानको पात, फलफूल नैवेद्य, धूप, बत्ती, कपुर, कुश, दुना, टपरी, दक्षिणा (पैसा), धुपौरो, नैवेद्यपरिकारहरू जेजति सकिन्छ ।

मुख्य मुख्य केही जुठो-सूतक निर्णयहरू

सूतक निर्णय :

१. ६ महिनासम्मको गर्भस्राव भए (तुहे) आमालाई जति महिनाको गर्भ तुहेको हो त्यति दिन सूतक लाग्छ। बाबु र सपिण्डीलाई ४ महिनासम्मको भए नुहाए शुद्ध हुन्छ र ५, ६ महिनाको भए ३ दिन सूतक लाग्छ।

२. ७ महिनादेखि पूरा १० दिन जुठो बार्नुपर्छ र सुत्केरीलाई पनि १० दिन जुठो लाग्छ।

३. छोरो पाएको भए २२ दिन र छोरी भए ३० दिनदेखि गोदान गरेर पानी छुनुपर्छ।

४. नाल नकाटी बच्चा मरे सपिण्डीलाई ३ दिन र सुत्केरीलाई १० दिन, नाल काटेपछि मरेको भए पुरै १० दिन।

५. माइतमा सुत्केरी भए बाबु र दाजुभाइलाई १ दिन। म्याद नाघेपछि सुनेको सूतक वार्नु पर्दैन।

जुठो निर्णय :

१. छोरा व्रतबन्ध नगरी मरे बावु आमा र सौतेनी आमालाई ३ रात बार्नुपर्छ।

२. ६ महिनासम्मको सपिण्डीले स्नान गर्ने, ६ महिनादेखि ३ वर्षसम्म ४ दिन बार्नुपर्छ।

३. छोरीको ६ महिनासम्म सपिण्डीलाई १ दिन, बाबु र आमालाई ३ दिन बार्नुपर्छ।

४. विवाह गरेकी छोरी माइतमा मरे दाजुभाइलाई ३ दिन, पतिको घरमा मरे पक्षिणी, काकालाई १ दिन, दिदी बहिनीलाई दाजुभाइ सरह लाग्दछ।

५. छोराले बाबुआमाको नियमले दशरात्रि बार्नुपर्छ। (कर्म नचलेकाले पनि बार्नुपर्छ।)

६. विवाह गरेकी छोरीको - १० दिनभित्र सुने ३ दिन र १० दिनपछि सुने एक दिन बार्नुपर्छ।

७. धर्मपुत्रले ३ दिन, क्रिया गर्नु परे १० दिन बार्नुपर्छ।

८. सौतेनी आमाको १० दिन, एक वर्षपछि सुनेको भए ३ दिन बार्नुपर्छ।

९. विवाह भएकी छोरीले हजुरबा र काकाकाकीको स्नान मात्र गर्ने।

१०. मामा माइजूको पक्षिणी, सौतेनी तर्फका १ दिन विवाहित भान्जीको स्नान मात्र गर्ने।

११. विवाहित छोरीले बाबुआमाको ५ दिन, ज्वाइँले सासूससुराको ५ दिन।

१२. ज्वाइँको एक दिन, ससुरालीमा मरे ३ दिन।

१३. सानीमा, ठुलीआमा, फुपू पक्षिणी (आफ्नै घरमा मरे ३ दिन), सौतेनीले फुपू भदाको स्नान मात्र। सालासालीको १ दिन (कर्म नचलाएको भए स्नानमात्र गर्ने) फुपूका, सानीमा, ठूलीमाका छोराको पक्षिणी, काका, सानीमा, ठुलीआमा, मामाका छोराहरू, छोरीका छोरी, भतिजी र यस्तै अलि अलि सम्बन्ध पर्नेको सुने स्नान गर्ने।

१४. धर्मपुत्रले दुवै तरफका बावुआमाको ३ दिन, धर्मपुत्रतिरका छोरा नातिको जूठो सूतक सपिण्डीभित्र १ दिन (कुलकै भए पूरा)। सातपुस्ता भित्र व्रतबन्ध भएका (सपिण्डी भित्र) १० रात्रि, गुरुको ३ दिन, मित्रको १ दिन। घरमा नाता नपर्ने मरे १ दिन।

१५. अलिअलि चिनजान र मलामी गएमा पनि स्नान गर्नुपर्दछ।

---

१ दिन = **आजैको दिन र रात**। सज्योति = **दिनभर वा रातभर**। पक्षिणी = **२ दिन १ रात वा १ दिन २ रात**।

केही मुख्य मुख्य निर्णयहरू

(श्रीकमलाकर भट्टको निर्णयसिन्धुमा आधारित)

१. धर्मकर्म आदि गर्दा पत्नीको स्थान र पतिको स्थान कता हुनुपर्दछ ?

☞ पूजामा पत्नी दायाँ अभिषेक र आशीर्वाद लिँदा पत्नी बायाँ बस्नुपर्दछ ।

२. घरमा पूजा गरिने देवताको मूर्ति कत्रो हुनुपर्दछ ?

☞ ७ अंगुल (इन्च) देखि १२ अंगुल (इन्च) सम्मको हुनुपर्छ । सोभन्दा ठूलो भएमा घरबाहिर मन्दिर बनाएर पूजा गर्नुपर्दछ ।

३. शालग्राम (शालिग्राम) नारी जातिले पूजा गर्नु हुन्छ कि हुँदैन ?

☞ शालग्राम सबै देवताको स्वरूप हो । त्यसैले नारीहरूले नछोई पूजा गर्न हुन्छ ।

४. लिइराखेको व्रत बस्न बिर्सियो या सकिएन भने के गर्ने ?

☞ व्रत भनेको भोको बस्नु मात्र होइन ।

उखु र दुध, दही फलफूल जान, व्रत लिँदामा पनि हुन्छ खान ।
खाएर पनि जप, पाठ, ध्यान गर्नु हुन्छ पाप लाग्दैन जान ॥
बासी, फोहर वस्तु, मांस मदिरा दुर्गन्ध क्यै आउने ।
त्यस्ता अन्न कुनै नखानु व्रतमा रिस काम वृधि हुने ॥

यो भनाइलाई मानी क्षमा गर्नु, सत्य बोल्नु, दया गर्नु, दान गर्नु, शरीर शुद्ध राख्नु, मन शुद्ध राख्नु, इन्द्रियहरू वशमा राख्नु, सम्बन्धित देवताको पूजा र होम गर्नु, मनमा सन्तोष लिनु र नचोर्नु अनि मात्र व्रत पूरा हुन्छ । त्यसो गर्दागर्दै पनि लिन सकिएन अथवा बिर्सियो भने सिदा र दक्षिणा दान गरिदिनु, व्रत पूरा हुन्छ ।

५. विवाहमा बेहुला या बेहुलीकी आमा रजस्वला भएमा के गर्ने ?

☞ विधिपूर्वक लक्ष्मीको पूजा र होम गरेर विवाह गर्नुपर्दछ ।

६. विवाहमा बेहुली रजस्वला भएमा के गर्ने ?

☞ स्नान गराई विधिपूर्वक लक्ष्मीको पूजा होम गरेर गोदान समेत गराई विवाह सम्पन्न गर्नुपर्दछ ।

७. कुरा छिनेपछि केटा या केटीको घरमा कसैको मृत्यु भएमा के गर्ने ?

☞ एक महिनापछि विनायक शान्ति गरेर अरूद्वारा हवन गरेर विवाह गरिदिए हुन्छ ।

८. राति जन्म, मरण, रजस्वला आदि भएमा दिन निर्णय कसरी गर्ने ?

☞ रातलाई तीन भाग लगाउनु र तेस्रो भागलाई भोलिपल्ट मान्नु पर्दछ । व्यवहारमा १२ बजेपछि भोलिपल्ट मान्ने चलन छ ।

९. श्राद्धमा पत्नी रजस्वला भएमा के गर्ने ?

☞ पत्नीलाई तुरुन्तै घरबाट टाढा पठाएर गर्नु, नत्र गर्नु हुँदैन ।

१०. पूजा, यज्ञको अग्नि कति दिन राख्नुपर्दछ ?

☞ तीन रातसम्म राख्नुपर्दछ ।

११. एकै दिन एकोदिष्ट र पार्वण श्राद्ध गर्नु पऱ्यो भने के गर्ने ?

☞ एकपार्वण श्राद्ध गर्ने गर्नुपर्दछ ।

१२. कुनै व्यक्ति मरेको दिन थाहा नभएमा श्राद्ध कहिले गर्ने ?

☞ महिना थाहा छ भने उक्त महिनाको एकादशीमा, औंशीमा अथवा सुनेकै दिनलाई तिथि मान्नु पर्दछ ।

१३. जुठो सूतकले श्राद्ध या मासिक श्राद्ध रोकियो भने के गर्ने ?

☞ श्राद्ध रोकिएको भए सूतकको बाह्रौं दिन र जुठोले भए तेह्रौं दिनमा गर्नु । मासिक रोकिएको भए अर्को महिनामा दुईवटा गर्नुपर्दछ ।

१४. पूजा या श्राद्धमा कुश नपाए के गर्ने ?

☞ कुश नभए क्रमशः काँस, बाबियो, खर, दुबोले काम चलाउनुपर्दछ ।

१५. सूतकमा जुठो र जुठोमा सूतक पर्न आएमा के गर्ने ?

☞ जुठो पूरा जुन दिन हुन्छ, सूतक पनि त्यही दिन चोख्याउनु पर्दछ । दुवै सँगै पूरा गर्नुपर्दछ ।

१६. आशौचमा अर्को आशौच पऱ्यो भने के गर्ने ?

☞ पछिल्लोको दसौं दिनमा पहिलो पनि चोखिन्छ । एघार दिनपछि परेमा सुन्नै नपर्ने स्थिति रहनु पर्दछ । सुने पनि सुरु गरेको श्राद्ध रोकिँदैन र एघारौं बाह्रौं क्रमैसँग गर्नुपर्दछ ।

१७. शुभकार्यमा सूतक या जुठो परेमा के गर्ने ?

☞ नान्दीमुखीश्राद्ध गरेर कर्म गरेको भए गोदान गरेर कर्म चलाउनु पर्दछ । नान्नीमुखी श्राद्ध नगरेको भए जुठो सूतकमा शुभ कार्य गर्नु हुँदैन ।

१८. परदेशमा मर्नेको पछि खबर आएमा के गर्ने ?

☞ दस दिन नबित्तै खबर आएमा जति दिन बाँकी छ त्यति दिन गर्ने, दसदिनपछि सुनेमा पूरै कर्म गर्नुपर्दछ ।

१९. क्रिया गरिरहेको व्यक्ति बिरामी भएमा या मरेमा के गर्ने ?

☞ कुनै अर्को व्यक्तिलाई क्रियापुत्र बनाएर गर्नु पर्दछ । बिरामी मात्र भए उपचार गर्न लगेर पछि चोख्याउनु पर्दछ ।

२०. गर्भिणी स्त्रीको मृत्यु भएमा के गर्ने ?

☞ शिशु झिकेर जिउँदो भए घरमा पठाउनु, मरेको भए जमिनमुनि राखेर स्त्रीलाई पञ्चगव्यले नुहाएर दाह गर्नुपर्दछ ।

२१. रजस्वला स्त्रीको मृत्यु भएमा के गर्ने ?

☞ पञ्चगव्यले नुहाइदिनु र दाह गर्नु ।

२२. नमरेको व्यक्तिको भुलले क्रिया हुन गएमा के गर्ने ?

☞ घिउले स्नान गराएर जातकर्मदेखि व्रतबन्धसम्मको संस्कार गरी पहिलेकै पत्नीसँग विवाह पनि गरिदिनु पर्दछ ।

२३. सूतक र जुठोमा सन्ध्यावन्दनादि कर्म गर्न हुन्छ कि हुँदैन ?

☞ विनामन्त्रले प्राणायाम गरेर गर्नुपर्दछ । गायत्री जप पनि मनले मात्र गर्नुपर्दछ । विधिपूर्वक मन्त्रोच्चारण गरेर गरियो भने पहिले गरेको पुण्य सबै नष्ट हुन्छ र अरू नित्य नैमित्तिक कर्महरू पनि गर्नु हुँदैन ।

२४. बद्रि केदार आदि तीर्थमा श्राद्ध गरेपछि फेरि श्राद्ध गर्नुपर्छ कि पर्दैन ?

☞ पर्छ, किनकि त्यो तीर्थको महिमा मात्र हो ।

२५. एकादशीका दिन पितृप्रसाद खानुपरेमा हुन्छ कि हुँदैन ?

☞ पितृकार्य ठूलो भएको हुनाले हुन्छ दोष लाग्दैन तर प्रसाद खाइसकेपछि पुनः व्रत गर्नुपर्दछ ।

सुलभ तरिकाबाट बाँच्न सक्ने केही मुख्य मुख्य ध्यान, प्राणायाम मुद्रा र नियमहरू

१. तनावलाई व्यवस्थापन गर्ने।
२. निद्रामा सुधार गर्ने।
३. रिस नियन्त्रण गर्ने।
४. अल्छीपनबाट मुक्त हुने।
५. कहिले पनि दोधार भएर काम नगर्ने।
६. दिमाग शक्तिशाली बनाउने।
७. रोगप्रतिरोधक क्षमता बढाउने।
८. सधैँ खुसी रहने, हाँसिरहने, नरिसाउने।
९. अरूसित मेलमिलाप बढाउने।
१०. समूहमा बोल्ने, हितकारी वचन नजानी नजानी भए पनि बोल्ने।
११. असल साथीहरूको सङ्ख्या सधैँ बढाउने।
१२. धूम्रपान, मद्यपान, जुवा, तास तथा अन्य नसालु पदार्थहरूबाट सधैँ टाढा रहने।
१३. युवा युवतीहरू बरालिनबाट जोगिने।
१४. सधैँ सिर्जनशील हुने।
१५. नयाँ जीवन सुरु गर्दैछु भनेर कहिल्यै नबिर्सने।
१६. केही समस्या भए समस्यामा मिल्दोजुल्दो सामान टाढा राख्ने।
१७. मनमा कुरा खेल्यो भने लामो सास फेर्ने।
१८. विचारहरूबाट मन बहलिन नदिने।
१९. अन्तरमनका तर्कनालाई साक्षी भावले नियाल्ने।
२०. तनाव बढेमा लामो लामो सास फेरेर आँखा चिम्लिएर तेस्रो नेत्रमा ध्यान केन्द्रित गर्ने।
२१. नियमित व्यायाम गर्ने।
२२. विपत्तिसँग जोगिने तर डर नराख्ने।
२३. मनपर्ने पुस्तकहरू पढ्ने।
२४. शास्त्रका वचन रुचिले पढ्ने।
२५. मनले देखेका राम्राराम्रा सामाजिक कामहरू गर्ने।
२६. कोहीदेखि रिस उठ्यो भने त्यसलाई लेखेर राख्ने। ताकि त्यो भविष्यमा राम्रो पुस्तक बनोस्।
२७. म खुसीसाथ अघि बढ्न सक्छु भन्ने दृढ विश्वास सधैँ राख्ने।
२८. तनाव सुरु हुनुभन्दा अगाडि पनि जीवन थियो भन्ने नबिर्सने।
२९. पहिले गरेका राम्रा राम्रा कामलाई फेरि सुरु गर्ने।
३०. अर्काको नोक्सान नचिताउने।
३१. पहिले गरेका गल्ती सुधार्ने।
३२. अभिमानी र स्वार्थी नहुने।
३३. अतीतको याद कहिल्यै नगर्ने।
३४. नजिकको साथी या मिल्ने परिवारको सदस्यसँग समस्याको बारेमा भन्ने।
३५. उपदेशलाई गाली नसम्झने।
३६. गरेको काम बिग्रन्छ कि भनेर चनाखो रहिरहने।
३७. खरो र रूखो बोली नबोल्ने।
३८. स्वस्थ खाना खाने।
३९. राम्रो रुचिको काममा सधैँ व्यस्त रहने।
४०. आफ्नो प्रशंसा भएन भनेर नरिसाउने, निन्दा भए सजग होइन्छ।
४१. समयमै सुत्ने, समयमै उठ्ने।
४२. निद्रा नलागेमा सुतेरै केही ध्यान गर्ने।
४३. बिहान योग व्यायाम, भगवान्को पूजा र पाठ गर्ने।
४४. राम्रो काम गर्ने तर भविष्यको चिन्ता कहिल्यै नगर्ने।
४५. जतिसुकै गाह्रो भए पनि खपेर ध्यान गरेर बस्ने। जे समस्या भए पनि भोलि अवश्य हटेर जानेछ भनेर सोच्ने।
४६. अरू नभ्याए पनि कपालभाँती, अनुलोम विलोम, भ्रामरी र समस्या अनुसारको व्यायाम प्रत्येक दिन गर्ने।
४७. जीवन आफैँमा उपलब्धि हो भनेर नबिर्सने।
४८. काम शरीरले भन्दा दिमागले धेरै गर्दछ भनेर बुझ्ने।
४९. माया र सम्मान सबैलाई चाहिन्छ भनेर बुझ्ने।

अन्य जानकारीका लागि सम्पर्क : फोन : ०१-४४७७३३८

पुस्तक प्राप्तिस्थान

सि.नं.	पुस्तक पसल	ठेगाना	फोन नं.
१.	दुर्गा पुस्तक पसल	देउपाटन, पशुपति, काठमाडौं	०१-४२४१३६
२.	नेशनल बुक्स सेन्टर	भोटाहिटी, काठमाडौं	०१-४२५२९००
३.	गुरु पुस्तक विक्रेता	भोटाहिटी, काठमाडौं	०१-४२३९२४२
४.	रत्नपुस्तक भण्डार	माइतिघर, काठमाडौं	०१-४२४०८५०
५.	सत्यनारायण मन्दिर	विराटनगर	९८४२२७२७०
६.	हरेक पुस्तक भण्डार	भोटाहिटी, काठमाडौं	०१-४२२०३७९
७.	जयगुरु बुक्स एण्ड स्टेशनरी	भोटाहिटी, बागबजार, बालाजु	०१-४२२२२१९
८.	रत्न पुस्तक भण्डार	भोटाहिटी, काठमाडौं	०१-४२२१८१८
९.	भाटभटेनी सुपरमार्केट	नक्साल, काठमाडौं	०१-४४१९१८१
१०.	भाटभटेनी सुपरमार्केट	महाराजगंज, काठमाडौं	०१-४०१६१३२
११.	भाटभटेनी सुपरमार्केट	चुच्चेपाटी, बौद्ध, काठमाडौं	०१-४४८५३९६
१२.	भाटभटेनी सुपरमार्केट	कोटेश्वर, काठमाडौं	०१-४६०१३०१
१३.	भाटभटेनी सुपरमार्केट	पुल्चोक, कृष्णगल्ली, ललितपुर	०१-५५२३५५५
१४.	भाटभटेनी सुपरमार्केट	न्युरोड, कास्की, पोखरा	०६१-५२३२६५
१५.	भाटभटेनी सुपरमार्केट	अनामनगर, काठमाडौं	०१-४२३१२७७
१६.	भाटभटेनी सुपरमार्केट	बालाजु, काठमाडौं	०१-४३६५७१६
१७.	भाटभटेनी सुपरमार्केट	कलंकी काठमाडौं	०१-४२८४५८८
१८.	भाटभटेनी सुपरमार्केट	पुतलीलाईन, धरान	०२५-५२६७३३
१९.	भाटभटेनी सुपरमार्केट	भरतपुर, चितवन	०५६-५३१९२३
२०.	भाटभटेनी सुपरमार्केट	त्रिपुरेश्वर, काठमाडौं	०१-४११७०३८
२१.	भाटभटेनी सुपरमार्केट	धिमी, भक्तपुर	९८५१०४०६२४
२२.	भाटभटेनी सुपरमार्केट	बुटवल	०७१-५४७९०२
२३.	भाटभटेनी सुपरमार्केट	धरानरोड, विराटनगर	९८५१०४०६२४
२४.	श्रीपशुपतिनाथ शरण सहकारी संस्था	देउपाटन, पशुपति, काठमाडौं	०१-६९२४८३३
२५.	लक्ष्मी पूजासामाग्री पसल	पशुपति, काठमाडौं	०१-४४६१०४६
२६.	दुर्गा पुस्तक भण्डार	इटहरी, सुनसरी	९८०२७००१८८
२७.	हेरिटेज पब्लिसर्स एण्ड डिष्ट्रिब्युटर्स	भोटाहिटी, काठमाडौं	०१-४२२१२९१
२८.	धार्मिक पूजासामग्री भण्डार	नारायणघाट, चितवन	०५६-५३१६१५
२९.	दुर्गा पुस्तक भण्डार	ट्राफिक चौक, बुटवल	९८४२०८०४१९
३०.	हिमालय बुक्स हाउस	मणिपथ, बुटवल	०७१-५४१००९
३१.	वैभव लक्ष्मी पूजा सामग्री भण्डार	बिर्तामोड, झापा	०२३-६९२२१८
३२.	लुम्बिनी पुस्तक तथा पूजासामग्री भण्डार	बुटवल	९८४७०११९११
३३.	वैदिक पूजासामग्री भण्डार	पुतलीबजार, नारायणघाट	०५६-५२०९०९
३४	पाञ्चायन पूजासामग्री पसल	दमक, झापा	९८५२६७८८८४